कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक

हस्तलिखित संग्रह

B 386

दाखल क्र M ~~386~~ विषय पुण

नांव पुणराज

लेखक/लिपीकार

पृष्ठ २93

काळ शके १७८५ पूर्ण/~~अपूर्ण~~

अथव्रतराजानुक्रमणिकाप्रारंभः

॥श्रीगणेशायनमः॥ अथव्रतराजस्यानुक्रमणिकाप्रारंभः॥

१ मंगलाचरणं·
१ व्रतलक्षणं·
१ व्रतकालः
२ व्रतदेशः
२ व्रताधिकारिणः
३ व्रतधर्माः
४ उपवासधर्माः
५ हविष्याणि·
५ पंचरत्नानि·
६ पंचपल्लवाः
६ पंचगव्यस्वरूपं·
६ तन्मंत्राश्च·
६ पंचामृतानि·
६ षड्रसाः
६ चंदनभागाः
६ सर्वौषध्यः
६ सौभाग्याष्टकं·
६ अर्घ्याष्टांगानि
६ सर्वतोभद्रार्थपंचवर्णाः
६ कौतुकार्थदशपदार्थाः
६ सप्तमृत्तिकाः
६ सप्तधातवः
६ सप्तधान्यानि·
६ अष्टादशधान्यानि·
६ दशशाकप्रकाराः
६ कुंभलक्षणं·
६ प्रतिमाद्रव्यपरिमाणं·
६ अनादेशेहोमसंख्या·
६ कलशाधस्थधान्यं·
६ अनादेशेहोमद्रव्यं·
६ अनादेशेमंत्रदैवतं·
६ द्रव्याभावेप्रतिनिधिः
७ पवित्रलक्षणं·
७ इध्माःधूपा·
७ सुवर्णमानं·
७ रजतमानं·
७ ताम्रमानं·
७ धान्यमानं·
७ होमद्रव्यमानं·
८ ऋत्विग्वरणं·
८ आचार्यादेर्भूषणानि·
८ व्रतमधुपर्कः
८ ऋत्विक्संख्या·
८ सर्वतोभद्रमंडलं·
८ लिंगतोभद्रं·
८ चतुर्लिंगतोभद्रं·
८ द्वादशलिंगतोभद्रं·
८ सर्वतोभद्रमंडलविधिः
८ मंडलदेवतामंत्रादि
९ लक्षपूजोद्यापनं·
१० मूर्त्यग्न्युत्तारणं·
१० षोडशोपचारपूजा·
११ प्राणप्रतिष्ठा·
११ अग्निसुखं·
१४ मुद्रालक्षणं·
१४ अष्टत्रिंशदादयउपचाराः
१५ उद्वर्तनप्रकाराः
१५ स्नानपात्रेस्थापनीयद्रव्याणि·
१५ आचमनपात्रस्थद्रव्याणि·
१५ द्रव्याभावेप्रतिनिधिः
१५ मूर्त्यादिस्नाननिर्णयः
१५ विष्ण्वादिदेवतापूजनेवर्ज्यद्रव्याणि·

१५ पूजनेशंखग्राह्याग्राह्यविचारः
१५ उद्यापनानुक्तोद्यापनयोर्विधिः
१५ व्रतभंगेसंपूर्णतायांविधिः
१५ सामान्यपूजाविधिः
१६ प्रतिपद्व्रतानुक्रमणिका·
१६ संवत्सरविधिः
१७ आरोग्यप्रतिपद्व्रतं·
१८ विद्याप्रतिपद्व्रतं·
१८ तिलकव्रतं·
१८ रोटकव्रतं·
१८ सर्वशिवव्रतेषुपूजा·
२० दौहित्रप्रतिपत्·
२० नवरात्रारंभः
२० घटस्थापनविधिः
२२ द्यूतप्रतिपत्कथा·
२४ बलिराज्यप्रतिपत्कथा·
२४ अन्नकूटकथा·
२५ यमद्वितीयानिर्णयः
२६ यमद्वितीयाकथा·
२७ अथतृतीयाअनुक्रमणिका·
२७ सौभाग्यशयनव्रतंच·
२७ गौरीदोलोत्सवः
२८ मनोरथतृतीयाव्रतं·
२८ अरुंधतीव्रतं·
२९ अरुंधतीव्रतकथा·
३० अरुंधतीव्रतोद्यापनं·
३० अक्षय्यतृतीयाव्रतं·
३१ अक्षय्यतृतीयाकथा·
३१ स्वर्णगौरीव्रतंपूजाच·
३२ स्वर्णगौरीकथा·
३२ स्वर्णगौरीव्रतोद्यापनं·
३२ श्रावणशुक्लतृतीयायांस्फक्तव्रतं
३४ हरितालिकाव्रतंपूजाच·
३५ हरितालिकाकथा·
३६ हरितालिकोद्यापनं·
३६ बृहद्गौरीव्रतपूजा·
३७ बृहद्गौरीकथा·
३८ सौभाग्यसुंदरीव्रतं·
४० चतुर्थीव्रतानुक्रमणिका·
४० संकष्टचतुर्थीव्रतं·
४० संकष्टचतुर्थीव्रतविधिः
४१ संकष्टचतुर्थीकथा·
४२ दूर्वागणपतिव्रतं·
४३ एकविंशतिगणपतिपूजनं·
४४ एकविंशतिगणपतिकथा·
४६ अन्यत्स्कांदोक्तदूर्वागणपतिव्रतं
४७ सिद्धिविनायकव्रतपूजा·
४८ सिद्धिविनायकव्रतकथा·
४९ स्यमंतकोपाख्यानं·
५२ कपर्दीगणपतिव्रतं·
५३ कपर्दीगणपतिकथा
५५ दशरथललिताव्रतपूजा·
५५ दशरथललिताकथा·
५५ दशरथललितोद्यापनं·
५६ करकचतुर्थीव्रतंकथाच
५७ गौरीचतुर्थीव्रतं·
५७ वरदचतुर्थीव्रतं·
५७ तिलचतुर्थीव्रतं·
६० संकष्टनाशनकथा
६१ अंगारकचतुर्थीव्रतं·
६२ पंचमीव्रतानुक्रमणिका·
६३ चैत्रशुक्लपंचम्यांहरिपूजनं·
६३ नागपंचमीपूजानिर्णयः
६३ नागदष्टव्रतं·

६३ ऋषिपंचमीव्रतं·
६४ ऋषिपूजा·
६४ ऋषिपंचमीकथा·
६६ ऋषिपंचम्युद्यापनं·
६७ उपांगललिताव्रतं·
६७ उपांगललितापूजा·
६९ उपांगललिताकथा
७२ उपांगललितोद्यापनं·
७२ वसंतपंचमीविधिः
७२ षष्ठीव्रतानुक्रमणिका·
७२ ललिताषष्ठीव्रतं·
७२ कपिलाषष्ठीव्रतंकथाच·
७४ कपिलाषष्ठ्युद्यापनं·
७४ स्कंदषष्ठीव्रतं·
७५ चंपाषष्ठीव्रतं·
७६ सप्तमीव्रतस्यानुक्रमणिका·
७६ वैशाखशुक्लसप्तम्यांगंगोत्पत्तिः
७६ शीतलासप्तमीव्रतं·
७७ शीतलाकथा·
७७ अमुक्ताभरणसप्तमीव्रतं·
७८ अमुक्ताभरणसप्तमीकथा·
७९ सरस्वतीपूजाविधिः
७९ रथसप्तमीव्रतं·
८० रथसप्तमीकथा·
८१ अचलासप्तमीव्रतं·
८१ पुत्रसप्तमीव्रतं·
८२ अष्टमीव्रतानुक्रमणिका·
८२ चैत्रशुक्लाष्टम्यांभवान्युत्पत्तिः
८२ बुधाष्टमीव्रतं·
८२ व्रतविधिः
८२ बुधाष्टमीकथा·
८४ बुधाष्टम्युद्यापनं·
८५ दशाफलाष्टमीव्रतं·
८५ पूजाविधिः
८५ दशाफलाष्टमीकथा·
८७ जन्माष्टमीव्रतं·
८७ पूजाविधिः
८८ जन्माष्टमीकथा·
९२ जन्माष्टम्युद्यापनं·
९३ ज्येष्ठाष्टमीव्रतं·
९३ पूजा·
९३ ज्येष्ठाष्टमीकथा·
९५ दूर्वाष्टमीव्रतं·
९६ महालक्ष्मीव्रतं·
९६ व्रतविधिः
९७ महालक्ष्मीकथा·
१०२ महाष्टमीव्रतं·
१०२ अशोकाष्टमीव्रतं·
१०२ कालभैरवाष्टमीव्रतं·
१०३ नवमीव्रतानुक्रमणिका·
१०३ रामनवमीव्रतं·
१०५ रामपूजा·
१०६ रामनवमीकथा·
१०८ रामनामव्रतकथोद्यापनं·
१०९ अदुःखनवमीव्रतं·
१०९ अदुःखनवमीकथा·
११० महानवमीदुर्गाव्रतं·
११५ अक्षय्यनवमीव्रतं·
११७ दशमीव्रतानुक्रमणिका·
११७ दशहराव्रतं·
११७ दशहरास्तोत्रं·
११८ आशादशमीव्रतं·
११९ दशावतारव्रतं·
११९ विजयादशमीव्रतं·

१२० एकादशीव्रतस्यानुक्रमणिका·
१२० एकादश्युपवासनिर्णयः
१२१ एकादश्यांकाम्यव्रतविधिः
१२२ शुक्लकृष्णैकादश्युद्यापनं
१२२ पूजाविधिः
१२३ साधारणैकादश्युद्यापनं
१२५ गोपद्मव्रतोद्यापनंपूजाच·
१२६ गोपद्मकथा·
१२७ पुरुषोत्तमएकादशीव्रतं·
१२८ प्रबोधविधिः
१२८ भीष्मपंचकव्रतं·
प्रबोधमंत्रास्तुलसीविवाहश्च·
१२९ मार्गशीर्षकृष्णैकादश्युत्पत्तिकथा·
१३१ मार्गशीर्षशुक्लैकादश्यांवैतरणीव्रतं·
१३३ एकादशीकथानुक्रमणिका·
मार्गशीर्षकृष्णैकादशीकथा·
१३५ मार्गशीर्षशुक्लैकादशीकथा·
१३६ पौषकृष्णैकादशीकथा·
१३७ पौषशुक्लैकादशीकथा·
१३८ माघकृष्णैकादशीकथा·
१३९ माघशुक्लैकादशीकथा·
१४१ फाल्गुनकृष्णैकादशीकथा·
१४२ फाल्गुनशुक्लैकादशीकथा·
१४३ चैत्रकृष्णैकादशीकथा·
१४४ चैत्रशुक्लैकादशीकथा·
१४५ वैशाखकृष्णैकादशीकथा·
१४५ वैशाखशुक्लैकादशीकथा·
१४६ ज्येष्ठकृष्णैकादशीकथा·
१४७ ज्येष्ठशुक्लैकादशीकथा·
१४८ आषाढकृष्णैकादशीकथा·
१४९ आषाढशुक्लैकादशीकथा·
१५० चातुर्मास्यमाहात्म्यं·
१५६ श्रावणकृष्णैकादशीकथा·
१५७ श्रावणशुक्लैकादशीकथा·
१५८ भाद्रपदकृष्णैकादशीकथा·
१५८ भाद्रपदशुक्लैकादशीकथा·
१५९ आश्विनकृष्णैकादशीकथा·
१६० आश्विनशुक्लैकादशीकथा·
१६० कार्त्तिककृष्णैकादशीकथा·
१६२ कार्त्तिकशुक्लैकादशीक०
१६४ अधिकमासशुक्लैकादशीक०
१६६ अधिकमासकृष्णैकादशीक०
१६७ द्वादशीव्रतानुक्रमणिका·
१६७ द्वादशीदमनोत्सवः
१६७ वैशाखद्वादश्यांस्नाना०
१६८ आषाढद्वादशीपारणानि·
१६८ श्रावणद्वादश्यांदधिव्रतं·
१६८ पवित्रारोपणं·
१६८ श्रवणद्वादशीनिर्णयपूर्वकंव्रतम्
१६८ श्रवणद्वादशीव्रतविधिः
१७१ श्रवणद्वादश्यामेववामनजयंतीव्रतं
१७२ श्रवणद्वादश्युद्यापनंपूजाच
१७३ सुरूपद्वादशीव्रतं·
१७५ त्रयोदशीव्रतानुक्रमणिका·
१७६ जयापार्वतीव्रतं·
१७६ गोत्रिरात्रव्रतं·
१७७ गुर्जराचारप्राप्तगोत्रिरात्रव्रतं·
१७९ अशोकत्रिरात्रव्रतम्
१८१ त्रयोदश्यांमहावारुणिकोयोगः
१८१ शनिप्रदोषव्रतं·
१८३ शनिप्रदोषपूजा·

१८४ पक्षप्रदोषव्रतं·
१८७ अनंगत्रयोदशीव्रतं·
१८८ अथचतुर्दशीव्रतानुक्रमणिका
१८८ चैत्रशुक्लचतुर्दश्यांस्नाना·
१८८ नृसिंहचतुर्दशीव्रतं
१८८ नृसिंहचतुर्दशीकथा·
१९० अनंतचतुर्दशीव्रतं·
१९० अनंतपूजासंकल्पः
१९० यमुनापूजा·
१९१ अनंतपूजा·
१९३ चतुर्दशीकथा·
१९५ अनंतचतुर्दश्युद्यापनं·
१९७ नष्टदोरकविधिः
१९७ कदलीव्रतविधिः
१९७ उमामहेश्वरसहितकदलीपू
१९८ कदलीव्रतकथा·
१९८ कदलीव्रतोद्यापनं·
१९९ नरकचतुर्दशीव्रतं·
१९९ नरकचतुर्दशीकथा·
२०० वैकुंठचतुर्दशीव्रतं·
२०० वैकुंठचतुर्दशीकथा·
२०१ शिवरात्रिव्रतनिर्णयः
२०२ शिवरात्रिव्रतपूजाविधिः
२०२ शिवरात्रिकथा·
२०७ शिवरात्र्युद्यापनं·
२०८ पौर्णमासीव्रतानुक्रमणिका
२०८ पूर्णिमानिर्णयः
२०८ वटसावित्रीव्रतनिर्णयः
२०८ वटसावित्रीव्रतविधिः
२०९ वटसावित्रीपूजा·
२०९ वटसावित्रीकथा·
२१३ वटसावित्र्युद्यापनं·
२१४ गोपद्मव्रतपूजा·
२१५ गोपद्मकथा·
२१५ कोकिलाव्रतनिर्णयः
२१६ कोकिलापूजा·
२१६ कोकिलाव्रतकथा·
२१८ कोकिलाव्रतोद्यापनं·
२१९ रक्षाबंधनविधिः
२१९ उमामहेश्वरव्रतं·
२२० उमामहेश्वरव्रतकथा·
२२२ कोजागरव्रतनिर्णयः
२२३ त्रिपुरोत्सवः
२२४ कार्तिकमासोद्यापनं·
२२५ बत्तिशीपूर्णिमाव्रतं·
२२५ बत्तिशीव्रतांगपूजा·
२२५ बत्तिशीव्रतकथा·
२२७ बत्तिशीव्रतोद्यापनं·
२२७ होलिकोत्सवः
२२८ अमावास्यानुक्रमणिका·
२२८ भाद्रपदामावास्यायांकुशग्रहणं·
२२८ अमावास्यायांपिठोरीव्रतं·
२२९ आश्विनअमावास्यायांगजच्छायाविधिः
२२९ लक्ष्मीव्रतं·
२२९ गौरीतपोव्रतं·
२३० नद्व्रतोद्यापनं·
२३१ सोमवतीव्रतनिर्णयः
२३१ सोमवतीपूजा·
२३२ सोमवतीकथा·
२३४ अमावास्यायामर्धोदयः
२३५ मलमासादिव्रतानुक्रमणिका·

२३६ मलमासव्रतं·
२३८ स्वस्तिकव्रतंचातुर्मास्ये·
२३९ रविवारव्रतं·
२४० रविवारकथा·
२४० आशादित्यव्रतं·
२४२ रवौदानफलपूजा·
२४२ दानफलकथा·
२४३ सोमवारव्रतपूजा·
२४३ सोमवारकथा·
२४६ एकभुक्तसोमवारव्रतं·
२४७ एकभुक्तसोमवारव्रतोद्यापनम्
२४८ मंगलव्रतं·
२४९ मंगलवारकथा·
२५० मंगलव्रतोद्यापनं·
२५० शुक्रवारव्रतं·
२५१ शुक्रवासरकथा·
२५२ शनैश्चरव्रतपूजा·
२५२ शनैश्चरकथा·
२५२ व्यतीपातव्रतं·
२५४ नारदपुराणांतर्गतव्यतीपातव्रतं·
२५५ मासोपवासव्रतं·
२५७ धारणापारणाव्रतं·
२५७ संक्रांत्यादिव्रतानुक्रमणिका·
२५७ धान्यसंक्रांतिव्रतं·
२५८ लवणसंक्रांतिव्रतं·
२५८ भोगसंक्रांतिव्रतं·
२५८ रूपसंक्रांतिव्रतं·
२५८ तेजःसंक्रांतिः
२५८ सौभाग्यसंक्रांतिः
२५८ तांबूलसंक्रांतिः
२५८ मनोरथसंक्रांतिः
२५८ अशोकसंक्रांतिः
२५९ आयुःसंक्रांतिः
२५९ धनसंक्रांतिः
२५९ सर्वसंक्रांत्युद्यापनं·
२५९ धनसंक्रमणेविशेषः
२५९ रविघृतस्नानं·
२५९ मकरसंक्रांतौघृतकंबलमहिमा·
२६० मकरसंक्रांतौदधिमंथनदानं·
२६० दधिमंथनकथा·
२६० तांबूलोद्यापनं·
२६१ मौनव्रतोद्यापनं·
२६१ प्रपादानविधानं·
२६१ लक्षपद्मविधिः
२६२ लक्षदीपविधिः
२६२ लक्षदूर्वापूजा·
२६४ शिवलक्षप्रदक्षिणाविधिः
२६५ अश्वत्थलक्षप्रदक्षिणाविधिः
२६७ विष्णुलक्षप्रदक्षिणाविधिः
२६७ तुलसीलक्षप्रदक्षिणाविधिः
२६८ गोब्राह्मणाग्निहनुमत्प्रदक्षिणाविधिः
२६९ लक्षबिल्वपूजनं·
२७० शिवानानालक्षपूजाविधिः
२७१ तुलसीलक्षपत्रपूजा·
२७१ विष्णुलक्षपुष्पपूजा·
२७२ बिल्ववर्त्तिव्रतोद्यापनं·
२७३ रुद्रवर्त्तिव्रतोद्यापनं·

२७४ माणिक्यवर्त्युद्यापनं·
२७५ विष्णुवर्त्तिव्रत·
२७६ देहवर्त्तिव्रतोद्यापनं
२७७ विष्णुसूर्यलक्षनमस्कारः
२७८ मंगलागौरीव्रतानुक्रमणिका·
२७८ मंगलागौरीव्रतं·
२७८ मंगलागौरीपूजा·
२७९ मंगलागौरीकथा·
२८२ मौनव्रतं·
२८२ पंचधान्यलक्षपूजा·
२८३ शिवामुष्टिव्रतं·
२८४ हस्तगौरीव्रतं·
२८५ हस्तगौरीपूजा·
२८६ कूष्मांडीव्रतं·
२८७ कर्कटिकाव्रतं·
२८९ कर्कटीपूजा·
२८९ विष्णुपंचकव्रतं·
२९० विष्णुपंचकव्रतोद्यापनं·
२९१ कोटिदीपदानविधिः
२९१ पार्थिवलिंगोद्यापनं·
२९१ व्रतराजानुक्रमणिकाश्लोकाः
२९३ सप्तधान्यलक्षपूजा·
२९३ फलानांलक्षपूजा·
२९३ फलपूजोद्यापनं·

इतिव्रतराजस्यानुक्रमणिकासमाप्ता·
श्रीसांबसदाशिवार्पणमस्तु·शिवमस्तुसर्वजगतः॥

॥ छ ॥

॥ छ ॥

हें अनुक्रमणिकेनें पुस्तक रामवाडीच्यानाक्यावर ज्ञानसागरछापखान्यांत छापिलें असे॥ शके १७८५ रुधिरोद्गारीनामसंव॰
फाल्गुनेमासेशुक्लपक्षे चतुर्थ्यां तिथौ भृगुवासरे तद्दिनेदंपुस्तकंसमाप्तं·
इतिअनुक्रमणिकासमाप्ता·

॥ इतिव्रतराजस्यानुक्रमणिकासमाप्ता· ॥ छ ॥

॥ अथव्रतराजप्रारंभः श्री ॥

श्रीगणेशायनमः श्रीगुरुभ्योनमः ॐकारविघ्नेशगुरून्सरस्वतींगौरीशसूर्यौचहरिंचभैरवं॥प्रणम्यदेवान्कुरुतेहिग्रंथं-
दैवज्ञशर्माजगतोहिताय॥१॥ विष्ण्वर्चनंदानशिवार्चनंचउत्सर्गधर्मव्रतनिर्णयंच॥ वेदात्पुराणात्स्मृतितश्चतद्वद्व्रतोक्तसिद्धं
तविधिंविधत्ते॥२॥ संगृह्यसर्वस्यमतंपुराणंसिद्धांतवाक्यंमुनिभिःप्रणीतं॥ लोकोपकारायकृतोनिबंधोव्रतप्रकाशःसुधि
यांमुदेस्यात् ३ यावंतोब्राह्मणालोकेधर्मशास्त्रविशारदाः तावंतःकृपयायुक्ताःकुर्वंतुग्रंथशोधनं॥४॥ विज्ञाप्यंतेमयास
र्वेपंडितागुणमंडिताः प्रचारणीयोग्रंथोयंबालवद्बालकस्यमे ५ रामांकमुनिभूसंख्ये १७९३ वस्विषंगेंदुसंख्यके १६५८
वर्षेशाकेशुक्लपक्षेपंचम्यांतपसःशुभे ६ विलोक्यविविधान्ग्रंथाँल्लिख्यतेसज्जनायवै तन्निमित्तोमयारंभःकिमज्ञातंम-
नीषिणः ७ चित्तपावनजातीयःशांडिल्यकुलमंडणः गोपालात्मजदैवज्ञःसंगमेश्वरसंज्ञितः।८ दुर्गाघाटेवसन्काश्यां
नत्वापितृपितामहान् कुर्वेवैविश्वनाथोहंव्रतराजंसुविस्तरम् ९ ॥अथव्रतराजप्रारंभः॥ ॥अत्रचस्वकर्त
व्यविषयोनियतःसंकल्पोव्रतमिति तत्रअग्निहोत्रसंध्यावंदनादिविषयेसंकल्पे अतिप्रसक्तेर्किंत्वाभियुक्तव्रतप्रसिद्धि
विषयः संकल्पविशेषःसएवव्रतं नचव्रतंसंकल्पयेदित्यनन्वयइतिवाच्यं पाकंपचतिदानंदद्यादितिवत्प्रत्ययानुग्रहार्थं
प्रयोगोपपत्तिरितिवक्तव्या अत्रव्रतकालमाह हेमाद्रौगार्ग्यः अस्तगेचगुरौशुक्रेबाल्येवृद्धेमलिम्लुचे उद्यापनमुपारं
भंव्रतानांनैवकारयेत् १ तत्रैववृद्धमनुबृहस्पती अग्न्याधानंप्रतिष्ठांचयज्ञदानव्रतानिच मांगल्यमभिषेकंचमलमासे
विवर्जयेत् बालेवायदिवावृद्धेशुक्रेचास्तंगतेगुरौ मलमासेचएतानिवर्जयेद्देवदर्शनं लल्लः नीचस्थेवक्रसंस्थेप्यतिच
रणगतेबालवृद्धास्तगेवासन्यासोदेवयात्राव्रतनियमविधिः कर्णवेधस्तुदीक्षा मौंजीबंधोथचूडापरिणयनविधिर्वास्तुदे
वप्रतिष्ठावर्ज्याः सद्भिः प्रयत्नात्रिदशपतिगुरौसिंहराशिस्थितेचेति॥नीचस्थोमकरस्थः कल्पतरौदेवीपुराणे सिंहसंस्थं
गुरुंशुक्रंसर्वारंभेषुवर्जयेत् प्रारब्धंनचसिद्ध्येतमहाभयकरंभवेत् पुत्रमित्रकलत्राणिहन्याच्छीघ्रंनसंशयः देवारामत

डागेषुव्रतोद्यानगृहेषुच सिंहस्थंमकरस्थंचगुरुंयत्नेनवर्जयेत् वसिष्ठः सिंहस्थेतुमघासंस्थंगुरुंयत्नेनवर्जयेत् अन्यत्रसिंहभागेतुसिंहस्थोपिनदुष्यति सिंहस्थगुरोर्वर्जनीयत्वंनर्मदोत्तरभागएव अन्यत्रतुसिंहांशएववर्ज्यः तथाचमदनरत्नादिधृतकालविधाने सिंहस्थितःसुरगुरुर्यदिनर्मदायास्तंवर्जयेत्सकलकर्मसुसौम्यभागे विंध्यस्यदक्षिणादिशिप्रवदंतिचार्याः सिंहांशकेमृगपतावपिवर्जनीयः सिंहांशस्तुपूर्वाफाल्गुन्याः प्रथमःपादः मृगपतौमकरस्थेगुरौदेशविशेषमाह लल्लः नर्मदापूर्वभागेतुशोणस्योत्तरदक्षिणे गंडक्याःपश्चिमेभागेमकरस्थोनदोषभाक् केषांचित्स्त्रीकर्तृकाणामन्येषांचव्रतानामगस्त्योदयेप्यारंभनिषेधइति हेमाद्रौलौगाक्षिः उद्यानिकाशिवपवित्रकमेघपूजादूर्वाष्टमीफलविरूढकजागराणि स्त्रीणांव्रतानिनिखिलान्यपिवार्षिकाणिकुर्यादगस्त्यउदितेनशुभानिलिप्सुरिति उद्यानिकाव्रतविशेषः शिवपवित्रकंआषाढ्यामथवामाघ्यांविहितंशिवपवित्रारोपणं मेघपूजाव्रतविशेषः दुर्वाष्टमीभाद्रशुक्लाष्टमी फलविरूढकंभाद्रपदशुक्लचतुर्दश्यांपालीव्रतंकदलीव्रतापरनामकं जागरंआश्विनपौर्णमास्यांकोजागरव्रतं कार्तिकशुक्लचतुर्दश्यांविहितंजागरव्रतंवा अत्रोभयत्रागस्त्योदयस्यावश्यंभावित्वेनविधेरनवकाशापत्तेर्विकल्पोज्ञेयः वार्षिकाणीत्यत्रवर्षासुभवानिवार्षिकाणि इत्येवव्युत्पत्तिर्नतुवर्षेभवानीतितथासतिशरदादिग्रीष्मपर्यंतं अगस्त्योदयानुवृत्तेस्तन्मध्येविहितानांस्त्रीव्रतानांसर्वथानारंभएवापद्यतइति अगस्त्योदयकालश्चवदिवोदासीयेउदेतियाम्यांहरिसंक्रमाद्रवेरेकाधिकेविंशतिमेह्यगस्त्यः सप्तसप्तमेस्तंवृषसंक्रमाच्चप्रयातिगर्गादिभिरस्यभाणि व्रतारंभसमाप्त्योस्तिथिंविशिनष्टिहेमाद्रौसत्यव्रतः उदयस्थातिथिर्याहिनभवेद्दिनमध्यभाक् साखंडानव्रतानांस्यादारंभश्चसमापनं एतद्व्यतिरिक्तायामखंडायांप्रारंभमाह तत्रैववृद्धवसिष्ठः अखंडव्यापिनीमार्तंडायद्यखंडाभवेत्तिथिः व्रतप्रारंभणंतस्यामनस्तगुरुशुक्रयुगिति अनस्तमितगुरुशुक्रायांतिथौव्रतप्रारंभणीयमित्यर्थः रत्नमालायांसोमसौम्यगुरुशुक्रवासराः सर्वकर्मसुभवंतिसिद्धिदाः भानुभौमशनिवासरेषुचप्रोक्तमेवखलुकर्मसिध्यति विरुद्धसंज्ञाइहयेचयोगास्तेषामनिष्टः

खलुपादआद्यःसर्वैधृतिस्त्वव्यतिपातनामासर्वोप्यनिष्टःपरिघस्यचार्धं तिस्त्ररुक्तयोगेप्रथमेसवज्रेव्याघातसंज्ञेनवपंचशूलेगं
डेतिगंडेत्वषडेवनाड्यःशुभेषुकार्येषुविवर्जनीयाः दर्शसंक्रांतियातोपरिघमुखदलंवैधृतिंपात्योगंविष्कंभाद्यास्त्रिनाडीः शुभकृति
षुचषट्गंडयोःपंचशूले व्याघातेवज्रकेंकाः पितृमृतिर्दिवसोनाधिमासान्कुहोराजह्याज्जन्मोत्थमासोडुतिथिखलुतिथिंव्युग्द
मांन्ध्रुडुमांच ब्रह्मयामले दिनभद्रायदारात्रौरात्रिभद्रायदादिवा नत्याज्याशुभकार्येषुप्राहुरेवपुरातनाइतिअथवेदव्यासः सर्वे-
शिलोच्चयाःपुण्याःसागराःसरितस्तथा अरण्यानिचपुण्यानिविशेषान्नैमिषंतथा देवीपुराणे देशोनदीगयाशैलगंगानर्मदपुष्क
रं वाराणसीकुरुक्षेत्रंप्रयागंजंबुकेश्वरं केदारंवामपादंचकुडवंपुष्करद्वयं सोमेश्वरंमहापुण्यंतथाचामरकंटकं कालंजरंतथा
विंध्यंयत्रवासोगुहस्यच गुहःस्वामिकार्तिकेयःमनुः सरस्वतीदृषद्वत्योर्देवनद्योर्यदंतरं तंब्रह्मनिर्मितंदेशंब्रह्मावर्तंप्रचक्षते
यस्मिन्देशेयआचारःपारंपर्यक्रमागतः वर्णानांसांतरालानांससदाचारउच्यते कुरुक्षेत्रंचमत्स्याश्चपांचालाःशूरसैनिकाः-
एषब्रह्मर्षिदेशोवैब्रह्मावर्तादनंतरः मत्स्यः विराटः पांचालःकान्यकुब्जः शूरसैनिकाःमथुरादेशाः अनंतरःसमः हिमवद्विंध्य
योर्मध्येयत्प्राग्विनशनादपि प्रत्यगेवप्रयागाच्चमध्यदेशउदाहृतः विनशनंकुरुक्षेत्रं आसमुद्रात्तुवैपूर्वादासमुद्रात्तुपश्चिमात्
तयोरेवांतरंगीममा र्यावर्तंविदुर्बुधाः सिंधुनदीपश्चिमतीरव्यावृत्त्यर्थमित्याह कृष्णसारस्तुचरतिमृगोयत्रस्वभावतः सज्ञेयोय
ज्ञियोदेशोम्लेंछदेशस्ततःपरः एतान्द्विजातयोदेशान्संश्रयेरन्प्रयत्नतः याज्ञवल्क्यो यस्मिन्देशेमृगःकृष्णस्तस्मिन्धर्मा-
न्निबोधत अथव्रताधिकारिणःस्कांदे निजवर्णाश्रमाचारनिरतःशुद्धमानसः अलुब्धःसत्यवादीचसर्वभूतहितेरतः व्र
तेष्वधिकृतोराजन्नन्यथाविफलःश्रमः श्रद्धावान्पापभीरुश्चमदंदंभविवर्जितः पूर्वंनिश्चयमाश्रित्ययथावत्कर्मकारकः अवेदनिं
दकोधीमानधिकारीव्रतादिषु निजवर्णाश्रमाचारेत्यनेनचतुर्वर्णानामधिकारोगम्यते अतएवकौर्मे ब्राह्मणाःक्षत्रियावैश्या-
शूद्राश्चैवद्विजोत्तम अर्चयंतिमहादेवंयज्ञदानसमाधिभिः व्रतोपवासनियमैर्होमस्वाध्यायतर्पणैः तेषांवैरुद्रसायुज्यंसामीप्यं

चातिनिर्मलं सलोकताचसारूप्यंजायतेतत्प्रसादतः देवलोपि व्रतोपवासनियमैः शरीरोत्तापनैस्तथा वर्णाःसर्वेविमुच्यंतेपातकेभ्योनसंशयः अत्रअधिकारिविशेषणस्यपुंस्त्वस्याविवक्षितत्वात् स्त्रीणामप्यधिकारः भारतेमामुपाश्रित्यकौंतेययेपिस्युः पापयोनयः स्त्रियोवैश्यास्तथाशूद्रास्तेपियांतिपरांगतिं क्वचिन्म्लेंछानामप्यधिकारोहेमाद्रौदेवीपुराणे स्नातैःप्रमुदितैर्हृष्टैर्ब्राह्मणैः क्षत्रियैर्नृभिः वैश्यैः शूद्रैर्भक्तियुक्तैर्म्लेंछैरन्यैश्चमानवैः स्त्रीभिश्चकुरुशार्दूलतद्विधानमिदंशृणु वैश्यशूद्रयोस्तुद्विरात्राधिकोपवासोनभवति वैश्याःशूद्राश्चयेमोहादुपवासंप्रकुर्वते त्रिरात्रंपंचरात्रंवातेषांव्युष्टिर्नविद्यते प्राच्यलिखितनिषेधात् व्युष्टिःफलं सभर्तृकाणांस्त्रीणांभर्त्राज्ञांविनानाधिकारस्तथाचमदनरत्ने मार्कंडेयपुराणे यानारीत्वननुज्ञाताभर्त्रापित्रासुतेनवा निष्फलंतुभवेत्तस्यायत्करोतिव्रतादिकं भर्त्राज्ञयासर्वव्रतेष्वधिकारः भार्याभर्तर्मतेनैवव्रतादीन्याचरेत्सदेतिकात्यायनोक्तेः तथाच पत्यौजीवतियानारीत्युपवासव्रतंचरेत् आयुष्यंहरतेभर्तुःसानारीनरकंव्रजेत् इतिविष्णुवचनात् ..तद्भर्तुरनुज्ञापरं यत्तुकश्चित् नास्तिस्त्रीणांपृथग्यज्ञोनव्रतंनाप्युपोषणं भर्तृशुश्रुषयैवैतांल्लोकानिष्टान्व्रजंतिताः यद्देवेभ्योयच्चपित्रादिकेभ्यः कुर्याद्भर्ताभ्यर्चनंसत्क्रियांच तस्यत्वर्द्धं साफलंनान्यचित्तानारीभुंक्तेभर्तृशुश्रूषयैव इतिस्कांदात् तस्मात्सभर्तृकाणामेकादश्याद्युपवासादावनधिकारइति तन्न तस्यापिपृथक्स्वातंत्र्येणभर्तृननुज्ञापरत्वात् अतएवव्यासः कामंभर्तुरनुज्ञाताव्रतादिष्वधिकारिणी शंखोपि कामंभर्तुरनुज्ञयाव्रतोपवासनियमाः स्त्रीधर्माइति नचानुज्ञयाव्रतेष्विवयज्ञेपिपृथगधिकारापत्तिरितिशंक्यं तस्याःश्रुत्यध्ययनानधिकारात् यद्वास्कांदे भर्तुःशुश्रूषायास्तावकत्वेनाप्युपपन्नत्वादिति नचभर्तुरनुज्ञयैवाधिकारसिद्धेः विधवायाःव्रते अधिकारापत्तिरितिवाच्यं नारीखल्वननुज्ञाताभर्त्रापित्रासुतेनवा विफलंतद्भवेत्तस्यायत्करोत्यौर्ध्वदैहिकम् इतिमार्कंडेयोक्तेः पित्राद्याज्ञयातस्याअधिकारइतिहेमाद्रिः स्त्रीणांव्रतग्रहणेविशेषोहेमाद्रौहरिवंशे स्नानंचकार्यंशिरसस्ततःफलमवाप्नुयात् स्नात्वास्त्रीमानरुत्थायपतिंविज्ञापयेत्सती अथव्रतधर्माः व्रतसंकल्पविधिर्भारते गृहीत्वौदुंबरंपात्रंवारिपूर्णमुदङ्मु

स्वः उपवासंतुगृण्हीयाद्यद्वासंकल्पयेद्बुधः औदुंबरंताम्रमयम् औदुंबरंस्मृतंताम्रमितिविश्वोक्तेः यद्वान्यन्नक्तव्रतादिकंकल्प
येदितिकल्पतरुः श्रीदत्तस्तु कल्पतरुमतेवाकारश्चार्थेतेनायमर्थः यस्तुनक्तादिकर्तुमिच्छेत्तदपिउक्तविधिनैवगृण्हीया-
दितितन्मतंपरिष्कृत्यवाकारस्योपवासपदस्यचवैयर्थ्यापत्तेः यत्संकल्पयेत्तद्गृण्हीयादित्यनेनैवोपपत्तेरित्यदूषयत् ताम्रपात्राद्य-
भावेहस्तेनापिजलंगृहीत्वासंकल्पयेदितिउक्तं अतएवानंतभट्टाःवर्षेवधारयेदितिपाठः मदनरत्नेदेवलवाक्येतुयथासंकल्पयेदि-
तिपाठः यथाकामंफलमुल्लिखेदित्यर्थः अतएवमार्कंडेयः संकल्पंचयथाकुर्यात्स्नानदानव्रतादिके अनंतरंकृत्यमाह मदनरत्नेदे
वलः अभुक्त्वाप्रातराहारंस्नात्वाचम्यसमाहितः सूर्यायदेवताभ्यश्चनिवेद्यव्रतमाचरेत् अत्रप्रातर्व्रतमाचरेदित्येवान्वयः प्रधान
क्रियान्वयस्याभ्यर्हितत्वात् अभुक्त्वेतितु अशक्तस्याभ्यनुज्ञाते क्षीरादिभक्षणापवादः केचित्तु व्रतदिनेप्रातराहारं अभुक्त्वाव्रतमा
चरेदित्याहुः अत्रउपवासोव्रतेकार्यइत्यनेनैवाभुक्तवतोधिकारस्यप्राप्तत्वादेतस्यवैयर्थ्यापत्तेः अन्येतुपूर्वदिनेप्रातराहारमभु-
क्त्वा अर्थादेकभक्तंकृत्वास्नात्वाचम्यव्रतादिकंकुर्यादित्याहुः परेतुसर्वत्रपूर्वेद्युरेवसायंसंध्योत्तरंव्रतंग्राह्यंवारव्रतादौबहुशस्त-
थादृष्टत्वात् प्रातःस्नात्वेतिचान्वयइत्याहुः सामान्यधर्माहेमाद्रौभविष्ये क्षमासत्यंदयादानंशौचमिंद्रियनिग्रहः देवपूजाग्निह
वनंसंतोषःस्तेयवर्जनम् सर्वव्रतेष्वयंधर्मःसामान्योदशधास्थितः देवपूजायद्दैवत्यंव्रतंतस्यपूजाअग्निहवनंपूज्यदेवतोद्देशेनहो
मःउपक्रमादेतच्चसप्तमीव्रतेसूर्यपूजाअग्निहवनं नवमीव्रतेदुर्गापूजा अनुक्तदेवताव्रतेइष्टदेवतापूजा हवनंव्याहृतिहोमइति-
केचित् अत्रक्षमादीनांस्वातंत्र्यतयाचतुर्वर्गसाधनत्वेनविहितानांव्रतांगतयाविधानंस्वादिरंवीर्यकामस्ययूपंकुर्यादितिवत्संयो
गपृथक्त्वादुपपन्नमितिहेमाद्रिः सर्वव्रतेष्वित्यत्रसर्वव्रतपदंभविष्यपुराणोक्तं सर्वव्रतपरमतेव्रतांतरेविध्यंतरंसएवहोमादीनामंगत्वं-
नान्यथा अतएवएकादशीव्रतादौशिष्टानांहोमाद्यमाचरणमितिकेचित् येष्वेवपुराणांतरोक्तव्रतेषुहोमादिविधिरस्तितद्विषयकमे-
वसर्वपदमन्यथातदितरपरत्वेनसंकोचापत्तेरितिपृथ्वीचंद्रोदयेग्निपुराणेस्नात्वाव्रतवतासर्वव्रतेषुव्रतमूर्तयः पूज्याःसुवर्णमय्याद्याश्च

त्यावैभूमिशायिना जपोहोमश्चसामान्यंव्रतांतेदानमेवच चतुर्विंशद्द्वादशवापंचवात्रयएववा विप्राः पूज्यायथाशक्तितेभ्योदद्याच्च दक्षिणां व्रतमूर्तयः तद्देवप्रतिमाः देवलः ब्रह्मचर्यमहिंसाचसत्यमामिषवर्जनं व्रतेष्वेतानिचत्वारिचरितव्यानिनित्यशः स्त्रीणांतुप्रेक्षणात्स्पर्शात्ताभिः संकथनादपिनश्यतेब्रह्मचर्यंचनदारेष्वृतुसंगमात् स्वदारेष्वृतुसंगमादितिक्वचित्पाठः आमिषंमांसं आमिषमतिपानीयं गोवर्जक्षीरमामिषं मसूरमामिषंसस्ये फलेजंबीरमामिषम् आमिषंशुक्तिकाचूर्णं मारनालंतथामिषम् इतिस्मृत्यंतरोक्तम् व्रताद्यारंभेवृद्धिश्राद्धंकार्यं तदाहशातातपः नानिष्ट्वातुपितॄन्श्राद्धेकर्मकिंचित्समारभेत् गृहीतव्रतानाचरणेमदनरत्नेछागलेयः पूर्वंव्रतंगृहीत्वायोनाचरेत्काममोहितः जीवन्भवतिचांडालोमृतेश्वाभिजायते काममोहितइतिविशेषणाद्व्याध्यादिनानाचरणेनदोषः तथाचहेमाद्रौस्कांदे सर्वभूतभयंव्याधिप्रमादोगुरुशासनम् अव्रतघ्नानिपठ्यंतेसकृदेतानिशास्त्रतः सर्वेभ्योभूतेभ्यःसकाशाद्व्रतकर्तुर्भयादितिहेमाद्रिः मदनरत्नेतु सर्वभूतभयंव्याधिपपरिचितत्वात्व्याख्यातः सर्वभूतभयंभूतेभ्यः सर्पादिभयान्चव्रतांगवैकल्यते व्रतहानिर्भवतीत्यर्थः गुरुशासनंगुरोराज्ञासकृदुक्तिसकृत्यागेप्रायश्चित्तं तदुक्तंस्कांदगारुडयोः क्रोधात्प्रमादाल्लोभाद्वाव्रतभंगोभवेद्यदि दिनत्रयंनभुंजीतमुंडनंशिरसोथवा नचात्रप्रायश्चित्तोक्तेअतिक्रांतव्रतानाचरणमितिवाच्यं प्रायश्चित्तमिदंकृत्वापुनरेवव्रतीभवेत् इतिस्कांदात् अथोपवासधर्माः तत्रोपवासस्वरूपंकात्यायनवृद्धवसिष्ठाभ्यांदर्शितम् उपावृत्तस्यपापेभ्योयस्तुवासोगुणैः सहउपवासः सविज्ञेयःसर्वभोगविवर्जितः गुणैरिति तज्जाप्ययजनध्यान तत्कथाश्रवणादयःउपवासकृतामेते गुणाः प्रोक्तामनीषिभिः दयाचसर्वभूतेषुक्षांतिरनसूयाशौचमनायासोकार्पण्यंचमांगल्यमस्पृहेतिविष्णुधर्मोत्तरगौतमादिप्रतिपादिताः॥ ॥तच्छब्देनोपास्यादेवताव्रतदेवतावाएवंचपापानिवृत्त्यागुणानुष्ठानसहितोनिराहारस्यवासोवस्थानमुपवासइत्युक्तंभवति एवंचफलसाधनस्योपवासस्यस्वरूपमुक्तम् उपवासपदार्थस्तुस्मृतिपुराणे व्यवहारेरूढ्यानिराहारावस्थानमात्रम् वृद्धवसिष्ठः उपवासेतथाश्राद्धेनकुर्याद्दंतधावनम् काष्ठेनेतिशेषः अतएवतन्निंदतिदंतानांकाष्ठसंयोगोहंतिसप्तकुलानिचेतिवाक्यशेषा

द्विधेरिवनिषेधस्यापिविशेषपरतायुक्तैवतेन अलाभेवानिषेधेवाकाष्ठानांदंतधावने पर्णादिनाविशुद्ध्येतजिह्वोल्लेखः सदैवहि॥ इतिपै
ठीनसिवचनात् अलाभेदंतकाष्ठानांनिषिद्धायांतथातिथौ अपांद्वादशगंडूषैर्विदध्याद्दंतधावनम् इतिव्यासवचनंदेवलः असकृ
ज्जलपानाच्च सकृत्तांबूलचर्वणात् उपवासःप्रणश्येतदिवास्वापाच्चमैथुनात् अशक्तौतुतेनैवजलपानमभ्यनुज्ञातम् अत्ययेचांबुपा
नेननोपवासःप्रणश्यति अत्ययेजलपानंविनाप्राणात्ययेविष्णुधर्मे असकृज्जलपानंचदिवास्वापंचमैथुनं तांबूलचर्वणंमांसंवर्ज
येद्व्रतवासरे असकृदुक्त्यासकृज्जलपानेनदोषः अत्रपारणांतंव्रतंज्ञेयंव्रतांतेविप्रभोजनम् असमाप्तेव्रतेपूर्वंकुर्यान्नैवव्रतांतरं
इति तस्यापिव्रतवासरत्वान्मांसनिषेधः पारणादिनेएवउपवासप्रसक्त्यभावात् अतएवनिर्णयामृतेव्यासः वर्जयेत्पारणेमांसं
व्रताहेप्यौषधंसदा अष्टैतान्यव्रतघ्नानि आपोमूलंफलंपयः हविर्ब्राह्मणकाम्याचगुरोर्वचनमौषधं इतिस्कांदवचनात् प्रसक्तमौ
षधरूपमपिमांसंव्रताहेवर्जयेदित्यर्थः विष्णुपुराणे स्मृत्यालोकनगंधादिस्वादनंपरिकीर्तनं अन्नस्यवर्जयेत्सर्वंग्रासानांचा
भिकांक्षणम् गात्राभ्यंगंशिरोभ्यंगंतांबूलंचानुलेपनम् व्रतस्थोवर्जयेत्सर्वंयच्चान्यद्बलरागकृत् इतिहारीतः पतितपाखंडादि
नास्तिकादिसंभाषणानृताश्लीलादिकमुपवासादिषुवर्जयेत् अन्नादिपदेनयत्पुरुषार्थतयासर्वदानिषिद्धंतदपिक्रत्वर्थतयासं
गृह्यते अतएवव्रताधिकारेस्कमंतुः विहितस्याननुष्ठानमिंद्रियाणामनिग्रहः निषिद्धसेवनंनित्यंवर्जनीयंप्रयत्नतः पतितादेर्दर्शि
नंतुविष्णुपुराणे तस्यावलोकनात्सूर्यंपश्येतमतिमान्नरः स्पर्शादौविष्णुधर्मे संस्पर्शेचनरःस्नात्वाशुचिरादित्यदर्शनात् सं
भाष्यतान्शुचिपदंचिंतयेदच्युतंबुधः योगयाज्ञवल्क्यः ॥ यदिवाग्यमलोपःस्याद्व्रतदानक्रियादिषु व्याहरेद्वैष्णवंमंत्रंस्मरेद्वावि-
ष्णुमव्ययम् यमः मानसेनियमेलुप्तेस्मरेद्विष्णुमनामयम् बृहन्नारदीये रजस्वलांचचांडालंमहापातकिनंतथा सूतिकांपतितं
चैवउच्छिष्टंरजकादिकम् व्रतादिमध्येशृणुयाद्यद्येषांध्वनिमुत्तमः अष्टोत्तरसहस्रंतुजपेद्वैवेदमातरम् वेदमातागायत्री मि
ताक्षरायांदक्षः संध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु यदन्यत्कुरुतेकिंचिन्नतस्यफलमश्नुते अत्रप्रातःसंध्यैव अन्यां

गमित्याहुः अविशेषात्तत्संध्योत्तरभाविनि कर्मादौसांगमितियुक्तं आहुः प्राज्ञाः व्रतादिकालः संकल्पस्तु प्रातःसंध्यांकृत्वैवकार्यः संध्यांबुधः कृत्वासंकल्पंततआचरेत् इतिगौडनिबंधेऋग्स्मृतेः मार्कंडेयपुराणे सूर्योदयंविनानैव व्रतदानादिकक्रमइति क्रमइति उपक्रमः स्नानदानादिकाः क्रियाः सूर्योदयशब्देनउषःकालोप्रशस्यते तंविनारात्रौस्नानादिकंनकार्यमितिकल्पतरौ ॥ छंदोगपरिशिष्टे सदोपवीतिनाभाव्यंसदाबद्धशिखेनच विशिखोव्युपवीतिश्चयत्करोतिननत्कृतम् पित्र्यमंत्रानुद्रवणे आत्मालंभेधयेक्षणे अधोवायुसमुत्सर्गेप्रहारेनृत्तभाषणे मार्जारमूषकस्पर्शेआक्रोशेक्रोधसंभवे निमित्तेष्वेषुसर्वत्रकर्मकुर्वन्नपःस्पृशेत् मार्कंडेयपुराणे शिरस्नातश्चकुर्वीतदैवंपित्र्यमथापिवा वराहपुराणे स्नानसंध्यातर्पणादिजपहोमसुरार्चनम् उपवासवताकार्यंसायंसंध्याहुतीर्विना भगद्गीतायाम् तस्मादोमित्युदाहृत्ययज्ञदानतपःक्रियाः प्रवर्तंतेविधानोक्ताः सततंब्रह्मवादिनाम् तैत्तिरीये त्रिमात्रस्तुप्रयोक्तव्यः कर्मारंभेषुसर्वशः इतिसामान्यपरिभाषा विस्तृताचेयंसामान्यपरिभाषा आचारमयूखेद्रष्टव्या अत्रस्त्रीणांविशेषोहेमाद्रौपाद्मे गर्भिणीसूतिकादिश्चकुमारीचाथरोगिणी यदाशुद्धातदान्येनकारयेत्प्रयतास्वयम् प्रयताशुद्धास्वयंकुर्यादित्यर्थः पुंसोप्येषविधिर्लिंगस्याविवक्षितत्वादितिहेमाद्रिः एवंस्त्रीणांरजोदर्शनेपिकार्यम् तथाचसत्यव्रतः प्रारब्धदीर्घतपसांनारीणांयद्रजोभवेत् नचतत्रव्रतस्यस्यादुपरोधःकथंचन व्रतस्यउपवासस्येत्यर्थः पूजादिकंतुअन्येनकारयेत् तथाचमदनरत्नेमात्स्ये अंतरातुरजस्पर्शेपूजामन्येनकारयेत् सूतकेप्येवम् तथाचतत्रैव पूर्वसंकल्पितंयच्चव्रतंसुनियतव्रतैः तत्कर्तव्यंनरैःशुद्धंदानार्चनविवर्जितम् अन्येनकारयेदित्यपेक्षायांतत्रैवपैठीनसिः भार्यापत्युर्व्रतंकुर्याद्भार्यायाश्चपतिर्व्रतम् असामर्थ्येपरस्ताभ्यांव्रतभंगोनजायते तत्रैववायुपुराणे उपवासेत्वशक्तस्तु आहिताग्निरथापिवा पुत्राद्वाकारयेदन्याद्ब्राह्मणाद्वापिकारयेत् उपवासंप्रकुर्वाणः पुण्यंशतगुणंभवेत् नारीचपतिमुद्दिश्य एकादश्यामुपोषिता पुण्यंशतगुणंप्रोक्तमित्याहगालवोमुनिः मातामहादीनुद्दिश्यएकादश्यामुपोषणे कृतेचभक्तितोविप्राः समग्रंफलमाप्नुयुः मोक्षव्रतेप्रतिनिधिः तथाचमंडनः काम्येप्रतिनिधिर्नास्तिनित्यनैमि

त्तिकेनत्वकाम्येष्वुपक्रमादुर्ध्वंकेचित्प्रतिनिधिंविदुः नस्यात्प्रतिनिधिर्मंत्रस्वामिदेवाग्निकर्मसु सुदेशकालयोःशब्देनारणेःपुत्रभार्ययोःनापिप्रतिनिधातव्यंनिषिद्धंवस्तुकुत्रचित् अथव्रतेहविष्याणि हेमाद्रौछंदोगपरिशिष्टेकात्यायनः हविष्येषुयवामुख्यास्तदनुव्रीहयःस्मृताः माषकोद्रवगौरादीन्सर्वाभावेपिवर्जयेत् तत्रैवअग्निपुराणे व्रीहिचणकमुद्गाश्चकपालाःसलिलंपयःश्यामाकाश्चैवनीवारागोधूमाद्याव्रतेहिताः कूष्मांडालांबुवृंताकपालक्यज्योत्स्निकास्त्यजेत् चरुभैक्ष्यंसक्तुगुणाः शाकंदधिघृतंमधु श्यामाकाःशालिनीवारा यावकंमूलतंदुलं हविष्यंव्रतनक्तादावग्निकार्यादिकेहितं मधुमांसंविहातव्यंसर्वैश्चव्रतिभिस्तथा पालकीपाथरीज्योत्स्निकाकोशातकी तत्रैवभविष्ये हैमंतिकंसितास्विन्नंधान्यंमुद्गायवास्तिलाः कलायकंगुनीवारावास्तूकंहिलमोचिका षष्टिकाकालशाकंचमूलकंकेमुकेतरम् कंदःसैंधवःसामुद्रेगव्येचदधिसर्पिषी पयोदधिघृतंचैवपनसाम्रहरीतकी पिप्पलीजीरकंचैवनागरंगकतिंतिणी कदलीलवलीधात्रीफलान्यगुडमैक्षवं अतैलपक्वंमुनयोहविष्याणिप्रचक्षते लवणेमधुसर्पिषीइतिक्वचित्पाठः हैमंतिकंधान्यंकमलाःतदपिसीतंश्वेतं अश्विन्नंहविष्यंकलायाः संतिनारपर्यायाः मठरइतिप्रसिद्धाः वाटाणेइतिदक्षिणप्रसिद्धावास्तूकंबथुवाइतिख्यातःशाकःहिलंशक्रंमोचयतिइतिक्षीरस्वामी शक्रासारोहिलसारइतिप्रसिद्धः शाकःजलोद्भवःगौडदेशेहेलांचलेइतिप्रसिद्धाकालशाकउत्तरदेशेकालिकेतिप्रसिद्धं केमुकंकेपुत्राइतिपूर्वदेशेप्रसिद्धंनागरंनारिंगएरावतोनागरिंगोनादेयीभूमिजंबुकेत्यमरात् नागरंचैवेतिपाठेनागरंसुंठी लवलीरायआवळी इतिमहाराष्ट्रभाषयोच्यमानंफलं हरफरेवडाइतिमध्यदेशभाषयाअतैलपक्वंइत्येतत्कथितंहविष्याणामेवविशेषणं मनुःउत्पन्नानिपयःसोमोमांसंयच्चानुपस्कृतं अक्षारलवणंचैवप्रकृत्याहविरुच्यते अनुपस्कृतंअपक्वं अथव्रताद्युपयुक्तानिवस्तूनि तत्रपंचरत्नानिआदित्यपुराणे सुवर्णरजतंमुक्ताराजावर्तप्रवालकं रत्नपंचकमाख्यातंशेषंवस्तुब्रवीम्यहं कनकंकुलिशंनीलंपद्मरागंचमौक्तिकं एतानिपंचरत्नानिरत्नशास्त्रविदोविदुः इतिमेघप्रदीपधृतकालिकापुराणोक्तानिवा कुलिशंहीरकंस्मृत्यंतरे अभावेसर्वरत्नानांहेमसर्वत्रयोजयेत् विष्णुधर्मोत्तरे मुक्ताफलंहिरण्यंचवैडूर्यंपद्मरागकं

पुष्परागंचगोमेदंनीलंगारुत्मकंतथा प्रवालयुक्तान्युक्तानिमहारत्नानिवैनव हेमाद्रौब्रह्मांडपुराणे अश्वत्थोदुंबरप्लक्षचूतन्यग्रोधपल्लवाः पंचभंगाइतिख्याताःसर्वकर्मसुशोभनाः पंचभंगाः पंचपल्लवाः पंचगव्यंचतत्रैवस्कांदे गोमूत्रंगोमयंक्षीरंदधिसर्पिर्यथाक्रमम् विष्णुधर्मे गोमूत्रभागतश्चार्धसकृत्क्षीरस्यचत्रयं द्वयंदध्नोर्घृतस्यैकमेकश्चकुशवारिजः गोमूत्रप्रमाणंतुप्रायश्चितमयूखेज्ञेयं विष्णुधर्मे गायत्र्यादायगोमूत्रंगंधद्वारेतिगोमयं आप्यायस्वेतिक्षीरंचदधिक्राव्णोथवैदधि शुक्रमसीतिआज्यस्यदेवस्यत्वाकुशोदकं एभिरुक्तमंत्रराजैरुक्तपंचगव्यंप्रचक्षते पंचामृतंतुहेमाद्रौशिवधर्मे पंचामृतंदधिक्षीरसितामधुघृतस्मृतं अन्यत्र पयोदधिघृतंचैवशर्करामधुसंयुतं पंचामृतमितिख्यातंभाषितंमुनयोविदुः मदनरत्नेकात्यायनः आज्यंक्षीरंमधुतथामधुरत्रयमुच्यते मधुरोम्लश्चलवणः कषायस्तिक्तएवच कटुकश्चेतिराजेंद्ररसषट्कमुदाहृतं चंदनंतुगारुडे कस्तूरिकायाद्वौभागौचत्वारश्चंदनस्यच कुंकुमस्यत्रयश्चैवशशिनःस्याच्चतुःसमं कुंकुमं केशरं शशीकर्पूरः कर्पूरंचंदनंदर्पकुंकुमंचसमांशकं सर्वगंधमितिप्रोक्तं समस्तसुरभूषणंदर्पः कस्तूरिकातथा कस्तूरीह्यगुरुश्चैवकर्पूरश्चंदनंतथा कंकोलंचभवेदेभिःपंचभिर्यक्षकर्दमः अथसर्वौषधीः कुष्टंमांसीहरिद्रेद्वेमुराशैलेयचंदनं वचाचंपकमुस्तंचसर्वौषध्योदशस्मृताः पाद्मे इक्षवस्तृणराजंचनिष्पावाजाजिधान्यकं विकारवच्चगोक्षीरंकुसुमंकुंकुमंतथा लवणंचाष्टमंतत्रसौभाग्याष्टकमुच्यते तृणराजस्तालः अजाजिजीरकं आपःक्षीरंकुशाग्राणिदध्यक्षततिलास्तथा यवाःसिद्धार्थकाश्चेतिह्यर्घ्योष्टांगःप्रकीर्तितः पंचरात्रेरजांसिपंचवर्णानिमंडलार्थेहिकारयेत् शालितंदुलचूर्णेनशुक्लंवायवसंभवं रक्तंकुसुंभसिंदूरगैरिकादिसमुद्भवं हरितालोद्भवंपीतंरजनीसंभवंतथा कृष्णंदग्धंचहरितंपीतकृष्णाविमिश्रितं रजनीहरिद्रा कौतुकसंज्ञानिभविष्ये दूर्वायवांकुराश्चैववालकंचूतपल्लवाः हरिद्राद्वयसिद्धार्थशिखिपत्रोरगत्वचः कंकणौषधयश्चैताकौतुकाख्यादशस्मृताः अथसप्तमृदोमात्स्ये गजाश्वरथ्यवल्मीकसंगमात्ह्रदगोकुलात् मृदमानीयकुंभेषुप्रक्षिपेच्चत्वरात्तथा गोकुलावधिसप्तचत्वरेणसहाष्टौमृदोभवेयुरितिहेमाद्रौभविष्ये सुवर्णंरजतंताम्रमारकूटंतथैवच लोहंत्रपुतथासी

संधातवःसप्तकीर्तिताः आरकूटंपित्तलं तत्रैवषट्त्रिंशन्मते यवगोधूमधान्यानितिलाःकंगुश्चमुद्गकाः श्यामाकंचीनकंचैवसप्तधान्यमुदा
हृतं सप्तदशधान्यानिमार्कंडेयपुराणे व्रीहयश्चयवाश्चैवगोधूमाः कंगुकास्तिलाःप्रियंगवःकोविदाराःकोरदूषाःसतीनकाःमाषामुद्गामसू
राश्चनिष्पावाःसकुलित्थकाः आढक्यश्चणकाश्चैवयावनालास्तथास्मृताः क्रमादेवंविजानीयाद्धान्याःसप्तदशस्मृताः कोरदूषाःकोद्रवाःस
तीनकाःकलापाःमठइति अष्टदशधान्यानिस्कांदे व्रीहिर्यवास्तिलाश्चैवयावनालास्तथैवच सतीनकाःकुलित्थाश्चकंगुकाःकोरदूषकाः
माषमुद्गाम सूराश्चनिष्पावाःश्यामसर्षपाः गोधूमाश्चणकाश्चैवनीवाराढक्यएवच एवंक्रमेणजानीयाद्धान्यान्यष्टदशानिच हेमाद्रौक्षी
रस्वामी मूलपत्रकरीराग्रफलकांडाधिरूढकाः त्वक्पुष्पंकवचंचेतिशाकंदशविधंस्मृतं करीरंवंशांकुरःअग्रंपल्लवःकांडंनालंकवचंछत्राकंक
लशाउक्ताविष्णुधर्मे हेमराजतताम्राश्चमृन्मयालक्षणान्विताः यात्रोद्वाहप्रतिष्ठादौकुंभास्युरभिषेचने पंचाशांगुलवैपुल्याउत्सेधेषोडशां
गुलाः द्वादशांगुलमूलास्युर्मुखमष्टांगुलंभवेत् पंचच आशाश्चपंचाशाः आशादश पंचाशदंगुलानिवैपुल्यमित्यर्थः केचित्तुपंचदशांगुल
वैपुल्यमित्याहुः प्रतिमाद्रव्ययोःपरिमाणं हेमाद्रौभविष्ये अनुक्तद्रव्यतत्संख्यादेवताप्रतिमानृप सौवर्णीराजतीताम्रीवृक्षजामार्त्तिकी
तथा चित्रजापिष्टलेपोत्थानिजवित्तानुरूपतः आमासात्पलपर्यंता कर्तव्याशक्तिसंभवे अंगुष्ठपर्वमारभ्यवितस्त्यवधिकास्मृता मात्स्येतु
विशेषः अंगुष्ठपर्वादारभ्यवितस्त्यवधिदेवतागृहेतुप्रतिमाकार्यानाधिकाशस्यतेबुधैः आषोडशात्तुप्रासादेकर्तव्यानाधिकाततःइत्य
धिकंकल्पतरौप्रतिष्ठाकांडेज्ञेयं तथाअनुक्तसंख्याहोमेस्याच्छतमष्टोत्तरंस्मृतं मात्स्ये होमोग्रहादिपूजायांशतमष्टोत्तरंभवेत् अष्टा
विंशतिरष्टौवायथाशक्तिविधीयते मदनरत्ने ब्राह्मे यथोक्तवस्त्वसंपत्तौग्राह्यंतदनुकारियत् यवाभावेचगोधूमाव्रीह्यभावेचतंडुलाःआ
ज्यंद्रव्यमनादेशेजुहुयाच्चयथाविधि मंत्रस्यदेवतायाश्चप्रजापतिरितिस्थितिः मंत्रस्यदेवतायाश्चविधानेनप्रजापतिर्देवतासमस्त-
व्याहृतिर्मंत्रःस्मृत्यंतरेपि नव्याहृत्यासमंहुतइति गारुडे प्रणवादिनमोंतंचचतुर्थ्यंतंचसत्तम देवतायाःस्वकंनाम मूलमंत्रःप्रकीर्तितः द्र
व्याभावेप्रतिनिधिः दध्यलाभेपयोग्राह्यंमध्वलाभेतथागुडः घृतेप्रतिनिधिःकार्यःपयोवादधिवानृप तत्रैवमैत्रायणीयपरिशिष्टे दर्भा

भावेकाशः पैठीनसिः सर्वाभावेयवाः आज्यहोमेषुसर्वेषुगव्यमेवभवेद्घृतं तद्भावेमहिष्यास्तु आज्यमाविकमेवतु तदभावेतुतैलंस्यात्तदभावेतुजार्तिलं तद्भावेतुकौसुंभंतद्भावेतुसार्षपं अथपवित्रं अनंतर्गर्भितंसाग्रंकौशंद्विदलमेवच प्रादेशमात्रंविज्ञेयंपवित्रंयत्रकुत्रचित् अथेध्माः पलाशाश्वत्थखदिरवटोदुंबरमेवच अथधूपाः अगरुश्चंदनंमुस्तासिल्हकंवृषणंतथा समभागंतुकर्तव्योधूपोयममृताह्वयः सिल्हकं सिल्हाद इतिप्रसिद्धः वृषणंकस्तूरीषड्भागकुष्ठंद्विगुणोगरुश्चलाक्षात्रयंपंचनखस्य भागाः हरीतकीसर्जरसः समांस्त्रिभागैकमेकंत्रिवलंशिलाजं घनस्यचत्वारिपुरस्यचैको धूपोदशांगः कथितोमुनींद्रैः सर्जरसः राळइति मांसीजटामांसी त्रिवलं त्रिभागं घनः कर्पूरः पुरंगुग्गुलः सुवर्णमानंसयाज्ञवल्क्यः जालसूर्यमरीचिस्थंत्रसरेणूरजः स्मृतं तेष्टौलिक्षास्तुतास्तिस्रोराजसर्षपउच्यते गौरस्तुतेत्रयः षट्तेयवोमध्यस्तुतेत्रयः कृष्णलः पंचतेमाषस्ते सुवर्णस्तुषोडश पलंसुवर्णाश्चत्वारः पंचवापिप्रकीर्तितं रजतमानमाहहे कृष्णलेरूप्यमाषोधरणंषोडशैवते शतमानंतुदशभिर्धरणैः पलमेवतु निष्कंसुवर्णाश्चत्वारइति ताम्रमानमाह कार्षिकः ताम्रिकः पणइतिपलचतुर्थांशेन कर्षेणोन्मितः कार्षिकस्ताम्रसंबंधीपणोभवतिकर्षसंज्ञश्च निघंटौतेषोडशाक्षः कर्षोस्त्रीपलंकर्षचतुष्टयमिति तेषोडशमासाः अक्षः हेमाद्रौनारदः अक्षः सचकर्षइत्यर्थ धरणस्यैवपुराणेसंज्ञांतरं तेषोडशस्याद्धरणंपुराणश्चैवराजतमितिमिताक्षरायांस्मृतेः शतमानेपलेपर्यायेसुवर्णचतुष्टयसमतोलितरूप्यं राजतोनिष्कइत्यर्थः सुवर्णनिष्कस्तुचतुःसौवर्णिकोनिष्कोविज्ञेयस्तु प्रमाणतइतिसचपलसमानएवकोत्र कार्षापण इत्यपेक्षायांदेशभेदेन कार्षापणोभिन्नइतिआह हेमाद्रौनारदे कार्षापणोदक्षिणस्यां दिशिरौप्यः प्रवर्तते पणैर्निबद्धः पूर्वस्यांदिशिषोडशस्यैवपणाः अष्टौदब्बूकाः कार्षापणः पूर्वस्यामित्यर्थः तावत्तालभ्यंरूप्यंदक्षिणस्यां सइतिद्वैतनिर्णयेपितामहचरणाः लीलावत्यां वराटकानांदशकद्वयंयत्साकाकिणीताश्चपणश्चतस्रः तेषोडशद्रम्मइहावगम्योद्रम्मैस्तथाषोडशभिश्चनिष्कः अथधान्यमानंभविष्ये पलद्वयंतुप्रसृतंद्विगुणंकुडवंमतं चतुर्भिःकुडवैः प्रस्थः प्रस्थाश्चत्वारआढकः आढकैस्तैश्चतुर्भिश्च द्रोणस्तुकथितोबुधैः कुंभोद्रोणद्वयंशूर्पः खारीद्रोणास्तुषोडश द्रोणद्वयस्यैवशूर्पइतिसंज्ञा पलंचकुडवः प्रस्थआ

दकोद्रोणएवच ध्यानमानेषुबोद्धव्याः क्रमशोमीचतुर्गुणाः द्रोणैःषोडशभिःखारीविंशत्याकुंभउच्यते कुंभैस्तुदशभिर्वाहोधान्यसंख्याःप्रकीर्तिताः विंशत्येत्यत्रापि द्रोणैरितिसंबध्यते तथाच कुंभोद्रोणद्वयमितिपक्षाद्विंशतिद्रोणमितः कुंभइतिपक्षांतरं द्रोणाढकयोः परिमाणांतरमुक्तं पराशरेण वेदवेदांगविद्भिर्धर्मशास्त्रानुपालकैः प्रस्थाद्वात्रिंशतिद्रोणमितोद्विप्रस्थआषाढकइति एतेषुन्यूनाधिकपक्षाणांशक्तिदेशकालाद्यपेक्षयाव्यवस्थाज्ञेया अथहोमद्रव्यमानंसिद्धांतशेखरे होमद्रव्यप्रमाणानिवक्ष्यंतेतुयथाक्रमं कर्षप्रमाणमाज्यंस्यान्मधुक्षीरंचतत्समं ॥ तंदुलानांशक्तिमात्रंपायसंप्रसृतेः समं कर्षमात्राणिभक्ष्याणिलाजामुष्टिमितामताः अन्नंग्राससमंग्राह्यंशाकंग्रासार्द्धमात्रकं मूलानांतुत्रिभागाःस्यात्कंदानामष्टमोंशकः इक्षुःपर्वप्रमाणंस्यादंगुलद्वितयंलतामादेशमात्राःसमिधोव्रीहीणांचांजलिःसमः तिलसक्तुकणादीनांमृगीमुद्राप्रमाणतः पत्रपुष्पफलादीनांप्रमाणाहुतिरिष्यते चंद्रःश्रीखंडकस्तूरीकुंकुमागरुकर्दमाःहरिमंथसमाः प्रोक्तागुग्गुलुर्बदरोपमः हरिमंथश्चणकः आहुतीनामिदंमानंकथितंवेदवेदिभिः स्यात्त्रिमुद्रामृगीमुद्राहोमेसर्वफलप्रदा मानांतरंशारदातिलकटीकायांपदार्थादर्शे कर्षमात्रमिदंहोमशक्तिमात्रंपयःस्मृतं उक्तानिपंचगव्यानिशक्तिमात्राणिसाधुभिः तत्समंमधुदुग्धान्नंग्रासमात्रमुदाहृतं दधिप्रसृतिमात्रंस्याल्लाजाःस्युर्मुष्टिसंमिताः पृथुकास्तत्प्रमाणाःस्युःसक्तवोपितथाविधाः पलार्धंगुडमानंचशर्करापितथाविधा ग्रासार्द्धमात्रमन्नानामिक्षुःपर्वप्रमाणतः एकंस्यात्सुत्रपुष्पंचतथाधूपादिकल्पयेत् मातुलिंगंचतुःखंडंपनसंदशधाकृतम् अष्टधानारिकेलंचचतुर्धाकदलीफलं ॥ त्रिधाकृतंफलंबैल्वंकपित्थंखंडितंद्विधा व्रीहयोमुष्टिमानास्युर्मुद्गामाषायवास्तथा तंदुलाःस्युस्तदर्धांशाःकोद्रवामुष्टिसंमिताः लवणंशक्तिमात्रंस्यान्मरीचान्येकविंशतिः घृतस्यकार्षिकोहोमःक्षीरस्यमधुनस्तथा शुक्तिमात्राहुतिर्दध्नः प्रसृतिःपायसस्यच खंडत्रयंतुमूलानांफलानांस्वप्रमाणतः ग्रासमात्रंतुहोतव्या इतरेषांचतंदुलाः अक्षतास्तुयवाः प्रोक्ताअभावेव्रीहयःस्मृताः तदभावेच गोधूमानतुखंडिततंडुलाः येषांकेषांचिदन्येषांद्रव्याणामप्यसंभवे सर्वत्राज्यमुपादेयंभरद्वाजमुनेर्मतात् सर्वप्रमाणमाहुत्यापंचांगुलगृहीतयेति संपूर्णानिचसर्वत्रसूक्ष्माणिपंचपंचच इक्षूणांपर्वकं

मानंलतानामंगुलद्वयं चंद्रचंदनकाश्मीरकस्तूरीयक्षकर्दमान् कलापसंमितामेतान् गुग्गुलंबदरास्थिवत् द्रवः स्रुवेणहोतव्यः पाणिना
कठिणंहविः स्रुवपूर्णाद्रवाः प्रोक्ताः कठिनाग्रासमात्रकाः व्रीहयोयवगोधूमप्रियंगुतिलशालयः स्वरूपेणैवहोतव्याइतरेषांचतंडुलाः
अथऋत्विग्वरणं हेमाद्रौपाद्मे बालाग्निहोत्रिणंविप्रंसुरूपंचगुणान्वितं सपत्नीकंच संपूज्यभूषयित्वाचभूषणैःपुरोहितं सुख्य
तमंकृत्वान्याश्चतथार्त्विजः चतुर्विंशत् गुणोपेतान्सपत्नीकान्निमंत्रितान् अहतांबरसंछन्नान् स्रग्विणः शुचिभूषितान् अंगुलीयकानिच
तथाकर्णभूषान्प्रदापयेत् तत्रैवलैंगे वस्त्रयुग्मंतथोष्णीषंकुंडले कंठभूषणं अंगुलीभूषणंचैवमणिबंधस्यभूषणं एतानिचैवसर्वाणि
प्रारंभेधर्मकर्मणां पुरोहितायदत्वाथऋत्विग्भ्यः संप्रदापयेत् पूर्वोक्तभूषणंसर्वंसोष्णीषंवस्त्रसंयुतं दद्यादेतत्प्रयोक्तृभ्यआच्छादनपटंत
था व्रतानांमधुपर्कमाह विश्वामित्रः संपूज्यमधुपर्केणऋत्विजः कर्मकारयेत् अपूज्यकारयेत्कर्मकिल्बिषेणचयुज्यते ऋत्विजांसं
ख्यामाहमात्स्ये हेमालंकारिणः कार्याः पंचविंशतिऋत्विजः तोषयेच्च समंसर्वानाचार्येद्विगुणंभवेत् दक्षिणयातोषयेदित्यर्थः अथ
सर्वतोभद्रमंडलंहेमाद्रौस्कांदे प्रागुदीच्यागतारेखाः कुर्यादेकोनविंशतिं खंडेंदुस्त्रिपदः कोणे शृंखलापंचभिःपदैः एकादशपदावल्ली
भद्रंतुनवभिःपदैः चतुर्विंशत्पदावापीविंशत्यापरिधिःपदैः मध्येषोडशभिःकोष्ठैःपद्ममष्टदलंस्मृतं श्वेतेंदुःशृंखलाकृष्णावल्लीनीलेनपूर
येत् भद्रारुणासितावापीपरिधिःपीतवर्णकः बाह्यांतरदलश्वेताकर्णिकापीतवर्णिका परिध्यावेष्टितंपद्मंबाह्येसत्वंरजस्तमः तन्मध्ये
स्थापयेद्देवान्ब्रह्माद्यांश्चसुरेश्वरान् इतिसर्वतोभद्रपीठं अथलिंगतोभद्रं चतुर्विंशतिरालेख्यारेखाः प्राग्दक्षिणायताः कोणेषु
शृंखलाःपंचपदावल्यस्तुपार्श्वतः पदैर्नवभिरालेख्याश्चतुर्भिर्लघुशृंखलाः लघुवल्यःपदैःषड्भिस्ततोष्टादशभिःपदैः कृत्वालिंगानिवा
प्यस्तुत्रयोदशभिरंतरा॥ ततोवीथीद्वयेनैवपीठंकुर्याद्विचक्षणः॥ तस्यपदाःपंचपदाद्वाराण्यपितथैवच एकाशीतिपदंमध्येपदंस्व-
स्तिकमुच्यते कोणेषुशृंखलाःकार्याःपदैस्त्रिभिस्ततःपरं पदैश्चतुर्भिर्दिक्षुस्युर्भद्राण्येषांसमंततः एकादशपदावल्योमध्येष्टदलमा-
लिखेत् पद्मंनवपदंह्येवंलिंगतोभद्रमुच्यते शृंखलाःकृष्णवर्णेनवल्लीर्नीलेनपूरयेत् रक्तेनशृंखलालध्वीर्वल्लीःपीतेनपूरयेत् लिं-

गानिकृष्णवर्णानिश्वेतेनाप्यथवापिकाः पीठंसपादंश्वेतेनपीतेनद्वारपूरणं मध्येस्फः शृंखलारक्तावल्लीर्नीलेनपूरयेत् भद्राणिपीतवर्णानिपीतापंकजकर्णिका दलानिश्वेतवर्णानियद्वाचित्राणिकल्पयेत् तिस्रोरेखाबहिःकार्याःसितारक्तासिताक्रमात् अथचतुर्लिंगोद्भवंलैंगे रेखास्त्वष्टादशप्रोक्ताश्चतुर्लिंगसमुद्भवे कोणेंदुस्त्रिपदश्वेतस्त्रिपदैः कृष्णशृंखलाः वल्लीसप्तपदानीलाभद्रंरक्तंचतुष्पदं भद्रपार्श्वेमहारुद्रंकृष्णमष्टादशैःपदैः शिवस्यपार्श्वतोवापींकुर्यात्पंचपदांसितां पदमेकंतथापीतंभद्रवाप्योस्तुमध्यतः शिरसिशृंखलायाश्चकुर्यात्पीतंपदत्रयं लिंगानांस्कंधतःकोष्ठा विंशतीरक्तवर्णकाः परिधिःपीतवर्णैस्तुपदैःषोडशभिःस्मृतः पदैस्तुनवभिःपश्चाद्रक्तंपद्मंसकर्णिकं अथद्वादशलिंगोद्भवं प्रागुदीच्यायतारेखाःषट्त्रिंशद्भिप्रकल्पयेत् पदानिद्वादशशतंपंचविंशतिरेवच खंडेंदुस्त्रिपदःकोणेशृंखलाःषट्पदैःस्मृताः त्रयोदशपदावल्लीभद्रंतुनवभिःपदैः त्रयोदशपदावापीलिंगमष्टादशंस्मृतंलिंगत्रयस्यपंक्तौतुशोभाकोष्ठाश्चतुर्दश तेषामुपरिपंक्तौतुकोष्ठाःसप्तदशैवतु पूजापंक्तिस्तुविज्ञेयोपरितःपरिकीर्तिता पूजापंक्त्यंतरापंक्तौकोष्ठाद्व्यशीतिसंख्यया परिधिःसचविज्ञेयोमंडलेद्व्यंतराद्वयोः परिध्यंतरकोष्ठेषुसर्वतोभद्रमालिखेत् विशेषश्चात्रविज्ञेयशृंखलाषट्पदाभवेत् त्रयोदशपदावल्लीभद्रंतुनवभिःपदैः पंचविंशत्पदावापीपरिधिःषोडशात्मकः मध्येनवपदंपद्मंकर्णिकाकेसरान्वितंसत्वंरजस्तमोवर्णाःपरितोमंडलस्यच त्रयःपरिधयःकार्यास्तत्रद्वाराणिकारयेत् सितेंदुःशृंखलाकृष्णावल्लीनीलाप्रकीर्तिता भद्रंचैवारुणंज्ञेयंवापीस्याच्छ्वेतकर्णिका लिंगानिकृष्णवर्णानिपार्श्वतोद्वादशैवतु परिधिःपीतवर्णःस्यात्कमलंपंचवर्णकं इतिसर्वतोभद्रलिंगतोभद्रादिमंडलानि

अथसर्वतोभद्रमंडलविधिरुच्यते शिवव्रतंविनासर्वव्रतोद्यापनेषुसर्वतोभद्रमंडलंकारयेत् तत्रकारिका बाहुमात्रांयदावेदींकुर्याच्छुद्धमृदाबुधः तद्देयांसर्वतोभद्रंमंडलंविलिखेत्ततः विलिखेत्सर्वतोभद्रंवेदिकायांतुसुंदरम् तत्रैवशिवव्रतेषुलिंगतोभद्रंलिखेत् तन्मध्येस्थापयेद्देवान्ब्रह्माद्यांश्चसुरेश्वरान्

अथमंडलदेवताप्रारंभः तन्मध्येब्रह्माणं ब्रह्मजज्ञानंगोतमोवामदेवोब्रह्मात्रिष्टुप् मध्येब्रह्मावाहनेविनियोगः ॐ ब्रह्मजज्ञानंप्रथमंपुरस्ताद्विसीमतःसुरुचो

वेनभावः सबुध्नियाउपमाअस्यविष्ठाः सतश्चयोनिमसतश्चविवः भोब्रह्मन्इहागच्छइहतिष्ठपूजांगृहाणममसंमुखः सुमनसन्नोवरदो
भव इत्येवंप्रकारेणसर्वत्रदेवतानांज्ञेयं ततः उदीचीमारभ्यवायवीपर्यंतंसोमादयोवाय्वंताष्टौलोकपालाः स्थापनीयाः १ तत्रआप्यायस्व
राहूगणोगौतमः सोमोगायत्री उत्तरेसोमावाहनेविनियोगः ॐ आप्यायस्वसमेतुतेविश्वतः सोमवृष्ण्यं भवावाजस्यसंगथे २ अभि
त्वाअजीगर्तिः शुनःशेपईशानोगायत्री ईशान्यांईशानावाहनेवि० अभित्वादेवसवितरीशानंवार्याणां सदावन्भागमीमहे ३ इंद्रंवो
मधुच्छंदाइंद्रोगायत्री पूर्वेइंद्रावाहनेवि० ॐ इंद्रंवोविश्वतस्परिहवामहेजनेभ्यः अस्माकमस्तुकेवलः ४ अग्निंदूतंकाण्वोमेधातिथि
रग्निर्गायत्री आग्नेय्यांअग्न्यावाहनेवि० ॐ अग्निंदूतंवृणीमहेहोतारंविश्ववेदसं अस्ययज्ञस्यसुक्रतुं ५ यमायसोमंवैवस्वतोय
मोयमोनुष्टुप् दक्षिणेयमावा० ॐ यमायसोमंसुनुतयमायजुहुताहविः यमंहयज्ञोगच्छत्यग्निदूतोअरंकृतः ६ मोषुणोघोरः काण्वो
निर्ऋतिर्गायत्री नैर्ऋत्यांनिर्ऋत्यावाहने० ॐ मोषुणः परापरानिर्ऋतिर्दुर्हणावधीत् पदीष्टतृष्णयासह ७ तत्त्वायामिशुनःशेपोवरुण
स्त्रिष्टुप् पश्चिमेवरुणावा० ॐ तत्त्वायामिब्रह्मणावंदमानस्तदाशास्तेयजमानोहविर्भिः अहेळमानोवरुणेहबोध्युरुशंसमानआयुः
प्रमोषीः ८ वायोशतंवामदेवोवायुरनुष्टुप् वायव्यांवाय्वावाहने० ॐ वायोशतंहरीणांयुवस्वपोष्याणां उतवातेसहस्त्रिणोरथआयातु
पाजसा ९ वायुसोमायोर्मध्ये अष्टौवसवः ज्मयाअत्रमैत्रावरुणोवसवस्त्रिष्टुप् वायुसोमयोर्मध्येवस्वावा० ॐ ज्मयाअत्रवसवो
रंतदेवाउरावंतरिक्षेमर्जयंतशुभ्राः अर्वाक्पथउरुज्रयः कृणुध्वंश्रोतादूतस्यजग्मुषोनो अस्य १० आरुद्रासः श्यावाश्वएकादशरुद्रा
जगती सोमेशानयोर्मध्येएकादशरुद्रावाहनेवि० ॐ आरुद्रासइंद्रवंतः सजोषसोहिरण्यरथाः सुवितायगंतन इयंवोअस्मत्प्रतिह-
र्यतेमतिस्तृष्णजेनदिवउत्साउदन्यवे ११ त्यांनुमत्स्यः सामदोद्वादशादित्यागायत्री ईशानेंद्रयोर्मध्येद्वादशादित्यावा० त्यांनुक्षत्रि
यांअवआदित्यान्याचिषामहे सुमृळीकांअभिष्टये १२ अश्विनावर्तिराहूगणोगौतमोश्विनावुष्णिक् इंद्राग्न्योर्मध्येअश्व्यावाह
ने० ओंअश्विनावर्तिरस्मदागोमद्दस्राहिरण्यवत् अर्वाग्रथंसमनसानियच्छतं॥१३ ओमासोमधुच्छंदाविश्वेदेवागायत्री अग्नि

यमयोर्मध्येविश्वेदेवा० ॐ ओमासश्चर्षणीधृतोविश्वेदेवासआगत दाश्वांसोदाशुषःसुतम् १४ अभित्येदेवंगौतमोवामदेवःसप्तयक्षा
अष्टी यमनिर्ऋत्योर्मध्येसप्तयक्षावा० ॐ अभित्यंदेवंसवितारमोण्योःकविक्रतुमर्चामिसत्यसवंरत्नधामभिप्रियंमतिंकविं ऊर्ध्वायस्याम
तिर्भा अदिद्युतत्सवीमनि हिरण्यपाणिरमिमीतसुक्रतुःकृपास्वः १५ आयंगौःसार्पराज्ञीसर्पागायत्री निर्ऋतिवरुणयोर्मध्येसर्पावा० ॐ
आयंगौःपृश्निरक्रमीदसदन्मातरंपुरः पितरंचप्रयन्त्स्वः १६ अप्सरसामैनशाकल्यश्शृंगोगंधर्वाप्सरसोनुष्टुप् वरुणवाय्वोर्मध्येगंधर्वाप्सर
सावा० ॐ अप्सरसांगंधर्वाणांमृगाणांचरणेचरन् केशीकेतस्यविद्वान्सखास्वादुर्मदिंतमः १७ यदक्रंदऔचथ्योदीर्घतमास्कंद
स्त्रिष्टुप् ब्रह्मसोमयोर्मध्येस्कंदावाहनेवि० ॐ यदक्रंदप्रथमंजायमानउद्यन्त्समुद्रादुतवापुरीषात् श्येनस्यपक्षाहरिणस्यबाहूउपस्तु
त्यंमहिजातंते अर्वन् १८ तत्रैवऋषभमृषभोवैराजोनंदीश्वरोनुष्टुप् ब्रह्मसोमयोर्मध्येनंदीश्वरावाह० ॐ ऋषभंमासमानानांसपत्ना
नांविषासहिं हंतारंशत्रूणांकृधिविराजंगोपतिर्गवाम् १९ कद्रुद्रायघोरःकण्वःशूलोगायत्रीतत्रैवशूलावा० ॐ कद्रुद्रायप्रचेतसेमीढु
ष्टमायतव्यसे वोचेमशंतमंहृदे २० कुमारंकुमारोमहाकालस्त्रिष्टुप् तत्रैवमहाकालावाह० ॐ कुमारंमातायुवतिःसमुब्धंगुहाबिभर्ति
नददातिपित्रे अनीकमस्यनमिनज्जनासःपुरःपश्यंतिनिहितमरतौ २१ अदितिर्लौक्योबृहस्पतिर्दक्षोनुष्टुप् ब्रह्मेशानयोर्मध्येदक्षा
वाहनेवि० अदितिर्ह्यजनिष्टदक्षयादुहितातव तान्देवाअन्वजायंतभद्राअमृतबंधवः २२ भोदक्षादिसप्तगणान् तामग्निवर्णांसौ
भरिर्दुर्गात्रिष्टुप् ब्रह्मेंद्रयोर्मध्येदुर्गावा० तामग्निवर्णांतपसाज्वलंतींवैरोचनींकर्मफलेषुजुष्टां दुर्गांदेवींशरणमहंप्रपद्येसुतरसित
रसेनमः २३ इदंविष्णुःकाण्वोमेधातिथिर्विष्णुर्गायत्री ब्रह्मेंद्रयोर्मध्येविष्णवावा० इदंविष्णुर्विचक्रमेत्रेधानिदधेपदं समूढमस्यपांसु
रे २४ उदीरतामवरशंखःस्वधापितरस्त्रिष्टुप् ब्रह्माग्न्योर्मध्येस्वधावाहने० ॐ उदीरतामवरउत्परासउन्मध्यमाःपितरःसोम्यासः अ
सुंयईयुरवृकाऋतज्ञास्तेनोवंतुपितरोहवेषु २५ परंमृत्योःसंकुशिकोमृत्युरोगास्त्रिष्टुप् ब्रह्मयमयोर्मध्येमृत्युरोगावा० ॐ परंमृत्यो
अनुपरेहिपंथांयस्तेस्वइतरोदेवयानात् चक्षुष्मतेशृण्वतेतेब्रवीमि मानःप्रजांरीरिषोमोतवीरान् २६ गणानांत्वाशौनकोगृत्समदोगण

पतिर्जगती ब्रह्मनिर्ऋत्योर्मध्येगणपत्या० ॐ गणानांत्वागणपतिंहवाहेकविंकवीनामुपमश्रवस्तमं ज्येष्ठराजंब्रह्मणांब्रह्मणस्पतआ
नःशृण्वन्नूतिभिःसीदसादनं २७ शंनोदेवीरांबरीषसिंधुद्वीपआपोगायत्री ब्रह्मवरुणयोर्मध्येअबावा० ॐ शंनोदेवीरभिष्टयआपोभ
वंतुपीतये शंयोरभिस्रवंतुनः २८ मरुतोयस्यराहूगणोगौतमोमरुतोगायत्री ब्रह्मवाय्वोर्मध्येमरुदावा० ॐ मरुतोयस्यहिक्षयेपा
थादिवोविमहसः सस्रुगोपातमोजनः २९ स्योनापृथिवीकाण्वोमेधातिथिर्भूमिर्गायत्री ब्रह्मणःपादमूलेकर्णिकाधःपृथिव्यावा० ॐ
स्योनापृथिविभवान्रृक्षरानिवेशनी यच्छानःशर्मसप्रथः ३० इमंमेगंगेसिंधुक्षित्प्रैय्यमेधोगंगादिनद्योजगती तत्रैवगंगादिनद्यावा०
ॐ इमंमेगंगेयमुनेसरस्वतिशुतुद्रिस्तोमंसचतापरुष्ण्या असिक्न्यामरुद्वृधेवितस्तयार्जीकीयेशृणुह्यासुषोमया ३१ धाम्नोगौत
मोवामदेवेसप्तसागरानुष्टुप् तत्रैवसप्तसागरावाहनेविनियोगः ॐ धाम्नोधाम्नोराजन्नितोवरुणनोमुंच यदापोअघ्न्याइतिवरुणेति
शपामहेततोवरुणनोमुंच मयिवापोमोषधीर्हिंसीरतोविश्वव्यचाभूस्त्वेतोवरुणनोमुंच ३२ तदुपरिमेरुंनाममंत्रेणपूजयेत् मेरवे
नमः मेरुंआवा० ततोमंडलाद्बहिः सोमादिसंनिधौआयुधान्यावाहयेत् सोमसमीपेगदां ईशानसमीपेत्रिशूलं इंद्रसमीपेवज्रं अ
ग्निसमीपेशक्तिं यमसमीपेदंडं निर्ऋतिसमीपेखड्गं वरुणसमीपेपाशं वायुसमीपेअंकुशं ८ तद्बाह्येउत्तरे गौतमायनमः गौत
मंआवा० ईशान्यांभरद्वाजं पूर्वेविश्वामित्रं आग्नेय्यांकश्यपं दक्षिणेजमदग्निं नैर्ऋत्यांवसिष्ठं पश्चिमेअत्रिं वायव्यांअरुंधतीं त-
द्बाह्येपूर्वादिक्रमेण ऐंद्रीं· कौमारीं· ब्राह्मीं· वाराहीं· चामुंडां· वैष्णवीं· माहेश्वरीं· वैनायकीं· इत्यष्टौशक्तीः ८ प्रतिष्ठाप्यप्रत्येकंसहवा
वाहयेत्पूजयेत् इतिमंडलदेवताः अथलक्षपूजनोद्यापनविधिःउच्यते अद्येत्यादिपूर्वोच्चरितएवंगुणविशेषणविशिष्टायांपु
ण्यतिथौ० मयाकृतस्य अमुकदेवताप्रीत्यर्थंलक्षसंख्यामुकपूजनकर्मणः सांगतासिध्यर्थंतदुद्यापनंकरिष्ये तदंगत्वेनस्वस्तिवाच
नंआचार्यवरणंचकरिष्ये तत्रादौनिर्विघ्नतासिध्यर्थंगणपतिपूजनंकरिष्ये अस्यलक्षपूजनोद्यापनकर्मणः पुण्याहंभवंतोब्रुवंतु अ
स्तुपुण्याहम् एवंस्वस्तिभवंतोब्रुवंतु आयुष्मतेस्वस्ति ऋद्धिंभवंतोब्रुवंतुऋध्यतांश्रीरस्त्वितिभवंतोब्रुवंतु अस्तुश्रीःलक्ष्मीनाराय

गौप्रीयेताम् तत्रगोत्रनामोच्चारणपूर्वकं अमुकगोत्र अमुकशर्माअहं यजमानः अमुकगोत्रं अमुकशर्माणंस्वशाखाध्यायिनंब्राह्मणं अस्मिन्लक्षपूजनोद्यापनाख्येकर्मणि आचार्यत्वामहंवृणे आचार्यत्वेनवृतोऽस्मि यथाज्ञानेन कर्मकरिष्यामि आचार्यस्त्वयथास्वर्गेशक्रादीनांबृहस्पतिः तथात्वंममयज्ञेऽस्मिन्नाचार्योभवसुव्रत गंधादिनाआचार्यपूजनं तथैवब्रह्माणंवृणुयात् यथाचतुर्मुखोब्रह्मास्वर्गेलोकेपितामहः तथात्वंममयज्ञेऽस्मिन्ब्रह्माभवद्विजोत्तम अस्ययागस्यनिष्पत्तौ॰ आचार्यः आचम्यप्राणानायम्यअमुककर्मकरिष्ये कर्माधिकारार्थं आत्मनःशुद्ध्यर्थंचपुरुषसूक्तजपमहंकरिष्ये पृथ्वीत्यस्यमंत्रस्य मेरुपृष्ठऋषिः कूर्मोदेवता सुतलंछंदःआसनोपवेशनेविनियोगः पृथ्वित्वयाधृतालोका॰ पुरुषसूक्तजपांते कलशपूजनंसर्वतोभद्रेलिंगतोभद्रेवाब्रह्मादीनावाहयेत् ततः मूर्तौअग्न्युत्तारणम् अस्यांमूर्तौ अवघातादिदोषपरिहारार्थं अग्न्युत्तारणंदेवतासान्निध्यार्थंप्राणप्रतिष्ठांचकरिष्ये अग्निःसप्तिमितिसूक्तं अग्निपदरहितंसहितंचपठेत् अग्निःसप्तिंवाजंभरंददात्यग्निर्वीरंश्रुत्यंकर्मनिष्ठाम् अग्नीरोदसीविचरत्समंजन्नग्निर्नारींवीरकुक्षिंपुरंधिम् अग्नेरप्नसःसमिदस्तुभद्राअग्निर्महीरोदसीआविवेश अग्निरेकंचोदयत्समत्स्वग्निर्वृत्राणिदयतेपुरूणि अग्निर्हत्यंजरतःकर्णमावाग्निरद्भ्योनिरदहज्जरूथम् अग्निरत्रिंघर्मउरुष्यदंतरग्निर्नृमेधंप्रजयासृजत्सम् अग्निर्दाद्द्रविणंवीरपेशा अग्निर्ऋषिंयःसहस्रासनोति अग्निर्दिविहव्यमातताना ग्नेर्धामानिविभृतापुरुत्रा अग्निमुक्थैर्ऋषयोविह्वयंते ग्निंनरोयामनिबाधितासः अग्निंवयोअंतरिक्षेपतंतोग्निःसहस्रापरियातिगोनाम् अग्निंविशईळतेमानुषीर्या अग्निंमनुषोनहुषोविजाताः अग्निर्गांधर्वींपथ्यामृतस्याग्नेर्गव्यूतिर्घृतआनिषत्ता अग्नयेब्रह्मऋभवस्ततक्षुरग्निंमहामवोचामासुवृक्तिं अग्नेप्रावजरितारंयविष्ठाग्नेमहिद्रविणमायजस्व इतिअग्न्युत्तारम् अथशोडशोपचारपूजनम् सहस्रशीर्षेत्यावाहनं पुरुषएवेदमित्यासनं एतावानस्येतिपाद्यं त्रिपादूर्ध्वमर्घ्यं तस्माद्विराळित्याचमनीयं यत्पुरुषेणेतिस्नानं तंयज्ञमितिवस्त्रं तस्माद्यज्ञादित्युपवीतं तस्माद्यज्ञात्सर्वहुतऋचइतिगंधं तस्मादश्वेतिपुष्पं यत्पुरुषंव्यदधुरितिधूपम् ब्राह्मणोस्येतिदीपम् चंद्रमामनसइतिनैवेद्यम् नाभ्याआसीतिप्रदक्षिणाम् सप्तास्येतिनमस्कारान् यज्ञेनयज्ञमितिमंत्रपुष्पांजलिं इतिषोडशोपचारपू

जा व्रीह्यादिधान्ययवतिलैः त्रिकूटं कृत्वा तत्र मही द्यौरित्यादिना अव्रणंकलशंसंस्थाप्य कलशोपरिउपपात्रंसंस्थाप्य तस्योपरित्र्यंबकमंत्रे
णउमयासहत्र्यंबकंवाविष्णुमंत्रेणलक्ष्म्यासहविष्णुंसिद्धिबुद्धिसहितंगणेशंअथवापत्न्यासहितंसूर्यंवाभवानींतत्तन्मंत्रेण आवाह्य शिव
स्यदक्षिणेलक्ष्म्यासहविष्णुंआवाहयेत् शिवस्यउत्तरेसावित्र्यासहब्रह्माणं एवंविष्ण्वादीनामपि देवेप्राणप्रतिष्ठांकृत्वा अस्यश्रीप्राणप्र-
तिष्ठामंत्रस्य ब्रह्मविष्णुमहेश्वराऋषयः ऋग्यजुःसामाथर्वाणिच्छंदांसि क्रियामयवपुःप्राणाख्यादेवता आंबीजं ह्रींशक्तिः क्रोंकीलकं
अस्यांमूर्तौप्राणप्रतिष्ठापनेविनियोगः ॐ आंह्रींक्रों अंयंरंलंवंशंषंसंहंळंक्षंअः क्रोंह्रींआंहंसःसोहंअस्यांमूर्तौप्राणइहप्राणाःतिष्ठंतुपुनः
अस्यांमूर्तौजीवइहस्थितः पुनः ० अस्यांमूर्तौसर्वेंद्रियाणिवाङ्मनस्त्वक्चक्षुःश्रोत्रजिह्वाघ्राणपाणिपादपायूपस्थानीहागत्यस्वस्तिसुखं-
चरंतिष्ठंतुस्वाहा अस्ननीतेपुनरस्मासु० यानस्वस्ति गर्भाधानादिपंचदशसंस्कारसिद्ध्यर्थंपंचदशप्रणवावृत्तिंकरिष्ये रक्तांभोधि
स्थपोतोल्लसदरुणसरोजाधिरूढाकराब्जैः पाशंकोदंडमिक्षूद्भवगुणमयमप्यंकुशंपंचबाणान् बिभ्राणासृक्कपालंत्रिनयनलसितापी
नवक्षोरुहाढ्यादेवीबालार्कवर्णाभवतुसुखकरीप्राणशक्तिःपरानः षोडशोपचारैःपंचामृतैश्चवैदिकमंत्रैःपुराणोक्तमंत्रैःसंपूज्य रात्रौ
जागरणंकुर्यात् प्रातःनित्यकृत्यंविधाय तस्यलक्षपूजनस्यवाव्रताचरितस्यसांगतासिद्ध्यर्थंपूजनदशांशेनतिलयवव्रीहिभिःपाय-
सादिभिर्वाहोमंकरिष्ये होमस्तुवेदोक्तेनमूलमंत्रेणपौराणोक्तेनवाकुर्यात् अथाग्निमुखं आचम्यतिथ्यादिसंकीर्त्यएवंगुणविशे
षणविशिष्टायांपुण्यतिथौ अमुककर्मांगतयाविहितंअमुकहवनमहंकरिष्ये शुद्धमृदाईशान्यामारभ्यउदक्संस्थंचतुरंगुलोन्न
तंचतुर्दिक्षुमिलितंकृत्वाद्विसप्तत्यंगुलंपरिधिकंफलितमष्टादशांगुलविस्तृतंहोमानुसारेणतदधिकंवानतुततोन्यूनंमध्योन्नतंस्थंडिलंकु
र्यात् तदंगंस्थंडिलेउल्लेपनउल्लेखनाग्निप्रतिष्ठापनंकरिष्ये गोमयादिलिप्तेशुद्धेदेशेस्थंडिलंकुर्यात् स्थंडिलंतद्गोमयेनप्रदक्षिणमुपलि
प्य दक्षिणेष्टोउदीच्यांद्वेप्रतीच्यांचतुःप्राच्यामर्धमित्यंगुलानित्यक्त्वादक्षिणोपक्रमामुदक्संस्थांप्रादेशमात्रांमेकांलेखांतस्यादक्षिणो
त्तरयोःप्रागायतेपूर्वरेखायाःअसंस्पृष्टेप्रादेशसं मितेद्वेलेखेलिखित्वातयोर्मध्येपरस्परमसंस्पृष्टाउदक्संस्थाःप्रागायताःप्रादेशसंमि-

नास्तिस्वइतिषड्लेखायाज्ञियशकलमूलेनप्रदक्षिणहस्तेनोल्लिख्यलेखाक्रमतच्छकलमुदगग्रंनिधायस्थंडिलमद्भिरभ्युक्ष्यशकलमाग्नेय्यांनिरस्य पाणिंप्रक्षाल्यवाग्यतोभवेत् तैजसादिपात्रेपिधानसहितमग्निमानीयस्थंडिलादाग्नेय्यांदिशिनिधाय जुष्टोदमूना आत्रेयोवसुश्रुतोग्निस्त्रिष्टुप् अग्न्यावा० ॐ जुष्टोदमूनाअतिथिर्दुरोणइमंन्नोयज्ञमुपयाहिविद्वान् विश्वाअग्नेअभियुजोविहत्याशत्रूयतामाभराभोजनानि एह्यग्नइत्यस्यमंत्रस्यराहूगणोगोतमऋषिः अग्निर्देवता त्रिष्टुप् छंदः अग्न्यावाहनेविनि० ॐ एह्यग्नइहहोतानिषीदादब्धःसुपुरएताभवानः अवतांत्वारोदसीविश्वमिन्वेयजामहेसौमनसायदेवान् इत्यक्षतैरावाह्य आच्छादनंदूरीकृत्यसमस्तव्याहृतीनांपरमेष्ठीप्रजापतिः प्रजापतिर्बृहती अग्निप्रतिष्ठापनेविनियोगः ॐ भूर्भुवःस्वरोमित्यग्निंप्रतिष्ठाप्य चत्वारिशृंगागौतमोवामदेवोग्निस्त्रिष्टुप् अग्निमूर्तिध्यानेविनियोगः ॐ चत्वारिशृंगात्रयोअस्यपादाद्वेशीर्षेसप्तहस्तासोअस्य त्रिधाबद्धोवृषभोरोरवीतिमहोदेवोमर्त्यांआविवेश सप्तहस्तश्चतुःशृंगःसप्तजिह्वोद्विशीर्षकः त्रिपात्प्रसन्नवदनःसुखासीनः शुचिस्मितः स्वाहांतुदक्षिणेपार्श्वेदेवींवामेस्वधांतथा बिभ्रद्दक्षिणहस्तैस्तुशक्तिमन्नंस्रुचंस्रुवं तोमरंव्यजनंवामैर्घृतपात्रंचधारयन् आत्माभिमुखमासीनएवंरूपोहुताशनः एषहिदेवःप्रदिशोनुसर्वाःपूर्वोहिजातःसउगर्भेअंतः सविजायमानःसजनिष्यमाणःप्रत्यङ्मुखास्तिष्ठतिविश्वतोमुखः अग्नेवैश्वानरशांडिल्यगोत्रमेषध्वजप्राङ्मुखममसंमुखोवरदोभव तदंगमन्वाधानंकरिष्ये आचम्यप्राणानायम्यदेवतापरिग्रहार्थंअस्मिन्नन्वाहितेग्नौजातवेदसमग्निमिध्मेनप्रजापतिंप्रजापतिंचाघारदेवते आज्येन अग्नीषोमौचक्षुषी आज्येनात्रप्रधानदेवताः अमुकहोमद्रव्येणब्रह्मा द्यावाहितदेवताश्चनाममंत्रेणएकैकयाज्याहुत्यायक्ष्येशेषेणस्विष्टकृतमग्निमिध्मसंनहनेनरुद्रं अयासमग्निंदेवान्विष्णुंअग्निंवायुंसूर्यंप्रजापतिंचएताःप्रायश्चित्तदेवताः आज्यद्रव्येण ज्ञाताज्ञातदोषपरिहारार्थंत्रिवारमग्निंसकृत्मरुतश्चाज्येन अंगदेवताःप्रधानदेवताःसर्वाःसन्निहिताःसंतु एवंसांगोपांगेनकर्मणासमिद्धिःसद्योयक्ष्ये व्याहृतीनांप्रजापतिःप्रजापतिरग्निर्वायुःसूर्यःप्रजापतिर्देवताः गायत्र्युष्णिगनुष्टुप्बृहत्यश्छंदांसि अन्वाधानसमिद्धोमेविनियोगः ॐ भूर्भुवःस्वःस्वाहा प्रजापतयइदं० परिसमूहनं ३ इध्माबर्हिषोश्चसन्नहनं अग्नेःषोडशभिर्दर्भैः

प्राच्यादिषुपरिस्तृभिः परिस्तरणं पर्युक्षणं पवित्रकरणं पात्रासादनं चरुस्थालीप्रोक्षिण्यौदर्वीस्रुवौ प्रणीताआज्यपात्रे इध्माबर्हिषिएतानासा
द्यामि प्रोक्षणीपात्रमुत्तानंकृत्वा प्रादेशमात्रेद्वेपवित्रेनिधाय अद्भिःपूरयित्वा गंधपुष्पाक्षतान्निक्षिप्य अंगुष्ठोपकनिष्ठिकाभ्यांउदगग्रेपृथ
क्पवित्रेधृत्वाऽपस्त्रिरुत्पूय पात्राण्युत्तानानिकृत्वा इध्मंचविस्रस्य सर्वाणिपात्राणित्रिःप्रोक्षयेत् ताआपःकिंचित्कमंडलौक्षिपेदित्येके प्र
णीतापात्रमग्नेःप्रत्यङ्निधाय तत्रपवित्रेनिधाय उदकेनपूरयित्वा गंधपुष्पाक्षतान्निक्षिप्य अस्मिन्कर्मणिब्रह्मत्वेनत्वामहंवृणे पाणिनापाणिं
स्पृष्ट्वा ततोब्रह्मावृतोस्मिइत्युक्त्वा आचम्याग्नेर्दक्षिणतस्तिष्ठन् ततोब्रह्मणेइदमासनं निरस्तःपरावसुः इदमहमर्वावसोःसदनेसीदामिॐ
ब्रह्मन्नपःप्रणेष्यामि बृहस्पतिर्ब्रह्माब्रह्मसदनआशिष्यते बृहस्पतेयज्ञंगोपायसयज्ञंपाहिसयज्ञपतिंपाहिसमांपाहि ॐ भूर्भुवःस्वर्बृह
स्पतिप्रसूतःॐप्रणय यदिब्रह्मानभवेत्तदास्वयमेवतत्प्रणीतापात्रंनासिकासमीपंनीत्वा उत्तरतोग्नेर्निधाय अन्यैर्दर्भैराच्छादयेत् तस
वित्रंआज्यपात्रेनिधाय ततोपरिस्तरणाद्बहिरुत्तरतोंगारानपोह्य तदुपरिआज्यपात्रंनिधाय विलीनाज्यंनिक्षिप्य वामहस्तेदर्भाग्रद्वयंधृत्वा
एकेनैवोल्मुकेनावज्वाल्यदर्भाग्रद्वयंनिक्षिप्य उल्मुकेनप्रधानद्रव्यसहितंत्रिभिःपर्यग्निकृत्वा उल्मुकंनिरस्यांगारानग्नौक्षिपेत् अंगुष्ठो
पकनिष्ठिकाभ्यांपवित्रेगृहीत्वा सवितुष्ट्वेतिमंत्रस्यहिरण्यगर्भस्तूपऋषिः सवितादेवता पुरउष्णिक्छंदः आज्यस्योत्पवनेविनिगः ॐस
वितुष्ट्वाप्रसवउत्पुनाम्यच्छिद्रेणपवित्रेणवसोःसूर्यस्यरश्मिभिःप्रागुत्पुनाति सकृन्मंत्रेणद्विस्तूष्णींतेपवित्रेअद्भिःप्रोक्ष्य अग्नौप्रहरेत्
स्कंदायस्वाहा स्कंदायेदंनमम ततआत्मनोग्रतोभूमिंप्रोक्ष्य तत्रबर्हिःसंन्नहनींरज्जुमुदगग्रांप्रसार्य ततोबर्हिरास्तरणं तदुपरिआज्यपात्रं
निधाय कुशान् स्रुक्स्रुवौचदक्षिणहस्तेवामहस्तेचगृहीत्वा अग्नौप्रताप्य दर्वींनिधाय स्रुवंवामहस्तेगृहीत्वा स्रुवबिलंदर्भाग्रेणत्रिःसंमृ
ज्य तथैवस्रुवपृष्ठंदर्भाग्रेणआत्माभिमुखंत्रिःसंमृज्य कुशमूलेनपृष्ठादारभ्यबिलपर्यंतंत्रिस्त्रिःसंमृज्य प्रोक्ष्य प्रताप्यघृतादुत्तरतःस्था
पयेत् पुनस्तथैवस्रुचिंसंमृज्यप्रोक्ष्यप्रताप्यस्रुवोत्तरतःस्थापयेत् दर्भान्संमृज्य अग्नौप्रहरेत् स्रुवेणाज्यंगृहीत्वा होमद्रव्यमभिघार्य
उदगुद्वास्य अग्न्याज्ययोर्मध्येननीत्वा आज्याद्दक्षिणतोबर्हिषिसांतरमासाद्य तन्मध्येएकपात्रंनिधाय अग्निमलंकृत्य ॐविश्वानिनइ

त्यनयोर्वत्सऋश्चुतोग्निस्त्रिष्टुप् द्वाभ्यामर्चनेअंत्योपस्थानेविनियोगः ॐ विश्वानिनोदुर्गहाजातवेदःसिंधुंननावादुरिनातिपर्षि अग्ने अत्रिवन्न
मसागृणानो ३स्माकंबोध्यविताननूनां यस्त्वाहृदाकीरिणामन्यमानोमर्त्यमर्त्योजोहवीमि जातवेदोयशोअस्मासुधेहिप्रजाभिरग्नेअमृत
त्वमश्यां यस्मैत्वंसुकृतेजातवेदउलोकमग्नेकृणवस्योनं अश्विनंसपुत्रिणंवीरवंतंगोमंतंरयिंनशतेस्वस्ति अष्टदिक्षुगंधपुष्पादिभिराय
तनं आत्मानंचालंकृत्य एकयोपस्थाय ततोपाणिनाइध्ममादायत्रिरभिघार्य अयंतइध्मेत्यस्यमंत्रस्यवामदेवऋषिःजातवेदोग्निर्देवतात्रि-
ष्टुप्छंदः इध्महवनेविनियोगः ॐ अयंतइध्मआत्माजातवेदस्तेनेध्यस्ववर्धस्वचेद्धवर्धयचास्मान्प्रजयापशुभिर्ब्रह्मवर्चसेनान्नाद्येनस
मेधयस्वाहा अग्नयेजातवेदसेइदंनमम स्रुवेणाज्यंगृहीत्वा वायव्यांदिशिआरभ्य अग्निदिक्पर्यंतंआज्यधारांजुहुयात् प्रजापतयेमनसा
ध्यायन् स्वाहेतिजुहुयात् स्वाहेतिमुखेनस्मृत्वा तथैवनिर्ऋतिदिशिआरभ्यईशानदिक्पर्यंतंजुहुयात् उभयत्रप्रजापतयइदं॰ उत्तरे अग्न
येस्वाहा अग्नयइदं॰ दक्षिणेसोमायस्वाहा सोमायेदं॰॥ अथप्रधानहोमंकुर्यात् ब्रह्मादिदेवतानाममंत्रेणएकैकयाज्याहुत्या॰ ब्रह्मणे॰
सोमाय॰ ईशानायस्वा॰ इंद्रायस्वा॰ अग्नयेस्वा॰ यमाय॰ निर्ऋतये॰ वरुणाय॰ वायवे॰ अष्टौवसुभ्यः॰ एकादशरुद्रेभ्यः॰ द्वादशादित्ये
भ्यः॰ अश्विभ्यां॰ विश्वेभ्योदेवेभ्यः सप्तयक्षेभ्यः॰ भूतनागेभ्यः॰ गंधर्वाप्सरोभ्यः॰ स्कंदाय॰ नंदीश्वराय॰ शूलाय॰ महाकालाय॰ दक्षादि
सप्तगणेभ्यः॰ दुर्गायै॰ विष्णवे॰ स्वधायै॰ मृत्युरोगाभ्यां॰ गणपतये॰ अद्भ्यः॰ मरुद्भ्यः॰ पृथिव्यै॰ गंगादिनदीभ्यः॰ सप्तसागरेभ्यः॰ मेरवे
स्वाहा गदायै॰ त्रिशूलाय॰ वज्राय॰ शक्तये॰ दंडाय॰ खड्गाय॰ पाशाय॰ अंकुशाय॰ गौतमाय॰ भरद्वाजाय॰ विश्वामित्राय॰ कश्यपाय॰
जमदग्नये॰ वसिष्ठाय॰ अत्रये॰ अरुंधत्यै॰ ऐंद्र्यै॰ कौमार्यै॰ ब्राह्म्यै ॰ वाराह्यै॰ चामुंडायै॰ वैष्णव्यै॰ माहेश्वर्यै॰ वैनायक्यै॰ स्वाहांतं अथस्वि
ष्टकृद्धोमः यदस्यकर्मणोइत्यस्यमंत्रस्यहिरण्यगर्भऋषिः अग्निर्देवता अतिधृतिछंदः स्विष्टकृद्धोमेविनियोगः ॐ यदस्यकर्मणोत्यरी
रिचंयद्वान्यूनमिहाकरं अग्निष्टत्स्विष्टकृद्विद्वान्सर्वंस्विष्टंसुहुतंकरोतुमे अग्नयेस्विष्टकृतेसुहुतहुतेसर्वप्रायश्चित्ताहुतीनांकामानांसमर्धयि
त्रेसर्वान्नःकामान्समर्धयःस्वाहा अग्नयेस्विष्टकृतइदं त्रिसंधानं रुद्रायपशुपतयेस्वाहा पशुपतयेरुद्रायेदं अपउपस्पृष्ट्वा स्रुवेणप्रायश्चि

त्ताज्याहुतीः सप्तजुहुयात् तत्रमंत्राः अयाश्चेत्यस्यमंत्रस्य विमदऋ० अयाळग्निर्देवता पंक्तिछंदः सर्वप्रायश्चित्ताज्यहोमेविनियो० ॐ
अयाश्चाग्नेस्यनभिशस्तीश्चसत्यमित्व मया असि अयासावयसाकृतोयासान् हव्यमूहिषेयानोधेहि भेषजं स्वाहा अयसेग्नयइदं अतो
देवाइतिद्वयोः काण्वोमेधातिथिर्ऋषिः आद्यादेवादेवता द्वितीयाविष्णुर्देवता गायत्री छंदः प्रायश्चित्ताज्याहुतिहोमेविनियोगः अतोदेवाअ
वंतुनोयतोविष्णुर्विचक्रमे पृथिव्याः सप्तधामभिः स्वाहा देवेभ्य इदं इदंविष्णुर्विचक्रमेत्रेधानिदधेपदं समूळ्हमस्यपांसुरेस्वाहा वि-
ष्णवइदं व्यस्तसमस्तव्याहृतीनांविश्वामित्रजमदग्निभरद्वाजभृगवऋषयः अग्निवायुःसूर्यप्रजापतयोदेवताः गायत्र्युष्णिगनुष्टुप्बृहत्य
श्छंदांसि सर्वप्रायश्चित्ताज्यहोमेविनियोगः ॐ भूः स्वाहा अग्नयइ० भुवः स्वाहा वायवइदं स्वः स्वाहा सूर्यायेदं० ॐ भूर्भुवः स्वः स्वाहा प्रजा
पतयइ० ततोब्रह्माकर्तारंपरीत्याग्नेर्वायव्यदेशेतिष्ठन्नेता एव सप्ताहुतीर्जुहुयात् त्यागः यजमानः अत्रकुर्यात् अनाज्ञातमितिमंत्रद्वयस्य
हिरण्यगर्भऋषिः अग्निर्देवता त्रिष्टुप्छंदः ज्ञाताज्ञानदोषपरिहारार्थं प्रायश्चित्ताज्यहोमेविनियोगः ॐ अनाज्ञातंयदाज्ञातंयज्ञस्यक्रिय
तेमिथु अग्नेतदस्यकल्पयत्वंहिवेत्थयथातथं स्वाहा अग्नयइदं ॐ पुरुषसंमितोयज्ञोयज्ञः पुरुषसंमितः अग्नेतदस्यकल्पयत्वंहिवे
त्थयथातथं स्वाहा अग्नयइदं यत्पाकत्रेत्यस्यमंत्रस्य आप्तस्थितऋषिः अग्निर्देवता त्रिष्टुप्छंदः न्यूनातिरिक्तदोषपरिहारार्थं प्रायश्चि
त्ताज्यहोमेविनि० ॐ यत्पाकत्रामनसादीनदक्षानयज्ञस्यमन्वतेमर्त्यासः अग्निष्टद्धोताक्रतुविद्विजानन्यजिष्ठोदेवाँऽऋतुशोयजातिस्वा
हा अग्नयइदं यद्वोदेवाइत्यस्यअभितपाऋषिः मरुतोदेवता त्रिष्टुप्छंदः मंत्रविपर्यासादिनिमित्तकप्रायश्चित्ताज्यहोमेविनियोगः ॐ य
द्वोदेवाअतिपातयानिवाचाचप्रयुतीदेवहेळनं अरायोअस्माँ अभिदुच्छुनायतेन्यत्रास्मिन्मरुतस्तंनिधेतनस्वाहा मरुद्भ्यइदं पूजा स्विष्ट
नवाहुत्याबलिंपूर्णाहुतिंचरेत् श्रेयः संपाद्यदानंच अभिषेकोविसर्जनं पूर्णाहुतिमुत्तमाहुतिंजुहोति सर्वंवैपूर्णाहुतिः सर्वमेवाप्नोति अ
थोइयंवैपूर्णाहुतिः अस्यामेवप्रतितिष्ठति इदमग्नयेवैश्वानराय शतक्रतवेसप्तवते अद्यश्वनमम वसोर्धारांकुर्यात् धामंतेवामदेव
आपोजगती पूर्णाहुतिहोमेविनियोगः धामंतेविश्वंभुवनमधिश्रितमंतःसमुद्रेहृद्यां१ तरायुषि अपामनीकेसमिथेयआभृतस्तमश्याम

मधुमंतंतर्ऊर्मिंस्वा० अद्भ्यइदं० बर्हिषिपूर्णपात्रंनिनयेत् पूर्णमसिपूर्णंमेभूयाःसुपूर्णमसिसुपूर्णंमेभूयाःसदसिसन्मेभूयाःसर्वमसिसर्वंमे भूयाःअक्षितिरसिमामेक्षेष्ठाःप्राच्यांदिशिदेवाऋत्विजोमार्जयंतां दक्षिणस्यांदिशिमासाःपितरोमार्जयंतां प्रतीच्यांदिशिग्रहाःपशवोमार्जयंतां उदीच्यांदिश्यापओषधयोवनस्पतयोमार्जयंतां उर्ध्वायांदिशियज्ञःसंवत्सरःप्रजापतिर्मार्जयंतां आपोअस्मानित्यस्यदेवश्रवाआपस्त्रिष्टुप् मार्जनेविनियोगः ॐ आपोअस्मान्मातरःशुंधयंतुघृतेननोघृतप्वःपुनंतु विश्वंहिरिप्रंप्रवहंतिदेवीरुदिदाभ्यःशुचिरापूतएमि इदमापःप्रवहतयत्किंचदुरितंमयि यद्वाहमभिदुद्रोहयद्वाशेपउतानृतं सुमित्र्यानआपओषधयःसंतु इत्येतैर्मंत्रैर्मार्जनंकृत्वा दुर्मित्र्यास्तस्मै संतु योस्मान्द्वेष्टियंचवयंद्विष्मःस्तंहन्मीतिनिर्ऋतिदेशेकुशाग्रैरपःक्षिपेत् माहंप्रजांपरासिचंयानःसयावरीस्तन समुद्रेवोनिनयानःसंपाथोअपीथ शांतिःपुष्टिःतुष्टिश्चास्तु आग्नेय्याभिमुखस्तिष्टन् अग्निपूजनं विश्वानिनोदुर्गहाजातवेदः० अग्न्युपस्थानंजप्त्वा अग्नेनयसुपथारायेअस्मान्विश्वानिदेवोवयुनानिविद्वान् युयोध्याऽस्मज्जुहुराणमेनोभूयिष्ठांतेनमउक्तिंविधेम बोधानोअस्यवचसोयविष्टमंहिष्टस्यप्रभृतस्यस्वधावः पीयतित्वोअनुत्वोगृणाति वंदारुस्तेतन्वंवंदे अग्ने नमस्कारः मानस्तोकेतिमंत्रस्य कुत्सऋषिः रुद्रोदेवता जगतीछंदः विभूतिग्रहणेविनियोगः ॐ मानस्तोकेतनयेमानआयौ मानोगोषुमानोअश्वेषुरीरिषः वीरान्मानोरुद्रभामितोवधीर्हविष्मंतःसदमित्वाहवामहे त्र्यायुषंजमग्नेरितिललाटे कश्यपस्यत्र्यायुषमितिकंठे अगस्त्यस्यत्र्यायुषमितिनाभौ यद्देवानांत्र्यायुषमितिदक्षिणस्कंधे तन्मेअस्तुत्र्यायुषमितिवामस्कंधे सर्वमस्तुशतायुषमितिशिरसि इतिविभूतिधारणंपरिस्तरणान्युत्तरेविसृजेत् परिसमुह्य ३ पर्युक्ष ३ ॐचमेस्वरश्चमेयज्ञोपचतेनमश्च यत्तेन्यूनंतस्मैतउपयत्तेतिरिक्तंतस्मैतेनमःस्वस्तिश्रद्धांमेधांयज्ञःप्रज्ञांविद्यांबुद्धिंश्रियंबलं आयुष्यंतेजआरोग्यंदेहिमेहव्यवाहन यस्यस्मृत्याचनामोक्त्यातपोयज्ञक्रियादिषु न्यूनंसंपूर्णतांयातिसद्योवंदेतमच्युतं प्रमादात्कुर्वतांकर्मप्रच्यवेताध्वरेषुयत् स्मरणादेवतद्विष्णोःसंपूर्णंस्यादितिश्रुतिःअनेनकर्मणाश्रीपरमेश्वरःप्रीयताम् गच्छगच्छसुरश्रेष्ठस्वस्थानेपरमेश्वर यत्रब्रह्मादयोदेवास्तत्रगच्छहुताशन होमंसंपाद्य उत्त

रपूजांकृत्वा आचार्यंसंपूज्यगांदद्यात् यज्ञसाधनभूतायाविश्वस्याघौघनाशिनी विश्वरूपधरोदेवः प्रीयतामनयागवा ब्राह्मणभोजनंसं
कल्प्य यांतुदेवगणाःसर्वेपूजामादायपार्थिवीं इष्टकामप्रसिध्यर्थंपुनरागमनायच इतिअग्निमुखं अथमुद्रालक्षणम् हेमाद्रौ संमु
खीकृत्यहस्तौद्वौकिंचित्संकुचितांगुली मुकुलीतुसमाख्यातापंकजप्रसृतैवसा पूर्वोक्तामुकुलीयाचप्रादेश्योनिःसृतांगुलिः व्याकोशामु
द्रामुकुलापद्ममुद्रांप्रदर्शयेत् अंगुष्ठौकुंचितानौतुस्वकीयांगुलिचेष्टितौ उच्चौवाभिमुखौहस्तौयोजयित्वातुनिष्ठुरा तर्जन्यौकुंचितेकृ
त्वातथैवचकनीयसी अधोमुखीहृष्टनखास्थितामध्येकरस्यतु चतस्रश्चोत्थिताःपृष्ठे अंगुष्ठावेकतःकुरु नालंब्यवस्थितौद्वौतुव्योममु
द्राप्रकीर्तिता तंत्रांतरेसर्वदेवतापूजनसाधारण्येनषण्मुद्राउच्यते देवताननसंतुष्टासर्वदासंमुखीभवेत् अंगुष्ठौनिक्षिपेत्सेयंमुद्रात्वावा
हनीमता संग्रंथ्यनिक्षिपेत्सेयंमुद्रात्वावाहनीस्मृता अधोमुखीत्वियंचेत्स्यात्स्थापनीमुद्रिकामता उच्छ्रितावुच्छ्रितौकुर्यात्संमुखीकरणीभवेत्
प्रसृतांगुलिकौहस्तौमिथःश्लिष्टौतुसंमुखौ कुर्यात्स्वहृदयंसेयंमुद्राप्रार्थनसंज्ञिका इत्येवंसर्वदेवानांपूजनेषट्प्रदर्शयेत् शिव
पूजनेलिंगमुद्रा उच्छ्रितंदक्षिणांगुष्ठंवामांगुष्ठेनबंधयेत् वामांगुलीदक्षिणाभिरंगुलीभिश्चवेष्टयेत् लिंगमुद्रेतिविख्याताशिवसान्निध्यका
रिणी श्रीकामःशीर्ष्णिकुर्वीतराज्यकामस्तुनेत्रयोः मुखेत्वन्नादिकामस्तुग्रीवायांरोगशांतिकृत् हृदयेसर्वकामीचज्ञानार्थीनाभिमंड
ले राज्यकामस्तुगुह्येचराष्ट्रकामस्तुपादयोः रामपूजनेसप्तदशमुद्राः तथाचरामार्चनचंद्रिकायांअगस्त्यः आवाहनीस्थापनीचसंनिधी
करणीतथा सुसंनिरोधिनीमुद्रासंमुखीकरणीतथा संकलीकरणीचैवमहामुद्रातथैवच शंखचक्रगदापद्मधेनुकौस्तुभगारुडाः श्री
वत्सवनमालेचयोनिमुद्रांप्रदर्शयेत् एताभिःसप्तदशभिर्मुद्राभिस्तुविचक्षणः योराममर्चयेन्नित्यंमोदयेत्ससुरेश्वरं द्रावयेदपिविमें
द्र ततःप्रार्थितमाप्नुयात् मूलाधाराद्द्वादशांतमानीतःकुसुमांजलिः त्रिस्थानगततेजोभिर्विनीतःप्रतिमादिषु आवाहनीचमुद्रास्याद्देवार्च
नविधौमुने एषैवाधोमुखीमुद्रास्थापनेशस्यतेपुनः उन्नतांगुष्ठयोगेनमुष्टीकृतकरद्वयं सन्निधीकरणीमुद्रादेवार्चनविधौमुने अंगुष्ठगर्भि
णीसैवमुद्रास्यात्संनिरोधिनी उत्तानमुष्टीयुगुलासंमुखीकरणीमता अंगैरेवांगविन्यासःसंकलीकरणीभवेत् अन्योन्यांगुष्ठसंलग्नवि

स्तारितकरद्वयं महामुद्रेयमाख्यातान्यूनाधिकसमापनी कनिष्ठानामिकामध्यांतस्थांगुष्ठात्तदग्रतः गोपितांगुष्ठमूलेन संनिधामुकुलीकृता करद्वयेनमुद्रास्याच्छंखाख्येयंसदार्चने अन्योन्याभिमुखस्पर्शव्यत्ययेनतु वेष्टयेत् अंगुलीभिःप्रयत्नेन मंडलीकरणं मुने चक्रमुद्रेयमाख्यातागदामुद्रा ततःपरं अन्योन्याभिमुखाश्लिष्टा ततः कौस्तुभसंज्ञका कनिष्ठेन्योन्यसंलग्नेभिमुखंहिपरस्परं वामस्यतर्जनीमध्ये मध्यानामिकयोरपि वामानामिकसंस्पृष्टातर्जनीमध्यशोभिता पर्यायेणानतांगुष्ठद्वयीकौस्तुभलक्षणा कनिष्ठान्योन्यसंलग्नविपरीतंतु योनितः अधस्तात्मापितांगुष्ठामुद्रागरुडसंज्ञिता तर्जन्यंगुष्ठमध्यस्थामध्यमानामिकाद्वयी कनिष्ठानामिकामध्येतर्जन्यग्रकरद्वयी मुनेश्रीवत्समुद्रेयंवनमालाभवेत्ततः कनिष्ठानामिकामध्यामुष्टिरुन्नततर्जनी परिभ्रांताशिरस्यस्त्रैस्तर्जनीभ्यांदिवौकसः योनिमुद्रासमाख्याता द्योतत्करद्वयाश्रिता तर्जन्याकृष्टमध्यांतोस्थितानामिकयुग्मिका मध्यस्थलस्थितांगुष्ठा सेयं शक्ता मुनेर्चने इतिमुद्रालक्षणम् अथोपचाराः पदार्थादर्शेज्ञानमालायाम् अष्टत्रिंशत्षोडशद्वादशपंचोपचारकाः तान्विभज्य प्रवक्ष्यामि केतेतैश्चकृतैश्चकिं अर्घ्यपाद्यमाचनं मधुपर्कमुपस्पृशम् स्नानंनीराजनंवस्त्रं आचमंचोपवीतकम् पुनराचमभूषेच दर्पणालोकनंततः गंधपुष्पेधूपदीपौनैवेद्यंचततःक्रमात् पानीयंतोयमाचामं हस्तवासस्ततःपरम् हस्तवासःकरोद्वर्तनं तांबूलमनुलेपंचपुष्पदानंततःपुनः गीतंवाद्यंतथानृत्यं स्तुतिंचैवप्रदक्षिणाः पुष्पांजलिनमस्कारावष्टत्रिंशत्समीरिताः इत्यष्टत्रिंशदुपचाराः अन्यच्च आसनंस्वागतंचार्घ्यंपाद्यमाचमनीयकम् मधुपर्कासनस्नानवसनाभरणानिच स्रगंधःसुमनोधूपोदीपमन्नेनभोजनम् माल्यानुलेपनेचैवनमस्कारविसर्जने इतिषोडशउपचाराः अर्घ्यंपाद्यंचाचमनंस्नानंवस्त्रनिवेदनम् गंधादयोनैवेद्यांताउपचारादशक्रमात् शारदातिलकेषोडशोपचाराउक्ताः तथाच आसनस्नानवस्त्राणिभूषणंचविवर्जयेत् रात्रौदेवार्चनेतैश्चपदार्थैर्द्वादशैःक्रमात् पूजनंकपिलेनोक्तंतत्सर्वंचविसर्जयेत् गंधतैलमयोदद्याद्देवस्याप्रतिमंततः दूर्वाचविष्णुक्रांताचश्यामाकंपद्ममेवच पाद्यंगानिचचत्वारिकथितानिसमासतः कर्पूरमगरुंपुष्पंद्रव्याण्याचमनीयके सिद्धार्थमक्षतंचैवदूर्वाचतिलमेवच यवगंधफलंपुष्पमष्टांगंत्वर्घ्यमुच्यते स्नानेवस्त्रेतथाभक्षेदद्यादाचमनीयकम् उद्वर्तनमपितन्नैव

रजनीसहदेवीचशिरीषंलक्ष्मणापिच महाभद्राकुशाग्राणिउद्वर्तनेनमिहोच्यते मंत्रतंत्रप्रकाशे अक्षतागंधपुष्पाणिस्नानपात्रेतथात्रयम् द्रव्याभावेप्रदातव्याः शालिनास्तंदुलाः शुभाः तत्रैवोक्तम् अगस्त्यसंहितायांतथाचमनपात्रेपिदद्याज्जातीफलंमुने लवंगमपिकंकोलंशस्तमाचमनीयकम् द्रव्याभावेतंत्रांतरेउक्तम् तंदुलान्प्रक्षिपेत्तेषुद्रव्याभावेतुतत्स्मरन् प्रयोगपारिजातेव्यासः प्रतिमापटयंत्राणांनित्यंस्नानंनकारयेत् कारयेत्पर्वदिवसेयदावामलधारणम् ज्ञानमालायां नाक्षतैरर्चयेद्विष्णुंनतुलस्यागणाधिपम् नदूर्वयायजेद्देवीं बिल्वपत्रैश्चभास्करम् उन्मत्तमर्कपुष्पंचविष्णोर्वर्ज्यंसदाबुधैः अक्षतास्तयवाःप्रोक्ता इतिपदार्थादर्शेउक्तत्वाद्यवानामेवाऽयंप्रतिषेधोनतंदुलानांतंत्रांतरे महाभिषेकंसर्वत्रशंखेनैवप्रकल्पयेत् सर्वत्रैवप्रशस्तोब्जःशिवसूर्यार्चनंविना अथव्रतोद्यापनानुक्तौ पृथ्वीचंद्रोदयेनंदिपुराणे कुर्यादुद्यापनंतस्यसमाप्तौयदुदीरितं उद्यापनविनायत्तुतद्व्रतंनिष्फलंभवेत् यत्रचोद्यापनंनोक्तंव्रतानुगुणतश्चरेत् वित्तानुसारतोदद्यादनुक्तोद्यापनेव्रते गांचैवकांचनंदद्याद्व्रतस्यपरिपूर्तये समाप्तावुद्यापनमनुक्तोद्यापनविषयंउक्तोद्यापनेतु आदौमध्येतथाप्यंते व्रतस्योद्यापनंभवेत् तद्व्रतोद्यापनंकार्यंसंपूर्णफलमाप्नुयात् अथव्रतभंगेसंपूर्णतायांविधिः हेमाद्रौभविष्ये युधिष्ठिरउवाच संपूर्णतामनुष्ठानंव्रतानांनंदनंदन कुरुप्रसादंगुह्यार्थमेतन्मेवक्तुमर्हसि श्रीकृष्णउवाच साधुसाधु महाबाहोकुरुराजयुधिष्ठिर रहस्यानांरहस्यंतेकथयामिव्रतेनव संपूर्णताकृतायत्रतत्रसम्यक्फलप्रदम् यच्चीर्णंनवनारीभिर्भवेत्संपूर्णकारकम् अवश्यंतच्चकर्तव्यंसंपूर्णफलकांक्षिभिः किंचिद्भग्नंप्रमादेनयद्व्रतंव्रतिनांस्थितम् तत्संपूर्णंभवेत्सर्वंव्रतेनानेनपांडव उपद्रवैर्बहुविधैर्महामोहाच्चपांडव यद्भग्नंकिंचिदेवस्याद्व्रतंविघ्नविनाशनं तत्संपूर्णंभवेत्पार्थसत्यंसत्यंनसंशयः कांचनंरूप्यकंरूपंशिल्पिनातुघटापयेत् भग्नव्रतस्ययोदेवस्तस्यरूपंविनिर्दिशेत् व्रतंस्त्रीपुरुषयोःपार्थप्रारब्धंयद्व्रतंकिल नचनिष्पादितंकिंचिद्दैवात्सर्वंतथास्थितं द्विभुजंपंकजारूढंसौम्यंप्रहसिताननं निष्पादितंशिल्पिनाचतस्मिन्नेवदिनेपुनः तन्मानेतुमनःप्रासे ब्राह्मणेविधिनागृहे स्नापयेत्पयसादध्नाघृतक्षौद्ररसांबुभिः वस्त्रचंदनपुष्पैश्चपूजांकुर्यात्समाहितः तोयपूर्णस्यकुंभस्यमुखेविन्यस्यदेवतां धूप

दीपाक्षतैर्वस्त्रैरत्नैर्बहुप्रकारकैः अर्घ्यंप्रदद्यात्तन्नाम्नामंत्रेणानेनपांडव उपासनस्यदानस्यप्रायश्चित्तंकृतंजले शरणंवः प्रपन्नास्मः कुरुष्व द्यदयांमम व्रतछिद्रंनपछिद्रंयछिद्रंव्रतकर्मणि तत्सर्वंत्वत्प्रसादेन संपूर्णंजायतांमम कुरुप्रसादंसंपूर्णंव्रतंसंजायतांमम पूर्वदक्षिणपश्चात्स्कंउत्तरंचबलिंहरेत् उपर्यधस्तात्सर्वेभ्योदिक्पालेभ्योनमोनमः इदमर्घ्यमिदंपाद्यंतेभ्यस्तेभ्योनमोनमः पादौचजानुनीचैवकटीशीर्षकवक्षसि कुक्षिंतुहृदयंपृष्ठंवाकूचक्षुश्चशिरोरुहान् पूजयित्वातुदेवस्यततःपश्चात्क्षमापयेत् पूजितस्त्वंयथाशक्त्यानमस्तेस्तुसुरोत्तम ऐहिकामुष्मिकींदेवकार्यसिद्धिंदिशस्वमे॥ एवंक्षमापयित्वातुप्रणमेच्चप्रयत्नतः तन्मूर्तिंचद्विजातिभ्योविधिवत्प्रतिपादयेत् स्थित्वापूर्वंमुखोविप्रोगृण्हीयाद्दर्भपाणिना विप्रहस्तेप्रयच्छेच्चदाताचैवोत्तरामुखः मंत्रेणानेनकौंतेयसोपवासःप्रयत्नतः इदंव्रतंमयाखंडंकृतमासीत्सुराद्विज तत्सर्वंपूर्णमेवास्तुतवमूर्तिप्रदानतः ब्राह्मणोपिप्रयच्छेतमंत्रेणानेनतद्व्रतम् वाक्यंपूर्णमतःपूजाव्रतेनानेनतेपुरा संपूर्णं स्यात्प्रसादेनतवपूर्णामनोरथाः ब्राह्मणायत्प्रभाषंतेतन्मन्यंतेदिवौकसः सर्वदेवमयाविप्रानतद्वचनमन्यथा जलधिःक्षारतांनीतःपावकःसर्वभक्षतां सहस्रनेत्रःशक्रोपिकृतोविप्रैर्महात्मभिः ब्राह्मणानांतुवचनाद्ब्रह्महत्याविनश्यति अश्वमेधफलंसाग्रंलभतेनात्रसंशयः व्याससवाल्मीकिवच्चनात्पराशरवसिष्ठयोः गर्गगौतमधौम्यात्रिर्वामदेवपुलस्त्ययोः वचनान्नारदादीनांपूर्णंभवतुमेव्रतं एवंविधिविधानेन गृहीत्वाब्राह्मणोव्रजेत् दातातत्प्रेषयेत्सर्वंब्राह्मणस्यगृहंस्वयं ततःपंचमहायज्ञान्कृत्वावैभोजनादिकं एवंयःकुरुतेभक्त्या व्रतमेतन्नरोत्तम तस्यसंपूर्णतांयातिनद्व्रतंयत्पुराकृतं खंडंसंपूर्णतांयातिप्रसन्नेव्रतदैवते भग्नानियानिप्रदमोहवशाद्गृहीत्वाजन्मांतरेस्वपिनरेणसंवत्सरेण संपूर्णपूजनपरस्यपुरोभवंतिसर्वव्रतानिपरिपूर्णफलप्रदानि अथसर्वव्रतेषुसामान्यतःपूजाविधिः सहस्रशीर्षेत्यावाहनं १ आगच्छागच्छदेवेशतेजोराशेजगत्पते क्रियमाणांमयापूजांगृहाणसुरसत्तम पुरुषएवेदमित्यासनं २ नानारत्नसमायुक्तंकार्तस्वरविभूषितं आसनंदेवदेवेशप्रीत्यर्थंप्रतिगृह्यतां एतावानस्येतिपाद्यं ३ गंगादिसर्वतीर्थेभ्योमयाप्रार्थनयाहृतं तोयमेतत्सुखस्पर्शंपाद्यार्थंप्रतिगृह्यतां त्रिपादूर्ध्वइत्यर्घ्यं ४ नमस्तेदेवदेवेशनमस्तेधरणीधर नमस्तेकमलाकांतगृहाणार्घ्यंनमोस्तुते तस्माद्विराळेत्याच

मनीयं ५ कर्पूरवासितंतोयंमंदाकिन्याःसमाहृतं आचम्यतांजगन्नाथमयादत्तंहिभक्तितः यत्पुरुषेणेतिस्नानं ६ गंगाचयमुनाचैव नर्मदाचसरस्वती कृष्णाचगौतमीवेणी क्षिप्रासिंधुस्तथैवच तापीपयोष्णीरेवाचताभ्यःस्नानार्थमाहृतं तोयमेतत्सुखस्पर्शंस्नानार्थं मतिगृह्यतां पंचामृतस्नानंपंचमन्त्रैः५ पृथक्कुर्यात् तंयज्ञमितिवस्त्रं सर्वभूषाधिकेसौम्येलोकलज्जानिवारणे मयोपपादितेतुभ्यंवाससीमतिगृह्यतां वस्त्रंचसोमदैवत्यं लज्जायास्तुनिवारणं मयोपपादितेतुभ्यंवाससीमतिगृह्यतां तस्माद्यज्ञादितियज्ञोपवीतं दामोदर नमस्तेस्तुत्राहिमांभवसागरात् ब्रह्मसूत्रंसोत्तरीयंगृहाणपुरुषोत्तम तस्माद्यज्ञात्सर्वहुतइतिगंधं श्रीखंडंचंदनंदिव्यंगंधाढ्यंसुमनोहरं विलेपनंसुरश्रेष्ठप्रीत्यर्थंमतिगृह्यतां अक्षताश्चसुरश्रेष्ठाः कुंकुमाक्ताःसुशोभनाः मयानिवेदिताभक्त्यागृहाणपरमेश्वर तस्मादश्वेतिपुष्पं माल्यादीनिसुगंधी० यत्पुरुषंव्यदधुरितिधूपं वनस्पतिरसोद्भू० ब्राह्मणोस्येतिदीपं० साज्यंचवर्तिसंयुक्तं० चंद्रमामनसइतिनैवेद्यं अन्नंचतुर्विधंस्वादुरसैःषड्भिःसमन्वितं भक्ष्यभोज्यसमायुक्तंनैवेद्यंमतिगृह्यतां इदंफलमितिफलं नाभ्याआसीदितितांबूलं पूगीफलंमहद्दिव्यंनागवल्यादलैर्युतं कर्पूरादिसमायुक्तंतांबूलंमतिगृह्यतां सप्तास्येतिप्रदक्षिणा हिरण्यगर्भगर्भस्थंहेमबीजंविभावसोः अनंतपुण्यफलदमतःशांतिंप्रयच्छमे चंद्रादित्यौचधरणीविद्युदग्निस्तथैवच त्वमेवसर्वज्योतींषिआर्तिक्यंमतिगृह्यतां नीराजनं यज्ञेनयज्ञमितिपुष्पांजलिः नमस्तेपुंडरीकाक्षनमस्तेह्यमरप्रिय नमस्तेकमलाकांतवासुदेवनमोस्तुते यानिकानिचपापानिब्रह्महत्यासमानिच तानितानिविनश्यंतिप्रदक्षिणपदेपदे प्रदक्षिणाः नमःसर्वहितार्थायजगदाधारहेतवे साष्टांगोयंप्रणामोस्तुप्रणयेन मयाकृतः इतिनमस्कारः इतिसामान्यपूजाविधिः इतिश्रीव्रतार्कपरिभाषासमाप्ता अथादौप्रतिपदादितिथिव्रतानिलिख्यंते मात्स्ये वर्जयित्वामधौयस्तुदधिक्षीरघृतेक्षवम् दद्याद्वस्त्राणिसूक्ष्माणिरसपात्रैर्युतानिच रसपात्रैर्दध्यादिपात्रैः संपूज्यविप्रमिथुनंगौरीमेप्रीयतामिति हेमाद्रौपाद्मेच अर्चयेच्चैत्रमासेतुयस्तुगंधानुलेपनैः शुक्तिंगंधभृतांदद्याद्विप्रायश्वेतवाससी भक्त्यातुदक्षिणांदद्यात्सर्वकामार्थसिद्धये गंधवस्त्रदानमंत्रः चंदनावासगंधानांसरवेवृंदारकार्चितम् चंदनंत्वत्प्रसादेनसांद्रानंदप्रदोभव शरण्यंसर्वलोका

नांलज्जायारक्षणंपरम् सुवेषधारित्वंयस्माद्वासः शांतिंप्रयच्छमे इतिमंत्राभ्यांगंधवाससीदद्यात् अथवचैत्रशुक्लप्रतिपदिसंवत्सरारंभवि
धिर्ब्राह्मे अत्रप्रतिपत्सूर्योदयव्यापिनीग्राह्या श्रीभगवानुवाच चैत्रेमासिजगद्ब्रह्माससर्जप्रथमेहनि शुक्लपक्षेसमग्रेतुतदासूर्योदयेसति
इतिवचनात् दिनद्वयेव्याप्तावव्याप्तौवापूर्वैव वत्सरादौवसंतादौबलिराज्येतथैवच पूर्वविद्धैवकर्तव्याप्रतिपत्सर्वदाबुधैः वसिष्ठवचना
दितिबहवः युक्तंतुदिनद्वयेउदयसंबंधाभावेसंवत्सरारंभप्रयुक्तकार्यलोपप्रसक्त्यावदवचनंपूर्वयुताग्राह्यताविधायकम् दिनद्वयेतत्सं
बंधेतुसंपूर्णत्वादेवपूर्वाप्राप्तेः कदाकार्यमित्याकांक्षाविरहात्पूर्वयुतत्वविरहाच्चैवैतद्वचनात् पूर्वेतिब्राह्मे प्रवर्तयामासतथाकालस्य
गणनामपि ग्रहानब्दानृतून्मासान्पक्षान्संवत्सराधिपान् ददौसभगवान्ब्रह्मासर्वदेवसमागते ब्राह्म्यांसभायांब्रह्माणमनिर्देश्यतनुं
ततः यथोक्तेतेनमस्यंतस्तुवंतश्चाप्युपासते ततस्तेकृतशुश्रूषागत्वाचैवहिमालयम् स्वानिस्वान्यथकर्माणितेनयुक्ताश्चचक्रिरे ब्राह्मी
सभाकामरूपाविशेषेणनदानघ धारयंत्यमलंरूपमनिर्देश्यंमनोहरम् ततःप्रभृतियोधर्मःपूर्वैःपूर्वतरैःकृतः अद्यापिरूढःसुतरांसक
र्तव्यःप्रयत्नतः तत्रकार्यामहाशांतिःसर्वकल्मषनाशिनी सर्वोत्पातप्रशमनीकलिदुःखप्रणाशिनी आयुःप्रदावृद्धिकरीधनसौभाग्य
वर्धिनी मांगल्याचपवित्राचलोकद्वयसुखावहा तस्यामादौतुसंपूज्योब्रह्माकमलसंभवः॥ पाद्यार्घपुष्पधूपैश्चवस्त्रालंकारभूष
णैः॥ होमैर्बल्युपहारैश्चतथाब्राह्मणभोजनैः॥ ततःक्रमेणदेवेभ्यःपूजाकार्यापृथक्पृथक्॥ कृत्वोंकारवषट्कारौकुशोदकतिलाक्षतैः पुष्प
धूपप्रदीपाद्यैर्भोजनैश्चयथाक्रमम् मंत्रसंपूजनार्थेतुब्रह्मरूपंपरिस्पृशेत् मंत्रमितिधाताचेत्येकवचनम् बहुरूपंमंत्रंनानारूपान्मंत्रा
न्परिस्पृशेत् परिगृह्णीयादित्यर्थः तेन ॐनमोब्रह्मणइत्यादिविष्णवेपरमात्मनेनमइत्येवंमंत्रवाक्यवृंदोयात्रादेवताशब्दाश्चतुर्थ्यंताः
प्रणवादयोनमोंतामंत्रत्वेनग्राह्याः प्रार्थनामंत्राः ॐनमोब्रह्मणेतुभ्यंकामायचमहात्मने नमस्तेस्तुनिमेषायत्रुटयेचनमोस्तुतेलवाय
चनमस्तुभ्यंनमस्तेस्तुक्षणायच नमोनमस्तेकाष्ठायैकलायैतेनमोस्तुते नाडिकायैसुषुम्नायैमुहूर्तायैनमोनमः नमोनिशाभ्यःपुण्ये
भ्योदिवसेभ्यश्चनित्यशः पक्षाभ्यांचाथमासेभ्योऋतुभ्यश्चनमोनमः अष्टाविंशतिसंख्येभ्योनक्षत्रेभ्योनमोनमः प्रतिवर्षाधिपेभ्यश्च

विज्ञातेभ्योनमःसदा नमोस्तुकुलनागेभ्योसानुयात्रेभ्यएवच सानुयात्रेभ्यःसानुचरेभ्यः नमोस्तुसर्वदिग्भ्यश्चदिक्पालेभ्योनमोनमः नमः
पुरंदरेभ्यश्चतत्संख्येभ्योनमोनमः पंचाशतेनमोनित्यंदक्षकन्याभ्यएवच नमोदेव्यैसुभद्रायैजयायैचाथसर्वदा मृशारुद्रायनमस्तुभ्यंस
वास्तुजनकायच नमस्तेबहुपुत्रायपत्नीभिःसहितायच नमोबुध्यैनथावृध्यैनिद्रायैधनदायच नमःकुबेरपुत्रायगुह्यकस्वामिनेनमः न
मोस्तुशंखपद्मेभ्योनिधिभ्योमेथनित्यशः भद्रकाल्यैनमस्तुभ्यंसुरम्यैचनमोनमः वेदवदांगवेदांतविद्यासंस्थेभ्यएवच नागयक्षसुपर्णे
भ्योनमोस्तुगरुडायच सप्तभ्यश्चसमुद्रेभ्यःसागरेभ्यश्चसर्वदा उत्तरेभ्यःकुरुभ्यश्चनमोमेरवनायच भद्राश्वकेतुमालेभ्योनमःसर्वत्रस
र्वदा इलावृतायचनमोहरिवंशायचैवहि नमःकिंपुरुषेभ्यश्चभरतायनमोनमः नमोभारतभेदेभ्योमहद्भ्यश्चाथसर्वदा पातालेभ्यश्चस
सभ्योनरकेभ्योनमोनमः कालाग्निरुद्रशैवेभ्योहरयेक्रोधरूपिणे सप्तभ्यस्तथलोकेभ्योमहाभूतेभ्यएवच नमःसंबुद्धयेचैवनमःप्रकृतये
तथापुरुषायाभिमानायनमोस्तुव्यक्तमूर्तयेहिमवत्प्रमुखेभ्यश्चपर्वतेभ्योनमस्तथ पौराणीभ्यश्चगंगाभ्यःसप्तभ्यश्चनमोनमः नमोस्त्वा-
दिमुनिभ्यश्चसप्तभ्यश्चाथसर्वदानमोस्तु पुष्करादिभ्यस्तीर्थेभ्यश्चपुनःपुनःनिम्नगाभ्योनमोनित्यंवितस्तादिभ्यएवच चतुर्दशभ्योदीर्घे
भ्योधरणीभ्योनमोनमः नमोधात्रेविधात्रेच छंदोभ्यश्चनमोनमः सुरभ्यैरावणाभ्यांचनमोभूयोनमोनमः नमस्तथोच्चैःश्रवसेध्रुवायचनमो
नमः नमोस्तुधन्वंतरयेशस्त्रास्त्राभ्यांनमोनमः विनायककुमारायविद्याभ्यश्चनमःसदा शाखायचविशाखायनैगमेयायवैनमः नमःस्कंद
गृहेभ्यश्चस्कंदमातृभ्यएवचज्वरायरोगपतयेभस्मप्रहरणायच ऋषिभ्योवालखिल्येभ्यःकेशवायनमःसदा अगस्तयेनारदायव्यासादिभ्यो
नमोनमः अप्सरोभ्यःसोमपेभ्योदेवेभ्यश्चनमोनमः असोमपेभ्यश्चनमस्तुषितेभ्योनमःसदा आदित्येभ्योनमोनित्यंद्वादशभ्यश्चसर्वदा
एकादशभ्योरुद्रेभ्यस्तपस्विभ्योनमोनमः नमोनासत्यदस्राभ्यामश्विभ्यांनित्यमेवहि साध्येभ्योद्वादशभ्यश्चपौराणेभ्योनमःसदा एकोन
पंचाशतभ्योमरुद्भ्यश्चनमोनमः शिल्पाचार्यायदेवायनमस्तेविश्वकर्मणे अष्टभ्योलोकपालेभ्योसानुगेभ्यश्चसर्वदा आयुधेभ्योवाहनेभ्यो
चर्मभ्यश्चनमःसदा आसनेभ्योदुंदुभिभ्योदेवेभ्यश्चनमःसदा दैत्यराक्षसगंधर्वपिशाचेभ्यश्चनित्यशः पितृभ्यःसप्तभेदेभ्योप्रेतेभ्यश्चनमःस

दा सुसूक्ष्मेभ्यश्चदेवेभ्योभावगम्येभ्यएवच नमस्तेबहुरूपायविष्णवेपरमात्मने अथकिंबहुनोक्तेनमंत्रेणानेनवार्चयेत् प्राङ्मुखोदङ्मुखो
विमान्देवानुद्दिश्यपूर्ववत् अथवाकिमत्रविस्तरेणब्राह्मणानेवदेवतोद्देशेनपूजयेदित्यर्थः पूर्ववन्मंत्रोक्तक्रमेणअर्चैस्तुधैश्चधूपैश्चवस्त्रमा
ल्यैःसहृष्टकंसरोमसमर्च्चयेदित्यर्थः धनधान्यानुविभवैर्दक्षिणाभिश्चसर्वदा इतिहासपुराणानांप्रवक्तॄंश्चद्विजोत्तमान् कालज्ञान्वेदवेदज्ञा
न्भृत्यान्संबंधिबांधवान् अनेनैवतुमंत्रेणस्वाहांतनपृथक्पृथक् प्रविष्टायाग्नयेहोमःकर्तव्यःसर्वतृप्तये वेदविच्चक्षुषीदत्वास्थानेप्राधानि
केसदा प्रतिष्ठायश्चेष्टावेदविद्वेदोक्तविधिज्ञः मदनरत्नेतु वेदवित् इतिपठित्वा वेदोक्तविधिनेतिव्याख्यातम् चक्षुषीआज्यभागौ प्राधानिके-
स्थाने प्रधानहोमारंभे होमारंभेनततः कुर्यान्मंगलालंभनंतरः मदनरत्ने शालशोभांततःकुर्यान्मंगलालभनंततः इतिपठेत् भोजयित्वा
द्विजान्सर्वान्सुहृत्संबंधिबांधवान् विशेषेणचभोक्तव्यंकार्यश्चापिमहोत्सवः नवसंवत्सरारंभःसर्वसिद्धिप्रवर्त्तकः इतिसंवत्सरारंभ-
विधिः अथअत्रैवविष्णुधर्मोत्तरोक्तंआरोग्यप्रतिपद्व्रतम् पुष्करउवाच संवत्सरावसानेतुपंचदश्यासुपोषितः प्रातःप्रतिपदिस्नातःकु
र्याद्व्रतमनन्यधीः पूजयेद्भास्करंदेवंवर्णकैःकमलेकृते वर्णकैरक्तनीलश्वेतपीतादिभिःशुक्लेनगंधमाल्येनचंदनेनसितेनच तथाकुंदुरुधूपे
नघृतदीपेनभार्गव कुंदुरुःसल्लकीनिर्यासः अपूपैःसैकतैर्दध्नापरमान्नेनभूरिणा सैकतैःशार्कराविकारैः ओदनेनचभक्तेनसतालवणसर्पिषा
सताउत्तमेन क्षीरेणचफलैःशुक्लैर्बहुब्राह्मणतर्पणैः पूजयित्वाजगन्नाथमदिनभागेचतुर्थके आहारंप्रथमंकुर्यात्सघृतंमनुजोत्तम सर्वंचमनु
जश्रेष्ठघृतहीनंविवर्जयेत् भुक्त्वासकलदेवान्नमाहारंचसमाचरेत् पानीयंपाम्कुर्वीतब्राह्मणानुमतेपुनः प्रथमआहारंप्रथमग्रासन्
सर्वंप्रथमंच आहारं एकमेवग्रासंभक्षयित्वाऽवशिष्टमन्नंत्यजेत् ब्राह्मणानुमत्याभुंजानोपिघृतहीनंनभुंजीत घृतहीनंविवर्जयेदितिनिषेधा
त् संवत्सरमिदंकृत्वाततःसाक्षात्त्रयोदश पूजनंदेवदेवस्यतस्मिन्नहनिभार्गव संवत्सरंशुक्लप्रतिपत्सत्रयोदशमितिलिंगदर्शनात् सवत्संस
हिरण्यंचततोदद्याद्विजातये पूजनंपूजोपकरणं प्रतिपदिव्रतेनानेनधर्मज्ञरोगमेवंव्यपोहति आरोग्यमाप्नोतिगतिंतथाग्र्यांयशस्तथाग्र्यंवि
पुलांश्चभोगान् व्रतेनसम्यक्पुरुषोथनारीसंपूज्य येद्यस्तुजगत्प्रधानम् जगत्प्रधानंसूर्यम् इतिचैत्रशुक्लप्रतिपदिआरोग्यदायकव्रतम् अ-

स्थामेवोक्तंविद्याव्रतम् मदनरत्नेविष्णुधर्मे मार्कंडेयउवाच अष्टपत्रंतुकमलंविन्यसेद्वर्णकैःशुभैः ब्रह्माद्यांकर्णिकायांतुतस्यसंपूजयेद्वि
भुम् ऋग्वेदंपूर्वपत्रेतुयजुर्वेदंतुदक्षिणे पश्चिमेसामवेदंतुउदक्चाथर्वणंतथा आग्नेयेचतथांगानिधर्मशास्त्राणिनैर्ऋते पुराणंचैववायव्येईशा
न्यांन्यायविस्तरं एवंविन्यस्यधर्मज्ञः सोपवासस्तुपूजयेत् चैत्रशुक्लमथारभ्यसोपवासोजितेंद्रियः सदाप्रतिपदंप्राप्यशुक्लपक्षेस्वयादव-
संवत्सरंमहाराजशुक्लगंधानुलेपनैः भूषणैःपरमान्नेनधूपदीपैरतंद्रितः संवत्सरांतेगांदद्याद्व्रतेजीर्णेनरोत्तम इदंव्रतंयस्तुकरोतिराजन्सवे
दविद्याङ्गविधर्मनिष्ठः कृत्वासदाद्वादशवत्सराणि विरिंचिलोकंपुरुषःप्रयाति इतिविद्याप्रतिपद्व्रतम् अथात्रैवभविष्योक्तंतिलकव्रतम्
श्रीकृष्णउवा० वसंतेकिंशुकाशोकशोभितेप्रतिपत्तिथिः शुक्लातस्यांप्रकुर्वीतस्नानंनियममाश्रितः नारीनरोवाराजेंद्रसंतर्प्यपितृदेवताः
नद्यास्तीरेतडागेवागृहेवातदलाभतः पिष्टातकेनविलिखेद्वत्सरंपुरुषाकृतिम् पिष्टातकः पटवासकोगंधः इतिचूर्णविशेषः ततश्चंदनचू
र्णेनपुष्पधूपादिनार्चयेत् मासर्तुनामभिःपश्चान्नमस्कारैस्तथार्चितैः मासर्तुर्नामभि श्चैत्रवसंताद्यैश्चनामभिः पूजयेद्ब्राह्मणोविद्वान्मं
त्रैर्वेदोदितैःशुभैः संवत्सरंपठन्मंत्रंतथावेदोदितंद्विजः नमस्कारेणमंत्रेणशूद्रोपीत्थंप्रपूजयेत् शूद्रोपीत्यनेनस्त्रीणांपरिग्रहः तासांविशेषवि-
ध्यभावेवैदिकमंत्राधिकारात् संवत्सरोसिपरिवत्सरोसीत्यादियजुर्वेदप्रसिद्धामंत्राः नमस्कारेणमंत्रेणसंवत्सरायतेनम इत्यादिनाएवम
भ्यर्च्यवासोभिःपश्चात्तमभिवेष्टयेत् कालोद्भवैर्मूलफलैर्नैवेद्यैर्मोदकादिभिः ततस्तंपूजयेत्सार्थपुरस्थित्वाकृतांजलिः भगवंस्त्वत्प्रसादे
नवर्षंक्षेममिहास्तुमे संवत्सरोपसर्गामेविलयंयांत्वशेषतः एवमुक्त्वायथाशक्त्यादत्वाविप्रायदक्षिणां ललाटपट्टेतिलकंकुर्याच्चंदनपंकजम्
ततःप्रभृत्यनुदिनंतिलकालंकृतंमुखम् धार्यंसंवत्सरंयावच्छशिनेवनभस्तलम् एवंनरोवानारीवाव्रतमेतत्समाचरेत् सदैवपुरुषव्याघ्र
भोगान्भुविभुनक्त्यसौ भूतप्रेतपिशाचाये दुर्धरावैरिणोग्रहाः निरर्थकाभवंत्येतेतिलकंवीक्ष्यतत्क्षणात् निरर्थकाःप्रयोजनशून्याः
अनिष्टकरणेअसमर्थाइत्यर्थः अत्रवसंतेप्रतिपत्तिथिः शुक्लातस्यांप्रकुर्वीतेतिवसंतशुक्लाप्रतिपल्लब्धा तयाव्रतमिदंचैत्रेगृह्णीतेद्विज
सन्निधौ इत्यग्रेनेनचैत्रस्यैव विज्ञायतेपूर्वमासीन्महीपालोनाम्नाशत्रुजयोजयी चित्रलेखेतितस्याभूद्भार्याचातिविभूषणा त

याव्रतमिदंभक्त्यागृहीतंद्विजसन्निधौ वत्सरंपूजयित्वातुध्यात्वादेवंजनार्दनम् हंतुंवाक्षेमकामोवासमागच्छतियःपुनःप्रयातिसप्रियंकृत्वाह
स्त्वातुतिलकंनरः रापत्नीहर्षप्रहरावशीकृतमहीतला भर्तृदृष्टाप्रहृष्टासासुखमाप्नोतिनिराकुला पावकेनाभिभूतस्तुभर्तापुत्रःसवेदनः शिरो
र्त्तिनासंप्रयातःसुहृदांसुखदायकः शिरोर्त्तिनाशिरोवेदनायुक्तः धर्मराजपुरींप्राप्तः सर्वतापकरींततः तस्मिन्क्षणेमहाराजधर्मराजस्यकिंक
राः तस्याद्वारमनुप्राप्ताःप्रविश्यगृहमंजसा शत्रुंजयंसमानेतुंकालमृत्युपुरःसराः पार्श्वेस्थितांचित्रलेखांतिलकालंकृताननाम् दृष्ट्वाप्रनष्ट
संकल्पाःपरावृत्यगताःपुनः गतेषुतेषुसनृपःपुत्रेणसहभारत भूभुजांबुभुजेभोगान्पूर्वकर्मार्जितांच्छुभान् अक्रूरेणसमाख्यातंममपूर्वंयु
धिष्ठिर एतत्त्रिलोक्यतिलकाख्यविभूषितंचपुण्यप्रदंसकलदुष्टहरंपरंच इत्थंसमाचरतियःससुखंविहृत्यमर्त्यःप्रयातिपदमच्युतमिंदुमौ
लेः इतितिलकव्रतम् अस्यामेवनवरात्रारंभः तत्रपरयुताग्राह्या अमायुक्तानकर्तव्याप्रतिपच्चंडिकार्चने मुहूर्तमात्राकर्तव्याद्वितीयायांयु
गान्विता अत्रैवप्रपादानमुक्तं अतीतेफाल्गुनेमासिप्राप्तेचैत्रेमहोत्सवे पुण्येन्हिविप्रकथितेप्रपादानंसमारभेत् ततश्चोत्सर्जयेद्विद्वान्मंत्रे
णानेनमानवः प्रपेयंसर्वसामान्यभूतेभ्यःप्रतिपादिता अस्याःप्रदानात्पितरस्तृप्यंतुहिपितामहाः अनिवार्यंततोदेयंजलंमासचतुष्टयम् प्र
पादातुमशक्तेनविशेषाद्धर्मभीरुणा प्रत्यहंधर्मघटकोवस्त्रसंवेष्टिताननः ब्राह्मणस्यगृहेदेयःशीतामलजलःशुचिः एषधर्मघटोदत्तोब्रह्म
विष्णुशिवात्मकः अस्यप्रदानात्सकलाममसंतुमनोरथाः अनेनविधिनायस्तुधर्मकुंभंप्रयच्छति प्रपादानफलंसोपिप्राप्नोतीहनसंशयः
इतिप्रपादानं अथश्रावणशुक्लप्रतिपदिसोमवारमारभ्याचारमासंरोटकव्रतम् अथसर्वशिवव्रतेषुपूजाविधिः ममेहजन्मनिसमस्तसौभा
ग्यप्राप्त्यर्थंधनपुत्रप्राप्तिकामःसार्द्धमासत्रयात्मकंरोटकासोमेश्वरप्रीत्यर्थंबिल्वव्रतंकरिष्ये तत्रसोमेश्वरपूजनम् कार्तिकशुक्लचतुर्दश्यांउ
द्यापनम् मया अनुष्ठितस्यसार्द्धमासत्रयात्मकबिल्वव्रताख्यस्यकर्मणःसांगतासिध्यर्थंबिल्वरोटकाव्रतोद्यापनंकरिष्ये तंदुले रष्टदलंकृ
त्वा तत्रसप्तमातॄल्लोंकपालांश्चपूजयेत् मध्येसोमेश्वरम् आयाहिभगवन्शंभोशर्वत्वंगिरिजापते प्रसन्नोभवदेवेशनमस्तुभ्यंहिशंकर त्रि
पुरांतकरंदेवंचंद्रचूडंमहाद्युतिम् गजचर्मपरीधानंसोममावाहयाम्यहं आवाहनं बंधूकसन्निभंदेवंत्रिनेत्रंचंद्रशेखरं त्रिशूलधारिणंदेवंचा

रुद्रासंस्कृनिर्मलम् कपालधारिणंदेवंवरदाभयहस्तकं उमयासहितंशंभुंध्यायेत्सोमेश्वरंसदा ध्यानं विश्वेश्वरमहादेवराजराजेश्वरप्रिय आसनंदिव्यमीशानदास्येहंतुभ्यमीश्वर आसनं महादेवमहेशानमहादेवपरात्पर पाद्यंगृहाणमद्दत्तंपार्वतीसहितेश्वर पाद्यं त्र्यंबकेशसदाचारजगदादिविधायक अर्घ्यंगृहाणदेवेशसांबसर्वार्थदायक अर्घ्यं· त्रिपुरांतकदीनार्तिनाशश्रीकंठशाश्वत गृहाणाचमनीयंचपवित्रोदककल्पितम् आचमनीयं क्षीरमाज्यंदधिमधुशर्कराचामृतंपयः प्रकल्पितंमहात्मोशगृहाणेदंजगत्पते पंचामृतं गंगागोदावरीरेवापयोष्णीयमुनातथा सरस्वत्यादितीर्थानिस्नानार्थंप्रतिगृह्यतां स्नानं वस्त्राणिपट्टकूलानिविचित्राणिनवानिच मयानीतानिदेवेशप्रसन्नोभवशंकर वस्त्रं सौवर्णराजतंताम्रंकार्पासस्यतथैवच उपवीतंमयादत्तंप्रीत्यर्थंप्रतिगृह्यतां उपवीतं सर्वेश्वरजगद्वंद्यदिव्यासनसमास्थित गंधंगृहाणदेवेशचंदनंप्रतिगृह्यताम् गंधं गंधोपरिशुक्लाक्षतान् अक्षताश्चसुरश्रेष्ठाःशुभ्राधूताश्चनिर्मलाः मयानिवेदिताभक्त्यागृहाणपरमेश्वर अक्षतान् माल्यादीनिसुगंधीनि॰ पुष्पाणि वनस्पतीतिधूपं· आज्यंचेतिदीपं· अपूपानिचपक्वानिमंडकावटकानिच पायसंसूपमन्नंचनैवेद्यंप्रतिगृह्यतां नैवेद्यं मध्येपानीयं करोद्वर्तनं कूष्मांडंमातुलिंगंचनारीकेरफलानिच गृहाणपार्वतीकांत सोमेशप्रतिगृह्यतां फलं पूगीफलमितितांबूलं हिरण्यगर्भेतिदक्षिणा अग्निर्ज्यौतीरविर्ज्यौतिर्ज्यौतिर्नारायणोविभुः नीराजयामिदेवेशंपंचदीपैःसुरेश्वरं नीराजनं हेतवेजगतामेवसंसारार्णवसेतवे प्रभवे सर्वविद्यानांशंभवेगुरवेनमः नमस्कारः यानिकानिचेतिप्रदक्षिणा हरविश्वाखिलाधारनिराधारनिराश्रय पुष्पांजलिंगृहाणेशसोमेश्वरनमोस्तुते पुष्पांजलिं बिल्वपत्रंसुवर्णेनत्रिशूलाकारमेवच मयार्पितंतुतच्छंभो बिल्वपत्रंगृहाणमे बिल्वपत्रार्पणम् अथकथा युधिष्ठिरउवाच हृषीकेशमयाकारिव्रतदानान्यनेकधा श्रोतुमिच्छामिदेवेशव्रतं संपत्तिदायकम् येनव्रतेनदेवेशपुराराज्यंलभामहे तथाव्रतंतुमेब्रूहियादवानांकृपाकर श्रीभगवानुवाच वदामिशुभदंपार्थलक्ष्मीवृद्धिप्रदायकं धर्मार्थकाममोक्षाणांनिदानंपरमंव्रतम् युधिष्ठिरउवाच येनचादौपुराचीर्णंमर्त्यैकेनप्रकाशितम् विधिनाकेनकर्तव्यं तत्सर्वंब्रूहिकेश श्रीभगवानुवा॰ आसीत्सौम्यपुरेराजासोमनामेतिविश्रुतः क्षात्रधर्मैतिकुशलः प्रजापालनतत्परः तस्यराज्येप्रजाःसौम्याः

सर्वधर्मपरायणाः तस्यराज्ञस्तत्रामात्यः सोपिसौम्यः शुभावहः तस्मिन्सरस्तत्सौम्यंच सदासौम्यांबुनाप्लुतम् अभूत्सोमेश्वरोदेवोलोका
नांपालनायच तत्राभवत्सोमशर्माब्राह्मणोवेदपारगः वेदार्थविच्छास्त्रविच्च शुद्धाचारोतिदुर्लभः तस्यभार्याशुभाचाराशुद्धधीचारुभाषिणी
भर्तृशुश्रूषणरताकल्याणीप्रियवादिनी सोकरोच्चकुटुंबार्थंकणयज्ञंदिनेदिने नलभ्यतेधिकंतेन धनंधान्यंतथैवच अतीवखेदखिन्नस्त
विचार्यचपुनःपुनः किंकरोमिक्वगच्छामिसभार्योहंमहीतले केनकर्मविपाकेनकीदृशंलभ्यतेफलम् अथवार्थकरंधर्मंदेवपूजादिकंशु
भम् ससोमेशेकरोद्भक्तिंदैन्यनाशायपार्थिव कदाचिदतिखिन्नःसन्सजगामसरोवरम् अभूत्सोमेशःप्रत्यक्षस्तस्मिन्सौम्यसरोवरे वृद्ध
ब्राह्मणरूपेण कृपयापरयायुतः तेनासौदुःखितोदृष्टः सोमेशर्माद्विजोत्तमः किमर्थंक्रियतेदुःखंत्वयाविद्यावरेणच किंचिद्धूतंनास्तिपूर्वंतद
र्थमीदृशीदशा तस्यतद्वचनंश्रुत्वाब्राह्मणस्त्विदमब्रवीत् भोभोविप्रवरश्रेष्ठ व्रतमेकंवदामिते तेनादिष्टव्रतंचेदंपूर्णसंपत्तिदायकम् सो
मशर्मा उ॰ भोभोब्राह्मणशार्दूल व्रतंतद्वदमेप्रभो यस्यानुष्ठानमात्रेणलक्ष्मीवृद्धिःप्रजायते कस्मिन्मासेचकर्तव्यंकिंदानंकस्यभोजनं धनलाभायकर्तव्यंकस्यदेवस्यपूज
नम् कैस्तुपुष्पैःप्रकर्तव्यापूजाचारुनराशुभा नैवेद्यंकीदृशंदेयं अर्घ्यंकैस्तुफलैर्भवेत् यदितुष्टोसिविप्रेंद्रतत्सर्वंब्रूहिमेप्रभो ब्राह्मण
उवाच साधुत्वयाविप्रदृष्टंव्रतंवृद्धिप्रदायकं विधानंतस्यवक्ष्यामिसर्वसिद्धिप्रदायकम् श्रावणेचसितेपक्षेप्रथमेसोमवासरे प्रकर्तव्यंव्र
तंविप्रशुभंनियमपूर्वकम् सार्द्धमासत्रयंविप्रकर्तव्यंविधिपूर्वकम् बिल्वपत्रैरखंडैश्चपूजनंचदिनेदिने पंचसप्तत्रिभिश्चैवपूजनंविधि
पूर्वकं परिपूर्णंतुकर्तव्यंचतुर्दश्यांतुकार्तिके व्रतारंभेतुकर्तव्योनियमस्तुविचक्षणैः अद्यारभेव्रतंदेवरोटकाख्यंमनोहरम् करोमिपर
यभक्त्यापाहिमांजगतांगुरो दिनेदिनेप्रकर्तव्यापूजादेवस्यशूलिनः कथांविनानभोक्तव्यंप्रत्यहंचपुनःपुनः उपोषणंचतुर्दश्यांकर्तव्यं
विधिपूर्वकम् शुचिर्भूत्वादिनेतस्मिन्कर्तव्यंरोटकाव्रतम् अथउपोषणप्रार्थनामंत्रः चतुर्दश्यांनिराहारःस्थित्वाचैवपरेहनि भोक्ष्या
मिपार्वतीनाथसर्वसिद्धिप्रदायक कृत्वामाध्यान्हिकंकर्मस्थापयेदव्रणंघटम् पंचरत्नसमायुक्तंपुष्पादिभिरलंकृतम् वेष्टितंश्वेतवस्त्रेण
सर्वाभरणभूषितं तस्योपरिन्यसेत्पात्रंताम्रंचैवाथवैणवम् विरच्याष्टदलंतत्रपूजयेदुमयाशिवम् कृत्वासायान्हिकंकर्मनित्यपूजादिकंतथा

तस्यांरात्रौतुकर्तव्यापूजादेवस्यशूलिनः शुभेचैवप्रदेशेतुकर्तव्यःपुष्पमंडपः पूज्यस्तत्रशिवोदेवोधर्मकामार्थसिद्धये क्षीरादिस्नापनंकुर्याच्चंदनादिविलेपनम् कृष्णागरुचकर्पूरमृगनाभिविमिश्रितम् पुष्पैर्नानाविधैरम्यैः पूज्योदेवोमहेश्वरः धनकामेनकर्तव्यापूजादेवस्यशूलिनः बिल्वपत्रैरखंडैश्चतुलसीपत्रकैस्तथा नीलोत्पलैश्चारुतरैः कर्तव्यापुण्यवर्धिनी कल्हारकमलैश्चैवकुमुदैश्चातिशोभनैः पंचकैर्मालतीपुष्पैर्मुचकुंदैःशुभावहैः मंदारैश्चार्कपुष्पैश्चपूजार्हैश्चशिवप्रियैः अन्यैर्नानाविधैःपुष्पैर्ऋतुकालोद्भवैस्तथा धूपैर्नानाविधैःपार्थपुण्यवर्द्धनसाधकैः दीपास्तत्रप्रकर्तव्याघृतपूर्णामनोरथाः लेह्यपेयैस्तथाभोज्यैःस्वादुभिश्चशिवप्रियैः अन्यैर्नानाविधैरम्यैस्तथाविप्रवरैरुक्तः नैवेद्यंतुप्रकुर्वीतरोटकानांविशेषतः कर्तव्यारोटकाःपंचपुरुषाहारमानकाः शालितंदुलपिष्टेनसमभागेनवापुनः द्वौतुविप्रायदातव्यौद्वाभ्यांवैभोजनंशुभम् एकोदेवायदातव्योनैवेद्यार्थंसदाबुधैः महेशायचदातव्यंतांबूलंशुभमनोहरं अर्घ्यदानंप्रकर्तव्यंधनसंपत्तिदायकम् पनसंनारिकेरंचपूगीजंबीरपूरकम् खर्जूरीचशुभाद्राक्षामातुलिंगंमनोहरम् अक्षोडानिचदाडिंबनारिंगानिशुभानिच कर्कटीचशुभाप्रोक्ताअर्घ्यदानेमनोहरा अन्यैर्नानाविधैःपार्थऋतुकालोद्भवैःशुभैः यःकरोत्यर्घ्यदानंचतस्यपुण्यंवदाम्यहम् इलांचसागरैर्युक्तांरत्नैश्चान्यैर्मनोहरैः दत्वायत्फलमाप्नोतितेनतत्फलमाप्नुयात् अनेनैवविधानेनतत्कार्यंव्रतसिद्धये पंचवर्षंतुकर्तव्यमतुलंधनमीप्सुभिः पश्चादुद्यापनंकुर्याद्रोटकाख्यव्रतस्यच उद्यापनेतुकर्तव्यौहेमरूप्यौतुरोटकौ बिल्वपत्रंशुभवर्णस्यसोमेशप्रीतयेशुभम् रात्रौजागरणंकुर्यात्पूज्योदेवोमहेश्वरः पूर्वेनविधिनाविप्रकर्तव्यंचशिवप्रियम् दारिद्र्यनाशनंपुण्यंलक्ष्मीवृद्धिप्रदायकम् कर्तव्यंविधिवद्भक्त्याश्रोतव्यंतुकथानकम् गीतवाद्यादिसहितंकुर्याज्जागरणंनिशि ततःप्रभातेविमलेस्नात्वापूजांसमापयेत् पूर्वोक्तविधिनातेनकर्तव्यंशिवपूजनम् तत्सर्वंदापयेद्भक्त्याब्राह्मणायकुटुंबिने विप्रायवेदविदुषेवस्त्रालंकारभोजनैः गुरुंसपत्निकंपूज्यततोभक्त्याक्षमापयेत् यन्मयाकृतसंकल्पोव्रतेस्मिन्ब्राह्मणप्रभो तत्सर्वंपूर्णतांयातुयुष्मदृष्टिविलोकनात् एवंयःकुरुतेपार्थशास्त्रोक्तंरोटकव्रतम् अनायासेनसिध्यंतिहृद्याःसर्वेमनोरथाः सभर्तृकामहानारीकरोतिविधिवद्व्रतं पतिव्रतासाकल्याणीजायतेनात्रसंशयः मयाअनुष्ठितस्यसार्द्धमासत्रयात्मकस्यबिल्वव्रताख्यस्यकर्मणःसांगता

सिद्ध्यर्थे ब्राह्मणायएतद्वायनप्रदानंकरिष्ये ब्राह्मणंसंपूज्य विप्रायवेदविदुषेश्रोत्रियायकुटुंबिने नरकोत्तारणार्थाय शंकरःप्रीयतांनमः इतिदान
मंत्रः इतिशिवपुराणे बिल्वरोटकसोमनाथव्रतकथोद्यापनम् अथाश्विनशुक्लप्रतिपदि दौहित्रेण मातामहश्राद्धंकार्यं तदुक्तंहेमाद्रौ
जातमात्रोपिदौहित्रोजीवत्यपिचमातुले कुर्यान्मातामहश्राद्धंप्रतिपद्याश्विनेसिते इयंचसंगवव्यापिनीग्राह्येतिनिर्णयदीपेउक्तम् प्रतिपद्या
श्विनेशुक्ले दौहित्रस्त्वेकपार्वणम् श्राद्धंमातामहंकुर्यात्सपितासंगवेसति जातमात्रोपिदौहित्रोजीवत्यपिहिमातुले प्रातःसंगवयोर्मध्येया
श्वयुक्प्रतिपद्भवेत् अत्रपिताइतिविशेषणात् जीवत्पितृकएवाधिकारी अतएवपिंडरहितंकुर्यात् मुंडनंपिंडदानंच प्रेतकर्मचसर्वशः नजी
वत्पितृकःकुर्याद्गुर्विणीपतिरेवच अत्रैवनवरात्रारंभः तत्रपरविद्धाग्राह्या तदुक्तंगोविंदार्णवेमार्कंडेयपुराणदेवीपुराणयोः पूर्वविद्धातुया
शुक्लाभवेत्प्रतिपदाश्विनी नवरात्रव्रतंतस्यांनकार्यंशुभमिच्छता देशभंगोभवेत्तत्र दुर्भिक्षंचोपजायते नंदायांदर्शयुक्तायांयत्रस्यान्मंत्रपू
जनं तथादेवीपुराणे नदर्शकलयायुक्ताप्रतिपच्चंडिकार्चने उदयेद्विमुहूर्तापिग्राह्यासोदयकारिणी यदापूर्वदिनेशुद्धाभूत्वापरदिनेपिच
वर्धतेचतदाभूत्वासंपूर्णत्वादमांविना यानितुद्वितीयायोगनिषेधपराणिवचनानिश्रुतानितानिश्राद्धादिपराण्येव परदिनेप्रतिपदोसत्त्वे
तु अमायुक्तापिग्राह्या अमायुक्ताप्रकर्तव्येतिनृसिंहप्रसादोदाहृतवचनान्यपिएतद्विषयाण्येव अत्रदेवीपूजाप्रधानम् अष्टम्यांचनवम्यां
चजगन्मातरमंबिकाम् पूजयित्वाश्विनेमासिविशोकोजायतेनरः यतीचब्रह्मचारीचविधवाचरजस्वला नवरात्रेचोपवासमेकभुक्तम-
याचितम् चैत्रावैधृतियुक्ताचेत्प्रतिपच्चंडिकार्चने तयोरंतेविधातव्यंकलशस्थापनंध्रुवम् प्रतिपद्याश्विनेमासिभवेद्वैधृतिचित्रयोः आ
द्यपादौपरित्यज्यप्रारभे नवरात्रकं चित्रावैधृतिसंयुक्ताप्रतिपत्तुभवेन्नृप वैधृत्यावापियुक्तास्यात्तदामध्यंदिनेरवौ त्याज्याअंशास्त्र
यस्त्वाद्यास्तुरीयांशेतुपूजनम् ॥ ॥न रात्रौस्थापनंकार्यंनचकुंभाभिषेचनम् भास्करोदयमारभ्ययावत्तुदशनाडिकाः प्रातःकालइति
प्रोक्तःस्थापनारोपणादिषु आद्याःषोडशनाडीस्तुत्यक्त्वायःकुरुतेनरः कलशस्थापनंतत्र अरिष्टंजायतेध्रुवम् वृद्धौसमाप्तिरष्टम्यांह्रासेन
प्रतिपन्निशि प्रारंभोनवचंड्यास्तुनवरात्रमतोर्थवत् तिथिवृद्धौतिथिह्रासेनवरात्रमथार्थकम् घटस्थापनविधिः प्रतिपदिप्रातरभ्यंगं

कृत्वादेशकालौसंकीर्त्य ममेहजन्मनिदुर्गाप्रीतिद्वारासर्वापच्छांतिपूर्वकदीर्घायुर्विपुलधनपुत्रपौत्राद्य नवच्छिन्नसंततिवृद्धिस्थिरलक्ष्मीकीर्तिलाभशत्रुपराजयसदभीष्टसिध्यर्थंशारदनवरात्रप्रतिपदिविहितंकलशस्थापनंदुर्गापूजाकुमारीपूजादिकरिष्ये इतिसंकल्प्य तदंगगणपतिपूजनंपुण्याहवाचनंमातृकापूजनंनांदीश्राद्धंऋत्विग्वरणंचकरिष्ये ततोमहीद्यौरितिभूमिंस्पृष्ट्वा ओषधयःसंवदंतेइतियवान्निक्षिप्य आकलशेष्वितिकुंभंसंस्थाप्य इमंमेगंगेतिजलेनापूर्य गंधद्वारामितिगंधं ओषधयइतिसर्वौषधीः कांडात्कांडादितिदूर्वा अश्वत्थेवइतिपंचपल्लवान् स्योनापृथिवीतिसप्तमृदः याःफलनीरितिफलं सहिरत्नानीतिपंचरत्नानि हिरण्यरूपइतिहिरण्यंक्षिप्त्वा युवासुवासाइतिवस्त्रेणसूत्रेणवावेष्ट्य पूर्णादर्वीतिपूर्णपात्रंकलशोपरिनिधाय तत्रवरुणंचसंपूज्य जीर्णायांनूतनायांवाप्रतिमायांदुर्गामावाह्यपूजयेत् नूतनमूर्तिकरणेग्न्युत्तारणंकुर्यात् अथपूजा आगच्छवरदेदेविदैत्यदर्पनिषूदनि पूजांगृहाणसुमुखीनमस्तेशंकरप्रिये सर्वतीर्थमयंवारिसर्वदेवसमन्वितम् इमंघटंसमागच्छतिष्ठदेविगणैःसह दुर्गादेविसमागच्छसान्निध्यमिहकल्पय बलिंपूजांगृहाणत्वमष्टभिःशक्तिभिःसह इतिआवाह्य शंखचक्रगदाहस्तेशुभ्रवर्णे शुभासने ममदेविवरंदेहिसर्वैश्वर्यप्रदायिनि सहस्रशीर्षा· हिरण्यवर्णां इत्यावाहनं नानाप्रभासमाकीर्णंनानावर्णविचित्रितम् आसनंकल्पितंदेविप्रीत्यर्थंतवगृह्यतां पुरुष॰ तांम आवह॰ इत्यासनं गंगादिसर्वतीर्थेभ्यआनीतंतोयमुत्तमम् पाद्यंतेहंप्रदास्यामिगृहाणपरमेश्वरि एतावा॰ अश्वपूर्णां॰ पाद्यं· गंधाक्षतैश्चसंयुक्तंफलपुष्पयुतंतव अर्घ्यंगृहाणदत्तंमेप्रसीदपरमेश्वरि त्रिपादूर्ध्व॰ कांसोस्मितांहिरण्य॰ अर्घ्यंस॰ गंगागोदावरीचैवयमुनाचसरस्वती मयाआचमनीयार्थंमानीतंतोयमुत्तमं तस्माद्विराळ॰ चंद्रांप्रभासां॰ आचमनीयं॰ पंचामृतंमयानीतंपयोदधिसमन्वितं घृतंमधुशर्करयाप्रीत्यर्थंप्रतिगृह्यताम् श्रुतिमंत्रः आप्यायस्व· दधिक्राव्णोति· घृतंमिमिक्षेति· मधुवाताऋक् ४ स्वादुःपवस्वेति पंचभिर्मंत्रैःपंचामृतस्नानम् ज्ञानमूर्त्तेभद्रकालिदिव्यमूर्त्तेसुरेश्वरि स्नानंगृहाणदेवित्वंनारायणिनमोस्तुते यत्पुरुषेण· आदित्यवर्णे· स्नानं· सूक्ष्मतंतुविनिर्मितंनानावर्णविचित्रितं वस्त्रंगृहाणमेदेविप्रीत्यर्थंप्रतिगृह्यतां तस्माद्यज्ञात्सर्व॰ क्षुत्पिपासा॰ उत्तरीयं॰ अलंकारान्महादिव्यान्नानारत्नविनिर्मि-

नान् गृह्णाणदेवदेवित्वंप्रसीदपरेमेश्वरि अलंकारान्सम· मलयाद्रिसमुद्भूतंकर्पूरागरुवासितम् मयानिवेदितंभक्त्याचंदनंप्रतिगृह्यतां त
स्माद्यज्ञास॰ गंधद्वारां· गंधं· अक्षताश्चसुरश्रेष्ठाः कुंकुमेनसमन्विताः मयानि वेदिताभक्त्याप्रीत्यर्थंप्रतिगृह्यतां अक्षतान् मंदारपा
रिजाताश्चपाटलीकेतकीतथा मारुतंमोगरंचैवशतपत्राणिचंपकम् तस्मादश्वा॰ मनसःकाममा॰ पुष्पाणि· अहिरिवभोगैः ऋक् प
रिमलद्रव्याणि अथांगपूजा दुर्गायैनमः पादौपूजयामि महाकाल्यै॰ गुल्फौपू॰ मंगलायै॰ जानुनीपू॰ कात्यायिन्यै॰ ऊरूपूज॰ भद्रका
ल्यै॰ कटिंपू॰ कमलायै॰ नाभिंपू॰ शिवायै॰ उदरंपू॰ क्षमायै॰ हृदयंपू॰ स्कंदायै॰ कंठंपू॰ महिषासुरमर्दिन्यै॰ नेत्रे॰ उमायै॰ शिरःपू॰ विंध्यवा
सिन्यै॰ सर्वांगंपूजयामि दशांगंगुग्गुलंधूपंचंदनागरुसंयुतम् मयानिवेदितंभक्त्यागृहाणपरमेश्वरि यत्पुरुषं॰ कर्दमेनप्रजा॰ धूपं· आ
ज्यंचवर्तिसंयुक्तंवन्हिनायोजितंमया दीपंगृहाणदेवित्वंप्रीत्यर्थंप्रतिगृह्यतां ॥ ब्राह्मणोस्य॰ आपस्रजं॰ दीपं· अन्नंचतुर्विधंस्वादुरसैः
षड्भिसमन्वितम् भक्ष्यभोज्यसमायुक्तंप्रीत्यर्थंप्रतिगृह्यताम् चंद्रमामनसो॰ आर्द्रांपुष्क॰ नैवेद्यं॰ आचमनीयं· मलयाचलसंभूतं क-
स्तूर्याचसमन्वितम् करोद्वर्तनकंदेविगृहाणपरमेश्वरि करोद्वर्तनं· इदंफलंमयादेविस्थापितंपुरतस्तव तेनमेसफलावाप्तिर्भवेज्जन्मनि
जन्मनि नाभ्याआ॰ आर्द्रायःकरिणीं॰ फलं· पूगीफलंमहद्दिव्यंनागवल्यादलैर्युतम् कर्पूरैलासमायुक्तंतांबूलंप्रतिगृह्यतां तांबूलं· हिर
ण्यगर्भेतिदक्षिणां· यज्ञेनयज्ञ॰ यश्शुचिःप्रयतो॰ मंत्रपुष्पांजलिं· अश्वदायैगोदायै इत्यादिप्रार्थयेत् श्रियेजा॰ नीरांजनं· श्रीसूक्तंसं
पूर्णंपठित्वापुष्पांजलिः मंत्रहीनंक्रियाहीनंभक्तिहीनंसुरेश्वरि यत्पूजितंमयादेविपरिपूर्णंतदस्तुमे महिषघ्निमहामायेचामुंडेमुंडमालि
नि यशोदेहिधनंदेहि सर्वान्कामांश्चदेहिमे नमस्कारः ततोऋत्विग्वरणम् अथकुमारीपूजा एकवर्षात्तुयाकन्यापूजार्थेतांविवर्जयेत्
गंधपुष्पफलादीनांप्रीतिस्तस्यानविद्यते मंत्राक्षरमयींलक्ष्मींमातृणांरूपधारिणीं नवदुर्गात्मिकांसाक्षात्कन्यामावाहयाम्यहम् द्विवर्ष
कन्यामारभ्यदशवर्षांनविग्रहा पूजयेत्सर्वकार्येषुयथाविध्युक्तमार्गतः कुमारिकाद्विवर्षात्तुत्रिवर्षात्तुत्रिमूर्तिका चतुर्वर्षात्तुकल्याणीपंच
वर्षात्तुरोहिणी षष्ठवर्षात्तुकालीस्यात्सप्तवर्षात्तुचंडिका अष्टवर्षाशांभवीचदुर्गाचनवमेस्मृता दशवर्षासुभद्रेतिनामतःपरिपूजयेत् मा

तःकालेविशेषेणकृत्वाभ्यंगंसमाहितः आवाहयेत्ततःकन्यांमंत्रैरेभिःपृथक्पृथक् जगत्पूज्येजगद्वंद्येसर्वशक्तिस्वरूपिणि पूजांगृहाणकौ
मारिजगन्मातर्नमोस्तुते प्रतिपदमारभ्यदशमीपर्यंतंपूजयेत् एवमग्रेपि त्रिपुरांत्रिगुणाधारांत्रिमार्गज्ञानरूपिणीं त्रैलोक्यवंदितांदेवींत्रिमूर्तिं
पूजयाम्यहम् द्वितीयां कलात्मिकांकलातीतांकारुण्यहृदयांशिवाम् कल्याणजननींनित्यांकल्याणींपूजयाम्यहम् तृतीयां अणिमा
दिगुणाधारांआकाराद्यक्षरात्मिकाम् अनंतशक्तिभेदांतांरोहिणींपूजयाम्यहम् चतुर्थींकामचारींकामरात्रिंकालचक्रस्वरूपिणीम् का
मदांकरुणाधारांकालिकांपूजयाम्यहम् पंचमीं उग्रह्वांसांत्वोग्ररूपांदुष्टासुरनिबर्हिणीं चार्वंगींचंडिकांलोकेपूजितांपूजयाम्यहम्
षष्ठीम् सदानंदकरींशांतांसर्वदेवनमस्कृताम् सर्वभूतात्मिकांलक्ष्मींशांभवींपूजयाम्यहम् सप्तम्यां दुर्गमेदुस्तरेयुद्धेभयदुःखवि
नाशिनीम् पूजयामिसदाभक्त्यादुर्गांदुर्गार्तिनाशिनीं अष्टमीं सुंदरींस्वर्णवर्णाभांसर्वसौभाग्यदायिनीं सुभद्रजननींदेवींसुभद्रांपू
जयाम्यहं नवम्यां इतिकुमारीपूजनम् अष्टरात्रेनदोषोयंनवरात्रंतिथिक्षये सूतकेपूजनंप्रोक्तंजपदानंविशेषतः देवीमुद्दिश्यकर्तव्यंतत्र
दोषोनविद्यते रजस्वलातथाशौचेब्राह्मणैश्चसुपूजयेत् गंधालंकारतांबूलपुष्पमालानुलेपनैः उपवासंनदुष्यंतिदंतधावनमंजनम् इ
तिआश्विनशुक्लप्रतिपत्कृत्यम् अथकार्तिकशुक्लप्रतिपत्सापूर्वाग्राह्या पूर्वविद्धाप्रकर्तव्याशिवरात्रिर्बलेर्दिनम् वत्सरादौवसंतादौ
बलिराज्येतथैवच तैलाभ्यंगमकुर्वाणोनरकंप्रतिपद्यते प्रातर्गोवर्धनःपूज्योद्यूतंचापिसमाचरेत् पूजनीयास्तथागावस्त्याज्यंदोहन
मंजसा अथकथा वालखिल्याऊचुः प्रतिपद्युद्वेभ्यंगंकृत्वानीराजनंततः सुवेषःसत्कथागीतैर्दानैश्चदिवसंनयेत् शंकरस्तु
नदाद्यूतंससर्जसुमनोहरम् कार्तिकेशुक्लपक्षेतुप्रथमेहनिसत्यवत् प्रसुवाचवचश्चेदंदेवींप्रतिसदाशिवः कालक्षेपायकेषांचित्केषांचिद्धनहेतवे
केषांचिद्धननाशायपश्यद्यूतंकृतंमया तस्यत्वंकौतुकंपश्यभुवनंलापयाम्यहम् ऊह्येत्थंक्रीडितंताभ्यांभवान्याचजितंतदा पुनर्द्विती
यभुवनंलापितंनिर्जितंतया पुनस्तृतीयभुवनंलापितंनिर्जितंतया पुनर्वृषंपुनश्चर्मपुनःपन्नगबंधनम् शशिलेखांडमरुकंवृषभंचाप्यजी
जयत् निर्गतस्तुहरोगेहाच्चीरवल्कलधारकः गंगातीरेसमागत्यतस्थौचिंतासमन्वितः तस्मिन्क्षणेकार्तिकेयःखेलितुंचगतःक्वचित् गंगा

तीराद्ययौगेहमपश्यत्सथिशंकरम् ईषत्क्रुद्धंविरक्तंचननामचरणौपितुः तेनापिमूर्ध्निचाघ्रातःपुत्रयाहिगृहंस्कत्वम् तवमात्राजितश्चाहंगच्छामि
गहनंवनं स्कंदउवाच कथंमात्राजितोदेवोवनंकस्माच्चगच्छसि अहमप्यागमिष्यामित्वत्पादौसेवयाम्यहं शिवउवाच विजित्यतवमात्रा
तुक्षणंनस्थेयमत्रवै ममलोकेतथेत्युक्त्वा क्वचिद्गच्छाम्यहंततः स्कंदउवाच मागच्छत्वंमहादेवद्यूतमार्गंप्रदर्शय आनीयतेमयाजित्वासर्वंतन
वधनादिकम् शिवेनापितथेत्युक्त्वाद्यूतमार्गःप्रदर्शितः स्कंदोपिगृहमागत्यपार्वतींवाक्यमब्रवीत् स्कंदउवाच देविदेवोगतःक्वासौवृषभो
त्रैवसंस्थितः शीर्षेचनविधुःकस्मान्मातःसत्यंवदाद्यमे देव्युवाच स्वयमेवकृतंद्यूतंस्वयमेवपराजितः स्वयमेवगतःक्रोधात्प्रार्थ्यतांसक
थंमया स्कंदउवाच मयासहक्रीडितव्यंकथंतत्क्रीडनंत्विति देव्यक्रीडत्तेनसार्द्धंततःस्कंदेननिर्जितम् मयूरेणावृषस्तस्याःशक्त्यापन्नग
बंधनम् वृषेणेंदुंततोर्धांगंतत्सर्वंतेननिर्जितम् कौपीनंनिर्जितंचर्मगृहीत्वातदुपाययौ गंगातीरेयत्रशिवस्तत्रागत्यन्यवेदयत् ततोदेवीसमी
पेतुविघ्नराजःसमाययौ किमर्थंम्लानवदनादेविजातासितहृद देव्युवाच मयाजितोमहादेवःसतुगेहाद्विनिर्गतः आयास्यतिवृषाद्यर्थ
मितिसंचिंत्यसंस्थितम् तवभ्रातातुतज्जित्वासर्वंतस्मैनिवेदितं नायास्यत्यधुनादेवइतिचिंतापरास्म्यहम् गणेशउवाच देविशिक्षय
मेद्यूतंजेष्यामिभ्रातरंहरम् आनयिष्यामिसामग्रींयद्यहंस्यांकृतस्तव सगृहीत्वापाशयुगंसारिकाःशीघ्रमाययौ इतिपुत्रवचःश्रुत्वातस्मै
द्यूतमशिक्षयत् पृष्ट्वापृष्ट्वायत्रदेवःस्कंदोयत्रव्यवस्थितः गणेशउ॰ मयानीताविमौपाशौसारिकानाद्यमेवच क्रीडत्वंतुमयासार्द्धंदे
वस्याग्रेममाग्रज इतिभ्रातृवचःश्रुत्वाउभाभ्यांक्रीडितंतदा मूषकेनबलीवर्दंमयूरंचाप्यजीजयत् शिवस्यसर्वविषयंस्कंदस्यचतथैवच
गृहीत्वासतुविश्वेशस्तत्कालंपार्वतींययौ पार्वत्यपिचसंतुष्टागणेशंवाक्यमब्रवीत् सम्यक्कृतंत्वयापुत्रनानीतोसौमहेश्वरः सामदानादिकं
कृत्वाआनयात्रमहेश्वरम् तथेत्युक्त्वागणेशोसौसमारुह्यचमूषकम् त्वरितंचाययौतत्रगृहेनेतुंमहेश्वरम् ईश्वरस्तुसमुत्थायहरिद्वारंस
मागतः नारदेरितवृत्तांतोविष्णुस्तत्रसमागतः विष्णुरुवाच त्र्यक्षांविद्यांकुरुशिवएकाक्षोहंभवाम्यहम् एकश्चासावक्षःपाशकइति
विग्रहेपिपरिनिष्ठितरूपत्वात्काणोभवेतिशब्दच्छलम् शवणेनतथेत्युक्तेकाणोभवज्जनार्दन विष्णुरुवाच ओतुवत्पश्यसेमांत्वंतस्मादोतु

र्भविष्यसि नारदउवाच देवसिद्धंमहत्कार्यमायातिसगणेश्वरः ज्ञातुमत्रभवद्भृतंमूषकस्तस्यधर्षताम् इतिश्रुत्वानारदस्यवचनंरावणोयत्नः
कुर्वन्मार्जारवच्छब्दंमूषकोसौपलायितः मूषकंत्यज्यगणपः शनैःशनैरुपाययौ जातोविष्णुःपाशइतिदूरतस्तद्विलोकितम् प्रणिपत्यमहादेवं
विनयानतकंधरः गणेशउवाच आगम्यतांदेवगेहंदेवीमानपुरःसरम् यदिनायासिगेहत्वंप्राणांस्त्यक्ष्यतिचांबिका त्वय्यागतेमयासर्व-
कार्यमेतदुपायनम् महादेवउवा० एषाम्यक्षामयाविद्याऽधुनागणपनिर्मिता अनयाक्रीडितेदेवी आगमिष्येगृहंतदा गणेशउ० सर्वथैव
क्रीडितव्यंदेव्यानास्त्यत्रसंशयः आगम्यतांगृहंदेवंमातरंयाहिमाग्रज इतितस्यवचःश्रुत्वाईश्वरःसगणोययौ नारदोपिगतस्तत्रमहौतुर
पिचागतः उपविष्टास्तकैलासेदेवास्तत्रसमागताः हृष्टादेवींप्रहस्यादौमहेशोवाक्यमब्रवीत् त्र्यक्षविद्यामहादेविगंगाद्वारेविनिर्मिता अन
याजयसेत्वंचतदात्वंसत्यभाषिणी देव्युवाच वृषादितवसामग्रीमयेयंल्लापिताशिव त्वयाकिंल्लाप्यतेब्रूहिदर्शयस्वसदोगताः इतिश्रुत्वाव
चस्तस्याःप्रैक्षताधोसुखंहरः तस्मिन्क्षणेनारदेनस्वकौपीनंसमर्पितं वीणादंडश्चोपवीतमनेनप्रीयतामिति सदाशिवःप्रसन्नोभूत्क्रीडनंसम
चक्रतुः यद्यद्यात्वयतेरुद्रस्तथाविष्णुःप्रजायते यद्यद्यात्वयतेदेवीविपरीतःपतत्यसौ स्वकीयाभरणाद्यंचमहादेवेननिर्जितम् स्कंदालंकारि
कंसर्वंपुनरासंहरेणच ततोगणेशःप्रोवाचवाक्यंसदसिगर्वितः नक्रीडितव्यंहंमातःपाशोलक्ष्मीःपतिःस्वयम् छलोहरेणसर्वस्वंतेहरिष्यति
मसिता इतिपुत्रवचःश्रुत्वापार्वतीक्रोधमूर्छिता तथाविधायमालोक्यरावणोवाक्यमब्रवीत् रावणउवा० पापिष्टेनाद्यशप्तोस्मिदुर्दुरूहेनवि
ष्णुना अधर्मोयंनकर्तव्यइत्युक्तेमयायतः देव्युवाच सर्वान्शापिष्येवत्साहंधूर्तानेतान्महाबलान् सामर्थ्यंपश्यमेपुत्रधर्मत्यागफलंतथा दे
वयस्मादबलयाकपटंचकृतंत्वया तस्मात्तदाकृतेमूर्ध्निगंगाभारमपीडितः इतस्ततःकुचेष्टात्वंयतःशिक्षयसेमुने स्वप्नेपितेकरत्वंस्त्रीणांनक
दापिभविष्यति यतःछलात्वबलयासहमायात्वयाहरे एषवैरीरावणोयंतवभार्यांनयिष्यति एषवैरीभवितायः अयंपुनस्तवभार्यांनयिष्य
तिसंबंधहृयादेतदिदंप्रयोगोदुष्टः हित्वामांमातरंपुत्रबालकत्वंत्वयाकृतं अतस्त्वंनयुवावृद्धोबालएवभविष्यसि गणेशउ० अनेनचौतुरूपे
णमूषकोयंपलायितः मध्येमार्गंकृतंविघ्नंशापेनंराक्षसाधमम् देव्युवाच यस्माद्विघ्नंत्वयादुष्टकृतंमद्बालकस्यतु तस्मादयंतवरिपुर्विष्णु

स्त्वांघातयिष्यति इतिदेव्यावचःश्रुत्वासर्वेसंक्रुद्धमानसाः देवीशापेमनश्चक्रुर्नारदोवाक्यमब्रवीत् नारदउवाच कोपंकुर्वंतुमादेवानेयं शप्याकदाचन सर्वेषामादिमायेयंयथायोग्यफलप्रदा नायंशापइयंदेवीस्मर्तव्यातुविचक्षणैः गंगासदातिष्ठतुरुद्रमस्तकेबलाद्भमोवानयतुक्षपा चरःजायाहरस्याथययोचितामृतिश्चानंगतृष्णारहितःकुमारः अहंभ्रमामिधरिणीनस्यात्तव्यंतपोधनैः सम्यग्देविलयाप्रोक्तंशृणिवदानींव चोमम सर्वक्रोधापनुत्यर्थंननर्तसुनिपुंगवः कक्षानादंचकारोच्चैर्हाहाहीहीतिचाब्रवीत् तस्यचेष्टांविलोक्याथसर्वेहर्षमवाप्नुयुः देव्युवाच भोभोविदूषकश्रेष्ठकृतकृत्योसिनारद विदूषकविनोदकृत् वरंवरयभद्रंतेयद्यन्मनसिरोचते नारदउवाच याचयंतुवरंसर्वेकोवाकिंवा चयिष्यति सर्वेतेयाचयिष्यंतियथाश्रेष्ठंब्रुवंतुतम् शिवउवाच सर्वेसंक्षम्यतांदेविजितंयद्वृषभादिकं तन्मयातुद्यूतशनैर्नग्राह्यंजगदं बिके देव्युवाच मास्तुत्वयासमंनाथस्वप्नेपिममचांतरं एतदेववरंमन्येक्रोधोमाभून्ममोपरि कार्तिकेशुक्लपक्षेतुप्रथमेहनिसत्यवत् जयोलब्धोमयात्वत्तःसत्येनैवमहेश्वरम् तस्माद्यूतंप्रकर्तव्यंप्रभातेतत्रमानवैः तस्मिन्द्यूतेजयोयस्यतस्यसंवत्सरंजयः विष्णुरुवा च अहंयंयंकरिष्यामिश्रेष्ठंवालघुमेववा तयातथाभवतुसवरमेनंवदाम्यहं स्कंदउवाच सदामनस्तपस्यायांममतिष्ठतुदेवताः कदा पिविषयेमास्तुदेयएषवरोमम गणेशउवाच संसारेयानिकार्याणितदादौममपूजनम् यांतुसिद्धिंममकृपांविनासिध्यंतुमाक्वचित् रावणउवाच वेदव्याख्यानसामर्थ्यंममशीघ्रंभवत्विति सदाशिवेसदाचास्तुभक्तिर्मेव्यभिचारिणी नारदउवाच क्रुद्धाक्रुद्धाश्चयेके श्चिन्मूर्खामूर्खाश्चयेजनाः मद्वाक्यंसत्यमित्येवमानयंतुसदासुराः इत्युक्त्वांतर्हिताःसर्वेदेवारुद्रपुरोगमाः तस्मात्प्रतिपदिद्यूतंकुर्यात्सर्वोपि वैजनः द्यूतंनिषिद्धंसर्वत्रहित्वाप्रतिपदंबुधाः स्वस्योद्यमादिज्ञानायकुर्याद्यूतमतंद्रितः विशेषवच्चभोक्तव्यंसुहृद्भिर्ब्राह्मणैःसह पक्वान्नादिविशेषमित्यर्थः योषिताभिश्चसहितंनेयासाचभवेन्निशा ततःसंपूजयेन्मानैरंतःपुरस्थवासिनीः पदातिजनसंघातान्ग्रैवेयैःकटकैःशुभैः स्वनामांकैःस्वयंराजातोषयेत्स्वजनान्पृथक् वृषभान्माहिषांश्चैवयुध्यमानान्परैःसह गजानश्वांश्चयोधांश्चपदातीन्समलंकृतान् मंचारूढःस्वयंपश्येन्नटनर्तकचारणान् युधापत्रेत्रासयेच्चगोमहिष्यादिकंतथा ततोपरार्धसमये पूर्वस्यांदिशिकाश्यप मार्गपालीं

प्रबध्नीयात्तुंगेभेप्यप्रिपादंयोः पालींकुशमयींदिव्यांलंबकैर्बहुभिर्नयेत् दर्शयित्वागजानश्वान्सायमश्वाकृतेनयेत् कृतहोमैर्द्विजेंद्रैश्च बध्नीयान्मार्गपालिकां मार्गपालिनमस्तेस्तु सर्वलोकसुखप्रदे विधेयैःपुत्रदाराद्यैःपुनरेहिव्रतस्यमे नीराजनंचतत्रैवकार्यंराष्ट्रजयप्रदम् मार्गपालींसमुल्लिख्यनीडजारक्तस्रुखान्विताः तस्मादेतत्प्रकुर्वीत द्यूताद्यंविधिपूर्वकम् इतिसनत्कुमारसंहितायांद्यूतविधिः तत्रैववालखिल्याऊचुः पूर्वविद्धाप्रकर्तव्याप्रतिपद्बलिपूजने वर्धमानतिथिर्नंदायदासार्द्धत्रयात्मिका द्वितीयावर्धगामित्वा दुत्तरातत्रैवोच्यते बलिमालिख्यदैत्येंद्रंवर्णकैःपंचरंगकैः गृहमध्येविशालायांविंध्यावल्यासहासिनम् जिह्वाचार्वक्षिणीभांतेकरयोःपादयोस्तले रक्तवर्णेनास्यकेशाः कृष्णेनवस्तमालिखेत् सर्वांगंपीतवर्णेनशस्त्राद्यंनीलवर्णकैः वस्त्रालंश्वेतवर्णेनयथाशोभंप्रकल्पयेत् सर्वाभरणशोभाढ्यंद्विभुजंनृपचिन्हयुक्तं लोकोलिखेद्गृहस्यांतः शय्यायांशुक्लतंदुलैः मंत्रेणानेनसंपूज्यःषोडशैरुपचारकैः बलिराजनमस्तुभ्यंदैत्यदानवपूजित इंद्रप्रभोमरारातेविष्णुसान्निध्यदोभव बलिमुद्दिश्यदीयंतेदानानिमुनिपुंगवाः यान्यहान्यक्षयाण्याहुर्मयैतत्संप्रदर्शितम् कौमुदीतिर्बलेयस्माद्दीयतेस्यांयुधिष्ठिर पार्थिवेंद्रैर्मुनिवरास्तेनेयंकौमुदीस्मृता योयादृशेनभावेनतिष्ठत्यस्यांयुधिष्ठिर हर्षदैन्यादिरूपेणतस्यवर्षंप्रयातिवै बलिपूजांविधायैवपश्चाद्गोक्रीडनंचरेत् गवांक्रीडादिनेयत्ररात्रौदृश्येतचंद्रमाः सोमोराजापशून्हंतिसुरभिःपूजकांस्तथा प्रतिपद्दर्शसंयोगेक्रीडनंचगवांमतम् परविद्धेषुयःकुर्यात्पुत्रदारधनक्षयः अलंकार्यास्तदागावोग्रासाद्यैश्चसुरर्चिताः गीतवादित्रनिर्घोषैर्नीयेन्नगरबाह्यतः आनीयचगृहंपश्चात्कुर्यान्नीराजनंविधिम् अथचेत्प्रतिपत्स्वल्पानारीनीराजनंचरेत् द्वितीयायांतदाकुर्यात्सायंमंगलमालिकाम् एवंनीराजनंकृत्वासर्वपापैःप्रमुच्यते प्रतिपत्पूर्वविद्धैवदृष्टिकाकर्षणोभवेत् कुशकाशमयींकुर्याद्दृष्टिकांसुदृढांनवाम् देवद्वारेनृपद्वारेथवानेयाचतुष्पथे तामेकतोराजपुत्राहीनवर्णास्तथैकतः गृहीत्वाकर्षयेयुस्तांयथाचारंमुहुर्मुहुः समसंख्याद्वयोःकार्यासर्वेपिबलवत्तराः जयोत्रहीनजातीनांजयोराज्ञस्तुवत्सरम् उभयोःपृष्ठतःकार्यारेखास्त्वार्ककरोपरि रेखांतेयोनयेत्तस्यजयोभवतिनान्यथा जयचिन्हमिदंराजाविदधीतप्रयत्नतः सनत्कुमारसंहितायाम् वालखिल्याऊचुः कार्तिकस्यसितेपक्षेअन्नकूटंसमाचरेत् गोवर्द्धनोत्सवश्चैवश्रीविष्णुःप्रीयतामिति ऋषयऊचुः को

सौगोवर्द्धनोनामकस्मात्तंपरिपूजयेत् कस्मात्तदुत्सवःकार्यःकृतेकिंचफलंभवेत् वालखिल्याऊचुः एकदाभगवान्कृष्णोगतोगोपालकैःसह
गृहीत्वागाःप्रतिपदिकार्तिकस्यगतोवने तत्रनानाविधालोकागोप्यश्चापिसहस्रशः गोवर्द्धनसमीपेतुकुर्वंत्युत्सवमादरात् खाद्यंलेह्यंचचोष्यं
चपेयंनानाविधंकृतं कृत्वानगास्तथानानानृत्यंतिचपुरेजनाः नानापताकाःसंगृह्यकेचिद्धावंतिचाग्रतः केचिद्गोपाःप्रनृत्यंतिरुवंतिचतथापरे
इतस्ततोवितानानितोरणानिसहस्रशः दृष्ट्वैतत्कौतुकंकृष्णोवाक्यमेतदुवाचह कृष्णउवाच उत्सवःक्रियतेकस्यदेवताकाचपूज्यते पक्वा
न्नखादनार्थायकल्पितोवोत्सवोधुना नभक्षयंतियेदेवास्तेभ्योन्नंनैवदीयते दृष्ट्वेदृशींभवद्बुद्धिंगोपालाविधसाकृताः गोपालाऊचुः एवं-
मावदकृष्णत्वंवृत्रहंतुर्महोत्सवः वार्षिकःक्रियतेस्माभिर्देवेंद्रस्यचतुष्टये इमंपूजयभद्रंतेभविष्यतिनसंशयः अद्यकुर्वंतिदेवेंद्रमहोत्सवमिमं
नरः कुर्वेइतिप्रतिजानातीतिशेषः इलोपआर्षःनरइतिराज्ञःलक्षणम् दुर्भिक्षंचतथाऽवृष्टिर्देशेतस्यनजायते तस्मात्त्वमपिकृष्णात्रकुरुत्स
वमनेकधा कृष्णउवाच अयंगोवर्धनःसाक्षाद्वृष्टिसौभिस्यकारकः मथुरास्थैर्व्रजस्थैश्चपूर्वंचायंप्रपूजितः हित्वैनंपूज्यतेलोकोवृथेंद्रः
पूज्यतेकथम् उत्सवंक्रियमाणंचप्रत्यक्षोयंभुनक्तिच करिष्यतिकृषिंसम्यगुपसर्गान्हनिष्यति यदायदासंकटंमेमहदागत्यजायते तदात-
दापूजयामिहृद्यंगोवर्द्धनंगिरिं श्रवणेश्रवणेगोपावार्त्तांकुर्वंतिकिंत्विदम् तेषांमध्येकैश्चिदुक्तंकृष्णोक्तंक्रियतामिति यदाखादतिचान्नंचे
न्नगोगोवर्धनस्तदा तदाकृष्णोक्तमखिलंसत्यमेवभविष्यति सर्वएवतदागोपाविनिश्चित्यचनंदजं वचनंप्राहुरित्थंचेन्निश्चयोस्तितदाकुरु स
र्वेषामग्रणीर्भूत्वागोवर्द्धनमहोत्सवम् ततःकृष्णास्तथेत्युक्त्वाउत्सवेकृतनिश्चयः नानासामग्रिकंचक्रुर्यथोक्तंनंदसूनुना नानावस्त्राणिपात्रा
णिविस्तृतानिनगाग्रतः तत्रदत्तान्नपुंजस्तुयथागोवर्द्धनोमहान् भुक्तसूपानिशाकाश्चकांजिकंवटकांस्तथा रोटकाःपूरिकाद्यंचलड्डुकामंड
कादिकम् दुग्धंदधिघृतंक्षौद्रंलेह्यंचोष्यंतथामिषम् क्वथिकाद्यंसर्वमपितत्रदत्त्वावचोब्रवीत् कृष्णउवाच मंत्रंपठित्वागोपालान्नेत्रेसंमी
लयंतुच गोवर्धनेनभोक्तव्यंसर्वमन्नंनसंशयः कृष्णउवाच गोवर्धनधराधारगोकुलत्राणकारक बहुबाहुकृतच्छायगवांकोटिप्रदोभव
लक्ष्मीर्यालोकपालानांधेनुरूपेणसंस्थिता घृतंवहतियज्ञार्थेममपापंव्यपोहतु पठंत्विदंमंत्रयुतंसर्वेसुद्रितलोचनाः कृष्णोगोवर्द्धनंविश्य स

र्वमन्नमभक्षयन् भक्षणावसरेकैश्चिज्जनैर्दृष्टोगिरिस्तदा अतीवाभूत्तदाश्चार्यंतच्चेतसिमुनीश्वराः ततोनाडीहूयात्कृष्णोगोपान्वाक्यमुवाचसः अहोगोवर्द्धनेनात्रक्षणाद्भुक्तमिमंस्फुटम् पश्यंतुसर्वेगोपालाःप्रत्यक्षोयंनसंशयः यद्यस्तिसुखवांछावः कुर्वत्वस्यमहोत्सवम् इतिश्रुत्वावचस्तस्यसर्वेविस्मितमानसाः गोवर्द्धनोत्सवंचक्रुरिंद्राच्छतगुणंततः इंद्रोत्सवंद्रष्टुकामःसमागच्छतनारदः गोवर्द्धनोत्सवंदृष्ट्वादेवेंद्रस्यसभांययौ देवेंद्रेणकृतातिथ्योवारंवारंप्रणोदितः नोवाचवचनंकिंचिद्देवेंद्रःसत्यभाषत इंद्रउवा० युष्माकंकुशलंकिंस्विद्वर्त्ततेवानवेतिवा मदग्रेकथ्यतांदुःखंमुनीश्वरहराम्यहम् नारदउ० अस्माकंकिंमुनींद्राणामिंद्रदुःखस्यकारणम् परंगोवर्धनःशैलःशक्रोजातोविलोक्यते त्वदुत्सवेपूज्यतेसौगोपालैर्गोकुलेहरिः अतःपरंयज्ञभागान्गृहिष्यतिसएवहि इंद्रासनंतथेंद्राणींक्रमात्सैवगृहीष्यति यस्यवीर्यंचशस्त्रंचतस्यराज्यंप्रजायते किमस्माकंमुनींद्राणांयएवेंद्रासनेवसेत् वर्षाद्वामासषट्काद्वाद्रष्टव्योसौसभागतः इत्थमुक्त्वाचदेवेंद्रंप्रययौनारदोभुवि इत्थंनारदवाक्यंचश्रुत्वाशक्रोप्यभाषत अहोआवर्तसंवर्तद्रोणनीलकपुष्कराः सर्वेमेघाजलंगृह्यकरकाभिःसमन्वितं प्रयांतुगोकुलेशीघ्रंमारयंतुचयादवान् गोवर्द्धनंस्फोटयंतुवज्रपातैरनेकशः पातयंतुचगाश्चापिगृहाण्युच्चाटयंतुच ततोघनघटाघोषोगोकुलेभून्मुनीश्वराः जातआशदंधकारोमध्यान्हसमयेतदा कंपितायादवाःसर्वेकिमकांडमुपस्थितं ववर्षुर्बहुपानीयंकरकाभिस्तदाघनाः यादवाउ० हाकृष्णाकृष्णहेकृष्णाकिमिदानींविधीयतां मृतास्मयादवाःसर्वेकुपितोयंहिवासवः कृष्णउ० निमील्याक्षीणिभोगोपाध्येयोगोवर्द्धनोगिरिः रक्षाकर्त्तासएवास्तिनान्योस्तिजगतीतले इत्युक्त्वोसाव्यतंशैलंतत्तलेस्थापितास्तते ततःप्रोवाचवचनंगोपान्प्रतिबलाग्रजः श्रीकृष्णउ० अहोगोवर्द्धनेनैनस्थलंदत्तंव्रजव्रज अन्यःकोस्तिस्थलंदातुंप्रत्यक्षोयंनगोत्तमः एवंसप्तदिनंतोयंवृष्टंमुसलधारया नानादेशाययुर्नाशंनगोपाःशरणंययुः गोवर्द्धनस्यनाम्नैवकृष्णोनित्यंप्रयच्छति पक्वान्नानिचगोप्येभ्यस्तत्रतेसुखमावसन् इत्येवंकौतुकंदृष्ट्वासत्यलोकंययौमुनिः ब्रह्मन्त्वंकिंप्रमत्तोसिजायतेसृष्टिनाशनं तस्माच्छीघ्रंगोकुलेत्वंगत्वावृष्टिंनिवारय ब्रह्मोवाच किमर्थंजायतेवृष्टिःकथंसृष्टिविनाशनम् कश्चिद्दैत्यःसमुत्पन्नःसर्वमाख्याहिमेमुने नारदउ० नोत्पन्नोदैत्यराट्कश्चित्त्यक्तःशक्रोत्सवोभुवि यादवैरितिसंक्रुद्धोइंद्रएवंप्रवर्षति इतितस्यवचःश्रुत्वाहंसमारूह्यवैविधिः आगतोयत्रशक्रोस्ति

क्रोधाद्देवःप्रवर्षति ब्रह्मोवाच कथंव्यवसिताबुद्धिरीदृशीतेसुरेश्वरम् त्रैलोक्यनाथोभगवान् निर्जितेभ्यःकथंत्वया एकयैवकरांगुल्याप-
श्यगोवर्द्धनोधृतः ईर्ष्याकथंनेनसाकंत्वयाशक्रविधीयते इतिब्रह्मवचःश्रुत्वामेघान्संस्तभ्यवासवः प्रणिपत्यचतंकृष्णंशक्रोवचनमब्रवी
त् क्षंतव्यामत्कृतिर्विष्णोदासोहंशरणागतः यद्रोचतेनस्तदेयमपराधापनुत्तये कृष्णोवा॰ अज्ञात्वातवसामर्थ्यंगोपालैरर्चितंत्विदम्
एषांदंडस्त्वयायोग्योयंसम्यगेवत्वयाकृतः अहंकनीयान्स्तेभ्रातातवाज्ञापरिपालकः शरणागतजातीनांरक्षणंतुमयाकृतम् यदिप्रसन्नो
देवेशउत्सवोयंप्रदीयताम् गोवर्द्धनायगिरयेगोकुलंरक्षितंयतः शक्रोपिचतथेत्युक्त्वातत्रैवांतरधीयत गतेशक्रेगिरींद्रं तंसंस्थाप्यह
रिरब्रवीत् कृष्णउ॰ गोपाःपश्यंतुमाहात्म्यमद्भुतंशैलजंतुयत् अद्यारभ्यप्रकर्तव्योमहान्गोवर्द्धनोत्सवः गोवर्द्धनेनशैलेननिखिला
तुधराधृता एतत्सारमजानद्भिः कथंसंक्रीडितंपुरा अद्यपर्वतराजस्त्वसर्वैर्भूतममाग्रतः एतस्यैवात्रभावेनबलंलब्धंमयामहत् प्रतिसं
वत्सरंतस्मादन्नकूटंविधीयताम् गवांभवतिकल्याणंपुत्रपौत्रादिसंततिः ऐश्वर्यंचसदासौख्यंभवेद्गोवर्द्धनोत्सवात् कृतंयत्कार्तिकेस्ना
नंजपहोमार्चनादिकम् सर्वंनिष्फलतांयातिह्यकृतेपर्वतोत्सवे एवमुक्तास्तुतेगोपाः सत्यंसर्वममन्यत ययुःकृष्णादयःसर्वे नवमेहनिगो
कुले वालखिल्याऊचुः इत्येतत्सर्वमाख्यातमस्माभिस्तुमुनीश्वराः श्रीकृष्णस्यतुसंतुष्ट्यैह्यन्नकूटंविधीयताम् नानाप्रकारशाकादि
देशाकोलोद्भवानिच पक्वान्नानिविचित्राणिकुर्याच्छक्त्यनुसारतः सर्वान्नपर्वतंकुर्याच्छ्रीकृष्णायनिवेदयेत् गोवर्धनस्वरूपायमंत्रोकृष्णो
द्वितीपठन् यत्कृष्णोरूपकृत्वेतिमंत्रौ एवंयःकुरुतेमर्त्योविष्णुलोकमहीयते इतिश्रीसनत्कुमारसंहितायांप्रतिपत्कृत्यम् अथ
द्वितीयाव्रतानि कार्तिकशुक्लद्वितीयायमद्वितीया साअपराण्हव्यापिनीग्राह्या ऊर्जेशुक्लद्वितीयायामपराणहेर्चयेद्यमं स्नानंकृत्वा
भानुजन्यांयमलोकंनपश्यति ऊर्जेशुक्लद्वितीयायांपूजितस्तर्पितोयमः वेष्टितःकिंनरैर्हृष्टैस्तस्मैयच्छतिवांछितम् इतिस्कांदात् दि
नद्वयेअपराण्हव्याप्तौवापरैवेतियुग्मवाक्यात् प्रथमेश्रावणेमासितथाभाद्रपदेपरा तृतीयाश्वयुजेमासिचतुर्थीकार्तिकीभवेत् श्राव
णेकलुषानाम्नीतथाभाद्रेचनिर्मला आश्विनेप्रेतसंचाराकार्तिकेयाम्यतामतेति चतस्रोद्वितीयाउपक्रम्यप्रथमायांकिंचित्प्रायश्चित्तम्

द्वितीयायांसरस्वतीपूजा तृतीयायांश्राद्धंकर्तव्यं चतुर्थ्यांयमपूजनम् कार्तिकेशुक्लपक्षेतुद्वितीयायांयुधिष्ठिर यमोयमुनयापूर्वंभोजितःस्वगृहेर्चितः अतोयमद्वितीयेयंत्रिषुलोकेषुविश्रुता अस्यांनिजगृहेपार्थनभोक्तव्यमतोनरैः यत्नेनभगिनीहस्ताद्भोक्तव्यंपुष्टिवर्धनम् दानानिचप्रदेयानिभगनीभ्योविशेषतः स्वर्णालंकारवस्त्रान्नपूजासत्कारभोजनैः सर्वाभगिन्यःसंपूज्याअभावेप्रतिपन्नकाः तत्स्थानेनमाता पितृव्यभगिनीहस्तात्प्रथमायांयुधिष्ठिर मातुलस्यसुताहस्ताद्द्वितीयायांयुधिष्ठिर पितुर्मातुःस्वसुश्चैवतृतीयायांतयोःकरात् भोक्तव्यंसहजायाश्चभगिन्याहस्ततःपरम् सर्वासुभगिनीहस्ताद्भोक्तव्यंबलवर्धनम् धन्यंयशस्यमायुष्यंधर्मकामार्थसाधकम् तस्यांतिथौयमुनयायमराजदेवः संभोजितोनिजकरात्स्वसृसौहृदेन तस्यांस्वसाकरतलादिहयोभुनक्ति प्राप्नोतिरत्नधनधान्यमनुत्तमंसः इतिहेमाद्रौभविष्ये यमद्वितीयाविधिः अथकथा वालखिल्याऊचुः कार्तिकस्यसितेपक्षेद्वितीयायमसंज्ञिता तत्रापराह्णेकर्तव्यंसर्वथैवयमार्चनम् प्रत्यहंयमुनागत्ययममप्रार्थयत्पुरा भ्रातर्ममगृहेयाहिभोजनार्थंगणावृतः अद्यश्वोवापरश्वोवाप्रत्यहंवदतेयमः कार्यव्याकुलचित्तत्वादवकाशोनजायते तदैकदायमुनयाबलात्कारान्निमंत्रितः सगतःकार्तिकेमासिद्वितीयायांमुनीश्वराः नारकीयजनान्मुक्त्वागणैःसहरवेःसुतः कृतातिथ्योयमुनयानानापाकाःकृतास्तथा कृताभ्यंगोयमुनयातैलैर्गंधमनोहरैः उद्वर्तनंलापयित्वास्नापितः सूर्यनंदनः ततोलंकारिकंदत्तंनानावस्त्राणिचंदनम् माल्यानिचप्रदत्तानिमंचोपरिउपाविशत् पक्वान्नानिविचित्राणिकृत्वासास्वर्णभोजने यमंचभोजयामासयमुनाप्रीतमानसा भुक्त्वायमोपिभगिनीमलंकारैःसमर्चयत् नानावस्त्रैस्ततःप्राहवरंवरयभामिनि इतितद्वचनंश्रुत्वायमुनावाक्यमब्रवीत् यमुनोवाच प्रतिवर्षंसमागच्छभोजनार्थंत्वमद्गृहे अद्यसर्वेमोचनीयाःपापिनोनरकाद्यम येचैवभगिनीहस्तात्करिष्यंतिचभोजनम् तेषांसौख्यप्रदोहित्वमेतदेवद्वृणोम्यहम् यमउवाच यमुनायांतुयःस्नात्वासंतर्प्यपितृदेवताः भुनक्तिभगिनीगेहेभगिनींपूजयेदपि कदाचिदपिमद्द्वारंनसपश्यतिभानुजे वीरेशेशानदिग्भागेयमतीर्थंप्रकीर्तितम् तत्रस्नात्वाचविधिवत्संतर्प्यपितृदेवताः पठेदेतानिनामानिआमध्याह्नंनरोत्तमः सूर्यस्याभिमुखोमौनीदृढचित्तःस्थिरासनः यमोनिहंतापितृधर्मराजोवैवस्वतोदंडधरश्चकालः भूताधिपोदत्तकृतानुसारीकृतांतमेतद्दशभिर्जपंति

एतानित्रिदशशतैःनामदशकेन ततोयमेश्वरंपूज्यभगिनीगृहमाव्रजेत् मंत्रेणानेनचयस्याभोजितःपूर्णमादरात् भ्रातस्तवानुजाताहंभुंक्ष्वभुक्तमिदंशुभम् प्रीतयेयमराजस्ययमुनायाविशेषतः ततःसंतोष्यभगिनींवस्त्रालंकारणादिभिः स्वप्नेपियमलोकस्यभविष्यतिनदर्शनम् नृपैःकारागृहेयेचस्थापिताममवासरे अवश्यंतेप्रेषणीयाभोजनार्थंश्वशुर्गृहे विमोक्तव्यामयापापानरकेभ्योद्यवासरे यद्येवंधिक्करिष्यंतितेतेदंड्याममसर्वथा कनीयान्भगिनीनास्तितदाज्येष्ठागृहंव्रजेत् तदभावेसपत्नायाः पैतृव्यास्तदभावतः तदभावेमातृशील्यामातृसमशिलायाः मातुर्भगिन्यावामातुलस्याथवानया सपत्नगोत्रसंबंधैःकल्पयेदाययथाक्रमम् सर्वाभावेमाननीयाभगिनीकाचिदेवहि गोनद्याद्यथवातस्याभावेसतिकारयेत् तदभावेप्यरण्यादिकल्पयित्वासहोदरां अस्यांनिजगृहेदेविनभोक्तव्यंकदाचन येभुंजंतिदुराचाराःनरकेतेपतंतिच-स्नेहेनभगिनीहस्ताद्भोक्तव्यंपुष्टिवर्धनम् दानानिचप्रदेयानिभगिनीभ्योविशेषतः श्रावणेतुपितृव्यस्यकन्याहस्तेनभोजयेत् मातुलस्यसुताहस्ताद्भुंजीयाद्भाद्रमासके पितुर्मातुःस्वसुःकन्ये आश्विनेतुतयोःकरात् पितृष्वसेयीमातृष्वसेयीच अवश्यंकार्तिकेमासिभोक्तव्यंभगिनीकरात् एवमुक्त्वाधर्मराजोययौसंयमिनींततः तस्माद्दृषिवराःसर्वेकार्तिकव्रतकारकाः भुंजंतुभगिनीहस्तात्सत्यंसत्यंनसंशयः यमद्वितीयांयःप्राप्यभगनीगृहभोजनम् नकुर्याद्वर्षजंपुण्यंनश्यतीतिरवेःसुतात् यातुभोजयतेनारीभ्रातरंयुग्मकेतिथौ अर्च्चयेच्चापितांबूलैर्नसावैधव्यमाप्नुयात् भ्रातुरायुःक्षयोनूनंनभवेत्तर्हिकर्हिचित् अपराह्णव्यापिनीसाद्वितीयाभ्रातृभोजने अज्ञानाद्यदिवामोहान्नभुक्तंभगिनीगृहे प्रवासिनावाभावाद्वाज्वरितेनाथबंदिना एतदाख्यानकंश्रुत्वाभोजनस्यफलंलभेत् इतिश्रीसनत्कुमारसंहितायांयमद्वितीयाख्यानकंसंपूर्णम् अत्रैवभ्रातृद्वितीयाविधिस्तिथितत्वे यमंचचित्रगुप्तंचयमदूतांश्चपूजयेत् अर्घ्याश्चात्रप्रकर्तव्यायमायसहजद्वयैः भ्रातृभगिनीभिःसहअर्चनमंत्रस्तु एह्येहिमार्तंडजपाशहस्तयमांतकालोककरामरेश भ्रातृद्वितीयांकृतदेवपूजांगृहाणचार्घ्यंभगवन्नमस्ते धर्मराजनमस्तुभ्यंनमस्तेयमुनाग्रज त्राहिमांकिंकरैःसार्द्धंसूर्यपुत्रनमोस्तुते लैंगेयातुभोजयतेनारीभ्रातरंयुग्मकेतिथौ अर्चयेच्चापितांबूलैर्नसावैधव्यमाप्नुयात् स्कांदे कार्तिकेतुद्वितीयांशुक्लायांभ्रातृपूजनम् यानकुर्याद्विनश्यंतिभ्रातरःसप्तजन्मसु-

पाद्मे उत्तरखंडे भद्रेभामिनिभोभामत्वदंघ्रिसरसीरुहम् श्रेयसेद्यनमस्कभ्यमागतोहंतवालयम् मृदुवाक्यंततःश्रुत्वासत्वरंक्रियतेनदा अ
द्यभ्रातृमतीभ्रातस्त्वयाधन्यास्मिमानद् भोक्तव्यंतेद्यमद्गेहेस्वायुषेमममानद् कार्तिकेशुक्लपक्षस्यद्वितीयायांसहोदरः यमोयमुनयापूर्वंभो
जितःस्वगृहेर्चितः यस्मिन्दिनेयमेनात्रनारीवापुरुषोपिवा अपविद्धाकर्मपाशैः स्वेच्छयायेपचंतिहि पापेभ्योविप्रमुख्यास्तेमुक्ताःकर्मनिबंधना
त् तेषांमहोत्सवोवृत्तोयमराष्ट्रेसुखावहः तस्माद्भूतोत्रमद्गेहेभोजनंकुरुकार्तिके आशिषःप्रतिगृह्याथनमस्कृत्यसमर्चयेत् सर्वाभगिन्यःसं
पूज्याज्येष्ठाउभयतःस्मृताः वस्त्रादिनानमस्कुर्यान्निजवृत्तानुसारतः भ्रातुरायुष्यवृद्ध्यर्थंभगिनीभिर्यमस्यवै ॥ पूजनीयाःप्रयत्नेनप्रतिमाश्च
विधानतः मार्कंडेयोबलिर्व्यासोहनूमांश्चविभीषणः कृपोद्रोणिःपर्शुरामोअष्टौतेचिरजीविनः मार्कंडेयमहाभागसप्तकल्पांतजीवित चि
रंजीवीयथात्वंहितथामेभ्रातरंकुरु इतिभ्रातृद्वितीया अथतृतीयाव्रतानि तत्रचैत्रशुक्लतृतीयायांसौभाग्यशयनव्रतम् मात्स्ये म
त्स्यउवाच वसंतमासमासाद्यतृतीयायांजनप्रिय सौभाग्यायसदास्त्रीभिःकार्यंपुत्रसुखेप्सुभिः शुक्लपक्षस्यपूर्वाण्हेतिलैःस्नायंस-
माचरेत् तस्मिन्नहनिसादेवीकिलविश्वात्मिकासती पाणिग्रहणकैर्मैरुमारूढा वरवर्णिनी तयासहैवदेवेशंतृतीयायांसमर्चयेत् फलैर्ना
नाविधैर्धूपैर्दीपैर्नैवेद्यसंयुतैः प्रतिमांपंचगव्येनतथागंगोदकेनच पंचामृतैःस्नापयित्वागौरीशंकरसंयुतां नमोस्तुपाटलायैचपादौदेव्याः
शिवस्यतु शिवायेतिचसंकीर्त्यजयायैगुल्फयोस्तथा त्रिगुणायेतिरुद्रस्यभवान्यैजंघयोर्युगम् शिवंरुद्रेशिवायेतिजयायैइतिजानुनी संकी
र्त्यहरिकेशायतथोरूवरदेनमः ईशायैतिकटिंरत्यैशंकरायेतिशंकरम् कुक्षिद्वयेचकोटर्यैशूलिनःशूलपाणये मंगलायैनमस्तुभ्यमुदरंचाभिपू
जयेत् सर्वात्मनेनमोरुद्रईशान्यैचकुचद्वयं शिवेवेदात्मनेतद्वदिंद्राण्यैकंठमर्चयेत् त्रिपुरघ्नातिविश्वेशमनंतायकरद्वयम् त्रिलोचनायेतिहरंत्वा
हुःकालानलप्रिये सौभाग्यभुवनायेतिभूषणादिसमर्चयेत् नमोर्धनारीशरहंप्रतितांगीतिनासिकाम् नमउग्रायलोकेशललितेतियुतभ्रुवौश
र्वांत्रिपुरहंतारं वक्रदेव्यैतथालकम् नमःश्रीकंठनाशायशिवंकेशांस्तथार्चयेत् भीमोग्रसौम्यरूपिण्यैशिरःसर्वात्मनेनमः शिवमभ्यर्च्यविधि
वत्सौभाग्याष्टकमित्यतः स्थापयेद्घृतनिष्पातंकुसुंभंक्षीरजीरकम् तृणराजेक्षुलवणंकुस्तुंबुरुमथाष्टमम् दत्तंसौभाग्यकृद्यस्मात्सौभाग्या

ष्टकमित्यतः एवंनिवेद्यतत्सर्वंमद्रूतंशिवयोःपुरः चैत्रेशृंगोदकंप्राश्यस्वपेद्भूमावरिंदम पुनःप्रभातेचतथाकृतःस्नानजपःशुचिः संपूज्यद्वि
जदांपत्यंमाल्यवस्त्रविभूषणैः सौभाग्याष्टकसंयुक्तंसुवर्णप्रतिमाद्वयम् प्रीयतामत्रललिताब्राह्मणायनिवेदयेत् एवंसंवत्सरंयावत्तृतीया
यांसदासुने प्राशनेदानमंत्रेचविशेषंहिनिबोधमे गोशृंगोदकमाद्येस्याद्वैशाखेगोमयंपुनः ज्येष्ठेमंदारकुसुमंबिल्वपत्रंशुचौस्मृतम् माघे
कृष्णानिलास्तद्वत्पंचगव्यंचफाल्गुने ललिताविजयाभद्राभवानीकुमुदाशिवा वासुदेवीतथागौरीमंगलाकमलासती उमाचदानकालेतु-
प्रीयतामितिकीर्तनात् मल्लिकाशोककमलकुसुमोत्पलमालती कुब्जकंकरवीरंचबाणमम्लानकुंकुमम् बाणंनीरकुरंटः सिंदुवारंच
सर्वेषुमासेषुक्रमशःस्मृतम् जपाकुसुमकौसुंभमालतीशतपत्रिका यथालाभप्रशस्तानिकरवीरंचसर्वदा एवंसंवत्सरंयावदुपोष्यविधि
वन्नरः॥स्त्रीवाभक्त्याकुमारीवाशिवामभ्यर्च्यशक्तितः व्रतांतेवायनंदद्यात्सर्वोपस्करसंयुतम् उमामहेश्वरंहैमंवृषभंचगवासह स्थाप
यित्वाचशयनेब्राह्मणायनिवेदयेत् अन्यान्यपियथाशक्त्यामिथुनान्यंबरादिभिः धान्यालंकारगोदानैरभ्यर्च्यधनसंचयैः वित्तशाठ्येन
रहितःपूजयेद्गतविस्मयः एवंकरोतियासम्यक्सौभाग्यशयनव्रतम् सर्वान्कामानवाप्नोतिपदमानंत्यमश्नुते फलकस्यचसर्वांगमेतत्कुर्व
न्समाचरेत् यत्रकीर्तिंसमाप्नोतिप्रतिमासंनराधिप सौभाग्यारोग्यरूपायुर्वस्त्रालंकारभूषणैः नवियुक्ताभवेद्राजन्नब्दानांचशतत्रयम् य
स्तुद्वादशवर्षाणिसौभाग्यशयनव्रतम् करोतिसप्तचाष्टौवाश्रीकंठभवनेमरैः पूज्यमानोवसेत्सम्यक्यावत्कल्पायुतत्रयम् नारीवाकुरु
तेभक्त्याकुमारीवानरेश्वर सापितत्फलमाप्नोतिदेव्यानुग्रहलालिता इतिमत्स्यपुराणेसौभाग्यशयनव्रतम् अत्रैवगौर्यादोलोत्सवः
तदुक्तंहेमाद्रौ देवीपुराणे चैत्रशुक्लतृतीयायांगौरीमीश्वरसंयुताम् संपूज्यदोलोत्सवकंकुर्यान्नारीशुभेच्छुका तथाचनिर्णयामृते तृ
तीयांयाजयेद्देवींशंकरेणसमन्विताम् कुंकुमागरुकर्पूरमणिवस्त्रैरगर्हिताम् सुगंधिपुष्पधूपैश्चदमनेनविशेषतः आंदोलंदोलयेद्वत्साशिवो
मातुष्टयेसदा रात्रौजागरणंकुर्यात्प्रातर्दद्यात्तुदक्षिणा सौभाग्यायसदास्त्रीभिःकार्यापुत्रसुखेप्सुभिः इयंचपराग्राह्या मुहूर्तमात्रसत्त्वेपि
दिनेगौरीव्रतंपुरे इतिमाधवोक्तेः इयंचमन्वादिः कृतंश्राद्धंविधानेनमन्वादिषुयुगादिषु हायनादिद्विसाहस्रंपितॄणांतृप्तिदंभवेत् अधि

मासेपिइदंकर्तव्यम् अत्रपिंडदानंनास्ति अथचैत्रशुक्लतृतीयायांमनोरथतृतीयाव्रतम् ईश्वरवाच साधुक्तंत्वयादेविकृतवत्यापरिग्रहम् अस्येहधर्मपीनृस्यमनोरथकृतःसति तएवविश्वभोक्तारोविश्वमान्यास्तएवहि येत्वांविश्वभुजामत्रपूजयिष्यंतिमानवाः विश्वेविश्वभुजो विश्वस्थित्युत्पत्तिलयप्रदे नरास्त्वदर्चकाश्चात्रभविष्यंत्यमलात्मकाः मनोरथतृतीयायांयस्तेभक्तिंविधास्यति तन्मनोरथसंसिद्धिर्भवित्रीमदनुग्रहात् नारीवापुरुषोवापित्वद्व्रताचरणात्प्रिये मनोरथानिहप्राप्यज्ञानमंतेचलप्स्यते देव्युवाच मनोरथतृतीयायांव्रतंकीदृक्कथानकम् किंफलंकिंकृतंनाथकथयैतत्कृपांकुरु ईश्वरउवा॰ शृणुदेवियथापृष्टंभवत्याभवतारणम् मनोरथव्रतंचैतत्कृत्वाकृत्यतरंपरम् पुलोमतनयापूर्वंततापपरमंतपः कंचिन्मनोरथंप्राप्तुंनचापतपसःफलम् अपूपुजत्ततोमासंभक्त्यागौरीमहेश्वरम् गीतेनसरहस्येनकलकंठीरवेनहि तद्गानेनातिसंतुष्टोमृदुनामधुरेणच सुतालेनसुरंगेणधातुमात्रकलावता प्रोवाचचवरंशूलीप्रसन्नोस्मिपुलोमजे अनेनचसुगीतेनत्वनयालिंगपूजया पुलोमजोवाच यदिप्रसन्नोदेवेशतदायोमेमनोरथः तंपूरयमहादेवमहादेव्याःप्रियंवद सर्वदेवेषुयोमान्यःसर्वदेवेषुसुंदरः यायजूकेषुसर्वेषुयःश्रेष्ठःसोस्तुमेपतिः यथाभिलषितंरूपंयथाभिलषितंसुखं यथाभिलषितंचायुः प्रसन्नोदेहिमेभव यदायदाचपत्यामेसंगःस्याच्चसुखेछया तदातदाचतंदेहंत्यक्त्वान्यंदेहमाप्नुयां सदाचदेवपूजायांममभक्तिरनुत्तमा ममपूजाभगवन्निजरामरणहारिणी भर्तुर्व्ययेतिवैधव्यंक्षणमात्रमपीहन ममभाविमहादेवपातिव्रत्यंचयातुमाम् ईश्वरउवा॰ पुलोमकन्येयश्चैषत्वयाकारिमनोरथः लप्स्यसेब्रह्मचर्याणौनकुरुष्वजितेंद्रिया मनोरथतृतीयायाऽचरणेनभविष्यति तस्मात्त्वयेव्रतंवक्ष्येतद्विधेहियथोदितम् तेनव्रतेनचीर्णेनमहासौभाग्यदेनतु अवश्यंभविताबालेतवचैवमनोरथः पुलोमकन्योवा॰ कारुण्यवारिधेशंभोप्रणतार्तिहरप्रिय किंनामचाथकाभक्तिःकापूज्यातत्रदेवता कदाचसाविधातव्याइतिकर्तव्यताचका इत्याकर्ण्यशिवोवाक्यंतांतुप्रीत्याजगादह ईश्वरउवा॰ मनोरथतृतीयायांव्रतंपौलोमितच्छृणु पूज्याविश्वभुजागौरीचतुर्भुजविशालिनी वरदोभयहस्तश्चसाक्षसूत्रःसमोदकः देव्याःपुरस्ताद्व्रतिनापूज्यआशाविनायकः चतुर्भुजश्चारुनेत्रःसर्वसिद्धिकरःप्रभुः चैत्रशुक्लतृतीयायांकृत्वावैदंतधावनम् सायंतनींचनिर्वर्त्यनातितृप्याभुजिक्रि

याम् नियमंचेतिगृण्हीयाज्जितक्रोधोजितेंद्रियः संत्यक्तास्पृश्यसंभारं शुचिस्तद्गतमानसः प्रातर्व्रतंचरिष्यामिमातर्विश्वभुजेनघे विधेहितत्र-
सान्निध्यंमन्मनोरथसिद्धये नियमंचेतिसंगृह्यस्वपेद्रात्रौशुभंस्मरन् प्रातरुत्थायमेधावीविधायावश्यकंविधिम् शौचमाचमनंकृत्वादंतका
ष्ठंसमाहरेत् अशोकवृक्षस्यशुभंसर्वशोकविनाशनम् नित्यंतनंच संपाद्यविधिंविधिविदांवरः स्नात्वाशुद्धांबरःसायंगौरीपूजांसमाहरेत् आ
दौविनायकंपूज्यघृतपूपान्निवेदयेत् ततोर्चयेद्विश्वभुजामशोककुसुमैःशुभैः अशोकवर्तिनैवेद्यंधूपैश्चागरुसंभवैः कुसुमेनानुलिप्यादौए
कभुक्तंनतस्मरेत् अशोकवर्तिसहितैर्घृतपूरैर्मनोहरैः एवंचैत्रतृतीयायांव्यतीतायांपुलोमजे चैत्रादिफाल्गुनांतासुतृतीयासुव्रतंचरेत् क्र
मेणदंतकाष्ठानिकथयामितवानघे अनुलेपनवस्तूनिकुसुमानितथैवच नैवेद्यादिगजास्यस्यदेव्याश्चापिशुभव्रते अन्नानिचैकभक्तस्य
शृणुतानिफलाप्तये जंब्वपामार्गखदिरजातीचूतकदंबकाः प्लक्षोदुंबरखर्जूरीबदरीद्दाडिमीतथा दंतकाष्ठद्रुमाएतेव्रतिनःसमुदाहृताः-
सिंदूरागरुकस्तूरीचंदनंरक्तचंदनम् गोरोचर्मदेवदारुंपद्माक्षंचनिशाह्वयम् प्रीत्यानुलेपनंबालेयक्षकर्दमसंभवम् सर्वेषामप्यलाभेचप्रश
स्तोयक्षकर्दमः कस्तूरिकायाद्वौभागौद्वौभागौकुंकुमस्यच चंदनस्यत्रयोभागाःशशिनस्त्वेकएवहि यक्षकर्दमइत्येषसमस्तसुरवल्लभः
अनुलिप्याथकुसुमैरर्चयेद्रूचितान्यपि पाटलीमल्लिकापद्मकेतकीकरवीरकैः उत्पलैराजचंपैश्चनद्यावर्तैश्चराजभिः कुमारीभिः कर्णि-
कारैरलाभेतच्छदैःसह सुगंधीभिःप्रसूनाद्यैःसर्वालाभेपिपूजयेत् करंभोदधिभक्तंचसचूतरसमंडकः फेणिकावटकाश्चैवपायसंचस
शर्करं समुद्गंसघृतंभक्तंकार्तिकेविनिवेदयेत् उदेरिकाश्चलड्डुकामाघेलंपसिकाशुभा सुष्टिकाःशर्करागर्भाःसर्पिषापरिसाधिताःनि
वेद्यफाल्गुनेदेव्यैसार्धंविघ्नजितामुदा निवेदयेद्यदन्नंहिएकभुक्तेपितत्स्मृतम् अनिवेद्यैनसंमूढोभुंजानोन्यपतेदधः प्रतिमासंतृतीयाया
मेकमाराध्यवत्सरम् व्रतसंपूर्तयेकुर्यात्स्थंडिलेग्निसमर्चनम् जातवेदसमंत्रेणतिलाज्यद्रविणेनच शतमष्टाधिकंहोमंकारयेद्विधिनाव्र
ती सदैवनक्तेपूजोक्तानदानक्तेतुभोजनम् नक्तएवहिहोमोयंनक्तएवक्षमापनम् गृहाणपूजांमेभक्त्यामातर्विघ्नजितासह नमोस्तुतेवि-
श्वभुजेपूरयाशुमनोरथम् नमोविघ्नकृतेतुभ्यंनमआशाविनायक त्वंविश्वभुजयासार्द्धंममदेहिमनोरथम् एतौमंत्रौसमुच्चार्यपूज्योगौरीवि

नायकौ व्रतसमापनेदेव्याःपर्यंकस्तूलिकान्विताः आचार्यंचसपत्नीकंपर्यंकेउपवेश्यच व्रतीसमर्चयेद्वस्त्रैःकरकर्णविभूषणैः दद्यात्सय
स्विनींगांच व्रतस्यपरिपूर्तये मनोरथतृतीयायांव्रतमेतन्मयाकृतम् न्यूनातिरिक्तंसंपूर्णमेतदस्तुभवद्गिरा इत्याचार्यसमागच्छेत्तथेत्यु
क्तश्चतेनवै प्रातश्चतुर्थ्यांसंपूज्य चतुरश्चकुमारकान् सर्वंसंपूर्णतांयातिव्रतमेतत्सुनिर्मलम् चिंतितंलभतेकामंव्रतस्यास्यनिषेवणात्
इतिश्रीस्कंदपुराणेचैत्रशुक्लतृतीयायांमनोरथव्रतोद्यापनंसंपूर्णम् अथचैत्रशुक्लप्रतिपदमारभ्यत्रिरात्रपूर्वकंतृतीयायांअरुंधतीव्रतं त
त्रस्त्रीणामेवाधिकारः अवैधव्यादिफलश्रवणात् तत्रादौसंकल्पः ममइहजन्मांतरेवाबालवैधव्यनाशार्थम् अनेकसौभाग्यपुत्ररू
पसंपत्तिसमृद्ध्यर्थं अरुंधतीव्रतमहंकरिष्ये निर्विघ्नतासिद्ध्यर्थंगणपतिपूजनंस्वस्तिवाचनंआचार्यवरणंचकरिष्ये पश्चात्पूजादिआचा
र्येणकारयेत् वैशाखेश्रावणेमासिमाघेवाकार्तिकेतथा प्रतिपत्प्रातरुत्थायस्नात्वाशुक्लतिलाम्लकैः प्रतिपदिदिनेनक्तंद्वितीयायाम
याचितम् तृतीयायामुपोष्यंचआचार्येणततःसह रात्रौअधिवासनम् सुवर्णनिर्मितांदिव्यांद्विभुजांप्रतिमात्रयम् अरुंधतींवसिष्ठं-
चध्रुवंचैवपृथक्न्यसेत् शिलोपरिसर्वतोभद्रस्थापनम् कलशंधातुमयंतदुपरिताम्रपात्रंप्रतिमायांअग्न्युत्तारणंकृत्वा तदुपरिअरुंध
तींवसिष्ठंध्रुवंचस्थापयेत् कुंकुमाक्षतैःपूजयेत् अथअरुंधतीपूजा अष्टकर्णिकयायुक्तेमंडलेपूजयेत्तुताम् अरुंधतींमहादेवींवसि
ष्ठसहितांसतीम् आवाहनं अरुंधतिमहादेविसर्वसौभाग्यदायिनि दिव्यंसुचारुवेषंचआसनंप्रतिगृह्यताम् आसनं सुचारुशी
तलंदिव्यंनानागंधसुवासितम् पाद्यंगृहाणदेवेशिअरुंधतिनमोस्तुते पाद्यं अरुंधतिमहाभागेवसिष्ठप्रियवादिनि अर्घ्यंगृहाण
कल्याणिभर्त्रासहपतिव्रते अर्घ्यं गंगातोयंसमानीतंसुवर्णकलशेस्थितम् आचम्यतांमहाभागेवसिष्ठसहितेनघे आचमनीयं॰ गं
गासरस्वतीरेवापयोष्णीनर्मदाजलैः स्नापितासिमयादेवितथाशांतिंकुरुष्वमे स्नानं॰ नानारंगसमुद्भूतंदिव्यंचारुमनोहरम् वस्त्रंगृ
हाणदेवेशिअरुंधतिनमोस्तुते वस्त्रं कंचुकीमुपवस्त्रंचनानारत्नैःसमन्वितम् गृहाणत्वंमयादत्तंअरुंधतिनमोस्तुते उपवस्त्रं॰ कर्पूरकुं
कुमैर्युक्तंहरिद्रादिसमन्वितम् कस्तूरिकासमायुक्तंचंदनंप्रतिगृह्यताम् चंदनंस॰ हरिद्राकुंकुमंचैवसिंदूरंकज्जलान्वितं मयानिवेदि

तंभक्त्यागृहाणपरमेश्वरि सौभाग्यद्रव्या॰ माल्यादीनिस्रगं॰ पुष्पं॰ वनस्पतिरसोद्भूतो॰ धूपं आज्यंचवर्ति॰ दीपं॰ अन्नंचतुर्विधंस्वादुरसैःषड्भिःसमन्वितम् नैवेद्यंगृह्यतांदेविप्रसीदपरमेश्वरि नैवेद्यं॰ पूगीफलंमहद्दिव्यंनागवल्यादलैर्युतम् कर्पूरेलासमायुक्तंतांबूलंप्रतिगृह्यताम् तांबूलंस॰ इदंफलंमयादेविस्थापितंपुरतस्तव तेनमेसफलावाप्तिर्भवेज्जन्मनिजन्मनि फलं॰ हिरण्यगर्भगर्भस्थंहेमबीजंविभावसोः अनंतपुण्यफलदमतःशांतिंप्रयच्छमे दक्षिणां॰ पुत्रान्देहिधनंदेहिसौभाग्यंदेहिसुव्रते अन्यांश्चसर्वकामांश्चदेहिदेविनमोस्तुते प्रार्थनां॰ अरुंधतिमहाभागेवसिष्ठप्रियवादिनि सौभाग्यंदेहिमेदेविधनंपुत्रांश्चसर्वदा उत्तरार्ध्येद्विभुजांचारुसर्वांगींसाक्षसूत्रकमंडलुम् प्रतिमांचांकनींकृत्वानामभिःपरिपूजयेत् ॐम् देववंद्यायनमः पादौपूजयामि लोकवंद्यायै॰ जानुनीपू॰ संपत्तिदायिन्यै॰ कटिंपू॰ गंभीरनाभ्यै॰ नाभिंपू॰ लोकधात्र्यै॰ स्तनौपू॰ जगद्धात्र्यै॰ कंठंपू॰ शांत्यैन॰ बाहुंपू॰ वरप्रदायै॰ हस्तौपू॰ धृत्यैनमः मुखंपू॰ अरुंधत्यै॰ शिरः पू॰ सकलप्रियायै॰ शिखांपू॰ वसिष्ठःप्रियायै॰ वसिष्ठध्रुवसहितं॰ सर्वांगंपूजयामि नमोदेव्याइतिनीराजनं॰ पुष्पांजलिं॰ वायनंदद्यात् वंशपात्रेस्थितंपूर्णवाणकंघृतसंयुतं अरुंधतीप्रीयतांचब्राह्मणायददाम्यहम् वायनं सुवर्णमूर्तिसंयुक्तांवसिष्ठध्रुवसंयुताम् अरुंधतीं सोपचारांब्राह्मणायददाम्यहं मूर्तिदानमंत्रः गच्छदेवियथास्थानंसर्वालंकारभूषिता अरुंधतिनमस्तुभ्यंदेहिसौभाग्यमुत्तमं इतिविसर्जनम् इतिपूजनम् अथकथा स्कंदउवाच पुरावृत्तमिदंविप्राःशृणुध्वंव्रतमुत्तमम् आसीत्कश्चित्पुराविप्रःसर्वशास्त्रविशारदः तस्यैकाकन्यकाजातारूपेणाप्रतिमाभुवि ततोविवाहंसम्यग्वैपितातस्याकरोद्द्विजः कुलशीलवतेदत्तासाकन्यावरवर्णिनी अचिरेणैवकालेनभर्तातस्याम्रितोद्विजः बालरंडातुसाजातानिर्वेदादगमद्गृहात् यमुनातीरमासाद्यचकारविपुलंतपः एकभुक्त्यादिकैश्चैवकृच्छ्रचांद्रायणैस्तथा मासोपवासनियमैरात्मानंपावयत्सती कदाचिदागतस्तत्रभ्रमन्गौर्यासदाशिवः यमुनातीरमासाद्यवनितांतांददर्शसा कृपयाचशिवागौरीमहादेवमुवाचसा देवकेनेदृशींप्राप्ताबालवैधव्यतादशाम् वदमांकृपयादेवकृपांकुरुदयानिधे महादेवउवा॰ अयंविप्रः पुरागौरीकुलशीलयुतोभुवि तेनकन्यापरीणीता सुरूपायुवतीसती सतांविवाह्यतरुणींविदेशमगमद्द्विजः ततोबहुतिथंकालंसापश्यद्भ

तुरागमम् नागतस्कतदाविप्रोयावज्जीवंगतोद्विजः तस्याजन्मगतंसर्वंविफलंपतिनाविना तेनपापेनविप्रोसौनारीत्वंप्राप्तवान्शिवे स्वनारीयंःपरित्यज्यनिर्दोषांकुलसंभवाम् यानिदेशांतरंचाथअंधाइवमहार्णवे परदाररतोवास्यादन्यांवाकुरुतेस्त्रियम् सोन्यजन्मनिदेवेशिस्त्रीभूत्वाविधवाभवेत् यानारीतुपतिंत्यक्कामनोवाक्कायकर्मभिः रहःकरोतिवैजारंगत्वावापुरुषांतरम् भोगान्भुक्त्वाचयायोषिन्मदेनप्रमदासती तेनकर्मविपाकेनसानारीविधवाभवेत् स्वपत्नींकुलसंभूतांपतिव्रतरतांसतीं अनुकूलांपरित्यज्यपरांयोयातिस्वेच्छया सपापीजायतेन्यस्मिन्स्त्रीहीनोविप्रजन्मनि अनेनसदृशंदेविलोकेस्मिन्नास्तिपातकम् नवैधव्यात्परोव्याधिर्नवैधव्यात्परोज्वरः नवैधव्यात्परःशोकोनवैधव्यात्परोंकुशः निरयोनचवैधव्यात्कुष्टंवैधव्यतान्नृषु तेनपापेनबहुनाजायतेबहुरंडका इतितस्यवचःश्रुत्वासागौरीविस्मिताभवत् प्रपच्छतंमहादेवंगौरीसाकरुणान्विता केनेदृशंमहत्पापंबालवैधव्यदायकम् नश्यतेकर्मणाकेनतन्मांवदकृपांकुरु महादेवउवाच शृणुदेविप्रवक्ष्यामिबालवैधव्यनाशनम् अरुंधतीव्रतंपुण्यंनारीसौभाग्यदायकम् यत्कृत्वाबालवैधव्यान्मुच्यतेनात्रसंशयः श्रुतमेतत्तदाविप्रागौर्याःशंकरतोव्रतम् यमुनातीरमासाद्यउपदिष्टंतदाद्विजाः तस्यैनार्यैमहादेव्याकारितंव्रतमुत्तमम् तेनपुण्येनमहताव्रतजेनमुनीश्वराः सानारीचागमत्स्वर्गंभुक्त्वावैधव्यतांतदा इत्थंव्रतंश्रुतंसम्यगुपदिष्टंमुनीश्वराः कृतमन्यैश्चबहुभिस्तेपिमुक्तामुनीश्वराः अरुंधतीव्रतमिदंसदाकार्यंमुनीश्वराः नारीवैधव्यतोमुच्येत्सौभाग्यंप्राप्नुयात्परम् इतिश्रीस्कंधपुराणेअरुंधतीव्रतम् अथउद्यापनम् युधिष्ठिरउवाच उद्यापनविधिंब्रूहिअरुंधत्याःसुरेश्वर भक्तितःश्रोतुमिच्छामिव्रतसंपूर्णहेतवे कृष्णउवाच अरुंधतीव्रतंवक्ष्येनारीसौभाग्यदायकम् येनचीर्णेनवैसम्यक्नारीसौभाग्यमाप्नुयात् जायतेरूपसंपन्नापुत्रपौत्रसमन्विता वसंतेतुसमासाद्यतृतीयायांयुधिष्ठिर माघेवामाधवेचैवश्रावणेकार्तिकेथवा स्नानंकृत्वातुवैसम्यक्त्रिरात्रोपोषितासती मिथुनानिचचत्वारिसमाहूयपतिव्रता पूजयेत्पुष्पतांबूलैश्चंदनैश्च तथाक्षतैः कुंकुमागरुकस्तूरीकर्पूरमृगनाभिभिः शिलापरेचसंस्थाप्यजीरकंलवणान्वितम् लोष्टकेनसमायुक्तंवस्त्रयुग्मेनवेष्टितम् आवाहयेदरुंधतींवसिष्ठप्राणसंमिताम् पतिव्रतानांसर्वा-

सांसुख्यांवैदेवभामिनीं द्विभुजांचारुसर्वांगींसाक्षसूत्रकमंडलुम् प्रतिमांकांचनींकृत्वानामभिःपरिपूजयेत् वसिष्ठंचध्रुवंचैवप्रतिमांपू
जयेद्व्रती देववंद्येनमःपादौजानुनीलोकवंदिते कटिंसंपूजयेत्तस्याःसर्वसंपत्तिदायिनीम् नाभिंगंभीरनाभ्यैतुलोकधात्र्यैतथास्तनौजग
द्धात्र्यैतथास्कंधौबाहूशांत्यैनमस्तथा हस्तौतुवरदायैतुसुखंधृत्यैनमःपुनः अरुंधत्यैतथापूज्यंशिरस्तुसकलप्रियम् एवंसंपूज्यतांदेवींगंधपुष्पो
पचारकैः पूजयित्वासतींदेवींततश्चार्घ्यंप्रदापयेत् अरुंधतिमहाभागेवसिष्ठप्रियवादिनि सौभाग्यंदेहिमेदेविधनंपुत्रांश्चसर्वदा पुत्रान्देहिध
नंदेहिसौभाग्यंदेहिसुव्रते अन्यांश्चसर्वकामांश्चदेहिदेविनमोस्तुते सुवासिन्योथसंपूज्याःसमाप्तिदिवसेतदा शुभगंधाक्षतैःपुष्पैर्द
द्याच्छूर्पेणभक्षकान् होमंचैवतदाकुर्यात्समिद्भिश्चतिलैःपृथक् अष्टोत्तरशतंसंख्या प्रार्थनामंत्रतःसुधीः मिथुनानिचसंपूज्य भूषणाच्छाद
नादिभिः नानाविधोपचारैश्चचतुर्विंशतिसंख्यया आचार्यायचगांदद्याद्वस्त्राण्याभरणानिच शय्यांसोपस्करांदद्यात्कांस्यपात्रंसदीप
कम् आदर्शंचामरंचैवअश्वंदद्यात्सुभोजनम् यथावद्भोजयित्वाथस्त्रियःशूर्पान्समोदकान् मोदकान्कांचनंचैवतथावस्त्रंयथाविधिपो
लिकाघृतपूपाश्चपूरिकाश्चविशेषतः सोहालिकाश्चदातव्याएकैकंद्विगुणंतथा भोजनद्रव्यपर्याप्तंदीनानंधांश्चपूजयेत् अनेनैवविधाने
नभामिनीकुरुतेव्रतम् अवैधव्यत्वमाप्नोतितथाजन्मसहस्रकम् पुत्रपौत्रसमायुक्ताधनधान्यसमावृता जीवेद्वर्षशतंसाग्रंसहभर्त्रामहाव्र
ता एवमभ्यर्चयित्वातुपदंगच्छेदनामयम् देवभार्यायथास्वर्गेऋषिभार्यातथैवच राजतेचमहाभागासर्वकामसमृद्धिभिः इतिश्रीस्कंद
पुराणेअरुंधतीव्रतोद्यापनम् अथवैशाखशुक्लतृतीयायांभविष्योत्तरोक्तमक्षय्यतृतीयाव्रतम् तीर्थेवानद्दिनेस्नानंतिलैश्चपितृतर्पणम्दा
नंधर्मघटादीनांमधुसूदनपूजनम् माधवेमासिकुर्वीतमधुसूदनतुष्टिदं तुलामकरमेषेतुप्रातःस्नानंविधीयते हविष्यंब्रह्मचर्यंचमहापातक
नाशनम् वैशाखस्नाननियमंब्राह्मणानामनुज्ञया मधुसूदनमभ्यर्च्यकुर्यात्संकल्पपूर्वकम् वैशाखंसकलंमासंमेषसंक्रमणेरवेः प्रातः
सनियमस्याथप्रीयतांमधुसूदनः मधुसूदनसंतोषाद्ब्राह्मणानामनुग्रहात् निर्विघ्नमस्तुमेपुण्यंवैशाखस्नानमन्वहम् माधवेमेषगेभानौमुरा ३०
रिर्मधुसूदनः प्रातःस्नानेनमेनाथफलदःपापहाभव यदानज्ञायतेनामतस्यतीर्थस्यभोद्विजाः तत्रउच्चारणंकार्यंविष्णुतीर्थमिदंत्विति अ

पिसम्यग्विधानेन नारीवापुरुषोपिवा प्रातःस्नानःसनियमःसर्वपापैःप्रमुच्यते वैशाखेविधिवत्स्नात्वाभोजयेद्ब्राह्मणान्दश कृत्स्नशःसर्वपापेभ्योमुच्यतेनात्रसंशयः इतिवैशाखस्नानविधिर्भविष्ये इयमेवतृतीयापरशुरामजयंती साचप्रदोषव्यापिनीग्राह्या तदुक्तंभार्गवार्चनदीपिकायांस्कांदभविष्ययोः वैशाखस्यसितेपक्षेतृतीयायांपुनर्वसौ निशायाःप्रथमेयामेरामाख्यःसमयेहरिः रेणुकायास्तुयोगर्भादवतीर्णोविभुःस्वयम् दिनद्वयेतथाव्याप्तौअंशतःसमव्याप्तौचपरा शुक्लतृतीया वैशाखेशुक्लोपोष्यादिनद्वये निशायांपूर्वयामेचेदुत्तरान्यत्रपूर्विका तत्रैववैशाखतृतीया अक्षय्यतृतीयासाचपूर्वाण्हव्यापिनीग्राह्या दिनद्वयेतद्व्याप्तौतुपरैवेति इयंयुगादिरपि यामन्वाद्यायुगाद्याश्चतिथयस्तासुमानवः स्नात्वाहुत्वाचजप्त्वाचदत्वानंतफलंलभेत् श्राद्धेपिपूर्वाण्हव्यापिनीग्राह्या पूर्वाण्हेतुसदाकार्याःशुक्लामनुयुगादयः देवेकर्मणि पैत्र्येचकृष्णोचैवापराण्हिका वैशाखस्यतृतीयांच पूर्वविद्धांकरोतिवै हव्यंदेवानगृण्हंतिकव्यंचपितरस्तथा इतिवैशाखस्यतृतीयायांश्रीसमेतंजगद्गुरुम् नारायणपूजयेत्पुष्पधूपविलेपनैः योस्यांददातिकरकान्वारिव्यंजनसंयुताम् सयातिपुरुषोवीरलोकान्वैहेममालिनः वैशाखशुक्लपक्षेतुतृतीयायांतथैवच गंगातोयेनरःस्नात्वामुच्यतेसर्वकिल्बिषैः श्रीकृष्णउवा॰ बहुनात्रकिमुक्तेनकिंबह्वक्षरमालया वैशाखस्यसितामेकांतृतीयामक्षयांशृणु तस्यांस्नानंतपोहोमःस्वाध्यायःपितृतर्पणम् दानंचक्रियतेतस्यांतत्सर्वस्यादिहाक्षयम् आदिःकृतयुगस्येयंयुगादिस्तेनकथ्यते सर्वपापप्रशमनीसर्वसौख्यप्रदायिनी पुरामहोदयेपार्थवणिगासीत्सनिर्धनः प्रियंवदःसत्यव्रतोदेवब्राह्मणपूजकः पुण्याख्यानैकचित्तोभूत्कुटुंबेव्याकुलोपिसन् तेनश्रुतावाच्यमानातृतीयारोहिणीयुता यदास्याद्बुधसंयुक्तातदासातुमहत्फला यस्यांयद्दीयतेकिंचिदक्षय्यंस्यात्तदेवहि इतिश्रुत्वाचगंगायांसंतर्प्यपितृदेवताः गृहमागत्यकरकान्सान्नानुदकसंयुतान् अन्नपूर्णान्बृहत्कुंभाञ्जलेनविमलेनच यवगोधूमलवणान्सक्तुदध्योदनंतथा इक्षुक्षीरविकारांश्चसहिरण्यांश्चशक्तितः शुचिःशुद्धेनमनसाब्राह्मणेभ्योददौवणिक् भार्ययावार्यमाणोपिकुटुंबासक्तचित्तया तावत्तस्यौस्थिरेसत्वेमत्वासर्वंविनश्वरं धर्मासक्तमतिःपार्थकालेनबहुनाततः जगामपंचत्वमसौवासुदेवमनुस्मरन् ततःसक्षत्रियोजातःकुशवत्यांयुधिष्ठिर बभूवचाक्षयातस्यसमृद्धिर्धर्मसंयुता ईजेसचमहायज्ञैःसमाप्तवरदक्षि

णैः सददौगोहिरण्यानिदानान्यन्यान्यहर्निशम् बुभुजेकामतोभोगान् दीनांधांस्तर्पयञ्छनैः तथाप्यक्षयमेवास्यांक्षयंयातिनतद्धनम् अन्यासु
वैंतृतीयायांयद्दत्तंविभवंविना इत्येतच्चसमाख्यातंश्रूयतामत्रयोविधिः तृतीयायांसमाख्यातःस्नात्वासंतर्प्यदेवताः एकभक्तंतदाकुर्याद्वासु
देवंप्रपूजयेत् तस्यांकार्योयवैर्होमोयवैर्विष्णुंसमर्चयेत् यवान्दद्याद्द्विजातिभ्यः प्रयतःप्रार्थयेद्द्विजान् उदकुंभान्सकरकान् सान्नान्सर्व
रसैःसह यवगोधूमचणकान् सक्तुदध्योदनंतथा ग्रैष्मकंसर्वमेवात्रसम्यक्दानेप्रशस्यते तृतीयायांतु वैशाखेरोहिण्यृक्षेप्रपूज्यच उद
कुंभप्रदानेनशिवलोकेमहीयते तत्रमंत्रः एषधर्मघटोदत्तोब्रह्मविष्णुशिवात्मकः अस्यप्रदानात्तृप्यंतुपितरोपिपितामहाः गंधोदक
तिलैर्मिश्रंसान्नंकुंभंसदक्षिणम् पितृभ्यःसंप्रदास्यामिह्यक्षय्यमुपतिष्ठतु छत्रोपानत्प्रदानंचगोभूकांचनवाससाम् यद्यदिष्टंकेशवस्यतद्देयमविशंकया एतत्तेसर्वमाख्यातंकिमन्यच्छ्रोतुमिच्छसि अनाख्येयंनमेकिंचिदस्तिस्वल्पंतुतेनघ नास्यांतिथौक्षयमुपैतिहुतंच
दत्तंतेनाक्षयेतिकथितामुनिभिस्तृतीया उद्दिश्यदैवतपितॄन्क्रियतेमनुष्यैस्तच्चाक्षयंभवतिभारतसर्वमेव इतिश्रीभविष्येअक्षय्यतृ
तीयाव्रतम् अस्यामेवविष्णुधर्मोत्तरेपिउक्तम् वैशाखशुक्लपक्षेतुतृतीयायामुपोषितः रात्रौभुक्तेवत्सरेतुमन्वादिषुयुगादिषु अभिस्व
दृष्टिमंत्रंच अष्टोत्तरशतंजपेत् कृतोपवासाःसलिलंयेयुगादिदिनेषु दास्यंत्यन्नादिसहितंतेषांलोकामहोदयाः अक्षय्यंफलमाप्नोतिसर्वस्यसुकृतस्यचतथासाकृत्तिकोपेताविशेषेणचपूजिता तत्रजप्तंहुतंदत्तंसर्वमक्षय्यमुच्यते अक्षय्यासातिथिस्तस्मात्तस्यांसुकृतमक्षयम् अ
क्षतैःपूज्यतेविष्णुस्तेनसाप्यक्षयास्मृता अक्षतैस्तुनरःस्नातोविष्णोर्दत्वातथाक्षतान् सक्तूंश्चसंस्कृतांश्चैवहुत्वाचभृगुनंदन एकाक्षय्य
तृतीयायांसर्वासांतुफलंलभेत् अत्रैवपरशुरामजयंतीदोलोत्सवश्च हेमाद्रौभविष्ये इतिअक्षय्यतृतीयाव्रतंसंपूर्णं अथज्येष्ठशुक्ल
तृतीयायांरंभाव्रतम् तदुक्तंमाधवीयेभविष्ये कृष्णउवा॰ भद्रेकुरुष्वयत्नेनरंभाख्यंव्रतमुत्तमं ज्येष्ठशुक्लतृतीयायांस्नात्वानियमतत्परा पू
र्वविद्धातिथिर्ग्राह्यातत्रैवव्रतमाचरेत् वृहत्तपातथारंभासावित्रीव्रतपैतृकी कृष्णाष्टमीचभूताचकर्तव्यासंमुखीतिथिः इतिरंभाव्रतनि
र्णयः अथश्रावणशुक्लतृतीयायांमधुस्रवाख्यागुर्जरेषुप्रसिद्धा सापरयुताग्राह्या आचारप्राप्तंश्रावणशुक्लतृतीयायांस्वर्णगौरीव्र

तम् तत्रकर्नाटकदेशेभाद्रपदशुक्लतृतीयायांप्रसिद्धम् तत्रसंकल्पः ममइहजन्मनिजन्मांतरेच्चअक्षय्यसौभाग्यप्राप्तिकामायाःपुत्रपौत्रा
दिधनधान्यैश्वर्यप्राप्त्यर्थंश्रीपरमेश्वरप्रीत्यर्थंस्वर्णगौरीव्रतमहंकरिष्ये तत्रपूजा देविदेविसमागच्छप्रार्थयेहंजगत्पते इमांमयाकृतांपू-
जांगृहाणसुरसत्तमे आवाहनं भवानित्वंमहादेविसर्वसौभाग्यदायके अनेकरत्नसंयुक्तमासनंप्रतिगृह्यताम् आसनं सुचारुशीत
लंदिव्यंनानागंधसुवासितं पाद्यंगृहाणदेवेशिमहादेविनमोस्तुते पाद्यं श्रीपार्वतिमहाभागेशंकरप्रियवादिनि अर्घ्यंगृहाणकल्याणिभ
र्त्रासहपतिव्रते अर्घ्यं· गंगातोयंसमानीतंसुवर्णकलशेस्थितम् आचम्यतांमहाभागेभद्रेणसहितेनघे आचमनं· गंगासरस्वतीरेवाकावेरी
नर्मदाजलैः स्नापितासिमयादेवितथाशांतिंकुरुष्वमे स्नानं· सर्वभूषाधिकेसौम्येलोकलज्जानिवारणे मयोपपादितेतुभ्यंवाससीप्रतिगृह्य
ताम् वस्त्रं· कंचुकीं· आचमनीयं· कर्पूरकुंकुमैर्युक्तंहरिद्रादिसमन्वितम् कस्तूरिकासमायुक्तंचंदनंप्रतिगृह्यतां चंदनं हरिद्राकुंकुमंचैवसिं
दूरंकज्जलंतथा सौभाग्यद्रव्यसंयुक्तंगृहाणपरमेश्वरि सौभाग्यद्रव्यं· माल्यादीनीनिपुष्पं· देवद्रुमरसोद्भूतःकालागरुसमन्वितः आघ्रेयता
मयंधूपोभवानीघ्राणतर्पणः धूपं· आज्यंचेतिदीपं· अन्नंचतुर्विधंस्वादुरसैःषड्भिःसमन्वितं भक्ष्यभोज्यसमायुक्तंनैवेद्यंप्रतिगृह्यताम् नै
वेद्यं· आचमनं· कर्पूरेलालवंगादितांबूलीदलसंयुतम् क्रमुकादिफलंचैवतांबूलंप्रतिगृह्यतां तांबूलं· इदंफलंमयादेविस्थापितंपुरतस्त
व तेनमेसफलावाप्तिर्भवेज्जन्मनिजन्मनि फलं· हिरण्यगर्भेतिदक्षिणा नीराजनं नमस्कारः प्रदक्षिणापुष्पांजलिः पुत्रान्देहिधनंदेहि
सौभाग्यंदेहिसुव्रते अन्यांश्चसर्वकामांश्चदेहिदेविनमोस्तुते इतिप्रार्थना भवान्याश्चमहादेव्याव्रतसंपूर्णहेतवे प्रीतयेद्विजवर्यायवा
णकंप्रददाम्यहं स्वलंकृताःसुवासिन्यःपातिव्रत्येनभूषिताः ममकामसमृद्ध्यर्थंप्रतिगृण्हंतुभूषिताः इतिस्वर्णगौरीपूजा

अथकथा पुराकैलासशिखरेसिद्धगंधर्वसेविते उमयासहितःस्कंदः प्रपच्छशिवमव्ययम् स्कंदउवा॰ करुणासागरे
शानलोकानांहितकाम्यया व्रतंकथयदेवेशपुत्रपौत्रप्रवर्द्धनम् शंकरउवा॰ साधुपृष्टंमहाभागकथयामिषडानन स्वर्णगौरीव्रतंनामसर्वसंपत्क
रंनृणाम् पुरासरस्वतीतीरेविमलाख्यामहापुरी तत्रचंद्रप्रभोनामराजाभूद्धनदोपमः महादेवीविशालाक्ष्यौभार्येबालमृगेक्षणे तयोःप्रियतरा

ज्येष्ठातस्यासीन्नृपतेर्मता सकदाचिद्वनंभेजेमृगयासक्तमानसः तत्रशार्दूलवाराहवनमाहिषकुंजरान् हत्वाबभ्रामतृष्णार्तोसरसीविग्रहंम
हन् चकोरचक्रकारंडखंजरीकशताकुलम् उत्फुल्लकल्हकोदामकुमुदोत्पलमंडितम् अपूर्वमवनीशोसौददर्शाप्सरसांगणम् समासाद्यस
रस्तीरंपीत्वाजलमनुत्तमम् भक्त्यागौरीमर्चयंतंददर्शाप्सरसांगणं किमेतदितिपप्रच्छराजाराजीवलोचनः स्वर्णगौरीव्रतमिदंक्रियतेस्माभिरुत्तमम् सर्वसंपत्करंनृणांतत्कुरुष्वनृपोत्तम राजोवाच विधानंकीदृशंब्रूतकिंफलंव्रतचारणात् ताऊचुर्योषितःसर्वानभेमासितृतीय
के प्रारब्धव्यंव्रतमिदंगौर्याः षोडशवत्सरान् तच्छ्रुत्वासोपिजग्राहव्रतंनियतमानसः गुणैःषोडशसंयुक्तंदोरकंदक्षिणेकरे बबंधानेनमंत्रेणक
रिष्येहंव्रतंनव ततःकृत्वाव्रतंदेव्याअगमन्निजमंदिरे विशालाक्ष्यास्ततोदृष्टोराजागौर्याःप्रपूजकः बद्धंतंदोरकंहस्तेदृष्ट्वाचपतिकोपना त्रुटि
त्वासाचनिक्षेपबाह्यशुष्कतरूपरि नकर्तव्यनकर्तव्यमितिराजावदत्सापि तेनसंस्पृष्टमात्रेणतरुःपल्लवतांगतः तद्द्वितीयास्ततोदृष्ट्वाविस्म
याल्लज्जिताभवत् तन्मूलेदोरकंछिन्नंगृहीत्वासाबबंधह ततस्तद्व्रतमाहात्म्यात्पतिप्रियतराभवत् देवीव्रतापचारेणसात्यक्तादुःखितावनेप्र
ययौसामहादेवींध्यायंतीनित्यमन्विता मुनीनामाश्रमेपुण्येनिवसंतीत्यपिक्वचित् निवारितामुनिवरैर्गच्छपापेयथासुखम् धावंतीविपिनंघो
रं गणाध्यक्षंददर्शह तेनदृष्टापिसागौरीरक्षाम्यहमुपोषिताम् ततोददर्शाग्रतरुंगच्छंतीचसरोवरं ततोवनश्रियंचाग्रेसर्वाभरणभूषिता
पश्यंतीशनकैस्तद्वद्व्रजंतीचैवमानुषी नैस्तैर्निरीकृतादृष्ट्वानिर्विण्णानिषसादह ततस्तत्कृपयागौरीप्रादुरासीन्महासती तांदृष्ट्वादंडवद्भूमौन
त्वास्तुत्वानृपप्रिया जयदेविनमस्तुभ्यंजयभक्तवरप्रिये जयशंकरसर्वांगेमंगलेसर्वमंगले ततोलब्ध्वावरंभक्त्यागौरीमभ्यर्च्यतद्व्रतं चक्रेदेवीपदंतस्यैददौसौभाग्यसंपदः इतितस्याःप्रसादेनसर्वान्भोगानवाप्यच अंतेशिवपुरंप्राप्तःकांताभिःसहितोनृपः यश्चोभनंव्रतमिदंक
थितंशिवायाःकुर्यान्ममप्रियतरोभविताचगौर्याः प्राप्यश्रियःसमविकुंभविशत्रुसर्वान्निर्जित्यनिर्मलपदंसहसाप्रयाति इतिश्रीस्कं
दपुराणेगौरीखंडेस्वर्णगौरीव्रतकथा अथोद्यापनं युधिष्ठिरउवाच उद्यापनविधिंब्रूहितृतीयायाःसुरेश्वर भक्तितःश्रोतुमिच्छा
मिव्रतसंपूर्तिहेतवे कृष्णउवाच उद्यापनविधिंवक्ष्येसावधानेनवैशृणु त्रिंशद्दंडप्रमाणेनप्रमितंदक्षिणोत्तरे प्रत्यक्प्रागपिराजेंद्र

वगोचर्ममिष्यते गोचर्ममात्रंसंलिप्यगोमयेनविचक्षणः मंडपंकारयेत्तत्रनानावर्णसुशोभनं ग्रहमंडलपार्श्वेतुपद्ममष्टदलंलिखेत् तन्मध्येस्थापयेत्कुंभमव्रणंमृन्मयंशुभम् ताम्रपात्रंप्रकुर्वीतपलैःषोडशभिस्तथा तदर्धार्धेनवाकुर्याद्वित्तशाठ्यंविवर्जयेत् कर्षमात्रसुवर्णेनप्रतिमांकारयेद्बुधः तदर्धमध्यमंप्रोक्तंतदर्धंतुकनिष्ठकम् कृत्वारूपंप्रयत्नेनपार्वत्याश्चहरस्यच अथताम्रमयेपात्रेप्रतिमांतत्रविन्यसेत् श्वेतवस्त्रयुगच्छन्नंश्वेतयज्ञोपवीतिनम् भाजनंचतिलैःपूर्णंकलशोपरिविन्यसेत् पार्वत्यारक्तयुगंदद्यात्स्थापयित्वाविधानतः वेदोक्तेनप्रतिष्ठाचकर्तव्यातुयथाविधि पंचामृतेनस्नपनंकृत्वादेवस्यचोत्तमम् स्नानंचकारयेत्पश्चात्ततःपूजांसमाचरेत् चंदनेनसुगंधेनसुपुष्पैश्चप्रपूजयेत् धूपंचकल्पयेद्गंधंचंदनागरुसंयुतं नानाप्रकारैर्नैवेद्यंतथादीपंचकारयेत् अर्च्चयेत्पूजयेद्भक्त्यागंधपुष्पैःफलाक्षतैः आवाहनादिकर्तव्यंपुराणांगसमुद्भवैः कार्याविधानतःपूजाभक्तिश्रद्धासमन्वितः देवदेवसमागच्छप्रार्थयेहंजगत्पते इमांमयाकृतांपूजांगृहाणसुरसत्तम एवंपूजाप्रकर्तव्यारात्रौजागरणंततः गीतनृत्यादिसंयुक्तंकथाश्रवणपूर्वकम् अर्च्चयेत्पूर्ववद्देवंपश्चाद्धोमंसमाचरेत् स्वगृह्योक्तविधानेनकृत्वाग्निस्थापनंततः प्रारभेत्ततोहोमंनवग्रहपुरस्सरम् तिलांश्चयवसंमिश्रानाज्येनचपरिप्लुतान् संकर्षणेनमंत्रेणगौरीमंत्रेणवाशिवम् एवंसमाप्यहोमंतुतत्राचार्यंप्रपूजयेत् अर्घ्यपुष्पप्रदानैश्चवस्त्रालंकारभूषणैः शक्त्यासदक्षिणांदद्यात्प्रचारैर्गोधिकांमतां धेनुंसदक्षिणांदत्त्वासुशीलांचपयस्विनीम् स्वर्णशृंगींरौप्यखुरांकांस्यदोहनसंयुताम् रत्नपुच्छांवस्त्रयुतांताम्रपृष्ठीमलंकृताम् सवत्सामव्रणांभद्रांधेनुंदद्यात्प्रयत्नतः सुवर्णेनसमोपेतामाचार्यायचसाधवे षोडशभिःप्रकारैश्चपक्वान्नैःप्रीणयेत्सदा षोडशप्रमितैर्दद्याद्ब्राह्मणेषुप्रयत्नतः वंशपात्रस्थितैःपश्चात्पक्वान्नवायनैःशुभैः अन्येभ्योब्राह्मणेभ्यश्चदक्षिणांचप्रयत्नतः बंधुभिःसहभुंजीतनियतश्चपरेहनि एवंकृताभवेत्पार्थपरिपूर्णव्रतीयतः इतिश्रीस्कंदपुराणेस्वर्णगौरीव्रतोद्यापनम् अथसुकृततृतीयाश्रावणशुक्लतृतीयायांसुकृतव्रतम् सामध्याह्नव्यापिनीग्राह्या शौनकउवा॰ सर्वकामप्रदानानिव्रतानिकथितानिवै व्रतंकथययत्नेनयेनश्रेयोहमाप्नुयाम् सूतउवाच साधुसाधुमहाभागलोकानांहितकारक कथयामिव्रतंदिव्यं-

योषितांफलदायकम् कृष्णस्यावरजासाध्वीसुभद्रानामविश्रुता रूपलावण्यसंपन्नासुभगाचारुहासिनी गांडीवधन्वनश्चासौयोषितान्चवरप्रिया त्रैलोक्याधिपतिःकृष्णस्तस्याहंभगिनीप्रिया इतिगर्वसमाविष्टानकिंचिदकरोच्छुभम् कालोपियस्यआज्ञांवैशिरसाधारयत्सदा समेभ्रातासखाकृष्णोदनुजानांनिकृंतनः इतिसंचिंत्यमनसिनकिंचित्साकरोत्तदा सर्वज्ञानंतदातेनदेवदेवेनशार्ङ्गिणा इतिसंचिंत्यमनसिभ्रातृत्वान्ममगौरवात् भवाब्धितारणंकिंचिन्मूढत्वान्नकरिष्यति ध्यात्वामुहूर्तंमनसिश्रीकृष्णोभक्तवत्सलः सुभद्रानिकटेगत्वावचनंचेदमब्रवीत् परलोकजिगीषार्थेनकिंचिदपितेकृतम् व्रतंकुरुष्वमनसासर्वान्कामानवाप्स्यसि सुकृतंतारकंलोकेलोकानांहितकारकम् यत्कृत्वासर्वपापेभ्योमुच्यतेनात्रसंशयः भुक्तिमुक्तिप्रदंचापिसर्वसौभाग्यदायकम् व्रतंकुरुष्वचाद्यैवसुकृतस्यफलाप्तये कालोहंसर्वलोकेषुवृक्षरूपेणसंस्थितः धर्मस्तस्यचमूलंहि ऋतवःस्कंधएवच मासाद्वादशसंख्याकाश्चोपशाखाह्यनुक्रमात् षष्ट्याधिकंचत्रिशतंफलानिसमजायत पर्णानिघटिकाःप्रोक्ताकालोहंवृक्षरूपकः तस्मात्फलानांप्राप्त्यर्थंव्रतंकुरुष्वशोभने नभसिमासेसंप्राप्तेशुक्लपक्षेचभामिनि तृतीयाहस्तसंयुक्ताव्रतंकार्यमिदंशुभम् प्रातश्चैवसमुत्थायदंतधावनपूर्वकम् स्नानंकुर्याद्यथान्यायंहरिद्राभिःसमन्वितम् मध्यान्हेचैवसंप्राप्तेकृत्वागोमयमंडलम् चतुर्द्वारेणसहितंमंडपंतत्रकारयेत् वेदिंविरच्यधवलांहस्तमात्रांविशेषतः तन्मध्येष्टदलंपद्ममक्षतैःपरिकल्पयेत् पीठेमांचोपरिस्थाप्यक्षीराब्धितनयासह उपचारैःषोडशभिःपूजयेद्भक्तिसंयुतः षष्ट्याधिकंचत्रिशतंसुकृतस्यफलानिवै गोधूमस्यचूर्णफलंशर्कराभिःसमन्वितम् औदुंबरस्यवृक्षस्यफलाकारंचकारयेत् वेणुपात्रेचसंस्थाप्यवाणकंचद्विजातये सहिरण्यंसतांबूलंदद्याच्चैवयथाविधि वायनमंत्रः पुत्रपौत्रसमृद्ध्यर्थंसौभाग्यावाप्तयेतथा वाणकंवैप्रदास्यामिव्रतसंपूर्तिहेतवे पिष्टस्यचफलानांवैपायसंपरिकल्पयेत् भ्रातृस्वरूपिणंमांचभोजयित्वायथाविधि इतिकृत्वाचविधिवत्समाप्यचततःपरम् तृतीयेवत्सरेप्राप्तेउद्यापनविधिंचरेत् आचार्यंवरयेद्भक्त्यावेदवेदांगपारगम् सुशीलंसर्वधर्मज्ञंशांतंदांतंकुटुंबिनम् स्वस्तिवाच्यद्विजैःसाकंनांदीश्राद्धंविधायच हैमींचप्रतिमांकुर्यान्निष्कनिष्कार्धसंख्यया क्षीराब्धितनयासाकंमांप्रतिष्ठाप्यभक्तितः नवीनंकलशंताम्रंपिधानेनसमन्वित

म् पल्लवैश्चहिरण्यैश्चवस्त्रयुग्मेनवेष्टितम् तन्मध्येमांप्रतिष्ठाप्यउपचारैःप्रपूजयेत् ततःपुष्पांजलिंदद्यात्समाप्यचततःपुनः वाणकंहि
मद्द्याच्चव्रतसंपूर्तिहेतवे लक्ष्मीनारायणोदेवोद्यस्मात्संसारसागरात् रक्षेद्वैसकलात्तापादिहसर्वंददातुमे अच्युतःप्रतिगृण्हातिअच्यु
तोवैददातिच अच्युतस्तारकोभाभ्यामच्युतायनमोनमः रात्रौजागरणंकुर्याद्गीतवादित्रमंगलैः पुराणश्रवणेनैवरात्रिशेषंततोनयेत् प्रभा
तेविमलेस्नात्वानित्यकर्मसमाप्यच विष्णोर्नुकंसक्रुमिवहोममंत्रद्वयंस्मृतं अष्टाधिकद्विशतंचतिलैर्होमंतुकारयेत् कलशंप्रतिमायुक्त-
माचार्यायनिवेदयेत् गांदद्यात्कपिलांचैवसालंकारांसदक्षिणाम् आचार्यंपूजयेद्भक्त्यावस्त्रैराभरणैरपि ब्राह्मणान्भोजयेत्पश्चा
च्चतुर्विंशतिसंख्यकान् आशिषोवैगृहीत्वाथस्वयंभुंजीतभक्तितः इतितस्यवचःश्रुत्वातत्सर्वंहिचकारसा भुक्त्वाभोगान्यथा
कामंतेस्वर्गंजगामसा इतिश्रीभविष्योत्तरपुराणेसुकृतव्रतोद्यापनम् अथभाद्रपदशुक्लतृतीयायांशिष्टपरिगृहीतंहरितालि
काव्रतम् तच्चपरविद्धायाकार्यंमुहूर्तमात्रसत्वेपिदिनेगौरीव्रतंपरेइतिमाधवोक्तेः हरितालिकाव्रतसत्वेपुरस्कारेणापिपरविद्धाग्र
हणवचनाद्दिवोदासीयेउदाहृतत्वाच्च तत्रव्रतविधिः भाद्रपदशुक्लतृतीयायांप्रातस्तिलामलककल्केनस्नात्वापट्टवस्त्रंपरिधाय
मासपक्षाद्युल्लिख्यममसमस्तपापक्षयपूर्वकसप्तजन्मराज्यअखंडितसौभाग्यादिविवृद्धये उमामहेश्वरप्रीत्यर्थंहरितालिकाव्र
तमहंकरिष्ये तत्रादौगणपतिपूजनंकरिष्ये गौरीयुक्तंमहेश्वरंपूजयेत् अथपूजा पीतकौशेयवसनांहेमाभांकमलासनां भक्ता
नांवरदांनित्यंपार्वतींचिंतयाम्यहम् मंदारमालाकुलितालकायैकपालमालांकितशेखराय दिव्यंबरायैचदिगंबरायनमःशिवायैचनमः
शिवाय उमामहेश्वराभ्यांनमः ध्यायामि देवदेवसमागच्छप्रार्थयेहंजगन्मये इमांमयाकृतांपूजांगृहाणसुरसत्तम उमामहेश्वराभ्यां
नमः आवाहनं भवानित्वंमहादेविसर्वसौभाग्यदायिके अनेकरत्नसंयुक्तमासनंप्रतिगृह्यताम् आसनं सुचारुशीतलंदिव्यंनाना
गंधसमन्वितम् पाद्यंगृहाणदेवेशिमहादेविनमोस्तुते पाद्यं श्रीपार्वतिमहाभागेशंकरप्रियवादिनि अर्घ्यंगृहाणकल्याणिभर्त्रा
सहपतिव्रते अर्घ्यं गंगाजलंसमानीतंसुवर्णकलशेस्थितम् आचम्यतांमहाभागेरुद्रेणसहितेनघे आचमनं गंगासरस्वतीरेवा

पयोष्णीनर्मदाजलैः स्नापितासिमयादेवितथाशांतिंकुरुष्वमे स्नानं· पयोदधिघृतंचैवशर्करामधुसंयुतम् पंचामृतेनस्नपनंप्रीत्यर्थंप्रति
गृह्यतां पंचामृतस्नानं· किरणाधूतपापाचपुण्यतोयासरस्वती मणिकर्णिजलंशुद्धंस्नानार्थंप्रतिगृह्यताम् स्नानं· सर्वभूषाधि· वस्त्रं·
उपवीतं· कंचुकीसुपवस्त्रंचनानारत्नैःसमन्वितम् गृहाणत्वंमयादत्तंपार्वतीचनमोस्तुते कंचुकीं· कुंकुमागरुकर्पूरंचंदनंकस्तूरीयु
तं विलेपनंमहादेविगंधंदास्यामिभक्तितः गंधं· रंजिताःकुंकुमौघेनअक्षताश्चातिशोभनाः भक्त्यासमर्पितास्तुभ्यंप्रसन्नाभवपार्व
ति अक्षतान् हरिद्राकुंकुमंचैवसिंदूरंकज्जलान्वितम् सौभाग्यद्रव्यसंयुक्तंगृहाणपरमेश्वरि सौभाग्यद्रव्याणि सेवंतिकाब
कुलचंपकपाटलाब्जैःपुन्नागजातिकरवीररसालपुष्पैः बिल्वप्रवाल तुलसीदलमालतीभिस्त्वांपूजयामिजगदीश्वरिमेप्रसीद पुष्पं·
अथांगपूजा उमायैनमः पादौपूजयामि गौर्यैनमः जंघे· पार्वत्यैनमः जानुनी· जगद्धात्र्यै· ऊरू· जगत्प्रतिष्ठायै· कटी· शांतिरूपिण्यै· नाभिं· देव्यै· उद
रं· लोकवंदितायै· स्तनौ· काल्यैन· कंठंपू· शिवायै· मुखं· भवान्यै· नेत्रे· रुद्राण्यै· कर्णौपू· शर्वाण्यै· ललाटंपू· मंगलदात्र्यै· शिरःपू· देवद्रुमरसोद्भूतः कृ
ष्णागरुसमन्वितः आनीतोयंमयाधूपोभवानिप्रतिगृह्यताम् धूपं· त्वंज्योतिः सर्वदेवानांतेजसांतेजउत्तमम् आत्मज्योतिःपरंधामदीपोयंप्रतिगृह्यतां
दीपं· अन्नंचतुर्विधंस्वादुरसैःषड्भिःसमन्वितं भक्ष्यभोज्यसमायुक्तंनैवेद्यंप्रतिगृह्यतां नैवेद्यं· आचमनी· मलयाचलसंभूतंकर्पूरेणसमन्वित
म् करोद्वर्तनकंचारुगृह्यतांजगतःपते करोद्वर्तनं· इदंफलंमयादेविस्थापितंपुरतस्तव तेनमेसफलावाप्तिर्भवेज्जन्मनिजन्मनि फलं· पूगीफ
लंमहद्दिव्यंनागवल्यादलैर्युतं कर्पूरैलासमायुक्तंतांबूलंप्रतिगृह्यताम् तांबूलं· हिरण्यगर्भगर्भस्थंहेमबीजंविभावसोः अनंतपुण्यफलदमतः
शांतिंप्रयच्छमे दक्षिणां· वज्रमाणिक्यवैडूर्यमुक्ताविद्रुममंडितम् पुष्परागसमायुक्तभूषणंप्रतिगृह्यतां भूषणं· चंद्रादित्यौचधरणी-
विद्युदग्निस्तथैवच त्वमेवसर्वज्योतींषिआर्तिक्यंप्रतिगृह्यतां नीराजनं· अथनामपूजा उमायैनमः गौर्यै· पार्वत्यै· जगद्धात्र्यै· जगत्प्र
तिष्ठायै· शांतिरूपिण्यै· हराय· महेश्वराय· शंभवेन· शूलपाणये· पिनाकधृषे· शिवायै· पशुपतये· महादेवाय· पुष्पांजलिं· यानिकानिचपा
पानिब्रह्महत्यासमानिचेति· प्रदक्षिणां· अन्यथाशरणंनास्तित्वमेवशरणंमम तस्मात्कारुण्यभावेनक्षमस्वपरमेश्वरि नमस्कारः

पुत्रान्देहि धनंदेहि सौभाग्यंदेहिसुव्रते अन्यांश्चसर्वकामांश्चदेहिदेविनमोस्तुते इतिप्रार्थना ततोवैणवपात्राणिसौभाग्यद्रव्यसहितानिवायनानिदद्यात् अन्नंसुवर्णपात्रस्थंसवस्त्रफलदक्षिणम् वायनंगौरिविप्रायददामिप्रीतयेतव सौभाग्यारोग्यकामायसर्वसंपत्समृध्ये गौरीगौरीशतुष्ट्यर्थंवायनंतेददाम्यहमितिमंत्राभ्यांवायनं तस्मिन्नहनिकर्तव्यंपूजनंरजनीमुखे अर्द्धरात्रेउमाकांतेअर्चनंजागरंचरेत्

इतिपूजा अथकथा सूतउवाच मंदारमालाकुलितालकायैकपालमालांकितशेखराय दिव्यंबरायैचदिगंबरायनमःशिवायैचनमःशिवाय १ कैलासशिखरेरम्येगौरीपृच्छतिशंकरम् गुह्याद्गुह्यतरंगुह्यकथयस्वमहेश्वर सर्वेषांसर्वधर्माणामल्पायासंमहत्फलम् प्रसन्नोसियदानाथतथ्यंब्रूहिममाग्रतः केनत्वंहिमयाप्राप्तस्तपोदानव्रतादिना अनादिमध्यनिधनोभर्त्ताचैकजगत्प्रभुः ईश्वरउवा॰ शृणुदेविप्रवक्ष्यामितवाग्रेव्रतमुत्तमम् यद्गोप्यंममसर्वस्वंकथयामितवप्रिये यथाचोडुगणेचंद्रोग्रहाणांभानुरेवच वर्णानांचयथाविप्रोदेवानांविष्णुरेवच नदीनांचयथागंगापुराणानांचभारतम् वेदानांचयथासामइंद्रियाणांमनोयथा पुराणंवेदसर्वस्वमागमेनयथोदितम् एकाग्रेणशृणुष्वैतद्यथादृष्टंपुरातनम् येनव्रतप्रभावेनप्राप्तमर्धासनंमम तत्सर्वंकथयिष्येहंत्वंममप्रेयसीयतः भाद्रेमासिसितेपक्षेतृतीयाहस्तसंयुता तदनुष्ठानमात्रेणसर्वपापैःप्रमुच्यते शृणुदेवित्वयापूर्वंयद्व्रतंचरितंमहत् तत्सर्वंकथयिष्यामियथादृत्तंहिमालये पार्वत्युवाच कथंवृत्तंमयानाथव्रतानामुत्तमंव्रतं तत्सर्वंश्रोतुमिच्छामित्वत्सकाशान्महेश्वर शिवउवा॰ अस्तितत्रमहान्दिव्योहिमवान्नगउत्तमः नानाभूमिसमाकीर्णोनानाद्रुमसमाकुलः नानापक्षिसमायुक्तोनानामृगविचित्रकः यत्रदेवाःसगंधर्वाःसिद्धचारणगुह्यकाः विचरंतिसदाहृष्टागंधर्वागीततत्पराः स्फटिकैःकांचनैःशृंगैर्मणिवैडूर्यभूषितैः भुजैर्लिखन्निवाकाशंसुहृदोमंदिरंयथा हिमेनपूरितंनित्यंगंगाध्वनिनिनादितः पार्वतित्वंयथाबाल्येपरमाचरतीतपः अब्दद्वादशकंदेविधूम्रपानमधोमुखी संवत्सरचतुःषष्टीपक्वपर्णाशनंकृतम् माघमासेजलेमग्नावैशाखेचाग्निसेवनम् श्रावणेचबहिर्वासअन्नपानविवर्जिता दृष्ट्वातातेनतत्कष्टंचिंतयादुःखितोभवत् कस्मैदेयामयाकन्याएवंचिंतातुरोभवत् तदैवावसरेप्राप्तोब्रह्मपुत्रस्तुधर्मवित् नारदोमुनिशार्दूलःशैलपुत्रीदिदृक्षया दत्वार्घ्यंविष्टरंपाद्यंनारदंप्रोक्तवान्गि

रिः हिमवानुवाच किमर्थमागतःस्वामिन्वदस्वमुनिसत्तम महद्भाग्येनसंप्राप्तंत्वदागमनमुत्तमम् नारदउवाच शृणुशैलेंद्रमद्वाक्यंवि-
ष्णुनाप्रेषितोस्म्यहम् योग्यंयोग्यायदातव्यंकन्यारत्नमिदंत्वया वासुदेवसमोनास्तिब्रह्मविष्णुशिवादिषु तस्मैदेयात्वयाकन्याअत्रार्थेसंम
तंमम हिमवानु० वासुदेवःस्वयंदेवःकन्यांप्रार्थयतेयदि तदामयाप्रदातव्यात्वदागमनगौरवात् इत्येवंगदितंश्रुत्वानभस्यांतर्दधेमुनिः ययौ-
पीतांबरधरंशंखचक्रगदाधरम् कृतांजलिपुटोभूत्वामुनींद्रस्तमभाषत नारदउवा० शृणुदेवभवत्कार्यंविवाहोनिश्चितस्तव हिमवांस्तु
तदागौरीमुवाचवचनंमुदा दत्तासित्वंमयापुत्रीदेवायगरुडध्वजे श्रुत्वावाक्यंपितुर्देवीगताचसखिमंदिरम् भूमौपतित्वासादेवीविललापा
तिदुःखिता विलपंतींतदादृष्ट्वासखीवचनमब्रवीत् सख्युवाच किमर्थंदुःखितादेविकथयस्वममाग्रतः यद्भवत्याभिलषितंकरिष्येहं
नसंशयः पार्वत्युवाच सखिशृणुममप्रीत्यामनोभिलषितंमया महादेवंचभर्त्तारंकरिष्येहंनसंशयः एतन्मेचिंतितंकार्यंतातेनकृतमन्य
था तस्माद्देहपरित्यागंकरिष्येहंसखिप्रिये पार्वत्यावचनंश्रुत्वासखीवचनमब्रवीत् सख्युवाच पितायत्रनजानातिगमिष्यामोहितद्व
नम् इत्येवंसंमतंकृत्वानीतासित्वंमहद्वनं पितानिरीक्षयामासहिमवांस्तुगृहेगृहे केननीतासिमेपुत्रीदेवदानवकिन्नरैः नारदाग्रेकृतंसत्यं
किंदास्येगरुडध्वजे इत्येवंचिंतयाविष्टोमूर्छितोनिपपातह हाहाकृत्वाप्रधावंतिलोकास्तेगिरिपुंगवम् ऊचुर्गिरिवरंसर्वेमूर्छाहेतुंगिरेवद गि
रिरुवाच दुःखस्यहेतुंशृणुतकन्यारत्नंहृतंमम दष्टावाकालसर्पेणसिंहव्याघ्रेणवाहृता नजानेक्वगतापुत्रीकेनदुष्टेनवाहृता चकंपेशोक
संतप्तोवातेनेवमहातरुः गिरिर्वनाद्वनंयातस्त्वदालोकनकारणात् सिंहव्याघ्रैश्चभल्लैश्चरोहिभिश्चमहावनं त्वंचापिविपिनेघोरेव्रजंतीस-
खिभिःसह तत्रदृष्ट्वानदींरम्यांतत्तीरेचमहागुहां तांप्रविश्यसखीसार्द्धमन्नभोगविवर्जिता संस्थाप्यवालुकालिंगंपार्वत्यासहितंमम भा
द्रशुक्लतृतीयायांअर्चयंतीतुहस्तभे तत्रवाद्येनगीतेनरात्रौजागरणंकृतम् व्रतराजप्रभावेन आसनंचलितंमम संप्राप्तोहंतदातत्रयत्रत्वं
सखिभिःसह प्रसन्नोस्मिमयाप्रोक्तंवरंब्रूहिवरानने पार्वत्युवाच यदिदेवप्रसन्नोसिभर्ताभवमहेश्वर तथेत्युक्त्वानुसंप्राप्तःकैलासं ३५
पुनरेवच ततःप्रभातेसंप्राप्तेनद्यांकृत्वाविसर्जनम् पारणंतुकृतंतत्रसख्यासार्द्धंत्वयाशुभे हिमवानपितंदेशमाजगामघनंवनम् चतुरा-

शानिरीक्ष्संरक्तविह्वलःपतितोभुवि दृष्ट्वातत्रनदीतीरे प्रसुप्तंकन्यकाद्वयम् उत्थाप्योत्संगमारोप्यरोदनंकृतवान्गिरिः सिंहव्याघ्राहिभल्लूकैर्वनेदुष्टैकुनःस्थिता पार्वत्युवाच शृणुतातमयाज्ञातंत्वंदास्यसीश्वरायमां तदन्यथाकृतंतात तेनाहंवनमागता ददासितातयदिमामीश्वरायतदागृहं आगमिष्यामिनैवंचेदिहस्थास्यामिनिश्चितम् तथेत्युक्त्वाहिमवतानीतासित्वंगृहंप्रति पश्चाद्दत्तासमस्माकंकृत्वावैवाहिकींक्रियां तेनव्रतप्रभावेनसौभाग्यंसाधितंत्वया अद्यापिव्रतराजस्तुनकस्यापिनिवेदितः नामास्यव्रतराजस्यशृणुदेवियथाभवत् आलिभिर्हृतायस्मात्तस्मात्साहरितालिका देव्युवाच नामेदंकथितंदेवविधिंवदममप्रभो किंपुण्यंकिंफलंचास्यकेनचक्रियतेव्रतं ईश्वरउवा० शृणुदेविविधिंवक्ष्येनारीणांव्रतमीदृशं करिष्यतिप्रयत्नेनयदिसौभाग्यमिच्छति तोरणादिप्रकर्तव्यंकदलीस्तंभमंडितम् आच्छाद्यपट्टवस्त्रैस्तुनानावर्णविचित्रितैः चंदनेनसुगंधेनलेपयेद्गृहमंडपम् शंखभेरीमृदंगैस्तुकारयेद्बहुनिस्वनैः नानामंगलगीतंचकर्तव्यंममसद्मनि स्थापयेद्वालुकालिंगंपार्वत्यासहितंमम पूजयेद्बहुपुष्पैश्चगंधधूपादिभिर्नवैः नानाप्रकारैर्नैवेद्यैः पूजयेज्जागरंचरेत् नारीकेरैःपूगफलैर्जंबीरैर्बहुभिस्तथा बीजपूरैःसनारिंगैःफलैश्चान्यैश्चभूरिशः ऋतुकालोद्भवैर्भूरिप्रकारैःकंदमूलकैः गंधपुष्पैर्धूपदीपैर्मंत्रेणानेनपूजयेत् ॐनमःशिवायशांतायपंचवक्त्रायशूलिने नंदिभृंगिमहाकालगणयुक्तायशंभवे शिवायैहरकांतायैप्रकृत्यैसृष्टिहेतवे शिवायैसर्वमांगल्यैशिवरूपेजगन्मये शिवेकल्याणदेनित्यंशिवरूपेनमोस्तुते शिवरूपेनमस्तुभ्यंशिवायैसततंनमः नमस्तेब्रह्मचारिण्यैजगद्धात्र्यैनमोनमः संसारभयसंतापात्त्राहिमांसिंहवाहिनि येनकामेनदेवित्वंपूजितासिमहेश्वरि राज्यसौभाग्यसंपत्तिंदेहिमामंबपार्वति मंत्रेणानेनदेवित्वांपूजयित्वामयासह कथांश्रुत्वाविधानेनदद्यादन्नंचभूरिशः ब्राह्मणेभ्योयथाशक्त्यादेयावस्त्रहिरण्यगाः अन्येषांभूयसींदेयास्त्रीणांवाभूषणादिकं भर्त्रासहकथांश्रुत्वाभक्तियुक्तेनचेतसा कृत्वाव्रतेश्वरंदेविसर्वपापैःप्रमुच्यते सप्तजन्मभवेद्राज्यंसौभाग्यंचैववर्धते तृतीयायांतुयानारीआहारंकुरुतेयदि सप्तजन्मभवेद्वंध्यावैधव्यंजन्मजन्मनि दारिद्र्यंपुत्रशोकंचकर्कशादुःखभागिनी पच्यतेनरकेघोरेनोपवासंकरोतिया राजतेकांचनेताम्रेवैणवेचाथमृन्मये भाजनेविन्यसेदन्नंसवस्त्रफलदक्षिणं दानंचद्विजवर्यायदद्यादंतेच

यारणं एवंविधिंयाकुरुतेचनारीत्वयासमानारमतेचभर्त्रा भोगाननेकान्भुविभुज्यमानासायुज्यमंतेलभतेहरेण अश्वमेधसहस्राणिवा
जपेयशतानिच कथाश्रवणमात्रेणतत्फलंप्राप्यतेनरैः एतत्तेकथितंदेवितवाग्रेव्रतमुत्तमम् कोटियज्ञकृतंपुण्यमस्यानुष्ठानमात्रतः
इतिश्रीभविष्योत्तरपुराणेहरगौरीसंवादेहरितालिकाव्रतकथासंपूर्णा अथोद्यापनं पार्वत्युवाच उद्यापनविधिंब्रूहितृतीयायाःसु
रेश्वर भक्तितःश्रोतुमिच्छामिव्रतसंपूर्णहेतवे महादेवउवाच उद्यापनविधिंवक्ष्येव्रतराजस्यशोभने यस्यानुष्ठानमात्रेणसंपूर्ण-
हिव्रतंभवेत् चतुस्तंभंचतुर्द्वारंकदलीस्तंभमंडितं घंटिकाचामरयुतंकमलैरुपशोभितं चंदनागरुकर्पूरैर्लेपितंमंडपंशुभं मध्येविता
नंबध्नीयात्पंचवर्णैरलंकृतं तन्मध्येकारयेत्पद्मंपंचवर्णैःसुशोभनैः तस्योपरिन्यसेद्व्रीहीन्द्रोणेनपरिसंमितान् सौवर्णंराजतंताम्रंकल
शंविन्यसेद्बुधः पंचरत्नानिनिक्षिप्यसर्वौषधिसमन्वितम् तस्योपरिन्यसेत्पात्रंसौवर्णंराजतंचवा वृषारूढंमहादेवंरजतेनविनिर्मितम्
सर्वावयवसंयुक्तांगौरींहेम्नाविनिर्मितां पूजयेत्तत्रगंधाद्यैः पुष्पैर्नानाविधैःशुभैः रात्रौजागरणंकुर्यात्कथावाचनपूर्वकम् ततःप्रभातसम
येकृत्वास्नानादिकर्मच पूर्ववच्चार्चयेद्देवंपश्चाद्धोमंसमाचरेत् स्वगृह्योक्तविधानेनकृत्वाग्निस्थापनंततः प्रारभेच्चततोहोमंनवग्रहपुरःसरंति
लांश्चयवसंमिश्रानाज्येनचपरिप्लुतान् जुहुयाद्रुद्रमंत्रेणगौरीमंत्रेणवेदवित् अष्टोत्तरशतंचापिअष्टाविंशतिमेववा एवंसमाप्यहोमंतुतत्राचा
र्यंप्रपूजयेत् सुवर्णरत्नवासोभिर्गांदद्याच्चयथाविधि शय्यांसोपस्करांदद्यादाचार्यायप्रयत्नतः षोडशद्विजयुग्मानिपक्वान्नैश्चसुभोजयेत् सौ
भाग्यद्रव्यवस्त्राणिवंशपात्राणिषोडश दातव्यानिप्रयत्नेनब्राह्मणेभ्योयथाविधि अन्येभ्योद्विजवर्येभ्योदक्षिणांचप्रयत्नतः भूयसींपरया
भक्त्याप्रदद्याच्छिवतुष्टये उद्दिश्यपार्वतीशंचसर्वंकुर्यादतंद्रितः बंधुभिःसहभुंजीतनियतश्चपरेहनि एवंयाकुरुतेनारीव्रतराजंमनोहर
म् सौभाग्यमखिलंतस्याःसप्तजन्मस्वसंशयः इतिश्रीहरितालिकाव्रतोद्यापनंसंपूर्णम् अथाश्विनकृष्णतृतीयायांबृहद्गौरीव्रतम् डो
लीतिदेशभाषायाम् शाखामूलफलैःसहरिंगिणींगृहेआनीयसिकतावेद्यांनिक्षिप्यउदकेनासिच्य चंद्रोदयंदृष्ट्वासुस्नातापंचसखिभिःस
हअलंकृत्यपूजयेत् तद्यथा ममइहजन्मनिजन्मांतरेचाक्षय्यसौभाग्यप्राप्तिकामा पुत्रपौत्रादिधनधान्यैश्वर्यप्राप्त्यर्थंश्रीगौरीप्रीत्यर्थं-

बृहद्गौरीव्रतंकरिष्ये कलशेवरुणंसंपूज्यबृहद्गौरींप्रपूजयेत् चतुर्भुजांशुक्लवर्णाभांनानालंकारभूषितां हिमेंदुतुहिनाभासांमुक्तामणिविभूषिताम् पाशांकुशधरांदेवींध्यायेत्सर्वार्थसिद्धिदां कमंडलुधरांसूक्ष्मांपानपात्रंचबिभ्रतीम् ध्यायामि एहिमातर्विशुद्धेत्वंत्रिगुणेपरमेश्वरि आवाहयामिभक्त्यात्वांप्रसन्नाभवसर्वदा आवाहनं हेमरत्नकृतंदेविआसनंतेविनिर्मितम् पाशांकुशधरांदेवीमासनेस्थापयाम्यहं आसनं· अक्षमालांकुशधरेवीणापुस्तकधारिणि भक्त्यादत्तंमयातोयंपाद्यार्थंप्रतिगृह्यतां पाद्यं अर्घ्यंददामितेमातर्भक्तानामभयंकरे गृहाणत्वंबृहद्गौरिगंधाक्षतसमन्वितम् अर्घ्यं· भक्तानामिष्टदेमातःसर्वालंकारसंयुते आचम्यतांजगन्मातर्बृहद्गौरिनमोस्तुते आचमनं· ततःपंचामृतं· स्नापयामिजगन्मातस्त्वांकृततीर्थजलेनवै प्रार्थयित्वामयादेविसद्यस्तापविनाशनि स्नानं· वस्त्रंधौतंमयादेविदुकूलंतवनिर्मितं भक्त्यासमर्पितंमातर्गृह्यतांजगदंबिके वस्त्रं· हरिद्रांकुंकुमंचैवसिंदूरंकज्जलान्वितम् सौभाग्यद्रव्यसंयुक्तंगृहाणपरमेश्वरि सौभाग्यद्रव्यं· पंचसूत्रनिर्मितंदोरकंअर्पयेत् मलयाचलसंभूतंघनसारंमनोहरं गंधंगृहाणदेवित्वंबृहद्गौरिनमोस्तुते गंधं· करवीरैर्जातिकुसुमैश्चंपकैर्बकुलैःशुभैः शतपत्रैश्चकल्हारै रर्चयेत्परमेश्वरीं पुष्पं· धूपोयंगृह्यतांदेविकालागरुसमन्वितः आघ्रेयःसर्वदेवानांदेवद्रुमरसोद्भवः धूपं· दीपंगृहाणदेवेशित्रैलोक्यतिमिरापहम् वन्हिनायोजितंमातर्बृहद्गौरिनमोनमः दीपं· नैवेद्यंगृह्यतांदेविभक्तिमेह्यचलांकुरु ईप्सितंमेवरंदेहिपरत्रचपरांगतिं नैवेद्यं पानीयं· इदंफलमितिनारीकेलफलं· पूगीफलमितितांबूलं· हिरण्यगर्भेतिदक्षिणा· नीराजनं· पुष्पांजलिः· अथकंठेदोरकंबध्नीयात्धारयिष्यामिभद्रेत्वांत्वद्भक्त्याव्रतपरायणा आयुर्देहियशोदेहिसौभाग्यंदेहिमेशिवे दोरकबंधनम् क्षेमसंपत्करेदेविसर्वसौभाग्यदायिनि सर्वकामप्रदेदेविगृहाणार्घ्यंनमोस्तुते इतिविशेषार्घ्यं ततश्चंद्रार्घ्यं क्षीरोदार्णवसंभूतलक्ष्मीबंधोनिशाकर गृहाणार्घ्यंमयादत्तंरोहिण्यासहितःशशिन् प्रार्थना गगनांगणसंदीपक्षीराब्धिमथनोद्भव भाभासितदिगंतांतरमानुजनमोस्तुते आनीतासिमयादेविपूजितासिमयाशुभे सौभाग्यंममदेहित्वंयत्रस्थातत्रगम्यताम् इतिविसर्जनम् अथकथा विजयोवाच अथान्यच्चबृहद्गौरीव्रतंवक्ष्यामिकन्यके मासिभाद्रपदेकृष्णेतृतीयायांचतद्व्रतं आनयेद्बृहतीं-

गौरींशाखामूलफलैःसह शिंगिणीवृक्षसंमूलं आनयेत् निक्षिप्यगृहवेद्यांतुतदधःसिकतांशुभां न्यसेच्चंद्रोदयं दृष्ट्वास्नात्वाधौतांबरावृता
सखिभिःसहितासम्यक् अलंकृत्यप्रपूजयेत् गौरीमावाह्यविधिवत् सिकतामंडलेशुभे गंधपुष्पाक्षतैर्दिव्यैर्धूपदीपैरनेकशः सर्वोपचारै-
र्बृहतींपंचपंचभिरर्चयेत् एवंपूज्ययथाशक्त्याकृत्वाचैवप्रदक्षिणां बध्नीयाद्दोरकंपश्चात्तंतुपंचकनिर्मितम् बध्नामिदोरकंकंठेत्वद्भक्ता-
त्वत्परायणा आयुर्देहियशोदेहिसौभाग्यंदेहिमेशुभे अनेनदोरकंबध्वाचंद्रायार्घ्यंसमर्पयेत् क्षेमसंपत्करेदेविसर्वसौभाग्यदायिनि सर्व
कामप्रदेदेविगृहाणार्घ्यंनमोस्तुते गगणांगणसंदीपक्षीराब्धिमथनोद्भव भाभासितदिगंतांतसोमराजनमोस्तुते कथामेतांचशृणुयाद्गौ-
र्यग्रेतन्मनाःसदा ततोगोधूमचूर्णेनपंचभिःकुडवैर्युतं पक्वान्नमर्धंविप्रायदत्वाभुंजीतचस्वयं एवंवैपंचवर्षाणिकृत्वाव्रतमनुत्तमम् सर्वान्का
मानवाप्नोतिनात्रकार्याविचारणा ऋषिकन्योवाच केनचादौपुराचीर्णंव्रतमेतत्त्वयोदितं ईप्सितंकोपिलेभेवाव्रतस्यास्यप्रभावतः वि
जयोवाचशृणुकन्येयथाप्रासंपार्वत्याकथितंपुरा सूतउवाच शृणुध्वमृषयःसर्वेनैमिषारण्यवासिनः पुराकृतयुगस्यादौसर्वभूतहितैषि
णा शंभुनाकथितंगौर्यैतद्व्रतंकथयाम्यहम् कदाचिदुपविष्टंतंपार्वतीपर्यपृच्छत पार्वत्युवाच शंभोत्वांप्रष्टुमिच्छामिकरुणाकरशंक
र सर्वबाधोपशमनंसर्वकामफलप्रदं व्रतानांसर्वदानानामुत्तमंब्रूहितत्वतः आयुरारोग्यदंदेवपुत्रपौत्रप्रदायकं एतद्व्रतंब्रूहिदेवयद्यहं-
तववल्लभा ईश्वरउवाच शृणुदेविपरंगुह्यंव्रतंपरमदुर्लभम् पुराभूद्द्वापरस्यांतेपंडोःप्रियवरांगना वर्षषोडशसंपूर्णासंपन्ननवयौव
ना अनपत्यातुसाकुंतीभर्तारमिदमब्रवीत् कुंत्युवाच केनकर्मविपाकेनपुत्रहीनास्मिदुःखिता अनपत्यप्रतीकारमिदानींब्रूहितत्व
तः पंडुरुवाच ऋषिशापोस्तिमेभद्रेयतस्तेनभविष्यति भर्तुस्तद्वचनंश्रुत्वापितृगेहेप्यगात्स्वयम् पितुर्गेहेवर्तमानेकुंतीव्यासंददर्शह नम-
स्कृत्यचतंप्राहकुंतीमुकुलितांजलिः कुंत्युवाच व्रतंमेकथयाशुत्वंपुत्रसंतानकारकं सर्वसंपत्करंनृणांव्रतमेकंमहामुने व्यासउवाच शृ
णुत्वंबृहतीसौम्येव्रतंसंतानदायकं भाद्रकृष्णतृतीयायांनिशिचंद्रोदयेशुभे स्नानंकृत्वाचविधिवत्मौनीभूत्वाव्रतंचरेत् सर्वसंपत्करंचैव-
स्त्रीणांपुत्रान्नसौख्यकृत् भूहिरण्यादिदानानांसर्वेषामधिकंव्रतं पंचवर्षंविधातव्यंततउद्यापनंचरेत् उद्यापनविधानेनसंपूर्णफलमश्नुते

अंतेतु कारयेद्भक्त्या सौवर्णंबृहतीफलं षष्ठ्यक्षरचतुर्भिश्च शुभैर्बीजैर्युतंतुतत् देव्याःपुरस्तसंस्थाप्य पूर्ववत्प्रतिपूजयेत् आचार्यंपूजयेद्भक्त्याविप्रान्यंचतथैवच सुवासिन्यःपंचपूज्यावस्त्रालंकारभूषणैः कंचुकैश्चैवताटंकैःकंठसूत्रैर्हरप्रियाम् वंशपात्राणिपंचैवसूत्रैः संवेष्टितानिच सिंदूरंजीरकंचैवसौभाग्यद्रव्यसंयुतम् गोधूमपिष्टजातंचबृहतीफलपंचकं वायनानिचपंचैवताभ्योदद्यात्तुभोजनं अर्घ्यं दत्वावायनानिदत्वाभुंजीतवाग्यतातत्फलंधारयेत्कंठेसर्वकामसमृद्धये ततःप्रातःसमुत्थायसालंकारासखीजनैः गीतवाद्ययुतानद्यां गौरींतांतुविसर्जयेत् आगच्छवरदेदेविपूजितासिमयाशुभे ममसौभाग्यदानाययथेष्टंगम्यतांत्वया एतद्व्रतप्रभावेन काचिद्ब्राह्मणकन्यका पतिंसंजीवयामासनिर्भर्त्स्ययमकिंकरान् तस्माच्चरत्वंव्रतमेतदाद्यमायुःप्रदंपुत्रसमृद्धिदंच पुत्रैश्चपौत्रैश्चयुताचपत्यागौरीप्रसादाद्भवजीववत्सा यइदंशृणुयान्नित्यंभावयेद्वासमाहितः सभुक्त्वाविपुलान्भोगानंतेशिवपदंव्रजेत् इतिभविष्योत्तरपुराणेबृहद्गौरीव्रतोद्यापनंसंपूर्णम् इदंकर्णाटकेप्रसिद्धम् अथमार्गशीर्षेमाघेवाकृष्णातृतीयायांसौभाग्यसुंदरीव्रतम् तच्चचतुर्थीयुतायांकार्यं नद्वितीयाविद्धायां द्वितीयावेधरहितातृतीयायासिताभवेत् चतुर्थीयोगिनीकिंचित्तशुद्धावापियदाभवेत् नारदउवाच भगवंस्त्वेप्रजाःसृष्टानानावर्णास्तथागुणाः स्वेदजाअंडजाश्चैवउद्भिजाश्चजरायुजाः देवासुराःसगंधर्वाःसयक्षोरगराक्षसाः एकेसुरूपाःसुभगाबलिनश्चापरेतथा तथान्येदुःखसंयुक्ताः काणामूकाश्चपंगवः दुःशीलादुर्भगादीनाःपापकर्मकराःसदा एवंमेहृदिसंतापःसंशयं छेत्तुमर्हसि ब्रह्मोवाच शृणुवत्सप्रवक्ष्यामित्वंभक्तोसिप्रियोसिमे कर्मबीजप्ररूढंहिशरीरंपांचभौतिकं येदत्तदानाजायंतेसुरूपाःसुखिनोजनाः तपःप्रभावाज्जायंतेबलिनःसुभगास्तथा अदत्तदानाजायंतेपरकर्मकराःसदा परापवादवक्तारःपरद्रव्यापहारकाः हंतारःप्राणिनांचैवअभक्ष्याणांचभक्षकाः क्रमशोनरकान्भुक्त्वाजायंतेकुत्सितानराः दारिद्राःपंगवोमूकाःकाणाद्यादुर्भगास्तथा नारदैवंस्वकर्मोत्थानरानार्यश्च दुःखिताः नारदउवाच उपायंब्रूहिभगवन्येनकर्मक्षयोभवेत् तपोदानंव्रतंतीर्थंशरीरस्यचशोषणं दुःखसंतापतप्तानांजीवितान्मरणंवरम् ब्रह्मोवाच शृणुनारदयद्गुह्यंव्रतानामुत्तमंव्रतम् सर्वदुःखप्रशमनंव्याधिदारिद्र्यनाशनं सुखसौभाग्यजननंपुत्रपौत्रप्रदायकं

वसिष्ठायपुराप्रोक्तंऋषीणांचसमागमे कैलासशिखरेरम्येशंकरेणमहात्मना नारदउवाच कस्मात्प्रोवाच भगवान्कृपाकस्माच्चजाय
ते ब्रह्मोवाच दृष्ट्वाद्भुतंचसौभाग्यमरुंधत्याजगत्प्रभुः तथारूपंचशीलंचसौभाग्यमतुलंतया कृत्वाशिरःप्रकंपंचजहाससमृदुशंकरः
पृष्टवान्शंकरंदेवंवसिष्ठःस्मितकारणं ईश्वरउवाच अहोव्रतस्यमाहात्म्यंश्रूयतामृषिसत्तमाः पुराजन्म निषादस्यदासकर्मकरास
दा उच्छिष्टभोजनानित्यंउच्छिष्टशयनासदा कुरूपादुर्भगादीनारुक्षागद्गदभाषिणी नाम्नामेघवतीख्यातादुर्दर्शवदनाशुभा एकदाप्रे
षणार्थंसा गताब्राह्मणसंनिधौ श्रुतंव्रतंचनारीणांवाच्यमानंद्विजन्मना सौभाग्यसुंदरीनामतृतीयासर्वकामदा ज्ञाताचारागमेशास्त्रे
सर्वकामफलप्रदा मयाप्रकाशितंसर्वंप्रार्थितेनोमयातथा चीर्णंतासांप्रसंगाच्चमेघवत्याप्रसंगतः कुत्सितंचैवनैवेद्यंदत्तंदानंचकिंचन
हविष्यंचततोच्छिष्टंपारणंचतथाकृतं केवलंचव्रतंचीर्णंश्रद्धापूतेनचेतसा श्रद्धयाधार्यतेधर्मोबहुभिर्नार्थराशिभिः ऋषयश्चक्रिरेधर्मं
श्रद्धयाभावितात्मना तेनधर्मविपाकेननिषादाधिपतेःसुता सुरूपाचसुशीलाचसर्वलक्षणसंयुता संपूर्णावयवाजातातस्यादेव्याःप्रसाद
तः उच्छिष्टभोजनाज्जातानिषादानांचयोनिषु अदत्तदानात्संजातातपसाभोगवर्जिता व्रतप्रभावात्संजातासुरूपाचपतिव्रता महासौ
भाग्यसंयुक्तासासाक्षाल्लक्ष्मीरिवापरा सर्वकामप्रदादेवीनंदिनीवसतेगृहे तद्व्रतंचास्तिदेवर्षेसर्वकामफलप्रदं नारदउवाच व्र
तस्यास्यविधिंब्रूहिकोविधिःकिंचपूजनं कस्मिन्मासेप्रकर्तव्यंदेवताकाप्रकीर्तिता किंपुण्यंकिंचनैवेद्यंध्यानंकस्यचपूजनं ब्रह्मोवाच
व्रतस्यारंभणंचादौमार्गशीर्षेथमाघके द्वितीयावेधरहितातृतीयायासिताभवेत् चतुर्थीयोगिनीकिंचिच्छुद्धावापियदाभवेत् उपवा
संप्रकुर्वीतदंतधावनपूर्वकम् अपामार्गेणकुर्वीतदंतशुद्धिंतदाव्रती उमेदेविनमस्तुभ्यंशंकरस्यार्द्धधारिणि प्रसीदश्रीमहेशानिकरि
ष्येव्रतमुत्तमम् सान्निध्यंकुरुमेदेविव्रतेस्मिन्हरवल्लभे नियममंत्रः सौभाग्यसुंदरीनामवशिनीसाप्रकीर्तिता सर्वकामप्रदादे
विसर्वसंपच्छंकरी तस्यादर्शनमात्रेणसदासंजायतेजगत् द्रोणपुष्पैश्चसंपूज्यादाडिमंचार्घ्यहेतवे नैवेद्यंमोदकान्दद्यात्कर्पूरंप्रा-
शयेत्ततः वत्सपौषासितेपक्षेतृतीयायांव्रतंभवेत् चेल्लिकादंतकाष्ठंचमरुकेणचपूजनम् राज्यसौभाग्यदानामसुंदरींपूजयेत्ततः

धात्रीफलंतदेवार्घ्यंकंकोलंप्राशयेन्निशि नैवेद्येवटकाःकार्याघृतशर्करयान्विताः कंकोलांबुतयाप्राश्यराज्यसौभाग्यहेतवे घृतेनबोधयेद्दीपंरात्रौजागरणंतथा सर्वकामप्रदादेवीसर्वदुःखहरापरा सर्वैश्वर्यप्रदादेवीसर्वपापहराशुभा एकापिबहुधात्मानंनामरूपप्रभेदतः माघमासेचसंप्राप्तेबदर्यादंतधावनं प्रातःकुर्वीतनियमंरूपसौभाग्यहेतवे अपराण्हेततःस्नात्वासर्वाभरणभूषिता चूतपुष्पैश्चसंपूज्यारूपसौभाग्यसुंदरी नारीकेरार्घ्यदानंचनैवेद्येशष्कुलीस्मृता प्राशनंचैवकस्तूरीरूपसौभाग्यसंयुता पूजयेत्तत्रयासर्वकामसौभाग्यसुंदरीं फाल्गुनस्यसितेपक्षेप्रातर्नियमसंयुता सौभाग्यसुंदरीबिल्वदंतकाष्ठंतुकारयेत् स्नानंकृत्वातथानारी कांचनारैश्चपूजयेत् नैवेद्यंसक्तवस्तत्रघृतशर्करयान्विताः यक्षकर्दमजोलेपोधूपाश्चागरुसंभवाः सर्वासुचतृतीयासुविधिरेषउदाहृतः बीजपूरार्घ्यदानंचप्राशनंचंदनोदकं प्राशनस्यप्रभावेनसर्वान्कामानवाप्नुयात् पारणंचप्रकर्तव्यंसहसर्वैश्चबांधवैः चैत्रेमासिप्रकर्त्तव्यातृतीयापापनाशिनी प्रयत्नेनप्रकर्तव्यासुखसौभाग्यसुंदरी दंतकाष्ठंसमुद्दिष्टंजंबूवृक्षसमुद्भवम् पूजादमनकोनामह्यर्घ्येबिल्वफलंस्मृतं नैवेद्येमंडकाःप्रोक्ताशर्कराघृतसंयुताः सुखसौभाग्यप्राप्त्यर्थंप्राशनंवज्रधारिणः वैशाखस्यसितेपक्षेतृतीयायामुपोषयेत् मालतीदंतकाष्ठंचनियमग्रहणंततः पतिसौभाग्यदांदेवींसुंदरींपूजयेत्ततः पद्मैःसितैःसुरक्तैश्चमल्लिकाभिश्चपूजयेत् दधिभक्तसकर्पूरंशर्कराघृतसंयुतं नैवेद्यंकल्पयेद्देव्याअर्घ्यंचाम्रफलंभवेत् होमोदकंचसंप्राश्यपुष्टिसौभाग्यमाप्नुयात् ज्येष्ठेमासितृतीयायांमुपवासपराभवेत् यूथिकादंतकाष्ठंचलावण्यसुभगार्थिनी मल्लिकाकुसुमैःपूज्यायक्षकर्दमचर्चिता लावण्यसुभगांदेवींसुंदरींपूजयेत्ततः कदलीफलार्घ्यदानंचनैवेद्यंघृतपूरिका मौक्तिकांबुततःपीत्वालावण्यसुभगाभवेत् आषाढेचततोमासिपतिसौभाग्यसुंदरी प्रातरुत्थायकर्तव्यंदंतकाष्ठमशोकजं नियमंतत्रकुर्वीततृतीयायांप्रयत्नतः बिल्वपत्रैःकोमलैश्चपतिसौभाग्यसुंदरी जंबूफलार्घ्यदानंचनैवेद्यंपायसंस्मृतं शर्कराघृतसंयुक्तंसुंदरीप्रीयतांमम विद्रुमांबुनिशिप्राश्यहविषापारणंस्मृतम् सपत्नीनांपुरंनैवसापश्यतिकदाचन श्रावणेमासिसंप्राप्तेतृतीयायामुपोषिता बैल्वंवाबादरंकाष्ठंजातिपुष्पैश्चपूजनं सर्वै

श्वर्यंचसौभाग्यसुंदरींपूजयेत्ततः नैवेद्यंश्वेतपक्वान्नंधूपदीपादिकंतथा कदलीफलार्घ्यदानंचप्राशयेद्राजतंपयः गजाश्वपशुदासीनांहेमरत्नादिवाससां ईश्वरीसर्वलोकानांभगवत्याः प्रसादतः मासिभाद्रपदेप्राप्तेपूज्यासौभाग्यसुंदरी दंतकाष्ठंतुकर्तव्यंमातुलिंगीसमुद्भवं उत्पलैः पूजयेद्देवीमर्घ्यंकर्कोटकीफलं नैवेद्येशोकवर्तिन्या पिबेन्माणिक्यजंपयः कर्पूरागरुकस्तूरीसुखदेशेसुगंधिना आश्वयुज्यासितेपक्षेतृतीयायांव्रतं चरेत् दंतकाष्ठंप्रकर्तव्यंप्लक्षवृक्षसमुद्भवं पूजयेत्परयाभक्त्यापुत्रसौभाग्यसुंदरी उत्पलैःशतपत्रैश्चपूजाकार्याप्रयत्नतः नारिंगमर्घ्यदानार्थंकूष्मांडंवापिकल्पयेत् नैवेद्येगणकान्कुर्यात् शर्कराघृतपाचितान् औदुंबरंपयःपाश्यसुंदरी प्रीयतांमम पुत्रपौत्रसमायुक्तासुखसौभाग्यसुंदरीं कार्तिकेमासिसंप्राप्तेतृतीयायामुपोषिता औदुंबरं दंतकाष्ठंकृत्वाव्रतमुपाचरेत् केतकीभिश्चसौभाग्यप्राप्तयेगौरींचसुंदरीं निवेदयेदपूपांश्चसुगंधान्शालिसंभवान् अक्रोडंचार्घ्यदानंचलवंगंप्राशयेत्ततः सावियोगंनचाप्नोतिपितृभ्रातृसुतादिभिः एवंचीर्णंव्रतंकुर्यादुद्यापनविधिंततः सर्वशास्त्रमधीयानमागमेषुविशारदम् आचार्यंप्राशयेत्प्रातर्मार्गशीर्षेयथाविधि चीर्णव्रतंमयाचार्यउद्यापनविधिंमम व्रतवैकल्यनाशाययथाशास्त्रंसमाहितः सुंदरीमंडलंकार्यंगौरीतिलकमेववा उमामहेश्वरंदेवंसौवर्णेनतुकारयेत् व्रतारंभेयथाशक्त्याराजतंवापिकारयेत् वित्तशाठ्यंनकुर्वीतसतिद्रव्येफलार्थिना वर्षेप्रपूज्यतांमूर्तिंतामेवंमंडलेर्चयेत् सर्वोपचारगंधैश्चपुष्पैर्नानाविधैरपि एकैवसाजगन्माताबहुरूपाव्यवस्थिता रूपैर्द्वादशभिश्चैवपूज्यासौभाग्यसुंदरी ततः पद्मनिभांदेवींरक्तवस्त्रोपशोभिताम् रक्ताभरणशोभाढ्यांरक्तकुंकुमचर्चितां ध्यात्वाचैवंविधांदेवींपूजयेदेकमानसा रात्रौजागरणंकार्यंगीतवादित्रनिःस्वनैः ततः सर्वाणिपुष्पाणिनैवेद्यादिफलानिच अर्घ्यार्थंपरिकल्प्यानिसर्वकामार्थसिद्धये ततः प्रभातेविमलेस्नानंकृत्वाविधानतः कुसुंभकुसुमैर्होमंकिंशुकैर्वापिकारयेत् अष्टोत्तरशतंपूर्णंमध्वान्नंपयसान्वितम् तदभावेतुकर्तव्यः शतपत्रैर्विधानतः आसुरेणचमंत्रेणगौणंमुख्यंसमाचरेत् भोजयेच्चप्रयत्नेनचत्वार्यष्टौविधानतः मिष्टान्नेनसपत्नीकान्भक्त्यावैपरितोषयेत् वस्त्रालंकरणैश्चैवयथाशक्त्याप्रपूजयेत् सौभाग्यवस्त्रंचैकैकंनारीणांचैवदापयेत् ततोहस्ते प्रदातव्यंकुंकुमंलवणंगुडम् नारीकेरंतथावल्लीदूर्वासिंदूरकज्जलं मंगलाष्टकमेतद्धैदत्वासौभाग्यमाप्नुयात् आचार्यंचसपत्नीकं

वस्त्रालंकरणैःशुभैः परिधाययथाशक्त्यामंडलंतत्समर्पयेत् प्रार्थयेच्चततोदेवींसर्वसौभाग्यसुंदरीम् पूजितासिमयादेवि सर्वसौभाग्यसुंदरी दत्वामत्प्रार्थितान्कामान्गच्छदेवियथासुखं मूर्तिंचमंडलंदेव्याउपहारांश्चसर्वशः गुरोगृहाणसर्वंत्वंसुंदरीप्रीयतामिति त्वत्प्रसादान्मयाचीर्णंव्रतमेतत्सुदुर्लभम् क्षमस्वविप्रशार्दूल प्रसादसुमुखोभव एवंचीर्णव्रतानारीकृतकृत्याभवेत्सदा येनेदंचकृतंवर्षसंप्राप्तंजन्मनःफलं नातःपरतरंकिंचिद्व्रतंसौभाग्यकारकम् देहांतेशिवलोकेतुभोगान्भुक्त्वायथेप्सितान् इतिभविष्योत्तरसौभाग्यसुंदरीव्रतोद्यापनंसंपूर्णम् अथचतुर्थीव्रतानिलिख्यंते तत्रश्रावणकृष्णचतुर्थ्यांसंकष्टचतुर्थीव्रतम् तच्चचंद्रोदयव्यापिन्यांकार्यम् श्रावणेबहुलेपक्षेचतुर्थ्यांतुविधूदये गणेशंपूजयित्वातुचंद्रायार्घ्यंप्रदापयेत् १ दिनद्वयेतद्व्याप्तौपूर्वैव मातृविद्धागणेशस्य इतिवचनात् दिनद्वयेऽव्याप्तौपरैव हेमाद्रौ चंद्रोदयाभावेचतुर्थीनिशिषट्घटिव्याप्तायांपरैवव्रतेइति अथव्रतविधिः मासपक्षाद्युल्लिख्यतिथौममविद्याधनपुत्रपौत्रप्राप्त्यर्थंसमस्तरोगमुक्तिकामः श्रीगणेशप्रीत्यर्थंसंकष्टचतुर्थीव्रतमहंकरिष्ये तत्रादौस्वस्तिवाचनंगणपतिपूजनं कलशार्चनंचकरिष्ये सौवर्णरौप्यताम्रमृन्मयाद्यन्यतमांगणपतिमूर्तिंकृत्वाजलपूर्णवस्त्रयुतंकुंभंतस्याग्रेस्थापयित्वाषोडशोपचारैःपूजयेत् आदौध्यानं तद्यथा लंबोदरंचतुर्बाहुंत्रिनेत्रंरक्तवर्णकम् नानारत्नैःसुवेषाढ्यंप्रसन्नास्यंविचिंतयेत् १ ध्यायेद्गजाननंदेवंतप्तकांचनसुप्रभम् चतुर्बाहुंमहाकायंसूर्यकोटिसमप्रभम् २ इतिध्यानम् आगच्छत्वंजगन्नाथसुरासुरनमस्कृत अनाथनाथसर्वज्ञविघ्नराजकृपांकुरु सहस्रशीर्षापुरुषः० गजास्याय० आवाहयामि गोप्तात्वंसर्वलोकानामिंद्रादीनांविशेषतः भक्तदारिद्र्यविच्छेत्ताएकदंतनमोस्तुते पुरुषएवेदंसर्वंयद्भूतं० विघ्नराजाय० आसनम् मोदकान्धारयन्हस्तेभक्तानांवरदायक देवदेवनमस्तेस्तुभक्तानांफलदोभव एतावानस्यमहिमा० लंबोदराय० पाद्यं० महाकायमहारूपअनंतफलदोभव देवदेवनमस्तेस्तुसर्वेषांपापनाशन त्रिपादूर्ध्वउदैत्पु० शंकरसूनवे० अर्घ्यं० कुरुष्वाचमनंदेवसुरवंद्यसुवाहन सर्वाघदलनस्वामिन्नीलकंठनमोस्तुते तस्माद्विराळजायतविराजो० उमासुताय० आचमनीयं स्नानंपंचामृतेनैवगृहाणगणनायक

अनाथनाथसर्वज्ञनमोमूषकवाहन पयोदधिघृतंचैवशर्करामधुसंयुतम् पंचामृतेनस्नपनंप्रीयतांगणनायकः वक्रतुंडाय० पंचामृत
स्नानम् गंगाचयमुनाचैवगोदावरीसरस्वती नर्मदासिंधुकावेरीजलंस्नानायकल्पितम् यत्पुरुषेणहविषा० हेरंबाय० स्नानं र
क्तवस्त्रंसुयुग्मंचदेवानामपिदुर्लभम् गृहाणमंगलंदेवलंबोदरहरात्मज तंयज्ञंबर्हिषि० शूर्पकर्णाय० वस्त्रं० ब्रह्मसूत्रंसोत्तरीयं
गृहाणगणनायक आरक्तंब्रह्मसूत्रंचकनकस्योत्तरीयकम् तस्माद्यज्ञादित्युपवस्त्रं कुब्जाय० यज्ञोपवीतं० गृहाणेश्वरसर्वज्ञदि-
व्यचंदनमुत्तमं करुणाकरअब्जाक्षगौरीसुतनमोस्तुते तस्माद्यज्ञात्सर्वहुतऋचःसामानि० गणेश्वराय० गंधं० अक्षतांश्चसुरश्रेष्ठ
कुंकुमाक्ताःसुशोभिताः मयानिवेदिताभक्त्यागृहाणगणनायक अक्षतान् सुगंधिदिव्यमालांचगृहाणगणनायक विनायक
नमस्तुभ्यंशिवसूनोनमोस्तुते मालाम् माल्यादीनिसुगंधीनि० तस्मादश्वाअजा० विघ्ननाशिने० पुष्पाणि अथांगपूजा ग
णेश्वराय० पादौपू० विघ्नराजाय० जानुनीपू० आखुवाहना० ऊरूपू० हेरंबाय० कटी० कामहारिसूनवे० नाभिंपू० लंबोद० उदरं० गौ
रीसुताय० स्तनौपू० गणनायकाय० हृदयंपू० स्थूलकंठाय० कंठंपू० स्कंदाग्रजाय० स्कंधौपू० पाशहस्ताय० हस्तौपू० गजवक्त्राय० वक्त्रं०
विघ्नहर्त्रेन० ललाटंपू० सर्वेश्वराय० शिरःपूज० गणाधिपाय० सर्वांगंपू० दशांगंगुग्गुलंधूपमुत्तमंगणनायक गृहाणदेवदेवेशउमासुत
नमोस्तुते यत्पुरुषंव्यदधुः० विकटायनमः धूपं० सर्वज्ञसर्वरत्नाढ्यसर्वेशविबुधप्रिय गृहाणमंगलंदीपंघृतवर्तिसमन्वितं ब्रा-
ह्मणोस्यमुख० वामनाय० दीपं० नैवेद्यंगृह्यतांदेवनानामोदकसंयुतम् पक्वान्नफलसंयुक्तंषड्रसैश्चसमन्वितम् चंद्रमामनसो
जात० सर्वाय० नैवेद्यं० कृष्णावेण्यागोतमीनांपयोष्णीनर्मदाजलैः आचम्यतांविघ्नराजप्रसन्नोभवसर्वदा आचमनं० फला-
न्यमृतकल्पानिसुगंधीन्यघनाशन आनीतानियथाशक्त्यागृहाणगणनायक सर्वार्तिनाशिने० फलं० तांबूलंगृह्यतांदेवनागव
ल्यादलैर्युतम् कर्पूरेणसमायुक्तंसुगंधंसुखभूषणं विघ्नहर्त्रे० तांबूलं० सर्वदेवाधिदेवायसर्वसिद्धिप्रदायक भक्त्यादत्तांमयादे
वगृहाणजगदीश्वर सर्वेश्वराय० दक्षिणांस० पंचवर्तिसमायुक्तंवन्हिनायोजितंमया गृहाणमंगलंदीपंविघ्नराजनमोस्तुते-

नीराजनं यानिकानिचपापानि॰ नाभ्याआसीतिप्रदक्षिणा नमोस्त्वनंताय॰ सप्तास्येतिनमस्कारः यज्ञेनयज्ञमिति मंत्रपुष्पांजलिं एवं पूजाप्रकर्तव्याषोडशैरुपचारकैः मोदकान्कारयेदेवमेकविंशतिसंख्यया तेषांमध्येप्रदातव्यादशसंख्याश्चपार्वति देवाग्रेस्थापयेत्पंचपंचविप्रायकल्पयेत् पूजयित्वातुतंविप्रंभक्तिभावेनदेववत् दक्षिणांचयथाशक्त्यादत्वावैपंचमोदकान् पूजयेन्निशिचंद्रंच अर्घ्यंदत्वायथाविधि क्षीरसागरसंभूतसुधारूपनिशाकर गृहाणार्घ्यंमयादत्तंगणेशप्रीतिवर्धन रोहिणीसहितचंद्रमसेन॰ इदमर्घ्यं॰ क्षीरोदार्णवसंभूतसुधारूपनिशाकर गृहाणार्घ्यंमयादत्तंरोहिण्यासहितःशशिन् रोहिणीसहितचंद्राय॰ इदमर्घ्यं॰ गणेशायनमस्तुभ्यंसर्वसिद्धिप्रदायक संकष्टहरमेदेवगृहाणार्घ्यंनमोस्तुते कृष्णपक्षेचतुर्थ्यांतुपूजितोसिविधूदये क्षिप्रप्रसादितोदेवगृहाणार्घ्यंनमोस्तुते संकष्टहरगणेशाय॰ इदमर्घ्यं॰ तिथीनामुत्तमेदेविगणेशप्रियवल्लभे सर्वसंकष्टनाशायचतुर्थ्यर्घ्यंनमोस्तुते वायनमंत्रः विप्रवर्यनमस्तुभ्यंमोदकान्वैददाम्यहं मोदकान्सफलान्पंचदक्षिणाभिःसमन्वितान् आपदुद्धरणार्थायगृहाण द्विजसत्तम प्रार्थना अबुद्धमतिरिक्तंवाद्रव्यहीनंमयाकृतम् तत्सर्वंपूर्णतांयातुविप्ररूपगणेश्वर ब्राम्हणान्भोजयेदेवंयथासंख्यंयथासुखं स्वयंभुंजीतमौनेन मोदकान्ब्राह्मणैःसह अशक्तश्चैकमन्नंचभुंजीत दधिसंयुतं अथवाभोजनंकार्यमेकवारंहिमाद्रिजे प्रतिमांगुरवेदद्यादाचार्यायसदक्षिणां वस्त्रकुंभसमायुक्तामादौमंत्रमिमंजपेत् ॐनमोहेरंबमदमोदितसंकष्टान्निवारयनिवारय इतिमूलमंत्रंएकविंशतिवारंजपेत् विसर्जनमंत्रः गच्छगच्छसुरश्रेष्ठस्वस्थानेत्वंगणेश्वरव्रतेनानेनदेवेशयथोक्तफलदोभव इतिपूजा अथकथा ऋषयऊचुः दारिद्र्यशोककष्टाद्यैःपीडितानांचवैरिभिः राजभ्रष्टैर्नृपैःसर्वैःक्रियतेकिंशुभार्थिभिः धनहीनैर्नरैःस्कंदसर्वोपद्रवपीडितैः विद्यासुत्रगृहभ्रष्टैर्योगयुक्तैःशुभार्थिभिः कर्तव्यंकिंवदोपायंपुनःक्षेमार्थसिद्धये स्कंदउवाच शृणुध्वंमुनयःसर्वेव्रतानामुत्तमंव्रतम् संकष्टतरणंनामसंपत्तिसुखदायकम् येनोपायेनसंकष्टंतरंतिभुविदेहिनः यद्वृत्तंदेवकीपुत्रःकृष्णोधर्मायदत्तवान्

अरण्येक्लिश्यमानायपुनःक्षेमायसिन्दूये यथाकथितवान्पूर्वंगणेशोमातरंप्रति तथाकथितवाञ्श्रीशोद्वापरेपांडवान्प्र
ति ऋषयऊचुः यथाकथितवानंबांपार्वतींश्रीगणेश्वरः तथापृच्छंतिमुनयोलोकानुग्रहकांक्षिणः स्कंदउवाच पुराकृत
युगेपुण्येहिमाचलसुतासती तपस्तप्तवतीभूरितेनालब्धःशिवःपतिः तदास्मरत्साहेरंबंगणेशंपूर्वजंसुतम् तत्क्षणा
दागतंदृष्ट्वागणेशंपरिपृच्छति पार्वत्यु॰ तपस्तप्तंमयाघोरंदुश्चलंलोमहर्षणम् नप्राप्तःसमयाकांतोगिरीशोममवल्लभः संकष्टह
रणंदिव्यंव्रतंनारदउक्तवान् त्वदीयंयद्व्रतंतावत्कथयस्वपुरातनं तच्छ्रुत्वापार्वतीवाक्यंसंकष्टहरणव्रतम् प्रीत्याकथितवान्देवोगणे
शोज्ञानसिद्धिदः गणेशउ॰ श्रावणेबहुलेपक्षेचतुर्थ्यांतुविधूदये गणेशंपूजयित्वातुचंद्रायार्घ्यंप्रदापयेत् पार्वत्युवा॰ क्रियते
केनविधिनाकिंकार्यंकिंचपूजनम् उद्यापनंकदाकार्यंमंत्राःकेस्युःसुपूजने किंध्यानंश्रीगणेशस्यगणेशवद्विस्तरात् गणेशउ॰
चतुर्थ्यांप्रातरुत्थायदंतधावनपूर्वकम् ग्राह्यंव्रतमिदंपुण्यंसंकष्टहरणंव्रतम् कर्तव्यमितिसंकल्प्यव्रतेस्मिन्गणकंस्मरेत् स्वीका
रमंत्रः निराहारोस्मिदेवेशयावच्चंद्रोदयोभवेत् भोक्ष्यामिपूजयित्वाहंसंकष्टात्तारयस्वमाम् एवंसंकल्प्यराजेंद्रस्नात्वाकृष्णति
लैःशुभैः आन्हिकंतुविधायैवपश्चात्पूज्योगणाधिपः त्रिभिर्माषैस्तदर्धेनतृतीयांशेनवापुनः यथाशक्त्यातुवाहेमीप्रतिमाक्रि
यतेमम माषमात्रात्तदर्धस्यतृतीयांशेनवापुनः यथाशक्त्यातुवाहेमीताम्रस्यापियथासुखम् सर्वथैवदरिद्रेणक्रियतेमृन्म
यीशुभा वित्तशाठ्यंनकर्तव्यंकृतेकार्यंविनश्यति जलपूर्णंवस्त्रयुतंकुंभंतस्याग्रतोन्यसेत् पद्ममष्टदलैःकार्यंगंधपुष्पैःप्रपूजये
त् एवंव्रतंप्रकर्तव्यंचतुर्थ्यांश्रावणेसिते स्वीकार्यश्चतथाचार्यःसंकष्टहरणेतिथौ गणाधीशंतथाचार्यंसर्वशास्त्रविशारद
म् श्रद्धयाप्रार्थयेदादौतेनोक्तंविधिमाचरेत् एकविंशतिविप्रांश्चवस्त्रालंकारभूषणैः पूजयेद्गोहिरण्याद्यैर्हुत्वाग्नौविधिपू
र्वकम् होमद्रव्यंमोदकाश्चतिलयुक्ताघृतप्लुताः अष्टोत्तरसहस्रंवानोचेदष्टोत्तरंशतं अष्टाविंशतिसंख्याकैर्मोदकैर्वासशर्क
रैः अशक्तोष्टौशुभान्स्थूलान्जुहुयाज्जातवेदसि वैदिकेनचमंत्रेणआगमोक्तेनवातथा अथवानाममंत्रेणहोमंकुर्याद्यथावि

धि पुष्पमंडपिकाकार्यागणेशाल्हादकारिणी पूजयेत्तत्रगणपंभक्तसंकष्टनाशनम् गीतवादित्रनिनदैर्भक्तिभावपुरस्कृतैः पुराणवे
दनिर्घोषैस्तोषयेच्चगणेश्वरम् एवंजागरणंकार्यंशक्त्यादानादिकंतथा सपत्नीकमथाचार्यंतोषयेद्वस्त्रभूषणैः उपानच्छत्रगोदानं-
कमंडलुजलादिभिः यथाशक्त्याप्रकर्तव्यंदारिद्र्याभावमिच्छता एकविंशतिविप्रांश्चभोजयेन्नामभिर्मम गजास्योविघ्नराजश्च-
लंबोदरशिवात्मजौ वक्रतुंडःशूर्पकर्णःकुब्जश्चैवविनायकः विघ्ननाशोहिविकटोवामनःसर्वदैवतु सर्वार्त्तिनाशीभगवान्विघ्नहर्त्ता
च धूम्रकः सर्वदेवाधिदेवश्चसर्वेषोडशवैस्मृताः एकदंतःशूर्पकर्णोभालचंद्रोगणेश्वरः गणपश्चैकविंशाश्चसर्वेएतेगणेश्वराः दु
र्गोपेंद्रश्चरुद्रश्चकुलदेव्याधिकंभवेत् विशेषेणाष्टसंख्याकैर्मोदकैर्हवनंस्मृतम् एवंकृतविधानेनप्रसन्नोहंनसंशयः ददामिवांछि
तान्कामांस्त्वद्व्रतंमत्प्रियंकुरु श्रीकृष्णउवाच एवंतुकथितंसर्वंगणेशेनस्वयंनृप पार्वत्यातत्कृतंराजन्व्रतंसंकष्टनाशनम् व्रते
नानेनसार्धाब्देप्रापशंभुंपतिंस्वकम् तत्कुरुष्वमहाराजव्रतंसंकष्टनाशनम् चतुर्थीसंकटानामस्कंदेनकथिताऋषीन् ऋषिभिर्लो
ककामैस्तैर्लोकेतुतदिदंव्रतम् सूतउवाच कृतंयुधिष्ठिरेणैतद्राज्यकामेनवैद्विज तेनशत्रून्निहत्याजौस्वराज्यंप्राप्तवान्स्वयम् त
स्मात्सर्वप्रयत्नेनव्रतंकार्यंविचक्षणैः येनधर्मार्थकामाश्चमोक्षश्चापिभवेत्किल यःकरोतिव्रतंविप्राः सर्वकामार्थसिद्धिदम् सर्वा
छितफलंप्राप्यपश्चाद्गणपतिंव्रजेत् यदायदाव्रतंविप्रानरःप्राप्नोतिसंकटम् तदातदाप्रकर्तव्यंव्रतंसंकष्टनाशनं त्रिपुरंहंतुकामे
न कृतंदेवेनशूलिना त्रैलोक्यभूतिकामेनमहेंद्रेणतथाकृतम् रावणेनकृतंपूर्वंबलिबंधनसंकटे स्वकीयंप्राप्तवान्राज्यंगणेशस्य
प्रसादतः सीतान्वेषणकामेनकृतंवायुसुतेनच संकल्प्यदृष्टवान्सोयंसीतांरामप्रियांपुरा दमयंत्याकृतंपूर्वंनलान्वेषणकारणात्
सापतिंनैषधंलेभेपुण्यश्लोकंद्विजोत्तमाः अहल्यापिपतिंलेभेगौतमंप्राणवल्लभम् विद्यार्थीलभतेविद्यांधनार्थीधनमाप्नुयात्
पुत्रार्थीपुत्रमाप्नोतिरोगीरोगात्प्रमुच्यते इतिश्रीस्कंदपुराणेसंकष्टचतुर्थीव्रतोद्यापनंसंपूर्णम् अथश्रावणेकार्तिकेवाशुक्लच
तुर्थ्यांदूर्वागणपतिव्रतम् मदनरत्ने सौरपुराणे स्कंदउवाच केनव्रतेनभगवन्सौभाग्यमतुलंभवेत् पुत्रपौत्रधनैश्वर्यैर्मनुजः-

सुखमेधते तन्मेवदमहादेवव्रतानामुत्तमंव्रतं महा०उ० अस्तिदूर्वागणपतेर्व्रतंत्रैलोक्यविश्रुतम् भगवत्यापुराचीर्णंपार्वत्याश्रद्धयासह
सरस्वत्याचइंद्रेणविष्णुनाधनदेनच अन्यैश्चदेवैर्मुनिभिर्गंधर्वैःकिंनरैस्तथा चीर्णमेतद्व्रतंसर्वैःपुराकल्पेषडानन चतुर्थीयाभवेच्छुक्लान
भोमासस्यपुण्यदा तस्यांव्रतमिदंकुर्यात्कार्तिक्यांवाषडानन कार्तिकेशुक्लपक्षेतु चतुर्थ्यामुत्तमंव्रतम् गजाननंचतुर्बाहुमेकदंतविपा
ठिनं विधायहेम्नाविघ्नेशंहेमपीठासनस्थितम् तथाहेममयींदूर्वांतदाधारेव्यवस्थिताम् संस्थाप्यविघ्नकर्तारं कलशेताम्रभाजने-
वेष्टितंरक्तवस्त्रेणसर्वतोभद्रमंडले पूजयेद्रक्तकुसुमैःपत्रिकाभिश्चपंचभिः बिल्वपत्रमपामार्गशमीदूर्वाहरिप्रियाः गंधपुष्पैश्च
धूपैश्चकुसुमैश्चसुगंधिभिः फलैश्चमोदकैःपश्चादुपहारंप्रकल्पयेत् उपहारैःसुविधिनापूजयेद्गिरिजासुतं उमासुतनमस्तुभ्यंवि
श्वव्यापिन्सनातन विघ्नौघांश्छिंधिसकलान्सर्वमाद्यंवदामिते गणेश्वरायदेवायउमापुत्रायवेधसे पूजयेच्चमहादेव गृहाणभगव
न्मम विनायकायशूरायवरदायगजानन उमासुतायदेवायसर्वविघ्नौघहारिणे उमांगमलसंभूतोदानवानांवधायवै अनुग्रहाय
लोकानांसदेवःपातुविश्वधृक् परंज्योतिःप्रकाशायसर्वसिद्धिप्रदायक दीपंतुभ्यंप्रदास्यामिमहादेवायतेनमः गणेश्वरगणाध्यक्ष-
गौरीपुत्रगजानन व्रतंसंपूर्णतांयातुत्वत्प्रसादादिभानन एवंसंपूज्यविघ्नेशंयथाविभवविस्तरैः सोपस्करंगणाध्यक्षमाचार्यायनि
वेदयेत् गृहाणभगवन्ब्रह्मन्गणराजंसदक्षिणम् व्रतंत्वद्वचनादद्यपूर्णतांयातुसुव्रत दानं श्रावणेशुक्लपक्षस्यचतुर्थ्यांतुजितें
द्रियः कुर्याद्वर्षत्रयंत्वेवंसर्वसिद्धिप्रदायकम् एवंयःपंचवर्षाणिकृत्वोद्यापनमाचरेत् ईप्सितान्लभतेकामान्देहांतेशांकरंपदम् उ
द्यापनंविनायस्तुकरोतिव्रतमुत्तमम् तेनशुक्लतिलैःकार्यंप्रातःस्नानंषडानन हेम्नावाराजतेनापिकृत्वागणपतिंबुधः पंचगव्येस्तु
संस्नाप्यदूर्वाभिःसंप्रपूजयेत् मंत्रैस्तुदशभिर्भक्त्यादूर्वायुक्तैःशिखिध्वज दूर्वायुग्मैःपंचगव्यैःपूजनंदशमंत्रकैः गणाधिपनमस्तेस्तु
उमापुत्राघनाशन एकदंतेभवक्त्रेतितथामूषकवाहन विनायकेशपुत्रेतिसर्वसिद्धिप्रदायक कुमारगुरवेतुभ्यंगणेशायप्रपूजयेत् इ
त्येवंकथितंसम्यक्सर्वसिद्धिप्रदंशुभम् व्रतंदूर्वागणपतेःकिमन्यच्छ्रोतुमिच्छसि इतिसौरपुराणोक्तंदूर्वागणपतिव्रतोद्यापनम्

अथैकविंशतिदिनगणपतिपूजनं तत्रश्रावणशुक्लचतुर्थीमारभ्यश्रावणकृष्णदशमीपर्यंतंगणपतिपूजनं सामध्यान्हव्यापिनीकार्या एकदंतंशूर्पकर्णंगजतुंडंचतुर्भुजम् पाशांकुशधरंदेवंमोदकंबिभ्रतंकरे ध्यानं आगच्छजगदाधारसुरासुरवरार्चित अनाथनाथ सर्वज्ञगीर्वाणपरिपूजित आवाहनं स्वर्णसिंहासनंदिव्यंनानारत्नसमन्वितम् समर्पितंमयादेवतत्रत्वंसमुपाविश आसनं॰ देवदेवेशसर्वेशसर्वतीर्थहृतंजलम् पाद्यंगृहाणगणपगंधपुष्पाक्षतैर्युतम् पाद्यं प्रवालमुक्ताफलपूगरत्नतांबूलजांबूनदमष्टगंधम् पुष्पाक्षतैर्युक्तममोघशक्तेदत्तंमयार्घ्यंसफलीकुरुष्व अर्घ्यं गंगादिसर्वतीर्थेभ्यःप्रार्थितंतोयमुत्तमम् कर्पूरैलालवंगैश्चयुक्तमाचम्यतांविभो आचमनं चंपकाशोकबकुलमालतीमोगरादिभिः वासितंस्निग्धताहेतुस्तैलंचारुप्रगृह्यताम् अभ्यंगस्नानं कामधेनुसमुद्भूतंसर्वेषांजीवनंपरं पावनंयज्ञहेतुश्चपयःस्नानार्थमर्पितम् पयस्नानं॰ पयसस्तुसमुद्भूतंहिमादिद्रव्ययोगतः दध्यानीतंमयादेवस्नानार्थंप्रतिगृह्यताम् दधिस्नानं॰ नवनीतसमुत्पन्नंसर्वसंतोषकारकम् यज्ञांगंदेवताहेतोर्घृतंस्नानार्थमर्पितम् घृतस्नानं॰ पुष्पसारसमुद्भूतंमक्षिकैराहृतंचयत् सर्वतुष्टिकरंदेवमधुस्नानार्थमर्पितं मधुस्नानं॰ इक्षुरससमुद्भूतांशर्करांस्तुमनोहराम् मलापहरणस्नानेगृहाणत्वंमयार्पिताम् शर्करास्नानं सर्वमाधुर्यताहेतुः स्वादुःसर्वप्रियंकरः तुष्टिकृत्स्नानतुमानीतइक्षुसारभवोगुडः गुडस्नानं॰ कांस्येकांस्येनपिहितंदधिमधुघृतंपयः मधुपर्कोमयानीतःपूजार्थंप्रतिगृह्यतां मधुपर्कस्नानं॰

सर्वतीर्थाहृतंतोयंमयाप्रार्थनयाविभो सुवासितंगृहाणेदंसम्यक्स्नातुंसुरेश्वर स्नानं रक्तवस्त्रयुगंदेवलोकलज्जाविवारणम् अनर्घ्यमतिसूक्ष्मंचगृहाणेदंमयार्पितम् वस्त्रं॰ राजतंब्रह्मसूत्रंचकांचनंरत्नसंयुतम् भक्त्योपपादितंदेवगृहाणपरमेश्वर यज्ञोपवीतं॰ अनेकरत्नयुक्तानिभूषणानिबहूनिच तत्तदंगेकांचनानियोजयामितवाज्ञया भूषणं॰ पूर्वादिक्रमेणअष्टौदिक्पालानावाहयेत् इष्टगंधसमायुक्तंरक्तचंदनमिश्रितम् द्वादशांगेषुतेदेवलिंपयामिकृपांकुरु चंदनं॰ रक्तचंदनसंमिश्रांस्तंडुलांस्तिलकोपरि शोभायैसंप्रदास्यामिगृहाणजगदीश्वर अक्षतान् पाटलंकर्णिकारंचबंधूकंरक्तपंकजम् मोगरंमालतीपुष्पं-

गृह्यतांभुवनेश्वर पुष्पाणि नानापंकजपुष्पैश्चग्रथितांपल्लवैरपि बिल्वपत्रयुतांमालांगृहाणसुमनोहराम् मालां अथांगपूजा
गणेशायनमः पादौपूजयामि गौरीपुत्राय० गुल्फौपू० विश्वेश्वराय० जानुनीपू० गजाननाय० ऊरूपू० लंबोदराय० वक्षस्थलंपू० गणना
थाय० स्तनौपू० द्वैमातुराय० कंठंपू० वक्रतुंडाय० शिरःपूजयामि अथैकविंशतिपत्रपूजा गणाधिपाय० भृंगराजपत्रंस० उमापु-
त्राय० बिल्वपत्रंस० गजाननाय० दूर्वापत्रंस० लंबोदरा० बदरीप० हरसूनवे० मधुपत्रंस० गजवक्त्राय० तुलसीपत्रं० गुहाग्रजाय० अपा
मार्गप० एकदंताय० बृहतीपत्रंस० इभवक्त्राय० शमीपत्रं० विकटाय० करवीरप० विनायकाय० अश्वत्थप० कपिलाय० अर्कपत्रं० बटवेन०
चंपकप० अभयप्रदाय० अर्जुनप० पत्नीहिताय० विष्णुक्रांता० सुराधिपतये० देवदारुपत्रं० भालचंद्राय० अगरुपत्रं० हेरंबाय० श्वेतदूर्वा० शू
र्पकर्णाय० जातीप० सुरनाथाय० धत्तूरपत्रं० एकदंता० केतकीप० अथैकविंशतिनामपूजा गजाननाय० विघ्नराजाय० लंबोदरा० शि
वात्मजाय० वक्रतुंडाय० शूर्पकर्णाय० कुब्जाय० विनायकाय० विघ्ननाशनाय० विकटाय० वामनाय० सर्वार्त्तिनाशिनेन० भगवतेन० विघ्नह
र्त्रेनमः धूम्रकाय० सर्वदेवाधिदेवाय० एकदंताय० कृष्णपिंगाय० भालचंद्राय० गणेश्वराय० गणपाय० पुष्पं० २१ दशागंगुग्गुलंधूपंस
र्वसौगंधिकारकम् सर्वपापक्षयकरंगृहाणत्वंमयार्पितम् धूपं· सर्वज्ञसर्वलोकेश तमोनाशनमुत्तमं गृहाणमंगलंदीपंदेवदेवनमोस्तु
ते दीपं० नानापक्वान्नसंयुक्तंपायसंशर्करान्वितम् राजिकाधान्यसंयुक्तंमेथीपिष्टसतक्रकं हिंगुजीरककूष्मांडैर्मरीचीमाषपिष्टकैः
संपादितैःसूपकैश्चभर्जितैर्वटकैर्युतम् मोदकापूपलड्डूकशष्कुलीवटकादिभिः पर्पटरससंयुक्तंनैवेद्यममृतान्वितम् हरिद्राहिंगुल
वणसहितंसूपमुत्तमम् ससासुदंगृहाणेदंभोजनंकुरुसादरम् मयानिवेदितंतुभ्यंगृहाणजगदीश्वर नैवेद्यं सुदीपदीपितंतोयंसुगंधिच
पिबेच्छया त्वयितृप्तेजगत्तृप्तंनित्यतृप्तेमहात्मनि मध्येपानीयं० उत्तरापोशनार्थंतेदद्मितोयंसुवासितं मुखपाणिविशुद्ध्यर्थंपुनस्तोयं-
ददामिते दाडिमंमधुरंनिंबूजंब्वाम्रपनसादिकं द्राक्षारंभाफलंपक्वंकर्कंधूःखार्जुरंफलं नारीकेरंचनारिंगंकलिंगंमांजिरंतथा उर्वारुकं
चदेवेशफलान्येतानिगृह्यताम् फलानि गृहाणचंदनंचारुकरांगोद्वर्त्तनंशुभम् नानापरिमलैर्द्रव्यैर्निर्मितंचूर्णमुत्तमं अबीरंनामकंपु-

ण्यंगंधिश्चारुप्रगृह्यताम् चारुचाल्लूरसंभूतंवंशसारसमुद्भवम् सचंद्रपूगचूर्णाढ्यंखादिरेणचसंयुतम् एलालवंगसंमिश्रंतांबूलंप्रतिगृह्यतां न्यूनातिरिक्तपूजायांसंपूर्णफलहेतवे दक्षिणांकांचनींदेवस्थापयामितवाग्रतः दक्षिणां सितपीतैस्तथारक्तैर्जलजैःकुसुमैःशुभैः ग्रथितांसुंदरांमालांगृहाणपरमेश्वर मालां हरिताःश्वेतवर्णावापंचत्रिपत्रसंयुताः दूर्वांकुरामयादत्ताएकविंशतिसंमिताः गणाधिपायनमः दूर्वांकुरान्स० उमापुत्राय० अभयप्रदाय० एकदंताय० मूषकवाह० विनायकाय० ईशपुत्राय० इभवक्त्राय० सर्वसिद्धिप्रदायकाय० लंबोदराय० विघ्नराजाय० विकटाय० मोदकप्रियाय० विघ्नविध्वंसकर्त्रे० विश्ववंद्याय० अमरेशायन० गजकर्णाय० नागयज्ञोपवीतिने० भालचंद्राय० विद्याधिपाय० विद्याप्रदाय० इतिदूर्वा गणेशंहृदयेध्यात्वासर्वसंकष्टनाशनम् एकविंशतिसंख्याकाःकरोमिचप्रदक्षिणाः प्रदक्षिणाः औदुंबरेराजतेवाकांस्येकांचनसंभवे पात्रेप्रकल्पितान्दीपान्गृहाणचक्षुरर्पिकान् पंचार्तिपंचदीपैश्चदीपितांपरमेश्वर चारुचंद्रप्रभंदीपंगृहाणपरमेश्वर पंचार्तिं कर्पूरस्यमयादेवदीपस्तेचनिवेदितः यथास्यनेक्षतेभस्मतथापापंविनाशय कर्पूरदीपं० स्तोत्रैर्नानाविधैःसूक्तैः सहस्रनामभिस्ततः उपविश्यस्तवीतैनंकृत्वास्थिरतरंमनः दीनानाथदयानिधे सुरगणैःसंसेव्यमानोद्विजब्रह्मेशानमहेंद्रशेषगिरिजागंधर्वसिद्धैःस्तुतः सर्वारिष्टनिवारणैकनिपुणत्रैलोक्यनाथप्रभो भक्तिंमेसफलां कुरुष्वसकलांक्षंत्वापराधान्मम आवाहनंनजानामिनजानामितवार्चनम् विसर्जनंनजानामिक्षम्यतांजगदीश्वर क्षमापनं० गौरीसुतनमस्तेस्तुसर्वसिद्धिप्रदायक सर्वसंकष्टनाशार्थमर्घ्यंमेप्रतिगृह्यताम् अनेनएकविंशतिअर्घ्याणि कृतपूजायाःसांगतासिद्ध्यर्थंब्राह्मणायवायनप्रदानंकरिष्ये ब्राह्मणपूजनम् दशमोदकसंयुक्तंवाणकंचफलप्रदम् गणेशप्रीणनार्थायगृहाणत्वंद्विजोत्तम वाणकम् सांगतासिद्ध्येब्राह्मणान्भोजयेत् इत्येकविंशतिदिनगणपतिपूजा अथैकविंशतिदिनगणपतिकथा शौनक उवाच सूतसूतमहाप्राज्ञव्यासविद्याविशारद संकष्टेचसमुत्पन्नेकार्यसिद्धिःकथंनृणां सूतउवाच शृणुध्वंमुनयःसर्वेशौनकप्रमुखानघाः संकष्टनाशनंपुण्यंव्रतंवच्मियथाश्रुतं यत्कृत्वासर्वकार्याणिसिद्धिंयांतिनसंशयः पूजयित्वागणेशंहिएकविंशद्दिना

वधि शौनकउवा॰ कथंपूज्योगणाध्यक्षोविघ्नहर्तागणाधिपः केनचादौपुराचीर्णंव्रतंविघ्नहरस्यच वदसर्वंमहाप्राज्ञअस्माकंविधिपूर्वकम् प्राप्तोसित्वंमहाभाग्यादरण्येसत्रमंडपे सूतउ॰ एवमेवपुरापृष्टःषण्मुखोवदतांवरः सनत्कुमारमुनिनाब्रह्मपुत्रेणयोगिना सनत्कुमारउ॰ कार्तिकेयमहाप्राज्ञदेवसेनाधिपप्रभो संकटात्तुकथंमुच्येज्जनोवैज्ञानदुर्लभः श्रुत्वावाक्यंब्रह्मसूनोःसर्वेषांकार्यगौरवम् सेनानीस्तुतदाहर्षान्नमस्कृत्यमहामुनिम् स्कंदउवा॰ विप्रवर्यमहायोगिन्पार्वत्यामुखतःश्रुतम् वदामितद्व्रतंतुभ्यंशृणुसर्वंसमासतः कैलासभवनेरम्येवसमानोमहेश्वरः स्नातुंजगामभगवान्भोगवत्यांयथासुखम् तस्मिन्नेवदिनेअंबाह्यभ्यंगस्नानमारभत् स्वशरीरान्मलंगृह्यतस्यमूर्तिमकल्पयत् सजीवंचपुनःकृत्वाएहिपुत्रेत्यचोदयत् अवदद्वैततोनामबल्लवस्त्वंविनायकः पुत्रगच्छबहिर्द्वारेतिष्ठतत्रदृढायुधः आयास्यतिकदाचिद्वैपुरुषोभवनांतरे तंनिवारयितुंशक्तोयावत्स्नानंकरोम्यहं ममाज्ञांगृह्यपश्चात्त्वंप्रवेष्टुमर्हसिध्रुवम् मात्राज्ञांगृह्यशिरसिअगमद्वारदेहलीम् मुद्गरंतुसमादायहस्तेबल्लवनामकः अरक्षद्वारदेशंसपार्वत्याज्ञांस्मरन्बलात् तदानीमेवआयातंविभूत्याचर्चितंविभुम् संप्राप्तेभवनद्वारेशंभुःसर्वेश्वरोहरः देहलींप्रविशन्यावद्वारयद्द्वारपोबली द्वारपालउ॰ कोसित्वंचकिमर्थंहिगम्यतेभवनेशुभे मात्राज्ञायातियावत्त्वंस्थातव्यंतावदेवहि स्कंदउ॰ द्वारपालवचःश्रुत्वाशंभुःकोपमथाकरोत् शंभुरुवा॰कस्याज्ञाचमयाग्राह्याकोसित्वंभाषसेकथम् गृहीत्वाडमरुंहस्तेद्वारपालशिरोहनत् प्रविशच्चततस्तूर्णंस्वगृहंपार्वतीपतिः दृष्ट्वानाथंसकोपंसाचिंतयत्पार्वतीहृदि बहुधाबाधतेस्कद्वैशंकरेकोपकारणम् अलंकृताचस्नात्वापार्वतीजगदंबिका पायसेनतुपूर्णेद्वेभक्ष्यभोज्येनसंयुते संस्थाप्यचैवपीठाग्रेघृतेनसितयान्विते पात्रद्वयंसमालोक्यअवदत्पार्वतींशिवः शंभुरुवाच दिव्यकांचनभूते ददर्वाभ्यांचफलोचने भोज्यपात्रंतुकस्येदंस्थापितंचद्वितीयकम् भोजनार्थंद्वितीयोद्यकोयातिवदवल्लभे नायातित्वरयाचात्रविलंबेकारणंवद इतिश्रुत्वावचःशंभोःसर्वेशस्यमहासती भीतिहर्षसमायुक्तासर्वज्ञमवदत्तदा पार्वत्युवा॰ ममाद्यस्नानसमयेउद्वर्तनमलोद्भवम् पुत्रंविरच्यचदृढोदेहल्यांस्थापितोमया तदर्थंचद्वितीयंवैभाजनंस्थापितंध्रुवम् इतिश्रुत्वावचस्तस्याश्चकंपेप्राकृतोयथा

शिवउवाच प्रविशंतंचमांद्वारेतवपुत्रोन्यवारयत् कोसित्वंचमयापृष्टस्तेननोक्तातवाभिधा कोपेनचततस्तस्याशिरश्छित्वानिपातितम् इतिश्रुत्वाततोदेवीविह्वलापतिताभुवि पार्वत्युवाच पुत्रंजीवयसेदेवतर्हिभोक्ष्येमहेश्वर तथैवचममप्राणागमिष्यंति नसंशयः इत्युक्त्वाचततोदेवीहाकष्टमित्यवीवदत् पुनःपपातसाभूमौवातेनकदलीयथा शिवउवा॰ उत्तिष्ठभद्रेकिंदुःखंपुत्रार्थेमाकुरुप्रिये अधुनातवपुत्रंहिजीवयामिशिरोविना प्रियामेवंचआश्वास्यगतोद्वारंस्वयंविभुः इतस्ततोवलोक्याथगजोदृष्टोमृतस्तदा निकृत्यचनागशिरोबल्लवंयोजयद्विभुः संजीव्यबल्लवंपुत्रंपार्वतींविनिवेदयेत् दृष्ट्वागजशिरंपुत्रंपार्वतीहर्षनिर्भरा भोजयित्वापतिपुत्राभ्यांस्वर्णपात्रेसुशोभने नमस्कृत्यततोदेवंपतिपात्रेउपाविशत् बुभुजेतुततोदेवीपतिशेषंतुभोजनम् कैलासभुवनेरम्येपार्वत्यानिवसन्बहु अटन्विभुःकदाचित्सवृषभेणबलीयसा पार्वत्यासहितोदेवःप्राप्तवान्नर्मदातटम् रम्यंरेवातटंदृष्ट्वापार्वतीह्यवदच्छिवं पार्वत्युवाच देवदेवमहादेवशंकरप्राणवल्लभ अक्षक्रीडनकामाहंत्वयासार्द्धंसुरेश्वर शंकरउ॰ अक्षक्रीडनकामात्वमासनेस्मिन्स्थिराभव जयेपराजयेचात्रसाक्ष्यर्थंयोजयप्रिये स्वामिवाक्यंचसाश्रुत्वाएरकांगृह्यमुष्टिना नराकृतिमथाकल्प्यप्राणान्सासमयोजयत् देहंतस्यचसास्पृश्यपाणिपद्मेनसांभसा तमुवाचततोबालमक्षक्रीडांविलोकय आवाभ्यांक्रीड्यमानाभ्यांकोजेष्यतिवदध्रुवम् इतिमातर्वचःश्रुत्वाबालकोवैतथेतिभोः अक्षक्रीडासमारब्धापार्वत्याशंकरेणच जयोजातश्चपार्वत्याशंकरस्तुपराजितः शंकरस्तुतदापृच्छत्कोजितोवदबालक अवदद्बालकस्तत्रजितंदेवेनशूलिना पुनःक्रीडांप्रवृत्तासासाक्षीकृत्वातुबालकं पुनर्जितंतुपार्वत्याशंकरस्तुपराजितः बालंप्रपच्छसादेवीजितंकेनवदाधुना पुनरप्याहबालोसौजितंदेवेनशूलिना हर्षेणचसमायुक्तःपार्वतींप्राहशंकरः क्रीडांकुरुमहादेविरोषंत्यजशुभानने क्रीडितास्तुपुनर्देवीजितोदेव्यासशंकरः लज्जितःशंकरोबालंकोजितोवदनिश्चितं शंकरंप्राहबालाख्योजितस्त्वंभुवनाधिप बालवाक्यंसमाकर्ण्यपार्वतीकोपनिर्भरा मिथ्यावदसिदुष्टात्मन्पादहीनोत्रकर्दमेपच्यमानोतिदुःखेनभविष्यसिनसंशयः बालउ॰ विशापंकुरुमांमातर्बालभावान्मयेरितम् इतिश्रुत्वावचस्तस्यमातृभावाद्दयान्विता पार्वत्युवा॰ ना

गकन्यायदापुत्रपूजार्थंचतटेशुभे गणेशंपूजयंत्यार्योदृष्ट्वापूजाविधिंशिवं नासांश्रुत्वावचोदिव्यंतवभक्तिर्भविष्यति गणेशंपूजयित्वातुममसान्निध्यमेष्यसि इत्युक्त्वासाततोदेवीहिमाचलमगाद्रुषा व्यतीतेवत्सरेपूर्णेश्रावणेमासिचागते गणेशपूजनार्थंनानागकन्याःसमागताः दृष्टवान्नर्मदातीरेस्त्रीवृंदंबहुभूषितं बालउवाच किमर्थंचागताबालाःकिंचात्रक्रियतेधुना भवतीभिःपूज्यतेकःकिंफलंवदताद्यमे नागकन्याऊ॰ वत्सपूजागणेशस्यक्रियतेस्माभिरुत्तमा पूजितेतुजगन्नाथेलभतेवांछितंध्रुवम् बालउ॰ कथंपूज्योगणाध्यक्षःकियत्कालंवदाद्यभोः कोविधिःकेचसंभाराःकदापूज्योगणेश्वरः नागकन्याऊचुः श्रावणेमासिसंप्राप्तेचतुर्थ्यांचरवगोदये तिलामलककल्केनस्नानंकुर्याज्जलाशये शुक्लपक्षेसमारभ्ययावत्कृष्णादशमीभवेत् मध्यान्हेपूजयेत्तावदेकविंशद्दिनावधि एकविंशतिदूर्वाभिस्तावत्पुष्पैःशुभैःसदा मोदकैरेकविंशैश्चपूजयेत्सत्यहंजनः मोदकादशविप्रायदानव्याश्चसदक्षिणाः एकंगणाधिपेदत्वास्वयंचाद्याद्दशैवतु पूजामौनेनकर्त्तव्याभोजनंचतथानघ ब्रह्मचारीभूमिशायीशूद्रभाषणवर्जितः हविष्याशीतथाभूयाच्छुचिरंतर्बहिःसदा एवंनियममास्थायपूजांकुर्यात्सदाव्रती ताम्रपात्रेजलंगृह्यगंधपुष्पसमन्वितं फलरत्नसमायुक्तमर्घ्यंदद्याद्गणाधिपे दक्षिणांतेसदावत्सएकविंशन्निवेदयेत् पूजासमासौविप्रायवायनंचसमर्पयेत् गणेशायनमस्तेस्तुपार्वतीनंदनायच गंधपुष्पसमायुक्तंगृहाणार्घ्यंनमोस्तुते गणेशप्रीतयेतुभ्यंवायनंदशमोदकं दक्षिणाफलसंयुक्तंवंशपात्रेसुकल्पितम् गणेशःप्रतिगृण्हातिगणेशोवैददातिच गणेशस्तारकोभाभ्यांगणेशायनमोनमः एवंपूज्योगणाध्यक्षोनार्मदोभक्तितःशुभः गणेशेपूजितेवत्सतवसिद्धिर्भविष्यति एवमुक्त्वागतादेव्योनागकन्याःशुचिस्मिताः बालकेनकृतंपश्चादन्यस्मिन्वत्सरेततः श्रावणेमासिसंप्राप्तेशुक्लपक्षेतिथौशुभे चतुर्थ्यांकृतसंभारोव्रतंजग्राहबालकः गणेशंनार्मदंतत्रएकविंशद्दिनावधि विधिवत्पूजयामासनमस्कृत्यगणेश्वरम् गणेशोवरदोजातोयाचयस्वयदीप्सितम् श्रुत्वावाक्यंगणेशस्यहर्षनिर्भरमानसः बालउ॰ नमस्कृत्यगणेशानंवरंदेहिनमोस्तुते पादयोर्मेबलंदेहिवासंशंकरसन्निधौ गणेशउवा॰ यथेच्छसितथैवास्तुपार्वत्याःप्रीतिरस्तुते इत्युक्त्वातुगणेशो-

सौनत्रैवांतर्दधेविभुः दृढपादश्चबालोसौकैलासमगमत्ततः दृष्ट्वाहरस्यचरणौशिरसाजगृहेशुभौ शिवउवाच उत्तिष्ठवत्सतेपादौ
कथंजातौदृढौवद कस्यप्रदात्त्वमिहआगतोसिममालयम् बालउवाच कृतंमयागणेशस्यएकविंशद्दिनात्मकम् श्रुतंचनागकन्याभ्यस्तद्व्रतंपूजनंमया तेनपुण्यप्रभावेनप्राप्तोहंतवसंनिधौ गणेशस्यप्रसादेनशरीरंदृढतांगतम् शिवउ० कीदृशंतद्व्रतंब्रूहि
करिष्येहंचतद्व्रतम् वल्लभायादर्शनार्थंपार्वत्यारोषशांतये बालउवा० श्रावणेशुक्लपक्षेतुचतुर्थ्यांचसमारभेत् श्रावणेबहुलेप
क्षेदशम्यांचसमापयेत् गणेशंपूजयेन्नित्यमेकविंशद्दिनावधि एकविंशतिदूर्वाभिःपुष्पैरपितथैवच कर्त्तव्यामोदकास्तत्रएकविं
शतिसंख्यकाः दशविप्रायदत्वातुएकंदेवेनियोजयेत् अवशिष्टाःस्वयंभक्ष्याः श्रुतमेवंमयाविभो किंमयाद्यत्वयाज्ञप्तंकर्त्तव्यं
वर्तनेविभो आचरच्छंभुरप्येवंगणेशस्यव्रतंशुभम् पूजनात्तुगणेशस्यपार्वत्याश्चलितंमनः हिमाचलंनमस्कृत्य वचनंचेदमब्रवी
त् पार्वत्युवाच गम्यतेद्यमयातातकैलासंनिजमंदिरम् शिवस्यचरणौद्रष्टुमुत्सुकंमेमनोभवत् शीघ्रंदेहिममाज्ञांभोःक्षणंस्था
तुंनशक्यते हिमाचलउ० प्रेषयिष्येक्षणंतिष्ठविमानेनार्कवर्चसा सैन्यंददामिरक्षार्थंनवमार्गेशुचिस्मिते पितृवाक्यंसमाकर्ण्य
विमानंचारुरोहसा क्षणमात्रेणसायाताकैलासभवनोत्तमं दृष्ट्वामहेश्वरंदेवंप्रणनामविहस्यच किंकृतंभोनजानीममनोमेचाहृ
तंत्वया वाक्यंश्रुत्वाप्रियायाश्चमनसाचालिलिंग्यताम् अवदत्कारणंतस्याहरणेमनसोध्रुवम् शिवउवाच कृतंमयागणेशस्य
पूजनंतवहेतवे तेनपुण्यप्रभावेनआगतात्वंममांतिकम् पार्वत्युवाच कथंपूज्योगणाध्यक्षोवदमह्यंजगद्विभो अहमद्यकरिष्या
मिसेनानीदर्शनायच शंकरउवाच कुरुदेविगणेशस्यपूजनंचयथाविधि एकविंशतिदूर्वाभिःपुष्पैर्नानाविधैःशुभैः मोदकैरेक
विंशैश्चएकविंशद्दिनानिच अर्घ्यैस्तावतिसंख्याकैस्तथाब्राह्मणतर्पणैः त्रिलोचनमुखाच्छ्रुत्वागणेशः पूजितस्तथा एकविंशद्दि
नात्पश्चात्कुमारोभ्यगमत्स्वयम् स्कंदंदृष्ट्वातदादेव्यास्तनाभ्यांनिर्झरावभुः स्तनमालिंग्यसादेवीचुचुंबेचमुखंपुनः वत्साद्यचमुखंदृष्टं
गणेशस्यप्रसादतः बहुकालंचमांत्यक्त्वागतःषण्मुखबालक कृतकृत्याद्यजातास्मिदर्शनात्तेनसंशयः रोषंत्यजमहाबुद्धेशपथंतेव

दाम्यहं स्कंदउवा॰ मातर्वदगणेशस्यपूजनंचयथाश्रुतम् विश्वामित्रंचराजानंममभित्रंवदाम्यहम् पार्वत्युवाच वदमित्रंग
णेशस्यपूजनंकुरुभक्तितः एकविंशतिदूर्वाभिः पुष्पैरप्येकविंशतिः कर्तव्यामोदकास्तत्रएकविंशतिसंख्यकाः दशविप्रायदातव्याः
स्वयंचाद्याद्दशैवच एकंगणाधिपेदत्वा अर्घ्याण्यपितथैवच पूजयस्वगणाध्यक्षमेकविंशद्दिनावधि इदंव्रतंगणेशस्यभक्तितोयः
करिष्यति तस्यकार्याणिसिध्यंतिमनसाचिंतितानिच व्रतराजविधिंश्रुत्वासेनानीश्चतथाकरोत् सेनानीनामग्रणीत्वंसमवाप्य
शुचिव्रतः कथयामासविप्रायविश्वामित्रेनराधिपे सोपिराजानमस्कृत्यव्रतंतत्स्वयमाचरत् गणेशोवरदोजातोविश्वामित्राय
तत्क्षणात् गणेशउवा॰ वदराजन्किमिच्छास्तिददामितवयाचितं विश्वामित्रउ॰ देहिदेवप्रसन्नश्चेत्मांविप्रर्षित्वमस्त्वि
ति प्राप्तेनविप्रर्षित्वेनसर्वेप्राप्तामनोरथाः गणेशउवा॰ विप्रर्षित्वंचराजेंद्रप्राप्स्यसिब्रह्मपुत्रतः वसिष्ठाद्ब्राह्मणश्रेष्ठान्ममवाक्यं
नसंशयः एवमुक्त्वागणेशोसौपूजितोभूमिपेनसः पुनरन्यंवरंचादात्पूजकानांहितायवै यदायदाचराजेंद्रसंकटंचकलौभुविभविष्य
तिजनानांहिकर्तव्यंपूजनंमम स्मरिष्यंतिचमांभक्त्यानमस्कृत्यपुनःपुनः तेषांदुःखानिसर्वाणिनाशयामिनसंशयः एवंदत्वावरा
न्सम्यक्तथैवांतर्हितोभवत् सनत्कुमारयोगींद्रपार्वत्यासुखपद्मतः श्रुतंमयाचत्रेतायांगणेशस्यव्रतंमहत् निवेदितंचतत्सर्वंकुरुवि
प्रतपोनिधे सनत्कुमारउ॰ महदाख्यानकंश्रुत्वातृप्तोहंतन्नसंशयः एवमुक्त्वागतोयोगीनमस्कृत्यषडाननं सनत्कुमारसेनानी-
संवादंचयथाश्रुतम् व्यासप्रसादाच्छ्रुतवांस्तथातुभ्यंनिवेदितः इदंव्रतंगणेशस्यकरिष्यतिचमानवः तस्यकार्याणिसर्वाणिसि
द्धिंयास्यंतिसत्वरम् किमन्यद्भोजनश्रेष्ठाःश्रोतुकामास्तपोधनाः तत्सर्वंकथयिष्यामिवक्तव्यंयदिवेच्छथ यइदंशृणुयाद्भक्त्या
आख्यानंचसमाहितः तदीप्सितानिकार्याणिसलभेन्निश्चितंभुवि शौनकाद्योऋषिगणःश्रुत्वासूतवचोद्भवम् पौराणिकंनम
स्कृत्यविररामासनेशुभे इतिश्रीभविष्योत्तरपुराणेस्कंदसनत्कुमारसंवादेतृतीयोल्लासेएकविंशतिदिनगणपतिव्रतकथा
संपूर्णा अन्यच्चश्रावणशुक्लचतुर्थीमारभ्यमाघशुक्लचतुर्थीपर्यंतंदूर्वागणपतिव्रतंस्कांदे तत्रविधिः मासपक्षा-

द्यु ल्लिख्य ममसमस्तपापक्षयपूर्वकसप्तजन्मराज्यसौभाग्या दिविघ्नक्षये उमामहेश्वरसायुज्यतासिद्ध्यर्थेषण्मासपर्यंतंगणपति
प्रीत्यर्थंदूर्वाव्रतंकरिष्ये षोडशोपचारैःपूजयेत् सूतउवाच कैलासशिखरेरम्येसर्वदेवनिषेविते सिद्धसंघसमाकीर्णेगंध
र्वगणसेविते देव्यासहमहादेवोदीव्यंस्त्वक्षैर्विनोदतः जितासित्वंजितेत्याहपार्वतींपरमेश्वरः सापित्वंजितइत्याहसविवादस्तयो
रभूत् चित्रनेमिस्तदाद्रष्टा मृषावादमभाषत तदाक्रोधसमाविष्टागौरीशापंददौततः प्रसादितानतस्तेनविशापंकुरुपार्वति पार्वत्यु
वाच यदासरोवरेरम्येचरिष्यतिभवान्भुवि तदास्वर्गणिकाःसर्वावीक्ष्यंतित्वांसमागताः तदाभवविशापस्त्वमित्युक्तःसपपातहत
तः कतिपयाहोभिः कुष्ठोनंतसरोवरे कुष्ठोभूत्वावसंस्तत्रददर्शस्वर्विलासिनीः ततस्ताःसागरंगत्वापप्रच्छप्रणिपत्यताः क्रियतेकिं
महाभागाःपूजायांवांछितंचकिम् ततस्ताअब्रुवंस्तस्मैदूर्वाविघ्नेश्वरव्रतम् क्रियतेस्माभिरिहचपरत्राभीष्टसिद्धये ततोब्रवीच्चित्र
नेमिर्व्रतंमेदातुमर्हथ येनाहंगिरिजाशापान्मुच्येयंचिरदुःखितः ततस्ताअब्रुवन्सर्वाव्रतमेतदनुत्तमम् दूर्वाविघ्नेश्वरोयत्रपूज्यतेसर्व
सिद्धिदः शुक्लपक्षेचतुर्थीयाभानुवारेणसंयुता तस्यांतिथौसमारभ्यषण्मासंव्रतमाचरेत् प्रत्यहंषड्नमस्काराःषड्दूर्वाःषड्प्रद-
क्षिणाः शुक्लपक्षेचतुर्थ्यांचप्रत्येकंचैकविंशतिः एकभक्तंचकर्तव्यंकथांचशृणुयादिमां ध्यायेद्विनायकंदेवंसमाहितमनाःसदा
तरुणारुणसंकाशंसर्वाभरणभूषितं जटाकलापस्कभगंकुंकुमेनापराजितम् गजाननंप्रसन्नास्यंसिंदूरतिलकांकितम् विशाल
वक्षसं भानु मुक्तामणिविभूषितम् चतुर्भुजमुदारांगंकिंकिणीकंकणैर्युतं पाशांकुशधरंदेवंदंतमोदकधारिणं महोदरंमहानागं
बद्धकुक्षिंमुदान्वितम् स्कंदरांशुकसंवीतमिभास्यमपराजितम् प्रणतामरसंदोहमौलिमाणिक्यरश्मिभिः विराजितांघ्रिकमलंस
र्वदेवनमस्कृतम् अभीष्टफलदंदेवंसर्वभूतोपकारकम् एवंध्यात्वाजपेन्नित्यंविनायकमतंद्रितः एवंचरित्वाषण्मासान्शुचिःसत्य
परायणः पश्चाद्गंधादिदूर्वाभिरर्चयेत्तंसदापुनः उद्यापनंप्रकर्तव्यंदेशकालानुसारतः ततोमगधदेशस्यमानेनयवपिष्टकं दशमा
नकमादायदशाष्टावपिमोदकान् कृत्वाघृतप्लुतान्सम्यक्षट्देवायषडात्मने षट्चविप्रायदातव्याःश्रोत्रियायकुटुंबिने विनायको

गणाध्यक्षोविघ्नेशः श्रीगणाधिपः वरदःसमुखश्चैव दूर्वाषड्कैः प्रपूजयेत् षड्दूर्वाश्चतथादद्यान्महापूजांप्रकल्पयेत् एवंकुरुमहेशान प्रीत्यर्थमभिवांछितम् तथेत्युक्त्वाचित्रनेमिः प्रीणयित्वाविनायकम् शापान्मुक्तस्ततःशंभुमभ्यगात्प्रहसन्निव शंकरेणततःपृष्टश्चित्रनेमिस्तथाजगौ व्रतंश्रुत्वाततःशंभुर्गणेशस्यकुतूहलात् गौरीकोपप्रसादायशिवोपिकृतवानथ शिवेनोक्तंव्रतंचक्रेगणेशस्यप्रसादजम् कार्तिकेयोपिसंप्राप्तःसेनानीत्वंचतन्महत् व्रतंचकारनंदीचकार्तिकेयोक्तमादरात् सोपिराजाप्रसादायपुत्रार्थंचचकारह ततःक्रमेणलोकेस्मिन्प्रचुरीभूतमुत्तमं व्रतंदूर्वागणेशस्यसर्वसिद्धिकरंपरम् शोकव्याधिभयोद्वेगबंधव्यसनदुःखतः विमुक्तःपुत्रपौत्रादिधनधान्यसमावृतः इहलोकेसुखीभूत्वापश्चाच्छिवपुरंव्रजेत् व्रतेनानेनदूर्वाख्यविघ्नेशस्यप्रसादतः यःपठेत्परयाभक्त्याकथामेतांदिनेदिने शृणुयाद्वापिसततंसर्वसिद्धिमवाप्नुयात् इतिस्कंदपुराणोक्तंदूर्वागणपतिव्रतोद्यापनंसंपूर्णम् अथभाद्रपदशुक्लचतुर्थ्यांसिद्धिविनायकव्रतंहेमाद्रौस्कांदे तच्चमध्यान्हव्यापिन्यांकार्यम् प्रातःशुक्लतिलैःस्नात्वामध्यान्हेपूजयेन्नृप पार्थिवस्यगणेशस्यतत्रैवंपूजनंचरेत् दिनद्वयेतद्व्याप्तौएकदेशव्याप्तौवापूर्वाऽन्यथापराचतुर्थीगणनाथस्यमातृविद्धाप्रशस्यते मध्यान्हव्यापिनीसातुपरतश्चेत्परेहनि इतिबृहस्पत्युक्तेः अथव्रतविधिः मासपक्षाद्युल्लिख्यममेहजन्मनिजन्मांतरेचपुत्रपौत्रधनविद्याजययशःस्त्रीकामायुष्याभिवृद्ध्यर्थंसिद्धिविनायकप्रीत्यर्थंयथाज्ञानेनपुरुषसूक्तपुराणोक्तमंत्रैर्ध्यानावाहनादिषोडशोपचारैःपंचामृतैःसहपार्थिवगणपतिपूजनंकरिष्ये तथात्वमूर्तौप्राणप्रतिष्ठादिकमासनादिकलशाराधनंपुरुषसूक्तन्यासंचकरिष्ये पार्थिवमूर्तौदेवस्थापनं हेरंबाय० मृदाहरणं सुमुखाय० संघट्टनं गौरीसुताय० स्थापनं अथप्राणप्रतिष्ठांकुर्यात् अस्यश्रीप्राणप्रतिष्ठामंत्रस्य ब्रह्मविष्णुमहेश्वराऋषयः ऋक्यजुःसामाथर्वाणिच्छंदांसि क्रियामयवपुःप्राणाख्यादेवता आंबीजं ह्रींशक्तिः क्रौंकीलकं अस्यांमूर्तौप्राणप्रतिष्ठापनेविनियोगः ॐ आंह्रींक्रौं अंयंरंलंवंशंषंसंहंळंक्षंअः अस्यांमूर्तौप्राणास्तिष्ठंतु पुनः ओं० अस्यांमूर्तौजीवइहस्थितः पुनः ॐ आं० अस्यांमूर्तौसर्वेंद्रियाणिश्रोत्रत्वक्चक्षुर्जिह्वाघ्राणवाक्पाणिपादपायूपस्थानिइहैवागत्यसुखंचिरंतिष्ठंतुस्वाहा असुनीतेपुनरितिऋचंपठित्वा

गर्भाधानादिपंचदशसंस्कारसिध्यर्थं पंचदशप्रणवावृत्तीः करिष्ये ॐ १५ तच्चक्षुर्देवहितं० देवस्याज्येननेत्रोन्मीलनंकृत्वापंचोपचारपूजनंकुर्यात् अथध्यानं एकदंतंशूर्पकर्णंगजवक्त्रंचतुर्भुजं पाशांकुशधरंदेवंध्यायेत्सिद्धिविनायकं ध्यायेदेवंमहाकायंतप्तकांचनसंनिभं दंताक्षमालापरशुपूर्णमोदकहस्तकम् मोदकासक्तशुंडाग्रमेकदंतंविनायकम् ध्यानं० आवाहयामिविघ्नेशसुरराजार्चितेश्वर अनाथनाथसर्वज्ञपूजार्थंगणनायक सहस्रशीर्षेत्यावाहनं· विचित्ररत्नरचितंदिव्यास्तरणसंयुतं स्वर्णसिंहासनंचारुगृहाणसुरपूजित पुरुषएवेदं० आसनं· सर्वतीर्थसमुद्भूतंपाद्यंगंधादिसंयुतं विघ्नराजगृहाणेदंभगवन्भक्तवत्सल एतावा० पाद्यं· अर्घ्यंचफलसंयुक्तंगंधपुष्पाक्षतैर्युतं गणाध्यक्षनमस्तेस्तुगृहाणकरुणानिधे त्रिपादूर्ध्व० अर्घ्यं· दध्याज्यमधुसंयुक्तंमधुपर्कंमयाहृतं गृहाणसर्वलोकेशगणनाथनमोस्तुते मधुपर्कं० विनायकनमस्तुभ्यंत्रिदशैरभिवंदित गंगोदकेनतोयेनशीघ्रमाचमनंकुरु तस्माद्विराळेत्याचमनीयं· पयोदधिघृतंचैवशर्करामधुसंयुतं पंचामृतेनस्नपनात्प्रीयतांगणनायकः पंचामृतस्नानं· गंगादिसर्वतीर्थेभ्यआनीतंतोयमुत्तमम् भक्त्यासमर्पितंतुभ्यंगृणहीषाभीष्टदायक यत्पुरुषेणस्नानं० रक्तवस्त्रमिदंदेवदिव्यकांचनसंभवसर्वप्रदगृहाणेदंलंबोदरहरात्मज तंयज्ञमितिवस्त्रं० राजतंब्रह्मसूत्रंचकांचनंचोत्तरीयकं गृहाणचारुसर्वज्ञभक्तानांवरदोभव तस्माद्यज्ञा० उपवस्त्रं· यज्ञोपवीतं० उद्यद्भास्करसंकाशंसंध्यावदरुणंप्रभो वीरालंकरणंदिव्यंसिंदूरंप्रतिगृह्यतां सिंदूरं० नानाविधानिदिव्यानिनानारत्नोज्ज्वलानिच भूषणानिगृहाणेशपार्वतीप्रियनंदन आभरणानि कस्तूरीचंदनंचैवकुंकुमेनसमन्वितम् विलेपनंसुरश्रेष्ठचंदनंप्रतिगृह्यतां तस्माद्यज्ञात्सर्वहुतेतिगंधं० रक्ताक्षतांश्चदेवेशगृहाणद्विरदानन ललाटपटलेचंद्रस्तस्योपर्यवधार्यताम् अक्षतान् माल्यादीनिसुगंधीनिमालत्यादीनिवैप्रभो मयाहृतानिपुष्पाणिपूजार्थंप्रतिगृह्यताम् करवीरैर्जातिकुसुमैश्चंपकैर्बकुलैःशुभैः शतपत्रैश्चकल्हारैरर्चयेद्गणनायकम् तस्मादश्वेतिपुष्पाणि अथांगपूजा गणेश्वरायनमः पादौपूजयामि विघ्नराजाय० जानुनीपू० आखुवाहनाय० ऊरूपू० हेरंबाय० कटीपू० कामारिसूनवे० नाभिंपू० लंबोदराय० उदरंपूज० गौरीसुताय० स्तनौपू० गणनायका० हृदयंपू० स्थूलक

र्णाय॰ कंठंपू॰ स्कंदाग्रजाय॰ स्कंधौपू॰ पाशहस्ताय॰ हस्तौपू॰ गजवक्त्राय॰ वक्त्रंपू॰ विघ्नहर्त्रे॰ ललाटंपू॰ सर्वेश्वराय॰ शिरःपू॰ गणाधि
पाय॰ सर्वांगंपू॰ अथपत्रपूजा सुमुखाय॰ मालतीपत्रंसं॰ गणाधिपाय॰ भृंगराजपत्रं॰ उमापुत्राय॰ बिल्वपत्रंसं॰ गजाननाय॰ श्वेत
दूर्वांप॰ लंबोदराय॰ बदरीपत्रंसं॰ हरसूनवेन॰ धत्तूरपत्रंसं॰ गजकर्णकाय॰ तुलसीपत्रं॰ वक्रतुंडाय॰ शमीपत्रंसं॰ गुहाग्रजाय॰ अपामा
र्गपत्रं॰ एकदंताय॰ बृहतीपत्रंसं॰ विकटाय॰ करवीरपत्रं॰ कपिलाय॰ अर्कपत्रं॰ गजदंताय॰ अर्जुनपत्रंसं॰ विघ्नराजाय॰ विष्णुक्रांतापत्रं॰
बटवेनमः दाडिमीप॰ सुराग्रजाय॰ देवदारुप॰ भालचंद्राय॰ मरुप॰ हेरंबाय॰ अश्वत्थपत्रंसं॰ चतुर्भुजाय॰ जातीपत्रं॰ विनायकाय॰ केत
कीप॰ सर्वेश्वराय॰ अगस्तिपत्रं॰ २१ दशांगंगुग्गुलंधूपंसुगंधंचमनोहरम् गृहाणसर्वदेवेशउमापुत्रनमोस्तुते यत्पुरुषंव्यदधुः॰ धू
पं॰ सर्वज्ञसर्वलोकेशत्रैलोक्यमितिरापहं गृहाणमंगलंदीपंरुद्रप्रियनमोस्तुते ब्राह्मणोस्य॰ दीपं॰ नैवेद्यंगृह्यतांदेवभक्तिंमेह्यचलां
कुरु ईप्सितंमेवरंदेहिपरत्रचपरांगतिं नानाखाद्यमयंदिव्यंतुष्ट्यर्थंतेनिवेदितम् मयाभक्त्याशिवापुत्रगृहाणगणनायक चंद्रमाम-
नसो॰ नैवेद्यं॰ एलोशीरलवंगादिकर्पूरपरिवासितम् प्राशनार्थंकृतंतोयंगृहाणगणनायक मध्येपानीयं॰ उत्तरापोशनं॰ मुखप्रक्षाल
नं॰ मलयाचलसंभूतंकर्पूरेणसमन्वितं करोद्वर्तनकंचारुगृह्यतांजगतःपते करोद्वर्तनं॰ बीजपूराम्रपनसखर्जूरीकदलीफलं ना
रिकेलफलंदिव्यंगृहाणगणनायक इदंफलंमया॰ फलं॰ एकविंशतिसंख्याकान्मोदकान्घृतपाचितान् नैवेद्यंसफलंदद्यान्नमस्ते
विघ्ननाशिने गणेशाय॰ मोदकार्पणं पूगीफलंमहद्दिव्यंनागवल्लीदलैर्युतं कर्पूरैलासमायुक्तंतांबूलंप्रतिगृह्यताम् तांबूलं॰ हि
रण्यगर्भेतिदक्षिणां॰ वज्रमाणिक्यवैडूर्यमुक्ताविद्रुममंडितम् पुष्परागसमायुक्तंभूषणंप्रतिगृह्यतां भूषणानि दूर्वायुग्मंगृहा
णेदंगंधपुष्पाक्षतैर्युतम् पूजयेत्सिद्धिविघ्नेशंप्रत्येकंपूर्वनामभिः गणाधिपनमस्तेस्तुउमापुत्राघनाशन एकदंतेभवक्त्रेतितथामूष
कवाहन विनायकेशपुत्रेतिसर्वसिद्धिप्रदायक कुमारगुरवेतुभ्यंपूजनीयःप्रयत्नतः इतिदूर्वार्पणं चंद्रादित्यौचधरणीवि
द्युदग्निस्तथैवच त्वमेवसर्वतेजांसिआर्तिक्यंप्रतिगृह्यताम् नीराजनम् विघ्नेश्वरविशालाक्षसर्वाभीष्टफलप्रद प्रदक्षिणां

करोमित्वांसर्वान्कामान्प्रयच्छमे नाभ्याआसीतिप्रदक्षिणां॰ नमस्तेविघ्नसंहर्त्रेनमस्तेईप्सितप्रद नमस्तेदेवदेवेशनमस्तेगणना
यक सप्तास्यास॰ नमस्कारान् विनायकेशपुत्रेतिगणराजसुरोत्तम देहिमेसकलान्कामान्वंदेसिद्धिविनायक यज्ञेनयज्ञ॰
मंत्रपुष्पांजलिं॰ अथैकविंशतिंगृह्यमोदकान्घृतपाचितान् स्थापयित्वागणाध्यक्षसमीपेकुरुनंदन दशविप्रायदातव्यास्थाप-
येद्दशआत्मनि एकंगणाधिपेदद्यात्सघृतंमोदकंशुभं दशानांमोदकानांचफलदक्षिणयायुतम् विप्रायतवतुष्ट्यर्थंवायनंतेददाम्य
हं वायनमंत्रः विनायकस्यप्रतिमांवस्त्रयुग्मेनवेष्टिताम् तुभ्यंसंप्रददेविप्रप्रीयतांमेजनार्दनः विनायकगणेशानसर्वदेवन
मस्कृत पार्वतीप्रियविघ्नेशममविघ्नंविनाशय इतिप्रार्थना अथकथा शौनकाद्याऋषिगणानैमिषारण्यवासिनः सूतंपौ
राणिकश्रेष्ठमिदमूचुर्वचस्तदा ऋषयऊचुः निर्विघ्नेनतुकार्याणिकथंसिद्ध्यंतिसूतज अर्थसिद्धिःकथंनृणांपुत्रसौभाग्यसंप
दः दंपत्योःकलहेचैवबंधुभेदेतथानृणां उदासीनेषुलोकेषुकथंसुसुखताभवेत् विद्यारंभेतथानृणांवाणिज्येच कृषौयथा नृपतेःप
रचक्रस्यजयसिद्धिःकथंभवेत् कांदेवतांनमस्कृत्यकार्यसिद्धिर्भवेन्नृणाम् एतत्समस्तंविस्तार्यब्रूहिमेसूतपृच्छतः सूतउवाच
सन्नद्धयोःपुराविप्राःकुरुपांडवसेनयोः पृष्टवान्देवकीपुत्रंकुंतीपुत्रोयुधिष्ठिरः युधिष्ठिरउ॰ निर्विघ्नेनजयंमह्यंवदत्वंदेवकीसुत
कांदेवतांनमस्कृत्यसम्यग्राज्यंलभेमहि कृष्णउ॰ पूजयस्वगणाध्यक्षमुमामलसमुद्भवम् तस्मिन्संपूजितेदेवेध्रुवंराज्यम
वाप्स्यसि मासिभाद्रपदेशुक्लेचतुर्थ्यांपूजयेन्नृप मासिमाघेश्रावणेवामार्गशीर्षेतथाभवेत् गजवक्त्रंतुशुक्लायांचतुर्थ्यांपूजयेन्नृ
प यदाचोद्भवतेभक्तिस्तदापूज्योगणाधिपः प्रातःशुक्लतिलैःस्नात्वामध्यान्हेपूजयेन्नृप निष्कमात्रसुवर्णेनतदर्धार्धेनवापुनः स्वश
क्त्यागणनाथस्यस्वर्णरौप्यमयाकृतिं अथवामृन्मयींकुर्याद्वित्तशाठ्यंनकारयेत् एकदंतंशूर्पकर्णंगजवक्त्रंचतुर्भुजं पाशांकुशध
रंदेवंध्यायेत्सिद्धिविनायकं कृत्वापूजांप्रयत्नेनस्नाप्यपंचामृतैःपृथक् गणाध्यक्षेतिनाम्नावैगंधंदद्याच्चभक्तितः आवाहनार्घ्यपाद्यं
चदत्वापश्चात्प्रयत्नतः रक्तवस्त्रयुगंचैवदद्याद्देवायभक्तितः विनायकेतिपुष्पाणिधूपंचोमासुतायच दीपंरुद्रप्रियायेतिनैवेद्यंविघ्न

नाशिने किंचित्सुवर्णपूजांचतांबूलंचसमर्पयेत् ततोदूर्वांकुरान्गृह्यविंशतिंचैकमेवहि पूजनीयःप्रयत्नेनएभिर्नामपदैःसह गणाधिपनमस्तेस्तुउमापुत्राघनाशन विनायकेशपुत्रेतिसर्वसिद्धिप्रदायक एकदंतेभवक्त्रेतितथामूषकवाहन कुमारगुरवेतुभ्यंपूजनीयःप्रयत्नतः दूर्वायुग्मंगृहीत्वातुगंधपुष्पाक्षतैर्युतम् एकैकेनतुनाम्नावैदत्वैकंसर्वनामभिः अथैकविंशतिंगृह्यमोदकान्घृतपाचितान् स्थापयित्वागणाध्यक्षसमीपेकुरुनंदन दशविप्रायदातव्याःस्वयंग्राह्यास्तथादश एकंगणाधिपेदद्यात्सुनैवेद्यंनृपोत्तम विनायकस्यप्रतिमांब्राह्मणायनिवेदयेत् तुभ्यंसंप्रददेदेवप्रीयतांमेगजाननः विनायकगणेशत्वंसर्वदेवनमस्कृत पार्वतीप्रियविघ्नेशममविघ्नंविनाशय गणेशःप्रतिगृण्हातिगणेशोवैददातिच गणेशस्तारकोभाभ्यांगणेशायनमोनमः कृत्वानैमित्तिकंकर्मपूजयेदिष्टदेवताम् ब्राह्मणान्भोजयेत्पश्चाद्भुंजीयात्तैलवर्जितः एवंकृतेधर्मराजगणनाथस्यपूजने विजयस्तेभवेन्नूनंसत्यंसत्यंमयोदितं वैष्णवाद्याःस्कंदीक्षास्तु आदौपूज्योगणाधिपः तस्मिन्संपूजितेविष्णुरीशोभानुस्तथाक्षमा हव्यवाहसुरवादेवाःपूजितास्युर्नसंशयः चंडिकाद्यामातृगणाःपरितुष्टाभवंतिच तस्मिन्संपूजितेविप्राभक्त्यासिद्धिविनायके यइदंशृणुयान्नित्यंश्रावयेद्वासमाहितः सिद्ध्यंति-सर्वकार्याणिविनायकप्रसादतः इतिसिद्धिविनायकव्रतंभविष्योक्तंसंपूर्णं मासिभाद्रपदेशुक्लेशिवलोकेप्रपूजिता तस्यांस्नानंतथादानंउपवासोर्चनंतथा क्रियमाणंशतगुणंप्रसादाद्यांतिकोनृप चतुर्थीत्यनुषंगः अस्यामेवचंद्रदर्शनेदोषमाहपराशरः कन्यादित्येचतुर्थ्यांचशुक्लेचंद्रस्यदर्शनं मिथ्याभिदूषणंकुर्यात्तस्मात्पश्येन्नतंसदा तद्दोषशांतयेजाप्यंविष्णुनोक्तंसमंत्रकं सिंहःप्रसेनमवधीत्सिंहोजांबवताहतः सुकुमारकमारोदीस्तवह्येषःस्यमंतकः अथस्यमंतकोपाख्यानं नंदिकेश्वरउवाच शृणुष्वेकाग्रचित्तःसन्व्रतंगाणेश्वरंमहत् चतुर्थ्यांशुक्लपक्षेतुसदाकार्यंप्रयत्नतः सनत्कुमारयोगींद्रयदीच्छेच्छुभमात्मनः नारीवापुरुषोवापियःकुर्याद्विधिवद्व्रतं मोचयत्याशुविप्रेंद्रसंकष्टाद्धृतिनंहितत् अपवादहरंचैवसर्वविघ्नप्रणाशनं कांतारेविषमेवापिरणेराजकुलेथवा सर्वसिद्धिकरंविधिव्रतानामुत्तमंव्रतं गजाननप्रियंचाथत्रिषुलोकेषुविश्रुतं अतोनविद्यते

ब्रह्मन्सर्वसंकष्टनाशनं सनत्कुमारउ॰ केनचादौपुराचीर्णमर्त्यलोकेकथंगतम् एतत्समस्तंविस्तार्यब्रूहिगाणेश्वरंमहत् नं
दिकेश्वरउ॰ चक्रेव्रतंजगन्नाथोवासुदेवःप्रतापवान् आदिष्टोनारदेनैववृथालांछनमुक्तये सनत्कुमारउ॰ षड्गुणैश्वर्यसंपन्नःसृ
ष्टिसंहारकारकः वासुदेवोजगद्व्यापीप्राप्तवान्लांछनंकथं एतदाश्चर्यमाख्यातंब्रूहित्वंनंदिकेश्वर नंदिकेश्वरउ॰ भूमिभारनिवृत्यर्थं
वसुदेवसुतावुभौ रामकृष्णौसमुत्पन्नौपद्मनाभफणीश्वरौ जरासंधभयात्कृष्णोद्वारकांसमकल्पयत् विश्वकर्माणमाहूयपुरीं-
हाटकनिर्मिताम् तत्रषोडशसाहस्रंस्त्रीणांचैवशताधिकं भवनानिमनोज्ञानितेषांमध्येव्यकल्पयत् पारिजाततरुंमध्येतासांभो
गायकल्पयत् यादवानांगृहास्तत्रषट्पंचाशतकोटयः अन्येपिबहवोलोकावसंतिविगतज्वराः यत्किंचित्त्रिषुलोकेषुसुंदरंतत्रदृ
श्यते सत्राजितप्रसेनाख्यौपुत्रावुग्रस्यविश्रुतौ अंभोधितीरमासाद्यतन्मनस्कतयाचसः सत्राजितस्तपस्तेपेसूर्यमुद्दिश्यबुद्धिमान्
व्रतंनिरशनंगृह्यसूर्यसंबद्धलोचनः ततःप्रसन्नोभगवान्सत्राजितपुरस्थितः सत्राजितोपितुष्टावदृष्ट्वादेवंदिवाकरं तेजोराशेनम-
स्तेस्तुनमस्तेसर्वतोमुख विश्वव्यापिन्नमस्तेस्तुहरिदश्वनमोस्तुते ग्रहराजनमस्तेस्तुनमस्तेचंडरोचिषे वेदत्रयनमस्तेस्तुसर्वदेव
नमोस्तुते प्रसीदपाहिदेवेशसुदृष्ट्यामांदिवाकर इत्थंसंस्तूयमानोसौदेवदेवोदिवाकरः स्निग्धगंभीरमधुरंसत्राजितमुवाचह
सूर्यउवा॰ वरंब्रूहिप्रदास्यामियत्तेमनसिवर्त्तते सत्राजितमहाभागतुष्टोहंतवनिश्चयात् सत्राजितउ॰ स्यमंतकमणिंदेहियदितु
ष्टोसिभास्कर ददौतस्यचतद्रत्नंस्वकंठादवतार्यसः भास्करउ॰ भाराष्टकंशातकुंभंस्रवतेसौमहामणिः शुचिष्मतासदाधार्यर
त्नमेतन्महोत्तमं सत्राजितक्षणेनैनहूंतिह्यशुभमानसम् इत्युक्त्वांतर्दधेदेवस्तेजोराशिर्दिवाकरः तत्कंठरत्नज्वलमानरूपीपु
रींसकृष्णास्यविवेशसत्वरं दृष्ट्वातुलोकामनसादिवाकरंसंचिंतयंतोहिविनष्टदृष्टयः समागतोयंहरिदश्वदीधितिर्जनार्दनंद्रष्टुम
संशयेन नायंसहस्रांशुरितीहलोकाः सत्राजितोयंमणिकंठभास्वान् स्यमंतकंमहारत्नंदृष्ट्वातत्कंठमंडले स्पृहांचक्रेजगन्नाथोन
जहारमणिंततः सत्राजितोजातभयोयाचयिष्यतिमांहरिः प्रसेनायददौभ्रात्रेधार्योयंशुचिनात्वया एकदाकंठदेशेसौक्षिप्त्वातंम

णिमुत्तमं मृगयाक्रीडनार्थायययौकृष्णेनसंयुतः अश्वारूढोशक्रचिश्वासौहतःसिंहेनतत्क्षणात् रत्नमादायसिंहोपिगच्छन्जांबवताहतः
नीत्वासविवरेरत्नंददौपुत्रायजांबवान् पुरींविवेशकृष्णोपिस्वकैःसर्वैःसमावृतः प्रसेनोद्यापिनायातिहतःकृष्णेननिश्चितम् मणिलोभेन
हाकष्टंबांधवःपापिनाहतः द्वारकावासिनःसर्वेजनाऊचुःपरस्परं वृथापवादसंतप्तःकृष्णोपिनिरगाच्छनैः सहैवतैर्यथारण्येदृष्ट्वासिंहेनपा
नितं प्रसेनंवाहनयुतंतत्पदानुचराःशनैः ऋक्षेणनिहतंदृष्ट्वाकृष्णश्चर्क्षबिलंगतः विवेशयोजनशतमंधकारंस्वतेजसा निवारयन्ददर्शाग्रेप्रा
सादंबद्धभूमिकं तंकुमारंजांबवतोदोलायाममितद्युतिम् माणिक्यंलंबमानंचददर्शभगवान्हरिः रूपयौवनसंपन्नांकन्यांजांबवतींपुनः
दोलांदोलयमानांचददर्शकमलेक्षणः महांतंविस्मयंचक्रेदृष्ट्वातांचारुहासिनीं दोलांदोलयमानांचजगौगीतमिदंमुहुः सिंहःप्रसेनमवधी
सिंहोजांबवताहतः सुकुमारकमारोदीस्तवह्येषस्यमंतकः मदनज्वरदाहार्ता दृष्ट्वातंकमलेक्षणं उवाचललितंबालागम्यतांगम्यतामिति
रत्नंगृहीत्वावेगेनयावच्छेतत्तुजांबवान् इत्याकर्ण्यहसन्शौरिःशंखंदध्मौप्रतापवान् आकर्ण्यसहसोत्थाययुयुधेयक्षराट्ततः तयोर्युद्धमभूद्घोरंहरिजांबवतोस्तदा द्वारकावासिनःसर्वेगतास्तेसप्तमेदिने मृतःकृष्णोनिरीक्षंतोनिःसंदिग्धंविचार्यच परलोकक्रियांचक्रुःपरेतस्य
सुतेतदा एकविंशद्दिनंयावद्बाहुप्रहरणोविभुः युयुधेतेनऋक्षेणयुद्धकर्मणितोषितः जांबवान्प्राक्तनंस्मृत्वादृष्ट्वादेवबलंमहत् जांबवानुवा॰ अजेयोहंसुरैःसर्वैर्यक्षराक्षसदानवैः त्वयाजितोहंदेवेशदेवस्त्वमसिनिश्चितम् जानेत्वांवैष्णवंतेजोनान्यथाबलमीदृशं-
इतिप्रसाद्यदेवेशंददौमाणिक्यमुत्तमं सुतांजांबवतींनामभार्यार्थेवरवर्णिनीं पाणिंवैग्राहयामासदेवदेवंचजांबवान् मणिमादायदेवोपि
जांबवत्यापिसंयुतः तद्वृत्तांतंसमाचष्टेद्वारकावासिनांस्वयं सत्राजितस्यमाणिक्यंदत्तवान्संसदिस्थितः मिथ्यापवादसंशुद्धिंप्राप्तवान्म
धुसूदनः सत्राजितोपिसंत्रस्तःकृष्णायप्रददौसुतां सत्यभामांमहाबुद्धिर्ददौसर्वगुणान्विताम् शतधन्वाक्रूरमुखायादवादुष्टमानसाः
सत्राजितेनतेवैरंचक्रूरत्नाभिलाषिणः दुरात्माशतधन्वापिगतेकृष्णेचपांडवान् सत्राजितंनिहत्याशुमणिंजग्राहपापधीः कृष्णस्यपुरतःस
त्यासमाचष्टेविचेष्टितम् अंतर्हृष्टोबहिःकोपीकृष्णःकपटनायकः बलदेवपुरोवाक्यमुवाचधरणीधरः हत्वासत्राजितंदृष्ट्वामणिमादा

यगच्छति निहत्यशतधन्वानंगृहीत्वारत्नमावयोः ममभोग्यंचतद्रत्नंभविष्यतिस्मनिश्चितं एतच्छ्रुत्वाभयात्रस्तःशतधन्वापियादवः आहूयाक्रूरनामानंमाणिक्यंप्रददौचसः आरुह्यवडवांवेगान्निर्गतोदक्षिणांदिशम् रथस्थावनुगच्छेतांतदारामजनार्दनौ शतयोजनमात्रेणममारवडवातदा पलायमानोनिहतःसहकृष्णोपदातिना रथस्थेबलदेवेतुहतेरत्नस्यलोचनः नदृष्टंतत्रतद्रत्नंबलदेवपुरेवदत् तदाकर्ण्यमहारोषादुवाचवचनंबली कपटीत्वंसदाकृष्णलोभीपापीस्मनिश्चितम् अर्थायस्वजनंहंसिकस्त्वांबंधुंसमाश्रयेत् अनेकशपथैःकृष्णोबलदेवंप्रसादयन् सोपिधिक्कृष्णमित्युक्त्वाययौवैदर्भमंडलम् कृष्णोपिरथमारुह्यद्वारकांप्रययौपुनः तथैवोचुर्जनाःसर्वेनसाधीयानयंहरिः निष्कासितोरत्नलोभाज्ज्येष्ठोभ्राताबलोबली तच्छ्रुत्वादीनवदनः पापीयानिवसंस्थितः वृथाभिशापात्संतप्तोबभूवसजगत्पतिः अक्रूरोपिविनिष्क्रम्यतीर्थयात्रानिमित्ततः काशींगत्वासुखेनासौयजन्यज्ञपतिंप्रभुम् तोषमुत्पादयामासतेनद्रव्येणबुद्धिमान् सुरालयगृहैश्चित्रैर्नगरंसमकल्पयत् नदुर्भिक्षंनवैरोगाईतयोनचविड्वरम् शुचिनाधार्यतेतत्रमणिःसूर्यस्यनिश्चितं जानन्नपिहितत्सर्वंमानुषंभावमाश्रितः लोकाचारंतथामायामज्ञानंचसमाश्रितः बंधुवैरंसमुत्पन्नंलांछनंसमुपस्थितम् वृथापवादबहुलंजायमानंकथंहरेत् इतिचिंतातुरंकृष्णंनारदःसमुपस्थितः गृहीत्वातत्कृतांपूजांसुखासनगतोब्रवीत्

नारदउवाच किमर्थंखिद्यसेदेवकिंवातेशोककारणम् यथावृत्तंसमाचष्टेनारदायचकेशवः जानामिकारणंदेवयदर्थंलांछनंतव त्वयाभाद्रपदेशुक्लेचतुर्थ्यांचंद्रदर्शनं कृतंतेनसमुत्पन्नंलांछनंतुवृथैवहि श्रीकृष्णउ० वदनारदमेशीघ्रंकोदोषश्चंद्रदर्शने किमर्थंतुद्वितीयायांतस्यकुर्वंतिदर्शनं नारदउवा० गणनाथेनसंशप्तश्चंद्रमारूपगर्वतः तद्दर्शनेननृणांहिवृथानिंदाभविष्यति श्रीकृष्णउ० किमर्थंगणनाथेनशप्तश्चंद्रःसुधामयः इदमाख्यानकंश्रेष्ठंयथावद्वक्तुमर्हसि नारदउ० गणानामाधिपत्येचरुद्रेणविहितःपुरा अणिमामहिमाचैवलघिमागरिमास्तथा प्राप्तिःप्राकाम्यमीशित्वंवशित्वंचाष्टसिद्धयः भार्यार्थंप्रददौदेवोगणेशस्यप्रजापतिः पूजयित्वागणाध्यक्षंस्तुतिंकर्तुंप्रचक्रमे ब्रह्मोवाच गजवक्त्रगणाध्यक्षलंबोदरवरप्रद विघ्नराजाधिदेवेशसृष्टिसंहारका

रकं संपूजयेद्गणाध्यक्षंमोदकाद्यैःप्रयत्नतः तेषांप्रजायतेसिद्धिर्निर्विघ्नेननसंशयः असंपूज्यगणाध्यक्षंयेवांछंतिसुरासुराः नतेषां
जायतेसिद्धिः कल्पकोटिशतैरपि त्वद्भक्त्यातु गणाध्यक्षविष्णुःपालयतेसदा रुद्रोपिसंहरत्याशु त्वद्भक्त्यैवकरोम्यहम् इत्थंसंस्तूयमानो
सौदेवदेवोगजाननःउवाचपरमप्रीतोब्रह्माणंजगतांपतिः श्रीगणेशउ॰ वरंब्रूहिप्रदास्यामियत्तेमनसिवर्तते ब्रम्होवाच क्रि
यमाणस्यमेसृष्टिर्निर्विघ्नंजायतांप्रभो एवमस्त्वितिदेवोसौगृहीत्वामोदकान्करे सत्यलोकान्समागत्यस्वेच्छयागगनेशनैः चंद्रलोकं
समासाद्यचलितोगणनायकः उपहासंतदाचक्रेसोमोरूपमदान्वितः तंदृष्ट्वाकोपताम्राक्षोगणनाथःशशापह दर्शनीयःसुरूपो
हंसुंदरश्चाहमित्यथ गर्वितोसिशशांकत्वंफलंप्राप्स्यसिसत्वरम् अद्यप्रभृतिलोकास्त्वांनहिपश्यंतिपापिनं येपश्यंतिप्रमादेन
त्वांनरामृगलांछनं मिथ्याभिशापसंयुक्ताभविष्यंतीहतेध्रुवम् हाहाकारोमहाञ्जातःश्रुत्वाशापंचभीषणं अत्यंतम्लानवदन
श्चंद्रोजलमथाविशत् कुमुदंकौमुदीनाथःस्थित स्तत्रकृतालयः ततोदेवर्षिगंधर्वानिराशोद्विग्नमानसाः तुरासाहंपुरोधायज
ग्मुस्तेतंपितामहम् देवंशशंसुश्चंद्रस्यगणेशस्यचचेष्टितं दत्तःशापोगणेशेनकथयामासुरादरात् विचार्यभगवान्ब्रह्मातान्सुरानि
दमब्रवीत् गणेशशापोदेवेंद्रःशक्यतेकेनवान्यथा कर्तुंरुद्रेणनमयाविष्णुनाचापिनिश्चितम् तमेवदेवदेवेशंव्रजध्वंशरणंसुराः
सएवशापमोक्षंचकरिष्यतिनसंशयः देवाऊचुः केनोपायेनवरदोगजवक्त्रोगणेश्वरः पितामहमहाभाग तदस्माकंवदप्रभो
पितामहउवा॰ चतुर्थ्यांदेवदेवोसौपूजनीयःसदैवहि कृष्णपक्षेविशेषेणनक्तंकुर्याच्चतद्व्रतं अपूपैर्घृतसंयुक्तैर्मोदकैःपरितोष
येत् मधुरान्नंहविष्यंचस्वयंभुंजीतवाग्यतः स्वर्णरूपंगणेशस्यदातव्यंद्विजसत्तमे शक्त्याचदक्षिणांदद्याद्वित्तशाठ्यंनकारयेत् ए
वंसमेत्यतेसर्वेप्रेषयामासुर्गीष्पतिं सगत्वाकथयामासचंद्रायब्रह्मणोदितम् व्रतंचक्रेततश्चंद्रो यथोक्तंब्रह्मणापुरा आविर्बभूवभग
वान्गणेशोव्रततोषितः तंक्रीडमानंगणनायकंचतुष्टावदृष्ट्वातुकलानिधानः त्वंकारणंकारणकारणानांवेत्तासिवेद्यंचविभोप्रसीद
प्रसीददेवेशजगन्निवासगणेशलंबोदरवक्रतुंड विरिंचिनारायणपूज्यमानक्षमस्वमेगर्वकृतंचहास्यम् येत्वामसंपूज्यगणेशनूनंवां

छंतिमूढाःस्वकुनार्थसिद्धिं नेदैवनष्टाविश्रुतंचलोकेज्ञातोमयातेसकलःप्रभावः येचाप्युदासीनतरास्तुपापास्तेयांतिवासंनरकेसदैवहेरंबलंबोदरमेक्षमस्वदुश्चेष्टितंतत्करुणासमुद्र एवंसंस्तूयमानोसौचंद्रेणाथगजाननः गणेशउवाच तुष्टोहंतवदास्यामिनैतद्देयंमयातव ततोब्रह्मादयःसर्वेसमाजग्मुर्भयार्दिताः विशापंकुरुदेवेशप्रार्थयामोवयंतव विशापमकरोच्चंद्रंकमलासनगौरवात् शुक्लपक्षेचतुर्थ्यांतुयेपश्यंतिसदैवहि मिथ्यापवादमावर्षंप्राप्स्यंतीहनसंशयः मासादौपूर्वमेवत्वांयेपश्यंतिसदाजनाः चतुर्थ्यांशुक्लपक्षस्यतेषांदोषोनजायते तदाप्रभृतिलोकोयंद्वितीयायांकृतादरः पुनरेवतुपप्रच्छकलावान्गणनायकम् केनोपायेनदेवेशतुष्टोभवसितद्वद गणेशउवा॰ सदाकृष्णाचतुर्थ्यांतुमोदकाद्यैःप्रपूज्यमाम् रोहिण्यासहितंत्वांचसमभ्यर्च्यविधानतः यथाशक्त्याचमद्रूपंस्वर्णेनपरिकल्पितम् दत्वाद्विजायभुक्त्वाथकथांश्रुत्वाविधानतः सदातस्यकरिष्यामिसंकष्टस्यनिवारणम् भाद्रशुक्लचतुर्थ्यांतुमृन्मयीप्रतिमाशुभा हेमाभावेतुकर्तव्यानानापुष्पैःप्रपूज्यमाम् ब्राह्मणान्भोजयेत्पश्चाज्जागरंचविशेषतः स्थापयेदव्रणंकुंभंधान्यस्योपरिशोभितम् यथाशक्त्याचमद्रूपंशातकुंभेननिर्मितम् वस्त्रद्वयसमाच्छन्नंमोदकाद्यैःप्रपूज्यमां रक्तांबरधरोमर्त्योब्रह्मचर्यव्रतःशुचिः राजतस्यतुरूपंमेयथाशक्त्याविनिर्मितं वस्त्रंशिवप्रियायेतिउपवस्त्रंगणाधिपे गंधंलंबोदरायेतिपुष्पंसिद्धिप्रदायके धूपंगजमुखायेतिदीपंमूषकवाहने विघ्ननाथायनैवेद्यंफलंसर्वार्थसिद्धिदे तांबूलंकामरूपायदक्षिणांधनदायच इक्षुदंडैर्मोदकैश्चहोमंकुर्याच्चनामभिः विसर्जनंततःकुर्यात्सर्वसिद्धिप्रदायकम् एवंसंपूज्यविघ्नेशंकथांश्रुत्वाविधानतः मंत्रेणानेनतत्सर्वंब्राह्मणायनिवेदयेत् दानेनानेनदेवेशप्रीतोभवगणेश्वर सर्वत्रसर्वदादेवनिर्विघ्नंकुरुसर्वदा मानोन्नतिंचराज्यंचपुत्रपौत्रान्प्रदेहिमे गाश्चधान्यंचवासांसिदद्यात्सर्वस्वशक्तितः दत्वातुब्राह्मणैःसर्वैःस्वयंभुंजीतवाग्यतः मोदकापूपमधुरंलवणक्षारवर्जितम् एवंकरोतियश्चंद्रतस्याहंसर्वदाजयम् सिद्धिंचधनधान्येचददामिविपुलांप्रजां इत्युक्त्वांतर्दधेदेवोविघ्नराजोविनायकः तद्व्रतंकुरुकृष्णत्वंततःसिद्धिमवाप्स्यसि नारदेनैवमुक्तश्च व्रतंचक्रेहरिःस्वयं मिथ्यापवादंनिर्मृज्यततःकृष्णोभवच्छुचिः येशृण्वंतितवाख्यानंस्यमंतकमणीयकम् चंद्रस्यचरितंस

वैंतेषांदोषोनजायते भाद्रशुक्लचतुर्थ्यांतुकचिच्चंद्रस्यदर्शनं जानंतत्परिहारार्थंश्रोतव्यंसर्वमेवहि यदायदामनःकष्टंसंदेहउपजा
यते तदातदाचश्रोतव्यमाख्यानंकष्टनाशनम् एवमुक्त्वागतोदेवोगणेशःकृष्णतोषितः यदायदाचरत्तिकार्यउत्थितोनारीनरश्चा
थकरोतितद्व्रतं सिध्यंतिकार्याणिमनेप्सितानिकिंदुर्लभंविघ्नहरेप्रसन्ने इतिश्रीस्कंदपुराणेनंदिकेश्वरसनत्कुमारसंवादे-
स्यमंतकोपाख्यानंसंपूर्णं अथकपर्दीविनायकव्रतं श्रावणस्यसितेपक्षेचतुर्थ्यामेकभक्तव्रती व्रतंकुर्याद्गणेशस्यमासमेकं
व्रतंचरेत् सर्वसिद्धिकरंनृणांसुखंचैवसुरेश्वर तद्विधिः तिथ्यादिस्मृत्वा ममचतुर्विधपुरुषार्थसिध्यर्थंकपर्दीगणेशव्रत
महंकरिष्ये मूलमंत्रेणषडंगन्यासंपूजांकृत्वासमारभेत् ॐनमोभगवतेसकलगुणात्मशक्तियुतानंतयोगपीठायनमः अष्टद
लंकारयेयुः ॐतीव्रायैनमः ज्वालिन्यैनमः नर्मदायै॰ कामरूपिण्यैन॰ उग्रायै॰ तेजोवत्यै॰ मध्ये विघ्नविनाशिन्यै॰ अथध्या
नम् एकदंतंमहाकायंलंबोदरगजाननम् विघ्ननाशकरंदेवगणेशंप्रणमाम्यहं इमांपूजांगृहाणेशकपर्दीगणनायक आगच्छ
इतित्रिवारंपठेत् विनायकनमस्तुभ्यसुमामलसमुद्भव इमांमयाकृतांपूजांप्रीत्यर्थंप्रतिगृह्यताम् सहस्रशीर्षेत्यावाहनं अ
लंकारसमायुक्तंमुक्तामणिविभूषितम् स्वर्णसिंहासनंचारुप्रीत्यर्थंप्रतिगृह्यतां पुरुषएवेदमासनं गौरीसुतनमस्तेस्तुशंकर
प्रियकारक भक्त्यापाद्यंमयादत्तंगृहाणगणनायक एतावानस्येतिपाद्यं व्रतमुद्दिश्यविघ्नेशगंधपुष्पादिसंयुतं गृहाणार्घ्यंमया
दत्तंसर्वसिद्धिप्रदायक तस्माद्विराळाचमनीयं अनाथनाथसर्वज्ञगीर्वाणपरिपूजित स्नानंपंचामृतंदेवगृहाणगणनायक आ
प्यायस्वेतिदुग्धं दधिक्राव्णोइतिदधि घृतंमिमिक्षेतिघृतं मधुवातेतिमधु स्वादुःपवस्वेतिशर्करा इतिपंचामृतस्नानं गंगाजलं
समानीतंहेमांभोरुहवासितं स्नानेस्वीकुरुविघ्नेशकपर्दिगणनायक यत्पुरुषेणेतिस्नानं॰ हरिद्रस्वद्वयंदेवदेवांगवसनोपमं म
त्त्यादत्तंगृहाणेशलंबोदरहरात्मज तंयज्ञमितिवस्त्रं नानालंकारसंयुक्तंनानारत्नविभूषितम् अनेकदिव्याभरणंप्रीत्यर्थंप्रतिगृ-
ह्यतां आभरणानि राजतंब्रह्मसूत्रंचकांचनंचोत्तरीयकं भालचंद्रनमस्तुभ्यंगृहाणवरदोभव तस्माद्यज्ञादितियज्ञोपवीतं

गंधकर्पूरसंयुक्तंदिव्यचंदनमुत्तमम् विलेपनंसुरश्रेष्ठप्रीत्यर्थंप्रतिगृह्यताम् तस्माद्यज्ञात्सर्वहुतेतिगंधं अक्षतान्धवलान्देवसिद्धगंधर्वपूजित भक्त्यादत्तान्गृहाणेमान्सर्वसिद्धिप्रदायक अक्षतान् सुगंधीनीचपुष्पाणिऋद्धिसिद्धिप्रदायक कपर्दिगणनाथेशश्वेतपुष्पंददाम्यहं तस्मादश्वेतिपुष्पं अथांगपूजा कपर्दीगणनाथाय॰पादौपू॰ गणेशाय॰जानुनीपू॰ गणनाथाय॰ऊरूपू॰ गणक्रीडाय॰ कटीपू॰ वक्रतुंडाय॰ हृदयंपू॰ लंबोदराय॰ कंठंपू॰ गजाननाय॰ स्कंधौपू॰ हेरंबाय॰हस्तौपू॰विकटाय॰मुखंपू॰-विघ्नराजाय॰ नेत्रेपू॰ धूम्रवर्णाय॰शिरःपूजयामि कपर्दिनेन॰ सर्वांगंपूजयामि अथावरणपूजा ईशानाय॰अघोराय॰ तत्पुरुषाय॰ वामदेवाय॰सद्योजाताय॰ इतिप्रथमावरणं १ वक्रतुंडाय॰एकदंताय॰महोदराय॰गजाननाय॰विकटाय॰विघ्नराजाय॰धूम्रवर्णाय॰विनायकाय॰द्वितीयावरणं २ ब्राह्म्यैनमः माहेश्वर्यै॰कौमार्यै॰वैष्णव्यै॰ वाराह्यैन॰ इंद्राण्यैन॰ चामुंडायै॰महालक्ष्म्यै॰ तृतीयावरणं३ इंद्राय॰ अग्नये॰यमाय॰निर्ऋतये॰वरुणाय॰ वायवेन॰ सोमाय॰ ईशानाय॰ वरुणनिर्ऋत्योर्मध्ये अनंताय॰ इंद्रेशानयोर्मध्ये ब्रह्मणे॰ इतिचतुर्थावरणं ४ वज्राय॰ शक्तये॰दंडाय॰खड्गाय॰पाशाय॰अंकुशाय॰ गदायै॰त्रिशूलाय॰ चक्राय॰अब्जाय॰ इतिपंचमावरणं ५ दशांगंगुग्गुलंधूपंचंदनागरुसंयुतं उमासुतनमस्तुभ्यंगृहाणवरदोभव यत्पुरुषमितिधूपम् गृहाणमंगलंदेवघृतवर्तिसमन्वितम् दीपंज्ञानप्रदंचारुरुद्रप्रियनमोस्तुते ब्राह्मणोस्येतिदीपं॰ नैवेद्यंगृह्यतां॰ चंद्रमामनसेतिनैवेद्यं॰ आचमनीयं॰इदंफलमितिफलं॰ पूगीफलमितितांबूलं॰ हिरण्यगर्भेतिदक्षिणां॰ अग्निर्ज्योतीरविर्ज्योतिर्ज्योतिरग्निर्विभावसुःज्योतिस्त्वंसर्वदेवानांगणाधिपनमोस्तुते नीराजनं॰ यानिकानिचपापा॰ नाभ्याआसीतिप्रदक्षिणा॰ नमोस्त्वनंताय॰ सप्तास्यान्नितिनमस्कारः गणाधिपनमस्तेस्तुनमस्तेस्तुगजानन लंबोदरनमस्तेस्तुनमस्तेलंबिकासुत एकदंतनमस्तेस्तुनमस्तेस्तुप्रभवप्रिय स्कंदाग्रजनमस्तेस्तुनमस्तेस्त्वीप्सितप्रद कपर्दिगणनाथेशसर्वसंपत्प्रदायक यज्ञेनयज्ञमितिमंत्रपुष्पांजलिं अथब्रह्मचारिपूजा आकर्णान्मुष्टिगणकान्विंशत्यष्टौवराटकान् विप्रायबटवेदद्याद्गंधपुष्पार्चितायच तंदुलान्वैततोदद्यात्पाकेचान्नेचशोभ

नान् कपर्दीगणनाथोसौप्रीयतांतंदुलैः सदा कथांश्रुत्वाविधानेनदेवमुद्वासयेत्ततः इतिकपर्दीगणपतिपूजा अथकथा कदाचिदुपविष्टश्चपार्वत्यासहशंकरः द्यूतेच्छाकिंअस्तिदेविक्रीडितुंनवकिंशुभे दुरोदरमिषाज्जेतुंवांछितंमत्कवाचसा ममापिअस्तिसापेक्षादीयतेचेत्पणोमम तवकिंकिमभीष्टंतुदास्यामिपरमेश्वरि लोकत्रयंवाइच्छास्तेकिमन्यैर्वचनैर्वृथा पृच्छामित्वांवचोदेविदातव्यंकिंकिमिच्छसि विश्वासोयेननजायेततद्वदाद्यशुभानने वाक्यमेवंविधंश्रुत्वाशर्वाणीचशिवांतिके नविश्वासोस्तितेवाक्येजित्वादास्यसिमत्पणः इतिश्रुत्वावचोदेव्याःशंकरःप्राहनिश्चयं पणःप्रकल्प्यतांदेविदीयतेदंनसंशयः भावंसंचिंत्यदेवस्यसत्वराक्रीडितुंययौ आयुधानिततोदेवःपणेयोजितवान्हरः त्रिशूलंत्रिदशाच्छर्वाज्जितवत्येववल्लभा तस्मिन्कर्मणितंजित्वापणमन्यंशिवाग्रहीत् एवंडमरुकादीनितान्यन्यान्यजयत्पृथक् दीनोभूत्वामहादेवोभवानीमब्रवीदिति शार्दूलचर्मतन्मध्येदेहिमेगिरिजेशुभेनचैवंवक्तुमुचितंमहादेवपणेगते पणोजितेनदास्यामिपूर्वमुक्तोसितत्स्मर अविचिंत्यब्रवीषित्वंजगदीशकृपानिधे इतिश्रुत्वावचोदेव्याःकुपितोसौमहेश्वरः आहत्वा दशादिनं देविनकरिष्यामिभाषणं इत्युक्त्वाचमहादेवस्तत्रैवांतरधीयत रक्षरक्षमहादेवकिंजीवनमतःपरं इतिसंचिंत्यसाद्रष्टुमुद्यानंप्रत्यपद्यत गिरिजातत्रवनितावृंदंदृष्ट्वाब्रवीदिति किमर्थमागताःसर्वाःकिमेतत्क्रियतेधुना कपर्दीगणनाथस्यव्रतंकर्तुमिहागताः तस्यपूजांविहायादौ इदानींश्रूयतेकथा किमर्थंतद्व्रतंनार्योयुष्माभिःक्रियतेवने फलमस्यकिमस्तीतिपार्वतीप्राहताःप्रति पृच्छतोकिंत्वयादेविनरैर्नारीभिरंबिके अभीष्टसिद्धिरस्मिंस्तुवर्तनेभुवनत्रये इतिश्रुत्वावचस्तासांपार्वतीप्राहताप्रति प्रातःकुपित्वाभगवान्निर्गतश्चमहेश्वरः तस्यसंदर्शनायैवकरिष्येव्रतमुत्तमं व्रतस्यैतस्यकिंदानंविधानंकीदृशंमम सर्वंविचिंत्यमनसाकथयंतुवरांगनाः कालोविधानंदानंचव्रतस्यास्यफलंतथा तत्सर्वंसावधानेनवक्ष्यामिशृणुपार्वति स्त्रियऊचुः पातादिदोषरहितेसचतुर्भानुवासरे इषेमासिव्रतंसम्यक्गणेशार्पितमानसः तैलतांबूलभोगादीन्वर्जयित्वाशिवप्रिये मंदवारेतुभुंजीयादेकवारंमितंयथा प्रातःकालेशुचिर्भूत्वास्नानंकुर्याद्विधानतः वापीकूपतडागेषुनद्यांशु

५३

कुतिलैःसह संध्यादिकंयथाचिंत्यंसर्वंनिर्वर्त्ययत्नतः अर्चनागारमासाद्यगोमयेनोपलिप्यच गोचर्ममात्रंतन्मध्येकुर्याद्गंधेनमंडलं तन्मध्येष्टदलंपद्मंतन्मध्येगणनायकं पूजयेत्स्वच्छकुंकुमैर्हरिद्राभिमिश्रिताक्षतैः गांगींगूंगैंगौंगश्चन्यासंकृत्वाततःपरम् मंत्रेणानेनकुंकुमैर्देवमावाह्यनिक्षिपेत् अथवागणनाथस्यप्रतिमामथपूजयेत् ततस्तद्गतचित्तःसन्ध्यानंकुर्याद्विधानतः एकदंतंमहाकायंलंबोदरगजाननम् विघ्ननाशकरंदेवंहेरंबंप्रणमाम्यहम् इमांपूजांगृहाणेशकपर्दिगणनायक आगच्छेतित्रिरुच्चार्यकुर्यादावाहनादिकम् पुराणमंत्रैरथवावेदमंत्रैश्चषोडशैः पूजयेदुपचारैश्चमूलमंत्रेणपार्वति तत्तत्प्रकाशकैर्मंत्रैर्गंधपुष्पाक्षतादिभिः इंद्रादिलोकपालांश्चपूजयेद्देवसन्निधौ लंबोदरनमस्तेस्तुनमस्तेलंबिकासुत एकदंतनमस्तेस्तुनमस्तेस्त्वोज्झितमद कपर्दीगणनाथस्यसर्वसंपत्प्रदायिनः पूजाप्रकारःकथितस्तवताभिःशुचिस्मिते अकणानंजलिमतान्हविष्यव्रीहितंदुलान् स्वच्छान्यत्नेनसंशोध्यचूर्णं कुर्यान्महेश्वरि शिवेतुचूर्णंप्रथमेभानुवारेर्धचंद्रवत् कुर्याद्द्वितीयेसंचूर्णंचंद्रवत्पिष्टकाष्टकम् तृतीयेपायसान्नंचदध्यन्नंचचतुर्थकेआनीयाष्टांशकंसम्यक्देवंसंपूज्यभक्तितः कल्पितान्नानिविधिवद्विद्यंतेयानितानिच तेषांतेषामष्टमांशंतस्मैसम्यक्समर्पयेत् ततः शुद्धायबटवेदद्यादेवंवराष्टकम् मुष्ट्यामितंतंदुलांश्चभुंजीयाद्वागसप्तकं याःकामयंतेयेभक्ताःपूजास्तेप्राप्नुवंतिहि इत्यूचुस्तांभवानीं तुस्त्रियोविगतकल्मषाः तासांतद्वचनंश्रुत्वातदानीमकरोद्व्रतं तत्रक्षणाच्चविश्वेशःप्रत्यक्षःसमजायत त्रिलोकनाथदेवेशकरुणाकरशंकर दीनामनन्यगतिकांभक्तवत्सलपाहिमां तुष्टश्चशंकरःप्राहकथमेतत्त्वयाकृतं कपर्दीगणनाथस्यमाहात्म्यात्किंनसिद्ध्यति व्रतस्यैतस्यमाहात्म्यंज्ञातुंवांछितवान्स्वयम् उद्दिश्यागमनंविष्णोरकरोत्तद्व्रतंशिवः तदानींगरुडारूढःसमागत्यतमब्रवीत् मदागमनिमित्तंकिंकिंकृतंशंकरत्वया ममापिज्ञापनीयंतदित्युक्तेज्ञापयच्छिवः अथैनदकरोद्विष्णुरुद्दिश्यागमनंविधेः आगतःसन्विधिःशीघ्रंममाज्ञापयमाधव प्रयोजनंचास्तिविधेतवागमनकारणम् एकदंतव्रतंकिंचिद्भवत्येवनसंशयः इंद्रागमनमुद्दिश्यतदानींतेनतत्कृतम्- आगत्यसहसासोपिममाज्ञापयविश्वसृक् हेरंबव्रतमाहात्म्यंदृष्टमेवंकृतंमया ममापिज्ञापनीयंतदित्युक्तोविधिनोदितं विक्रमा

दित्यमुद्दिश्यवज्रीतदकरोच्चसः आगतोहंमनुष्यस्त्वामिंद्रमत्तोकिमीप्सितम् कपर्दीहस्तिवदनव्रतमाहात्म्यमीदृशम् इतिज्ञातुंमयाभी
ष्टंनलब्धंतंनदाब्रवीत् विधानंतस्यमाहात्म्यंज्ञापनीयंत्वयेतिमे पप्रच्छविक्रमादित्यउत्सुकश्चपुरंदरं पुरंदरमुखाज्ज्ञात्वातत्सर्वंस्वपु
रींप्रति सायुधःप्रययौराजापराक्रमपरायणः कपर्दीशव्रतंकृत्वामहिष्यापुरतोवदत् जेष्यामिसकलान्शत्रून्प्राप्स्यामिचमहोन्नतिंत
स्यव्रतस्यकिंदानमितिसाप्राहविक्रम मत्क्षवाच्चक्रियामर्कोदद्यादेकंवराटकम् एवंचेत्तत्रकर्तव्यंमद्गेहेयत्रकुत्रचित् एवंराज्ञोमुखाच्छ्रु
त्वादूषयामासतद्व्रतं कपर्दीगणनाथेनकिंस्यान्ममकृशोभनं नक्रियतेमयानाथकपर्द्याख्यंतुयद्व्रतम् इत्यादिदूषणादाशुकुष्टव्याधिम
वाप्स्यसि कुष्टव्याधियुतांपत्नींदृष्ट्वाराजाब्रवीत्तदा नस्थातव्यंत्वयात्रेतिसर्वराज्यंविनश्यति अर्कस्यवचनंश्रुत्वाशय्याश्रममगाच्चसा
परिचर्यावशात्तुष्टास्तस्याःसर्वेमुनीश्वराः निश्चित्ययोगमार्गेणसर्वेतामब्रुवन्सतीं कपर्दीशव्रताक्षेपाद्दुःखंप्राप्तंत्वयाशुभे कुरुष्वतद्व्र
तंसम्यक्सर्वंभद्रंभविष्यति ऋषीणामाज्ञयासाचकपर्दीशव्रतंमहत् तदानींराजमहिषीदिव्यदेहमवापसा अस्मिन्नंतरितेकालेभवान्या
सहशंकरः अगमच्चवृषारूढोभुवनानिचतुर्दश मध्येमार्गेद्विजेंद्रस्यरोदनंभववल्लभा श्रुत्वाब्राह्मणमारोदीःकिमर्थंतवरोदनं नकिम-
प्यस्तिमेदुःखंदारिद्र्यादेवकेवलात् दुःखंचेत्तवविप्रेंद्रकपर्दीशव्रतंकुरु एतत्कर्तुंव्रतंदेविसामर्थ्यंनास्तिमेधुना विक्रमार्कपुरेसर्वंवैश्यो
दास्यतितत्कुरु कपर्दीशव्रतेनैवमंत्रित्वंप्राप्स्यसिध्रुवम् दारिद्र्यमोचनंसम्यक्भविष्यतिनसंशयः गृहंप्रतिसमागम्यगृहीत्वातंदुलाद्वि
जः वैश्यात्गृहीत्वातत्सर्वंतदानीमकरोद्व्रतम् तस्मिन्नर्कपुरेविप्रस्तन्मंत्रित्वमवापसः आज्ञापयत्कपर्दीशव्रतंवैश्यस्यतत्क्षणात् अ
करोत्स्वसुतायाश्चविक्रमःपतिरस्त्विति व्रतप्रभावादादित्यमुपयेमेविशःसुता अनेनैवविवाहेनपरांप्रीतिमवापसा एवमंतरितेकाले
मृगयार्थंप्रविश्यसः गहनंक्षुत्तृषा र्तःसन्ययौमुनिवराश्रमम् उपचारैःश्रमंनीत्वातेषामर्कोमनोरमाम् रमणीयाश्रमेतस्मिन्दर्शयामा
सविक्रमः इत्थंपृच्छन्मुनीन्सर्वान्देयाच्चैषाममांगनानवेयंमहिषीत्युक्त्वानयेनास्मैसमर्पयन् समंमहिष्यास्वपुरींदिव्यनारीनरैर्युतां
हृष्टःसन्विक्रमादित्यःसंप्रमात्माहभूपतिः कपर्दीगणनाथस्यव्रतंकृत्वास्त्रियासह अयजद्विक्रमादित्यःसकलंशत्रुमंडलं गणनाथ

व्रतेनैवसुपुत्रपौत्रवृतश्वसः धनधान्यादिसंपद्भिःसुखेनन्यवसद्भुवि एतद्व्रतंयेकुर्वंतियाश्चकल्पविधानतः चतुर्णांपुरुषार्थानांतेषांप्राप्तिर्भवेद्ध्रुवम् हयमेधस्यविघ्नेतुसंजातेसगरःपुरा इदमेवव्रतंकृत्वापुनरश्वंमलब्धवान् इमांकथांपंचवारंप्रथमेभानुवासरे द्वितीयेचतृतीयेन्वषड्वारंशृणुयाद्व्रती इतिश्रीस्कंदपुराणेकपर्दीविनायकव्रतकथासमाप्ता आश्विनकृष्णचतुर्थ्यांदशरथललिताव्रतं तच्च पौर्णिमांतमासेन कार्तिकवद्यचतुर्थ्यांकार्यं देशकालौसंकीर्त्य ममपुत्रपौत्रादिसकलकामनासिद्ध्यर्थंदशरथललिताप्रीत्यर्थंयथामीलितोपचारैः पूजनमहंकरिष्ये आसनादिकलशाराधनंकरिष्ये आगच्छललितेदेविसर्वसंपत्प्रदायिनि यावत्पूजांकरिष्यामितावत्त्वंसन्निधौभव आवाहयामि नीलकौशेयवसनांहेमाभ्यांकमलासनां भक्तानांवरदांनित्यंललितांचिंतयाम्यहं ध्यायामि कार्तस्वरमये दिव्येनानामणिसमन्विते अनेकरत्नसंयुक्तेआसनेसंविशस्वभोः आसनं गंगादिसर्वतीर्थेभ्योमयाप्रार्थनयाहृतं तोयमेतत्सुखस्पर्शं पाद्यार्थंप्रतिगृह्यतां पाद्यं दक्षस्यदुहितासाध्वीरोहिणीनामविश्रुता पुत्रसंपत्तिकार्यार्थंगृहाणार्घ्यंनमोस्तुते अर्घ्यं क्षीरोदार्णवसंभूतलक्ष्मीबंधोनिशाकर गृहाणार्घ्यंशशांकेशंरोहिण्यासहितःशशिन् अर्घ्यं पाटलोशीरकर्पूरसुरभिस्वादुशीतलम् तोयमाचमनीयार्थंशिशिरंप्रतिगृह्यतां आचमनं पयोदधिघृतंमध्वाशर्करासुगुणान्वितं पंचामृतेनस्नपनंप्रीयतांपरमेश्वरी पंचामृतस्नानं मंदाकिन्याःसमानीतंहेमांभोरुहवासितम् स्नानायतेमयाभक्त्यानीरंस्वीक्रियतांशिवे स्नानं सर्वसत्वाधिकेसौम्ये लोकलज्जानिवारणे मयोपपादितेतुभ्यंवाससीप्रतिगृह्यताम् वस्त्रं मलयाचलसंभूतंघनसारंमनोहरम् हृदयानंदनंचारुचंदनंप्रतिगृह्यतां चंदनं हरिद्राकुंकुमंचैवसिंदूरंकज्जलान्वितं सौभाग्यद्रव्यसंयुक्तंगृहाणपरमेश्वरि सौभाग्यद्रव्यं कूष्मांडैर्मालतीकाद्यैर्जातीपुष्पैःसुगंधिभिः मयाहृतानिपुष्पाणिपूजार्थंप्रतिगृह्यताम् पुष्पाणि अथांगपूजा दशांगललितायैनमः पादौपूजयामि भवान्यै० गुल्फौपू० सिद्धेश्वर्यै० जंघेपू० भद्रकाल्यै० जानुनीपू० श्रियै० ऊरूपू० विश्वरूपिण्यै० कटीपू० देव्यैनमः नाभिंपू० वरदायै० कुक्षिं पू० शिवायै० हृदयंपू० वागीश्वर्यै० स्कंधौपू० महादेव्यै० बाहुं० भद्रायै० करौपू० पद्मिन्यै० कंठंपू० सरस्वत्यै० सुखंपू० कमलासनायै०

नासिकांपूजयामि महिषमर्दिन्यै॰ नेत्रेपू॰ लक्ष्म्यैन॰ कर्णौपू॰ भवान्यै॰ ललाटंपू॰ विंध्यवासिन्यै॰ शिरःपू॰ सिंहवाहिन्यै॰ सर्वांगंपू॰ वनस्प
तिरसोद्भूतोगंधाढ्यश्चमनोहरः आघ्रेयः सर्वदेवानांधूपोयंप्रतिगृह्यताम् धूपं॰ साज्यंचवर्ति॰ दीपं॰ नैवेद्यं॰ मध्येपानीयं॰ इदंफलमितिफलं॰ पू
गीफलंमहद्दिव्यं॰ तांबूलं॰ हिरण्यगर्भेतिदक्षिणां॰ कर्पूरगौरं॰ नीराजनं॰ नमोदेव्यैमहादेव्यै॰ मंत्रपुष्पं॰ यानिकानिचपापानि॰ प्रदक्षिणाम्
अन्यथाशरणंनास्तित्वमेवशरणंमम तस्मात्कारुण्यभावेनरक्षमांपरमेश्वरि दशरथनामयादेवीदशपुष्पादशाक्षरा पुत्रार्थीकामयेदेविस
र्वान्कामान्प्रयच्छमे प्रार्थना दशरथललितादेव्याव्रतसंपूर्णहेतवे वाणकंद्विजवर्यायसहिरण्यंददाम्यहं वायनं॰ सवाहनाशक्तियुता
वरदा पूजितामया ममानुग्रहकुर्वाणागच्छत्वंनिजमंदिरम् अथकथा सूतउवाच अरण्येवर्तमानास्तेपांडवादुःखकर्शिताः कृष्णं
दृष्ट्वामहात्मानंप्रणिपत्ययथाक्रमं युधिष्ठिरउवाच देवदेवजगन्नाथलक्ष्मीप्रियजनार्दन कथयस्वसुरश्रेष्ठदशांगललिताव्रतं कथमे
षासमुत्पन्नाकेनादौपूजिताभुवि पूजनात्किंफलावाप्तिः कथयस्वसुरेश्वर श्रीकृष्णउवा॰ पुरात्रेतायुगेपार्थराजादशरथोमहान् त
स्यभार्यातुकौसल्याअपुत्रासापतिव्रता अथाजगामकस्मिंश्चिद्दृष्यशृंगऋषीश्वरः स्वागतंचकृतंराज्ञासोपविष्टोवरासने तेनराज्ञामुनि
श्रेष्ठः स्तोत्रैश्चबहुतोषितः तस्यभक्त्यातुसंतुष्टोऋषिर्वचनमब्रवीत् मुनिरुवाच तुष्टोहंनवराजेंद्रकौसल्याभार्ययासह ब्रूहित्वंचम
हाभागकिंप्रियंतेकरोम्यहं दशरथउवाच यदितुष्टोसिमेविप्रअपुत्रोहंऋषीश्वर तीर्थंवाव्रतमेकंवातद्वदस्वमुनीश्वर मुनिरुवाच
शृणुराजन्नवहितोव्रतमेकंब्रवीमिते पुत्रकामव्रतंश्रेष्ठंकृतंराजन्सुरासुरैः रोहिणीनामचंद्रस्यभार्यापरमवल्लभा साचैवललितानाम्नी
रोहिणीतिनराधिप आश्विनस्यसितेपक्षेदशम्यादिप्रपूजयेत् दशम्यादिचतुर्थ्यंतंदिग्दिनानिव्रतंचरेत् आश्विनस्यसितेपक्षेचतुर्थ्यांतुवि
शेषतः स्नात्वासायंतनेकालेसन्नमनभक्तिभावतः कूष्मांडैर्मातुलिंगाद्यैर्जातीपुष्पैःसुगंधिभिः गंधपुष्पैस्तथाधूपैर्नैवेद्यैर्दशमोदकैः अ
र्घ्यंदद्याच्चदेव्यग्रेपूजयित्वाक्षमापयेत् ततोमंगलवाद्यैश्चगायद्भिश्चनरेश्वर चंद्रोदयेचसंप्राप्तेअर्घ्यंदद्याद्युधिष्ठिर शंखेतोयंसमा
दायसपुष्पाक्षतचंदनैः जानुभ्यामवनींगत्वाचंद्रायार्घ्यंनिवेदयेत् पंचरत्नसमायुक्तंदशपुष्पैःसमन्वितम् अक्षतैश्चसमायुक्तंचंद्राया

र्घ्यंनिवेदयेत् दशरथनामयादेवीदशपुष्पादशांजलिः चंद्रेणसहितेदेविगृहाणार्घ्यंनमोस्तुते दशरथनामयादेवीनित्यमाराधितामया पुत्रार्थीकामयेदेविसर्वान्कामान्प्रयच्छमे दशसंख्यांश्चकरकान्शीतोदकसमन्वितान् वर्षेवर्षेप्रदेयानिप्रत्येकंकरकानिच इत्थंप्रपूजयेद्देवींसर्वदातुप्रयत्नतः अर्वाक्क्यादशवर्षाणांपूजयेद्भक्तिभावतः नारीनरोवाराजेंद्रव्रतमेतत्करोतिवै यंयंचिंतयतेकामंव्रतस्यास्यप्रभावतः पुत्रपौत्रधनंधान्यंलभतेनात्रसंशयः इतिभविष्योत्तरपुराणेदशरथललिताव्रतकथासंपूर्णा अथोद्यापनं उद्यापनविधिंवक्ष्येव्रतसंपूर्तिहेतवे कृष्णपक्षेचतुर्थ्यांतु आश्विनेव्रतमाचरेत् दशविप्रैःसपत्नीकैर्वेदवेदांगपारगैः स्नात्वासायंतनेकालेसर्वैस्तैर्भक्तिभावतः चतुस्तंभंचतुर्द्वारंकदलीस्तंभमंडितम् तन्मध्येकारयेत्पद्मंपंचवर्णैःसुशोभितं कलशंस्थापयेत्तत्रविधानेनसमन्वितं ताम्रंवामृन्मयंकुंभंवस्त्रयुग्मेनवेष्टयेत् तस्योपरिन्यसेद्देवंरोहिण्यासहितंविधुं सुवर्णनिर्मितंदेवंचतुर्भुजसमन्वितं सौवर्णारोहिणीकार्याचंद्रमारजतस्यच पूर्वोक्तेनविधानेनपूजांकृत्वासमाहितः एवंपूजाप्रकर्तव्याषोडशैरुपचारकैः मोदकान्कारयेद्राजन्तिलजानेकविंशतिम् दशविप्रायदातव्याआत्मार्थंस्थापयेद्दश एकोदेवायदातव्योललिताप्रीतयेव्रती दशरथललितादेव्याव्रतसंपूर्णहेतवे वाणकंद्विजवर्यायसहिरण्यंददाम्यहं दशरथनामयादेवीनित्यमाराधितामया पुत्रार्थीकामयेदेविसर्वान्कामान्प्रयच्छमे इतिसंप्रार्थ्यदेवेशींचंद्रायार्घ्यंनिवेदयेत् स्वगृह्योक्तविधानेनकृत्वाग्निंस्थापयेत्ततः होमंचैवसुसंपाद्यतिलपायसलड्डुकैः अष्टोत्तरशतंसद्योअष्टाविंशतिमेववा जुहुयाच्चंद्रमंत्रेणगाणेशेनतथैवच एवंसमाप्यहोमंतुतत्राचार्यंप्रपूजयेत् सुहृद्भिर्दशयुग्मैश्चपक्वान्नैश्चप्रपूजयेत् विप्रायपीठदानंचततःकुर्याद्विसर्जनम् ततःपुत्राःप्रजायंतेधनधान्यसमन्विताः सौभाग्यंपुत्रसंपत्तिर्जायतेभूभृतांवर अवैधव्यंचलभतेसर्वान्कामानवाप्नुयात् एतत्तेकथितंभूपकिमन्यच्छ्रोतुमिच्छसि कृतेदशरथेनास्मिन्कौसल्याभार्ययासह तुष्टादशरथादेवीगणेशेनसचंद्रमाः यस्मात्कृतकृत्योराजाभार्ययासहमोदते तस्माद्दशरथानामललिताभुविकीर्तिता एतत्तेकथितंराजन्दशांगललिताव्रतम् यइदंशृणुयान्नित्यंश्रावयेद्वासमाहितः अश्वमेधसहस्रस्यफलंतस्यध्रुवंभवेत् इतिश्रीभविष्योत्तरपुराणेदशरथललिताव्रतोद्यापनंसंपूर्णम्

अथकार्तिककृष्णचतुर्थ्यांअथवादक्षिणदेशेआश्विनकृष्णचतुर्थ्यांकरकचतुर्थीव्रतम् तच्चलिख्यते अत्रस्त्रीणामेवाधिकारः-
तासामेवफलश्रुतेः आचम्यमासपक्षाद्युल्लिख्य ममसौभाग्यपुत्रपौत्रादिसुस्थिरश्रीप्राप्तयेकरकचतुर्थीव्रतंकरिष्ये इतिसंक-
ल्प्य चंद्रंलिख्यततः अधस्ताच्छिवंषण्मुखयुक्तांगौरींलिखित्वा षोडशोपचारैःपूजयेत् पूजामंत्रः नमःशिवायैशर्वाण्यैसौभा-
ग्यंसंततिंशुभां प्रयच्छभक्तियुक्तानांनारीणांहरवल्लभेति ततः नमोंतनाममंत्रेणशिवषण्मुखगौरीगणपतीनांपूजाकार्या ततःसप
क्वान्नान्अक्षतसंयुक्तान्दशकरकान्ब्राह्मणायदद्यात् ततःपिष्टकनैवेद्यंभोज्यंसर्वंनिवेदयेत् ततश्चंद्रोदयोत्तरंचंद्रायार्घ्यंदद्यात्
अथकथा मांधातोवाच अर्जुनेतुगतेतप्तुंइंद्रकीलगिरिंप्रति विषण्णमनसाकृष्णद्रौपदीसमचिंतयत् अहोकिरीटिनाकर्मसमारब्धं
सुदुष्करम् बहवोविघ्नकर्तारोमार्गेवैपरिपंथिनः चिंतयित्वेतिसादेवीकृष्णाकृष्णंजगद्गुरुम् भर्तुःप्रियचिकीर्षंतीसापृच्छद्विघ्नवारणं
द्रौपद्युवाच कथयस्वजगन्नाथव्रतमेकंसुदुर्लभं यत्कृत्वासर्वविघ्नानिविलयंयांतितद्वद श्रीकृष्णउवा॰ एवमेवमहाभागेशंभुःपृ
ष्टःप्रियोमया तस्यास्तद्वचनंश्रुत्वाप्राहदेवोमहेश्वरः शृणुदेविवरारोहेवक्ष्यामितांमहेश्वरि सर्वविघ्नहरेत्याहकरकाख्याचतुर्थिका
पार्वत्युवाच भगवन्कीदृशीप्रोक्ताचतुर्थीकरकाभिधा विधानंकीदृशंप्रोक्तंकेनेयंचपुराकृता ईश्वरउवाच शक्रप्रस्थपुरेरम्येविद्व
ज्जनसमाकुले स्वर्णरौप्यसमाकीर्णेरत्नप्राकारशोभने दिव्यनारीजनालोकेवशीकृतजगत्त्रये वेदध्वनिसमायुक्तेस्वर्गादपिमनो
हरे वेदशर्माद्विजस्तत्रवसन्देशोविदांवरः पत्नीतस्यैवविप्रस्यनाम्नालीलावतीशुभा तस्यांसंजनयामासपुत्रान्सप्तामितौजसः क
न्यावीरावतीनाम्नीसर्वलक्षणसंयुता नीलोत्पलाभनयनापूर्णेंदुसदृशानना ततःकालेशुभदिनेविधिवच्चद्विजोत्तमः ददौवेदांगवि
दुषेविप्रायविधिपूर्वकम् अत्रांतरेतुसातत्रचक्रेगौर्याःशुभंव्रतं चतुर्थ्यांकार्तिकस्याथकृष्णायांतुविशेषतः स्नात्वासायंतनेकाले
सर्वान्तान्भक्तिभावतः विलिख्यवटवृक्षंचगौरींतस्यतलेलिखेत् शिवेनविघ्ननाथेनषण्मुखेनसमन्विताम् गंधपुष्पाक्षतैर्गौरींमं
त्रेणानेनपूजयेत् नमःशिवायैशर्वाण्यैसौभाग्यंसंततिंशुभाम् प्रयच्छभक्तियुक्तानांनारीणांहरवल्लभे तस्याःपार्श्वेमहादेवंविघ्न

नाथंषडाननं पुनःपुष्पाक्षतैर्धूपैरर्च्चयेच्चपृथक्पृथक् पक्वान्नाक्षतसंपन्नान्सदीपान्करकान्दश तथापिष्टकनैवेद्यंभोज्यंसर्वंनिवेदयेत्प्रतीक्षंत्यःस्त्रियःसर्वाश्चंद्रोदयपरास्थिताः साबालाविकलादीनाक्षुत्तृड्भ्यांपरिपीडिता निपपातमहीपृष्ठेरुरुदुर्बांधवास्तथा समाश्वास्यचतैस्तांरुक्मुखमभ्युक्ष्यवारिणा तज्ज्ञाताचिंत यित्वैवमारुरोहमहावटं हस्तेचोल्कांसमादायज्वलंतींस्नेहपीडितः भगिन्यैदर्शयामासचंद्रंव्याजोदितंतदा तंदृष्ट्वाचार्तिमुत्सृज्यबुभुजेभावसंयुता चंद्रोदयंनमज्ञायअर्घ्यंदत्वाविधानतः तद्दोषेणमृतस्तस्याःपतिस्तत्पापदूषितः पतिंतथाविधंदृष्ट्वाशिवमभ्यर्च्यसापुनः व्रतंनिरशनंचक्रेयावत्संवत्सरोगतः चक्रुःसंवत्सरेतीतेव्रतंतद्भ्रातृयोषितः पूर्वोक्तेनविधानेनसापिचक्रेशुभानना तदायाताशचीदेवीकन्याभिःपरिवारिता एतदेवव्रतंकर्तुमागतास्वर्गलोकतः वीरावत्यास्तदाप्याशमगमद्भाग्यतःस्वयं दृष्ट्वातांमानुषींदेवींपप्रच्छसकलांशची वीरावतीतदापृष्टाप्रोवाचविनयान्विता अहंपितृगृहंप्राप्तामृतोयंमेपतिःप्रभुः नजानेकर्मणःकस्यफलंप्राप्तंमयाधुना ममभाग्यवशाद्देविआगतासिमहेश्वरि अनुगृण्हीष्वमांमातर्जीवयाशुपतिंमम इंद्राण्युवाच त्वयापितृगृहेपूर्वंकुर्वंत्याकरकव्रतम् तदैवार्घ्यंत्वयादत्तंविनाचंद्रोदयंशुभे तेनतेव्रतदोषेणस्वामीलोकांतरंगतः इदानींकुरुयत्नेनकरकव्रतमुत्तमं पतिंतेजीवयिष्यामिव्रतस्यास्यप्रभावतः कृष्णउवाच तस्यास्तद्वचनंश्रुत्वाव्रतंचक्रेविधानतः प्रसन्नासाभवद्देवीशक्रस्यप्राणवल्लभा तयाव्रतेकृतेदेवीजलेनाभ्युक्ष्यतत्पतिं जीवयामासत्वेंद्राणीदेववच्चबभूवसः ततश्चागाद्गृहंस्वीयं रेमेसापतिनासह धनंधान्यंसुपुत्रांश्चदीर्घमायुश्चलब्धवान् तस्मात्त्वयापियत्नेनव्रतमेतद्विधीयताम् सूतउवाच श्रीकृष्णस्यवचःश्रुत्वाचकारद्रौपदीव्रतमुत्तमंतस्यप्रभावेनजित्वातान्कौरवान्रणे लेभिरेराज्यमतुलंपांडवादुःखनाशनाशनं येकरिष्यंतिसुभगाव्रतमेतन्निशागमे तेषांपुत्रांश्चधनंधान्यंसौभाग्यंचातुलंयशः करकंक्षीरसंपूर्णंतोयपूर्णमथापिवा ददामिरत्नसंयुक्तंचिरंजीवतुमेपतिः इतिमंत्रेणकरकान्प्रदद्याद्द्विजसत्तमे सुवासिनीभ्योदद्याच्चआदद्यात्ताभ्यएवच एवंव्रतंयाकुरुतेनारीसौभाग्यकाम्यया सौभाग्यंपुत्रपौत्रादिलभतेसुस्थिरांश्रियं इतिवामनपुराणेकरकाभिधाचतुर्थीव्रतंसंपूर्णं अथमाघशुक्लचतुर्थ्यांगौरीचतुर्थीव्रतं हेमाद्रौब्राह्म्ये उमाचतुर्थ्यां

माघेतुशुक्लायांयोगिनीगणैः प्राग्भक्षयित्वासृष्ट्वाचभूयस्त्वांगस्त्वकैर्गुणैः तस्मात्स्नातत्रसंपूज्यानैवेद्यैर्भिर्विशेषतः कुंदपुष्पैः प्रयत्नेनसम्यक्भक्त्यासमाहितैः कुंकुमालक्तकाभ्यांचरक्तसूत्रैःसकंकणैः रक्तपुष्पैस्तथाधूपैर्दीपैर्बलिभिरेवच गुडार्द्रकाभ्यांपयसालवणेनाथपालकैः पालकंमृद्गांडंइतिहेमाद्रिः पूज्यास्त्रियश्चविविधास्तथाविप्राश्चशोभनाः सौभाग्यवृद्धयेदेदंभोक्तव्यंबंधुभिःसह इतिगौरीचतुर्थीव्रतंब्रह्मपुराणोक्तम् अथमाघशुक्लचतुर्थ्यांवरदचतुर्थीव्रतं तदुक्तंकाशीखंडे माघशुक्लचतुर्थ्यांतुनक्तव्रतपरायणाः येत्वांधुंढेर्चयिष्यंतितेर्चास्युरसुरद्रुहाः विधायवार्षिकींयात्रांचतुर्थीप्राप्यमाधवीं शुक्लांन्तिलान्गुडैर्बध्वाप्राश्नीयाल्लड्डुकान्व्रती अत्रनक्तग्रहणात्प्रदोषव्यापिनीग्राह्येतिसिद्धं इतिवरदचतुर्थीव्रतं अथमाघकृष्णचतुर्थ्यांतिलकचतुर्थीव्रतम् अथपूजाविधिः येभ्योमाताऋक् १ एवापित्रेतिचजपित्वा आगमार्थंतु० घंटानादंकृत्वा अपसर्पंत्विति छोटिकामुद्रां० तीक्ष्णदंष्ट्रेतिक्षेत्रपालंसंप्रार्थ्य आचम्यप्राणानायम्य ममसहकुटुंबस्यक्षेमस्थैर्यविजयाभय आयुरारोग्यैश्वर्याभिवृद्ध्यर्थं धर्मार्थकाममोक्षचतुर्विधपुरुषार्थसिद्ध्यर्थं श्रीसंकटहरगणेश्वरप्रीत्यर्थंनारदीयपुराणोक्तप्रकारेणपुरुषसूक्तविधानेनयथासंभावितनियमेनयथोपचारमीलितद्रव्यैःसंकष्टचतुर्थीव्रतांगत्वेनगणपतिपूजनमहंकरिष्ये कलशार्चनंशंखार्चनंचकुर्यात् अथन्यासंकुर्यात् अस्यश्रीगणपतिमंत्रस्यशुक्लऋषिः श्रीसंकष्टहरणगणपतिर्देवता अनुष्टुप्छंदः श्रीसंकष्टहरगणपतिप्रीत्यर्थेन्यासेविनियोगः ओम् नमोहेरंब अंगुष्ठाभ्यांनमः मदमोदिततर्जनीभ्यांनमः ममसंकष्टंनिवारयमध्यमाभ्यां० निवारयअनामिकाभ्यांनमः हुंफट्कनिष्ठिकाभ्यां० स्वाहा करतलकरपृष्ठाभ्यांन० एवंहृदयादि भूर्भुवस्वरोमितिदिग्बंधः ओंनमोहेरंबमदमोदितममसंकटंनिवारयहुंफट्स्वाहा अथध्यानं श्वेतांगंश्वेतवस्त्रंसितकुसुमगणैःपूजितंश्वेतगंधैः क्षीराब्धौरत्नदीपैःसुरतरुविमलेरत्नसिंहासनस्थं दोर्भिःपाशांकुशेष्टाभयधृतरुचिरंचंद्रमौलिंत्रिनेत्रंध्यायेच्छांत्यर्थमीशांगणपतिममलंश्रीसमेतंप्रसन्नं लंबोदरंचतुर्बाहुंत्रिनेत्रंरक्तवर्णकं सर्वाभरणशोभाढ्यंप्रसन्नास्यंविचिंतयेत् ध्यायामि आगच्छविघ्नराजेंद्रस्थानेचात्रस्थिरोभव आराधयिष्येभक्त्याहंभवंतंसर्वसिद्धये सहस्रशीर्षेत्यावाहनं-

गणेशाय॰ आवाहयामि अभीप्सितार्थसिद्ध्यर्थंपूजितोयःसुरासुरैः सर्वविघ्नच्छिदेतस्मैगणाधिपतयेनमः पुरुषएवेदमासनं विघ्ननाशिनेनमः आसनं॰ गणाधिपनमस्तेस्तुसर्वसिद्धिकरप्रभो पाद्यंगृहाणदेवेशसुरासुरसुपूजित एतावानस्य॰ लंबोदराय॰पाद्यं॰ रक्तगंधाक्षतोपेतंरक्तपुष्पसमन्वितं अर्घ्यंगृहाणदेवेशमयादत्तंहिभक्तितः त्रिपादूर्ध्व॰ चंद्रार्धधारिणेन॰ अर्घ्यं॰ सुरासुरसमाराध्य सर्वसिद्धिप्रदायक मयादत्तंसुरश्रेष्ठगृहाणाचमनीयकं तस्माद्विराळ॰ विश्वप्रियाय॰ आचम॰ पयोदधिघृतंचैवशर्करामधुसंयुतं पंचामृतेनस्नपनंकरिष्येसर्वसिद्धिदम् यत्पुरुषेणेतिस्ना॰ पंचामृतस्नानं॰ गंगादिसलिलंशुद्धंसुवर्णकलशोस्थितं सुवासितंपरिमलैःस्नापयामिगणेश्वर पुरुषसूक्तेनशुद्धोदकस्नानं॰ रक्तांबरंवस्त्रयुग्मंसर्वकार्यार्थसिद्धये मयादत्तंगणाध्यक्षगृह्यतामखिलार्थद तंयज्ञं॰ सर्वप्रदाय॰ वस्त्रयुग्मं॰ कुंकुमाक्तंमयादत्तंसौवर्णमुपवीतकम् उत्तरीयेणसंयुक्तंगृहाणगणनायक तस्माद्यज्ञात्सर्वहुतः संभृ॰ वक्रतुंडाय॰ यज्ञोपवीतं॰ चंदनागरुकर्पूरकुंकुमादिसमन्वितं गंधंगृहाणदेवेशसर्वसिद्धिप्रदायक तस्माद्यज्ञात्सर्वहुतेति॰ गणाध्यक्षाय॰ गंधं॰ अक्षताश्चसुरश्रेष्ठाःकुंकुमाक्ताःसुशोभनाः गृहाणविघ्नराजेंद्रमयादत्ताहिभक्तितः गजवदनाय॰ अक्षतान् रक्तपुष्पाणिविघ्नेशएकविंशतिसंख्यया गृहाणसुमुखोभूत्वामयादत्तान्युमासुत तस्मादश्वा॰ गुणशालिनेनमः पुष्पाणिसमर्प॰ सुगंधीनिचमाल्यानिगृहाणगणनायक विनायकनमस्तुभ्यंशिवसूनोनमोस्तुते विघ्ननाशिनेन॰ माल्यानि॰ एकविंशतिनामभिःदूर्वाभिःपूजयेत् ॐगजाननायनमः विघ्नराजाय॰ लंबोदराय॰ शिवात्मजाय॰ वक्रतुंडाय॰ शूर्पकर्णाय॰ कुब्जाय॰ गणेशाय॰ विघ्ननाशिने॰ विकटाय॰ वामदेवाय॰ सर्वदेवाय॰ सर्वार्तिनाशिने॰ विघ्नहर्त्रेन॰ धूम्राय॰ सर्वदेवाधिदेवाय॰ उमापुत्राय॰ कृष्णपिंगलाय॰ भालचंद्राय॰ गणाधिपाय॰ एकदंताय॰ २१ एकविंशतिदूर्वापुष्पाणिसमर्पयामि अथांगपूजा संकष्टनाशिनेनमः पादौपू॰ स्थूलजंघाय॰ जंघेपू॰ एकदंताय॰ जानुनीपू॰ आखुवाह॰ ऊरूपू॰ हेरंबाय॰ कटीपू॰ लंबोदराय॰ उदरंपूज॰ गणाध्यक्षाय॰ हृदयंपू॰ स्थूलकंठाय॰ कंठंपूज॰ स्कंदाग्रजाय॰ स्कंधौपू॰ परशुहस्ताय॰ हस्तौपू॰ गजवक्त्राय॰ वक्त्रंपू॰ सर्वेश्वराय॰ शिरःपू॰ संकष्टनाशिनेनमः सर्वां

गंपूजयामि अथावरणपूजा गणाधिपाय॰ उमापुत्राय॰ अघनाशिने॰ हेरंबाय॰ लंबोदराय॰ गजवक्त्राय॰ एकदंताय॰ धूम्रकेतवे नमः भालचंद्राय॰ ईशपुत्राय॰ इभवक्त्राय॰ मूषकवाहनाय॰ कुमारगुरवे॰ संकष्टनाशिने॰ इतिप्रथमावरणम् १ विघ्नगणपतये॰ वीरगणपतये॰ शूर्पकर्णगणपतये॰ प्रसादगणपतये॰ वरदगणपतये॰ इंद्रगणप॰ एकदंतगणप॰ लंबोदरगणप॰ क्षिप्रगणपत॰ सिद्धिगणपत॰ द्वितीयावरणं॰ २ रामाय॰ रामेशाय॰ वृषांकाय॰ रतिप्रियाय॰ पुष्पबाणाय॰ महेश्वराय॰ वराहाय॰ श्रीसदाशिवा॰ तृतीयावरणं ३ आदित्याय॰ चंद्राय॰ कुजाय॰ बुधाय॰ बृहस्पतये॰ शुक्राय॰ शनैश्वरा॰ केतवे॰ सिद्ध्यै॰ समृद्ध्यै॰ कांत्यै॰ मदनरत्यै॰ मदद्राविण्यै॰ वसुमत्यै॰ वैनायक्यै॰ चतुर्थावरणं॰ ४ इंद्राय॰ अग्नये॰ यमाय॰ निर्ऋतये॰ वरुणाय॰ वायवेन॰ सोमाय॰ ईशाय॰ पंचमावरणं ५ अथपत्रीपूजा गणाधिपाय॰ पार्चीपत्रंस॰ सुमुखाय॰ भृंगराजपत्रं॰ उमापुत्रा॰ बिल्वप॰ गजवक्त्राय॰ श्वेतदूर्वाप॰ लंबोदराय॰ बदरीपत्रं॰ हरसूनवे॰ धत्तूरपत्रंसं॰ गुहाग्रजाय॰ तुलसीपत्रं॰ गजकर्णाय॰ अपामार्गपत्रं॰ एकदंताय॰ बृहतीप॰ इभवक्त्राय॰ शमीप॰ मूषकवाहनाय॰ करवीरपत्रंसं॰ विनायकाय॰ वेणुपत्रं॰ कपिलाय॰ अर्कपत्रं॰ भिन्नदंताय॰ अर्जुनप॰ पत्नीहिताय॰ विष्णुक्रांताप॰ बटवेन॰ डाडिमीपत्रं॰ भालचंद्राय॰ देवदारुप॰ हेरंबाय॰ मरुपत्रं॰ सिद्धिदाय॰ सिंदूरपत्रं॰ सुराग्रजाय॰ जातीपत्रं॰ विघ्नराजाय॰ केतकीप॰ इत्येकविंशतिपत्राणि अथपुष्पपूजा सुमुखाय॰ जातीपु॰ एकदंताय॰ शेवंतीपु॰ कपिलाय॰ यूथिकापुष्पं॰ गजकर्णाय॰ चंपकपु॰ लंबोदराय॰ कल्हारपु॰ विकटाय॰ केतकीपु॰ विघ्ननाशिने॰ बकुलपु॰ विनायका॰ जपाकुसुमपु॰ धूम्रकेतवे॰ पुन्नागपु॰ गणाध्यक्षाय॰ धत्तूरपु॰ भालचंद्राय॰ मातुलिंगपु॰ पत्नीहिताय॰ विष्णुक्रांतापु॰ उमापुत्राय॰ करवीरपु॰ गजाननाय॰ पारिजातपु॰ ईशपुत्राय॰ कमलपु॰ सर्वसिद्धिप्रदाय॰ गोकर्णिकापु॰ मूषकवाहनाय॰ कुमुदपु॰ कुमारगुरवेनमः तगरपुष्पं॰ दीर्घशुंडाय॰ सुगंधिराजपु॰ ईभवक्त्राय॰ अगस्तिपुष्पं॰ संकष्टनाशनाय॰ पाटलापुष्पंसं॰ इत्येकविंशतिपुष्पाणि २१ अथाष्टोत्तरशतनामपूजा ॐ अस्यश्री अष्टोत्तरशतविघ्नेश्वरदिव्यनामामृतस्तोत्रमंत्रस्य गृत्समदऋषिः गणपतिर्देवता अनुष्टुप् छंदः गंबीजं नंशक्तिः मंकील

कं श्रीगणपतिप्रसादसिध्यर्थेपूजनेविनियोगः ॐकारपूर्वकनामानि विनायकाय॰ विघ्नराजाय॰ गौरीपुत्राय॰ गणेश्वराय॰ स्कंदाग्रजाय॰ अव्ययाय॰ पूताय॰ दक्षाध्यक्षाय॰ द्विजप्रियाय॰ अग्निगर्वच्छिदेन॰ इंद्रश्रीप्रदाय॰ वाणीबलप्रदाय॰ सर्वसिद्धिप्रदाय॰ सर्वतनयाय॰ शर्वप्रियाय॰ सर्वात्मकाय॰ सृष्टिकर्त्रेन॰ देवानीकार्चिताय॰ शिवायन॰ शुद्धाय॰ बुद्धिप्रियाय॰ शांताय॰ ब्रह्मचारिणेनमः गजाननाय॰ द्वैमातुराय॰ मुनिस्तुत्याय॰ भक्तविघ्ननाशिने॰ एकदंताय॰ चतुर्बाहवे॰ शक्तिसंयुताय॰ चतुराय॰ लंबोदराय॰ शूर्पकर्णाय॰ हेरंबाय॰ ब्रह्मवित्तमाय॰ कालाय॰ ग्रहपतये॰ कामिने॰ सोमसूर्याग्निलोचना॰ पशांकुशधराय॰ चंडाय॰ गुणातीताय॰ निरंजनाय॰ अकल्मषाय॰ स्वयंसिद्धाय॰ सिद्धार्चितपदांबुजाय॰ बीजपूरकाय॰ अव्यक्ताय॰ वरदाय॰ शाश्वताय॰ कृतिने॰ विद्वत्प्रियाय॰ वीतभयाय॰ गदिने॰ चक्रिणेन॰ इक्षुचापधृतेनमः अब्जोत्पलकराय॰ श्रीशाय॰ श्रीपतये॰ स्तुतिहर्षिताय॰ कुलाद्रिभृतेनमः जटिने॰ चंद्रचूडाय॰ अमरेश्वराय॰ नागयज्ञोपवीतिने॰ श्रीकंठाय॰ रामार्चितपदाय॰ व्रतिने॰ स्थूलकंठाय॰ त्रयीकर्त्रेन॰ सामघोषप्रियाय॰ पुरुषोत्तमाय॰ स्थूलतुंडाय॰ अग्रगण्याय॰ ग्रामण्याय॰ गणपाय॰ स्थिराय॰ वृद्धिदाय॰ सुभगदाय॰ शूराय॰ वागीशाय॰ सिद्धिदाय॰ दूर्वाबिल्वप्रियाय॰ कांताय॰ पापहारिणे॰ कृतागमाय॰ समाहिताय॰ वक्रतुंडाय॰ श्रीपदाय॰ सौम्याय॰ भक्तकांक्षितदा॰ अच्युताय॰ केवलाय॰ सिद्धाय॰ सच्चिदानंदविग्रहाय॰ ज्ञानिने॰ मायायुक्ताय॰ दांताय॰ ब्रह्मिष्ठाय॰ भयवर्जिताय॰१०० प्रमत्तदैत्यभयप्रदाय॰ व्यक्तमूर्तये॰ अमूर्तकाय॰ पार्वतीशंकरोत्संगखेलनोत्सवलालसाय॰ समस्तजगदाधारा॰ वरदमूषकवाहनाय॰ हृष्टचित्ताय॰ प्रसन्नात्मने॰ सर्वसिद्धिप्रदायकाय॰ १०८ अष्टोत्तरशतेनैवंनाम्नाविघ्नेश्वरस्यच तुष्टावशंकरःपुत्रंत्रिपुरंहंतुमुद्यतः यःपूजयेदनेनैवभक्त्यासिद्धिविनायकं दूर्वादलैर्बिल्वदलैःपुष्पैर्वाचंदनाक्षतैः सर्वकामानवाप्नोतिसर्वा पद्भ्यःप्रमुच्यते इतिभविष्यपुराणेविघ्नेश्वरअष्टोत्तरशतदिव्यनामस्तोत्रंसंपूर्णं वनस्पतिरसोद्भूतंदशांगंगुग्गुलान्वितं गृहाणसर्वकामार्थं मयादत्तंविनायकम् यत्पुरुषंव्यदधु॰ उमापुत्राय॰ धूपं॰ घृताक्तवर्तिसंयुक्तंदीपंशक्तिप्रदायक गृहाणेशमयादत्तंतेजोराशेजग

सते ब्राह्मणोस्य० रुद्रप्रियाय० दीप० अन्नंचतुर्विधंस्वादुरसैः षड्भिःसमन्वितम् भक्त्यानिवेदितंदेवनैवेद्यंप्रतिगृह्यताम् भक्ष्यैर्नाना
विधैर्युक्तान्मोदकान्घृतपाचितान् गृहाणविघ्नराजेंद्रतिलल्लडुसमन्वितान् चंद्रमामनसो० विघ्ननाशिने० नैवेद्यं० फलानीमानिरम्याणि–
स्थापितानितवाग्रतः तेनमेसफलावाप्तिर्भवेज्जन्मनिजन्मनि संकष्टनाशिने० फलं० पूगीफलंमहद्दिव्यं० नाम्याआसी० सिद्धिविनाय
काय० तांबूलं० श्रियेजातइतिनीराजनं० पूजाफलसमृध्यर्थंतवाग्रेस्वर्णमीश्वर स्थापितंतेनमेप्रीतः पूर्णान्कुरुमनोरथान् सप्तास्या
सन्० विघ्नेशाय० सुवर्णपु० अथदूर्वा गणाधिपायनमः दूर्वायुग्मंस० उमापुत्राय० दूर्वा० अशनाशनाय० दूर्वा० एकदंताय० दूर्वा०
इभवक्त्राय० दूर्वा० विनायकाय० दूर्वा० ईशपुत्राय० दूर्वा० सर्वसिद्धिप्रदायकाय० दूर्वा० कुमारगुरवेन० दूर्वा० श्रीगणेश्वराय० ए
कदूर्वांकुरंस० गणाधिपनमस्तेस्तु उमापुत्राघनाशन एकदंतेभवक्त्रेतितथामूषकवाहन विनायकेशपुत्रेतिसर्वसिद्धिप्र
दायक कुमारगुरवेतुभ्यंगणराजंप्रयत्नतः एभिर्नामपदैर्नित्यं दूर्वायुग्मंसमर्पयेत् श्रीगणेशोवक्रतुंडउमापुत्रस्तथैवच विघ्नराजः
कामदश्चगणेश्वरइतिस्मृतः जीमूतःशक्तिरत्युग्रस्तथांजनसमप्रभः योगिध्येयोदिव्यगुणोमहाकायइतीरितः ततश्चसिद्धिदःप्रो
क्तोमहोदरइतिस्मृतः गजवक्त्रःकर्मभीमस्ततः परशुधार्यपि करिकुंभोविश्वमूर्तिरुग्रतेजास्ततःपरम् लंबोदरस्ततःसिद्धिर्गणेशश्चै
कविंशतिः नामानिरमणीयानिजपेदेभिश्चपूजयेत् गणेशान्तस्यनश्यंतिसंकष्टानिमहांत्यपि महासंकष्टदग्धोहंगणेशंशरणंगतः त
स्मान्मनोरथंपूर्णंकुरुविश्वेश्वरप्रिय ततः स्वर्णमयंपुष्पंविघ्नेशायनिवेदयेत् प्रदक्षिणानमस्कारान्कृत्वादेवंक्षमापयेत् यज्ञेनयज्ञं०
संकष्टनाशनाय० पुष्पांजलिं० नमोस्तुदेवदेवेशभक्तानामभयप्रद विघ्नानांनाशकर्त्रेच हरात्मजनमोस्तुते विघ्ननाशिने० नम–
स्कारं० ततः ॐ नमोहेरंबइतिमूलमंत्रंएकविंशतिवारंजपेत् अथगणेशायार्घ्यंदद्यात् गणेशायनमस्तुभ्यंसर्वसिद्धिप्रदायक
संकष्टहरमेदेवगृहाणार्घ्यंनमोस्तुते संकष्टहरगणपतयेनमः इदमर्घ्यं० कृष्णपक्षेचतुर्थ्यांतुसंपूजितविधूदये क्षिप्रंप्रसीददेवे
शगृहाणार्घ्यंनमोस्तुते एताभ्यांमंत्राभ्यांअर्घ्यंदद्यात् तिथीनामुत्तमेदेविगणेशप्रियवल्लभे सर्वसंकष्टनाशायगृहाणार्घ्यंनमोस्तु

ते चतुर्थ्यैनमः इदमर्घ्यं रोहिणीसहितचंद्रंपंचोपचारैः पूजयेत् क्षीरोदार्णवसंभूतलक्ष्मीबंधोनिशाकर गृहाणार्घ्यंमयादत्तंरो
हिण्यासहितःशशिन् इतित्रिरर्घ्यं ३ गगनांगणसंदीपक्षीराब्धिमथनोद्भव भाभासितदिगंतांतसोमराजनमोस्तुते चंद्रायनमस्का
रः ततः आचार्यंपूजयेत् वायनंदद्यात् मोदकान्सफलान्पंचदक्षिणाभिःसमन्वितान् गृहाणत्वंद्विजश्रेष्ठव्रतस्यपरिपूर्तये वा
यनमं० प्रतिमादानमं० प्रतिमांगुरवेदद्यादाचार्यायसदक्षिणां वस्त्रकुंभसमायुक्तामादौमंत्रमिमंजपेत् गणेशस्यप्रसादेनममसंतुमनोरथाः तु
भ्यंसंप्रददेविप्रप्रतिमांतुगजाननां इष्टकामार्थसिध्यर्थंपुत्रपौत्रप्रवर्द्धिनीम् गणाधिराजदेवेशविघ्नराजविनायक तवमूर्तिप्रदाने
नप्रसन्नोभवसर्वदा इतिकलशप्रतिमादानमंत्रः अथप्रतिग्रहमंत्रः गणेशःप्रतिगृण्हातिगणेशोवैददातिच गणेशस्तारकोभा-
भ्यांगणेशायनमोनमः संसारपीडाव्यथितंहिमांसदा संकष्टभूतंसुमुखप्रसीद त्वंत्राहिमांनाशयकष्टसंघान्नमोनमः कष्टवि-
नाशनाय इतिप्रार्थना यदुद्दिश्यकृतंनेद्ययथाशक्तिप्रपूजनम् संकष्टंहरमेदेवउमासुतनमोस्तुते इतिनमस्कारः इतिपूजा
विधिः अथकथा सूतउवाच अरण्येवर्तमानंतंपांडुपुत्रंयुधिष्ठिरं सबांधवंसुखासीनंप्रययौव्यासआदरात् तंदृष्ट्वामुनिशा
र्दूलंव्यासंप्रत्याययौनृपः मधुपर्कंचसार्धंच कृत्वातस्मैत्युवाचतम् युधिष्ठिरउ० अद्यमेसफलंजन्मभवतागमनेकृते येसक-
ष्टाहिसंजातावनेममनिवासिनः तेसर्वेविलयंयाताभवतोदर्शनेनहि आत्मानंसाधुमन्येहंराज्यतृष्णापराङ्मुखं दुःखितंमांक
थंस्वामिन्राज्यभ्रष्टंवनेस्थितं एतेभीमादयःसर्वेबांधवाव्यथयंतिमां दुराधर्षाःसुवीर्याहिमच्छासनविधौरताः इयंतुद्रौपदी
साध्वीराजपुत्रीपतिव्रता राज्योपभोगयोग्यासाप्यद्यदुःखोपभोगिनी मयात्वकिंकृतंव्यासपूर्वंकष्टानुजीवता दायादैर्वंचितंरा
ज्यंद्यूतछद्मरतैस्तथा पराजितावयंब्रह्मन्सुहृद्भिर्बंधुभिस्तथा वनंप्रस्थापितादूतैरिदमूचुस्तथैवच कुर्वंतुगमनंशीघ्रंवनाय
भवदादयः इत्थंनिराकृताःस्वामिन्यदातद्धूनमागताः अहंतदाप्रभृत्याहोनद्रक्ष्याभिभवादृशान् यद्यस्तिव्रतमेकंहिसर्वसंकष्ट
नाशनं तद्व्रतंकथयब्रह्मन्ननुयात्योस्मिसुव्रत इत्युक्तवंतंराजानंसर्वसंकष्टनाशनं उवाचप्रीणयन्व्यासोधर्मजंमेदिनीपतिं व्या

सउवाच नास्तिभूमंडलेराजंस्त्वत्समोधर्मतत्परः कथयामिव्रतंतेद्यव्रतानामुत्तमोत्तमं संकष्टनाशनंनित्यंशुभदंफलदंभुवि यत्कृ
त्वासर्वकार्याणांनिष्पत्तिर्जायतेध्रुवं विद्यार्थीलभतेविद्यांधनार्थीलभतेधनं प्रोषितायापुरंध्रीचकरोतिव्रतमुत्तमं ईप्सितंलभतेसर्व-
पतिनासहमोदते कंकष्टेपियथाक्षिप्तोमानवोग्रहपीडितः साम्राज्येदीक्षितोनित्यंमंत्रिभिःपरिवारितः सुहृद्भिर्बंधुभिश्चैवतथापु
त्रैःसमन्वितः तस्यतुप्रियकर्त्रीचपत्नीगुणवतीप्रिया नानारत्नावलीत्यासीत्पतिव्रतपरायणा तयोःपरस्परंप्रीतिरभवच्चगुणाश्रयी
कदाचिद्दैवयोगेनहृतंराज्यंचवैरिभिः कोशोबलंचापहृतंविध्वस्तोबंधुभिःसह रत्नावल्यानयासाध्व्यानिर्गतोभूमिवल्लभः वनेक्षुधा
र्त्तःश्रमितोह्येकवासास्तृषार्दितः इतस्ततश्चरन्राजन्नातपेनातिपीडितः एकाकीवनमासाद्यतयासार्धंयुधिष्ठिर सूर्येचास्ताचल
यातेअरण्येचशिवार्दिते व्याघ्राश्चचुक्रुशुस्तत्रपर्जन्योपिववर्षह कंटकैःक्लेशिताराज्ञीदुःखमाक्रंदपीडिता तांविलोक्यनृपश्रेष्ठोदुः
खेनैवतुपीडितः ततःप्रभातसमयेमार्कंडेयंमहामुनिं ददर्शराजातत्रैवविस्मयाविष्टमानसः उपगम्यशनैस्तंतुदंडवत्पतितोभु
वि अब्रवीद्वचनंराजामार्कंडेयंमहामुनिं किंकृतंहिमयास्वामिन्दुष्कृतंकथयस्वतत् केनकर्मविपाकेनराज्यलक्ष्मीःपराङ्मुखी

मार्कंडेयउवाच शृणुराजन्प्रवक्ष्यामियत्त्वयापूर्वजन्मनि पूर्वंहिलुब्धकश्चासीर्गतोसिगहनंवनं मृगशार्दूलशशकान्ह
न्यमानोवनेतदा तस्मिन्रात्रौभ्रमन् राजन् चतुर्थ्यांमाघकृष्णके दृष्टंशुभंचकृष्णायास्तडागंपृथुनिर्मलम् तत्तीरेनागकन्यानांस
मूहंरक्तवाससां गणेशंपूजयंतीनांदृष्टवान्नियमव्रतम् उपगम्यशनैस्तत्रपृष्टंतासांत्वयाविभो आर्याःकिमेतन्मेसर्वंकथयध्वं
हितत्वतः नागकन्याऊचुः पूजयामोगणपतिंवयंसिद्धिप्रदायकं शांतिदंपुष्टिदंनित्यंसर्वव्याधिविनाशनम् पुनःपृष्टंत्वयात
त्रकिंदानंपूज्यतेत्रकः स्त्रियऊचुः यदाचोत्पद्यतेभक्तिर्मासिपूज्योगणाधिपः कृष्णायांचचतुर्थ्यांवैरक्तपुष्पैःप्रपूजयेत् धूपैर्दीपै
श्चनैवेद्यैरन्यैर्भक्तिसमन्वितैः विविधान्मोदकान्कृत्वापूरिकाघृतपाचिताः नैवेद्यंषड्रसंसर्वंगणेशायनिवेदयेत् ततोगृहीतंराजेंद्र
त्वयासंकष्टनाशनम् अभवद्धनधान्यंतेपुत्रपौत्रसमन्वितम् कस्मिंश्चित्समयेराजन्धनमत्तेनसिद्धिदम् विस्मृतंनकृतंसर्वंत्वयाय

त्वेनभूतिदं ततःप्राप्तंहिपंचत्वंत्वयाप्राणविनाशनं तत्प्रभावाद्राजकुलेविशालेप्राप्तमुत्तमं त्वयाजन्मनृपश्रेष्ठराज्यंप्राप्तंत्वयाविभो सुहृ
न्मित्रप्रियायुक्तःप्राप्तोसिविपुलंवसु कृतावज्ञाव्रतस्यांतेतत्प्राप्तंफलमीदृशं राजोवाच अधुनाक्रियतेस्वामिन्कथ्यतांममसुव्रतं य
त्कृत्वासकलंराज्यंप्राप्यतेचमयापुनः ऋषिरुवाच व्रतसंकल्पमाशुत्वंकुरुराजन्नृपोत्तम प्राप्स्यसित्वंहिराज्यंचसंदेहंमाकुरुप्रभो
इत्युक्त्वासमुनिश्रेष्ठोन्तर्धानमगात्ततः मुनेस्तद्वचनंश्रुत्वाव्रतसंकल्पमातनोत् राजाराज्ञीमुनिप्रोक्तंसकलंतद्व्रतंशुभं आयाताःसक
लास्तस्यमंत्रिभृत्याश्वसौनिकाः समाययौनृपश्रेष्ठस्तत्क्षणात्स्वयमेवहि लब्ध्वास्वकीयंराज्यंचगणेशस्यप्रसादतः बुभुजेमेदिनींरा
जापुत्रपौत्रसमन्वितः तस्मात्त्वमपिराजेंद्रकुरुसंकष्टनाशनं व्रतंसिद्धिप्रदन्नृणांस्त्रीणांचैवविशेषतः युधिष्ठिरउ० सविस्तरंव्र
तंब्रूहिकृपयाकष्टनाशनं व्यासउवाच यदासंक्लेशितोराजन्दुःखैःसंकष्टदारुणैः पुमान्कृष्णचतुर्थ्यांतुतदापूज्योगणाधिपः श्रा
वणेबहुलेपक्षेचतुर्थ्यांतुविधूदये तस्मिन्दिनेव्रतंग्राह्यंसंकष्टाख्यंयुधिष्ठिर निराहारोद्यदेवेशयावच्चंद्रोदयोभवेत् माघेवाकृष्ण
पक्षेतुचतुर्थ्यांतुविधूदये तस्मिन्दिनेव्रतंग्राह्यंसंकष्टाख्यंनृपोत्तम प्रातःशुचिर्भवेत्सम्यग्दंतधावनपूर्वकं निराहारोद्यदेवेशया
वच्चंद्रोदयोभवेत् भोक्ष्यामिपूजयित्वाहंगणेशशरणंगतः एवंसंकल्पमादौतुस्नात्वाशुक्लतिलैःशुभैः आन्हिकंतुविधायैवंपूजांच
कुरुसुव्रत यथाशक्त्यातुसौवर्णप्रतिमांचविधायच सौवर्णेराजतेताम्रेमृन्मयेवाथशक्तितः कुंभेपुष्पैःफलैःपूर्णेदेवंतत्रैवविन्यसे
त् शुभेदेशेन्यसेत्कुंभंवस्त्रंतत्रनिधायच पद्ममष्टदलंकृत्वागंधाद्यैःपूजयेत्ततः रक्तपुष्पैश्चधूपैश्चएभिर्नामपदैःपृथक् आवाह-
नंगणेशायआसनविघ्ननाशिने पाद्यंलंबोदरायेतिअर्घ्यंचंद्रार्धधारिणे विश्वप्रियायाचमनंस्नानंचब्रह्मचारिणे चंदनंरुद्रपुत्रा
यपुष्पंचगुणशालिने भवानीप्रियकर्त्रेचधूपंदद्याद्यथाविधि दीपंरुद्रप्रियायेतिनैवेद्यंविघ्ननाशिने तांबूलंसिद्धिदायेतिफलंसंक
ष्टनाशिने इतिनामपदैःपूजांकृत्वामासयमान्शृणु श्रावणेसप्तलड्डुकान् नभस्येदधिभक्षणम् आश्विनेचोपवासंचकार्तिके
पयभक्षणम् मार्गेमासिनिराहारःपौषेगोमूत्रभक्षणं तिलानष्टशतंमाघेफाल्गुनेघृतशर्कराम् चैत्रेमासिपंचगव्यंदूर्वारसं

तुमाधवे ज्येष्ठेघृतंपलंभोज्यमाषाढेमधुभक्षणं इतिमासयमान्कृत्वानरोमुच्येतसंकटात् भुंजीयाद्वानथासप्तग्रासान्वास्वेच्छयासुखम् अशक्तश्चेत्ततःसिद्धिर्भविष्यतिनसंशयः मंत्रेणानेनसंप्रार्थ्यदेवदेवंजगद्गुरुं एवंपूजाप्रकर्तव्याषोडशैरुपचारकैः नानाभक्ष्यादिसंयुक्तमुपहारंप्रकल्पयेत् मोदकान्कारयेद्राजन्तिलजान्दशसंख्यकान् देवाग्रेस्थापयेत्पंचदशविप्रायदापयेत् पूजयित्वातुतंविप्रं भक्तिभावेनदेववत् दक्षिणांचयथाशक्त्यादत्वापंचैवमोदकान् संसारपीडाव्यथितंहिमांसदासंकष्टभूतंकुरुसुखप्रसीद त्वंत्राहिमांनाशयकष्टसंघान्नमोनमः कष्टविनाशनाय इतिसंप्रार्थ्यदेवेशंचंद्रायार्घ्यंनिवेदयेत् ब्राह्मणान्भोजयेत्पश्चाद्गणेशप्रीतयेसदा स्वयंभुंजीतपंचैवमोदकान्बंधुभिःसह अशक्तौत्वेकमन्नंवाभुंजीयाद्दधिनासह अथवाभोजनंकार्यमेकवारंहिपांडव भूमिशायीजितक्रोधोलोभदंभविवर्जितः प्रतिमांगुरवेदद्यादाचार्यायनिवेदयेत् गच्छगच्छसुरश्रेष्ठस्वस्थानेपरमेश्वर व्रतेनानेनसुप्रीतोयथोक्तफलदोभव एवंव्रतंप्रकर्तव्यंचतुर्थ्यांमासकृष्णके गाणपत्यंतथाकार्यंसर्वशास्त्रविशारदम् आचार्यंवरयेदादौयथोक्तविधिनार्चयेत् एकविंशतिविप्रान्वैवस्त्रालंकारभूषणैः पूजयेद्वाहिरण्याद्यैर्मोदकैश्चैवहोमयेत् अष्टोत्तरसहस्रंतुशतंचाष्टाधिकंतथा अष्टाविंशतिरष्टौवावेदोक्तैस्तिलसर्पिषा सपत्नीकंसुवर्णाद्यैर्गोभूवस्त्रादिभूषणैः छत्रंचोपानहौदद्यात्कमंडलुगृहादिभिः आचार्यंपूजयेद्राजन्गणेशस्यतुतुष्टये एवंकृत्वाविधानेनप्रसन्नोनात्रसंशयः प्रतिमासंतुयःकुर्यात्त्रीण्यब्दान्येकमेववा अथवाजन्ममर्यादांतस्यदुःखंकदाचन दारिद्र्यंनभवेत्तस्यसंकष्टंनभवेदिह वत्सरांतेद्वादशान्वैब्राह्मणान्भोजयेत्ततः विद्यार्थीलभतेविद्यांधनार्थीलभतेधनं पुत्रार्थीलभतेपुत्रान्सौभाग्यंचसुवासिनी शृण्वंतियेव्रतमिदंशुभमीदृशंहितेवैसुखंसुविमनोव्रतपूर्णकामाः नित्यंभवंतिललनाःपुरुषाःसुखिनस्तेपुत्रपौत्रधनधान्ययुताःपृथिव्याम् एवमुक्त्वाततोव्यासस्तत्रैवांतरधीयत युधिष्ठिरस्तुतत्सर्वमकरोद्राजसत्तमः तेनव्रतप्रभावेनस्वराज्यंप्राप्तवान्नृपः हत्वारिपून्कुरुक्षेत्रेस्वराज्यमलभन्नृपः इतिश्रीनारदीयपुराणेकृष्णचतुर्थीसंकष्टहरव्रतंसंपूर्णम्

अथअंगारकचतुर्थीव्रतंलिख्यते इंद्रउवाच अंगारकचतुर्थ्यांचविशेषोविहितःकुतः वदमेकृपयाब्रह्मन्प्रश्रयान्नियमेनच

शृण्वतोनचमेतृप्तिर्गजाननकथांशुभाम् ब्रह्मोवाच अंगारकचतुर्थ्यास्तुमहिमानंमहीपते शृणुष्वावहितोभूत्वाकथयामित
वाग्रतः अवंतीनगरेराजन्भरद्वाजोमहामुनिः वेदवेदांगवित्प्राज्ञः सर्वशास्त्रविशारदः अग्निहोत्ररतोनित्यंशिवध्यानेचतत्परः नदी
तीरेगतोतिष्ठन्ननुष्ठानरतोमुनिः अकस्मात्कामिनींदृष्ट्वाकामासक्तोभवन्मुनिः कामबाणाभिभूतःसन्निपपातमहीतले अतिविह्वल
गात्राणांतस्यरेतस्तदास्खलत् प्रविष्टंतस्यतद्रेतःपृथिवीबिलमध्यतः ततएकःकुमारोभूज्जपाकुसुमसंनिभः तंधरित्रीस्नेहव
शात्पालयामाससादरं जनुःस्वंतेनधन्यंसमन्यतेपितरौकुलम् ततःससप्तवर्षस्तांपप्रच्छजननींनिजाम् महीतोहिकथंमातर्मानु
षंदेहमाश्रितः कश्चमेजनकोमातस्तन्मयाचक्ष्वसांप्रतम् धरोवाच भरद्वाजमुनेरेतःस्खलितंमयिसंगतं ततोजातोसिरेपुत्रव
र्धितोसिमयाशुभम् सूतउवाच तर्हितंमेमुनिंमातर्दर्शयस्वतपोनिधिं ब्रह्मोवाच तमादायतदादेवीभरद्वाजंजगामह
धरोवाच भरद्वाजंनमस्कृत्यतद्वीर्यप्रभवंकृतं वर्धितंतंपुरोधायस्वीकुरुष्वमुनेधुना तदाज्ञयाययौधात्रीस्वधामरुचिरंतदा भ
रद्वाजःसुतंलब्ध्वामुमुदेचालिलिंगतं आघ्रायशिरउत्संगेस्थापयामासतंमुदा मुहूर्तेशुभलग्नेचचकारोपनयंमुनिः वेदशास्त्रा
ण्युपाशिक्ष्यगणेशस्यमनुंशुभं उवाचकुर्वन्नुष्ठानंगणेशप्रीतयेचिरं संतुष्टोदास्यतेकामान्सर्वांस्तवमनोगतान् ततोमंदाकिनीती
रेपद्मासनगतोमुनिः संनियम्येंद्रियाण्याशुध्यायन्हेरंबमंतरा जजापपरमंमंत्रंवायुभक्षोभृशंमुनिः एवंवर्षसहस्रंसस्तपस्तेपेसुदा
रुणम् माघकृष्णचतुर्थ्यांतमुदयेशशिनःशुभे दर्शयामासस्वंरूपंगणनाथोथदिग्भुजम् दिव्यांबरंभालचंद्रंनानालंकारमंडितं
ददर्शसूर्यंदेवस्यसबालःपुरतःस्थितं उत्थायप्रणिपत्यैनंतुष्टावजगदीश्वरम् नमस्तेविघ्ननाशायनमस्तेविघ्नकारिणे सुरासुर
शिरोरत्नसर्वांशात्स्कपदृंहिणे निरामयायदेवायनिर्गुणायगुणच्छिदे नमोब्रह्मविदांश्रेष्ठस्थितिसंहारकारिणे नमस्तेजगदाधार
नमस्त्रैलोक्यपालक दयानिधेब्रह्मविदेब्रह्मणेब्रह्मरूपिणे लक्ष्यालक्ष्यस्वरूपायदुर्लक्षणच्छिदेनमः इतिस्तुतःप्रसन्नात्मा
परमात्मागजाननः उवाचश्लक्ष्णयावाचावरंयाचयबालक एवमुक्तोभूमिपुत्रस्ततऊचेगजाननं भौमउवा० धन्योतातोममहि

जननंदर्शनात्तेस्फुरेशधन्यंज्ञानंकुलमपितयोर्येनदृष्टोसिसाक्षात् धन्यावाणीव सतिमयियापादपद्मेच भक्तिर्जातोसित्वंवरदसु
लब्धोभक्तिभावेनदेव यदितुष्टोसिदेवेशस्वर्गेभवतुमेस्थितिः अमृतंपातुमिच्छामिदेवैःसहगजानन कल्याणकारिमेनामख्या
तिमेतुजगत्त्रये दर्शनंमेचतुर्थ्यांयज्जायतेपुण्यदंविभो अतःसापुण्यदानित्यसर्वसंकष्टहारिणी कामदाव्रतकर्तॄणांत्वत्प्रसादा
त्सुरेश्वर गजाननउ॰ अमृतप्राश्यसेसम्यक्देवैःसहधरासुतमंगलेतिचनाम्नात्वंलोकेख्यातिंगमिष्यसि अंगारकेतिर-
क्तत्वाद्भूसुमत्वायतःसुतः अंगारकचतुर्थीयेकरिष्यंतिनराभुवि तेषामब्दभवंपुण्यंसंकष्टीव्रतसंभवं निर्विघ्नतासर्वकार्येषुभ
विष्यतिनसंशयः अवंतीनगरेराजाभविष्यतिपरंतपः व्रतानामुत्तमंयस्मात्कृतंमेव्रतमुत्तमं यस्यसंकीर्तनान्मर्त्यैःसर्वकामानवा
प्नुयात् इतिदत्वावरान्देवोंतर्दधेद्विरदाननः ततस्तुमंगलोदेवंस्थापयित्वाप्रयत्नतः शुंडामुखंदशभुजंसर्वावयवसुंदरं प्रासादं
कारयामासगजाननमुदावहं संज्ञांमंगलमूर्तिंच देवदेवस्यसोकरोत् ततोभवत्कामदंतत्क्षेत्रंसर्वजनस्ययत् अनुष्ठानात्पूजना
च्चदर्शनात्सर्वमोक्षदम् ततोविनायकोदेवोविमानवरमुत्तमं प्रेषयामासस्वगणान्भौममानेतुमंतिके तेगत्वातेनदेहेनभौममा
नीतवान्तदा गणेशस्यांतिकंराजन्तदद्भुतमिवाभवत् ततोभौमोभवत्ख्यातस्त्रैलोक्येसचराचरे यतोभौमेनसंकष्टचतुर्थीभौ
मसंयुता कृत्वाप्राप्तंयथास्वर्गेसुधापानंसुरैःसह अतश्चांगारकयुताचतुर्थीप्रथिताभुवि चिंतितार्थप्रदानेनचिंतामणिरिव
प्रिया प्रयातोमंगलमूर्तिःसर्वानुग्रहकारकः परिणेतुंसनगरात्पश्चिमेप्रथितोभवत् चिंतामणिरितिख्यातःसर्वविघ्ननिवारि
णः अतःप्रसिद्धगंधर्वैःपूज्यतेसविधूदये ददातिवांछितानर्थान्सुतपौत्रादिसंपदः इतिश्रीगणेशपुराणेब्रह्मेंद्रसंवादेअंगारकच
तुर्थीव्रतंसपूर्णम् अथपंचमीव्रतानिलिख्यंते अथचैत्रशुक्लपंचमीकल्पादिः चैत्रेमासिसितेपक्षेपंचम्यांपूजयेद्धरि-
म् तत्रदोलोत्सवंकुर्यात्पुष्पधूपैश्चपूजयेत् नारीनरोवाराजेंद्रसंतर्प्यपितृदेवताः स्रक्चंदनसमायुक्तान्ब्राह्मणान्भोजयेत्ततः
इतिहेमाद्रौभविष्ये अथश्रावणशुक्लपंचमीनागपूजायांपरा पंचमीनागपूजायांकार्याषष्ठीसमन्विता तस्यांतुतुषिता

नागाइतरास्नाच्चतुर्थिका अथनागपंचमीव्रतंहेमाद्रौप्रभासखंडे ईश्वरउवाच श्रावणेमासिपंचम्यांशुक्लपक्षेतुपार्वति द्वारस्योभयतोलेख्यागोमयेनविषोल्बणाः स्नातुपुण्यतमाप्रोक्तादेवानामपिदुर्लभा कुर्याद्द्वादशवर्षाणिपंचम्यांचवरानने चतुर्थ्यामेकभुक्तंतुतस्यांनक्तंप्रकीर्तितं भूरिचंद्रमयंनागमथवाकलधौतजम् कृत्वादारुमयंवापि अथवामृन्मयंप्रिये हरिद्राचंदनेनैवपंचसर्पांस्तुलेखयेत् पंचम्यामर्चयेद्भक्त्यानागाःपंचफणाःस्मृताः पूजयेद्विधिवद्वीरलाजपंचामृतैःसह करवीरैःशतपत्रैर्जातीपुष्पैश्चपद्मकैः तथागंधादिधूपैश्चपूजयेन्नागपंचकम् ब्राह्मणान्भोजयेत्पश्चाद्घृतपायसमोदकैः अनंतंवासुकिंशेषंपद्मंकंबलमेवच तथाकर्कोटकंनागंभुजंगाश्वतरंतथा धृतराष्ट्रंशंखपालंकालीयंतक्षकंतथा पिंगलंचमहानागंमासिमासिप्रकीर्तिताः व्रतस्यांतेपारणंस्यात्क्षीरैर्ब्राह्मणभोजनं सुवर्णभारनिष्पन्नंनागंदद्याच्चगांतथा तथावस्त्राणिदेयानिव्यासायामिततेजसे एवंसंपूजयेन्नागान्सदाभक्त्यासमन्वितः विशेषतस्तुपंचम्यांपयसापायसेनच दिवारात्रौनरैस्तत्रमेदिनीखननंनहि इतिप्रभासखंडेनागपंचमीव्रतम् अत्रैवनागदष्टव्रतम् हेमाद्रौभविष्योत्तरपुराणे सुमंतउवाच नागदष्टोनरोराजन्प्राप्यमृत्युंव्रजत्यधः अधोगत्वाभवेत्सर्पोनिर्विषोनात्रसंशयः शतानीकउवा॰ नागदष्टःपितायस्यभ्रातावादुहितापिच मातापुत्रोथवाभार्याकर्तव्यंतद्वदस्वमे मोक्षायतस्यविप्रेंद्रदानव्रतमुपोषणं ब्रूहिमेद्विजशार्दूलयद्वेत्तत्करोम्यहम् सुमंतउवाच उपोष्यापंचमीसम्यक्नागानांबलवर्धिनी सुमेकमेकंयावच्चविधानंशृणुभारत सुमेकंसंवत्सरं उपोष्येतिदिवाभोजनाभावः तस्यांनक्तमित्यग्रेनक्तोक्तेः श्रावणेमासिपंचम्यांशुक्लपक्षेनराधिप सापिपुण्यतमाप्रोक्ताग्राह्यासागतिकाम्यया चतुर्थ्यामेकभक्तंचपंचम्यांनक्तमाचरेत् कुर्याच्चांद्रमसंनागमथवाकलधौतजं हेमरौप्यंचेत्यर्थः अथदारुमयंभव्यंमृन्मयंवाप्यशक्तितः पंचम्यामर्चयेद्भक्त्यानागंपंचफणंतथा करवीरैस्तथापद्मैर्जातिपुष्पैःसुगंधिभिः गंधपुष्पैश्चनैवेद्यैःस्नाप्यक्षीरादिभिर्नृप ब्राह्मणान्भोजयेत्पश्चाद्घृतपायसमोदकैः अनंतंवासुकिंशंखंपद्मंकंबलमेवच तथाकर्कोटकंनागंनागमश्वतरंनृप धृत

राष्ट्रंशंखपालंकालियंतक्षकंतथा पिंगलंचतथानागंमासिमासिक्रमाद्यजेत् पूजयित्वाप्रयत्नेनपंचम्यांनक्तभुक्भवेत् एवंद्वादश
कृत्वावैश्रावणेतुसितेनृप वत्सरांतेयथाशक्त्याअन्नदानंचकारयेत् ब्राह्मणानांयतीनांचनागानुद्दिश्यभक्तितः इतिहासविदेनागंकां
चनंरत्नचित्रितम् गांचदद्यात्सवत्सांवैसर्वोपस्करसंयुताम् दानकालेपठेदेतत्स्मरन्नारायणंविभुम् सर्वगंसर्वधातारमनंतमपराजि
तम् येकेचिन्मेकुलेसर्पादष्टाःप्राप्ताह्यधोगतिम् व्रतदानेनगोविंदसुक्तिभाजोभवंतुते इत्युच्चार्याक्षतैर्युक्तंसितचंदनमिश्रितं वासुदे
वाग्रतोभूपतोयंतोयेथनिक्षिपेत् अनेनविधिनासर्वेयेमरिष्यंतिवामृताः सर्पतस्तेभियास्यंतिस्वर्गतिंनृपसत्तम कृत्वासर्वान्समुद्धृत्य
कुलजान्कुरुनंदन प्रयातिविष्णुसान्निध्यंसेव्यमानोप्सरोगणैः वित्तशाठ्यविहीनायःसर्वमेतत्फलंलभेत् नक्तेनभक्तिसहिताःसित
पंचमीषुयेपूजयंतिशुभगान्कुसुमोपहारैः तेषांगृहेष्वभयदाहिभवंतिसर्पाअचान्वितामणिमयूखविभासितांगाः येनस्यांपूज
यंतीहनागान्भक्तिपुरःसराः नतेषांसर्पतोवीरभयंभवतिकिंचन इतिनागदष्टपंचमीव्रतंभविष्योक्तम् अथभाद्रपदशुक्लपंचमी
व्रतं तच्चमध्यान्हव्यापिन्यांकार्यम् तथाचमाधवीयेहारीतः पूजाव्रतेषुसर्वेषुमध्यान्हव्यापिनीतिथिः दिनद्वयेनह्यासौवापूर्ववि
द्धायांकार्यमितिमदनरत्नात् पाप्यभाद्रपदेमासिशुक्लपक्षस्यपंचमी तस्यांमध्यान्हसमयेनद्योदौविमलेजले कृत्वापामार्गसमि
धाअष्टोत्तरशताधिकाः अथवाकारयेत्सप्तदंतधावनमादितः वनस्पतिप्रार्थना आयुर्बलंयशोवर्चःप्रजाःपशुवसूनिच ब्रह्म
प्रज्ञांचमेधांचत्वन्नोधेहिवनस्पते संप्रार्थ्यानेनमंत्रेणकुर्याद्वैदंतधावनं तत्रमंत्रः मुखदुर्गंधिनाशायदंतानांचविशुद्धये ष्ठीवना
यचगात्राणांकुर्वेहंदंतधावनं अनेनदंतान्संशोध्यस्नायान्मृत्स्नानपूर्वकं पंचगव्यमंत्रः देशकालौसंकीर्त्यअमुककायशुद्ध्यर्थं
पंचगव्यमहंकरिष्ये गायत्र्यागृह्यगोमूत्रंगंधद्वारेतिगोमयं आप्यायस्वेतिचक्षीरम् दधिक्राव्योतिवैदधि शुक्रमसिज्योतिरसिअ
मृतमसिनामधामसि प्रियंदेवानामनाज्ञुष्टंदेवयजमानमसि इत्याज्यम् देवस्यत्वेतिकुशोदकं आपोहिष्ठेतिमंथयेत् तस्य
चतुर्भागंहुत्वा सप्तपत्राःशुभादर्भाअक्षताश्चैवसंस्थिताः · तेनैवोद्धृत्यहोतव्यम् अग्नयेस्वाहा सोमायस्वाहा इरावतीधेनुमती·

इदंविष्णु॰ ब्रह्मजज्ञानं॰ मानस्तोके॰ गायत्र्या॰ विष्णवे॰ ब्रह्मणे॰ रुद्राय॰ सूर्यायस्वाहेतिहोमयेजलमध्येवा प्रणवेनअथचकेशवेति
नाममंत्रेणस्त्रीणांपंचगव्यंकुर्यात् प्राशयेदिति नद्यादिकेतदास्नात्वाकृत्वानियममेवच ब्राह्मणीक्षत्रियावैश्याशूद्रीवापिवरानने कृ
त्वानैमित्तिकंकर्म गत्वानिजगृहंपुनः वेदींसम्यक्प्रकुर्वीतगोमयेनोपलिप्यतां इतिहेमाद्रौ रंगवल्लीसमायुक्ते सर्वतोभद्रमंडले
अव्रणंसनतंकुंभंताम्रमृन्मयमेववा संस्थाप्यवस्त्रसंयुक्तंकंठदेशेस्रक्शोभितं पंचरत्नसमायुक्तंफलगंधाक्षतैर्युतं सहिरण्यंसमा
साद्यताम्रेणपटलेनवा वंशमृन्मयपात्रेणयवपूर्णेनचैवहि आच्छादयेत्तंचैलेनलिखेदष्टदलंततः तत्रसप्तऋषींद्यान् भक्तियुक्तःप्र
पूजयेत् अथसंकल्पः मासपक्षाद्युल्लिख्यममऋतुसंपर्कजनितदोषपरिहारार्थं अरुंधतीसहितकश्यपादिसप्तर्षिप्रीत्यर्थंऋषिपूजनम
हंकरिष्ये अथपूजाविधिः आगच्छंतुमहाभागाश्चतुर्वेदपरायणाः यावद्व्रतमिदंकुर्वेकृपयाभवतामहं आवाहयामि मू
र्तिब्रह्मण्यदेवस्यब्रह्मण्येतेजउत्तमं सूर्यकोटिप्रतीकाशमृषिविंदंविचिंतयेत् ध्यानं ऋग्यजुःसामवेदानांस्वरूपेभ्योनमोनमः
पुराणपुरुषेभ्योहिदेवर्षिभ्योनमोनमः आसनं॰ गंधपुष्पाक्षतैर्युक्तंपाद्यंगृण्हंतुभोद्विजाः प्रसादंकुरुतप्रीतास्तुष्टाःसंतुसदा
मम पाद्यं॰ नभस्येशुक्लपंचम्यामर्चिताऋषिसत्तमाः दहंतुपापंमेसर्वंगृण्हंत्वर्घ्यंनमोनमः अर्घ्यं॰ लोकानांतुष्टिकर्तारोयूयं
सर्वेतपोधनाः नमोवोधर्मविज्ञेभ्योमहर्षिभ्योनमोनमः आचमनीयं॰ पंचामृतस्नानं॰ पयोदधिघृतंचैवशर्करामधुसंयुतं
पंचामृतेनस्नपनंकरिष्येऋषिसत्तमाः पंचामृतस्नानं॰ मंदाकिन्याःसमानीतंयमुनागौतमीजलम् कृष्णाचनर्मदानापीताभ्यः
स्नानार्थमाहृतं स्नानं॰ सर्वेनित्यंतपोनिष्ठाब्रह्मज्ञाःसत्यवादिनः वस्त्राणिप्रतिगृण्हंतुमुक्तिदाःसंतुमेसदा वस्त्रं॰ नानामं
त्रैःसमुद्भूतंत्रिवृत्यब्रह्मसूत्रकं प्रत्येकंचप्रयच्छामिऋषयःप्रतिगृह्यताम् उपवीतानि कुंकुमागरुकर्पूरस्रग्गंधैर्निर्मितंशुभम्
गंधाढ्यंचंदनंदिव्यंगृण्हंतुऋषिसत्तमाः गंधं॰ शुभ्राक्षताश्चसंपूर्णाःप्रक्षाल्यचनियोजिताः शोभायैवोमयादत्तागृह्यंतांमुनिसत्त
माः अक्षताः मालतीचंपकादीनिमालत्यादीनिवैद्विजाः मयाहृतानिपुष्पाणिपूजार्थंप्रतिगृह्यतां पुष्पाणि वनस्पतिरसोद्भूतो

गंधाढ्यःसुमनोहरः आघ्रेयःसर्वदेवानांधूपोयंप्रतिगृह्यताम् धूपं० आज्यंचवर्तिसंयुक्तं० दीपं० नानापक्वान्नसंयुक्तंरसैःषड्भिःसमन्वितं गृण्हंतुऋषयःसर्वेनैवेद्यंप्रतिगृह्यतां नैवेद्यं० मध्येपानीयं० उत्तरापोशनं० करोद्वर्तनार्थेचंदनं० नमोवेदविदःश्रेष्ठाऋषयःसूर्यसन्निभाः गृण्हंत्विदंफलंतुष्टामयादत्तंहिभक्तितः फलं० पूगीफलंमहद्दिव्यं० पूगीफलं० हिरण्यगर्भेतिदक्षिणां० यानिकानिचपापानिब्रह्महत्यासमानिच तानितानिविनश्यंतिप्रदक्षिणपदेपदे प्रदक्षिणां० नमोस्तुऋषिवृंदेभ्योदेवर्षिभ्योनमोनमः सर्वपापहरेभ्योहिवेदविद्भ्योनमोनमः नमस्कारः एतेसप्तर्षयःसर्वेभक्त्यासंपूजितामया सर्वेपापंव्यपोहंतुज्ञानतोज्ञानतःकृतम् प्रार्थना वायनं कृतायाःपूजायाःसांगतासिद्ध्यर्थंब्राह्मणायवायनप्रदानंकरिष्ये तथाचब्राह्मणपूजनं वायनंफलसंयुक्तंसघृतंदक्षिणान्वितं द्विजवर्यायदास्यामिव्रतसंपूर्णहेतवे भवतःप्रतिगृण्हंतुज्योतिरूपास्तपोधनाः उभयोःस्तारकाःसंतुवायनस्यप्रदानतः वायनं० न्यूनातिरिक्तकर्माणिमयायानिकृतानिच क्षमध्वंतानिसर्वाणियूयंसर्वेतपोधनाः यांतुदेवगणाः० विसर्जनं एवंसंपूज्यविधिवद्भक्तियुक्तेनचेतसा तेषामग्रेचश्रोतव्यंशुभंचैवकथानकं इतिपूजाविधिः अथकथा हेमाद्रौब्रह्मांडे सिताश्वउ० श्रुतानिदेवदेवेशव्रतानिसुबहूनिच सांप्रतंमेसमाचक्ष्वव्रतंपापप्रणाशनं ब्रह्मोवा० शृणुराजन्प्रवक्ष्यामिव्रतानामुत्तमंव्रतं ऋषिपंचमिविख्यातंसर्वपापहरंपरम् येनचीर्णेनराजेंद्रनरकंनैवपश्यति तत्रैवोदाहरिष्यंतिइतिहासंपुरातनं वैदर्भेचद्विजवरोउत्तंकोनामनामतः तस्यभार्यासुशीलेतिपतिव्रतपरायणा तस्याअपत्ययुगुलंपुत्रोहिसुविभूषणः अधीतवान्सुतस्तस्यवेदान्सांगपदक्रमान् समानेनकुलीनेनसुतावापिविवाहिता विवाहिताचसादैवाद्वैधव्यंप्रापसत्तमा सतीत्वंपालयंतीसाआस्तेनिजपितुर्गृहे तस्यादुःखेनसंतप्तःसुतंसंस्थाप्यवेश्मनि गंगातीरवनंप्राप्तःकदाचित्तुतयासह सतत्राध्यापयामासशिष्यान्वेदंद्विजोत्तमः सुताचकुरुतेतस्यपितुःशुश्रूषणंपरम् पितुःशुश्रूषणंकृत्वापरिश्रांताकदाचन निशीथेकिलसंसुप्ताकृमिराशिरजायत शिष्यास्तथाविधांदृष्ट्वाविवस्त्रांप्रस्तरेस्थिताम् शिष्यानिवेदयामासु तन्मातुःकरुणास्थिताः नजानीमोवयंकिंचिद्दे

वींसाध्वींतथाविधाम् कृमिराशिमयींजातामानः संप्रतिदृश्यते वज्रपातसमंश्रुत्वानाच्छिद्येश्चउदाहृतम् साप्यानमानसाशीघ्रं तत्समीपमुपागमत् सातांतथाविधांदृष्ट्वाविललापसुदुःखिता उरश्चताडयामासस्कृतरांमोहमापन्नं क्षणेनप्राप्तचैतन्यमुत्थाप्यपरिमृज्यच समालंब्यचबाहुभ्यांनिन्येतत्पितुरंतिकम् स्वामिन्कथयमेसाध्वीकेनदुष्कृतकर्मणा निशीथेचप्रसुप्तेयंजायतेक्रिमिसंकुला एवंश्रुत्वाततोवाक्यंऋषिर्ध्यानपरायणः ज्ञात्वानिवेदयामासतस्याःप्राक्जन्मचेष्टितं ऋषिरुवाच प्रागियंसप्तमेतीतेजन्मनिब्राह्मणीह्यभूत् रजस्वलाचसंजाताभांडादीन्यस्पृशत्तदा अस्यास्तुपाप्मनानेनजायतेक्रिमवद्वपुः रजस्वलायाःपापेनयुक्ताभवतिसानघे प्रथमेहनिचांडालीद्वितीयेब्रह्मघातिनी तृतीयेरजकीप्रोक्ताचतुर्थेहनिशुध्यति तदातयासखीसंगाद्व्रतंदृष्ट्वावमानितम् दृष्टव्रतप्रभावेनजाताद्विजकुलेमले अवमानाद्व्रतस्यास्यकृमिराशिमयीधुना एतत्तेकथितंसर्वंकारणंदुष्कृतस्यच सुशीलोउ० दर्शनादपिजन्मस्याद्विप्राणांनिर्मलेकुले जन्मयुष्मद्विधानांहिजायतेब्रह्मतेजसां अवज्ञयाप्रजायंतेनिशीथेकृमिराशयः महाश्चर्यंकथंनाथतद्व्रतंकथयस्वमे ऋषिरुवा० सुशीलेशृणुतत्सम्यक्व्रतानामुत्तमंव्रतं येनचीर्णेनसहसापापादस्मात्प्रमुच्यते दुःखत्रयाच्चमुच्येतनारीसौभाग्यमाप्नुयात् कल्याणानिविवर्धंतेसंपदश्चनिरापदः युधिष्ठिरउवा० श्रुतानिदेवदेवेशव्रतानिसुबहूनिच सांप्रतमन्यदाचक्ष्वव्रतंपापप्रणाशनं श्रीकृष्णउवा० अथान्यदपिराजेंद्रपंचमीऋषिसंज्ञितं कथयिष्यामियत्कृत्वा नारीपापात्प्रमुच्यते युधिष्ठिरउवा० कीदृशंपंचमीकृष्णकथंचऋषिसंज्ञिता पातकान्मुच्यतेकस्मान्नारीयदिकुलोद्भव पापानिचबहून्यत्रविद्यंतेकिलकेशव कथंवाऋषिपंचम्यांनारीकस्मात्प्रमुच्यते कृष्णउवाच अज्ञानाज्ज्ञानतोवापियास्त्रीजातारजस्वला दुष्टास्पृशतिभांडानिगृहकर्मणिसंस्थिता प्राप्नोतिसामहापापंसत्यंसानरकंव्रजेत् शृणुतत्कारणंयस्माद्वर्जनीयारजस्वला प्रोत्सार्यगृहतोदूरंचातुर्वर्ण्येनभारत ब्रह्महत्यांपुराशक्रोवृत्रंहत्वाह्यवापचतयावैराजशार्दूलव्रीडितोवृत्रसूदनः ब्रह्माणंसमुपागच्छदात्मनःशुद्धिकारणात् शुद्धिंशक्रस्यराजेंद्रप्रहृष्टेनांतरात्मना-

विभज्यब्रह्महत्यांतुचतुर्धाचचतुर्मुखः प्राक्षिपद्राजशार्दूलचतुस्स्थानेषुवैतदा वन्हौप्रथमज्वालासुनदीषुप्रथमोदके पर्वताग्रेवृक्षजा-
तौनारीरजसिपार्थिव ततोरजस्वलानारीप्रोत्सार्याचप्रयत्नतः ब्रह्मणःशासनात्पार्थचातुर्वर्ण्येनसर्वदा प्रथमेहनिचांडालीद्विती
येब्रह्मघातकी तृतीयेरजकीप्रोक्ताचतुर्थेहनिशुद्ध्यति भर्त्तुःशुद्धाचतुर्थेन्हिदैवेपित्र्येचपंचमे अज्ञानाज्ज्ञानतोवापिजातंसंपर्कपात
कम् तत्पापसंक्षयार्थंवैकार्येयंऋषिपंचमी सर्वपापप्रशमनीसर्वोपद्रवनाशिनी ब्रह्मक्षत्रियविट्शूद्रस्त्रीभिःकार्याविशेषतः कृ
ष्णउवाच अत्रार्थेयत्पुरावृत्तंप्रवक्ष्यामिकथानकं पुराकृतयुगेराजाविदर्भायांबभूवह श्येनजिन्नामराजर्षिश्चातुर्वर्ण्यानुपालकः
तस्यदेशेवसन्विप्रोवेदवेदांगपारगः सुमित्रोनामराजेंद्रसर्वभूतहितेरतः कृषिवृत्त्यासदायुक्तःकुटुंबपरिपालकः तस्यभार्यासुसा
ध्वीचपतिशुश्रूषणेरता जयश्रीर्नामविख्याताबहुभृत्यसुहृज्जना अतिचिंतान्वितासाचप्रावृट्कालेसुमध्यमा क्षेत्रादिषुरतासा
ध्वीव्याकुलीकृतमानसा एकदासात्मनःप्राप्तमृतुकालंव्यलोकयत् रजस्वलापिसाराजन्गृहकर्मचकारह भांडादीन्यस्पृश
द्राजन्नृतौप्राप्तेपिभामिनी कालेनबहुनासाध्वीपंचत्वमगमत्तदा तस्याभर्त्तासविप्रोसौकालधर्ममुपेयिवान् एवंतौदंपतीराज
न्स्वकर्मवशगौतदा भार्यातस्यजयश्रीसाऋतुसपर्कदोषतः शुनियोनिंसमुत्पन्नाशुनीचाभून्नरेश्वर तस्याःसंपर्कदोषेण
बलिवर्दोबभूवह एवंतौदंपतीराजन्स्वकर्मवशगौतदा ऋतुसंपर्कदोषेणतिर्यग्योनिमुपागतौ स्वधर्माचरणाज्जातावुभौ-
जातिस्मरौतथा सुतस्यैवगृहेराजन्स्मरंतौपूर्वपातकम् सुमित्रस्यचपुत्रोभूद्गुरुशुश्रूषणेरतः सुमतिर्नामधर्मज्ञोदेवता
तिथिपूजकः अथयाहेसंप्राप्तेपितुस्तुसुमतिस्तदा भार्यांचंद्रवतींप्राहसुमतिःश्रद्धयान्वितः अद्यसांवत्सरदिनंपितुर्मेचारु-
हासिनि भोजनीयाद्विजाश्चारुपाकशुद्धिर्विधीयताम् तयाकृतापाकशुद्धिःसुमतेर्भर्तुराज्ञया मुक्तंपायसभांडेवैसर्पेणगरलं
ततः दृष्ट्वाब्रह्मवधाद्भीताशुनीभांडानिसास्पृशत् द्विजभार्याचतांदृष्ट्वाउल्मुकेनजघानह भांडादीनिचप्रक्षाल्यत्यक्त्वापा
कंसुमध्यमा पुनःपाकंचकृत्वातुश्राद्धंकृत्वाविधानतः ततोभुंक्तेषुविप्रेषुनोच्छिष्टंचददौबहिः भूमौक्षिप्तंतयाशून्याउपवा-

सस्तुतोभवत् ततोरात्र्यांप्रवृत्तायांसाशुनीक्षुधिताभृशम् बलीवर्दमुपागत्यभर्त्तारमिदमब्रवीत् बुभुक्षिताद्यहेभर्त्तर्नदत्तंभोजनादिकं ग्रासादिकंचनप्रासंक्षुधामांबाधतेभृशम् अन्यस्मिन्दिवसेपुत्रोममलेह्यंददात्यसौ अद्यमह्यंकिमप्येषउच्छिष्टमपिनोददौ पायसान्नेपपाताद्यगरलंसर्पसंभवं मयाविचिंत्यमनसामरिष्यंतिद्विजोत्तमाः संस्पृष्टंपायसंगत्वा बध्वाहंताडिताभृशं दुःखितंतेनमेगात्रंकटिर्भग्नाकरोमिकिं ततःप्राहसचानड्वान्भद्रेतेपापसंग्रहात् किंकरोमित्यशक्तोहंभारवाहोद्यसंस्थितः अद्याहमात्मजक्षेत्रेवाहितःसकलंदिनम् मारितश्चात्मजेनाहंसुखंबध्वाबुभुक्षितः वृथाश्राद्धंकृतंतेनजाताद्यममकष्टता कृष्णउवाच तयोःसंवदतोरेवंमातापित्रोश्चभारत श्रुत्वापुत्रस्तदावाक्यंयदुक्तंचतदोभयोः ततोरजन्यांतत्कालंददौतस्यैवभोजनं पितरौतौविदित्वातुदत्तवान्सुमतिस्तदा तदासौदुःखितःपुत्रोज्ञात्वावस्थांतदातयोः मातापित्रोस्तुराजेंद्र तदासौप्रस्थितोवनम् ज्ञातुमिच्छामिकष्टंवैमातापित्रोश्चभारत तत्रगत्वाज्ञानवृद्धान्ऋषीन्परमधार्मिकान् प्रणिपत्याब्रवीद्वाक्यंहितंचैवतदातयोः सुमतिरुवाच कथयध्वंविप्रवर्याःप्रश्नमेकंसमाहिताः केनकर्मविपाकेनपितरौमेतपोधनाः इमामवस्थांसंप्राप्तौमुच्येतेपातकात्कथं कृष्णउवाच तदाकर्ण्यवचस्तस्यसुमतेर्दुःखितस्यच ऋषिःसर्वतपोनामसर्वज्ञःकरुणान्वितः सुमतिंप्रत्युवाचेदंतत्पित्रोर्मुक्तयेतदा ऋषिरुवाच तवमातापुराविप्रस्वगृहेबालभावतः प्राप्तमृतुंविदित्वातुसंपर्कमकरोद्द्विज तेनकर्मविपाकेनशुनियोनिमुपागता पितापिस्पर्शदोषेणबलीवर्दोबभूवह एतयोर्मुक्तिकामार्थंकुरुत्वमृषिपंचमीं भार्ययासहविप्रेंद्र ऋषीन्संपूज्ययत्नतः आचरस्वव्रतंतत्रसप्तवर्षंद्विजोत्तम अंतेचोद्यापनंकुर्याद्वित्तशाठ्यविवर्जितः शाकाहारस्तुकर्तव्योनीवारैःश्यामकैस्तथा कंदंवाथफलंमूलंहलकृष्टंनभक्षयेत् प्राप्यभाद्रपदेमासिशुक्लपक्षस्यपंचमी तस्यांमध्यान्हसमयेनद्यादौविमलेजले कृत्वापामार्गसमिधादंतधावनमादितः आयुर्बलंयशोवर्चःप्रजाःपशुवसूनिच ब्रह्मप्रज्ञांचमेधांचत्वंनोदेहिवनस्पते संप्रार्थ्यानेनमंत्रेणकुर्याद्वैदंतधावनं मुखदुर्गंधिनाशायदंतानांचविशुद्धये ष्ठीवनायचगात्राणांकुर्वेहंदंतधावनं

अनेनदंतान्संशोध्यस्नायान्मृत्स्नानपूर्वकं निलामलककल्केन केशान्संशोध्ययत्नतः परिधायनवेशुक्ले वाससीचसमाहितः वि
धायनित्यकर्माणिगत्वाह्वारवतीमृषीन् ह्वारवतीमग्निहोत्रशालां स्नापयेद्विधिवद्भक्त्यापंचामृतरसैःशुभैः चंदनागरुकर्पूरै
र्विलिप्यच्चस्रगंधिभिः पूजयेद्विविधैःपुष्पैर्गंधपुष्पादिदीपकैः समासाद्यशुभैर्वस्त्रैःसोपवीतैर्यथाविधि ततोनैवेद्यसंपन्नैरर्घ्यैर्दद्यो
च्छुभैःफलैः पूजयस्वऋषीन्दिव्यानरुंधत्यासमन्वितान् कश्यपोत्रिर्भरद्वाजोविश्वामित्रोथगौतमः जमदग्निर्वसिष्ठश्चसाध्वीचै
वाप्यरुंधती मंत्रेणानेनसप्तर्षीन्पूजयेत्सुसमाहितः व्रतेनऋषिपंचम्याःकृतेनैवद्विजोत्तम ऋतुसंपर्कजोदोषःक्षयंयातिनसंश
यः श्रीकृष्णउवाच तच्छ्रुत्वासुमतिर्वाक्यंपरमंऋषिभाषितं गृहमेत्यव्रतंचक्रेसभार्यःश्रद्धयान्वितः व्रतंतुऋषिपंचम्याः
सर्वपापप्रणाशनं कृत्वासर्वंयथोक्तंच मातापित्रोःफलंददौ व्रतपुण्यप्रभावेनमातातस्यशुवयोनितः मुक्तानृपतिशार्दूलविमा
नवरसंस्थिता दिव्यांबरधराभूत्वागतास्वर्गंचभारत पितापिसमृतोगच्छत्सुमतेःपशुयोनितः स्वर्गप्राप्तोमहाराजव्रतस्या
स्यप्रभावतः दिव्यांबरधरोभूत्वागतःस्वर्गंचभारत कायिकंवाचिकंवापिमानसंयच्चदुष्कृतम् तत्सर्वंविलयंयातिव्रतस्या
स्यप्रभावतः यस्ययज्जायतेपुण्यंतच्छृणुष्वनृपोत्तम सर्वव्रतेषुयत्पुण्यंसर्वतीर्थेषुयत्फलं सर्वदानेषुदत्तेषुतदेत द्व्रतचारणा
त् कुरुतेयाव्रतंनारीसाभवेत्सुखभागिनी रूपलावण्ययुक्ताचपुत्रपौत्राच्चसंयुता इहलोकेसुखंभूयात्परत्रचपरागतिम्
एतत्तेकथितंराजन्व्रतानामुत्तमंव्रतम् सर्वसंपत्प्रदंचैवनारीणांपापनाशनम् धनंयशश्चस्वर्गंचपुत्रानपियुधिष्ठिर पठतां-
शृण्वतांचापिसर्वपापप्रणाशनं इतिश्रीभविष्योत्तरपुराणेऋषिपंचमीव्रतकथासंपूर्णा अथोद्यापनं युधिष्ठिर
उवाच किमस्योद्यापनंप्रोक्तंव्रतपूर्णफलप्रदम् सुमतिःकेनविधिनाचकारवदतत्त्वतः कृष्णउवाच पूर्वस्मिन्दिवसेकु
र्यादेकभक्तंसमाहितः प्रातरुत्थायसुस्नानस्ततोगुरुगृहंव्रजेत् प्रार्थयेत्तंममाचार्योभवोद्यापनकर्मणि पूर्वोक्तेनैवविधिना-
स्नात्वाभक्त्यासमन्वितः शुचौदेशेसमालिप्यसर्वतोभद्रमंडले अव्रणंसजलंकुंभंताम्रंमृन्मयमेवच संस्थाप्यवस्त्रसंवीतं-

कंठदेशेसुशोभनम् पंचरत्नसमायुक्तंफलगंधाक्षतैर्युतं सहिरण्यंसमासाद्यताम्रेणपटलेनवा वंशामृन्मयपात्रेणयवपूर्णेनचै
वहि आच्छादयेत्तच्चैलेनलिखेदष्टदलंततः सौवर्णीप्रतिमाकार्या ऋषीणांभावितात्मनाम् पलेनवातदर्धेन तदर्धार्धेनवापुनः
शक्त्यावाकारयेत्तत्रवित्तशाठ्यंविवर्जितः कृष्णउवाच वितानंपंचवर्णंचफलपुष्पसमन्वितं बध्नीयादुपरिश्रीमत्संभारान्सं-
विधायच मध्यान्हेपूजयेद्भक्त्याऋषीन्श्रद्धासमन्वितः कश्यपोत्रिर्भरद्वाजोविश्वामित्रोथगोतमः जमदग्निर्वसिष्ठश्चसाध्वी
चैवाप्यरुंधती गृण्हंत्वर्घ्यमयादत्तंतुष्टाभवतुमेसदा एवंपूजांविनिर्वृत्यऋषीन्ध्यात्वासमाहितः अनेनविधिनासप्तवर्षाणि
व्रतमाचरेत् आदौमध्येतथाचांतेकुर्यादुद्यापनंबुधः आचार्यान्वरयेत्सप्तवेदवेदांगपारगान् प्रतिमाःसप्तकुर्वीतस्ववर्णेनस्व
शक्तितः जटिलासाक्षसूत्राश्चकमंडलुसमन्विताः संस्थाप्यकलशेष्वेतान्मृन्मयेष्वव्रणेषुच स्नापयेद्विधिवद्भक्त्यापंचामृतपया
दिभिः पूर्वोक्तविधिनाराजन्कृत्वापूजांसमाहितः रात्रौजागरणंकुर्यात्पुराणश्रवणादिभिः कृतनित्यक्रियःप्रातर्जुहुयात्तिलसर्पिषा
वैदिकोवाथपौराण अधिकारोमनुस्मृतः सहस्तोमाःसहावाथनाममंत्रैस्तुवापृथक् अष्टोत्तरसहस्रंवाशतमष्टोत्तरंतुवा पु
नःपूजांततःकृत्वागुरुंसंपूजयेद्व्रती स्वर्णांगुलीयवासोभिःकुंडलामृतभोजनैः सप्तगाश्चैवदातव्यावस्त्रालंकारसंयुताः दद्या
देकांसवत्सांचगुरवेगांपयस्विनीं ·पूजयेदृत्विजःसप्तवासोभिर्दक्षिणादिभिः कलशानुपवीतानिदद्यात्तेभ्यःस्वभक्तितः आ
चार्यंचसपत्नीकंप्रणिपत्यसमापयेत् भोजयेद्ब्राह्मणान्भक्त्यादीनानाथान्प्रतर्प्यच सोपस्करास्ताःप्रतिमाआचार्येभ्योनिवेद
येत् लब्ध्वानुज्ञांतुभुंजीतइष्टैर्बंधुजनैःसह उद्यापनविधिःप्रोक्तोसर्वत्रायंफलार्थिनां अनेनविधिनासम्यक्व्रतमेतत्समाचरेत्
सर्वव्रतेषुयत्पुण्यंसर्वतीर्थेषुयत्फलं सर्वदानेषुदत्तेषुनदेत्द्व्रतचारिणाम् एवंयाकुरुतेभूपउद्यापनविधिंपरम् सर्वपापविनिर्मुक्ता
स्वर्गलोकेमहीयते इहलोकेचिरंकालंभर्त्रासहशुचिस्मिता पुत्रपौत्रैःपरिवृताभुक्त्वाभोगान्मनोहरान् निःपापासुभगानित्यं
लभतेचाक्षयांगतिं इतिश्रीभविष्योत्तरपुराणेऋषिपंचमीव्रतोद्यापनविधिः संपूर्णः आश्विनशुक्लपंचम्यामुपांगललिताव्र

तं तत्रदाक्षिणात्यानांशिष्टाचारएवप्रमाणं तत्रमध्यान्हव्यापिन्यांकार्यम् पूजाव्रतेषुसर्वेषुमध्यान्हव्यापिनीतिथिः इतिमाधवीयेहारितोक्तेः दिनद्वयेतद्व्याप्तावव्याप्तौपूर्वायुगभूतांइतियुग्मवाक्यात् अन्यच्चशक्तिपूजायांतु अर्धरात्रव्यापिनीग्राह्या यत्तु भूरिजन्माजजल्पवचनंविनारात्रिव्यापिन्याग्रहणेप्रमाणाभावात् जागरणस्यचांगत्वात्पूर्वाण्हव्यापिन्येवग्राह्येतितच्चभूरिजन्मनोमंदप्रज्ञस्यदुर्बुद्धिविलसितमात्रमित्युपेक्ष्यम् अथव्रतविधिः आचम्यप्राणानायम्यमासपक्षाद्युल्लिख्य ममपुत्रधनविद्यारोगनिर्मुक्तसुखगोविजयपुष्ट्यायुष्यादिकामः स्त्रीअवैधव्यकामाउपांगललिताप्रीत्यर्थंयथामीलितोपचारैःउपांगललितापूजनमहंकरिष्ये इतिसंकल्प्यपूजांकुर्यात् शुक्लपक्षस्यपंचम्यामिषेमासिचरेद्व्रतं चत्वारिंशत्तथाष्टौवादंतधावनमादितः आयुर्बलंयशोवर्चःप्रजाःपशुवसूनिच ब्रह्मप्रज्ञांचमेधांचत्वनोधेहिवनस्पते संप्रार्थ्यानेनमंत्रेणकुर्याद्वैदंतधावनम् मुखदुर्गंधिनाशायदंतानांच विशुद्धये ष्ठीवनायचगात्राणांकुर्वेहंदंतधावनं अनेनदंतान्संशोध्यस्नायान्मृत्स्नानपूर्वकम् ततोयथाविधिस्नात्वाशुक्लवासागृहंव्रजेत् शुचौदेशेसमालिख्यसर्वतोभद्रमंडलम् अव्रणंसजलंकुंभंताम्रंमृन्मयमेवच संस्थाप्यवस्त्रसंवीतंकंठदेशेसुशोभनम् पंचरत्नसमायुक्तंगंधपुष्पाक्षतैर्युतं सहिरण्यंसमासाद्यताम्रेणपटलेनवै वंशमृन्मयपात्रेणयवपूर्णेनचैववहि आच्छादयेत्तच्चैलेनलिखेदष्टदलंततः सौवर्णंराजतंताम्रंपिधानंस्थापयेत्ततः उपचारैःषोडशभिरेभिर्मंत्रैःसमाहितः नित्यंनैमित्तिकंकुर्यात्ततःपूजांसमाचरेत् इतिविधिः मममनेप्सितकामनासिद्ध्यर्थंप्रतिवार्षिकमुपांगललितापूजनमहंकरिष्ये गणपतिपूजनंकुर्यात् अथपूजा नित्यकौशेयवसनांहेमाभांकमलासनाम् भक्तानांवरदांनित्यंललितांचिंतयाम्यहं ध्यायामि निजासनेस्वायुधैश्चललितेभक्तवत्सले उपांगललितेमातर्देहिमेव्रतकर्मणि आगच्छललितेदेविसर्वसंपत्प्रदायिनि यावद्व्रतंसमाप्येततावत्त्वंसन्निधौभव हिरण्यवर्णांहरिणींसुवर्णरजतस्रजां चंद्रांहिरण्मयींलक्ष्मींजातवेदोममावह आवाहयामि कार्तस्वरमयंदिव्यंनानामणिगणार्चितं अनेकशक्तिसंयुक्तमासनंप्रतिगृह्यताम् तांमआवहजातवेदोलक्ष्मीमलपगामि

नीं यस्यांहिरण्ययंविंदेयंगामश्वंपुरुषानहं आसनं· गंगादिसर्वतीर्थेभ्योमयाप्रार्थनयाहृतं तोयमेतत्सुखस्पर्शंपाद्यार्थंप्रतिगृह्यतां अश्वपूर्णांरथमध्यांहस्तिनादप्रमोदिनीं श्रियंदेवीमुपह्वयेश्रीर्मादेवीजुषतां पाद्यं निधीनांसर्वरत्नानामनर्घ्यंचगुणाढ्यसि तथापिभक्त्याललिते गृह्णाणार्घ्यंनमोस्तुते कांसोस्मितांहिरण्यप्राकारामार्द्रांज्वलंतींतृप्तांतर्पयंतीम् पद्मेस्थितांपद्मवर्णांतामिहोपह्वयेश्रियं अर्घ्यं· पाटलोशीरकर्पूरसुरभिस्वादुशीतलम् तोयमाचमनीयार्थंललितेप्रतिगृह्यताम् चंद्रांप्रभासांयशसाज्वलंतींश्रियंलोकेदेवजुष्टामुदाराम् तांपद्मिनीमींशरणमहंप्रपद्येलक्ष्मीर्मेनश्यतांत्वांवृणोमि आचमनीयं· पयोदधिघृतंचैवशर्करामधुसंयुतम् पंचामृतेनस्नपनंप्रीयतांपरमेश्वरी आप्यायस्वेतिऋक् १ दधिक्राव्णोइतिऋक् १ घृतंमिमिक्षेइतिऋक् १ मधुवातेतिऋक् १ स्वादुःपवस्वेतिऋक् १ पंचामृत॰ मंदाकिन्याःसमुद्भूतंहेमांभोरुहवासितं स्नानायतेमयाभक्त्यादत्तंस्वीक्रियतांजलं आदित्यवर्णेतपसोधिजातोवनस्पतिस्तववृक्षोथबिल्वः तस्यफलानितपसानुदंतुमायांतरायाश्चबाह्याअलक्ष्मीः स्नानं· सर्वभूषाधिकेसौम्येलोकलज्जानिवारणे मयोपपादितेतुभ्यंवाससीप्रतिगृह्यताम् उपैतुमांदेवसखः कीर्तिश्चमणिनासह प्रादुर्भूतोस्मिराष्ट्रेस्मिन्कीर्तिमृद्धिंददातुमे वस्त्रं· मुक्तामणिगणोपेतमनर्घ्यंचसुखप्रदं उत्तरीयंसुखस्पर्शंललितेप्रतिगृह्यतां उत्तरीयवस्त्रंस॰ कृष्णकाचाष्टसंयुक्तंसूत्रंग्रैवेयकंतथा दास्यामिकंठमालार्थंप्रत्यंगेललितेतव कंठमालां· मलयाचलसंभूतंघनसारंमनोहरं हृदयानंदनंचारुचंदनंप्रतिगृह्यतां क्षुत्पिपासामलांज्येष्ठामलक्ष्मींनाशयाम्यहं अभूतिमसमृद्धिंचसर्वांनिर्णुदमेगृहात् चंदनं· अक्षताविमलाःशुभ्रामुक्ताभाससमप्रभाः भूषणार्थंमयादत्तागृहाणपरमेश्वरि गंधद्वारांदुराधर्षांनित्यपुष्टांकरीषिणीम् ईश्वरींसर्वभूतानांतामिहोपह्वयेश्रियं अक्षताः मालतीचंपकादीनिनानापुष्पैःसुवासितैः मयाहृतानिपुष्पाणिपूजार्थंप्रतिगृह्यताम् मनसःकाममाकूतिंवाचःसत्यमशीमहि पशूनांरूपमन्नस्यमयिश्रीःश्रयतांयशः पुष्पं॰ अथांगपूजा उपांगललितायैनमः पादौपू॰ भवान्यैनमः गुल्फौपू॰ सिद्धेश्वर्यै॰ जंघेपू॰ भद्रकाल्यै॰ जानुनीपू॰

श्रियै॰ ऊरूपूज॰ विश्वरूपिण्यै॰ कटींपू॰ देव्यै॰ नाभिंपू॰ वरदायै॰ कुक्षीपू॰ शिवायै॰ हृदयंपू॰ वागीश्वर्यै॰ स्कंधौपू॰ महादेव्यै॰ बाहूपू॰ प्रकृतिभद्रायै॰ करौपू॰ पद्मिन्यै॰ कंठंपू॰ सरस्वत्यै॰ मुखंपू॰ कमलासनायै॰ नासिकांपू॰ महिषमर्दिन्यै॰ नेत्रेपू॰ लक्ष्म्यै॰ कर्णौपू॰ भवान्यैन॰ ललाटंपू॰ विंध्यवासिन्यै॰ शिरःपूज॰ सिंहवाहिन्यै॰ सर्वांगंपू॰ देवद्रुमरसोद्भूतः कालागरुसमन्वितः आघ्रेयतामयंधूपोभवानिघ्राणतर्पणः कर्दमेनप्रजाभूतामयिसंभ्रमकर्दम श्रियंवासयमेकुलेमातरंपद्ममालिनीं धूपं॰ चक्षुषांसर्वलोकानांतिमिरस्यनिवारणं आर्तिक्यंकल्पितंभक्त्यागृहाणपरमेश्वरि आपस्रजंतुस्निग्धानिचिक्लीतवसमेगृहे नीचदेवींमातरंश्रियंवासयमेकुले दीपं॰ मोदकापूपलड्डुकवटकोदुंबरादिभिः सघृतंपायसान्नंचनैवेद्यंप्रतिगृह्यताम् आर्द्रांपुष्करिणींपुष्टिंसुवर्णांहिममालिनीं सूर्यांहिरण्मयींलक्ष्मींजातवेदोममावह नैवेद्यं॰ मलयाचलसंभूतंघनसारंमनोहरम् करोद्वर्तनकंचारुगृहाणपरमेश्वरि करोद्वर्तनं॰ कर्पूरैलालवंगादितांबूलीदलसंयुतं क्रमुकस्यफलंतुभ्यंतांबूलंप्रतिगृह्यतां आर्द्रांयःकरिणींयष्टिंपिंगलांपद्ममालिनीं चंद्रांहिरण्मयींलक्ष्मींजातवेदोममावह तांबूलं॰ मातुलिंगंनारिकेलंफलंखर्जूरसंभवं जंबीरंपनसंवापिगृह्यतांपरमेश्वरि इदंफलंमयादेविस्थापितंपुरतस्तव तेनमेसफलावाप्तिर्भवेज्जन्मनिजन्मनि तांमआवहजातवेदोलक्ष्मीमनपगामिनीं यस्यांहिरण्यंप्रभूतिंगावोदास्योश्वान्विंदेयंपुरुषानहं फलं॰ हिरण्यगर्भगर्भ॰ यःशुचिःप्रयतोभूत्वाजुहुयादाज्यमन्वहं सूक्तंपंचदशर्चंचश्रीकामःसततंजपेत् दक्षिणां॰ चंद्रादित्यौचधरणीविद्युदग्निस्तथैवच त्वमेवसर्वज्योतींषिआर्तिक्यंप्रतिगृह्यताम् पद्मासनेपद्मऊरूपद्माक्षिपद्मसंभवे तन्मेभजसिपद्माक्षीयेनसौख्यंलभाम्यहं नीराजनं॰ उपांगललितेमातर्नमस्तेविंध्यवासिनि दुर्गेदेविनमस्तुभ्यंनमस्तेविश्वरूपिणि अश्वदायैगोदायैधनदायैमहाधने धनंमेजुषतांदेवीसर्वकामांश्चदेहिमे पुष्पांजलिं॰ अथदूर्वांकुरान्साग्रान्चत्वारिंशत्तथाष्टभिः अधिकान्हस्तआदायमंत्रमेतज्जपेद्बुधः मंत्रः बहुप्ररोहासततममृताहरितालता यथैयंललितेमातस्तथामेस्फुर्मनोरथाः इत्युक्त्वापूजयेद्देवींदूर्वाभिःकुसुमैस्तथा मंत्रेणाष्ट

चत्वारिंशाद्भक्तिनरक्तसमाहितः दूर्वांकुरान् प्रदक्षिणात्रयंदेवि प्रयत्नेनमयाकृतम् तेनपापानिसर्वाणिव्यपोहंतुनमाम्यहं
प्रदक्षिणा॰ साष्टांगोयंप्रणामस्तेनमस्कृत्ययथाविधि त्वद्दासइतिमांभक्त्याप्रसीदपरमेश्वरि नमस्कारः दीनोहंपापयुक्तोहंदा
रिद्र्यैकनिकेतनः समुद्धर कृपासिंधोकामान्मेसफलान्कुरु प्रार्थना अथवायनं द्विजायवाणकंदद्याद्विंशत्याघटकादिभिः
कइदंकस्मैतिमंत्रेण आचार्यायनिवेदयेत् पक्वान्नफलसंयुक्तंसघृतंदक्षिणान्वितं द्विजवर्यायदास्यामिव्रतसंपूर्णहेतवे वाणकं
द्विजवर्यायसहिरण्यंददाम्यहं इतिवायनमंत्रः ततःकथांसमाकर्ण्यवाणकान्नस्यसंख्यया स्वयंभुंजीतचैवान्नंवाग्यतः-
सहबांधवैः रात्रौजागरणंकुर्यान्नृत्यगीतादिमंगलैः प्रभातेपूजयेद्देवींततःकुर्याद्विसर्जनम् सवाहनाशक्तियुतावरदापूजितामया
मातर्मामनुगृह्याथगम्यतांनिजमंदिरम् इतिविसर्जनम् इतिवार्षिकपूजाविधिः अथकथा सूतउवाच पुराकैलास-
शिखरेमहर्षिगणसेविते षडाननंसुखासीनमिदमूचुर्महर्षयः ऋषयऊचुः महासेनमहादेवनंदनानंदविक्रम आख्याना
निकृपुण्यानिश्रुतानित्वत्प्रसादतः कथास्त्वद्वचनादेवप्रसूताभूरिभूतयः नतृप्तिमधिगच्छामःपायंपायंसुधामिव शुश्रूषवोवयं
देव्याव्रतंतत्कथयस्वनः मनोभिलषितार्थानांसिद्धिर्यस्मिन्कृतेभवेत् स्कंदउवाच साधुपृष्टंमहादेव्यामाहात्म्यंमुनिपुंगवाः
वच्मिसर्वंविधानेनतच्छृणुध्वंजगद्धितं भृगुक्षेत्रेकिलपुराविप्रोभूद्गौतमाभिधः श्रुतिस्मृतिपुराणज्ञोधनीचबहुबांधवः अनपत्य
स्यतस्याथजज्ञातेजरसःसुतौ श्रीपतिगोपतिश्चैवनामतोविधितेतयोः अचिरेणैवकालेनसपंचत्वमगाद्द्विजः तौतुबालौधनं
बंधून्हित्वासाधर्मचारिणी सतीविवेशदहनंस्वर्यातुंपतिनासह अथतेबांधवाःसर्वेहाकष्टमितिचुक्रुशुः निंदंतोदुःखिता
श्चक्रुस्तत्क्रियांपारलौकिकीं अथतस्यसपत्नोभूज्ज्ञातासजगृहेधनम् आक्रोशंतौचतौगेहंनिजमानीयदुर्मनाः नास्तिचक्रेध
नंसर्वंताभ्यांकिंचिन्नवैददौ ततोमौंजीधरौबालौबंधुभिःकथितंवसु ययाचतुःपितृव्यंतंदेहिनोद्रविणंहितत् सतावूचेगतं
द्रव्यंयुवांकेनप्रतारितौ निर्गच्छतांममगृहादित्यादिपरुषंबहु तौतद्वचोभिर्निर्विण्णौबालौश्रीपतिगोपती बभाषातेमिथःक

ष्टंधिगहोपितृहीनता यावोदेशांतरंयत्रस्वजनोनास्तिकश्चन अनाभाष्यैवस्वजनाञ्जग्मतुर्दिशमुत्तराम् भिक्षाचारौबहून्देशा
न्वनानिसरितोगिरीन् समतिक्रम्यययतुर्विशालांनामतःपुरीम् कासारमीक्षांचक्राते ततोस्याःसन्निधौशुभं पुंडरीकवना-
कीर्णरक्तसंध्याविभूषितं संध्याभ्रभूषितंचारुयथातारकितंनभः श्रांतौपथिगतौबालौक्षणंविश्रम्यतत्तटे आचम्यशिशिरं
तोयंसस्नतुस्तौयथाविधि गताध्वखेदौविप्राग्र्यौपुरंप्राविशतांततः वीथीश्चतुःपथयुतंचारुगोपुरमंडितम् देवतागाररुचि
रंसौधराजिविराजितम् नानावीथीरतिक्रम्यविप्रावासमवापतुः कस्यचित्त्वथविप्रस्यक्षुत्पिपासार्दितौगृहं ईयतुर्वेदिका
यांतावुपविष्टौश्रमातुरौ स्वामीततोस्यगेहस्यविवेकइतिविश्रुतः आयातौवैश्वदेवांतेसददर्शातिथीद्विजौ अनापृच्छ्यकुलंतथाशीलं
तथाचकुलनामनी ऋषिवत्पूजयामासस्मरन्धर्मंसनातनम् अतिथीभोजयामासस्वाद्वन्नंसहचात्मना तौब्रह्मचारिणौविप्रौ
सपर्यांताविलोक्यच देशबंधुपरित्यागखेदयुक्तौबभूवतुः अथापृच्छद्द्विजस्तौतुकौयुवांकुतआगतौ किमर्थमल्पवयसौनिर्ग
तौस्वगृहादिति तद्विवेकस्यवचनमाकर्ण्यश्रीपतिस्तदा आनुपूर्व्येणसकलंवृत्तांतंसमभाषत पितृहीनौचतौज्ञात्वात्यक्तौबंधुजने
नच आश्वास्यस्थापयामासस्वगृहेबहुवासरं प्रचक्रमेथशिष्यैश्चसहाध्यापयितुंश्रुतिम् बभूवतुश्चतौबालौगुरुशुश्रूषणेरतौगु
रोर्गेहेन्यवसतामागतानिर्मलाशरत् फुल्लपद्मविशालाक्षीप्रसन्नेंदुशुभानना तस्यांससशिष्यमाचार्यंचरंतंव्रतमुत्तमं पप्रच्छतुर्भो
किमिदमावाभ्यामितिकथ्यतां ताभ्यामेवंकृतेप्रश्नेविवेकइदमब्रवीत् विवेकउवाच उपांगललितादेव्याव्रतंदेवर्षिपूजि
तं सर्वकामकरंनृणामस्माभिःसमुपास्यते विद्याकामेनकर्तव्यंतथैवधनकाम्यया सुतार्थिनाप्रकर्तव्यंव्रतमेतदनुत्तमम् -
विद्याकामौचतौबालौव्रतमाचेरतुर्मुदा भक्तितोगुर्वनुज्ञातौयथाशक्तियथाविधि व्रतप्रसादात्सकलंवेदशास्त्रमवापतुः अ
न्यस्मिन्हायनेभक्त्याविवाहार्थंप्रचक्रतुः श्रीपतिर्गोपतिश्चैवव्रतमेतत्तपोधनाः अचिरेणैवकालेनमासिमाघेतयोर्गुरुः स्वांवि
वाहोचितांकन्यांनाम्नागुणवतीमिति विनीतायश्रुतवतेयूनेश्रीपतयेतदा विचार्यबांधवैःसाकंददौपुण्यर्क्षवासरे पारिबर्हंबहु

मुदामादाद्दुहितृवत्सलः विवेकोपिमुदंलेभेसानुरागौविलोक्यतौ अन्याब्देपुनरेतत्तुव्रतंदेव्याश्चक्रतुः भ्रातरौतौनिजंदेशामिच्छंतौचधनादिकम् अथान्येह्निकस्मिंश्चित्तावुपाध्यायमूचतुः स्वामिन्युष्मत्प्रसादेनलब्धाविद्यातथावसु अनुजानीहिगच्छावोनिजंदेशामितःपुनः इत्याकर्ण्यसमालोक्यशुभंवासरमादृतः स्वयंप्रापयितुंतांतौविप्रोकन्यांचनिर्ययौ अथदेव्याःप्रसादेनपितृव्यस्यतयोःकिल अन्वेषणेमतिर्जातानागतौश्रीपतिगोपती निर्गतौक्वगतौदेशंवसतःक्वेत्यचिंतयत् लोकानिंदंतिमांनित्यंजाताअन्वेषणेमतिः दिदृक्षुस्तौततःसोपिनिर्जगामनिजात्पुरात् किंचित्सनगरंप्रापद्विजबालौगवेषयन् तदेवनगरंप्राप्तोविवेकाख्योद्विजोत्तमः सशिष्यःकन्ययासार्धंक्रमन्मार्गंशनैःशनैः तत्रतेषांसमजनिसंगमोमुनिपुंगवाः विदांचकारतौकृच्छ्रात् मध्यमेवयसिस्थितौ मूर्ध्न्यवघ्रायतौपश्चान्मुदंलेभेपरंतपाः नशक्नुवन्मुदावक्तुंप्रेमगद्गदयागिरा पादानतांगुणवतींविवेकेनप्रणोदिताम् आशीर्वादैर्बहुविधैस्तांस्नुषांसमयोजयत् विवेकस्तुतदातत्रसंभाष्यचपरस्परम् विवेकउवाच सुतावेतौमयानीतौपालितौपठितौतव संप्रापितुंप्रयातोस्मिभवतांग्राममुत्तमं इतिसंभाष्यमाणस्तेभृगुक्षेत्रंययुर्मुदा ज्ञातिभिःसहसंगम्यशृण्वद्भिस्तद्विचेष्टितम् तौपितृव्यगृहेस्थित्वाहायनान्यष्टसप्तच स्वपितृव्यगृहेकांश्चिदुषित्वादिवसांस्तदा लब्ध्वापितृधनंगेहंसर्वंश्रीपतिगोपती ईयतुस्तदनुज्ञातोविवेकःस्वांपुरींययौ श्रीपतिर्गोपतेस्तत्रविवाहमकरोत्तदा तावेकचेतसौसन्नंचक्रतुर्द्विजतर्पणम् श्रीपतिश्चासूयायुक्तःकनीयान्व्ययशंकितः विचार्यभार्ययासाकंविभक्तःश्रीपतेरभूत् सभोगान्विविधान्भुंजन्प्रमत्तोबहुसंपदा नदेव्याराधनंचक्रेगोपतिःसुखलंपटः अथस्वल्पेनकालेननष्टंतस्यशनैर्धनं अकिंचनोगतश्चिंतांभार्ययाश्वासितस्तदा तवभ्रातृगृहेविप्राभुंजतेबहवःसदा गच्छावोनुदिनंकांततत्रभोक्तुमुभावपि एवंभोजनवेलायामागत्यागत्यतद्गृहं भुंजन्भुंजन्निजगृहेगतौतौबहुवासरं कदाचिदागतोयावद्गोपतिर्भार्ययासह उपविष्टेषुविप्रेषुभोक्तुंनोविंददासनम् अथान्यराशेरभ्याशेभोजनायक्षुधातुरः उपविष्टःश्रीपतेस्तुभार्ययासनिवारितः अस्मादुत्तिष्ठवैतूर्णंत्वमु-

च्छिष्टंकरिष्यसि तिष्ठतिष्ठक्षणंचैवपश्चाद्भुंक्ष्वेतिसाब्रवीत् गोपतेःकांतयादृष्टंततोविमनसावुभौ अभुक्तावेवनिष्क्रांतौजग्मतु
र्निजमंदिरम् ततःस्वजायांप्रोवाचनिजमार्गंविचिंतयन् भ्रात्रामयासमंवित्तंसंविभक्तमपिप्रिये दुर्बलोहंधनोन्मत्तः श्रूयतामत्र
कारणम् पुरावाभ्यांगुरुगृहेव्रतमाचरितंशुभम् उपांगललितादेव्याविद्यादिसकलंततः प्राप्तंमयानत्सकलंपरित्यक्तंप्रमादतःज्ये
ष्ठआचरतेनित्यंतस्माच्छ्रीस्तत्रवर्तते तस्मादहंतदाप्रोक्ष्येयदाद्रक्ष्यामितांशिवाम् इत्युक्त्वानिर्गतस्तस्माद्गृहादकृतभोजनः न
ज्ञार्याचिंतयाविशप्तापितस्थावनम्नती भुक्तवत्सुब्राह्मणेषुश्रीपतिःपर्यपृच्छत क्वगतोगोपतिर्हिरितितच्छ्रुत्वासोपिदुःखितःगो
पतिस्तुसरिद्दुर्गवनानिबहुशोभ्रमन् पृच्छंश्चपथिकान्मार्गेनदेव्याःपदमभ्यगात् पंचमेवासरेप्राप्तेक्षुत्पिपासार्दितोवने अल-
ब्धदर्शनोदेव्यादुःखितोनिपपातह तंकृच्छ्रगतमालोक्यभवानीभक्तवत्सला कृतापराधमपितमनुजग्राहवैतदा गतमूर्च्छःसमु-
त्थायदिगंतांश्चविलोकयन् ददर्शदूरतोगोपंचारयंतंगवांगणम् तंदृष्ट्वाकिंचिदाश्वस्तोययौतस्यांतिकंशनैः अपृच्छत्कोभवान्यातः
कुत्रत्यःकुतआगतः कोयंदेशःकोभूपालःकिंपुरंनामतद्वद निशम्यवचनंतस्यवक्तुंगोपःप्रचक्रमे गोपउवाच उपांगंनामन
गरमुपांगोनामभूपतिः तत्रत्योहंसमायातःपुनस्तत्रव्रजाम्यहम् उपांगललितादेव्याविद्यतेतत्रमंदिरम् इत्याकर्ण्यवचस्तस्य
विप्रःसमुदितोभवत् सगोपसहितःसायंविचरन्प्रविवेशह दूराद्ददर्शभवनंपुरमध्येतपोधनाः उपांगललितादेव्याःस्फाटिकं
गगनंलिहम् सौवर्णेनविचित्रेणकलशेनोपशोभितम् यथोदयाचलःशैलोदधानोभानुमंडलम् त्वरितोगोपमामंत्र्यप्रसादंस
ययौमुदा प्रणम्यदंडवद्भूमौबद्धांजलिपुटस्तदा उपांगललितांदेवीमथस्तोतुंप्रचक्रमे गोपतिरुवाच नमस्तुभ्यंजगद्धात्रिभ
क्तानांहितकारिणि जगद्भीतिविनाशिन्यैसर्वमंगलमूर्तये हत्वानिशुंभमहिषप्रभृतीन्सुरारीनिंद्रादयोनिजपदेषुयथाभिषिक्ताः
लोकत्रयावनगृहीतमहावतारेमातःप्रसीदसततंकुरुमेनुकंपां त्वांसुक्तयेनिजजनाःकुटिलाकृतांगींगौरींनिजवपुषिकुंडलिनींभ
जंति मुक्तौचदेवमनुजाःकनकारविंदबद्धासनामविरतंकमलांस्तुवंति सापराधोस्मिसततंप्राप्तस्त्वांजगदंबिके इदानीमनुकं-

प्योहंयद्वांछामिकुरुष्वतत् इतिस्तुत्वाथशर्वाणींप्रणिपत्यपुनःपुनः कृतसंध्याविधिस्तत्रक्षपापाकृतभोजनः स्वप्नेमूर्तिमयीदेवीविप्रमेवंसमादिशत् गोपतेवत्सतुष्टास्मिगच्छोपांगमहीपतिं मत्पूजनकरंडस्यप्रार्थयस्वपिधानकं तत्पूजयन्निजगृहेपरामृद्धिमवाप्स्यसि स्वप्नइत्याप्तसंदेशोप्रभातेगोपतिस्तदा राजदर्शनवेलायांनृपद्वारंसमभ्यगात् प्रविष्टोसौनृपसभांप्रतीहारैर्निवेदितः राज्ञासंभावितस्तत्रनिषसादासनेशुभे पृष्टोगमनहेतुंसययाचेनृपपुंगवम् देव्यर्चनकरंडस्यपिधानंदेहिमेनृप इत्यर्थितःसविप्रेणजानादेशोनृपोददौ पिधानकंनमस्कृत्यतस्मैचाभ्यर्चनादिकम् आशीभिरभिनंद्याथतमामंत्र्यचभूपतिम् उपांगललितादेव्याःप्रासादंपुनरागमत् प्रणिपत्यांबिकांविप्रस्त्वरितोनिर्ययौपुरात् समीपेस्वपुरंदृष्ट्वाहृष्टोगृहमुपागमत् सुहृद्भिःसहसंगम्यसर्वंतत्कथयन्मुदा पूजयित्वापिधानंतद्विदधेपारणंद्विजः एवमाराध्यमानस्तुससमृद्धोभवत्पुनः सोपिसत्रंसमारेभेद्विजाग्र्योबहुवासरम् एकातस्याभवत्कन्याललितानामसुंदरी कन्यापिधानमादायविहर्तुंयातिसर्वदा ममत्वात्प्रियत्वाच्चपितृभ्यामनिवारिता कदाचित्स्ववयस्याभिःस्नातुंगंगाजलेशुभे क्रीडंतीददृशेतोयेनीयमानंकलेवरम् पिधानहस्तासासिंचदन्याश्चांजलिभिस्तदा ससर्पदष्टउत्तस्थौततोदेव्याःप्रसादतः सातिश्रांतंद्विजंदृष्ट्वामनसाचिंतयत्पतिम् जुहावाभ्यवहारायजनकस्यनिकेतनम् मार्गेचपरिपप्रच्छकुलंशीलंचतस्यसा सोपिसर्वंसमाचख्यौगुणराशीतिनामच ललितामंत्रयामासगुणराशिंद्विजोत्तमम् परिविष्टेषुचान्नेषुपितृवेश्मनिमेद्विज गृहीतापोशनोभूत्वाभार्यार्थंमांत्वमर्थय मयानुमोदितस्तातःसमांतुभ्यंप्रदास्यति यथोक्तोगुणराशिस्तुतथासर्वंचकारह गोपतिर्भार्ययापात्रंतत्रसमालोक्यस्वबांधवैः परीक्षितायविप्रायविद्यायांकुलशीलयोः प्रतिजज्ञेततःकन्यांललितांगुणशालिने शुभेमुहूर्तेचतयोर्विवाहंकृतवान्प्रभुः वरायब्राह्मणेभ्यश्चददौबहुधनंतदा विदधेचतयोर्गेहंनातिदूरंस्ववेश्मतः तत्रोषतुःसानुरागौमिथस्तौदंपतीचिरं पिधानकंतयानीतंनिजंललितयागृहम् शनैरथधनंसर्वंगोपतेरगमद्धह्रात् गुणराशिर्धनीजातोमहादेव्याःप्रसादतः करंडस्यपिधानंतज्जनन्याबहुवासरम् याचितापिनवैप्रादाल्ललितापूजितंगृहे अथसा-

गोपतेर्भार्यातस्यैवानर्चनाकृतं इत्थंविचिंत्यपापात्माजामातरमघातयत् समिदर्थंवनंयातःस्वयंतद्गेहमाययौ शोचंतींक्लिन्नांकन्यांसतुदेव्याःप्रसादतः उत्थायविपिनादेत्यभुक्त्वाशेतेसुखंगृहे पादसंवाहनंतस्य कुरुतेललितातदा तंदृष्ट्वादुःखिताभूमौप्रणिपत्यपुनःपुनः लज्जिताकृच्छ्रतःपृष्टानिजपापंन्यवेदयत् स्कंदउवाच गुणराशिस्तदातस्यैप्रायश्चित्तंददौबहु आत्मानंबहुकालेनपूतंकृच्छ्रैश्चकार ह श्रीपतेस्त्वंचलांलक्ष्मींसमालोक्यतपोधनाः गोपतिस्तंयथापृच्छत्त्वानस्त्वंवर्तसेकथम् किमाचरसिकल्याणंयेनश्रीरनपायिनी इतितस्यवचःश्रुत्वाश्रीपतिर्विस्मितःपुनः अस्माभिस्तत्कृतंदेव्यायत्कृतंगुरुमंदिरे सोपिदेव्याव्रतंचक्रेपुनर्भर्त्रोपदेशितम् लेभेसपरामामृद्धिंपुत्रांश्चमुदितोभवत् उपांगललितादेव्याःकुर्यादाराधनंततः एवमेतत्पुरावृत्तंमाहात्म्यंकथितंमया कृतमन्यैश्चबहुभिस्तेपिलब्धमनोरथाः स्कंदउवाच विधानमस्यवक्ष्येहंतच्छृणुध्वंतपोधनाः शुक्लपक्षेतुपंचम्यामिषेमासिचरेद्व्रतम् गर्जितंसंध्ययोस्त्याज्यंदिनवृद्धिक्षयौतथा निर्वर्त्यावश्यकंकर्मशुचीरागविवर्जितः चत्वारिंशत्तथाष्टौचकल्पयित्वाविधानतः दंतकाष्ठान्युपादायतडागंवानदींव्रजेत् आयुर्बलंयशोवर्चःप्रजाःपशुवसूनिच ब्रह्मप्रज्ञांचमेधांचत्वंनोदेहिवनस्पते दंतधावनपूर्वाणिमज्जनानिसमाचरेत् ततोयथाविधिस्नात्वाशुक्लवासागृहंव्रजेत् उपचारैःषोडशभिरेभिर्मंत्रैःसमाहितः कुर्यात्पूजांप्रयत्नेनदूर्वाभिश्चविशेषतः शुचौदेशेमंडपिकांकृत्वातीवमनोहरां सौवर्णींप्रतिमांशक्त्याकल्पयेन्मंत्रपूर्विकां द्विजायवाणकंदद्याद्विंशत्यावटकाद्भिः ततःकथांसमाकर्ण्यवाणकान्नस्यसंख्यया स्वयमद्यात्तदेवान्नंवाग्यतःसहबांधवैः रात्रौजागरणंकुर्यान्नृत्यगीतादिमंगलैः प्रभातेपूजयेद्देवींततःकुर्याद्विसर्जनम् सवाहनाशक्तियुतावरदापूजितामया मातर्मामनुगृह्याथगम्यतांनिजमंदिरं तामर्चांगुरवेदद्याद्दानानिचसभूरिशः व्रतमेवंचयःकुर्यात्सुपुत्रवान्धनवान्भवेत् विद्यावान्रोगनिर्मुक्तोसुखीगोधनमाप्नुयात् अवैधव्यंचलभवेत्स्त्रीकन्यावरमुत्तमम् विजयंपुष्टिमायुष्यंयच्चान्यदपिवांछितं इत्येतद्व्रतमाख्यानंसोतिहासंमहर्षयः शृण्वन्नपिनरोभक्त्यासुखमाप्नोतिनिश्चितम् निर्मुक्तःससुखीधीमान्व्रतराजप्रसादतः वित्तमारोग्यमायुष्यंप्राप्नोतिचप्रसादतः इतिश्रीस्कंदपु

राणेउपांगललिताकथासंपूर्णा   अथोद्यापनम्   आचार्यंवरयेत्पश्चादृत्विजोविंशतिंतथा उपलिप्तेशुभेदेशेविलिखेन्मंडलंततःब
ह्मादींश्चततःस्थाप्यपूजयेद्विधिमंत्रतः अव्रणेकलशेशुभ्रेललितांस्थापयेत्तथा रात्रौजागरणंकृत्वाप्रभातेहोममाचरेत् इक्षुखंडतिलैः
शुभ्रैःपायसेनापिवाव्रती अष्टोत्तरशतंहुत्वाबलिदानंसमाचरेत् वायनंचततोदद्याद्वंशपात्रेनिधायच वटकान्विंशतिसंख्यान्नि
र्मलान्घृतपाचितान् आचार्यंपूजयेत्पश्चाद्वस्त्रालंकारधेनुतः ऋत्विजश्चतथादद्यात्कुंभंवस्त्रंसदक्षिणं विसृज्यचततःपीठमाचा
र्यायनिवेदयेत् भोजयेच्चततोविप्रान्पायसान्नेनभक्तितः विप्राज्ञांचततोगृह्यस्वयंभुंजीतबंधुभिः   इतिश्रीस्कंदपुराणेउपांग
ललिताव्रतोद्यापनंसंपूर्णम्   अथमाघशुक्लपंचम्यांवसंतप्रवृत्तिः सामध्यान्हव्यापिनीग्राह्या दिनद्वयेतद्व्याप्तावव्याप्तौवापू
र्वा मुहूर्त्तमात्रसत्वेपिपराग्राह्या तत्रविष्णोःपूजाकार्या माघेमासिसितेपक्षेपंचम्यांपूजयेद्धरिं पूर्वविद्धाप्रकर्तव्यावसंतादौ
तथैवच तैलाभ्यंगंततःकृत्वाभूषणानिचधारयेत् नित्यंनैमित्तिकंकृत्वागुलालेनार्चयेद्धरिम् गंधपुष्पैश्चधूपैश्चनैवेद्यैःपूजयेत्सदा
नारीनरोवाराजेंद्रसंतर्प्यपितृदेवताः स्रक्चंदनसमायुक्तान्ब्राह्मणान्भोजयेत्ततः   इतिहेमाद्रौवसंतपंचमीविधिः
अथषष्ठीव्रतानि   तत्रभाद्रशुक्लषष्ठ्यांललिताव्रतम्   सामध्यान्हव्यापिनीग्राह्या   तद्व्याप्तावव्याप्तौवापूर्वाजागरप्रधानत्वा
त्   कृष्णउवाच   भद्रेभाद्रपदेमासिशुक्लषष्ठ्यांसुसंयुता नारीस्नात्वाप्रभातेतुशुक्लमाल्यांबराशुचिः सुवेषाभरणोपेताभूत्वा
संगृह्यवालुकां आनीयवंशपात्रेतुपंचपिंडाकृतींशुभां ध्यात्वातुललितादेवींतपोवननिवासिनीं पंकजंकरवीरंचने
पालींमालतींतथा नीलोत्पलंकेतकंच संगृह्यतगरंतथा एकैकाष्टशतंग्राह्यमष्टाविंशतिरेवच अक्षताःकलिकाग्राह्यास्ताभि
र्देवींसमर्चयेत् प्रार्थयेद्यतोभूत्वादेवींतांगिरिशप्रियां गंगाद्वारेकुशावर्त्तेबिल्वकेनीलपर्वते स्नात्वाकनखलेतीर्थेहरंलब्धव
तीपतिम् ललितेललितेदेविसौख्यसौभाग्यदायिनि अनंतंदेहिसौभाग्यंपुत्रपौत्रप्रवर्धनम् मंत्रेणानेनकुसुमैश्चंपकैर्बकुलैःशुभैः
एवमभ्यर्च्यविधिनानैवेद्यंपुरतोन्यसेत् त्रपुसैरपिकूष्मांडैर्नारिकेरैःसुदाडिमैः बीजपूरैःसतुंडीरैःकारवेल्लैःसचिर्पिटैः फलैस्तत्का

लसंभूतैः कृत्वाशोभांतदग्रतः विरूढैर्धान्यसंभूतैर्दीपिकाभिःसमंततः सार्धैःसगुणकैर्धूपैःसोहारीककरंजकैः घृतपक्वैःकर्ण
वेष्टैर्मोदकैरुपमोदकैः बहुप्रकारैर्नैवेद्यैर्यथाविभवसारतः एवमभ्यर्च्यविधिवद्रात्रौजागरणोत्सवं गीतवाद्ययुतैर्नृत्यैःप्रेक्षणीयै
रनेकधा सखीभिःसहितासाध्वीतांरात्रिंप्रशमंनयेत् नचसंमीलयेन्नेत्रेनारीयामचतुष्टयम् दुर्भगादुःखितावंध्यानेत्रसंमीलनाद्भ
वेत् एवंजागरणंकृत्वासमम्यांसरितंप्रति स्नात्वावस्त्रंपरीधायधार्यंसौभाग्यकुंकुमं गंधपुष्पादिधूपैश्चगीतवाद्यपुरःसरं तच्चद
द्याद्द्विजेंद्रायनैवेद्यादिसुभद्रके ततोगृहंसमागत्यहुत्वावैश्वानरंक्रमात् देवान्पितॄन्ब्राह्मणांश्चपूजयित्वासुवासिनीः कन्यकाश्चै
वसंभोज्यादीनानाथांश्चभोजयेत् भक्ष्यभोज्यैर्बहुविधैर्दत्वादानानिभूरिशः ललितामेस्तुसुप्रीताइत्युक्त्वातुविसर्जयेत् यःकश्चि
दाचरेदेतद्व्रतंसौभाग्यदंपरम् षष्ठ्यांतुललितासंज्ञंसर्वपापनिबर्हणम् नरोवायदिवानारीतस्यपुण्यफलंशृणु यत्तुलभ्यंव्रतैश्चान्यैर्दा
नैर्वान्नृपसत्तम तपोभिर्नियमैर्वापितदेतेनहिलभ्यते इहचैवातुलांसंपत्सौभाग्यमनुभूयच कृत्वामूर्ध्निपदंपार्थसपत्नीनांयशस्वि
नी मृताशिवपुरंप्राप्यदेवैरसुरपन्नगैः प्राप्नोतिदर्शनंदेव्यातयानुसहमोदते पुण्यशेषादिहागत्यपुण्यसौख्यैकभाजनम् भर्त्रासहस्थि
तानारीसीतेवप्रियवल्लभा इदंयःशृणुयात्पार्थपठेद्वासाधुसंसदि सोपिपापविनिर्मुक्तःशक्रलोकेमहीयते षष्ठ्यांजलांतरगतांवरवंश
पात्रेसंगृह्यपूजाधितयासिकतांक्रमेण नक्तंचजागरमनुव्रतशेषशीला कुर्यादसौत्रिभुवनेललितेभवानि इतिहेमाद्रौललिताषष्ठीव्र
तं इदंगुर्जरदेशेप्रसिद्धम् अत्रैवभाद्रपदकृष्णषष्ठ्यांकपिलाषष्ठीव्रतं तत्रयोगविशेषेणपूर्वस्यांवाकार्यम् तेचयोगाःपुराणसमुच्च
येदर्शिताः भाद्रेमास्यसितेपक्षेभानौचैवकरेस्थिते पातेकुजेचरोहिण्यांसाषष्ठीकपिलास्मृता संयोगेतुचतुर्णांत्विनिर्दिष्टापरमेष्ठि
ना अथकथा हेमाद्रौस्कांदे चित्रांगउवाच रूपसंपदमारोग्यंसंततिंचातिपुष्कलाम् प्राप्नुवंतिनरायेननियतंतद्वदस्वमे
अगस्त्यउवाच साधुसाधुत्वयाप्राज्ञयत्पृष्टोहंशुचिव्रत तत्सर्वंकथयिष्यामिततःश्रेयोभविष्यति शृणुपार्थप्रवक्ष्यामिस्वर्गमोक्ष
प्रदंनृणां यच्चगुप्तंपुरादेवान्ब्रह्मरुद्रेंद्रदैवतैः असुराणांचसर्वेषांराक्षसानांतथैवच शंकरेणपुराचैतत्षण्मुखायनिवेदितं षण्मुखे

नममाख्यातंमहापातकनाशनं तद्दस्येब्रह्महागोघ्नः सुरापोगुरुतल्पगः अगारदाहीगरदः सर्वपापरतोपिवा मुच्यतेसर्वपापेभ्यः स्वर्ग
लोकंचगच्छति यच्चपुण्यंपवित्रंचनृणामद्भुतमंगलं उपकारायलोकानांतथातवनृपोत्तम शृणुभूपमहापुण्यंषष्ठीमाहात्म्यमुत्त
मम् भाद्रेमास्यसितेपक्षेषष्ठीभौमेनसंयुता व्यतीपातेनरोहिण्यासाषष्ठीकपिलास्मृता आश्विनस्यासितेपक्षेमहापुण्यप्रवर्धिनी।
षष्ठिसंवत्सरस्यांतेसापुनस्तेनसंयुता चैत्रवैशाखयोर्मध्येसितेपक्षेशुभोदये वैशाखेपिचराजेंद्रद्वारवत्यांपरास्मृता तस्यांचैवकु
तंदत्तंयत्किंचित्प्रतिपादितं तस्यसर्वस्यपुण्यस्यसंख्यावक्तुंनशक्यते यस्मिन्कालेभवेदेतैर्गुणैःषष्ठीयुतातदा पंचम्यामेकभक्तंच
कुर्यात्तत्रविचक्षणः षष्ठ्यांप्रातःसमुत्थायकृत्वादौदंतधावनम् जलपूर्णांजलिंकृत्वाइमंमंत्रमुदीरयेत् निराहारोद्यदेवेश त्वद्भक्त
स्तत्परायणः पूजयिष्याम्यहंभक्त्याशरणंभवभास्कर अर्घ्यंदत्वेतिसंकल्पंकृत्वायत्नाच्छुचिस्मितः स्नानंकृत्वाप्रयत्नेननद्यांतीर्थो
द्भवेन्हृदे तडागेदीर्घिकायांवागृहेवानियतात्मवान् देवदारुंतथोशीरंकुंकुमेलामनःशिलम् पद्मकंपत्रकंयष्टिमधुगव्येनपेषयेत् क्षी
रेणालोड्यकल्केनस्नानंकुर्यात्समंत्रकम् आपस्त्वमसिदेवेशमनोवाक्कायकर्मजम् पंचगव्यकृतस्नानःपंचगव्यैस्तुमार्जयेत् आ
नयेन्मृत्तिकांशुद्धांस्नानार्थंवैप्रयत्नतः मृत्तिकेब्रह्मपूतासिकाश्यपेनाभिमंत्रिता पवित्रंकुरुमांनित्यंसर्वपापात्समुद्धर मंत्रेणाने
नवरुणंपूजयेद्भक्तिमान्नरः पाशाग्रहस्तवरुणसर्ववारीश्वरप्रभो अद्याहंप्रार्थयामित्वांपूजनार्थंसुरेश्वर आदित्योभास्करोभा
नूरविःसूर्योदिवाकरः प्रभाकरोमित्रोवीरोदेवःसर्वेश्वरोहरिः गोमयेनोपलिप्तायांभूम्यांवैकुंकुमेनतु मंडलंसर्वतोभद्रमालिखे
द्बुद्धिमान्नरः तत्रमध्येलिखेत्पद्ममष्टपत्रंसकर्णिकं पूर्वपत्रेन्यसेत्सूर्यमाग्नेयेतपनंन्यसेत् सुवर्णरेतसंयाम्येनैर्ऋत्येचन्यसेद्र
विं आदित्यंवारुणेपत्रेवायव्येचदिवाकरम् सौम्येप्रभाकरंतत्रसूर्यमीशानपत्रके तीव्ररश्मिधरंदेवंब्रह्माणंचैवविन्यसेत् आ
धाररूपिणंदेवंमध्येचैवारुणंन्यसेत् सहस्ररश्मिंसूर्यंचसूक्ष्मस्थूलगुणान्वितम् सर्वगंसर्वरूपंचमध्येभास्करमेवच सप्ता-
श्वरथमारूढंपद्महस्तंदिवाकरं अक्षसूत्रंधनुःपाणिंकुंडलैर्मुकुटेनच रत्नैर्नानाविधैर्युक्तंसौवर्णंतत्रकारयेत् शक्तिनस्तुपलादू

ध्वैतदर्धंकर्षतोपिवा सौवर्णमरुणंकुर्याद्रज्जुंचैवतथाविधाम् सप्ताश्वैर्भूषितंकृत्वारथंतस्याग्रतःस्थितम् अरुणंविनतापुत्रंगृही
ताश्वमनूरुकं एवंरूपंरथंकृत्वापद्मस्योपरिविन्यसेत् तस्योपरिन्यसेद्देवंरक्तवस्त्रविभूषितं रक्तचंदनमाल्यादिमंडितंचातिशोभ
नं अग्रतःसारथिंकृत्वापूजयेदरुणंशुचिः रक्तपुष्पैस्तुगंधैश्चतथान्यैरपिशक्तितः विनतातनयोदेवःकर्मसाक्षीतपोनुदः सप्ताश्वः
सप्तरज्जुश्च अरुणोमेप्रसीदतु मंत्रेणानेनसंपूज्यसारथिंतदनंतरं देवस्यशंसनंकल्प्यप्रभूतादिकपंचकं प्रभूतविमलंसारमा
राध्यंपरमंशुभम् दीप्तादिशक्तिभिश्चैवततोभानुंप्रपूजयेत् दीप्तासूक्ष्मातथाभद्राबिंबिनीविमलानघा अमोघावैद्युताचेतिनवमा
सर्वतोमुखी अपवित्रःपवित्रोवासर्वावस्थांगतोपिवा यःस्मरेद्भास्करंदेवंसबाह्याभ्यंतरेशुचिः शिखायांभास्करंन्यस्यल
लाटेसूर्यमेवच चक्षुर्मध्येन्यसेद्भानुंमुखेतत्ररविंन्यसेत् कंठेन्यसेद्भानुमंतंपद्महस्तंद्विहस्तयोः तिमिरक्षयकृद्देवंस्तनयोरे-
वविन्यसेत् जातवेदाभिधंनाभ्यांकट्याभानुंतथान्यसेत् उग्ररूपंगुह्यदेशेतेजोरूपंद्विजंघयोः पादयोःसर्वरूपंतुसूक्ष्मस्थूल
गुणान्वितम् एवंयथोक्तंविन्यस्यपात्रंगृह्यततोर्चयेत् करवीरार्ककुसुमैरक्तचंदनमिश्रितैः पुष्पैःसुगंधैर्धूपैश्चकुंकुमैरुपशोभि
तम् मार्तंडंभानुमादित्यंभास्करंतपनंरविम् हंसंदिवाकरंचेतिपादयोर्मुकुटावधि पादौजंघेतथाभानुद्वयमूरूकटीशुभे नाभिंवक्ष
स्थलंशीर्षमेतेष्वंगेषुपूजयेत् आनयेदर्घ्यपात्रंचसौवर्णंरौप्यताम्रजम् अर्घ्यार्थंदैवतंपात्रमुदकेनप्रपूरयेत् पूजयेच्चाथप्रागादिदे
वतास्ताःसमाहितः दिग्देवतास्ततःपूज्यागंधपुष्पानुलेपनैः पात्रेतोयंसमादायसुपुष्पफलसंयुतम् जानुभ्यामवनिंगत्वासूर्याया
र्घ्यंन्यवेदयेत् वेदगर्भनमस्तुभ्यंदेवगर्भनमोस्तुते अव्यक्तमूर्तयेतुभ्यमर्घ्यंगृण्हनमोस्तुते ब्रह्ममूर्तिंधरायैवचतुर्वक्त्रसनातन
सृष्टिस्थितिविनाशायगृहाणार्घ्यंनमोस्तुते कालात्मासर्वभूतात्मावेदात्मासर्वतोमुखः जन्ममृत्युजराशोकसंसारभयनाश
नः विष्णुरूपधरोदेवःपीतवस्त्रश्चतुर्भुजः प्रभवःसर्वलोकानामर्घ्यंगृण्हनमोस्तुते दारिद्र्यव्यसनध्वंसीश्रीमान्पातुदिवाकरः
सुवर्णस्फाटिकोभानुःस्वर्णरेतादिवामणिः हरिदश्वोंशुमालीचअर्घ्यंगृण्हनमोस्तुते चतुर्भिर्मुनिभिःसम्यगष्टाभिःपरिगीय

ते सामध्वनिरुक्तोयज्ञे अर्घ्यंगृण्हनमोस्तुते अर्घ्यंगंधंचपुष्पंचतथाधूपप्रदीपकम् नैवेद्यंचयथाशक्त्याप्रार्थयेत्सूर्यदेवतां अग्निमी
ळेनमस्तुभ्यंनमस्तेजातवेदसे इषेत्वैवनमस्तुभ्यंअग्नेचैवनमोनमः आत्मरूपिन्नमस्तुभ्यंविश्वमूर्त्तेनमोनमः त्वंधातात्वंचवैविष्णु
स्त्वंब्रह्मात्वंहुताशनः मुक्तिकामोहमिच्छामिप्रार्थयामिसुरेश्वर विश्वतश्चक्षुराख्यातोविश्वतश्चरणेनमः विश्वात्मासर्वतोदेवः
प्रार्थयामिसुरेश्वर इमंमंत्रंसमुच्चार्यनमस्कुर्वीतभास्करं संवर्चसेतिपाणिभ्यांतोयेनविमृजेन्मुखम् हंसःशुचिषदित्यर्चासूर्य
स्यैवावलोकनम् उदुत्यंचित्रमित्येतत्सूक्तंदेवाग्रतोजपेत् पद्मकेसरकोणेषुफलकंचैवकारयेत् फलैःपुष्पैरक्षतैश्चभक्ष्यैर्ना
नाविधैरपि शय्यांतत्रचदेवस्यशुभेदेशेप्रकल्पयेत् षड्धान्यंषड्रसंचैवरौप्यंचैवमहाप्रभुं पुरुषंखड्गहस्तंचकारयेच्चैवबुद्धि-
मान् वस्त्रयुग्मेनसंछाद्यलवणोपरिविन्यसेत् अनेनैवतुमंत्रेणस्नानमर्घ्यार्चनंततः नमस्तेक्रोधयुक्तायखड्गहस्तजिघांस
वे जिघांसंतंचतंदृष्ट्वादुद्रुवुःसर्वदेवताः त्वयाव्याप्तंमेरुपृष्ठंचंडभास्करसुप्रभ अतस्त्वांपूजयिष्यामिअर्घ्यंगृण्हनमोस्तुते क्ष
पयित्वातुतांरात्रिंगीतवादित्रनिस्वनैः ततस्त्वभ्युदितेसूर्येहोमंकुर्यात्स्वशक्तितः पूजयेत्तत्रशक्त्याचदेवांश्चविधिवद्गुरुम् हो
मोर्कस्यसमिद्भिश्चघृतमिश्रैस्तिलैस्तथा सिद्धान्नंचचरुद्रव्यंघृतंचजुहुयाद्द्विजः आकृष्णेनेतिमंत्रेणशतमष्टोत्तरंक्रमात् हो
मोव्याहृतिभिर्वाथस्विष्टकृत्तदनंतरम् कपिलांपूजयेद्देवींसवत्सांपापनाशिनीं वस्त्रयुक्तांसघंटांचस्वर्णशृंगविभूषितां ताम्रपृ
ष्ठींरौप्यखुरांकांस्यदोहनकान्वितां मंत्रेणानेनतांदद्याद्ब्राह्मणायेतिशक्तितः कपिलेसर्वभूतानांपूजनीयासिरोहिणी सर्वती-
र्थमयीयस्मादतःशांतिंप्रयच्छमे आचार्यस्यततोभक्त्यासर्वंपाणौविनिक्षिपेत् गोभूहिरण्यवासांसिव्रीहयोलवणंतिलाः
एतत्सर्वंप्रदत्वातुकपिलांप्रार्थयेत्ततः कपिलेपुण्यकर्मासिनिष्पापेपुण्यकर्मणि मामुद्धारयपापात्तुददतोह्यक्षयंकुरु दिविवा
दित्रशब्दैश्चसेव्यतेकपिलासदा तथाविद्याधराःसिद्धाभूतनागगणाग्रहाः कपिलारोमसंख्यातास्तत्रदेवाःप्रतिष्ठिताः पुष्पवृ
ष्टिंप्रमुंचंतिनित्यमाकाशसंस्थिताः ब्रह्मणोत्पादितांदेवीमग्निकुंडात्सुप्रभां नमस्तेकपिलेपुण्येसर्वदेवनमस्कृते जयनि

त्यंमहासत्वेसर्वतीर्थादिमंगले दातारंस्वजनोपेतंब्रह्मलोकंनयाश्रमां ततःप्रदक्षिणांकृत्वानत्वाब्राह्मणपुंगवान् आशीर्वादान्वदेयुस्तेपुत्रपौत्रधनागमान् आरोग्यंरूपसौभाग्यंसर्वदुःखविवर्जितः अंतेगोलोकमासाद्यचिरायुःसुखभाग्भवेत् यदास्वर्गात्प्रचरतिराजाभवतिधार्मिकः सप्तद्वीपवतींभुंक्ते सदाराज्यमकंटकं अहोव्रतमिदंपुण्यंसर्वदुःखविनाशनं अतःपरंप्रवक्ष्यामिदानस्यफलमुत्तमम् कपिलाख्यायदाषष्ठीजायतेभुविमानद व्रतंसर्वव्रतश्रेष्ठमिदमग्र्यंमहाफलम् उद्धरिष्यतिदातारंनूनमक्षय्यमव्ययम् एवंदेवगणाःसर्वेभूतसंघामहर्षयः आकाशस्थाःप्रवक्ष्यंतिपुण्येस्मिन्दिवसागमे पात्रभूतायऋषयेश्रोत्रियायकुटुंबिने एवंयःकपिलांदद्याद्विधिदृष्टेनकर्मणा सयातिपरमंस्थानंयावन्नच्यवतेपुनः उद्यापनविधिंब्रूहिभक्तायममतत्वतः कृष्णउवाच पूर्वस्मिन्दिवसेकुर्यादेकभक्तंसमाहितः शुचौदेशेसमालिप्यसर्वतोभद्रमंडलं स्थापयेदव्रणंकुंभंचंदनोदकपूरितम् संवेष्ट्यवस्त्रयुग्मेन कंठदेशेसुशोभनम् पंचरत्नसमायुक्तंदूर्वापुष्पाक्षतान्वितं रक्तवस्त्रयुगच्छन्नंताम्रपात्रेणसंयुतम् रथंरौप्यपलस्यैवचतुरश्वैर्विचित्रितः सौवर्णीपलसंयुक्तांमूर्त्तिंसूर्यस्यकारयेत् कुंभस्योपरिसंस्थाप्यगंधपुष्पैस्तथार्चयेत् आदित्यंपूजयेद्देवंनामभिस्त्वैर्यथोदितैः आदित्यंभास्करं भानुंरविंसूर्यंदिवाकरं प्रभाकरनमस्तुभ्यंसंसारान्मांसमुद्धर भुक्तिमुक्तिप्रदोयस्मात्तस्माच्छांतिंप्रयच्छमे नमोनमस्तेवरदऋक्सामयजुषांपते नमोस्तुविश्वरूपायविश्वधात्रेनमोस्तुते एवंसंपूज्यविधिवद्देवदेवंदिवाकरम् पूजयेत्कपिलांदेवींवस्त्रमाल्यानुलेपनैः दानमंत्रः दिव्यमूर्तिर्जगच्चक्षुर्द्वादशात्मादिवाकरः कपिलासहितोदेवोममसुक्तिंप्रयच्छतु यस्मात्त्वंकपिलेपुण्येसर्वलोकस्यपावनी प्रदत्तासहसूर्येणममसुक्तिप्रदाभव इतिहेमाद्रौस्कांदे कपिलाषष्ठीव्रतोद्यापनंसंपूर्णम् अथकार्तिकेस्कंदषष्ठीव्रतं हेमाद्रौभविष्ये श्रीकृष्णउवाच षष्ठ्यांपलाशनोराजन्विशेषात्कार्तिकेनृप राज्यच्युतोविशेषेणस्वंराज्यंलभतेचिरात् षष्ठीतिथिर्महाराज सर्वदासर्वकामदा उपोष्यासाप्रयत्नेनसर्वकालंज-

यार्थिना कार्तिकेयस्यदयिताएषाषष्ठीमहातिथिः देवसेनाधिपत्यंहिप्राप्तमस्यांमहात्मना अस्यांहिश्रीसमायुक्तोयस्मात्स्कं
दोभवत्पुरा तस्मात्षष्ठ्यांनभुंजीतप्राप्नुयात्भार्गवींसदा दत्वार्घ्यंकार्तिकेयायस्थित्वावैदक्षिणामुखः दध्याक्षतोदकैःपुष्पैर्मंत्रेणा
नेनसुव्रत सप्तर्षिदारजस्कंदसेनाधिपमहाबल रुद्रोमाग्निजषड्वक्त्रगंगागर्भनमोस्तुते प्रीयतांदेवसेनानीःसंपादयतुहृद्गत
म् दत्वाविप्रायचामान्नंयच्चान्यदपिवर्तते पश्चाद्भुंक्तेतसोरात्र्यांभूमिंकृत्वातुभाजनं एवंषष्ठीव्रतस्थस्यउक्तंस्कंदेनयत्फलं त
न्निबोधमहाराजप्रोच्यमानंमयाखिलं षष्ठ्यांफलाशनोयस्तुनक्ताहारोभविष्यति शुक्लायामथकृष्णायांब्रह्मचारीसमाहि
तः तस्यसिद्धिंधृतिंपुष्टिंराज्यमायुर्निरामयम् इहलोकेपरत्रापिदद्यात्स्कंधोनसंशयः अशक्तश्चोपवासेवैतेननक्तंसमाचरे
त् तैलंषष्ठ्यांनभुंजीतनदिवाकुरुनंदन यस्तुषष्ठ्यांनरोनक्तंकुर्याद्भरतसत्तम सर्वपापैर्विनिर्मुक्तोगांगेयस्यप्रसादतः स्वर्गे-
चनियतंवासोलभतेनात्रसंशयः इहचागत्यकालांतेयथोक्तफलभाग्भवेत् देवानामपिवंद्योसौराजराजोभविष्यति इति
स्कंदषष्ठीव्रतंभविष्योक्तंसंपूर्णम् अथमार्गशीर्षशुक्लेभाद्रपदेवाचंपाषष्ठीव्रतंहेमाद्रौस्कांदे स्कंदउवाच मासरा-
ज्यंवराजानंधर्मपुत्रंयुधिष्ठिरम् कदाचिदाययौद्रष्टुंदुर्वासामुनिसत्तमः तंपप्रच्छमहातेजाधर्मसूनुःकृतांजलिः राज्यला
भःकथंजातोममविप्रतपोनिधे तद्व्रतंश्रोतुमिच्छामिकर्तुंचमुनिसत्तम दुर्वासाउवाच शृणुराजन्महाभागव्रतानामु
त्तमंव्रतं अस्तीहयच्चीर्णमात्रंसर्वकामांस्तुपूरयेत् सर्वपापक्षयंकुर्यादखंडितव्रतान्यपि षष्ठीभाद्रपदेशुक्लावैधृत्याचसम-
न्विता विशाखभौमयोगेनसाचंपाइतिविश्रुता देवासुरमनुष्याणांदुर्लभाषष्टिहायनैः कृतेत्रेतायांपंचाशद्धायनीद्वापरेपुनः
चत्वारिंशत्कलौत्रिंशद्धायनीदुर्लभाततः आदौकृतयुगेपूर्वंयाचीर्णाविश्वकर्मणा तत्फलाद्विश्वकर्तृत्वंप्राजापत्यमवाप्नुवान् पृ
थुनाकार्तवीर्येणभुविनारायणेनच ईश्वरेणमयासार्द्धंइतरेतरलिप्सया यश्चैतद्विधिवत्कुर्यात्सौत्यंतंफलमश्नुते युधिष्ठि
रउवाच तद्विधिंश्रोतुमिच्छामिविस्तराद्वदतोमुने केमंत्राःकेचनियमाःसापिकिंलक्षणाभवेत् दुर्वासाउवाच

हूंदैवत्यर्क्षेभौमेनवैधृतेनसमन्विता भाद्रेमासिसितेषष्ठीसाचंपेतिनिगद्यते पंचम्यांनियमंकुर्यादेकभुक्तंसमाचरेत् चंपाषष्ठी
व्रतंकुर्याद्यथोक्तंवचनाद्गुरोः ततःप्रभातेविमलेदंतधावनपूर्वकम् कृत्वास्नानंशुचिर्भूत्वासंकल्प्यचयथाविधि निराहारोद्य
देवेशत्वद्भक्तस्त्वत्परायणः पूजयिष्याम्यहंभक्त्याशरणंभवभास्कर संकल्पमंत्रः ततःस्नानंप्रकुर्वीतनद्यादौविमलेजले मृद
मालभ्यमंत्रैश्चतिलैःशुक्लैश्चमंत्रवित् सावित्रंपरमंत्वंहिपरंधामजलेमम त्वत्तेजसापरिभ्रष्टंपापंयातुसहस्रधा प्रार्थना आद्यस्त्वम
सिदेवेशज्योतिषांपतिरेवच पापंनाशयमेदेववाङ्मनःकर्मभिःकृतम् स्नानमंत्रः ततःसंतर्पयेद्देवा नृषीन्पितृगणानपि ततः
श्चैत्यगृहंमौनीपाखंडालापवर्जितः स्थंडिलंकारयेच्छुद्धंचतुरस्रंसुशोभनं स्थापयेदव्रणंकुंभंपंचरत्नसमन्वितम् कुंकुमेन
लिखेत्पद्मंद्वादशारंसकर्णिकं तस्योपरिन्यसेत्सूर्यंसौवर्णंसरथारुणं शक्त्यावावित्तसारेणवित्तशाठ्यविवर्जितः तमर्चयेद्गंधपु
ष्पैर्विधिमंत्रपुरःसरं पंचामृतेनस्नपनंकुर्यादर्कस्यसंयतः ततस्तुगंधतोयेनपरांपूजांसमारभेत् गंधैर्नानाविधैर्दिव्यैःकर्पूरा
गरुकुंकमैः फलैर्नानाविधैर्दिव्यैःकुंकुमैश्चसुगंधिभिः मंडपंकारयेत्तत्रपुष्पमालाविभूषितं यथाशोभंप्रकुर्वीतअधश्चोपरि
सर्वतः ततःसंपूजयेद्देवंभास्करंकमलोपरि मध्येदलेषुपूर्वादिष्वादित्यादीन्प्रपूजयेत् आदित्याय० भास्कराय० भानवेन० अ
र्यम्णेन० विश्वचक्राय० अंशुमते० सहस्रांशवेन० खगाय० सुराद्याय० सूर्याय० द्वादशात्मने० प्रभाकराय० १२ जन्मांतरसह
स्रेषुदुष्कृतंयन्मयाकृतं तत्सर्वंनाशमायातुत्वत्प्रसादाद्दिवाकर ततोरथपूजा ततःसंपूजयेद्देवमच्युतंतद्रथेस्थिरम् अष्टाक्ष
रेणमंत्रेणगंधपुष्पादिभिःक्रमात् मंत्रः ॐघृणिःसूर्यआदित्यः इतिमंत्रः कालात्मासर्वभूतात्मावेदात्माविश्वतोमुखः जन्म
मृत्युजरारोगसंसारभयनाशनः उदयेअर्घ्यमंत्रः ततःसंपूजयेच्छुक्लांसवत्सांगांपयस्विनीं सवस्त्रघंटाभरणांकांस्यपात्रेचदोहि
नीं ब्रह्मणोसादिनेदेवि सर्वपापविनाशिनि संसारार्णवमग्नंमांगोमातस्त्रातुमर्हसि सुरूपाबहुरूपाश्चमातरोलोकमातरः गावो
मामुपसर्पंतुसरितःसागरंयथा यालक्ष्मीःसर्वदेवानांयाचदेवेषुसंस्थिता धेनुरूपेणसादेवीममपापंव्यपोहतु तिलहोमंततःकुर्या

त्सावित्र्याष्टोत्तरंशतं ततस्तांकल्पयेद्धेनुंसद्योमेप्रीयतामिति आचार्यायततोदद्यादादित्यंसरथारुणं सकुंभरक्तवस्त्रैश्चसर्वोप-
स्करसंयुतं मनोभिलषितावाप्तिंकरोतुममभास्करः दानमंत्रः गृण्हामिभास्करस्त्वेभवंतंविश्वतोमुखम् मनोभिलषितावाप्ति
मुभयोःकर्त्तुमर्हसि प्रतिग्रहणमंत्रः सर्वतीर्थमयींधेनुंसर्वयज्ञमयींशुभां सर्वदानमयींदेवींब्राह्मणायददाम्यहं गोदा
नम् गृण्हामिसुरभींदेवींसर्वयज्ञमयींशुभां उभौपुनीहिवरदेउभयोस्तारकाभव ततस्तुभोजयेद्विप्रान्द्वादशैववस्त्रशक्ति
तः दद्याच्चदक्षिणांतेभ्यःप्रणिपत्यविसर्जयेत् अवैकल्यंभवेत्तस्यशांतिमायुर्द्विजोत्तम अभिनंद्यतमाशीर्भिस्तेसर्वेअभिनंदि-
ताः ततस्तुस्वयमश्नीयाद्द्विजानामवशिष्टकं सहपुत्रैःकलत्रैश्चअन्यैर्बहुजनैर्वृतः एवंयःकुरुतेराजन्सोत्यंतंपुण्यमश्नुते प्र
भूणांचविधिःप्रोक्तःसर्वेषांदृष्टिगोचरः सर्वैश्चतद्व्रतंकार्यंस्वशक्त्यादुःखभीरुभिः प्रभुःप्रथमकल्पस्ययोनुकल्पेनवर्तते विफ
लंनतुतस्यस्यादनुशास्त्वनुकल्पितः अथनिर्धनस्यविधिः पंचम्यांनियमंकुर्यादाचार्यवचनाद्व्रती षष्ठ्यांस्नानंप्रकुर्वीतसं
तर्प्यपितृदेवताः अभ्येत्यस्वगृहंमौनीसूर्यंमनसिचिंतयेत् स्थापयेदव्रणंकुंभंमृत्पात्रंचतथोपरि तस्योपरिन्यसेत्सूर्यंफलकेन-
विनिर्मितम् सौवर्णभक्तिसंयुक्तंरथंसारथिनायुतं तमर्चयेज्जगन्नाथंगृहीत्वाज्ञांगुरोःस्वयं षडक्षरेणमंत्रेणगंधपुष्पाक्षतादि
भिः ॐनमःसूर्यायेतिमंत्रः संपूज्यविधिवद्देवंफलपुष्पादिकंचयत् सूर्यंनिवेदयेत्सर्वंसूर्योमेप्रीयतामिति ततःप्रभातेविम
लेगत्वागुरुगृहंप्रति सर्वोपकरणैःसूर्यमाचार्यायनिवेदयेत् धान्यंपुष्पंफलंवस्त्रंरत्नधेन्वादिकंचयत् गवांकोटिसहस्रंतुकुरु
क्षेत्रेर्कपर्वणि चंपादानस्यराजेंद्रकलांनार्हतिषोडशीं सर्वतीर्थप्रदानानितथान्यान्यपिषोडश चंपयानुलितानीहचंपकात्वतिरि
च्यते इतिश्रीस्कंदपुराणेचंपाषष्ठीव्रतंसंपूर्णम् अथमार्गशीर्षशुक्लचंपाषष्ठी मार्गमासेशुक्लपक्षेषष्ठीवैधृतिसंयुता-
रविवारेणसंयुक्तासाचंपाइतिकीर्तिता इतिमल्लारिमाहात्म्ये मार्गशीर्षेमलेपक्षेषष्ठ्यांवारेंशुमालिनः शततारागतेचंद्रेलिं
गंस्याद्दृष्टिगोचरम् इति इयंयोगविशेषेणपूर्वायोगाभावेपराग्राह्या इतिचंपाषष्ठी अथसप्तमीव्रतानि तत्रवैशाखशु

क्लसप्तम्यांगंगोत्पत्तिः तत्रपूजाचोक्ता पृथिवीचंद्रोदये ब्राह्मे वैशाखशुक्लसप्तम्यांजन्हुनाजान्हवीस्वयं क्रोधात्पीतापुनस्त्यक्ताक
र्णरंध्रात्तुदक्षिणात् तांतत्रपूजयेद्देवींगंगांगगनमेखलाम् इतिहरिवंशेपुण्यकव्रतांते अब्दंप्रातःस्नानमभिधाय गंगायाव्रतक-
थामहायशस्करीउक्ता प्रत्यूषेचसदास्नानंकार्यंमंदाकिनीजले अन्यत्रवाजलेस्नानं शुक्लपक्षेहरिप्रिये एतद्गंगाव्रतंनामसर्वकाम
प्रदंशुभं सप्तसप्तचसप्ताथकुलानिहरिवल्लभे स्त्रीतारयतिधर्मज्ञेगंगाव्रतकचारिणी देयंकुंभसहस्रंतुगंगायाव्रतकेशुभे ता
रणंसिद्धिदंचैवतद्व्रतंसर्वकामिकम् वैशाखेशुक्लपक्षेतुसप्तम्यांपूजयेद्धरिं गंगायांविधिवत्स्नात्वाभोजयेद्ब्राह्मणान्दश पूजये
त्सूक्ष्मवस्त्रैश्चपुष्पस्रक्चंदनैःशुभैः पूजकःसर्वपापेभ्योमुच्यतेनात्रसंशयः इयंचशिष्टाचारात् मध्यान्हव्यापिनीग्राह्या दिन
द्वयेनद्व्याप्तौएकदेशव्याप्तौवापूर्वायुग्मवाक्यात् इतिगंगासप्तमीव्रतं अथशुक्लादिश्रावणकृष्णसप्तम्यांशीतलाव्रतं त
च्चमध्यान्हव्यापिन्यांकार्यं तच्चमाधवीयेहारीतः पूजाव्रतेषुसर्वेषुमध्यान्हव्यापिनीतिथिरिति अथव्रतविधिः मासपक्षा
द्युल्लिख्य ममइहजन्मनिजन्मांतरेच अवैधव्यप्राप्तये अखंडितभर्तृसंयोगपुत्रपौत्रादिधनधान्यप्राप्तयेशीतलाव्रतंकरिष्ये-
तयाचयथामीलितोपचारैःशीतलांपूजयिष्ये तत्रअष्टदलपीठेअव्रणंकलशंसंस्थाप्य तदुपरिसौवर्णींशीतलांपूजयेत् अथध्या
नंस्कांदे वंदेहंशीतलांदेवींरासभस्थांदिगंबराम् मार्जनीकलशोपेतांशूर्पालंकृतमस्तकां कुंभेसंस्थापयेद्देवींपूजयेन्नाममंत्रतः शी
तलेदहमेपापंपुत्रसौख्यफलप्रदे धनधान्यप्रदेदेविपूजांगृण्हनमोस्तुते इतिध्यानम् आवाहनं आसनं पाद्यं विधायशीतला-
कारि अवैधव्यस्कृतप्रदे श्रावणस्यसितेपक्षेअर्घ्यंगृण्हनमोस्तुते अर्घ्यं नाममंत्रेणपूजनीया आचमनं स्नानंवस्त्रं उपव
स्त्रं विलेपनं अलंकारं पुष्पाणि धूपंदीपं शीतलेदंचपक्वान्नंदध्योदनयुतंशुभम् नैवेद्यंगृह्यतांदेविघृतमिश्रंचसुंदरि संपू
ज्यसप्तगौरीश्चभोजयेच्चप्रयत्नतः नैवेद्यं करोद्वर्तनं फलं तांबूलं दक्षिणां नीराजनं पुष्पांजलिं प्रदक्षिणां नमस्कारं व्रत-
संपूर्णफलावाप्तयेब्राह्मणायवायनं तत्रमंत्रः दध्यन्नंदक्षिणायुक्तंवाणकंफलसंयुतम् शीतलाप्रीतयेतुभ्यंब्राह्मणायददाम्य

हं इतिपूजनं अथकथा हेमाद्रौभविष्ये कृष्णउवाच प्रसिद्धंश्रूयतांरम्यंनगरंहस्तिनापुरं इंद्रद्युम्नश्चराजाभून्नृ
पतिर्लोकपालकः धर्मशीलाभिधाचासीत्तस्यभार्यायशस्विनी क्रियाकांडेरतासाध्वीदानशीलाप्रियंवदा बभूवप्रथमःपुत्रोमहाधर्म
तिनामतः नंदनेपितृवात्सल्यात्कालेन्यस्मिन्ततोभवत् द्वितीयाचतथापुत्रीतस्यजातागुणोत्तमा पुत्रीलक्षणसंपन्नाशुभकारीतिना
मतः ववृधेसापितुर्गेहेसर्वांगगुणसुंदरी नाम्नारूपेणसाबालासर्वासांचगुणाधिका सामुद्रिकगुणोपेतापद्महस्ताप्रियंवदा कौं
डिण्यनगरेराजासुमित्रोनामनामतः तत्पुत्रोगुणवान्नामशुभकार्याःपतिर्बभौ वरोदेहेनमानेनलक्ष्मीवान्रूपवान्गुणैः गुण
वान्शुभकारिण्याःपाणिंजग्राहधर्मवित् गृहीत्वापाणिं बर्हाणिगतोसौनगरंप्रति पुनःसमागतोराजागुणवान्हस्तिनापुरं-
आजगामपरिजनैस्तुसुत्र्यानयनोत्सुकः प्रणम्यचपितुःपादौत्वरितंचारुहासिनी आज्ञांदेहिमहाराजश्वशुरस्यगृहंप्रति
हृङ्तंचपितुर्ज्ञात्वामातुस्तुशुभकारिणी रथमारुह्यहे स्वामिन्यास्यामिस्वपुरंप्रति ततःपितातुतस्याथदंपत्योःशुभहेत
वे पुत्रित्वंसुस्थिराभूत्वावारेकंचक्षमस्वमे शीतलासप्तमीनामव्रतंचरशुभप्रदं कन्योवाच तातनत्रपरिज्ञानंयदुक्तं
पद्मयोनिना पतिव्रतासमोधर्मोनास्तीहभुवनत्रये ततस्तांकारयामासशीतलाव्रतमुत्तमम् सौभाग्यारोग्यजनकमवैधव्य
करंपरं पुत्रींचप्रेषयामासब्राह्मणोवेदपारगः व्रतोपकरणंसर्वंगृह्यपूजांसरोवरे मार्गेपद्मानिसंगृह्यव्रतोपकरणंशुभा शीतलापूजनेहे
तोर्गतासाध्वीसरोवरं तत्रादृष्टंतयामोहात्तडागंविधिसाधनम् बभ्रामसावनेशून्येस्मरंतीशीतलाव्रतं अतिश्रांतायर्योमोहात्स्मरंती
शीतलांबहु ददर्शसाततोनारींवृद्धांरूपगुणान्वितां विप्रस्तुस्वपितोमार्गेदृष्टिहीनोमृतस्तदा शुभकारींततोवाक्यंवृद्धाऊचेयश
स्विनी भविष्यतिचिरंजीवीभर्तातेराजकन्यके आगच्छपूजनार्थायदर्शयामिसरोवरं तयासहगतासाध्वीतडागंविधिपूर्वकं पूजयामा
सशर्वाणींतोषयामासशीतलाम् पूजयित्वाचतांदेवींस्वपथ्यंगंतुमुद्यता शीतलायावरंगृह्यसहसख्याचप्रस्थिता ततोसाददृशेरण्येब्राह्मणं
दष्टसर्पकम् भार्यातुतस्यनिकटेब्राह्मणस्यमहात्मनः ब्राह्मणोनिद्रयासुप्तःपूर्वकर्मप्रभावतः दष्टोभुजंगरूपेणकालेनैवहतस्तदा विषेहतंपतिंदृष्ट्वारुरो

द्ब्राह्मणीबहु राजपुत्रीलब्धवराशीतलायाःपतिव्रता वरंसंगृह्यशालायांरुरोदकरुणंबहु तयोस्तरुणदंपत्योर्योग्यसौभाग्यदर्शनात् रुदंतीकरुणंबालाशोचयामासतंवरं यावन्नपरलोकस्थंजनंसंगत्यतत्कृते तावदनेनसहसाअनुगच्छामिवन्हिना तिष्ठतिष्ठक्षणं सुभ्रुगमिष्यामिहिपावकं अर्जयिष्येदिवंदिव्यमक्षय्यंभवनांतरे राजपुत्रीवचःश्रुत्वाब्राह्मण्याः करुणान्विता सस्मारशीतलांदेवींमहावैधव्यभंजनीं आगच्छच्छीतलातत्रवरंदातुंशुचिस्मिता शीतलोवाच वरंवरयवत्सेत्वंकिंदुःखंचारुहासिनि शीतलाव्रतजंपुण्यंदेहित्वंब्राह्मणीशुभा तेनपुण्यप्रभावेनभर्त्तास्यानिर्विषोभवेत् इतिदेव्यावचःश्रुत्वाअददद्ब्राह्मणीततः-बुबोधाशुततोविप्रश्चिरंसुप्तोयथापुनः शीतलायाव्रतेबुद्धिर्ब्राह्मण्याश्चाभवत्तदा अकरोत्सापितत्पूजांभक्तिभावपुरःसरा तत्रांतरेराजपुत्र्यापतिरागाद्वनांतिकं सोपिदष्टोथसर्पेणगच्छंस्त्वग्रेददर्शह विललापततःसाध्वीसख्यासहवनांतरे शीतलोवाच वत्सेमयापूर्वमुक्तंस्मरतद्दूरवर्णिनि शीतलाव्रतचारिण्यावैधव्यंनैवजायते स्वयमुत्थायकल्याणिपतिंसुप्तंगृहेयथा बोधयाशुपतिंभीरुव्रतंवैधव्यनाशनं इत्युक्त्वाबोधयामासभर्तारंसापतिव्रता भर्तापिमुदितोदृष्ट्वास्वांप्रियांप्रीतिकर्मणि दृष्ट्वातुमहदाश्चर्यंतद्ग्रामस्थायिनोजनाः सर्वेतेविस्मयंजग्मुर्ब्राह्मणीपतिरक्षणात् ब्राह्मणींहर्षितांदृष्ट्वाप्रणिपत्यपतिव्रता देहिमातर्नमस्तेस्तुअवैधव्यंवियोगता अन्यापिशीतलायास्तुव्रतंनारीकरिष्यति अवैधव्यमदारिद्र्यमवियोगःस्वभर्तृतः तथेत्यंतर्दधेदेवीशीतलाकामरूपिणी शीतलायावरंलब्ध्वाजगामात्मीयवेश्मनि पद्मानिवासप्रभुविश्ववंद्यसमर्हणासाधितविश्वमंगला प्रसादमासाद्यचशीतलायानित्योत्सवापार्वतिवद्बभूव इतिभविष्येशीतलाव्रतंसंपूर्णं

अथभाद्रशुक्लसप्तम्यांमुक्ताभरणव्रतंहेमाद्रौभविष्ये सामध्यान्हव्यापिनीग्राह्या तद्व्याप्तावव्याप्तौपरा ममइहजन्मनिअखंडितसंततिपुत्रपौत्रवृद्धये मुक्ताभरणव्रतेउमामहेश्वरपूजनंकरिष्ये अथपूजा देवदेवमहेशानपरमात्मन्जगद्गुरो प्रतिपादितयासोमपूजयापूजयाम्यहं आवाहनं अनेकरत्नखचितंसौवर्णमणिसंयुतं मुक्तार्चितंम

हादेवगृहाणासनमुत्तमं आसनं पाद्यंगृहाणदेवेशसर्वविद्यापरायण ध्यानगम्यसतांशंभो सर्वेश्वरनमोस्तुते पाद्यं
इदमर्घ्यमनर्घ्यंत्वममराधीशशंकर किंकरीभूतयासोममयादत्तंगृहाणभोः अर्घ्यं गंगादिसर्वतीर्थेभ्यःसमानीतंसुशीत
लं जलमाचमनीयार्थंगृहाणउमयासह आचमनीयं ध्वजाज्यशर्करामिश्रमधुनापरिकल्पितः शंकरप्रीतयेतुभ्यंमधु
पर्कोनिवेदितः मधुपर्कं पयोदधिघृतंचैवशर्करामधुसंयुतं पंचामृतेनस्नपनंप्रीयतांपरमेश्वरः पंचामृतस्नानं गं
गाचयमुनाचैवगोदावरीसरस्वती नर्मदासिंधुकावेरीस्नानार्थंप्रतिगृह्यतां शुद्धोदकस्नानं स्नानादूर्ध्वंमहादेवप्री
त्यापापप्रणाशन वस्त्रयुग्मंमयादेवगृह्यतांकांतयासह वस्त्रं उपवीतंसोत्तरीयंनानाभूषणभूषितं गृहाणसोमविम
लंमयादत्तमिदंशुभं उपवीतं मलयाचलसंभूतंघनसारंसुगंधियुक् चंदनंपंचवदनगृहाणवनितासह चंदनं जा
तीचंपकपुन्नागबकुलैःपारिजातकैः शतपत्रैश्चकल्हारैरर्चयेहमुमापतिं पुष्पाणि त्रैलोक्यपावनंतेद्यपरमात्मन्-
जगद्गुरो चंदनागरुकर्पूरधूपंदास्यामिशंकर धूपं शुभवर्तियुतंसर्पिर्लोडितंवन्हिनायुतम् दीपमेकमनेकार्कप्रतिमंकल्पय-
त्विमं दीपं पयसापूपकृसरंदुग्धान्नंसगुडोदनं दिव्यान्नंषड्रसोपेतंसुधारससमन्वितं समर्पयामिदेवेशकिंकरीशंकरायते
नैवेद्यं पुनराचमनंशुद्धंकुरुसोमांबुनामुना सुखशुद्धिकरंदेवकृपयात्वंगृहाणभोः आचमनीयं कस्तूरिकासमायुक्तंमल-
याचलसंभवं गृहाणचंदनंसोमकरोद्वर्तनकंशुभम् करोद्वर्तनं नारिकेरफलंजंबूफलंनारिंगमुत्तमं कूष्मांडंपुरतोभक्त्याकल्पि
तंप्रतिगृह्यतां फलंपूगीफलमितितांबूलं हिरण्यगर्भेतिदक्षिणां नीराजनं पुष्पांजलिं प्रदक्षिणां नमस्कारं महादेव महा
राजप्रीत्यापापप्रणाशन अस्माकंकुर्वतांपूजाभवतासाधुयोजिता ज्ञानतोज्ञानतोवापिभवतोविहिताचया संपूर्णासातुविश्वे
शविमलात्वत्प्रसादतः इतिप्रार्थना देवदेवजगन्नाथसर्वसौभाग्यदायक गृण्हीयांदोरकंरूपंपुत्रपौत्रप्रवर्धनं दोरकग्रहणं
सप्तसामोपगीतंत्वांधारयामिजगद्गुरो सूत्रग्रंथिस्थितंनित्यंधारयामिस्थिरोभव इतिदोरकबंधनं हरपापानिसर्वाणितुष्टिं

कुरुदयानिधे प्रसन्नःसन्नुमाकांतदीर्घायुःपुत्रदोभव इतिजीर्णदोरकोत्तारणं अथवायनं मंडकान्सफलान्युक्तान्सघृता
न्दक्षिणायुताम् एकादशशतंकृत्वाब्राह्मणायकुटुंबिने वेदशास्त्रप्रवीणायदद्यात्सोमस्यतुष्टये शंकरःप्रतिगृण्हातिशंकरोवै-
ददातिच शंकरस्तारकोभाभ्यांशंकरायनमोनमः इतिवायनं एवंयापूजनंकुर्यात्सोमस्यसुखदस्यच सर्वान्कामानवा
प्नोतिपुत्रपौत्रैश्चमोदते प्रार्थना इतिपूजा अथकथा श्रीकृष्णउवाच मुनींद्रोलोमशोनाममथुरायांगतःपुरा सो
र्चितोवसुदेवेनदेवक्याचयुधिष्ठिर उपविष्टःकथाःपुण्याःकथयित्वामनोरमाः ततःकथयितुंभूयःकथामेतांप्रचक्रमे कंसेनते
हताःपुत्रा जाताजाताःपुनःपुनः मृतवत्सादेवकित्वंपुत्रदुःखेनदुःखिता यथाचंद्रमुखीदीनाबभूवनहुषप्रिया पश्चाच्चीर्ण
व्रताच्चैवबभूवनत्रवत्सका त्वमपिदेवकितथाभविष्यसिनसंशयः लोमशउवाच अयोध्यायांपुराराजानहुषोनामविश्रु
तः तस्यस्त्रीरूपसंपन्नादेवीचंद्रमुखीप्रिया तथातस्यैवनगरेविष्णुगुप्तोभवद्द्विजः आसीद्गुणवतीतस्यपत्नीभद्रमुखीतथा
तयोरासीदतिप्रीतिःस्पृहणीयापरस्परं अथतेद्वेअपिसख्यौस्नानार्थंशरयूजले मासेमासाश्चतत्रैवबह्व्योवैनगरांगनाः ताः
स्नात्वामंडलंचक्रुस्तन्मध्येव्यक्तरूपिणं लेपयित्वाशिवंशांनसुमयासहशंकरं गंधपुष्पाक्षतैर्भक्त्यापूजयित्वायथाविधि प्रण
म्यगंतुकामास्ताःपप्रच्छतुरुभेस्त्रियौ ताऊचुः अस्माभिःशंकरोदेवःपार्वत्यासहपूजितः बध्वासूत्रमयंतंतुशिवस्यात्मा
निवेदितः धारणीयमिदंतावद्यावत्प्राणविधारणं तासांतद्वचनंश्रुत्वासख्यौतेचापिदेवकि कृत्वाचसमयंतत्रबध्वादोर्भ्यांसु
दोरकम् ततस्ताश्चगृहंजग्मुःस्वसखीभिःसमावृताः कालेनमहतातस्यास्तद्व्रतंविस्मृतंशुभम् चंद्रमुख्याःप्रमत्तायाविस्मृ
तःसतुदोरकः भद्रमुख्यास्तयाभद्रेविस्मृतंसर्वमेवतत् मृताकैश्चिदहोरात्रैःसाबभूवप्लवंगमी भद्राख्याकुक्कुटीजाताव्रतभं
गाच्छुभानने संभूयभूयःसमयंप्राक्व्रतंचक्रतुःसदा कालेनपंचतांप्राप्तेसखीभावात्सहैववने अदेवमातृकेदेशेजातागोकुल
संज्ञके भद्राख्याब्राह्मणीजातायासीच्चंद्रमुखीपरा नाम्नाभद्रमुखीयासाभूषणानामसाभवत् अग्निमीळस्यसादत्तापित्रा

तस्यपुरोधसः अतीववल्लभाचासीद्भूषणाभूषणप्रिया भूषिताभूषणंवरैरूपेणालंकृतास्त्वयं तस्यांबभूवुरष्टौचपुत्राः सर्वगुणान्विताः मातृवद्रूपसंपन्नाः पितृवद्धर्मशालिनः सख्यौतेनेनतद्वच्चजातेजातिस्मरेकिल पुनर्निरंतराप्रीतिस्तयोरासीद्यथापुरा कालेबहुतिथेजातेजातासंत्यक्तयौवना मध्येवयसिराज्ञीसापुत्रमेकमजीजनत् ईश्वरीरोगिणंमूकंप्रज्ञाहीनंचविस्वरम् नादृशोपिमहाभागेमृतोसौनववार्षिकः ततस्तांभूषणांद्रष्टुमीश्वरींपुत्रदुःखितां सखीभावादतिस्नेहात्पुत्रैःस्वैःपरिवारिता अमुक्ताभरणाभद्रास्वरूपेणैवभूषिता साहिभद्राद्विजस्याभूद्भार्याभूषणनामिका पुराहितस्याःकालेनकुक्कुटीबहुपुत्रिणी तांदृष्ट्वातादृशींभव्यांप्रजज्वालेश्वरीरुषा ततोगृहंप्रेषयित्वाब्राह्मणींतीव्रमत्सराम् चिंतयामाससाशीघ्रंतस्याःपुत्रवधंप्रति निश्चित्यचेतसाक्रूराघातयामासतत्सुतान् हताहताश्चतेपुत्राःपुनर्जीवंत्यनामयाः तदद्भुततरंदृष्ट्वासखीमाहूयभूषणां उपविश्यासनेश्रेष्ठेबहुमानपुरःसरं अपृच्छद्विस्मयाविष्टाराज्ञीसानृपवल्लभा ब्रूहितथ्यंमहाभागेकिंत्वयासुकृतंकृतम् दानंव्रतंतपोवापिशुश्रूषणमुपोषणं येनतेनिहताःपुत्राःपुनर्जीवंत्यनामयाः तथाहिबहुपुत्राचजीवद्वत्साशुभानना अमुक्ताभरणानित्यंभर्तुश्चेतस्यवस्थिता अतीवशोभसेभद्रेविद्युदेवयथांबरे भूषणोवाच शृणुदेविप्रवक्ष्यामिजन्मांतरविचेष्टितं किंतद्धिविस्मृतंसर्वंमयोध्यायांकृतंहियत् आवाभ्यांव्रतवैकल्यंप्रमत्ताभ्यांवरानने येनत्वंप्लवगीजाता-जाताहंकुक्कुटीतथा तथापिव्रतवैकल्यंत्वयाचापल्यतःकृतं मयातुसर्वभावेनचेतसाध्यायशंकरं तिर्यग्योन्यनुसारेण मनोवृत्त्याह्यनुष्ठितं एतद्धिकारणंभद्रेनान्यत्किंचित्करोम्यहं लोमशउवाच इत्याकर्ण्यवचःस्मृत्वापूर्वजन्मविचेष्टितं ईश्वरीचतयासार्द्धंपुनःसम्यक्चकारह व्रतस्यास्यप्रभावेनपुत्रपौत्रादिसंभवम् भुक्त्वातुसौख्यमतुलंमृता-शिवपुरंगता तस्मात्त्वपिकल्याणिव्रतमेतत्समाचर आरब्धेस्मिन्व्रतेदिव्येजीवत्पुत्राभविष्यसि देवक्युवाच ब्रह्मन्नाख्याहिमेसम्यक्व्रतमेतत्सुखप्रदं संतानवृद्धिकरणंशिवलोकस्थितिप्रदं लोमशउवाच भद्रेभाद्रपदेमा

सिसप्तम्यांसलिलाशये स्नात्वाशिवंमंडलकेलेखयित्वासहांबिकां तत्रसंपूज्यसमयंकुर्याद्बध्वाकरेगुणं यावज्जीवंमया-
त्मातुशिवस्यविनिवेदितः इत्येवंसमयंकृत्वाततःप्रभृतिदोरकं सौवर्णराजतंवापिसूत्रंवाधारयेत्करे मंडकान्वेष्टितान्दद्यान्मासेप
क्षेथवाब्दके स्वयंतांश्चैवभुंजीतव्रतभंगभयाच्छुभे प्रतिमासंतुसप्तम्यांशुक्लपक्षेविशेषतः कुर्यादेवंव्रतंभद्रेवर्षांतेपितुदे
वकि कारितामुद्रिकाशैवीहैमीरूप्यास्वशक्तितः ताम्रपात्रोपरिस्थाप्यब्राह्मणायनिवेदयेत् आचार्यायविशेषेणसुवर्णस्यांगु
लीयकं पुष्पंकुसुमसंयुक्तंतांबूलांजनसूत्रकैः सहार्थैतृतीया एवंतत्कारयित्वातुव्रतंसंततिवर्धनं सर्वपापविनिर्मुक्तंभुक्त्वा
सौख्यमनामयम् संतानंवर्धयित्वाचशिवलोकेमहीयते एतत्तेसर्वमाख्यानमाख्यातंव्रतमुत्तमं कुरुदेवकियत्नेनजीवत्पुत्राभ
विष्यसि कृष्णउवाच इत्युक्त्वातुमुनिश्रेष्ठस्तत्रैवांतरधीयत चकारसर्वंयत्नेनयदुक्तंतेनधीमता व्रतस्यास्यप्रभावेणदेवकी
मामजीजनत् तस्मात्पार्थनरैःकार्यंस्त्रीभिःकार्यंविशेषतः व्रतंपापप्रशमनंसुखसंततिवर्धनं एवंयःशृणुयाद्भक्त्यायश्चैतत्प्र
तिपादयेत् व्रतमाख्यानसहितंसोपिपापैःप्रमुच्यते आख्यानकंव्रतमिदंसुखसौख्यकामायास्त्रीकरिष्यतिशिवंहृदयेनिधाय
दुःखंविहायबहुशोगतकल्मषौघासास्त्रीव्रताद्भवतिशोभनजीववत्सा इतिहेमाद्रौभविष्येमुक्ताभरणसप्तमीव्रतंसंपूर्ण
म् अथआश्विनशुक्लसप्तम्यांसरस्वतीपूजासाउदयव्यापिनीग्राह्या युगाद्यावर्षवृद्धिश्चसप्तमीपार्वतीप्रिया रवेरुदय
मीक्षंतेतत्रतासुतिथियुग्मके प्रतापमार्तंडेभविष्योक्तेः वर्षवृद्धिर्जन्मतिथिः तत्रैवमूलनक्षत्रेपुस्तकस्थापनमुक्तं रुद्रयामले
मूलऋक्षेसुधाधीशपूजनीयासरस्वती पूजयेत्प्रत्यहंयावत्श्रवणांतेविसर्जयेत् नाध्यापयेन्नचलिखेन्नाधीयीतकदाचन
पुस्तकेस्थापितेदेव्याविद्याकामोद्विजोत्तमः अहंभद्राचभद्राहंनावयोरंतरंक्वचित् सर्वसिद्धिंप्रदास्यामिभद्रायांह्यर्चितास्म्यहं आ
श्विनस्यसितेपक्षेमेधानामसरस्वती मूलेनावाहयेद्देवींश्रवणेनविसर्जयेत् इतिसरस्वतिपूजनम् अथरथसप्तमीव्रतं
अस्यांस्नानविधिः तच्चअरुणोदयव्यापिन्यांकार्यं तदुक्तंमदनरत्नेस्मृतिसंग्रहे सूर्यग्रहणतुल्यासाशुक्लामाघस्यसप्तमी अरु

णोदयवेलायांस्नानंतत्रमहाफलं माघेमासिसितेपक्षेसप्तमीकोटिपुण्यदा कुर्यात्स्नानार्घ्यदानाभ्यामायुरारोग्यसंपदः दि
नद्वये अरुणोदयव्यापित्वेपूर्वैव सौवर्णेराजतेताम्रेभक्त्यालाबुमयेनथा तैलेनवर्तिर्दानव्यामहापात्रेतुरंजिता समाहितम
नाभूत्वादीपंशिरसिधारयेत् भास्करंहृदयेध्यात्वाइमंमंत्रमुदीरयेत् नमस्तेरुद्ररूपायरसानांपतयेनमः अरुणारुणनमस्ते
स्तुहरिदश्वनमोस्तुते जलोपरिदीपांस्त्यक्त्वासंतर्प्यपितृदेवताः लोलार्करथसप्तम्यांस्नात्वागंगादिसंगमे सप्तजन्मकृतैःपा
पैर्मुक्तोभवतितत्क्षणात् इतिगर्गः षष्ठीसप्तमियोगेवारथारूढांशुमालिनः योगोयंपद्मकोनामसहस्रार्कग्रहैःसमः एत
च्चस्नानंतिथ्यादिस्मरणानंतरंशिष्टाचारात् सप्तार्कपर्णानिसप्तबदरीपत्राणिशिरसिनिधाय तत्रमंत्रः यद्यज्जन्मकृतं
पापंमयासप्तसुजन्मसु तन्मेरोगंचशोकंचमाकरीहंतुसप्तमी स्नानानंतरमर्घ्यंचदानव्यंमंत्रपूर्वकम् सप्तसप्तावहप्रीत
सप्तलोकप्रदीपन सप्तम्यासहितोदेवगृहाणार्घ्यंदिवाकर अर्घ्यं जननीसर्वभूतानांसप्तमीसप्तसप्तिके सप्तव्याहृतिके
देविनमस्तेसूर्यमंडले प्रार्थना इतिस्नानविधिः अनेनैवतुमंत्रेणपूजयेच्चदिवाकरं कृत्वाषोडशधाराजन्सप्ताश्वरथ
मंडले अथकथा युधिष्ठिरउवाच कथंसाक्रियतेकृष्णमनुष्यैरथसप्तमी चक्रवर्तित्वफलदायाहिख्यातात्वयामम
कृष्णउवाच आसीत्कांबोजविषयेयशोवर्मानराधिपः वृद्धेवयसितस्यासीत्सर्वव्याधियुतःसुतः तत्कर्मपापंसोपृच्छद्दि
नीतंद्विजपुंगवम् सप्राहराजन्वैश्योयंकृपणःपूर्वजन्मनि ददर्शरथसप्तम्याःक्रियमाणंव्रतंनृप व्रतदर्शनमाहात्म्यादुत्पन्नो
जठरेतव अदाताविभवेयस्मात्तस्मात्सव्याधितोभवत् ततःसराजापप्रच्छकिमेतस्यविधीयतां यस्यसंदर्शनात्प्राप्तोलोभी
स्थानमनुत्तमम् ब्राह्मणउवाच तदेवक्रियतांराजन्रथसप्तमिसंज्ञितम् व्रतंपापहरंयेनचक्रवर्तित्वमाप्यते राजोवा
च ब्रूहिविप्रव्रतंकृत्स्नंसविधानंसमंत्रकं रोगिणांचदरिद्राणांसर्वसंपत्प्रदायकं द्विजउवाच शुक्लपक्षेतुमाघस्य
षष्ठ्यामामंत्रयेद्गृही स्नानंशुक्लतिलैःकार्यंनद्यादौविमलेजले वापीकूपतडागेषुविधिवद्धूर्णधर्मतः देवादीन्पूजयित्वातुग

त्वासूर्यालयंगतः सूर्यंपूज्यनमस्कृत्यपुष्पधूपाक्षतैःशुभैः आगत्यभुवनंपश्चात्पंचयज्ञांश्चनिर्वपेत् संभोज्यातिथिभृत्यांश्चबा
लकानाश्रितान्स्वयं विद्यमानेदिनेश्नीयात् वाग्यतस्तैलवर्जितं रात्रौविप्रान्समाहूयसर्वज्ञान्वेदपारगान् संपूज्यनियमंकुर्या-
त्सूर्यमाधायचेतसि सप्तम्यांतुनिराहारोभुक्त्वाभोगविवर्जितः भोक्ष्येष्टम्यांजगन्नाथनिर्विघ्नंतत्रमेकुरु इत्युच्चार्यनृपश्रेष्ठतोयं
तोयेषुनिक्षिपेत् ततोविसृज्यतंविप्रंस्वपेद्भूमौजितेंद्रियः ततःप्रातःसमुत्थायकृत्वाशौचंशुचिर्नरः कारयित्वारथंदिव्यंकिंकिणी
जालमालिनम् सर्वोपस्करसंयुक्तंरत्नैःसर्वांगचित्रितं कांचनंराजतंवाथहयसारथिसंयुतं ततोमध्याह्नसमयेकृतस्नानादि-
कोव्रती अतिर्यग्वीक्षमाणस्तुपाखंडालापवर्जितः सौरसूक्तंजपेत्प्राज्ञआगच्छेत्स्वमालयम् निवृत्तनित्यकार्यस्तुकृत्वाब्रा
ह्मणवाचनं वस्त्रमंडपिकामध्येस्थापयेत्तंरथोत्तमं कुंकुमेनसुगंधेनचर्चयित्वासमंततः मालाभिःपुष्पदीपैश्चसमंतात्परिवे
ष्टयेत् धूपेनागरुमिश्रेणधूपयित्वाततोपरि रथस्थंपूजयेद्भानुंसर्वसंपूर्णलक्षणं वित्तानुसारंहैमंचवित्तशाठ्यविवर्जितः शा
ठ्याद्व्रजतिवैकल्यंवैकल्याद्धिफलंभवेत् ततोदेवंसमभ्यर्च्यसरथंसहसारथिं पुष्पैर्धूपैस्तथागंधैर्वस्त्रालंकारभूषणैः फ
लैर्नानाविधैर्भक्ष्यैर्नैवेद्यैर्घृतपाचितैः पूजयेद्भास्करंभक्त्यामंत्रैरेभिस्त्रिभिःक्रमात् भानोदिवाकरादित्यमार्तंडजगतांप
ते अपांनिधेजगद्रक्षभूतभावनभास्कर प्रणतार्तिहराचिंत्यविश्वचिंतामणेविभो विष्णोहंसादिभूतेशआदिमध्यांतभा
स्कर भक्तिहीनंक्रियाहीनंमंत्रहीनंजगत्पते प्रसादात्तवसंपूर्णमर्चनंयदिहास्तुमे एवंसंपूज्यदेवेशंप्रार्थयेत्स्वमनोगतं द
दातिप्रार्थितंभानुर्भक्त्यासंतोषितोनरैः वित्तहीनोपिविधिनासर्वमेतत्प्रकल्पयेत् रथंससारथिंसाश्वंवर्णकैर्भिन्नलेखितं
सौवर्णंचतथाभानुंयथाशक्त्याविनिर्मितं प्रागुक्तेनविधानेनपूजयित्वासुविस्तरं जागरंकारयेद्रात्रौगीतवादित्रनिस्वनैः प्रे
क्षणीयैर्विचित्रैश्चपुण्याख्यानकथादिभिः रथयात्रांप्रपश्येतभानोरायतनंश्रिया अनिमीलितनेत्रस्तुनयेत्तांरजनींबु
धः प्रभातेविमलेस्नात्वाकृतकृत्यस्ततोद्विजान् तर्पयेद्विविधैरत्नैर्दानैर्वासोविभूषणैः अश्वमेधेनतुल्यंतदिदंब्रह्मविदोविदुः

अतोदेयानिदानानियथाशक्त्याविचक्षणैः रथस्तुगुरुवेदेयोयथोपस्करसंयुतः सरक्तवस्त्रयुगुलोरक्तधेनुसमन्वितः एवंचीर्णव्रतोराजन्किंनाप्नोतिजगत्त्रये तस्मात्सर्वप्रयत्नेनकुरुत्वंरथसप्तमीं येनारोग्योभवेत्पुत्रस्त्वदीयोनृपसत्तम व्रतस्यास्यप्रभावेन प्रसादाद्भास्करस्यच भविष्यतिमहातेजामहाबलपराक्रमः भोगान्सविपुलान्राजन्भुंक्तेराज्यमकंटकं दत्वासौरथसप्तम्यांजायतेमानवोत्तमः लभतेपुत्रपौत्रांश्चसूर्यलोकंसपश्यति तत्रस्थित्वाकल्पमेकंचक्रवर्तीभविष्यति कृष्णउवाच इतिसर्वंसमाख्यायतपोयुक्तोद्विजोत्तमः यथागतंजगामासौनृपःसर्वंचकारह यथादिष्टंद्विजेंद्रेणतत्तत्सर्वंबभूवह एवंसचक्रवर्तित्वंप्राप्तवान्नृपनंदनः श्रूयतेयस्तुमांधातापुराणेषुपरंतपः यइदंशृणुयाद्भक्त्याश्रावयेच्चयथाविधि तस्यैवतुष्यतेभानुर्यच्छत्येवापिसंपदः एवंविधंरथवरंरथवाजियुक्तंहैमंचहैमशतदीधितिनासमेतं दद्याच्चमाघसितसप्तमिवासरेयोससर्वंचक्रगतिरेवमहींभुनक्ति इतिरथस॰ माप्ता अत्रैवअचलास॰ व्रतं युधिष्ठिरउवाच कथंस्त्रियःसुरूपाःस्युःसुभगाःसुप्रजास्तथा पुण्यस्यमहतश्चात्रसर्वमेतत्फलंयतः अल्पायासेनसुमहद्येनपुण्यमवाप्यते कथयस्वप्रसादेनयेनश्रेयोभविष्यति श्रीकृष्णउवाच श्रूयतांभरतश्रेष्ठरहस्यंमुनिभाषितं यन्मयाकस्यचिन्नोक्तमचलासप्तमीव्रतं वेश्याचेंदुमतीनामरूपौदार्यगुणान्विता आसीत्कुरुकुलश्रेष्ठसगरस्यविलासिनी सावसिष्ठाश्रमंपुण्यंजगामगजगामिनी वसिष्ठमृषिमासीनंप्रणम्यानतकंधरा कृतांजलिपुटाभूत्वाप्राहेदंजगतोहितंमयानदत्तंनकृतंनोपवासकृतव्रतं भक्त्यासंपूजितःशंभुःस्वामिन्शार्ङ्गधरोनच सांप्रतंतप्यमानायाव्रतंकिंचिद्वदस्वमे येनदुःखात्तुपापौघाद्दुस्तराभिभवार्णवात् एतत्तस्याःसुबहुंचश्रुत्वातिकरुणंवचः कारुण्यात्कथयामासवसिष्ठोमुनिपुंगवः माघस्यसितसप्तम्यांसर्वकामफलप्रदं रूपसौभाग्यजननंस्नानंकुरुवरानने कृत्वाषष्ठ्यामेकभक्तंसप्तम्यांनिश्चलंजलं रात्र्यंतेचालयेथास्त्वंदत्वाशिरसिदीपकं माघस्यसितसप्तम्यामचलंचालितंचयत् जलामलानांसर्वेषांस्नानंप्रक्षालनंततः वसिष्ठवचनंश्रुत्वातस्मिन्नहनिभारत चकारेंदुमतीस्नानंदानंसम्यग्यथाविधि स्नानस्यास्यप्रभावेनमुक्ताभो

गान्यथेप्सितान् इंद्रलोकेप्सरोमध्येनायकत्वमवाप्स्यसि अचलासप्तमीस्नानंकथितंतेविशांपते सर्वपापप्रशमनंसर्वसौभाग्यवर्ध
नं युधिष्ठिरउ॰ सप्तमीस्नानमाहात्म्यंश्रुतंनीरविशेषतः सांप्रतंश्रोतुमिच्छामिविधिमंत्रसमन्वितं श्रीकृष्णउ॰ एकभक्तेन
संतिष्ठेत्षष्ठ्यांसंपूज्यभास्करं सप्तम्यांतुव्रजेत्प्रातः सुगंभीरंजलाशयं सरित्सरस्तडागंवादेवखातमथापिवा सुखावगाहंस
त्वेष्टंदुष्टसत्वैरदूषितं व्यालांबुपक्षिभिश्चैवजलगैर्मत्स्यकच्छपैः नकेनचाल्पतेयावत्तावत्स्नानंसमाचरेत् सौवर्णेराजतेपात्रेभक्त्या
लांबुमयेथवा तैलस्यवर्तिर्दीनव्यामहारजतरंजिता महारजतंकुसुंभम् समाहितमनाभूत्वादत्वाशिरसिदीपकं भास्करं
हृदयेध्यात्वाइमंमंत्रमुदीरयेत् नमस्तेरुद्ररूपायरसानांपतयेनमः वरुणायनमस्तेस्तुहरिवासनमोस्तुते जलोपरिहरेद्दीपं
स्नात्वासंतर्प्यदेवताः चंदनेनलिखेत्पद्ममष्टपत्रंसकर्णिकं मध्येशिवंसपत्नीकंप्रणवेनचसंयुतम् शाक्रेदलेरविःपूज्योभानुश्चै
वानलेनया याम्येविवस्वान्नैर्ऋत्येभास्करंपूजयेत्ततः पश्चिमेसवितापूज्यः पूज्योर्कश्चानिलेदले सौम्येसहस्रकिरणःशैवे
सर्वात्मकोनृप पूज्याःप्रणवपूर्वास्तुनमस्कारांतयोजिताः पुष्पैःसुगंधधूपैश्चपृथक्त्वेनयुधिष्ठिर विसृज्यवस्त्रसंवीतंस्वस्था
नंगम्यतामिति विसर्जितेसहस्रांशौसमागम्यस्वमालयम् ताम्रपात्रेथवाशक्त्यामृन्मयेवाथभक्तिमान् स्थापयेत्तिलपिष्टं
चसघृतंसगुडंनया कांचनंतालकंकृत्वाअशक्त्यातिलपिष्टजम् संस्थाप्यरक्तवस्त्रेणपुष्पैर्धूपैरथार्चयेत् ततस्तंचालयेद्द्विजे
र्द्यान्मंत्रेणतालकं आदित्यस्यप्रसादेनप्रातःस्नानफलेनच दुष्टदौर्भाग्यदुःखघ्नंमयादत्तंतुतालकम् तालकंतालकपत्रं
पूजयित्वोपदेष्टारंविप्रानन्यांश्चपूजयेत् ततोदिनंसमग्रंचसनरोध्यानतत्परः भास्करस्यकथाःशृण्वन्ननन्याश्चापिसंहिताः
पाखंडादिभिरालापदर्शनस्पर्शनादिकं वर्जयेत्स्वपयेत्प्राज्ञस्ततोबंधुजनैःसह एतत्तेकथितंपार्थरूपसौभाग्यकारकम् अच
लासप्तमीस्नानंसर्वकामफलप्रदं इतिपठतिसमग्रंयःशृणोतिप्रसंगात्कलिकलुषविनाशंसप्तमीस्नानमेतत् मतिमपिजनानांयो
ददातिप्रयत्नात्सुरसदनगतोसौसेव्यतेचाप्सरोभिः इतिअचलासप्तमीव्रतकथासमाप्ता अस्यामेवपुत्रसप्तमीव्रतम्

मदनरत्नेआदित्यपुराणे आदित्यउवाच माघमासेतुशुक्लायांसप्तम्यांसमुपोषितः यःपूजयेतमांभक्त्यातस्याहंपुत्रतांव्रजे
एवंचोभयसप्तम्यांमासिमासिसुरोत्तम यस्तुमांपूजयेद्भक्त्यासमेकमेकमादरात् समेकःसंवत्सरः प्रयच्छामिसुतंतस्यआ
त्मनोह्यंगसंभवम् वित्तंयशस्तथापुत्रमारोग्यंपरमंसदा माघमासेतुयोविप्रःशुक्लपक्षेजितेंद्रियः पाखंडान्पतितानंत्यान्नजल्पे
द्द्विजितेंद्रियः उपोष्यविधिवत्षष्ठ्यांश्वेतमाल्यविलेपनैः पूजयित्वातुमांभक्त्यानिशिभूमौस्वपेद्बुधः प्रातरुत्थायसप्तम्यांकृत्वा
स्नानादिकाःक्रियाः पूजयित्वातुमांब्रह्मन्वीरहोमंसमाचरेत् वीरहोमंनामअग्निहोत्रहोमः प्रीणयित्वाहरिंभक्त्याहविषापद्म
लोचनं हरिःआदित्यः दध्योदनेनपयसापायसेनद्विजांस्तथा तस्यैवकृष्णपक्षस्यषष्ठ्यांसम्यगुपोषितः तस्यैवेतिमाघमासस्य
रक्तोत्पलैःस्रगंधाढ्यैरक्तपुष्पैश्चपूजयेत् एवंयःपूजयेद्भक्त्यानरोमांविधिवत्सदा उभयोरपिदेवेंद्रसपुत्रंलभतेवरं इतिपुत्रसप्त
मीव्रतंसंपूर्णम् अथाष्टमीव्रतानिलिख्यंते चैत्रशुक्लाष्टम्यांभवान्युत्पत्तिः तत्रयुग्मवाक्यात्पराग्राह्या अथभवानीयात्रो
क्ताकाशीखंडे भवानींयस्तुपश्येतशुक्लाष्टम्यांमधौनरः नजातुशोकंलभतेसदानंदमयोभवेत् अशोककलिकाश्चाष्टौयेपि
बंतिपुनर्वसौ चैत्रेमासिसिताष्टम्यांनतेशोकमवाप्नुयुः त्वामशोकहराभीष्टमधुमाससमुद्भवम् पिबामिशोकसंतप्तोमामशो
कंसदाकुरु पुनर्वसुबुधोपेताचैत्रेमासिसिताष्टमी प्रातस्तुविधिवत्स्नात्वावाजपेयफलंलभेत् चैत्रेमासिचसंध्यायांप्रसु
प्तेचजनार्दने बुधाष्टमीनकर्तव्याहंतिपुण्यंपुराकृतं तच्चबुधवारयुक्तायांशुक्लाष्टम्यांबुधाष्टमीव्रतं शुक्लपक्षेष्टमीचैवशुक्ल
पक्षेचतुर्दशी पूर्वविद्धानकर्तव्याकर्तव्यापरसंयुता दिनद्वयेतद्व्याप्तावव्याप्तौवापूर्वा मुहूर्तमात्रसत्वेपिपरा अत्रव्रतविधिः
मासपक्षाद्युल्लिख्य ममइहजन्मनिजन्मांतरेवाबाल्याद्यारभ्यकर्मणामनसावाचाजानताजानतावापरस्वाद्यपहृतिदोषप-
रिहारार्थंपुत्रपौत्रादिसकलमनोरथसिद्धिप्राप्त्यर्थंश्रीपरमेश्वरप्रीत्यर्थंबुधाष्टमीव्रतमहंकरिष्ये बुधंषोडशोपचारैःकलशो
परिपूजयेत् चतुर्बाहुंग्रहपतिंसुप्रसन्नसुखंबुधं ध्यायेहंशंखचक्रासिपाशहस्तमिलाप्रियं ध्यानं पीनमाल्यांबरधरकर्णि

कारसमद्युने गृहाणपूजांभगवन्समागत्यग्रहेश्वर आवाहनं उद्बुध्यध्वमितिऋचंपठेत् मध्येबुधंआवाहयामि अधिदेवतांविष्णुमिदंविष्णुरितिमंत्रेणप्रत्यधिदेवतांनारायणंसहस्रशीर्षेतिसूक्तेनावाह्य इलापतेनमस्तेस्तुनिशेशप्रियसूनवे हेमसिंहासनं देवगृहाणप्रीतयेमम आसनं शीतलोदकमानीतंसुपुष्पसरिदुद्भवं पाद्यंगृहाणदेवेशममाद्यपरितुष्टये पाद्यंसम॰ तारासुतनमस्तेस्तुसततंभगवत्प्रिय गृहाणार्घ्यंगृहपतेनानाफलसमन्वितम् अर्घ्यं॰ सुगंधद्रव्यसंयुक्तैःशुद्धैःस्वादुसरिज्जलैः आचम्यतांनिशानाथनंदनप्रीतयेमम आचमनं॰ पयोदधिघृतैश्चैवमधुशर्करसंयुतैः पंचामृतैस्तथादेवस्नानंतत्त्वंकुरुप्रभो पंचामृतं· वासितंगंधकर्पूरैर्निर्मलंजलमुत्तमम् स्नानायतेमयाभक्त्यादीयतेव्रतसिद्धये अतोदेवादिकैःषड्भिःस्नापनीयस्ततोबुधः पौरुषेणचसूक्तेनउद्बुध्यस्वेत्यृचैकया स्नानं पीतवस्त्रद्वयंदेवराजवंशकरप्रभो उर्वशीनाथजनकगृहाणप्रीतयेसदा वस्त्रं यज्ञोपवीतकंसूत्रंत्रिगुणंत्रिदशप्रिय ममपापविनाशार्थंगृहाणप्रीतयेबुध उपवीतं हरिच्चंदनकस्तूरीकर्पूरादिसमन्वितं गंधं भगवतेतुभ्यमिलानाथनमोस्तुते गंधंस॰ अक्षतांश्च॰ अक्षता· माल्यादीनिसु॰ पुष्पाणि अथांगपूजा बुधायनमः पादौपूजयामि सोमपुत्राय॰ जानुनीपू॰ तारकाय॰ कटीपू॰ राजपुत्राय॰ उदरंपू॰ इलाप्रिया॰ हृदयंपू॰ कुमाराय॰ वक्षस्थलंपू॰ पुरूरवःपित्रेन॰ बाहूपू॰ सोमसुताय॰ स्कंधौपू॰ पीतवर्णाय॰ सुखं॰ ज्ञानाय॰ नेत्रेपू॰ बुधाय॰ मूर्धानंपू॰ सोमसूनवेनमः सर्वांगंपूजयामि वनस्पतिरसो॰ धूपं॰ आज्यंचेति दीपं॰ नैवेद्यंगृ॰ नैवेद्यं॰ पूगीफलमितितांबूलं इदंफलमितिफलं हिरण्यगर्भेतिदक्षिणां नीराजनदीपं उद्बुध्यध्वमिति पुष्पांजलिं उर्वश्याश्चपतिर्यस्तुयःपुरूरवसःपिता ग्रहमध्येसुरूपोयोबुधोनःसंप्रसीदतु विशेषार्घ्यं· यानिकानिचेतिप्रदक्षिणां नमस्कारं· आवाहनंनजानामि॰ प्रार्थना॰ संतुष्टोवायनादस्मादिलानाथोग्रहेश्वरः सतांबूलाष्टलड्डुकंवायनंप्रतिगृह्यतां वायनं· इतिपूजनं· अथकथा श्रीकृष्णउवाच

बुधाष्टमीव्रतंभूपवक्ष्यामिशृणुपांडव येनचीर्णेननरकंनरःपश्यतिन क्वचित् युधिष्ठिरउवाच बुधाष्टमीव्रतंकिंतत्क

स्मात्सापात्त्वमुंचति तत्सर्वंप्रद्निश्चित्यममदेवदयानिधे श्रीकृष्णउवाच पुराकृतयुगस्यादौइलोराजाबभूवह बहुभृत्यसुहृन्मित्रैर्मंत्रिभिः परिवारितः जगामहिमवत्पार्श्वंमहादेवेनशापितं योस्यांप्रविशतेभूमौसस्त्रीभवतिनिश्चितं सराजामृगयासक्तःप्रविष्टस्तद्वनं एकाकीहयमारूढःक्षणात्स्त्रीत्वंजगामह साबभ्रामवनेशून्येपीनोन्नतपयोधरा काहंकस्यकुतःप्राप्तानसाबुध्यतकिंचन तांददर्शबुधस्तन्वींरूपौदार्यगुणान्वितां अष्टम्यांबुधवारेचतस्यास्तुष्टोबुधग्रहः ददौ गृहाश्रमंरम्यमात्मीयंरूपतोषितः पुत्रमुत्पादयामासयोसौख्यातःपुरूरवाः चंद्रवंशकरोराजाआद्यःसर्वमहीभृतां ततःप्रभृतिपूज्येयंसाष्टमीबुधसंयुता सर्वपापप्रशमनीसर्वोपद्रवनाशिनी अथान्यदपितेवच्मिधर्मराजकथानकं कृष्णउवाच आसीद्राजाविदेहायांनिमिर्नामसवैरिभिः संग्रामेनिहतोराजातस्यभार्यातिनिर्धना उर्मिलानामबभ्राममहीं बालकसंयुता अवंतिनगरंप्राप्यब्राह्मणस्यनिकेतने चकारोदरपूर्त्यर्थंनित्यंकंडनपेषणे हृत्वासासप्तगोधूमान्ददौबालकयोस्तदा कारुण्यात्पुत्रवात्सल्यात्क्षुधासंपीड्यमानयोः कालेनबहुनासाध्वीपंचत्वमगमत्तदा पुत्रस्तस्याविदेहायांगत्वास्वपितुराश्रमे उपविष्टःसत्ययोगाद्बुभुजेगामनाकुलां अन्विष्यधर्मराजेनसाकन्यानिमिवंशजा शामलानामचार्वंगीसर्वलक्षणसंयुता गांधर्वेणोपयित्वाचनीतास्वनगरंप्रति तामुवाचवरारोहांधर्मराजःस्वकांप्रियां वहस्वसर्वव्यापारंश्यामलेत्वंगृहेमम कुरुष्वसर्वभृत्यानांदानशिक्षांयथोचिताम् किंत्वेतेप्रवराःसप्तकीलकैर्नियंत्रिताः कदाचिदपिनोद्घाट्यास्त्वयावैदेहिनंदिनि एवमस्त्विति वैप्रोक्तानिजकर्मचकारह ततोभुक्त्वाबुधस्याग्रेबांधवैःप्रीतिपूर्वकं तावदेवहिभोक्तव्यंयावत्साकथ्यतेकथा कदाचिद्व्याकुलीभूत्वाधर्मराजविदेहजा उद्घाटयित्वाप्रवरंददर्शजननींस्वकां पच्यमानांचरुदतींभीषणैर्यमकिंकरैः लौल्याक्षिप्यतेबध्वातप्ततैलेषुसापुनः तथैवतलकांबध्वापीडितासामनस्विनी द्वितीयेनरकेतद्वत्तांददर्शस्वमातरं यंत्रेनिष्पीड्यमानासाशिलायांलोष्टकेनच तृतीयेप्रवरेतद्वत्तामेवचददर्शसा करिभिःपीड्यमानासाघंटायुक्तैश्चकल्पि

तैःश्वभिश्चतुर्थेप्रवरेभीषणैर्दारुणाननैः अभक्ष्यभक्षणाद्यैश्चक्रंदतींतांपुनःपुनः पंचमेप्रवरेभूमौकंठेपादेनताडितां संदं-
शैर्धनपातैश्चच्छिद्यमानांसहस्रशः षष्ठेतामिक्षुयंत्रस्थांमस्तकेमुद्गरा हतां संपीड्यमानामनिशंक्रभृशंदारुखंडवत् स-
सप्तमेप्रवरेचैवक्रमिरूपैःसुदारुणैः दृष्ट्वातथागतांतांतुमातरंदुःखकर्षितां श्यामलाम्लानवदनाकिंचिन्नोवाचभामिनी कि-
मर्थंम्लानवदनानिश्वसित्वमनिंदिते कारणंतन्ममेब्रूहिकिंचिन्नोह्लादितास्त्वया एतेप्रवरकाःसप्तनिषिद्धायेपुरामया इत्यु-
क्ताश्यामलाप्राहभर्त्तारंविनयान्विता किंनुपापंकृतंराजन्मममात्रासुदारुणं येनेत्थंविविधैर्घोरैर्बाध्यतेबहुशस्त्वया इ-
त्युक्तःप्रिययाप्राहतांयमःप्रहसन्निव तवमात्रासुतस्नेहाद्गोधूमावैहृताःकिल किंनजानासितद्देयेनपृच्छसिमामिह ब्र-
ह्मस्वंप्रणयाद्भुक्तंदहत्यासप्तमंकुलं तदेवकृमिरूपेणक्लिश्नात्यासप्तमंकुलं गोधूमास्तइमेभूत्वाकृमिरूपाःसुदारुणाःये
पुराब्राह्मणगृहेहृतास्तेत्वत्कृतेतयाजानाम्येतदहंसर्वंयत्तेमात्राकृतंपुरा श्यामलोवाच तथापित्वांसमासाद्यदेवंजामा-
तरंविभुं मुच्यतेतेनपापेनयथात्वमधुनाकुरु तच्छ्रुत्वाचिंतयाविष्टश्चिरंध्यात्वाजगादतां धर्मराजःसुखासीनःप्रियांप्रा-
णहरेश्वरीं इतस्त्वंसप्तमेतीतेजन्मनिब्राह्मणीशुभा आसीत्तस्मिन्तदासंगात्सखीनांपर्युपोषिता बुधाष्टमीतुसंपूर्णा
यथोक्तफलदायिनी तस्याःपुण्यंददस्वत्वंयदिसत्यंममाग्रतः तेनमुच्येतनरकात्तेमातापापसंघकृत् तच्छ्रुत्वात्वरितंस्ना-
त्वाददौपुण्यंत्रिवाचकं स्वमात्रेश्यामलातुष्टातेनमोक्षंजगामसा उर्मिलारूपसंपन्नादिव्यदेहावरांशुका विमानवरमा-
रूढादिव्यमाल्यांबरावृता भर्त्तुःसमीपेस्वर्गस्थादृश्यतेद्यापिसाजनैः बुधस्यपार्श्वेनभसिनिमिराजसमीपगा विस्फु-
रंतीमहाराजबुधाष्टम्याःप्रभावतः युधिष्ठिरउवाच यद्येवंप्रवराकृष्णतिथिर्वैतुबुधाष्टमी तस्याएवविधिंब्रू-
हियदितुष्टोसिमाधव श्रीकृष्णउवाच शृणुपांडवयत्नेनबुधाष्टम्याविधिंशुभम् यदायदासिताष्टम्यांबुधवा-
रोभवेद्यदि तदातदाहिसाग्राह्या एकभक्ताशनैर्नृभिःस्नात्वानद्यांतुपूर्वाण्हेगृहीत्वाकरकंनवं जलपूर्णंलसद्रत्नैःकृ

त्वानर्घ्यैःसमन्वितं पूजयेच्चगृहंनीत्वाबुधमेकंक्रमेणतु एकमाषसुवर्णेनतदर्धार्धेनवापुनः कारयेद्बुधरूपंतुस्वशक्त्यावामय
त्नतः अंगुष्ठमात्रंपुरुषंचतुर्बाहुंसुलक्षणं पद्ममध्येव्रणंकुंभंपूजयेत्सिततंडुलैः हेमपात्रेचसंस्थाप्यपीतवस्त्रयुगेनच वस्त्रोप
रिस्थितंदेवंपीतवस्त्राक्षतादिभिः पंचामृतेनसंस्नाप्यतत्तन्मंत्रैःक्रमेणतु नैवेद्यंगुग्गुलंधूपंदशांगेनसुगंधितम् पायसैर्घृतपूपै
श्चमोदकाशोकवर्तिकैः फलैश्चविविधैश्चैवशर्कराभिर्गुडैःशुभैः ततःपुष्पाक्षतैःपीतैर्वक्ष्यमाणैश्चनामभिः नमोबुधायपादौतुसो
मपुत्रायजानुनी तारकायकटींचैवराजपुत्रायचोदरं इलाप्रियायहृदयंकुमारायेतिवक्षसि बाहूपुरूरवःपित्रे अंसौसोमसुताय
च सुखंतुपीतवर्णायज्ञानायचस्तनद्वयम् मूर्धानंतुबुधायेतिएषुस्थानेषुपूजयेत् सौवर्णंराजतंताम्रंपात्रमादायशोभनम् गं
धपुष्पाक्षतैःपीतैर्गुडमिश्रांबुपूरितैः जानुभ्यामवनिंगत्वातेनचार्घ्यंनिवेदयेत् उर्वश्याःश्वशुरोयस्तुयःपुरूरवसःपिता योग्र
हाणामधिपतिर्बुधोनःसंप्रसीदतु वरांश्चविष्णुनादत्तान्सकलान्नःप्रसीदतु मंत्रेणानेनदत्वार्घ्यंजप्त्वामंत्रमिमंबुधः प्रथमेमो
दकान्दद्याद्द्वितीयेफेणिकास्तथा तृतीयेघृतपूर्णंचचतुर्थेवटकांस्तथा पंचमेमंडकान्दद्यात्षष्ठेसोहालिकास्तथा अशोक
वर्तिकान्चैवसप्तमेमासिकारयेत् अष्टमेशर्करामिश्रैःखांडवैश्चयुधिष्ठिर विप्रायवायनंदद्याद्व्रतीभोजनमाचरेत् एवंक्रमेण
कर्तव्यंबुधाष्टम्यांयुधिष्ठिर बांधवैःसहमित्रैश्चभोक्तव्यंप्रीतिपूर्वकं सौम्यमाख्यानकंशृण्वन्नरकेभ्योविमुच्यते सोमा
त्मजात्मकमशेषसुखप्रदंतंयःपूजयेत्सकलनीरयुतंचकुंभं पक्वान्नपात्रसहितंसहिरण्यवस्त्रंपश्यत्यसौयमपुरींनकदाचिदे
व युधिष्ठिरउवा॰ उद्यापनविधिंब्रूहिकृपयाभक्तवत्सल कस्मिन्कालेचकिंद्रव्यंकथंसफलभाग्भवेत् श्रीकृष्णउवा॰
आदौमध्येतथाचांतेकुर्यादुद्यापनक्रियां सप्तम्यांप्रयतोभूत्वाकुर्याद्दंतप्रधावनं आचम्यकुर्यात्संकल्पंदशविप्रान्निमंत्रयेत् अष्ट
म्यांप्रातरुत्थायशुचिर्भूत्वाव्रतीततः गंगाद्यादिमहातीर्थैस्नात्वानित्यकृतक्रियः गृहमध्येशुचौदेशेरंगवल्याविराजिते पुण्याह
वाचनंकृत्वाकुर्याद्दीक्षाविधानकम् प्राणानायम्यविधिवत्कृत्वासंकल्पनादिकम् तिथ्याद्युल्लेखनान्तत्रव्रतनामप्रकीर्तयेत् मया

कृतंबुधाष्टम्यांव्रतंसांगफलाप्तये उद्यापनंकरिष्येहमित्यक्षतकुशोदकं कृत्वाचार्यादिवरणंकुर्याद्वस्त्रादिभिःफलैः ब्राह्मणं वृणुयात्तत्रवस्त्रतांबूलभूषणैः ततःपूजादिकंकुर्याद्ग्रहयज्ञपुरःसरं ततस्त्वष्टदलंकुर्यान्मध्येकर्णिकयासह पंचवर्णैःसमापूर्यसकेसरदलानिच कर्णिकायांन्यसेद्धान्यंपंचप्रस्थप्रमाणतः दलेषुचदलाग्रेषुयथाशक्त्याविनिक्षिपेत् तत्रैवंस्थापयेत्कुंभान्मध्येपूर्वादिदिक्षुच गंगाजलेनसंपूर्यवस्त्रादिभिरलंकृतान् पंचत्वक्पल्लवोपेतान्नवकुंभान्यथाविधि तदुत्तरे ग्रहान्सर्वान्मंडलेस्थापयेत्ततः तत्पूर्वेस्थापयेत्कुंभंवारुणंचविशेषतः वस्त्रत्वक्पल्लवयुतैःपंचरत्नैःसकांचनैः तत्तन्मंत्रैःप्रतिष्ठाप्यपूजयेच्चयथाविधि सप्तजन्मार्जितंचौर्यपातकादिचयत्कृतं तद्दोषपरिहारायबुधाष्टमीव्रतंकृतं तस्यसांगफलप्राप्त्यैपूजांहोमंकरोम्यहं बुधप्रीत्यैचतत्सर्वमितिसंकल्प्यपूजयेत् कर्षमात्रेणराजेंद्रतदर्धार्धेनवापुनः बुधस्यप्रतिमांकुर्यात्स्वर्णेनविचक्षणः कर्णिकायांमध्यकुंभेताम्रपात्रेबुधंन्यसेत् पंचामृतेनस्नपनंवस्त्रयुग्मेनवेष्टयेत् आग्नेयंपीतवस्त्रंचपीतपुष्पाक्षतादिभिः उपचारैःषोडशभिःपुरुषसूक्तविधानतः तद्दक्षिणेविश्वमिदंविष्णुरित्यधिदैवतं सहस्रशीर्षापुरुषवामेप्रत्यधिदैवतं दलेषुविन्यसेद्देवान्प्रागारभ्यप्रदक्षिणं रविंचंद्रंकुजगुरूशुक्रार्किराहुकेतुकौ अनंतंवामनंविष्णुं शौरिंसत्यंजनार्दनम् हंसंनारायणंचाष्टौदलाग्रेषुचपूजयेत् धूपैर्दीपैश्चनैवेद्यैःफलैश्चविविधैर्यजेत् बहिरिंद्रादयःपूज्यादशदिक्पालिकास्तथा यमंचचित्रगुप्तंचश्यामलांदक्षिणेन्यसेत् कुंभेषुवंशपात्रेषुअष्टावष्टौचलड्डुकान् यज्ञोपवीतान् कलशान्दक्षिणासहितान्यजेत् पूजयित्वाततोहोमंशाखोक्तविधिनासुधीः मंडलात्पश्चिमेभागेस्थंडिलंचतुरस्रकं कृत्वातुलेखनादीनिकृत्वाग्निंस्थापयेत्सुधीः इध्मदर्भैःपरिस्तीर्यपात्रासादनमाचरेत् पूर्णपात्रविधानांतेब्रह्मासनमतःपरं इध्माधानसुखप्रांतेप्रधानाहुतिहावनम् अपामार्गसमिद्भिश्चयवव्रीहितिलैर्घृतैः गोधूमैश्चसितैर्होमंपृथक्पृथगगतंद्रितः उद्बुध्यस्वेतिमंत्रेणहोममष्टोत्तरंशतम् विष्णुमंत्रेणजुहुयात्तथानारायणंहुनेत् अधिप्रत्यधिदेवौचमंत्राभ्यांजुहु

यात्तथा ग्रहादिभ्यश्चजुहुयात्कुर्याद्ब्रह्मविसर्जनम् पूर्णपात्रोद्वासनंच बलिदानमतःपरम् वन्ह्यादिपूजनं कृत्वा देवतोद्वासनंततः अभिषिच्याथतिलकंरक्षाबंधनमेवच आचार्यंचसपत्नीकंपूजयित्वायथाविधि प्रतिमावस्त्रकलशान् गोदानंदक्षिणांतथा दत्वाब्रह्मादिविप्रेभ्यःकलशांश्चसदक्षिणान् ब्राह्मणान्भोजयेत्पश्चादाशिषोवाचयेत्तथा इतिश्रीभविष्योत्तरपुराणेबुधाष्टमीव्रतोद्यापनंसंपूर्णम् अथशुक्लादिश्रावणकृष्णाष्टम्यांदशाफलव्रतम् सानिशीथव्यापिनीग्राह्यानोचेत्सराग्राह्या तत्रपूजाविधिः तमद्भुतंबालकमंबुजेक्षणंचतुर्भुजंशंखगदाद्युदायुधम् श्रीवत्सलक्ष्मंगलशोभिकौस्तुभंपीतांबरंसांद्रपयोदसौभगम् महार्हवैदूर्यकिरीटकुंडलत्विषापरिष्वक्तसहस्रकुंतलं उद्दामकाञ्च्यंगदकंकणादिभिर्विराजमानंवसुदेवनंदनम् कृष्णाय० ध्यानं वासुदेवाय० आवाहयामि शेषशायिने० आसनं० तीर्थपादाय० पाद्यं० गंगाजनकाय० अर्घ्यं० यमुनावेगसंहारिणेन०- आचमनीयं० नित्यमुक्ताय० पंचामृतस्नानं० श्रीगोपालाय० स्नानं० पीतवाससेन० वस्त्रं- यज्ञप्रियाय० यज्ञोपवीतं० सर्वेश्वराय० चंदनं० अधोक्षजाय० अक्षतान् कमलाप्रियाय० पुष्पाणि तुलसी० नामपूजा कृष्णाय० विष्णवेन० हरयेन० शेषशायिने० गोविंदाय० गरुडध्वजाय० दामोदराय० हृषीकेशाय० पद्मनाभाय० उपेंद्राय० १० अथदोरकबंधनं संसारार्णवमग्नानांनराणांपापकर्मिणां इहमोक्षफलावाप्तिंकुरुष्वपुरुषोत्तम इतिदोरकबंधनं पारिजातापहाराय० धूपं० ज्ञानप्रदीपाय० दीपं० चक्रिणेन० नैवेद्यं० अघनाशिने० तांबूलं० सर्वव्यापिने० दक्षिणां० पद्मनाभाय० नीराजनं० अनंताय० पुष्पांजलिं देवदेवनमस्तेस्तुभक्तप्रियदयानिधे गृहाणार्घ्यंमयादत्तंदेवक्यासहितप्रभो विशेषार्घ्यं त्रिलोकनाथोदेवेशः सर्वभूतदयानिधिः दानेनानेनसुप्रीतोभवत्विहसदामम वायनमंत्रः श्रीकृष्णःप्रतिगृह्णातिश्रीकृष्णोवैददातिच श्रीकृष्णस्तारकोभाभ्यांश्रीकृष्णायनमोनमः इतिवायनं यस्यस्मृत्येतिप्रार्थना अथकथा सूतउवा० शृणुध्वमृषयःसर्वेनैमिषारण्यवासिनः पुराचद्वापरस्यांतेकृष्णदेवेनभाषितं तद्व्रतंचप्रवक्ष्यामिसांगोपांगंमुनीश्वराः पुराचवैपरस्यांतेपांडवाःकौरवास्तथा द्यूतंप्रचक्रिरेसर्वेधनमानेनमोहिताः निर्जिताः

पांडवादुःखाद्दूनंप्राप्तुर्मुनीश्वराः कुंतीविदुरगेहेतुसंस्थिताचमहायशाः तच्छ्रुत्वाकृष्णदेवोपिकृपयापरयायुतः आययौगरुडारूढोविदुरस्यगृहंप्रति तदापश्यन्महाबाहुंकुंतीपरमहर्षिता विदुरेणार्चितःकृष्णःकुंतींचैवाहभक्तितः नमामित्वामहंकुंतिसंस्तुतंचविडंबनं त्वत्पुत्रास्तुमहादुःखात्प्राययुर्गहनंवनं तवापिसुमहद्दुःखंसर्वदातन्ममाप्रियं कुंत्युवाच हृषीकेशमहाबाहो महादुःखेनकर्शिता कृपयापरयादेवरक्षितावयमीदृशाः ममचैवमहद्दुःखंत्वंजानासिचवैप्रभो मत्पुत्रास्तुमहादुःखात्प्रविष्टागहनंवनं कृपयाविदुरोमह्यंकौरव्यःप्रस्थसंमितं ददातिभीतिदःकृष्णजीवनायमहामतिः गृहस्यपश्चिमेभागेवसामिचजनार्दन दर्शिताकौरवाणांहिसर्वेषांकुमतिस्तथा इतितस्यावचःश्रुत्वाकृष्णःपरमधर्मवित् आहचैनांवासुदेवोभक्तप्रियतमस्तदा व्रतंतेकथयिष्यामियेनदुःखात्प्रमुच्यते पुत्रपौत्रैःपरिवृतास्त्वंराज्यंप्राप्स्यसेचिरात् दशाफलमितिख्यातंतद्व्रतंकुरुसुव्रते कुंत्युवाच कस्मिन्कालेतुकर्तव्यंतद्व्रतंकेशवप्रभो वदमांप्रतिइत्युक्तोजगादयादवेश्वरः श्रावणस्यासितेपक्षेअष्टम्यांचनिशीथके देवक्यांवासुदेवश्चप्रादुर्भूतोनसंशयः तस्याग्रेदशगुणितंसूत्रंस्थाप्यप्रपूजयेत् हस्तेबध्वातुतत्सूत्रंदशाहंव्रतमाचरेत् संसारार्णवमग्नानांनराणांपापकर्मिणां इहामुत्रफलावाप्तिंकुरुष्वपुरुषोत्तम अनेनदोरकंबध्वादशवर्षंव्रतंचरेत् देवस्यपुरतोनित्यंदशपद्मानिकारयेत् ततश्चशृणुयात्पुण्यांकथामेतांशुभावहां तुलस्याःकृष्णवर्णायादलैर्दशभिरर्चयेत् कृष्णंविष्णुंहृषीकेशंगोविंदंगरुडध्वजं दामोदरंहृषीकेशंपद्मनाभंहरिंप्रभुं एतैश्चनामभिर्नित्यंकृष्णदेवंसमर्चयेत् नमस्कारंततःकुर्यात्प्रदक्षिणसमन्वितं एवंदशादिनंकुर्याद्व्रतानामुत्तमंव्रतं आदौमध्येतथाचांतेहोमंकुर्याद्विधानतः कृष्णमंत्रेणजुहुयाच्चरुणाष्टोत्तरंशतं ततोहोमांतेविधिवदाचार्यंपूजयेत्सुधीः सौवर्णेताम्रपात्रेवामृन्मयेवेणुपात्रके सौवर्णंतुलसीपत्रंकारयित्वासुलक्षणम् प्रतिमांचतथाकृत्वाअर्चयित्वाविधानतः निधायप्रतिमांतत्रआचार्यायनिवेदयेत् दातव्यागोःसवत्साचवस्त्रालंकारभूषिता दशाहांतेतुकृष्णायपूरिकादशचार्पयेत् दापयेत्तुब्राह्मणायस्वयंभुक्त्वातथैवच उपायनंचगृह्णीष्वसर्वोप-

स्करसंयुतं संसारार्णवमग्नांमां पाहित्वंदेवकीसुत एवंचोपायनंदत्वानमस्कृत्वाक्षमापयेत् दक्षिणाभिर्युतंदेविकर्त्तव्यंकृष्ण
सन्निधौ व्रतांतेदशविप्रेभ्यःप्रत्येकंदशपूरिकाः एवंदशसुवर्षेषुव्रतंकुर्यादतंद्रितः एवंव्रतंत्वयादेविकर्तव्यंकृष्णसन्निधौ ए
वमुक्त्वातुकृष्णेनकुंतीश्रुत्वामुदान्विता उवाचकृष्णदेवंसाममवित्तंनविद्यते प्रत्युवाचहृषीकेशस्तववित्तंभविष्यति एवमु-
क्त्वाययौकृष्णःकर्णंद्रष्टुंसुखान्वितः कर्णोपिचमहात्मानंकृष्णंदृष्ट्वाप्रहर्षितः सिंहासनंददौतस्मैपाद्यमर्घ्यंतथैवच कर्णो
प्युवाचदेवेशंकिमर्थंतवचागमः इत्युक्तःकृष्णदेवोथतवमातातिदुःखिता कर्णउवाच भूरिभक्त्यानयाकृष्णमातरंप्रण
माम्यहं कथंवादुःखितामाता प्रमुच्येतवदस्वमे श्रीकृष्णउवाच सुवर्णपात्रेसंपूर्यपायसंक्षीरसंयुतम् सहस्रशतनि
ष्कंतुदातव्यंवायुहस्तके तवमातातथाप्रीताभविष्यतिनसंशयः एवमुक्त्वातथाकृष्णोद्वारकामाजगामह कृष्णवाक्यंततःश्रु
त्वाकर्णश्चक्रेमहायशाः पंचभक्ष्यसमायुक्तंपात्रंस्वर्णेनपूरितम् शतनिष्कसमायुक्तंवायुहस्तेप्रदायसः प्रहसंतीतथाकुंतीपा-
त्रंदृष्ट्वाथहर्षिता देवस्यसन्निधौकुंतीव्रतंचक्रेथभक्तितः कृष्णेनकारितंसर्वंममभाग्यायवैध्रुवं कृष्णपूजांततःकृत्वाकथां-
श्रुत्वाथभक्तितः उपायनंददौतत्रब्राह्मणेभ्योयथाक्रमं तुलसीदलंसुवर्णेनकारयित्वासुलक्षणं प्रतिमांविष्णुभक्तायस्वर्णपा
त्रेनिधायच गोदानेनसमायुक्तामाचार्यायमहात्मने कुंतीददौमहादेवीविष्णुर्नःप्रीयतामिति व्रतंदशसुवर्षेषुचकारोद्यापनंततः
तद्व्रतस्यप्रभावेणतनूजाश्चागतास्ततः हत्वाशत्रून्मृधेसर्वान्कृष्णस्यैवप्रसादतः युधिष्ठिरस्सुधर्मात्मास्वंराज्यंप्राप्तवान्सुधीः
प्रोवाचेदंव्रतंकुंतीद्रौपदींचपतिव्रताम् दशाफलमितिख्यातंकृष्णदेवेनभाषितं यूयंसर्वेमहादुःखंनिस्तीर्यस्वपुरींगताः व्रत
स्यास्यप्रभावेणकृष्णस्यैवप्रसादतः त्वमप्येवंव्रतंभद्रेकुरुष्वसुसमाहिता पुत्रपौत्रैःपरिवृतासर्वान्कामानवाप्स्यसि आ
चख्यौतद्व्रतंतस्यैकुंतीपरमहर्षिता सापिचक्रेमहाभागाद्रौपदीव्रतमुत्तमं तस्मात्सर्वप्रयत्नेनकर्तव्यंसुजनैःसदा सुभ
क्त्याकुरुतेनारीव्रतानामुत्तमंव्रतम् सर्वान्कामानवाप्नोतिविष्णुलोकेमहीयते इदंव्रतंमहापुण्यंव्रतानामुत्तमंव्रतं वदतांश्र

पवनांश्चैवविष्णुलोकोभवेद्ध्रुवं इतिश्रीभविष्यो॰दशाफलव्रतोद्यापनंसंपूर्णम् अन्नमूलंचिंत्यं अथकृष्णादिमासेनभाद्रकृष्णाष्टम्यांजन्माष्टमीव्रतं तच्चअर्धरात्रव्यापिन्यांकार्यं रोहिण्यासहिताकृष्णामासिभाद्रपदेष्टमी अर्धरात्रेतुयोगोयंतारापत्युदयेतथा नियतात्माशुचिःसम्यक्पूजांतत्रप्रवर्त्तयेत् इतिविष्णुधर्मोत्तरे तस्यकालतत्वेप्युक्तं दिनद्वयेअर्धरात्रव्याप्तावव्याप्तौवापरैवप्रातःसंकल्पकालसत्वाद्दिवारात्रियोगाद्वर्जनीयाप्रयत्नेनसप्तमीसंयुताष्टमीब्रह्मवैवर्त्ते सप्तमीयुक्तानिषेधाच्च यदापूर्वेद्युर्निशीथेकेवलाष्टमीउत्तरेद्युर्निशीथास्पर्शिन्यष्टमीरोहिणीयुक्तातदापूर्वैवग्राह्या कर्मकालसत्वाद्रोहिणीयोगस्तुकेवलंफलार्थोतिशयार्थोनवमीबुधादियोगवत् नतुनिर्णयोपयोगी प्रेतयोनिगतानांतुप्रेतत्वंनाशितंनरैः यैः कृताश्रावणेमासिअष्टमीरोहिणीयुता किंपुनर्बुधवारेणसोमेनापिविशेषतः किंपुनर्नवमीयुक्ताकुलकोट्यास्तुमुक्तिदा उदयेचाष्टमीकिंचिन्नवमीसकलायदि भवेत्तुबुधसंयुक्ताप्राजापत्यर्क्षसंयुता अपिवर्षशतेनापिलभ्यतेयदिवानवा तत्रउदयशब्दश्चंद्रोदयपरः सूर्योदयपरत्वेतुयदापूर्वेद्युर्निशीथेकेवलाष्टमी उत्तरेद्युर्निशीथस्पर्शिन्यष्टमीरोहिणीयुक्तासतीबुधयुक्तातदेवोत्तरास्यात् तदभावेपियावद्वचनवाचनिकमितियावत् यदितुबुधभावेपिरोहिणीयोगमात्रात्तदेवोत्तरोच्यतेतदारोहिणीयोगाभावेपिबुधमात्रसद्भावात् उत्तरा ऋक्षयोगवद्वारस्यापिप्राशस्त्यहेतुत्वाच्च किंच यथापूर्वेद्युर्निशीथेऽष्टमीमात्रसत्वेउत्तरेद्युश्चनिशीथात्पूर्वम् ऋक्षयोगेबुधसत्वेचएतद्वचनादुत्तरेद्युर्व्रतम् एवंपूर्वेद्युर्निशीथेसर्क्षाष्टमीबुधाधिक्याउत्तरेद्युर्व्रतापत्तिरिति यच्चविष्णुरहस्ये प्राजापत्यर्क्षसंयुक्ताकृष्णानभसिचाष्टमी मुहूर्तमपिलभ्येतसोपोष्याचमहाफला अत्रापिमुहूर्तपदंनिशीथाख्यम् यदाहिशकलाप्यष्टम्यर्धरात्रेवर्तमानाग्राह्या तदारोहिणीसहितामुहूर्तमप्यहोरात्रेयस्मिन्नित्युक्तंहिलभ्यते अष्टम्यारोहिणीऋक्षंतांसुपुण्यमुपावसेत् विष्णुरहस्येएवस्पष्टैर्वाहोरात्रसंबंधियत् किंचिन्मुहूर्तप्रतीतिरितिकालतत्वविवेचनेतद्विपरीतं ऋक्षयोगस्यवातात्कालिकत्वेनसार्थंस्यात् किंचैतद्व

नद्वयगतापिशब्दस्यस्वार्थेतात्पर्याभावेनऋक्षयोगात्प्राशस्त्यबोधकत्वस्यैवउचितत्वादिति यत्तुनस्तत्रोक्तं कर्मकाल
व्याप्तिशास्त्रादेवप्रधानभूतायाअष्टम्याएवअर्धरात्रसत्वेनप्राप्तंग्राह्यत्वम् दिवावायदिवारात्रौनास्तिचेद्रोहिणीकला
रात्रियुक्तांप्रकुर्वीतविशेषेणेंदुसंयुतां इतिवचनेनरोहिणीयोगाभावविषयंक्रियतेएवंतस्यार्थः दिनावच्छेदेनरात्र्यवच्छे
देनवाकलामात्रापिचेत् रोहिणीअष्टम्यांनास्तितदैवचंद्रोदयसंयुता अर्धरात्रव्यापिनीतियावत् दिनद्वयेपितादृश्याअ
भावेबहुरात्रिसंयुतायामुत्तरांप्रकुर्वीतेति नेदंकर्मकालव्याप्तिशास्त्रबाधकमन्यथाप्यर्थसंभवात् तथाहि दिनद्वयेवैषम्येणनिशी
थस्पर्शे अहोरात्रावच्छेदेनरोहिणीयोगाभावेचविशेषेणाधिक्येन इंदुसंयुताअधिकनिशीथव्यापिनीग्राह्येतियावद्रोहिणी
योगेत्वधिकनिशीथव्यापिनीमपिविहायस्वल्पापिनिशीथयोगिनीरोहिणीयुतैवग्राह्येतिव्याख्यांतरंमयूखेद्रष्टव्यम्
पारणंतुतिथिभांतेकार्यं तदाहभृगुः जन्माष्टमीरोहिणीचशिवरात्रिस्तथैवच पूर्वविद्धैवकर्तव्यातिथिभांतेचपारणम् नि
षेधोपिब्रह्मवैवर्ते अष्टम्यामथरोहिण्यांनकुर्यात्पारणंक्वचित् हन्यात्पुराकृतंकर्मउपवासार्जितंफलम् तिथिरष्टगुणं
हंतिनक्षत्रंचचतुर्गुणं तस्मात्प्रयत्नात्कुर्वीततिथिभांतेचपारणं तत्रदिवसेउभयांतेपारणमितिमुख्यःपक्षः एकतरांतेत्व
नुकल्पः यदातुतिथिनक्षत्रयोरन्यतरस्यैवदिनांतस्तदाहोरात्रेपारणानिषेधादन्यतरांतेपारणाभ्यनुज्ञानात्तद्दिवैवान्यत
रांतेकार्यम् अतएववह्निपुराणे भांतेकुर्यात्तिथेर्वापिशस्तंभारतपारणम् इतिजन्माष्टमीनिर्णयः अथव्रतविधिः

व्रतपूर्वदिनेदंतधावनंकृत्वा उपवासदिनेप्रातःउत्थायतत्रकृत्यम् श्रावणस्यासितेपक्षेशौचमाचमनंकृतम् तस्यां
मध्यान्हसमयेनद्यादौविमलेजले कृत्वापामार्गसमिधादंतधावनमादितः तिलामलककल्केनस्नानंमृत्स्नानपूर्वकम् न
द्यादिकेतदास्नात्वाकृत्वानियममेवच परिधायनवेशुक्ले वाससीकृतसमाहितः ब्राह्मणःक्षत्रियोवैश्यःशूद्रश्चापितथाच
रेत् कृत्वानैमित्तिकंकर्मगत्वानिजगृहंपुनः वेदींसम्यक्प्रकुर्वीतगोमयेनोपलिप्यताम् सूर्यःसोमोयमःकालःसंध्ये

भूतान्यहःक्षपा पवनोदिक्पतिर्भूमिराकाशंखेचरानराः ब्रह्मशासनमास्थाय कल्पंतामिहसंनिधिं इत्युक्त्वासफलपुष्पाक्ष
तजलपूर्णं ताम्रपात्रमादायमासपक्षाद्युल्लिख्य अमुकफलकामः पापक्षयकामोवा कृष्णप्रीतये कृष्णजन्माष्टमीव्रतंकरिष्ये
तथा वासुदेवंसमुद्दिश्यसर्वपापप्रशांतये उपवासंकरिष्यामि कृष्णाष्टम्यांनभस्यहम् अद्यकृष्णाष्टमींचैवनमश्चंद्रंसरोहि
णीं अर्चयित्वोपवासेनभोक्ष्येहमपरेहनि एनसोमोक्षकामोस्मियद्गोविंदनियोजितं तन्मेमुंचतुमांत्राहिपतितंशोकसागरे
आजन्ममरणंयावद्यन्मयादुष्कृतंकृतं तत्प्रणाशायगोविंद प्रसीदपुरुषोत्तम इत्युक्त्वापात्रस्थंजलंनिक्षिपेत् ततःकदलीस्तं
भवासोभिराम्रपल्लवयुतसजलपूर्णकलशैर्दीपैः पुष्पमालाभिर्युतंसागरुधूपितं अग्निखड्गकृष्णच्छागरक्षामणिद्वारन्यस्तमुस
लादियुतंमंगलोपेतं षष्ठ्यादेवक्यासूतिकागृहंविधायतस्यसमंताद्भित्तिषुकुंकुमांजलीन्देवगंधर्वादीन् खड्गचर्मधरवसुदेव
देवकीनंदयशोदागर्भगोपीगोपान् कंसनियुक्तान् गोधेनुकुंजरान् यमुनांतन्मध्येकालियंअन्यच्च तत्काननंगोकुलचरितंयथा
संभवंलिखित्वासूतिकागृहमध्येप्रच्छाद्य वृत्तमंचकंस्थापयेत् अथपूजाविधिः कृत्वानैमित्तिकंकर्मस्नात्वानिजगृहं
पुनः येभ्योमातैवापित्रेतिमंत्रान्जपित्वा आगमार्थंतुघंटानादंकृत्वा अपसर्पंत्विति छोटिकामुद्रां तीक्ष्णदंष्ट्रेतिक्षेत्रपालंमा-
र्थ्य आचम्यप्राणानायम्यसंकल्प्य ममसहकुटुंबस्यक्षेमस्थैर्यविजयाभयायुरारोग्यैश्वर्याभिवृद्ध्यर्थंधर्मार्थकाममो-
क्षचतुर्विधपुरुषार्थसिध्यर्थंनिशीथेसपरिवारश्रीकृष्णप्रीत्यर्थंचपुराणोक्तप्रकारेणपुरुषसूक्तविधानेनचयथासंभवंनिय-
मेनयथोपचारमीलितद्रव्यैः जन्माष्टमीव्रतांगत्वेनपरिवारसहितश्रीकृष्णपूजनमहंकरिष्ये कलशार्चनंशंखार्चनंचकुर्या
त् पुरुषसूक्तेनन्यासंकुर्यात् रंगवल्लीसमायुक्तेसर्वतोभद्रमंडले अव्रणंसजलंकुंभंताम्रंमृन्मयमेववा संस्थाप्यवस्त्र
संवीतंकंठदेशेस्रक्शोभितंपंचरत्नसमायुक्तंफलगंधाक्षतैर्युतं सहिरण्यंसमासाद्यताम्रेणपटलेनवा वंशमृन्मयपात्रेण
यवपूर्णेनचैवहि आच्छादयेत्तत्रैलेनलिखेदष्टदलंततः कांचनीराजतीताम्रीपित्तलीमृन्मयीचवा वार्क्षीमणिमयीचैव

वर्णकैर्लिखित्वाथवा इत्युक्तान्यतमेनप्रतिमांविधाय अग्न्युत्तारणंकृत्वा प्रतिमाकपोलौस्पृष्ट्वातद्देवतानाममूलमंत्रंप्रणवादि
चतुर्थ्यंतंनाम अस्यैदेवत्वासंस्थायैस्वाहेतिमंत्रंपठन् प्राणप्रतिष्ठांकुर्यात् अस्यै इत्यस्यस्थानेतत्तद्देवतानामग्राह्यं गायद्भिः
किंनराद्यैःसततपरिवृतावेणुवीणानिनादैः शृंगारादर्शकुंतप्रवरकृतकरैःकिन्नरैःसेव्यमाना पर्यंकेस्वास्तृतायामुदिततरमु
खीपुत्रिणीसम्यगास्तेसादेवीदेवमाताजयतिसुतपदनादेवकीदिव्यरूपा इतिदेवकीं मंचकेबालकंसुप्तंपर्यंकेस्तनपायि
नं श्रीवत्सवक्षसंशांतंनीलोत्पलदलछविं एवंदेवकीसहश्रीकृष्णंध्यात्वा ॐनमोदेव्यैश्रियैइतिश्रियं देवकीसहितंवसु
देवंयशोदासहितंनंदं श्रीकृष्णसहितंबलदेवंचंडिकांच नमोंतैर्नाममंत्रैःपूजयेत् तत्रमंत्रः योगेश्वरायदेवाययोगि
नांपतयेविभो योगोद्भवायनित्यायगोविंदायनमोनमः स्नानं यज्ञेश्वरायदेवायतथायज्ञोद्भवायच योगानांपतयेना
थगोविंदायनमोनमः वस्त्रं कृष्णाय॰ चंदनं॰ कृष्णाय॰ यज्ञोपवीतं॰ पुष्पाणि अथांगपूजा गोविंदाय॰ पादौपूजया॰
माधवाय॰ जंघेपू॰ मधुसूदनाय॰ कटीपू॰ पद्मनाभाय॰ नाभिंपू॰ हृषीकेशाय॰ हृदयंपू॰ संकर्षणाय॰ स्तनौपू॰ वामनाय॰
बाहूपू॰ दैत्यसूदनाय॰ हस्तौपू॰ हरिकेशाय॰ कंठंपू॰ चारुमुखाय॰ मुखंपू॰ त्रिविक्रमाय॰ नासिकांपू॰ पुंडरीकाक्षाय॰ नेत्रेपू॰
नृसिंहाय॰ श्रोत्रेपू॰ उपेंद्राय॰ ललाटंपू॰ हरयेन॰ शिरःपूज॰ श्रीकृष्णाय॰ सर्वांगंपू॰ कृष्णाय॰ धूपं॰ कृष्णाय॰ दीपं॰ विश्वेश्व
रायदेवायतथाविश्वोद्भवायच विश्वानांपतयेतुभ्यंगोविंदायनमोनमः नैवेद्यं यज्ञाययज्ञेश्वराययज्ञपतयेयज्ञसंभवाय
गोविंदायनमोनमइति आदौसर्वेषांयज्ञपदानांस्थानेयोगपदादित्युक्त्वा अयमेवमंत्रः स्नानेविश्वाय॰ विश्वेश्वराय
इत्युक्त्वा नैवेद्यं आचमनीयं॰ करोद्वर्तनं॰ फलं॰ तांबूलं॰ दक्षिणां॰ नीराजनं॰ पुष्पांजलिं धर्मायधर्मेश्वरायेत्या
दिस्वाहांतैस्तिलहोमे विश्वायविश्वेश्वरायेत्यादिशयने सोमायसोमेश्वरायेत्यादिचंद्रपूजायां इतिमंत्राउक्ताः ततोगव्यघृ
तेनाग्नौवसोर्धारां क्वचिद्गुडघृतेनेति ततोजातकर्मनालच्छेदषष्ठीपूजानामकर्माणिसंक्षेपेणकार्याणि ततश्चंद्रोदयेरोहि

णीयुतंचंद्रंस्थंडिलेप्रतिमायांवावाममंत्रेणसंपूज्य शंखतोयंसमादायसपुष्पकुशाचंदनं जानुभ्यामवनिंगत्वाचंद्रायार्घ्यं
निवेदयेत् क्षीरोदार्णवसंभूतअत्रिगोत्रसमुद्भव गृहाणार्घ्यंशशांकेदंरोहिण्यासहितोमम जोत्स्नायाःपतयेतुभ्यंज्योति-
षांपतयेनमः नमस्तेरोहिणीकांतसुधावासनमोस्तुते नमोमंडलदीपायशिरोरत्नायधूर्जटे कलाभिर्वर्धमानायनमश्चंद्रा
यचारवे इतिप्रणमेत् अनंतंवामनंगौरींवैकुंठंपुरुषोत्तमं वासुदेवंहृषीकेशंमाधवंमधुसूदनं वराहंपुंडरीकाक्षंनृसिंहंदै
त्यसूदनम् दामोदरंपद्मनाभंकेशवंगरुडध्वजम् गोविंदमच्युतंकृष्णमनंतमपराजितम् अधोक्षजंजगद्बीजंसर्गस्थित्यंत
कारणम् अनादिनिधनंविष्णुंत्रिलोकेशंत्रिविक्रमम् नारायणंचतुर्बाहुंशंखचक्रगदाधरं पीतांबरधरंनित्यंवनमाला
विभूषितं श्रीवत्सांकंजगत्सेतुंश्रीकृष्णंश्रीधरंहरिम् शरणंत्वांप्रपद्येहंसर्वकामार्थसिद्धये प्रणमामिसदादेवंवासु
देवंजगत्पतिं इतिमंत्रैःप्रणम्य त्राहिमांसर्वलोकेशहरेसंसारसागरात् त्राहिमांसर्वपापघ्नदुःखशोकार्णवात्प्रभो
सर्वलोकेश्वरत्राहिपतितंमांभवार्णवे देवकीनंदनश्रीशहरेसंसारसागरात् त्राहिमांसर्वदुःखघ्नरोगशोकार्णवाद्ध
रे दुर्वृत्तान्त्रायसेविष्णोयेस्मरंतिसकृत्सकृत् सोहंदेवातिदुर्वृत्तस्त्राहिमांशोकसागरात् पुष्कराक्षनिमग्नोहंमायाव्य
ज्ञानसागरे त्राहिमांदेवदेवेशत्वत्तोनान्योस्तिरक्षिता यद्बाल्येयच्चकौमारेयौवनेयच्चवार्द्धके यत्पुण्यंवृद्धिमाप्नोति-
पापंहरहलायुध इतिमंत्रैःप्रार्थयेत् ततःस्तोत्रपठन्पुराणश्रवणादिना जागरणंकुर्याद्द्वितीयेन्हिप्रातःकालेस्नाना
दिनित्यंकृत्वा पूर्ववद्देवंपूजयित्वाब्राह्मणान्भोजयेत् तेभ्यःसुवर्णधेनुवस्त्रादिदत्वाकृष्णोमेप्रीयतामितिवदेत् नमस्ते
वासुदेवायगोब्राह्मणहितायच शांतिरस्तु शिवंचास्तु इत्युक्त्वा प्रतिमामुद्वास्य तांब्राह्मणायदत्वा पार-
णंकृत्वा व्रतंसमापयेत् सर्वायसर्वेश्वरायसर्वेषांपतयेनमः सर्वसंभवायगोविंदायनमोनमइतिपारणं॰ भूताय-
भूतपतयेनमइतिनमस्कारः इतिपूजाविधिः अथकथा युधिष्ठिरउवाच जन्माष्टमीव्रतंब्रूहिविस्तरेण

ममाच्युत कस्मिन्कालेसमुत्पन्नंकिंपुण्यंकोविधिःस्मृतः श्रीकृष्णउवाच मल्लयुद्धेपरावृत्तेशमितेकुकुरांधके स्वजनैर्बहुभिःस्त्रीभिःसमैःस्निग्धैःसमावृते हतेकंसासुरेदुष्टेमथुरायांयुधिष्ठिर देवकीमांपरिष्वज्यकृत्वोत्संगेरुरोदह वसुदेवोपितत्रैववात्सल्यात्प्ररुरोदह समालिंग्याश्रुवदनःपुत्रपुत्रेत्यवाचह सगद्गदस्वरोदीनोबाष्पपर्याकुलेलक्षणः बलभद्रंचमांचैवपरिष्वज्यमुदापुनः अद्यमेसफलंजन्मजीवितंचसुजीवितम् उभाभ्यामद्यपुत्राभ्यांसमुद्भूतःसमागमः एवंहर्षेणदांपत्यंहृष्टंपुष्टंनदाह्यभूत् प्रणिपत्यजनाःसर्वेबभूवुस्तेप्रहर्षिताः एवंमहोत्सवंदृष्ट्वासमाजेमधुसूदनम् जनाऊचुः प्रसादःक्रियतामस्यलोकस्यार्तस्यदुःखहन् यस्मिन्दिनेचप्रासूतदेवकीत्वांजनार्दनम् तद्दिनंदेहिवैकुंठकुर्मस्तत्रमहोत्सवम् एवंस्तुतेजनौघेनवसुदेवोमयेक्षितः विलोक्यबलभद्रंचमांचहृष्टतनूरुहः उवाचसममादेशाल्लोकान्जन्माष्टमीव्रतं मथुरायांततःपश्चात्पार्थसम्यक्प्रकाशितम् कुर्वंतुब्राह्मणाःसर्वेव्रतंजन्माष्टमीदिने क्षत्रियाश्चैवयेवैश्याःशूद्रायेन्येपिधर्मिणः युधिष्ठिरउवाच कीदृशंतद्व्रतंदेवसर्वैर्देवैरनुष्ठितम् जन्माष्टमीनिसंज्ञंचपवित्रंपापनाशनं येनत्वंतुष्टिमायासिकारुण्येनप्रभवाव्यय एतन्मेतत्वतोब्रूहिसविधानंसविस्तरम् श्रीकृष्णउवाच मासिभाद्रपदेष्टम्यांनिशीथेकृष्णपक्षके शशांकेवृषराशिस्थेऋक्षेरोहिणिसंज्ञके योगेस्मिन्वसुदेवाद्धिदेवकीमामजीजनत् भगवत्याश्चतत्रैवक्रियतेसुमहोत्सवः योगेस्मिन्कथितेष्टम्यांसिंहराशिगतेरवौ सप्तम्यांलघुभुक्कुर्याद्दंतधावनपूर्वकम् उपवासस्यनियमंरात्रौस्वपेज्जितेंद्रियः केवलेनोपवासेनतस्मिञ्जन्मदिनेमम सप्तजन्मकृतात्पापान्मुच्यतेनात्रसंशयः उपावृत्तस्यपापेभ्योयस्तुवासोगुणैःसह उपवासःसविज्ञेयःसर्वभोगविवर्जितः ततोष्टम्यांतिलैःस्नात्वानद्यादौविमलेजले सुदेशेशोभनंकुर्याद्देवक्याःसूतिकागृहम् सितपीतैस्तथारक्तैःकर्बुरैर्हरितैरपि वासोभिःशोभितंकृत्वासमंतात्कलशैर्नवैः पुष्पैःफलैरनेकैश्चदीपालिभिरितस्ततः पुष्पमालाविचित्रंचचंदनागरुधूपितं अतिरम्यमनौपम्यंरक्षामणिविभूषितं हरिवंशस्यचरितंगोकुलंचविलेखयेत् त

भ॰ षा॰
८९

अ॰ ८

तंचादित्रनिनदैर्वीणावेणुरवाकुलम् नृत्यगीतक्रमोपेतंमंगलैश्चसमंततः वेष्टकारीञ्जोहरखड्गं कृत्वानादंचयत्नतः द्वारेविन्यस्यमुसलंरक्षितंरक्षपालकैः षष्ठ्यादेव्याधिष्ठितंचतद्गृहंचोत्सवैस्तथा एवंविभवसारेणकृत्वातत्सूतिकागृहम् तन्मध्ये-प्रतिमास्थाप्यासाचाप्यष्टविधास्मृता कांचनीराजतीताम्रीपैत्तलीमृन्मयीतथा वार्क्षीमणिमयीचैववर्णकैर्लिखितातथा सर्वलक्षणसंपूर्णापर्यंकेचाष्टशल्यके प्रतप्तकांचनाभासांमहार्हांसुतपस्विनीं प्रसूतांचप्रसुप्तांचस्थापयेन्मंचकोपरि मांतत्रबालकंसुसंपर्यंकेस्तनपायिनम् श्रीवत्सवक्षसंशांतंनीलोत्पलदलच्छविं यशोदांतत्रचैकस्मिन्प्रदेशेसूतिकागृहे तद्वच्चकल्पयेत्पार्थप्रसूतांवरकन्यकाम् तथैवममपार्श्वस्थाःकृतांजलिपुटानृप देवाग्रहास्तथानागायक्षविद्याधरामराः प्रणताःपुष्पमालाग्रचारुहस्ताःसुरासुराः संचरंतइवाकाशेप्रहारैरुदितोदितैः वसुदेवोपितत्रैवखड्गचर्मधरःस्थितः कश्यपोवसुदेवायमदितिश्चैवदेवकी शेषोवैबलदेवोयंयशोदादितिरन्वभूत् नंदःप्रजापतिर्दक्षोगर्गश्चापिचतुर्मुखः गोप्यश्चाप्सरसश्चैवगोपाश्चापिदिवौकसः एषोवतारोराजेंद्रकंसोयंकालनेमिजः तत्रकंसनियुक्ताश्चमोहितायोगनिद्रया गोधेनुकुंजराश्चैवदानवाःशस्त्रपाणयः नृत्यंतश्चाप्सरोभिस्तेगंधर्वागीततत्पराः लेखनीयश्चतत्रैवकालियोयमुनाह्रदे इत्येवमाद्यत्किंचिद्विद्यतेचरितंमम लेखयित्वाप्रयत्नेनपूजयेद्भक्तितत्पराः रम्यमेवंबीजपूरैःपुष्पमालादिशोभितं कालदेशोद्भवैःपुष्पैःफलैश्चापियुधिष्ठिर पाद्यार्घ्यैःपूजयेद्भक्त्यागंधपुष्पाक्षतैःसह मंत्रेणानेनकौंतेयदेवकींपूजयेन्नरः गायद्भिःकिंनराद्यैःसततपरिवृतावेणुवीणानिनादैर्भृंगारादर्शकुंभप्रकटकृतकरैःकिन्नरैःसेव्यमाना पर्यंकेस्वास्तृतेयामुदिततरसुखीपुत्रिणीसम्यगास्तेसादेवीदेवमाताजयतुचससुतादेवकीकांतरूपा पादावभ्यंजयंतीसाश्रीदेव्याश्चरणांतिके निशीयेमंचकेपूज्यादिव्यगंधानुलेपनैः पंकजैःपूजयेद्देवींनमोदेव्यैश्रियैइति देववत्सेनमस्तेस्तुकृष्णोत्सादनतत्परा पापक्षयकरीदेवीतुष्टियातुमयार्चिता प्रणवादिनमोंतंचपृथक्नामानुकीर्तनम् कुर्यात्पूजांविधिज्ञश्चसर्वपापापनुत्तये देवक्यैवसुदेवायवा-

८९

सुदेवायचैवहि बलदेवायनंदाययशोदायैपृथक्पृथक् क्षीरादिस्नपनंकृत्वाचंदनेनानुलेपयेत् विध्यंतरसमीच्छंतिकेचिदत्रैवसूरयः चंद्रोदयेशशांकायअर्घ्यंदत्वाहरिंस्मरन् अनंतंवामनंशौरिंवैकुंठंपुरुषोत्तमम् वासुदेवंहृषीकेशंमाधवंमधुसूदनम् वराहंपुंडरीकाक्षंनृसिंहंब्रह्मणःप्रियम् गोपीशंपुंडरीकाक्षंसृष्टिस्थित्यंतकारकम् अनादिनिधनंविष्णुंत्रैलोक्येशंत्रिविक्रमं नारायणंचतुर्बाहुंशंखचक्रगदाधरम् पीतांबरधरंनित्यंवनमालाविभूषितम् श्रीवत्सांकंजगत्सेतुंश्रीपतिंश्रीधरंहरिम् योगेश्वरायदेवाययोगिनांपतयेनमः योगोद्भवायनित्यायगोविंदायनमोनमः यज्ञेश्वरायदेवायतथाजलशयायचयज्ञानांपतयेनाथगोविंदायनमोनमः एभिर्मंत्रैःसमाराध्यअर्चयेत्पूजयेद्धरिंजगन्नाथनमस्तुभ्यंसंसारभयनाशन जगदीशायदेवायभूतानांपतयेनमः धर्मेश्वरायधर्मायशंभवायजगत्पते धर्मज्ञायचदेवायगोविंदायनमोनमः मंत्रेणानेननैवेद्यंशयनादितथैवच चंद्रायार्घ्यंचमंत्रेणअनेनैवाथदापयेत् क्षीरोदार्णवसंभूतअत्रिगोत्रसमुद्भव गृहाणार्घ्यंशशांकेशरोहिण्यासहितोमम ज्योत्स्नापतेनमस्तुभ्यंज्योतिषांपतयेनमः नमस्तेरोहिणीकांतअर्घ्यंनःप्रतिगृह्यताम् स्थंडिलेस्थापयेद्देवंशशांकंरोहिणीयुतं देवक्यावसुदेवंचनंदंचैवयशोदया बलदेवंमयासार्द्धंभक्त्यापरमयानृप संपूज्यविधिवद्देहीकिंनाप्नोत्यतिदुर्लभं एकादशीनांविंशत्यःकोट्योयाःप्रकीर्तिताः ताभिःकृष्णाष्टमीतुल्याततोनंतचतुर्दशी अर्धरात्रेवसोर्धारांपातयेद्गव्यसर्पिषा ततोवर्द्धापयेन्नालंषष्ठीनामादिकंमम कर्तव्यंतत्क्षणाद्रात्रौप्रभातेनवमीदिने यथाममतथाकार्योभगवत्यामहोत्सवः ब्राह्मणान्भोजयेद्भक्त्यातेभ्योदद्याच्चदक्षिणाम् हिरण्यंमेदिनीगावोवासांसिकुसुमानिच यद्यदिष्टतमंतत्तत्कृष्णोमेप्रीयतामिति यंदेवंदेवकीदेवीवसुदेवादजीजनत् भौमस्यब्रह्मणोगुप्त्यैतस्मैब्रह्मात्मनेनमः नमस्तेवासुदेवायगोब्राह्मणहितायच शांतिरस्तुशिवंचास्तुइत्युक्त्वामांविसर्जयेत् ततोबंधुजनौघंचदीनानाथांश्चभोजयेत् भोजयित्वासुशांतांस्तान्स्वयंभुंजीतवाग्यतः एवंयःकुरुतेदेव्यादेवक्याःसुमहोत्सवं प्रतिवर्षंविधानेनसभक्तोधर्मनंदन नरोवायदिवानारीयथोक्तंलभतेफलं पुत्रसंतानमारोग्यंसौभाग्यमतुलंलभेत् इहधर्मरतिर्भूत्वामृतोवैकुंठमाप्नुयात् -

तत्रदेवविधानेनवर्षलक्षंयुधिष्ठिर भोगान्नानाविधान्भुक्त्वापुण्यशेषादिहागतः सर्वकामसमृद्धेचसर्वाशुभविवर्जिते कुले
नृपातिशीलानांजायतेहंच्छयोपमः यस्मिन्सदैवदेशेतुलिखितंतुपटार्पितम् ममजन्मदिनंयत्रसर्वालंकारभूषितम् पूजये
त्पांडवश्रेष्ठजनैरुत्सवसंयुतैः परचक्रभयंतत्रनकदापिभवेत्पुनः पर्जन्यःकामवर्षीस्यादीतिभ्योनभयंभवेत् गृहेवापूज्य
तेतत्रदेवक्याश्चरितंमम तत्रसर्वसमृद्धंस्यान्नोपसर्पादिकंभवेत् पशुभ्योनकुलाद्व्यालात्पापरोगाच्चपातकात् राजतश्चौर
तोवापिनकदाचिद्भयंभवेत् संसर्गेणापियोभक्त्याव्रतंपश्येदनाकुलं सोपिपापविनिर्मुक्तःप्रयातिहरिमंदिरम् जन्माष्टमी
जनमनोनयनाभिरामापापापहासुकृतिनंविदधातिगोपाः योदेवकींसुतयुतांचभजेद्धितस्यांपुत्रानवाप्यसमुपैतिपदंसवि
ष्णोरिति व्यासउवाच निवृत्तेभारतेयुद्धेकृतशौचोयुधिष्ठिरः उवाचवाक्यंधर्मात्माकृष्णंदेवकिनंदनम् युधिष्ठिरउवा॰
त्वत्प्रसादात्तुगोविंदनिहताःशत्रवोरणे कर्णश्चनिहतःसैन्येत्वत्प्रसादाज्जनार्दन प्राप्तंनिष्कंटकंराज्यंकृत्वाकर्मसुदुष्करं
आचाराश्चदंडनीतिश्चराजधर्माःक्रियान्विताः अधुनाश्रोतुमिच्छामिश्रद्धंजन्माष्टमीव्रतं जन्माष्टमीव्रतंब्रूहिविस्तरेणममाच्यु
त कुतःकालेसमुत्पन्नंकिंपुण्यंकोविधिःस्मृतः श्रीकृष्णउवा॰ शृणुराजन्प्रवक्ष्यामिव्रतानामुत्तमंव्रतं यतःप्रभृतिविख्या
तंफलेनविधिनान्वितं राजवंशसमुत्पन्नैर्दैत्यानीकैःसुपीडिता धराभारभराक्रांताब्रह्माणंशरणंययौ ज्ञात्वातदाप्रभुर्ब्रह्मा
भूमेर्भारंसमाहितः श्वेतद्वीपंसमागत्यसर्वदेवसमन्वितः समाहितमतिब्रह्मामांतुष्टावविशांपते स्तुत्यानयाहंसंप्रीतस्तेषां
दृग्गोचरोभवम् दृष्ट्वामांप्रणिपत्याशुभक्तिभावसमन्वितः ब्रह्माणमग्रतःकृत्वातुष्टाःसर्वेदिवौकसः विजिज्ञपुर्महाराजभू
मिभारापनुत्तये उपधार्यतदातेषांवचनंचान्वचिंतयम् केनोपायेनहंतव्यादानवाःक्षत्रियोद्भवाः स्वधर्मनिरताःसर्वेमहाबल
पराक्रमाः ततोनिश्चित्यमनसाब्रह्माणमहमब्रुवम् वसुदेवोदेवकीचप्रजाकामौपुरानृप भक्त्यामांभजमानौतौतप्तवंतौ-
महत्तपः तयोःप्रसन्नःसुप्रीतोयाचतांवरमुत्तमम् अब्रुवंतावपिततोवरयामासतुःकिल यदिदेवप्रसन्नोसित्वादृशोनौ

भवेत्सुतः तथेतिचमयाताभ्यामुक्तंप्रीतेनचेतसा तत्कामपूरणार्थायसंभविष्याम्यहंतयोः दिवौकसोपिस्वांशेनसंभवंतुसुरस्त्रियः योगमायाचनंदस्ययशोदायांभविष्यति देवक्याजठरेगर्भमनंतंधाममामकम् सन्निकृष्यततस्तूर्णंरोहिण्याजठरेकुरु इतिसंदिश्यतान्सर्वानहमंतर्हितोभवम् ततोदेवैः समंब्रह्मातांदिशंप्रणिपत्यच आश्वास्यचमहींदेवींवरधात्रींजगामह ततोहंदेवकीगर्भमविशंस्वेनतेजसा हतेषुषट्सुबालेषुदेवक्याऔग्रसेनिना कारागृहस्थितायांचवसुदेवेनवैसह गतेर्धरात्रसमयेसुप्तेसर्वजनेनिशि भाद्रेमास्यसितेपक्षेऽष्टम्यांब्रह्मर्क्षसंयुजि सर्वग्रहशुभेकाले प्रसन्नहृदयाशये आविरासंनिजेनैवरूपेणाह्यवनीपते वसुदेवोपिमांदृष्ट्वाहर्षशोकसमन्वितः भीतःकंसादतितरांतुष्टावचकृतांजलिः पुनःपुनःप्रणम्याथप्रार्थयामाससादरम् वसुदेवउवा॰ अलौकिकमिदंरूपंदुर्दर्शंयोगिनामपि यत्तेजसारिष्टगृहमभवत्संप्रकाशितं उद्विग्नोभगवन्कंसाद्योमेबालानघातयत् उपसंहरतस्माच्च एतद्रूपमलौकिकं शंखचक्रगदापद्मलसत्कौस्तुभमालिकं किरीटहारमुकुटकेयूरवलयांकितं तडिद्वसनसंवीतंक्वणत्कांचनमेखलं स्फुरद्राजीवताम्राक्षंस्निग्धांजनसमप्रभं महामरकतस्वच्छंकोटिसूर्यसमप्रभम् कृष्णउवाच एवंसंप्रार्थितोराजन्वसुदेवेनवैतदा तेनैवनिजरूपेणभूत्वाहंप्राकृतःशिशुः नयमांगोकुलमितिवसुदेवमचोदयम् समादायागमत्सोपिनंदगोकुलमंजसा द्वाराण्यपावृतान्यासन्मत्प्रभावात्स्वयंप्रभो ददौमार्गंचकालिंदीजलकल्लोलमालिनी ततोयशोदाशयनेन्यस्यचानकदुंदुभिः तत्पर्यंकेस्थितांगृह्यदारिकामगमत्पुनः द्वाराणिपिहितान्यासन्पूर्ववन्निगडंततः विन्यस्यपादयोराजन्शयनेन्यस्यदारिकाम् ततोरुरोदमहतास्वरेणापूर्यसादिशः तस्यारुदितशब्देनउत्थितारक्षकागृहात् कंसायागत्यचाचख्युःप्रसूतादेवकीतिच सोपितल्पात्समुत्थायभयेनातीवविह्वलः जगामसूतिकागेहेदेवक्याःप्रस्खलन्पथि दारिकांशयनात्गृह्यरुदंत्याश्चैवस्वस्वसुः अपोथयत्शिलापृष्ठेसापितस्यकराच्च्युता उवाचकंसमाभाष्यदेवीह्याकाशगासती किंमयाहतयामंदजातःकुत्रापितेरिपुः इत्युक्तोसौसकंपोभूत्परमोद्विग्नमानसः

आज्ञापयामासनतोबल्लानांकदनायवै दानवाअपिबालानांकदनंचक्रुरुद्यताः वनेषूपवनेचैवपुरुग्रामवनेष्वपि अहंचगोकुले-
स्थित्वापूतनांबालघातिनीम् स्तनंदातुंप्रवृत्तांचप्राणैःसममशोषयम् तृणावर्तबकारिष्टान्धेनुकंकेशिनंतथा अन्यानपिख
लान्हत्वास्वप्रभावमदर्शयं ततश्चमथुरांगत्वाहत्वाकंसादिदानवान् ज्ञातीनांपरमंहर्षंकृतवानस्मिसादरं देवकीवसुदे
वौचपरिष्वज्यमुदामम आनंदजैर्जलैर्मूर्ध्निसेचयामासतुर्नृप तस्मिन्पुरवरेमल्लान्हत्वाचाणूरमुख्यकान् गजंकुवलयापीडंकं
संभ्रातृननेकशः एवंहतेक्रूरेकंसेसर्वलोकैककंटके अन्येषुदुष्टदैत्येषुसर्वलोकभयंकरे लोकाःसमुत्सुकाःसर्वेऊचुर्मांचसमा
गताः कृष्णकृष्णमहायोगिन्भक्तानामभयप्रद प्रलयात्पाहिनोदेवशरणागतवत्सल अनाथनाथसर्वज्ञसर्वभूतहितेरत किं
चिद्विज्ञप्तुकामोहंतन्नोवक्तुंत्वमर्हसि तवजन्मदिनंलोकेनज्ञातंकेनचित्क्वचित् ज्ञात्वाचतत्त्वतःसर्वेकुर्मोवर्धापनोत्सवम् तेषांदृ
ष्टामयाभक्तिःश्रद्धाचमयिसौहृदं मयाजन्मदिनंतेभ्यःख्यातंनिर्मलचेतसा श्रुत्वातेपितथाचक्रुर्विधिनायेनतच्छृणु पार्थतद्दि
वसेप्रासेदंतधावनपूर्वकम् स्नात्वापुण्यजलेशुद्धेवाससीपरिधायच निर्वर्त्यावश्यकंकर्मव्रतसंकल्पमाचरेत् अद्यस्थित्वानि
राहारःश्वोभूतेतुपरेहनि भोक्ष्यामिपुंडरीकाक्षशरणंमेभवाच्युत गृहीत्वानियमंचैवसंपाद्यार्चनसाधनं मंडपंशोभनंकृत्वापु
ष्पमालादिभिर्युतं तस्मिन्मांपूजयेद्भक्त्यागंधपुष्पाक्षतैःक्रमात् उपचारैःशोडशभिर्द्वादशाक्षरविद्यया सद्यःप्रसूतांजननीं
वसुदेवंचमारिष बलदेवसमायुक्तांरोहिणींगुणशोभिनीम् नंदंयशोदांगोपीश्चगोपान्गाश्चैवसर्वशः गोकुलंयमुनांचैवयोग
मायांचदारिकाम् यशोदाशयनेसुप्तांसद्योजातांवरप्रभां एवंसंपूजयेत्सम्यक्नाममंत्रैःपृथक्पृथक् सुवर्णरौप्यताम्रारमृ
दादिभिरलंकृताः काष्ठपाषाणरचिताश्चित्रमप्यथलेखिताः प्रतिमाविविधाःप्रोक्तास्तासुमांचनरोयजेत् रात्रौजागरणंकुर्या
द्गीतनृत्यादिभिःसह पुराणैःस्तोत्रपाठैश्चजातनामादिषूत्सवैः श्वोभूतेपारणंकुर्याद्द्विजान्संभोज्ययत्नतः एवंकृतेमहारा
जव्रतानामुत्तमंव्रतं सर्वान्कामानवाप्नोतिविष्णुलोकेमहीयते मोहान्नकुरुतेयस्तुयातिसंसारगह्वरे तस्मात्कुर्वन्प्रयत्नेन

निष्पापोजायतेनरः अत्रैवोदाहरंतीममितिहासंपुरातनं अंगदेशोद्भवोराजामित्रजिन्नामनामतः तस्यपुत्रोमहातेजाःसत्यजित्सत्पथेस्थितः पालयामासधर्मज्ञोविधिवद्रंजयन्प्रजाः तस्यैवंवर्तमानस्यकदाचिद्दैवयोगतः पाखंडैःसहसंवासोबभूवबहुवासरम् तत्संसर्गात्सनृपतिरधर्मनिरतोभवत् वेदशास्त्रपुराणानिविनिंद्यबहुशोनृप ब्राह्मणेषुतथाधर्मेविद्वेषंपरमंगतः एवंबहुतिथेकालेगतेभरतसत्तम कालेनविधनंप्राप्तोयमदूतवशंगतः बध्वापाशैर्नीयमानोयमदूतैर्यमांतिकं पीडितस्ताड्यमानोसौदुष्टसंगवशंगतः नरकेपतितःपापोयातनाबहुवत्सरम् भुक्त्वापापस्यशेषेणपैशाचींयोनिमास्थितः तृषाक्षुधासमाक्रांतोभ्रमन्समरुधन्वसु कस्यचित्त्वथवैश्यस्यदेहमाविश्यसंस्थितः सहतेनैवसंप्राप्तोमथुरांपुण्यदांपुरीम् तत्रत्यैरक्षकैःसोथतद्देहात्तुबहिष्कृतः बभ्रामविपिनेसोपिऋषीणामाश्रमेष्वपि कदाचिद्दैवयोगेनममजन्माष्टमीदिने क्रियमाणांमहापूजांव्रतिभिर्मुनिभिर्द्विजैः रात्रौजागरणंचैवनामसंकीर्तनादिभिः ददर्शसर्वंविधिवच्छुश्रावचहरेःकथाः निःपापस्तत्क्षणादेवशुद्धनिर्मलमानसः प्रेतदेहंसमुत्सृज्यविष्णुलोकेविमानगः ममदूतैःसमानीतोदिव्यभोगसमन्वितः ममसान्निध्यमापन्नोव्रतस्यास्यप्रभावतः नित्यमेवव्रतंचैतत्पुराणेसार्वकालिकं गीयतेविधिवत्सम्यङ्मुनिभिस्तत्त्वदर्शिभिः सार्वकालिकमेवैतत्कृत्वाकामानवाप्नुयात् एतत्तेसर्वमाख्यातंव्रतानामुत्तमंव्रतम् ममसान्निध्यकृद्राजन्किंभूयःश्रोतुमिच्छसि युधिष्ठिरउ० उद्यापनविधिंब्रूहिसर्वदेवदयानिधे येनसंपूर्णतांयातिव्रतमेतदनुत्तमम् श्रीकृष्णउवा० पूर्णांतिथिमनुप्राप्यवित्तचिंतादिसंयुतः पूर्वेद्युरेकभक्ताशःस्वपन्मांसंस्मरन्हृदि प्रातरुत्थायसंस्मृत्यपुण्यश्लोकान्समाहितः निर्वर्त्यावश्यकंकर्मब्राह्मणान्स्वस्तिवाचयेत् गृहमानीयधर्मज्ञंवेदवेदांगपारगम् वृणुयादृत्विजश्चैववस्त्रालंकरणादिभिः पलेनवातदर्धेनतदर्धार्धेनवापुनः शक्त्यावापिनृपश्रेष्ठवित्तशाठ्यविवर्जितः सौवर्णींप्रतिमाकार्यापाद्यार्घ्याचमनीयकम् पात्रंसंपाद्यविधिवत्पूजोपकरणंतथा गोचर्ममात्रंसंलिप्यमध्येमंडलमाचरेत् ब्रह्माद्यादेवतास्तत्रस्थापयित्वाप्रपूजयेत् मंडपंरचयेत्तत्रकदलीस्तंभमंडितं चतुर्द्वारसमो

पेतंफलपुष्पादिशोभितं वितानंतत्रबध्नीयाद्विचित्रंचैवशोभनम् मंडलेस्थापयेत्कुंभंताम्रंवामृन्मयंशुचिं तस्योपरिन्यसेत्पा
त्रंराजतंवैणवंतुवा वाससाछाद्यकौंतेयपूजयेत्तत्रमांबुधः उपचारैःषोडशभिर्मंत्रैरेतैःसमाहितः ध्यात्वावाह्यामृतीकृत्यस्था
गनादिभिरादरात् ध्यात्वाचतुर्भुजंदेवंशंखचक्रगदाधरम् पीतांबरयुगोपेतंलक्ष्मीयुक्तंविभूषितं लसत्कौस्तुभशोभाढ्यं
मेघश्यामंसुलोचनं ध्यानं आगच्छदेवदेवेशजगद्योनेरमापते शुद्धेह्यस्मिन्नधिष्ठानेसन्निधेहिकृपांकुरु आवाहनं
देवदेवजगन्नाथगरुडासनसंस्थित गृहाणचासनंदिव्यंजगद्धातर्नमोस्तुते आसनं· नानातीर्थाहृतंतोयंनिर्मलंपुष्पमि-
श्रितम् पाद्यंगृहाणदेवेशविश्वरूपनमोस्तुते पाद्यं गंगादिसर्वतीर्थेभ्योभक्त्यानीतंसुशीतलं गंधपुष्पाक्षतोपेतंगृहा
णार्घ्यंनमोस्तुते अर्घ्यं कृष्णावेणीसमुद्भूतंकालिंदीजलसंयुतं गृहाणाचमनंदेवविश्वकायनमोस्तुते आचमनं दधिक्षौ
द्रंघृतंशुद्धंकपिलायाःसुगंधियत् सुस्वादुमधुरंशौरेमधुपर्कंगृहाणमे मधुपर्कंपुनराचमनं पयोदधिघृतंचैवशर्करामधु
संयुतम् पंचामृतेनस्नपनंलक्ष्मीकांतनमोस्तुते पंचामृतं मंदाकिनीगौतमीचयमुनाचसरस्वती ताभ्यःस्नानार्थमानी
तंगृहाणशिशिरंजलं स्नानं शुद्धजांबूनदप्रख्येतडिद्भासुररोचिषी मयोपपादितेतुभ्यंवाससीप्रतिगृह्यताम् वस्त्रयु
ग्मं यज्ञोपवीतं किरीटकुंडलादीनिकांचीवलययुग्मकम् कौस्तुभंवनमालांचभूषणानितवप्रभो भूषणानि मल
याचलसंभूतंघनसारंमनोहरं हृदयानंदनंचारुचंदनंप्रतिगृह्यतां चंदनं अक्षताश्चसुरश्रेष्ठाःकुंकुमाक्ताःसुशोभनाः अ
खंडिताश्चदेवेशमयादत्ताहिभक्तितः कुंकुमाक्षतान् मालतीचंपकादीनियूथिकाबकुलानिच तुलसीपत्रमिश्राणिगृहाण
सुरसत्तम पुष्पाणि इतिपरिवारदेवतापूजा अथांगपूजा अघनाशनाय॰ पादौपू॰ वामनाय॰ गुल्फौपू॰ शौरये॰जं
घेपू॰ वैकुंठवासिनेन॰ ऊरूपू॰ पुरुषोत्तमाय॰ मेढ्रंपू॰ वासुदेवाय॰ कटीपू॰ हृषीकेशाय॰ नाभिंपू॰ माधवाय॰ हृदयंपू॰ मधु
सूदनाय॰ कंठंपू॰ वराहाय॰ बाहूपू॰ नृसिंहाय॰ हस्तौपू॰ दैत्यसूदनाय॰ मुखंपू॰ दामोदराय॰नासिकांपू॰पुंडरीकाक्षाय॰

नेत्रेपू॰ गरुरडध्वजाय॰ श्रोत्रेपू॰ गोविंदाय॰ ललाटंपू॰ अच्युताय॰ शिरःपू॰ कृष्णाय॰ सर्वांगंपू॰ देवकीवसुदेवंच रोहिणींसबलांतथा सात्यकिंचोद्धवाक्रूरावुग्रसेनादियादवान् नंदंयशोदांतत्कालेप्रसूतागोपगोपिकाः कालिंदींकालियंचैवपूजयेन्नाममंत्रतः वनस्पतिरसोद्भूतंकालागरुसमन्वितं धूपंगृहाणगोविंदगुणसागरगोपते धूपं॰ आज्यंचवर्तिसंयुक्तंवन्हिनायोजितं मया दीपंगृहाणदेवेशत्रैलोक्यतिमिरापह दीपं शाल्योदनंपायसंचसिताघृतविमिश्रितम् नानापक्वान्नसंयुक्तंनैवेद्यंप्रतिगृह्यताम् नैवेद्यं उत्तरापोशनं इदंफलमितिफलं पूगीफलमितितांबूलं हिरण्यगर्भेतिदक्षिणां नीराजयेत्ततोभक्त्यामंगलंसमुदीरयन् जयमंगलनिर्घोषैर्देवदेवंसमर्चयेत् नीराजनं दत्वापुष्पांजलिंचैवप्रदक्षिणपुरःसरं प्रणमेद्दंडवद्भूमौभक्तिप्रह्वःपुनःपुनः स्तुत्वानानाविधैःस्तोत्रैःप्रार्थयीतजगत्पतिम् नमस्तुभ्यंजगन्नाथदेवकीतनयप्रभो वसुदेवात्मजानंतयशोदानंदवर्धन गोविंदगोकुलाधारगोपीकांतनमोस्तुते ततस्तुदापयेदर्घ्यमिंदोरुदयतःशुचिः कृष्णायप्रथमंदद्याद्देवकीसहितायच नारिकेरेणशुद्धेनदद्यादर्घ्यंविचक्षणः कृष्णायपरयाभक्त्याशयेकृत्वाविधानतः जातःकंसवधार्थायभूभारोत्तारणायच गृहाणार्घ्यंमयादत्तंदेवकीसहितोहरे कृष्णार्घ्यमंत्रः शंखेकृत्वाततस्तोयंसपुष्पफलचंदनं जानुभ्यामवनिंगत्वाचंद्रायार्घ्यंनिवेदयेत् क्षीरोदार्णवसंभूतअत्रिगोत्रसमुद्भव गृहाणार्घ्यंमयादत्तंरोहिण्यासहितःप्रभो ज्योत्स्नापतेनमस्तुभ्यंनमस्तेज्योतिषांपते नमस्तेरोहिणीकांतगृहाणार्घ्यंनमोस्तुते चंद्रार्घ्यमंत्रः इत्थंसंप्रार्थ्यदेवेशंरात्रौजागरणंचरेत् गीतनृत्यादिनाचैवपुराणश्रवणादिभिः प्रत्यूषेविमलेस्नात्वापूजयित्वाजगद्गुरुम् पायसेनतिलाज्यैश्चमूलमंत्रेणभक्तितः अष्टोत्तरशतंहुत्वाततःपुरुषसूक्ततः इदंविष्णुरितिप्रोक्ताज्जुहुयाद्वैघृताहुतीः होमशेषंसमाप्याथपूर्णाहुतिमतःपरं आचार्यंपूजयेद्भक्त्याभूषणाच्छादनादिभिः गामेकांकपिलांदद्याद्रूलसंपूर्णहेनवे पयस्विनींसुशीलांचसवत्सांसगुणांतथा स्वर्णशृंगींरौप्यखुरींकांस्यदोहनिकायुतां रत्नपुच्छांताम्रपृष्ठींकंठेघंटासमन्विताम् वस्त्रछन्नांदक्षिणाढ्या

मेवंसंपूर्णतांयजेत् कपिलायाअभावेतुगौरन्यापिप्रदीयते ततोदद्याच्चऋत्विक्भ्य अन्येभ्यश्चैव दापयेत् ब्राह्मणान्भोजयित्वाथभुंजीतसहबंधुभिः एवंकृतेमहाराजन्व्रतोद्यापनकर्मणि निःपापस्तत्क्षणादेवजायतेविबुधोपमः पुत्रपौत्रसमायुक्तोधनधान्यसमन्वितः भुक्त्वाभोगान्चिरंकालमंते ममपुरंव्रजेत् इतिश्रीभविष्यपुराणेकृष्णयुधि॰जन्माष्टमीव्रतोद्यापनंसंपूर्णं

अथभाद्रशुक्लाष्टम्यांज्येष्ठर्क्षेज्येष्ठाव्रतम् इदंचज्येष्ठायोगवशेनपूर्वविद्धायांपरविद्धायांवाकार्यम् दिनद्वयेतद्योगेपरेवनोचेत्पूर्वा ज्येष्ठापूजनंलैंगे कन्यास्थार्काष्टमीशुक्लाज्येष्ठर्क्षेमहतीस्मृता अलक्ष्मीपरिहारायज्येष्ठांतत्रप्रपूजयेत् कन्यार्कयोगोत्रकेवलस्तावकएव मासस्तु भाद्रपदश्चांद्रएवग्राह्यः मासिभाद्रपदेशुक्लेपक्षेज्येष्ठर्क्षसंयुते यस्मिन्कस्मिन्दिनेवापिज्येष्ठांदेवींप्रपूजयेत् हेमाद्रौ नवम्यासहकार्यास्यादष्टमीनात्रसंशयः मासिभाद्रपदेशुक्लेपक्षेज्येष्ठर्क्षसंयुता रात्रौयस्मिन्दिनेकुर्याज्ज्येष्ठायाःपरिपूजनं यस्मिन्दिनेभवेज्ज्येष्ठामध्याह्नादूर्ध्वमप्यणुः तस्मिन्हविष्यंपूजाचन्यूनाचेत्पूर्ववासरे पूजादिनात्पूर्वदिनेअनुराधायामावाहनमुत्तरदिनेमूलेनविसर्जयेत् तथाचस्कांदे मैत्रेणावाहयेद्देवींज्येष्ठायांतुप्रपूजयेत् मूलेविसर्जयेद्देवींत्रिदिनंव्रतमुत्तमं अथपूजा तिथ्यादिसंकीर्त्य मममृतवंध्यादिदोषपरिहारार्थंपुत्रपौत्रादिवृद्ध्येदरिद्रनाशार्थंयथामीलितोपचारैःज्येष्ठापूजनंकरिष्ये त्रिलोचनांशुक्लदंतींबिभ्रतींकांचनींतनूं विरक्तांरक्तनयनांज्येष्ठांध्यायामिसुंदरीं ध्यानं एह्येहित्वंमहाभागेसुरासुरनमस्कृते ज्येष्ठात्वंसर्वदेवानांमत्समीपंगताभव आवाहनम् श्वेतसिंहासनस्थांतुश्वेतवस्त्रैरलंकृतां वरदंपुस्तकंपात्रंबिभ्रतींवैनमोनमः आसनं ज्येष्ठेश्रेष्ठेतपोनिष्ठेधर्मिष्ठेसत्यवादिनिसमुद्रमथनोत्पन्नेपाद्यंगृण्हनमोस्तुते पाद्यं श्रीरखंडकर्पूरयुतंतोयंपुष्पेनसंयुतं गृहाणार्घ्यंमयादत्तंज्येष्ठादेविनमोस्तुते अर्घ्यं ज्येष्ठायैतेनमस्तुभ्यंश्रेष्ठायैतेनमोनमः ज्येष्ठेश्रेष्ठेतपोनिष्ठेब्रह्मिष्ठेसत्यवादिनि आचमनं पयोदधिघृतंचैवक्षौद्रशर्करयान्वितं पंचामृतंमयानीतंस्नानंगृण्हासुरेश्वरि पंचामृतं मंदाकिन्याःसमानीतंहेमांभोरुहवासितं-

स्नानार्थंतेमयानीतंस्नानंकुरुजगन्मये स्नानं सूक्ष्मतंतुभवेश्वेतेधौतेनिर्मलवारिणा वारणेलोकलज्जायावाससीप्रतिगृह्यतां वस्त्रयु॰ आचमनं हरिद्राकुंकुमंचैवकंठसूत्रंचताडकं सिंदूरंकज्जलंचारुषट्सौभाग्यंगृहाणभोः सौभाग्यद्रव्यं श्रीखंडंचंदनं॰ चंदनं अक्षताश्चसुरश्रेष्ठ॰ अक्षतान् नूपुरौमेखलाकांचीकंकणानिसुशोभने नासिकायांमयादत्तामुक्ताकांचनसंयुता अलंकारान् चंपकादिसुगंधीनि॰ पुष्पाणिः वनस्पति॰ धूपं॰ आज्यंचेतिदीपं॰ गोधूमपिष्टशाल्यादितंडुलानांचकारयेत् कृत्वाप्रसृतिमात्रास्तुपूरिकाघृतपाचिताः शाल्योदनंसूपयुक्तंदधिदुग्धंघृतंतथा नानाव्यंजनसंयुक्तंनैवेद्यंप्रतिगृह्यताम् नैवेद्यंस॰ उत्तरापोशनं॰ करोद्वर्तनं॰ फलं॰ तांबूलं॰ हिरण्यगर्भेतिदक्षिणां नीराजनं मंत्रपुष्पं॰ प्रदक्षिणां॰नमस्कारः शार्ङ्ग॰बाणाब्जखड्गारिप्रासतोमरमुद्गरैः अन्यैरप्यायुधैर्युक्तांज्येष्ठेत्वामर्चयाम्यहम् पुष्पांजलिः त्वंलक्ष्मीस्त्वंमहादेवीत्वंज्येष्ठेसर्वदामरैः पूजितासिमयादेविवरदाभवमेसदा इतिप्रार्थना पूजाविधिः अथकथा युधिष्ठिरउ॰ मृतवंध्यानुयानारीकाकवंध्यातथापरा गर्भस्रावीतृतीयाचनानादोषैस्तुदूषिता निर्धनाश्चनरायेवैदारिद्र्येणहताश्चयेकर्मणाकेनमुच्यंतेतन्मेब्रूहिजनार्दन श्रीकृष्णउवाच मासिभाद्रपदेशुक्लेपक्षेज्येष्ठायदाभवेत् रात्रौजागरणंकुर्याद्गीतवादित्रनिःस्वनैः एवंविधिविधानज्ञाएभिर्मंत्रैश्चपूजयेत् एह्येहित्वंमहाभागेसुरासुरनमस्कृते ज्येष्ठासिसर्वदेवानांमत्समीपंगताभव श्वेतसिंहासनस्थात्वंश्वेतवस्त्रैरलंकृता वरदंपुस्तकंपात्रंपाशहस्तेनमोनमः ज्येष्ठेश्रेष्ठेतपोनिष्ठेधर्मिष्ठेसत्यवादिनि समुद्रमथनोत्पन्नेज्येष्ठायैतेनमोनमः शार्ङ्ग॰बाणाब्जखड्गारिप्रासतोमरमुद्गरैः अन्यैरप्यायुधैर्युक्तांज्येष्ठेत्वामर्चयाम्यहम् त्वंलक्ष्मीस्त्वमुमादेवीत्वंज्येष्ठेसर्वदामरैः पूजितासिमयादेविवरदाभवमेसदा प्रार्थना पुत्रदारविवृद्ध्यर्थंलक्ष्म्याश्चैवविवृद्धये अलक्ष्म्याश्चविनाशायसर्वकालंद्विजोत्तम गुरुंसंपूजयेद्भक्त्यावस्त्रैराभरणादिभिः ततोद्वादशवर्षाणिपूजनीयाप्रयत्नतः यावज्जन्मतथापूर्वविधिनानेनमानवैः ददातिवित्तंपुत्रांश्चअर्चनीयासदास्त्रि-

या अनेनविधिनाप्रोक्तांयोहिपूजयतेनरः ज्येष्ठांतुपूजयेन्नारीनस्यालक्ष्मीर्विवर्धते वंध्यातुलभतेपुत्रान्दुर्भगाइवनङ्गवेत् एवंविधि
विधानेनज्येष्ठादेवींसमर्चयेत् विघ्नास्तस्यप्रणश्यंतियथाफलवणंतथा तथाग्राह्यंकुरुश्रेष्ठज्येष्ठायाःशोभनंव्रतम् नीराजनेकृ
तेचैवदीपोग्राह्यःस्वभक्तितः नैवेद्यसहितंप्राश्यव्रतीत्वग्रेयुधिष्ठिर गुरुहस्तात्सदाग्राह्या दीपःप्रज्वलितोमहान् व्रतस्थोभक्ति
युक्तश्चशुचिःप्रयतमानसः अनेनविधिनाचैवव्रतंकार्यंयुधिष्ठिर ज्येष्ठानामपरंदेवीभुक्तिमुक्तिप्रदायिनी यस्तांपूजयतेराजन्त
स्मैसर्वंप्रयच्छति कृष्णउवाच मासिभाद्रपदेशुक्लेपक्षेज्येष्ठर्क्षसंयुगे तस्मिन्दिनेव्रतीकुर्याज्ज्येष्ठायाःपरिपूजनम् तत्राष्टम्यां
यदावाराभानोर्ज्येष्ठर्क्षमेवच प्रतिवर्षेव्रतंयच्चविहितंकेवलेशुभे प्रातःस्नानंनरःकुर्यात्तस्यादेव्यादिनेशुभे भक्तियुक्तःशु
चिःकुर्याज्ज्येष्ठादेव्यास्तुपूजनम् जलाशयात्तुपूर्वेद्युरानयेत्संचशर्कराः देवीरूपंचतत्रैवकृत्वावास्थापयेत्ततः गोमयेनोप-
लिप्तेचहैमींवाकारयेद्बुधः स्थापयेद्राजतींताम्रींलेख्यांवापटकूल्ययोः आवाहयेत्ततोदेवीमथवाप्युक्तकेपिवा त्रिलोच-
नांशुक्लदंतींबिभ्रतींराजतींतनूम् विरक्तांरक्तनयनांज्येष्ठांध्यायामिसुंदरीं इतिमंत्रेणतांदेवीमावाह्यसुकृतीव्रतीस्ना
नंदद्यात्तथायश्चपादयोरुभयोर्द्विज श्रीखंडकर्पूरयुतंदद्यादर्घ्यंचभक्तितः पंचामृतंतथास्नानंनिर्जलेनजलेनच वस्त्रंगं
धंतथापुष्पंधूपदीपादिकंचयत् पूजयित्वाचसौभाग्यैर्द्रव्यैर्नानाविधैःशुभैः गोधूमशालितंडुलैर्नानाद्रव्यैश्चनिर्मितं कृत्वा
प्रसृतमात्रास्तुपूरिका घृतपाचिताः भक्त्यामयासुरेशानियदन्नंदीयतेतव तद्गृहाणमहादेविज्येष्ठेश्रेष्ठेनमोस्तुते निवेद
नीयंयत्किंचिद्दद्यादेव्यैप्रयत्नतः ततःस्तुत्वामहादेवींसर्वकामफलप्रदाम् ज्येष्ठायैतेनमस्तुभ्यंश्रेष्ठायैतेनमोनमः ज्येष्ठे
श्रेष्ठेतपोनिष्ठेधर्मिष्ठेसत्यवादिनि ततःक्षमाप्यतांदेवींस्तुवीतस्तवनोत्तमैः ब्राह्मणान्भोजयेत्पश्चात्सुवासिन्यस्तथाबहुदा
स्योदासाश्चसंभोज्यादीनांधकृपणास्तथा देवींविप्रमनुज्ञाप्यस्वयंभुंजीतवाग्यतः भक्षयित्वातथाचम्यदेवींनत्वापुनःपु
नः शयीतब्रह्मचर्येणकुर्यात्प्रातर्विसर्जनम् एवमेवप्रकुर्याद्वैव्रतंतुपरिवत्सरं ज्येष्ठाविसर्जनांतेतुशर्करांवारिणिक्षिपेत् द

ध्योदनंतयासाकंदेयंस्वस्यशुभाप्तये ज्येष्ठेदेविनमस्तुभ्यमलक्ष्मीनाशहेतवे पुनरेहिवत्सरांतेममगेहेशुभप्रदे एवंसंप्रार्थ्यतांदेवींगीतवाद्यपुरःसरैः अपूपवटकान्दद्याद्ब्राह्मणेभ्यस्ततोद्विज कुर्यादेवंप्रयत्नेनसायंवाथविसर्जयेत् विद्यार्थीप्राप्नुयाद्विद्यां-स्त्रीकामःश्रियमेवच लक्ष्मीवान्जायतेमर्त्यःस्त्रीतुमोदेतभर्तरि विनायकेनसहितांदेव्याःकुर्याद्विसर्जनं सौवर्णींराजतींताम्रींमृन्मयींवापिशक्तितः व्रतंस्वयंचकृतवान्सिद्धंचाप्यकृतार्हणाः देव्यामहत्त्वंकथितंतवेदंविधिश्चमंत्रार्चनसंयुतस्तथा मंत्रोपिसायुज्यकरोव्रतस्यतथामयातेकथितंसदैव अथोद्यापनम् यस्याःसिंहोरथेयुक्तोव्याघ्रश्चापिमहाबलः ज्येष्ठामहमिमांदेवींप्रपद्येशरणंशुभां तामग्निवर्णांतपसाज्वलंतीमित्यावाह्य आपोहिष्ठेतितिसृभिः हिरण्यवर्णेतितिसृभिः अभिषिंचेत् कृत्वाचाष्टदलंपद्मंस्थापयेत्तत्रसद्व्रती नाममंत्रेणकुर्वीतपाद्यमर्घ्यमथासनं स्नानमाचमनंचैववमधुपर्कश्चकंचुकी वस्त्रगंधाक्षताःपुष्पधूपदीपौप्रयत्नतः नैवेद्याचमनीयंचकरोद्वर्तनकंशुभं तांबूलदक्षिणादानंततोनीराजयेच्छुभां स्थापितेग्नौततःपश्चाद्धोममष्टोत्तरंशतं द्रव्यैर्दधिमधुक्षीरघृतैःकुर्यात्प्रयत्नतः तर्पणंचततःकुर्यादेभिर्मंत्रैर्विचक्षणः ज्येष्ठायै० श्रेष्ठायै० सत्यायै० कलिनाशिन्यै० विद्यायैवैनायक्यै० तपोनिष्ठायै० श्रियै० कृष्णायै० ब्रह्मिष्ठायै० विसृज्यचततोदेवींब्राह्मणायनिवेदयेत् व्रतांतेप्रतिमांकुर्यात्सौवर्णींपलसंमितां कृष्णवस्त्रेणसंयुक्तामाचार्यायनिवेदयेत् वस्त्राभरणमाल्यादिलेपनैःपूजयेद्द्विजं प्रणिपत्यततःपश्चात्तस्मैसर्वंनिवेदयेत् अनेनविधिनायस्तुब्राह्मणानांचतुष्टये ब्राह्मणान्भोजयेत्पश्चात्स्वयंभुंजीतवाग्यतः ब्राह्मणांश्चततोनत्वायाचयेत्सर्वमंगलं एवंसुवासिनीभोज्यापूज्यासर्वसमृद्धये एवंकृतेव्रतेसम्यक्सर्वशांतिःप्रजायते धनधान्यसमृद्धिश्च आरोग्यंभवतिध्रुवम् इतिश्रीभविष्योत्तरपुराणेज्येष्ठादेवीव्रतोद्यापनंसंपूर्णम् तत्रैवभाद्रशुक्लाष्टम्यांदूर्वाष्टमीव्रतं सापूर्वाग्राह्या श्रावणीदुर्गनवमीदूर्वाष्टमिहुताशनी पूर्वविद्धातुकर्तव्याशिवरात्रिर्बलेर्दिनम् इतिबृहद्यमवचनात् शुक्लाष्टमीतिथिर्यातुनोत्तरासाविधीयते इतिहेमाद्रिः मुहूर्तेरौहिणेष्टम्यांपूर्वावायदिवापरा दूर्वाष्टमीतुसाकार्याज्येष्ठामूलंचवर्जयेत् इतिउक्तम् तत्पूर्वत्रज्येष्ठामूलयो

गेकर्मकालव्याप्त्यभावेचद्रष्टव्यम् दूर्वाष्टमीसदात्याज्याज्येष्ठामूलर्क्षसंयुता तथाच प्राप्तेभाद्रपदेमासिशुक्लाष्टम्यांतुभा
रत दूर्वामभ्यर्चयेद्भक्त्याज्येष्ठांमूलंचवर्जयेत् ऐंद्रर्क्षेपूजितादूर्वाहंत्यपत्यानिनान्यथा भर्त्तुरायुर्हरामूलेतस्मात्तांपरिवर्जये
त् इतिमदनरत्नेस्कांदे शुक्लेभाद्रपदेमासिदूर्वासंज्ञातथाष्टमी सिंहार्कएवकर्तव्यानकन्यार्केकदाचन सिंहस्थेसो-
त्तमासूर्येनुदिनेमुनिसत्तम मदनरत्नेस्कांदोक्तेः अगस्त्यउदितेनातपूजयेदमृतोद्भवाम् वैधव्यंपुत्रशोकंचदशजन्मानिपंचच-
यदातुभाद्रशुक्लाष्टम्यांअगस्त्योदयस्तदातत्पूर्वंकृष्णाष्टम्यांकार्यम् शुक्लपक्षाभावेपिपौर्णिमांतमासेनभाद्रपदमात्रलाभात्
यदातुभाद्रपदोधिकस्तदासिंहार्कएवेतिउदाहृतवचनात् अधिमासेतुसंप्राप्तेनभस्यउदयेमुनेः अर्वागेवव्रतंकार्यंपरतोनतुकु
त्रचिदितिनिर्णयदीपके स्कांदाच्चाधिकएवकर्तव्यं इदंस्त्रीणांनित्यं यानपूजयतेदूर्वांमोहादिहयथाविधि त्रीणिजन्मानिवैध
व्यंलभतेनात्रसंशयः तस्मात्सर्वप्रयत्नेनप्रतिवर्षंवधूजनैःज्येष्ठामूलादिरहितापूजयेच्चाष्टमींशुभां कर्तव्याचैकभक्तेनज्येष्ठामूलं
यदाभवेत् ज्येष्ठामभ्यर्चयेद्भक्त्यानवंध्यंदिवसंनयेत् इतिभविष्योत्तरेनुकल्पेनानुष्ठानंनतुसर्वतोलोपः अथदूर्वाष्टमीव्रत
म् हेमाद्रौभविष्ये ब्रह्मन्भाद्रपदेमासिशुक्लाष्टम्यामुपोषितः पूजयेच्छंकरंभक्त्यायोनरःश्रद्धयान्वितः सयातिपरमंस्थानंय
त्रदेवस्त्रिलोचनः गणेशंपूजयेद्यस्तुदूर्वयासहितंमुने गणेशःशिवः फलानांशकलैर्दिव्यैर्गंधपुष्पैर्विलेपनैः दूर्वांपूजयतेशानं-
मुच्यतेसर्वपातकैः शुचौदेशेप्रजातायांदूर्वायांब्राह्मणोत्तम स्थाप्यलिंगंततोगंधैःपुष्पैर्धूपैःसमर्चयेत् खर्जूरैर्नारिकेरैश्चमातुलिं
गफलैस्तथा पूजयेच्छंकरंभक्त्यादूर्वायांविधिवद्द्विज दध्यक्षतैर्द्विजश्रेष्ठअर्घ्यंदद्यात्त्रिलोचने दूर्वाशमीभ्यांसंपूज्यमानवःश्रद्धया
न्वितः सर्वैस्तुकृतजन्मस्यात्सर्वदेवैस्तुवंदितः विद्यांप्राप्नोतिविद्यार्थीपुत्रार्थीपुत्रमाप्नुयात् धर्मानाप्नोतिधर्मार्थीकन्यार्थीलभते
चतां मनसायद्यदिच्छेततत्तदाप्नोतिमानवः यएवंपूजयेद्दूर्वांभूतेशंमानवःफलैः सप्तजन्मजपापौघैर्मुच्यतेनात्रसंशयः कृतोप-
वासःसप्तम्यामष्टम्यांपूजयेच्छिवं दूर्वासमेतंविप्रेंद्रदध्यक्षतफलैःशुभैः दूर्वामंत्रः त्वंदूर्वेमृतजन्मासिवंदितासिसुरैरपि

सौभाग्यंसंततिंदेहिसर्वकार्यभरीभव यथाशाखाप्रशाखाभिर्विस्तृतासिमहीतले तथाविस्तृतसंतानंदेहित्वमजरामरे
तल्लिंगमंत्रैरीशानमर्चयेत्प्रयतःशुचिः ततःसंपूजयेद्विप्रान्फलैर्नानाविधैर्द्विज अनग्निपक्वमश्नीयादअन्नंदधिफलंतथा
अक्षारलवणंब्रह्मन्नाश्नीयान्मधुनाचितम् दद्यात्फलानिविप्रेषुफलाहारःस्वयंभवेत् प्रणम्यशिरसादूर्वांशिवंशिवसुपा
श्रुते एवंयःकुरुतेभक्त्यामहादेवस्यपूजनम् गणत्वंयात्यसौब्रह्मन्मुच्यतेब्रह्महत्यया एवंपुण्यापापहराअष्टमीदूर्वसंज्ञि
ता चतुर्णामपिवर्णानांस्त्रीजनानांविशेषतः शुक्लाष्टम्यांतुसंप्राप्तेमासिभाद्रपदेतथा दूर्वांप्रशस्तांशुश्वेतामुत्तराशाभिमामि
नीं पूजयेद्गृहमानीयगंधमाल्यानुलेपनैः फलैर्मूलैस्तथान्नैवधूपदीपैश्चपूजयेत् अनग्निपक्वंयत्सर्वंनैवेद्यंचकथंचन भो-
क्तव्यंचनथाब्रह्मन्ननग्निपक्वंविसर्जयेत् दूर्वांकुरस्थांसंपूज्यप्रतिमांशंकरस्यच यौवनंस्थिरमायातियत्रयत्राभिजायते-
अष्टम्यांफलपुष्पैश्चखर्जूरैर्नारिकेरकैः द्राक्षामोदकपिष्टैश्चदाडिमैर्बदरैस्तथा नारिंगैर्जंबुकैश्चैवतथैवबीजपूरकैः दध्य
क्षतैःस्रजोभिश्चधूपैरेवसदीपकैः मंत्रेणानेनराजेंद्रशृणुष्वावहितोनृप दत्वापिष्टानिविप्रेभ्यःफलंचविविधंप्रभो तिलपि
ष्टकगोधूमधान्यपिष्टानिपांडव भोजयित्वासुहृन्मित्रंस्वयंबंधुजनैस्तथा ततोभुंजीततच्छेषंस्वयंश्रद्धासमन्वितः कर्त
व्याश्चैकभक्तेनज्येष्ठामूलंयदाभवेत् दूर्वामभ्यर्चयेद्भक्त्यानवंध्यंदिवसंनयेत् पक्षेभाद्रपदस्यैवंशुक्लाष्टम्यांयुधिष्ठिर
दूर्वाष्टमीव्रतंपुण्यंयःकरोतीहमानवः नतस्यक्षयमाप्नोतिसंततिःसप्तपौरुषी नंदतेवर्धतेनित्यंयथादूर्वातथाकुलम्
इतिश्रीभवि॰ दूर्वाष्टमीव्र॰ संपूर्णम् अथभाद्रशुक्लाष्टमीमारभ्यषोडशदिनपर्यंतमहालक्ष्मीव्रतम् तच्चार्धरात्रमति
क्रम्यवर्तिन्यांअष्टम्यांकार्यम् तदुक्तंचंद्रप्रकाशेस्मृत्यंतरे अर्धरात्रमतिक्रम्यवर्तते योत्तरातिथिः तस्यांज्येष्ठायुतायांप्रा
रंभःकार्यः तथाचस्कांदे मासिभाद्रपदेशुक्लेपक्षेज्येष्ठायुताष्टमी प्रारब्धव्यंव्रतंतत्रमहालक्ष्म्यायतनात्मभिः तदभावे
केवलायामपिकार्यम् समापनंतुकृष्णाष्टम्यांचंद्रोदयव्यापिन्यांकार्यम् चंद्रोदयव्रतेचैवतिथिस्तात्कालिकीभवेत् दि

तद्वयेचंद्रोदयसत्त्वेच कृष्णपक्षेष्टमीचैवेत्यादिवाक्यात्पूर्वैव अपरेदिनेचंद्रोदयोत्तरंत्रिमुहूर्तीचेत्परैव तदुक्तंमदनरत्नेपुराण
समुच्चये पूर्वावापरविद्धावाग्राह्याचंद्रोदयेसदा त्रिमुहूर्तातुसापूज्यापरतश्चोर्ध्वगामिनी अथव्रतविधिः हेमाद्रौस्कांदे
अथपूजनं आलयंतेहिकथितंकमलेकमलालये विमलेकमलेह्यस्मिन्स्थितिंत्वंकृपयाकुरु आवाहनं कमलेपाहि
मेदेविस्वर्णसिंहासनंशुभं गृहाणेदंमयादत्तंभक्तियुक्तेनचेतसा आसनं गंगादिसलिलाधारंतीर्थमंत्राभिमंत्रितम् दूरया
त्राश्रमहरंपाद्यंमेप्रतिगृह्यतां पाद्यंस॰ अर्घ्यं॰ आचम्यजगदाधारेसिद्धिलक्ष्मीजगत्प्रिये चपलेदेवितेदत्तंतोयंगृण्ह
नमोस्तुते आचमनं पयोदधिघृतंक्षौद्रंसितयाचसमर्पितं स्नानंपंचामृतेनाद्यकुरुदेविदयानिधे पंचामृतं इदंनवम
हालक्ष्म्याःकर्पूरागरुवासितं तीर्थेभ्यःसुसमानीतंस्नानार्थंप्रतिगृह्यताम् स्नानं सूक्ष्मतंतुभवंवस्त्रंनिर्मितंविश्वकर्मणा
लोकलज्जाहरंदेविगृहाणसुरसत्तमे वस्त्रंकंचुकीं नानासौभाग्यद्रव्यम् मलयाचलसंभूतंघनसारंमनोहरं शीतलंब
हुलामोदंचंदनंप्रतिगृह्यताम् चंदनं नीलोत्पलंमहामोदंमत्तालिकुलसंकुलम् आनंदिनंदनोत्पन्नंपद्मंगृण्हनमोस्तुते पु
ष्पाणि अथनामपूजा श्रियैनमः लक्ष्म्यैन॰ वरदायै॰ विष्णुपत्न्यै॰ क्षीरसागरवासिन्यै॰ हिरण्यरूपायै॰ सुवर्णमालिन्यै॰
पद्मवासिन्यै॰ पद्मप्रियायै॰ मुक्तालंकारिण्यै॰ तूर्यायै॰ चंद्राननायै॰ विश्वमूर्त्यै॰ मुक्त्यै॰ मुक्तिदात्र्यै॰ ऋद्ध्यैन॰ समृद्ध्यैन॰ तुष्ट्यै॰
पुष्ट्यै॰ धनेश्वर्यै॰ श्रद्धायै॰ भोगिन्यै॰ भोगदायै॰ धात्र्यै॰ गंधसंभारसन्नद्धकस्तूरीमोदसंभवम् सुरासुरनरानंदिधूपंदेविगृहा
णमे धूपं मार्तंडमंडलाखंडचंद्रबिंबाग्नितेजसा निधानंदेविदीपोयंनिर्मितस्तवभक्तितः दीपं॰ देवतालयपातालभूतला
धारधान्यजं षोडशाकारसंभारंनैवेद्यंतेनमःसदा नैवेद्यं स्नानादिकंविधीयंतेयतःशुद्धिःप्रजायते एतदाचमनीयंचमहा
लक्ष्मिविधीयतां आचमनं करोद्वर्तनम् पातालतलसंभूतंवदनांभोजभूषणम् नानागुणसमाकीर्णंतांबूलंप्रतिगृह्यतां
तांबूलं हिरण्यगर्भेतिदक्षिणां आज्यंचेतिनीराजनं शारदेंदुकलाकांतिःस्निग्धनेत्राचतुर्भुजा पद्मयुग्माचाभयदाक

ख्यग्रकरांबुजा पुष्पांजलिं विष्णोर्वक्षसिपद्मेचशंखेचक्रेगदावरे लक्ष्मीदेवियथासित्वंमयिनित्यंतथाभव प्रार्थना
उत्तार्यदोरकंबाहोर्लक्ष्मीपार्श्वेनिवेदयेत् लक्ष्मीदेविगृहाणत्वंदोरकंयन्मयाधृतम् कथांश्रुत्वासुवर्णंच दत्वाचार्यायद
क्षिणां एवंनिर्वर्त्यविधिवत्पूजनंबटुकस्यच चातुर्वर्ण्यंचसंभोज्ययथाशक्त्याचदक्षिणा दीपांश्चषोडशापूपान्गोधूमा
नांद्विजातये दत्वातत्संख्ययाभुक्त्वारात्रौजागरणंचरेत् चंद्रोदयेचसंजातेअर्घ्यंदद्यात्ततोव्रती मंत्रेणानेनविप्रेंद्रशंखे
नांबुफलान्वितम् नमोस्तुतेनिशानाथलक्ष्मीभ्रातर्नमोस्तुते व्रतसंपूर्णतांयातुगृहाणार्घ्यंनमोस्तुते चंद्रायार्घ्यं प्रात
र्विसर्जयेद्देवींमंत्रेणानेनसुव्रत पंकजंदेविसंत्यज्यममवेश्मनिसंविश यथासपुत्रभृत्योहंसुखीस्यांत्वत्प्रसादतः वि
सर्जनं इतिपूजनं अथकथा स्कंदउवाच सौभाग्यजननंस्त्रीणांदौर्भाग्यपरिकृंतनम् परमैश्वर्यजननंतद्व्रतंब्रू
हिशंकर ईश्वरउवाच॰ साधुसाधुमहाबाहोयत्पृष्टोहंत्वयानघ तत्राहंसंप्रवक्ष्यामिव्रतानामुत्तमंव्रतं येनचीर्णेनन
नरोदुर्गतिंयातिकर्हिचित् सुभगादुर्भगावापिस्त्रियोवाविधवागुह अस्तिदेव्याव्रतंपुण्यंमहालक्ष्म्याःषडानन नारीणांच
नराणांचसर्वदुःखापहंतथा देवासुरमभूद्युद्धंपूर्णमब्दशतंपुरा वृत्रेसुराणामधिपेदेवानांचपुरंदरे तत्रदेवैर्महावीर्यैर्ना
रायणबलाश्रयात् असुरानिर्जिताःसर्वेपातालतलमाययुः केचिद्विलंघिताःकेचित्प्रविष्टावरुणालयम् गिरिदुर्गंसमाश्रि
त्य केचित्तस्थुर्महाबलाः तत्रकोलासुरोनाममहावीर्योमहाबलः गोमंतंदुर्गमंदुर्गंगिरिमाश्रित्यनिर्भयः याराजकन्य-
कालोकेरूपवत्योमहागुणाः आनीयगिरिदुर्गस्थोरमयामाससर्वशः रमयित्वापितास्तत्रकामरूपीविहंगमः एतस्मिन्ने
वकालेतुआगतौमुनिसत्तमौ श्रुतिप्रभावसंपन्नौपुलस्त्योगौतमस्तथा तीर्थयात्राप्रसंगेनश्रुत्वावाक्यंजनस्यतत् कोला
सुरजयमितिकन्याहेतोःशिखिध्वज तावूचतुर्जनंसर्वमगस्त्योस्तिमहामुनिः येनतोयनिधिःपीतोविंध्याचलनिवासिना
वातापील्वलनामानौदैत्यौयेनविनाशितौ तंगच्छामोवयंसर्वेकोलासुरवधायच इत्यामंत्र्यजनाःसर्वेगत्वाचमभिवाद्यच

ऊचुःसर्वेयथावृत्तंकोलासुरविचेष्टितं तच्छ्रुत्वाभगवानाहमैत्रावरुणरग्र्यधीःसृष्टिस्थितिविनाशानांकारणंभक्तवत्सलाः
रामस्यादौतपस्यंतिब्रह्मविष्णुमहेश्वराः तिस्त्रःसंध्यामूर्तिमत्यस्तेषांशुश्रूषणेरताः प्रविश्यतामहालक्ष्मीःशक्तिरूपेणसं-
स्थिता सर्वशक्तियुतादेवीलोकानांहितकाम्यया इत्युक्त्वात्वरितंगत्वाकोलासुरवधाप्तये निवेद्यनिखिलंतेभ्यस्तस्थुः-
प्रांजलयोजनाः तच्छ्रुत्वानिखिलंतेभ्योब्रह्मविष्णुमहेश्वराः संध्यात्रयंसमाहूयवाचंप्रोचुर्जनेश्वराः हनिष्यतिमहालक्ष्मी
र्युद्धेकोलासुरंरिपुं भगवत्योमूर्तिमत्योदंडशूलादिभिर्वरैः आयुधैर्विविधैःकृत्वाजयमाप्स्यथसंयुगे युष्माकंतुसहायोसौ
युष्मत्क्रोधसमुद्भवः भूतनाथोभूतमन्युर्यःसहायोभविष्यति इत्युक्त्वात्वरितंगत्वारुरुधुःकोलराक्षसं निरुध्यचपुरींदेव्यो
जगर्जुर्जलदस्वनाः भिदंत्यश्चदिशस्तद्वद्वर्धयंत्यश्चतत्क्रुधं कोलासुरोपितच्छ्रुत्वाप्रोत्पपातमहासनात् रोषेणक्रोधताम्रा
क्षोमेरोरिवमृगांतकः हस्त्यश्वरथपादातचतुरंगबलान्विता निर्ययौपृतनायोद्धुंकालिकायाइवाशनिः सकुंडलशिरस्त्रा
णकवचीधृतबाणधीः बद्धगोधांगुलित्राणःक्रुद्धोवृत्रइवापरः ततोराक्षससैन्यंतद्भूतनाथेनसंगतम् देवनारीमनोल्ला-
सियुद्धंचक्रेतिभीषणं महारावैर्भीमघोषैर्बाणैःक्रेंकारनिःस्वनैः गोरवराणांनिनादैश्चलोकःशब्दमयोभवत् जयाभिधी
निवदतांधावतामितरेतरं ववृधेसमरंघोरंमुष्टामुष्टिकचाकचि उद्धतोराक्षसबलेभूतनाथोमहाबलः ममर्दराक्षसानीकं
शरवर्षैश्चदारुणैः हतंदृष्ट्वासुरबलंक्रुद्धःकोलासुरोरणे अभिद्रुत्यगदापाणिस्ताडयामासभैरवं ययौमूर्छांमहावीर्यस्ते
नाभिहतमस्तकः ततोदेव्योतिवेगेनत्वभिद्रुद्रुवुरुद्धते त्रिशूलैरभिजघ्नुस्तंपट्टिशैश्चव्यघातयन् मुष्टिभिस्ताडयामासु
र्नखैश्चाभिव्यदारयन् पादघातैःसमाजघ्नुःसिंहःकरिवरंयथा सकुंडलशिरस्त्राणोदष्टोष्ठोरक्तलोचनः कृतभ्रुकुटिवक्त्रोसौ
राक्षसस्तांमुहुर्मुहुः गदयाताडयामासशिरःकंठांसकुक्षिषु बभंजुस्तांगदांतांतुहसंत्यस्तामदाकुलाः ततोधनुर्धरोभूत्वा
बाणजालमवाकिरत् तासांशरीरमर्माणिभिंदंच्छरपुरोगमैः ननादबहुवीरोसौहृदयंचाभिनच्छरैः ततःक्रुद्धतरास्तासु

पादेनजगृहुर्भृशं आकाशेभ्रामयित्वातंचिक्षिपुर्गगनेक्रुधा कोलासुरोपिपतितोयावदुत्थातुमिच्छति तावन्निर्गत्यलक्ष्मीस्तंपादाभ्यांप्रत्यपीडयत् तत्पादपीडितोदैत्योविवृत्तनयनेभृशं मुक्तकंठस्वनंकृत्वाततोमोहमुपेयिवान् ततोदेवाःसगंधर्वामनुष्याऋषयस्तुवन् देवनाथाश्चदेव्यश्चननृतुःसमुदाकुलाः देवदुंदुभयोनेदुःपुष्पवृष्टिःपपातह दिशःप्रसेदुर्मरुतोववुर्मंदरवंजगत् सुरासुरशिरोरत्नापीडितांघ्रिसरोरुहं देव्योदिव्येनयानेनयांतिकोल्हापुरंप्रति आयांतींपद्मजांवीक्ष्यमुक्तपादविशृंखलः तुष्टावपरयाभक्त्याराजकन्यागणोमुदा राजकन्याऊचुः वंदारुवीरसुरवृंदकिरीटरत्नश्रेणिश्छटानिकरकल्पितरत्नदीपम् देवित्वयीहचरणंशरणंजनानांसेवामहेसकलमंगलवर्धनाय उत्फुल्लकैरवदलायतलोचनायैगंडोल्लसत्कपलकुंडलमंडितायै राकाशशिप्रतिभटाननकोमलायै तस्यैनमःकमललोचनवल्लभायै सङ्कल्पकल्पलतिकांकरिकंटभूषांकेयूरहेमकटकोज्ज्वलकंकणांकां संसारसागरमुखेपततोममाद्यदेहित्वदीयकरयष्टिमनंगमातः दृष्ट्वादेविजनाजयायविविधाब्रह्माधिपत्यंगताविष्णुर्वक्षसियांचकारनरत्नांलीलाब्जमालाभ्रमं केशाग्रप्रहितंत्वदीयचरणद्वंद्वाब्जसेवारतंकारुण्यामृतसारपूजितदृशामामंबपाहीश्वरि मल्लिकाफुल्लकुसुमोज्ज्वलमध्यभागधम्मिल्लभारजिततारकवृंदशोभाम् उत्तप्तहेमनिकषोज्ज्वलकायकांतिर्लक्ष्मीस्वयंप्रणमतांश्रियमातनोति इतिस्तुत्वामहालक्ष्मींभक्तानामिष्टदायिनीं योगिन्योद्यप्रभविष्यध्वमितितासांवरंददौ दृष्ट्वातास्तुमुदादेवीसारूप्यंचप्रदापयत् ताभिर्निषेवितादेवीवरंवर्यंददौमुदा राजकन्यास्ततःसर्वामुक्ताःस्वपुरमाययुः ततःप्रभृतिलोकेषुपूज्यास्ताःसर्वकामदाः ताश्चतुःषष्टियोगिन्योमहालक्ष्मीपरिग्रहात् नृत्यंतिनिशिवहेस्तत्रगीतवादित्रनिःस्वनैः पुरादेव्यामहालक्ष्म्याकरहाटपुरेनिशि एवंप्रभावासादेवीविष्णुरामाषडानन व्रतस्यास्यविधानंचशृणुमत्तोविधानतः मासिभाद्रपदेशुक्लेपक्षेज्येष्ठायुताष्टमी प्रारब्धव्यंव्रतंतत्रमहालक्ष्म्यायतात्मभिः करिष्यामिव्रतंदेवित्वद्भक्तस्त्वत्परायणः तदविघ्नेनमेयातुसमाप्तिंत्वत्प्रसादतः इत्युच्चार्यततोबध्वादोरकं

दक्षिणेकरेषोडशग्रंथिंसहितंगुणैःषोडशभिर्युतं ततोन्वहंमहालक्ष्मींपूजयेन्नियतात्मवान् गंधपुष्पैःसनैवेद्यैर्यावत्कृष्णाष्टमीदि
नं तस्मिन्दिनेतुसंप्राप्तेकुर्यादुद्यापनंव्रती वस्त्रमंडपिकांकृत्वामाल्याभरणशोभितां त्रिभूमिंकांचनश्लक्ष्णांनानादीपैश्च-
शोभिताम् चतस्रःप्रतिमाःकृत्वासौवर्णीस्तत्स्वरूपिणीः स्नपनंकारयेत्तासांपंचामृतविधानतः षोडशैरुपचारैश्चधूपदीपा
दिभिस्तथा जागरंतत्रकर्तव्यंगीतवादित्रनिःस्वनैः ततोनिशीथेसंप्राप्तेभ्युदितेमृतदीधितौ कृत्वातुस्थंडिलेपद्मंषडंगंपूज
येत्ततः दद्यादर्घ्यंचरागेणव्रतीतस्मैसमाहितः क्षीरोदार्णवसंभूतचंद्रलक्ष्मीसहोदर पीयूषधामन्रोहिण्यासहितोर्घ्यंगृ
हाणवै क्षीरोदार्णवसंभूते कमलेकमलालये प्रयच्छसर्वकामान्मेविष्णुवक्षस्थलाशये पुत्रान्देहियशोदेहिसौख्यंसौभा
ग्यमेवच कालिकालिमहाकालिविकरालिनमोस्तुते त्रैलोक्यजननित्राहिवरदेभक्तवत्सले एकनाथेजगन्नाथेजमद
ग्निप्रियेनघे रेणुकेत्राहिमांदेविराममातःशिवंकुरु कुरुश्रियंमहालक्ष्मीअप्रियंत्वाशुनाशय मंत्रैरेतैर्महालक्ष्मींप्रा-
र्थ्यश्रोत्रिययोषितः श्रीसूक्तेनतथावन्हौपद्मानिजुहुयाच्छुचिः पायसंचैवबिल्वानितदलाभेतथाघृतं ग्रहेभ्यश्चैव-
होतव्यंसमिच्चरुतिलादिकम् चंदनंतालपत्रंचपुष्पमालादिकंतथा नवेशरावेभक्ष्याणिक्षिप्त्वाबहुविधानिच प्रत्येकंषो
डशैतानिपूगपूर्णानिचैवहि तान्यन्येनसमाच्छाद्यव्रतीदद्यात्समंत्रकं क्षीरोदार्णवसंभूतालक्ष्मीश्चंद्रसहोदरा व्रतेना
नेनसंतुष्टाप्रीयतांविष्णुवल्लभा इंदिराप्रतिगृह्णातिइंदिरावैददातिच इंदिरातारकोभाभ्यामिंदिरायैनमोनमः दद्या
दुपायनादीनिश्रोत्रियाणांचयोषिताम् चतस्रःप्रतिमास्तास्तुब्राह्मणायनिवेदयेत् एवंकृत्यंतुनिर्वर्त्यव्रतीभोजनमा
चरेत् स्कंदउवा॰ केनेदंस्वीकृतंपूर्वंकथमस्मिन्प्रकाशितं ब्रूहिमेतत्त्वतोदेवयद्यहंतववल्लभः शंकरउवा॰
आसीद्राजासार्वभौमोमंगलार्णइतिश्रुतः कौंडिण्यनगरेरम्येतस्यपद्मावतीप्रिया तत्रागतःकश्चिदेकःसेवकोब्राह्म
णोत्तमः अज्ञातनाम्नस्तस्यासौनामचक्रेनृपस्तदा तवल्लकइतिख्यातोबभूवद्विजसत्तमः कदाचिन्मृगयासक्तोभूपा

लोवनमाविशत् तत्रविध्वावराहादीन्मृगान्हत्वासहस्रशः क्षुत्तृट्परिगतःश्रांतोवृक्षमूलमुपाश्रितः उदकान्वेषणेचारा
न्प्रेषयामाससर्वशः वनेजलंतुनापश्यन्क्वचिच्छ्रांताःप्रयत्नतः तेनत्वान्नृपतिंप्रोचु र्नात्रांभइतिदुःखिताः तवल्लकोपिब
भ्रामविपिनंतद्तंद्रितः भ्रममाणस्तदापश्यत्कस्मिंश्चिद्वनगह्वरे रम्यंसरोवरंदिव्यंकुमुदोत्पलमंडितम् तत्रापश्यद्देवक-
न्यादिव्यरूपमनोरमाः चार्वंगीश्चारुनयनाःपीनोन्नतपयोधराः हारकंकणकेयूरनूपुरालंकृताःशुभाः पूजयंतीर्महालक्ष्मीं
व्रतरूपेणचादरात् नवल्लकोपिपप्रच्छकिमिदंकथ्यतामिति स्त्रियऊचुः महालक्ष्मीव्रतमिदंसर्वकामफलप्रदम् क्रियते
स्माभिरेकाग्रमनोभिस्तत्तुभक्तितः तवल्लकोपितच्छ्रुत्वाव्रतंजग्राहभक्तिमान् तदनुज्ञांगृहीत्वाचजलमादायसत्वरः आज
गामजलंतस्मैदत्वाचांभोजनैःसह जलंपीत्वानृपस्तस्य दृष्टवान्दोरकंकरे किमिदंदोरकंविद्वन् किंव्रतंकृतवानसि राज्ञा
पृष्टस्तवल्लोपिकथयामासतद्व्रतम् तच्छ्रुत्वाराजशार्दूलोव्रतंजग्राहभक्तिमान् तवल्लकेनसहितोराजास्वपुरमाययौ प
द्मावत्यागृहंगत्वातयारंतुंगतःसह रममाणाथसादेवीतेनराज्ञाप्रियेणवै तंदृष्ट्वादोरकंहस्तेकुपितात्यंतकोपना कया
त्वंवंचितोब्रूहिकयादत्तःसदोरकः ज्वालामालाकुलेवन्हौक्षिप्तवत्यतिकोपिता हाहाकष्टमिदंपापंकृतंमूढनयात्वया इ
तिनिर्भर्त्स्यतांराजातत्याजवनगह्वरे सात्वहानिंययौपश्चात्तत्रहानिंययौनृपः महालक्ष्म्यापचारेणसारण्येजलवर्जिते
मृगमाणावनेतस्मिन्नकश्चिद्गतिमाप्नुयात् विचरंतीवनेतत्रऋषेःकस्यचिदाश्रमम् ददर्शमृगसंकीर्णंशांतकृष्णमृगा-
न्वितम् तत्रापश्यद्वनेरम्येवसिष्ठमुनिपुंगवम् ववंदेचरणौतस्यविसंज्ञादुःखकर्शिता चिरंध्यात्वामुनिस्तस्याज्ञात
वान्दुःखकारणम् महालक्ष्म्यापचारेणज्ञातंविज्ञानचक्षुषा तद्व्रतंकारयामासतस्यादुःखोपशांतये तद्दुःखंतत्क्षणा
देवविनष्टमभवत्तदा पुनश्चमृगयासक्तोभूपालोवनमाविशत् क्वचिन्मृगंसमाविध्यबाणेनैकेनबाहुमान् अन्वगच्छन्
मृगपदंनस्याभूच्चयदागमः वरंमुनिंददर्शाग्रेवसिष्ठंवीतकल्मषं कृतातिथ्यक्रियोदृष्ट्वाचरंतींबहिरंतिके हावभावक

टाक्षैश्चहरंतींहरिणेक्षणां मदान्निर्गत्यनृपतिःप्रोवाचसस्मितंवचः रंभोरुकासिकल्याणिकिमर्थंचरसेवने किन्नरीमानु
षीवाल्यंयक्षिणीचारुहासिनि किमत्रबहुनोक्तेनभजमानंभजस्वमाम नृपेणतेनभक्त्योक्तासस्मितावाक्यमब्रवीत् पुन
र्भजामिचाहंत्वामवेहिमहिषींतव महालक्ष्म्यापचारेणत्वयाहीनावसाम्यहं मुनींद्रस्याश्रमेरम्येतरुगुल्मोपशोभिते म
मोपरिकृपाविष्टोमहालक्ष्मीव्रतोत्तमं कारयामासविधिवत्सर्वविघ्नोपशांतये तयोक्तंवचनंश्रुत्वासचोत्फुल्लविलोचनः
ऋषेरनुज्ञामादायप्रियामादायसत्वरः हृष्टपुष्टजनैर्जुष्टंपताकाध्वजशोभितं प्रविवेशतयासार्द्धंसपौरैरभिवंदितः महाल
क्ष्मीव्रतंभूयस्तयासहचकारह भुंक्तेहभोगान्विपुलान्पुत्रपौत्रसमावृतः भूपालःसार्वभौमोभूत्तवल्लोमात्यतांययौ महा
लक्ष्म्याःप्रसादेनसन्निधिःसर्वसंपदाम् एवंप्रभावासादेवीवराणामिष्टदायिनी सर्वपापहरादेवीसर्वदुःखापहारिणी ए
वंषोडशवर्षंतुकर्तव्यंव्रतमुत्तमं याकरिष्यतिमेप्रीत्यास्वयंसिद्धिमुपासते लोकपालाश्चतुष्यंतिदासाइवमनोरथान्
नारीवापुरुषःकरिष्यतिमुदाभक्त्याव्रतंयत्नतः सेवंतेहरिरुद्रपद्मजसुराःकुर्वंतितस्यप्रियम् तत्पादंपारिरंजयंतिमनु
जा मौलिप्रभामंडलैस्तस्मिन्नेवकुटुंबिनीवसतिसालक्ष्मीःस्वयंविष्णुना सुभक्त्यावाप्यभक्त्यावाकुर्वंतिव्रतमुत्त
म् अंतकालेचतान्विष्णुःसंसारात्परिरक्षति यइदंशृणुयान्नित्यंश्रावयेद्वासमाहितः नसंत्यजतितंलक्ष्मीरलक्ष्मीर्नै
वजायते सर्वपापविनिर्मुक्तःस्वर्गलोकेमहीयते युधिष्ठिरउवा॰ स्वस्थानलाभपुत्रायुःसर्वैश्वर्यशुभप्रदं व्रतमेकं
समाचक्ष्वविचार्यपुरुषोत्तम कृष्णउवाच दुर्वारैश्चैवदैत्येंद्रैःपरिव्याप्तेत्रिविष्टपे एतदेवकृतस्यादौदेवेंद्रःप्राहनारद
म् तस्यश्रुत्वाततोवाक्यंसमुनिःप्रत्यभाषत नारदउवा॰ पुरंदरपुरापूर्वंपुरमासीत्सुशोभितम् रत्नगर्भाभवद्भूमि
र्यत्ररत्नाढ्यभूधराः यत्रांगनाजनापांगभृंगालोचनसायकैः त्रैलोक्यंस्ववशंचक्रेदेवःकुसुमसायकः चतुर्वर्गजनिर्यत्र
तच्चविश्वस्यभूषणम् विश्वकर्मापियद्वीक्ष्यकंपयत्यनिशंशिरः तत्राभवन्महापालोराजाभून्मंगलालयः चिल्लदेवी

प्रियातस्यदुर्भगैकाबभूवह अन्यातुचोलदेवीयामहिषीसायशस्विनी कदाचिन्मंगलोराजाचोलदेवीसहायवान् प्रासादशिखरारूढःस्थलीमेकामपश्यत तामालोक्यमहीपालःस्मरस्मेरमुखांबुजः चोलदेवींप्रतिप्राह दंतद्योतितदिङ्मुखः चंचलाक्षितवोद्यानं कांतिनिंदितनंदनं कारयामिनपोद्दिष्टस्तत्रोद्यानमकारयत् संपन्नंतुतदुद्यानंनानाद्रुमलतान्वितं नानाफलसमायुक्तंनानापक्षिसमाहृतं तत्रागत्यमहाक्रोडस्तत्तुल्यस्तनभस्थलः प्रावृट्कालघनश्यामश्चक्षुराक्षिप्तचंचलः दंष्ट्रावकृष्टचंद्रार्कःप्रलयांभोधरध्वनिः उद्यानंभंजयामासनानाद्रुमलतान्वितं कांश्चिदुत्पाटयामासपादपान्यांडुनंदन कांश्चिद्दंतप्रहारेणकांश्चिद्दंतप्रघर्षणैः जघानकांश्चित्पुरुषान्रक्षकानंतकोपमः तद्भुनक्तीतिविज्ञायसंहृत्योद्यानपालकाः सभयास्तस्यवृत्तांतमूचुश्चनृपतेःपुरः तदाकर्ण्यततोराजाक्रोधारुणितलोचनः वधायदंष्ट्रिणस्तस्यसंदिदेशाखिलंबलं ततश्चचालभूपालस्त्रिगंडगलितैर्गजैः आप्लावयन्महींसर्वांवाजिवृंदवृतांवरां चालयन्सकलान्शैलान्स्यंदनौघमरुद्भवैः पदातिभिर्महावीरैःपूरयन्निखिलादिशः ततोगाढंसमावृत्यतदुद्यानंनरेश्वरः पत्तिप्रांतमहानैःपूरयन्निखिलादिशः पथियस्यवराहोयंप्रयात्युपवनांतरम् तस्यावश्यंशिरश्छेदंविदधामिरिपोरिव तस्यभूपस्यतद्वाक्यंसमाकर्ण्यससूकरः जगामास्यैवमार्गेणप्राणिनांचेष्टितंयथा ततःससूकरासक्तःकशयातंप्रताडयन्च व्रीडाकलंकितस्यैंदुर्मार्गितस्यैवसोगमत् गत्वाथविपिनंघोरंसिंहशार्दूलसंकुलं तमालतालहिंतालशालार्जुनलतान्वितम्-झिल्लीझंकारसंभारवाचाटितदिगंतरं कोलोवेलामवाप्याथसोभवद्राजसंमुखः भल्लेनसोवधीत्कोलंवज्रेणाद्रिंयथाहरिः अथव्योम्निविमानस्थःस्मरसुंदरविग्रहः क्रोडरूपंपरित्यज्यसोब्रवीन्मंगलंनृपं गंधर्वउवा॰ स्वस्तितेस्तुमहीपालत्वयामुक्तिःकृताममतमाकर्णयवृत्तांतंयेनाहंजातईदृशः एकदादेवनावृंदैःसंवृतःकमलासनः चंचत्पुटादिभिस्तालैःषड्जाद्यैःसप्तभिःस्वरैः मंद्रादिभिस्त्रिभिर्मानैर्गीयमानंमयानृप नानास्थानगुणोपेतमश्रौषीद्गीतमुत्तमम् गीयमानश्च्यु

तत्स्थानात्ततोहंकर्मणामुना शप्तश्चित्ररथस्तेनब्रह्मणासृष्टिकर्मणा ब्रह्मोवाच कोलोभवत्वंमेदिन्यांमुक्तिस्तेस्तुतदाभ
वेत् निर्जिताखिलभूपालोमंगलस्त्वांहनिष्यति तदद्यघटितंसर्वंत्वत्प्रसादान्महीपते मद्गृहाणवरंभूपदेवस्यापिसुदुर्ल
भं महालक्ष्मीव्रतंदिव्यंचतुर्वर्गफलप्रदं लभस्वसार्वभौमत्वंगच्छराज्यंनिजंद्रुतं नारदउवा० चित्ररथोथगंधर्वउक्त्वे
दंभूपतिंप्रति अंतर्धानंगतस्तत्क्षणःशरत्कालइवांबुदः अथमंगलभूपालःपार्श्वस्थंद्विजमागतम् विलोक्यबटुकंकंचित्कक्षा
निक्षिप्तशंबलं उवाचमधुरांवाचंस्मितपूर्वांशुचिस्मितां देवस्त्वंदानवस्त्वंवागंधर्वोवाथराक्षसः सत्यंवदबटोकस्मात्कि
मर्थंत्वमिहागतः श्रुत्वैतत्शिष्यभावंत्वंप्राहत्वद्देवसंभवः अहंसार्द्धंत्वयायातस्तदादिशयथोचितं राजायतस्तुवाचेदंत्वंब
टोनूतनाद्व्ययः अपांस्थानंविलोक्यत्वंतूर्णंतोयंममानय अथविश्रम्यभूपालंबटुकोवटपादपे तथाकृत्यतुरंगंचसमारु-
ह्यमहामतिः जगामपक्षिघोषेणयत्रास्तेसुंदरंसरः कमलैकनिवासेनरथांगाभरणेनच वनमालालयत्वेनदधन्नारायणीं
तनूं भग्नवायुशतद्योगमक्षारंविषवर्जितं नाशितागक्तितृष्णार्त्तिप्रसन्नंसागराधिकं पंकेमग्नोथतत्राश्वःपृष्ठादुत्तीर्यत-
स्यसः चतुर्दिशंनिरीक्ष्याथतस्यैवसरसस्तटे दिव्यवस्त्रपरीधानंदिव्याभरणभूषितं कथयंतंकथांदिव्यांस्त्रीणांसा
र्थमपश्यत उपसृत्याथतंसोथस्ववृत्तांतंनिवेद्यच कृतांजलिरितिप्राहबटुर्मधुरयागिरा बटुरुवाच एतत्किंक्रि
यतेसार्थत्वयाभक्तिपरेणवै कोविधिःकिंफलंचास्यब्रूहितन्मेयथातथं श्रुत्वाचतमुवाचेदंसार्थःकरुणयागिरा सार्थ
कउवाच शृणुविप्रैकचित्तेनश्रद्धाभक्तिसमन्वितः यामायाप्रकृतिःशक्तिस्त्रैलोक्येप्यभिधीयते व्रतमेतन्महालक्ष्म्या
स्तस्याःसर्वफलप्रदं आकर्णयविधिंचास्यकथ्यमानंमयाबटो भाद्रेमासिसिताष्टम्यामारंभोस्यविधीयते प्रातःषोडशकृत्व
स्तःप्रक्षाल्यांघ्रीकरौसुखम् तंतुषोडशसंसिद्धंग्रंथिषोडशसंयुतं मालतीपुष्पकर्पूरचंदनागरुचर्चितं लक्ष्म्यैनमोथमंत्रे
णप्रतिग्रंथ्यभिमंत्रितं धनंधान्यंधरांधर्मंकीर्तिमायुर्यशःश्रियं तुरगान्दंतिनःपुत्रान्महालक्ष्मीप्रयच्छमे मंत्रेणानेनबध्वा

थदोरकंदक्षिणेकरे कांडानिषोडशादायदूर्वायाश्चाक्षतांस्तथा एकचित्तःकथांश्रुत्वापूजयेत्तैश्चदोरकं ततस्तुप्रातरारभ्ययावत्स्यादसिताष्टमी तावत्प्रक्षाल्यहस्तौतुपादादीनिकथांतथा शृणुयात्प्रत्यहंविप्रतत्संख्यैरक्षतादिभिः अथकृष्णाष्टमींप्राप्यनक्तकालेजितेंद्रियः स्नातःशुक्लांबरधरोव्रतीपूजागृहंविशेत् तत्रोपविश्यपूर्वास्यश्चारुधौतासनोपरि श्वेतपत्रंलिखेदष्टदलंकमलमुत्तमम् ऐंद्र्यादिशक्तिसंयुक्तंपार्श्वेपत्रंसकेसरम् कर्णिकायांततोलक्ष्मींकर्पूरक्षोदपांडुरां शुभ्रवस्त्रपरीधानांमुक्ताभरणभूषितां पंकजासनसंस्थानांस्मेराननसरोरुहां शारदेंदुकलाकांतिस्निग्धनेत्रांचतुर्भुजां पद्मयुग्मामभयदांकरव्यग्रकरांबुजां अभितोगजयुग्मेनसिंच्यमानांकरांबुना संचिंत्यैवंलिखेद्देवींकर्पूरागरुचंदनैः ततस्त्वावाहनंकुर्यान्मंत्रेणानेनसुव्रती महालक्ष्मिसमागच्छपद्मनाभपदादिह पंचोपचारपूजेयंत्वदर्थेदेविकल्पिता षोडशाहेतुसंपूर्णेकुर्यादुद्यापनंव्रती विधिनायेनविप्रेंद्रशृणुश्रद्धासमन्वितः दातव्याधेनुरेकावैस्वर्णशृंगादिसंयुता श्रोत्रियायसुवर्णंचतथान्नवसनादिकम् यथाशक्त्यासुवर्णंचदत्वापूर्णंभवेद्व्रतम् द्विजेभ्यःषोडशेभ्यश्चप्रदद्याद्वसनादिकम् सार्यउवाच एतत्तेकथितंविप्रव्रतानामुत्तमंव्रतं तद्विधानादनायासाल्लभतेवांछितंफलम् कृत्वाव्रतंपरंविप्रत्वंराज्ञानच्चकारय व्रतमेतत्त्वयाविप्रदेयंश्रद्धावतेपरम् नास्तिकानांपुरस्तात्तुनप्रकाश्यंकथंचन नमस्कृत्वाथतंसार्थंपंकादुत्थाप्यवाजिनं सरसोभस्तयादायपद्मिनीपद्मयंत्रितं आरुह्यतुरगंविप्रोराजांतिकमुपागमत् निवेद्यतद्वृत्तंविप्रोराजानमथकारयत् नानाप्रकारसंभूतंमाबलंबटुकस्यच व्रतप्रभावादभवत्सभूभुक्भूभृतांवरः अथारुह्यमहीपालोबहुवर्षाणितंहयम् तद्व्रतस्यप्रभावेनतूर्णंस्वपुरमागतः तमायांतंसमालोक्यराजानंभूपुरंदरं उत्सवंचक्रिरेपौरास्तौर्यादिकपुरःसराः चलसताकदोर्मालंलसत्कलशमौलिकं पुरंनृत्यदिवाभातिछन्नंघंटौघघर्घरैः अथोत्कलिकयाकाश्चिद्धावंतिस्मवरांगनाः स्वर्णमुक्तालताजालैश्चतुष्कमिवकुर्वती काचिद्विमुक्तकेशौवपरागान्नयनांजसा काचिन्नितंबभारार्ताका-

न्नितीनपयोधरा अथाविशन्महीपालोबटुनासहितोगृहं पौरनारीजनाक्षिप्तलाजैःपूरितविग्रहः अतोत्तीर्यहयात्तस्माद्ब
टुबाह्ववलंबितः जगाममंगलोराजाचोलदेवीतुयत्रवै दृष्ट्वातुचोलदेवीसादोरकंराजबाहुके विमृश्यमनसाक्रुद्धाशंकांचक्रेनृपे
त्विमाम् आखेटकस्यव्याजेनगतोन्यांवल्लभांप्रति सौभाग्यायतयाबद्धोदोरकोदक्षिणेकरे तथैवबटुकश्चायंद्रष्टुंमांप्रेषि
तोध्रुवं ततोदृष्ट्वैवदुष्टात्माकोपादाच्छिद्यदोरकं चिक्षेपचमहीपृष्ठेस्वसौभाग्यंस्फरवैःसह नबुबोधचतांराजात्रोटयंती-
चदोरकम् सामंतमंत्रिभृत्याद्यैःकुर्वन्वार्तांमनोहराम् चिल्लदेव्यास्तदाकाचिद्दासीद्रष्टुंसमागता तयादोरकमादायबटु
मापृच्छ्यतद्व्रतम् तद्व्रतस्यविधानार्थंस्वस्वामिन्यैनिवेदितं ततोनूतनमाहूयचिल्लदेव्यकरोद्व्रतं अथसंवत्सरेनीतेलक्ष्मीपू
जादिनेनृप तौर्यत्रिकस्यनिःस्वानंचिल्लदेव्यागृहेश्शृणोत् तदाकर्ण्यमहीपालोनूतनंबटुमब्रवीत् अहहाद्यदिनंलक्ष्म्याःस
व्रतस्यक्वदोरकः इतिपृष्टोनृपंप्राहदोरकत्रोटनक्रमं तच्छ्रुत्वामंगलोराजाचोलदेव्यैप्रकुप्यन मयाद्यपूजनंकार्यंचिल्लदेवी
गृहंप्रति अथमंगलभूपालोबटुबाह्ववलंबितः चचालकमलावास्यैचिल्लदेवीगृहंप्रति अत्रांतरेमहालक्ष्मीर्वृद्धारूप-
विधायच जिज्ञासार्थंगृहंतस्याश्चोलदेव्याःसमागता गच्छगच्छाद्यदुष्टेकिमिहागत्यकरोषिमे तयादुराशयात्यर्थंलक्ष्मीः-
साप्यवमानिता ततःक्रुद्धामहालक्ष्मीश्चोलदेवीमभाषत शशापाथमहालक्ष्मीश्चिल्लदेवीनिकेतनम् बहुधाचिल्लदेव्यासा
लक्ष्मीसंमानितार्चिता वृद्धारूपंपरित्यज्यप्रत्यक्षासाभवत्तदा पंचोपचारपूजाभिःश्रियंराज्ञीततोर्चयत् अतितुष्टाततो
लक्ष्मीश्चिल्लदेवीमुवाचह लक्ष्मीरुवाच अर्चनात्तेप्रसन्नास्मिचिल्लदेविवरंवृणु वव्रेवरंततोराज्ञीचिल्लदेवीशुभा
शया चिल्लदेव्युवाच येकरिष्यंतितेदेविव्रतमेतत्सुरेश्वरि तद्गेहमनत्वयात्याज्ययावच्चंद्रदिवाकरौ अद्यारभ्यत
थाह्येषाभूपसंबंधिनीतया ख्यातिंयातुक्षितौदेविभक्तिर्भवतुमेत्वयि सद्भावेनकथामेतांयेशृण्वंतिपठंतिच तेषांचवां
च्छितंसर्वंत्वयादेयंसदैवहि तथेत्युक्त्वामहालक्ष्मीस्तत्रैवांतरधीयत अथमंगलभूपालस्तत्रागत्यश्रियोर्चनं चक्रेपरम-

याभक्त्याचिल्लदेव्यासमन्वितः अथेर्ष्ययादुराचाराचिल्लदेवीगृहंप्रति चोलदेवीसमायाताद्वारस्थैर्वारिताजनैः ततोजगामविपिनंयत्रासीदंगिरामुनिः अथालोक्याद्भुताकारांज्ञानदृष्ट्याविचिंत्यतां मुनिस्तस्यैव्रतंदिव्यंचोलदेवीमकारयत् व्रतेकृतेथसंजाताचोलदेवीमहायशाः दाक्षिण्यकेलिलीलाभिर्लावण्यैकनिकेतनं ततःकदाचिदागत्यवनमाखेटनंनृपः मुनेर्वेश्मनिराजातांददर्शवामलोचनां अथराजामुनिंप्राहकेयंधन्येतिकथ्यताम् तद्वृत्तांतंसमाख्यायराज्ञेतांप्रददौमुनिः अथागत्यनिजंराज्यंचिल्लदेवीसमन्वितं चिल्लदेव्याचसहितोबुभुजेमंगलोनृपः चिल्लदेवीवरंवव्रेचोलदेवीसमागमम् समुद्रस्ययथागंगायमुनेसंगमेसदा तथामंगलभूपस्यआलिंग्येवामलोचना परस्पराधिकेनेतुप्रियेमान्येवबभूवतुः चिल्लदेव्यासमंसोथचोलदेव्यासहाखिलाम् सप्तद्वीपवतींपृथ्वींबुभुजेमंगलोनृपः व्रतस्यास्यैवसामर्थ्याद्ढुढुकःसो पनूतनः अभून्मंगलभूपस्यमंत्रीनवयथागुरुः भुक्त्वाथसकलान्भोगान्मंगलोभूभुजांवरः सपुनःस्वर्गमेत्याभून्नक्षत्रंविष्णुदैवतं नारदउवाच एतत्तेकथितंशक्रव्रतानामुत्तमंव्रतम् यत्कथाश्रवणेनापिलभतेवांछितंफलं प्रयागमिवतीर्थेषुदेवेषुभगवानिव नदीषुचयथागंगाव्रतेष्वेतत्तथाव्रतम् धर्मंचार्थंचकामंचमोक्षंचयदिवांछसि तर्हीदंचव्रतंशक्रकुरुश्रद्धासमन्वितः धनंधान्यंधरांधर्मंकीर्तिमायुर्यशस्विनं तुरंगान्दंतिनःपुत्रान्महालक्ष्मीप्रयच्छति इति श्रीभविष्योत्तरपुराणेमहालक्ष्मीव्रतोद्यापनंसंपूर्णम् अथआश्विनशुक्लाष्टमीमहाष्टमी तत्राष्टम्यांभद्रकालीदक्षयज्ञविनाशिनी प्रादुर्भूतामहाघोरायोगिनीकोटिभिर्वृता देवीपुराणे सप्तमीवेधसंयुक्तायैःकृतातुमहाष्टमी पुत्रदाराधनैर्हीनाभ्रमंतीहपिशाचवत् शरज्जन्माष्टमीपूज्यानवमीसंयुतासदा सप्तमीसंयुतानित्यंशोकसंतापकारिणी जंभेनसप्तमीयुक्तापूजिताचमहाष्टमी इंद्रेणनिहतोजंभस्तस्यांदानवपुंगवः तस्मात्सर्वप्रयत्नेनसप्तमीसहिताष्टमी वर्जनीयाप्रयत्नेनमनुष्यैःशुभकांक्षिभिः सप्तमीकलयायत्रपरतश्चाष्टमीतथा तेनशल्यमिदंप्रोक्तंपुत्रपौत्रक्षयप्रदम् पुत्रा

न् हंतिपशून् हंतिराष्ट्रंहंतिसराज्यकम् हंतिजानपदांश्चापिसप्तमीसहिताष्टमी शुक्लपक्षेष्टमीचैवशुक्लपक्षेचतुर्द
शी पूर्वविद्धानकर्तव्या कर्तव्यापरसंयुता अत्रत्रिमुहूर्तन्यूनासत्यपिसप्तमीवर्जनप्रयाजिका नत्रिमुहूर्तैव स
प्तमीस्वल्पसंयुक्ता वर्जनीयासदाष्टमी स्तोकापिसातिथिःपुण्यायस्यांसूर्योदयेसति नवमीयुक्तायाअलाभेतुसप्तमी
युतैवकार्या उपवासंमहाष्टम्यांपुत्रवान्नसमाचरेत् सप्तशत्यास्तुपाठेनतोषयेज्जगदंबिकां अथआश्विनकृष्णाष्ट
म्यांअशोकाष्टमीव्रतम् हेमाद्रौआदित्यपुराणे आश्विनस्यासितेपक्षेपूजनीयाह्यशोकिका गंधमाल्यनमस्का
रधूपदीपैश्चसर्वदा तस्मिन्नहनियाभुंक्तेनक्तमिंदुविवर्जिते भवत्यथविशोकासायत्रयत्राभिजायते पूर्वाष्टमीषुस
र्वासुनचेच्छक्नोतिवैमुने प्रौष्ठपद्यामतीतायांयास्यात्कृष्णाष्टमीयुता तत्रकार्यंव्र
तंत्वेनत्सर्वकामफलप्रदं इतिअशोकाष्टमी अथमार्गशीर्षकृष्णाष्टम्यांकाशीखंडे कालभैरवस्यपूजोक्ता मा
र्गशीर्षाऽसिताष्टम्यांकालभैरवसन्निधौ उपोष्यजागरंकुर्वन्सर्वपापैःप्रमुच्यते इतिकाशीखंडात् रुद्रव्रतेषुस
र्वेषुकर्तव्यासंमुखीतिथिः इतिब्रह्मवैवर्ताच्च दिनद्वयेंशतोरात्रिव्याप्तौउत्तरैवभैरवोत्पत्तिः प्रदोषकालव्याप्ताविति
केचित् तत्र शिवरहस्येमध्यान्हेभैरवोत्पत्तेश्चश्रवणात् तत्रैवनित्ययात्रादिकंकृत्वामध्यान्हेसंस्थितेरवावित्युपक्र
म्य ततोग्ररूपानवधीन्ततःश्रीकालभैरवः आविरासीत्तदालोकान्भीषयन्नखिलान्प्रति कृत्वाचविविधांपूजांमहा
संभारविस्तरैः नरोमार्गासिताष्टम्यांवार्निकंविघ्नमुत्सृजेत् तीर्थेकालोदकेस्नात्वातर्पणंविधिपूर्वकं विलोक्यकाल
राजानंनिरयादुद्धरेसितॄन् सूतउवाच व्रतानिचप्रवक्ष्यामिशृणुध्वंमुनिपुंगवाः तत्रकृष्णाष्टमीपुण्यासर्वपापप्र-
णाशिनी विष्णुत्वंप्राप्तवान्विष्णुःसुरेशत्वंशचीपतिः कुवेरोयक्षराज्यत्वंनियंतृत्वंयमःस्वयम् चंद्रश्चंद्रत्वमापन्नो
गणेशत्वंगणाधिपः स्कंदःसेनापतित्वंचतथाचान्येगणेश्वराः कृत्वाचैश्वर्यमापन्नाःसौभाग्यंदेववल्लभाः व्रतस्या

स्यप्रभावेन लक्ष्म्याःपतिरभूद्धरिः ययातिःसार्वभौमत्वंतथाचान्येनृपोत्तमाः ऋषयोमुनयस्सिद्धगंधर्वाणांचकन्यकाः कृत्वावैपरमांसिद्धिंप्राप्ताश्चमुनिपुंगवाः नंदीश्वरेणयत्प्रोक्तंनारदायमहात्मने कृष्णाष्टमीव्रतंश्रेष्ठंसर्वकामफलप्रदं मेरोर्यद्दक्षिणंशृंगंसुरासुरनमस्कृतं तत्रनंदीश्वरंदृष्ट्वासर्वज्ञंशंभुवल्लभं उपास्यमानंमुनिभिःस्तूयमानंमरुद्गणैः सर्वानुग्रहकर्तारंस्तुत्वातुविविधैःस्तवैः अब्रवीत्प्रणिपत्याथदंडवन्नारदोमुनिः नारदउवाच भगवन्सर्वतत्त्वज्ञसर्वेषामभयप्रद केनव्रतेनभगवंस्तपोवृद्धिःप्रजायते सौभाग्यंकांतिरैश्वर्यमपत्यंचयशस्तथा शाश्वतीमुक्तिरंतेचकर्मपाशविमोचनी भगवंस्तद्व्रतंब्रूहिकारुण्याच्छंकरप्रिय नंदिकेश्वरउवा० कृष्णाष्टमीव्रतंश्रेष्ठमस्तिनारदतच्छृणु गणेशत्वंमयालब्धंयेनपुण्येनभोमुने मासिमार्गशिरेप्राप्ते कृष्णाष्टम्यांजितेंद्रियः अश्वत्थदंतकाष्ठेनकृत्वावैदंतधावनं स्नानंकृत्वातुविधिवत्तर्पणंचैवनारद आगच्छभवनेचैवपूजयेच्छंकरंप्रभुम् गोमूत्रंप्राश्यविधिवदुपवासीभवेन्निशि अतिरात्रस्ययज्ञस्यफलंचाष्टगुणंभवेत् सर्पिषःप्राशनंपोषेदंतकाष्ठंचतत्स्मृतम् पूजयेच्छंभुनामानंभगवंतमहेश्वरम् वाजपेयाष्टकंपुण्यंप्राप्नोतिश्रद्धयान्वितः माघेवटस्यकाष्ठंचगोक्षीरप्राशनंस्मृतं महेश्वरंस्कसंपूज्यगोमेधाष्टगुणंफलं फाल्गुनेचैतदेवोक्तंसर्पिषःप्राशनंचयत् संपूजयेन्महादेवंराजसूयाष्टकंफलं काष्ठमौदुंबरंचैवप्राशनेभर्जितायवाः पूजयेच्छंभुनामानमश्वमेधफलंलभेत् शिवंसंपूज्यवैशाखेपीत्वाचैवकुशोदकं नारमेधाष्टकंपुण्यंप्राप्नोत्येवहिनारद ज्येष्ठेप्लक्षंभवेत्काष्ठंसंपूज्यपशुपतिंविभुम् गवांशृंगोदकंप्राश्यस्वपेद्देवस्यसन्निधौ गवांकोटिप्रदानस्यतत्फलंतदवाप्नुयात् आषाढेचोग्रनामानंमिष्ट्वासंप्राश्यगोमयम् सौत्रामणेस्तुयज्ञस्यफलमष्टगुणंभवेत् पालाशंश्रावणेप्रोक्तंसर्वंसंपूज्यनारद प्राशयित्वार्कपत्राणिकल्पंशिवपुरेवसेत् मासेभाद्रपदेष्टम्यांत्र्यंबकंसंप्रपूजयेत् प्राशनंबिल्वपत्रस्यसर्वदीक्षाफलंलभेत् आश्विनेजंबुवृक्षस्यदंतकाष्ठमुदीरितं ईश्वरंपूजयेद्भक्त्याप्राशयेत्तंदुलो-

दकम् पौंडरीकस्ययज्ञस्यफलमष्टगुणंभवेत् मासेतुकार्तिकेष्टम्याईशानाख्यंप्रपूजयेत् पंचगव्यंसकृत्पीत्वाअग्निष्टोमफलंलभेत् उद्यापनंचवर्षांतेप्रकुर्याद्भक्तितत्परः विरच्यलिंगतोभद्रंपूजयेत्सर्वदेवताः वितानंतत्रबध्नीयात्पंचवर्णंसुशोभनंआचार्यंवरयित्वाचऋत्विजोरुद्रसंयुतान् सुवर्णप्रतिमांतत्रवृषभंस्जनस्यच कलशेपूजयित्वाचरात्रौजागरमाचरेत् प्रभातेचपुनःपूज्यअग्निस्थापनमाचरेत् हुनेदष्टशतंचैवतिलद्रव्यंघृतप्लुतं त्र्यंबकेनचमंत्रेणगौर्याश्चैवपृथक्पृथक् वर्षांतेभोजयेद्विप्रान्शिवभक्तिसमन्वितान् पायसंघृतसंयुक्तंमधुनाचपरिप्लुतम् शक्त्याहिरण्यवासांसिभक्त्यातेभ्योनिवेदयेत् देवायचापिदध्यन्नंवितानंध्वजचामरं कृष्णांपयस्विनींगांचघंटाकंदुकवाससी सरत्नांतत्रकलशा मलंकृत्यचनारद अलंकारंचवस्त्रंचदक्षिणांचस्वशक्तितः भक्त्याप्रणम्यविधिवदाचार्यायनिवेदयेत् करोत्येवंव्रतंपुण्यंवर्षमेकंनिरंतरंमहापातकनिर्मुक्तः सर्वैश्वर्यसमन्वितः कल्पकोटिशतंसाग्रंशिवलोकेमहीयते कृष्णाष्टमीव्रतंसम्यक्देवर्षेःकथितंमया यदुक्तंदेवदेवेनदेव्यैविश्वसृजापुरा सूतउवाच एवंनंदीश्वराच्छ्रुत्वानारदोमुनिपुंगवः कृष्णाष्टमीव्रतंपुण्यंययौबदरिकाश्रमम् व्रतस्यास्यप्रभावंयःपठेद्वाशृणुयादपि सयातिपरमंस्थानंयत्रदेवोमहेश्वरः इतिश्रीआदित्यपुराणेकृष्णाष्टमीव्रतंनामएकादशोऽध्यायः इतिकालभैरवाष्टमी इत्यष्टमीव्रतानिसमाप्तानि अथनवमीव्रतानिलिख्यंते तत्रचैत्रशुक्लनवम्यांरामनवमीव्रतं इदंचपरविद्धायांमध्यान्हव्यापिन्यांकार्यं तदुक्तंअगस्त्यसंहितायां

चैत्रशुक्लातुनवमीपुनर्वसुयुतायदि सैवमध्यान्हयोगेनमहापुण्यतमाभवेत् दिनद्वयेऋक्षयोगेमध्यान्हव्याप्तावेकदेशव्याप्तौवापरान्यथापूर्वा तदुक्तंतत्रैव नवमीचाष्टमीविद्धात्याज्याविष्णुपरायणैः उपोषणंनवम्यांवैदशम्यांपारणंभवेत् चैत्रमासेनवम्यांतुजातोरामःस्वयंहरिः पुनर्वस्वृक्षसंयुक्तासातिथिःसर्वकामदा श्रीरामनवमीप्रोक्ताकोटिसूर्यग्रहाधिका केवलापिसदोपोष्यानवमीशब्दसंग्रहात् तस्मात्सर्वात्मनासर्वैःकार्यंवैनवमीव्रतम् अथागस्त्यसंहितायां

म् चैत्रेनवम्यांप्राक्पक्षेदिवापुण्येपुनर्वसौ उदयेगुरुगौरांशेस्वोच्चस्थेग्रहपंचके मेषेपूषणिसंप्राप्तेलग्नेकर्कटकाव्हये आविरासीत्सकलयाकौशल्यायांपरःपुमान् प्राक्पक्षेशुक्लपक्षेउदयेलग्ने गुरुगौरांशेगुरुनवांशे तस्मिन्दिनेतुकर्तव्यमुपवासव्रतंसदा तत्रजागरणंकुर्याद्रघुनाथपरोभुवि भुविइतिखष्ठादिव्यावृत्यर्थं प्रातर्दशम्यांकृत्वातुसंध्याद्याः कालिकाःक्रियाः संपूज्यविधिवद्रामंभक्त्यावित्तानुसारतः ब्राह्मणान्भोजयेद्भक्त्यादक्षिणाभिश्चतोषयेत् गोभूतिलहिरण्याद्यैर्वस्त्रालंकारभूषणैः रामंभक्त्याप्रयत्नेनपूजयेसरयासुदा एवंयःकुरुतेभक्त्याश्रीरामनवमीव्रतम् अनेकजन्मसिद्धानिपातकानिबहून्यपि भस्मीकृत्वाव्रजंत्येवतद्विष्णोःपरमंपदं सर्वेषामप्ययंधर्मोभुक्तिमुक्त्यैकसाधनः अशुचिर्वापिपापिष्ठःकृत्वेदंव्रतमुत्तमं पूज्यःस्यात्सर्वभूतानांयथारामस्तथैवसः यस्तुरामनवम्यांवैभुंक्तेसचनराधमः कुंभीपाकेषुघोरेषुपच्यतेनात्रसंशयः अकृत्वारामनवमीव्रतंसर्वव्रतोत्तमं व्रतान्यन्यानिकुरुतेनतस्यफलभाग्भवत् रहस्यानिचपापानिप्रख्यातानिबहून्यपि महांतिचप्रणश्यंतिश्रीरामनवमीव्रतात् एकामपिनरोभक्त्याश्रीरामनवमींमुने उपोष्यकृतकृत्यःस्यात्सर्वपापैःप्रमुच्यते नरोरामनवम्यांतुश्रीरामप्रतिमाप्रदः विधानेनमुनिश्रेष्ठसमुक्तोनात्रसंशयः सुतीक्ष्णउवा० श्रीरामप्रतिमादानंविधानंवाकथंमुने कथयस्वमुनिश्रेष्ठभक्तस्यममविस्तरात्

अगस्त्यउवाच कथयिष्यामितद्विद्वन्प्रतिमादानमुत्तमम् विधानंचापियत्नेनयतस्त्वंवैष्णवोत्तमः अष्टम्यांचैत्रमासेतुशुक्लपक्षेजितेंद्रियः दंतधावनपूर्वंतुप्रातःस्नायाद्यथाविधि नद्यांतडागेकूपेवाह्रदेप्रस्त्रवणेपिवा ततःसंध्यादिकाःकार्याःसंस्मरन्राघवंहृदि गृहमासाद्यविप्रेंद्रकुर्यात्पूजादिकंपरम् दांतंकुटुंबिनंविप्रंवेदशास्त्रपरंमुदा श्रीरामपूजानिरतंसुशीलंदंभवर्जितम् विधिज्ञंराममंत्राणांराममंत्रैकसाधनम् आहूयभक्त्यासंपूज्यवृणुयात्प्रार्थयन्निति श्रीरामप्रतिमादानंकरिष्येहंद्विजोत्तम भक्त्याचार्योभवप्रीतःश्रीरामोसिलमेवच इत्युक्त्वापूज्यविप्रेंद्रंस्नापयित्वाततःपरं तैले

नाभ्यज्यचस्नायाच्चिंतयन्राघवंहृदि तैलेनाभ्यज्यस्नापयित्वेत्स्वन्वयः श्वेतांबरधरःश्वेतगंधमाल्यानिधारयेत् अर्चितो
भूषितश्चैवकृतमध्यान्हिकक्रियः अर्चितःकृतार्चनः आचार्यंभोजयेद्भक्त्यासात्विकान्नैःसविस्तरं भुंजीतस्वयम-
प्येवंहृदिराममनुस्मरन् एकभक्तव्रतीतत्रसहाचार्योजितेंद्रियः शृण्वन्रामकथांदिव्यामहःशेषंनयेन्मुने सायंसंध्यादि
काःकुर्यात्क्रियाराममनुस्मरन् आचार्यसहितोरात्रावधःशायीजितेंद्रियः वसेत्स्वयंनचैकांतेश्रीरामार्पितमानसः ततः
प्रातःसमुत्थायस्नात्वासंध्यांयथाविधि प्रातःसर्वाणिकर्माणिशीघ्रमेवसमापयेत् ततःस्वस्थमनाभूत्वाविद्वद्भिःस
हितोनघ स्वगृहस्योत्तरेदेशेद्वारस्योत्तरमंडपम् स्वगृहसमीपे चतुर्द्वारंपताकाढ्यंसुवितानंसुतोरणम् मनोह
रंमहोत्सेधंपुष्पाद्यैःसफलंकृतम् शंखचक्रहनूमद्भिःप्राग्द्वारेसमलंकृतं गरुत्मच्छार्ङ्गबाणैश्चदक्षिणेसमलंकृतम् गदा
खड्गांगदैश्चैवपश्चिमेसुविभूषितम् पद्मस्वस्तिकनीलैश्चकौबेरेसमलंकृतं मध्येहस्तचतुष्कायवेदिकायुक्तमायतंप्र
विश्यनृत्यगीतैश्चवाद्यैश्चापिसुसंयुतं पुण्याहंवाचयेत्तत्रविद्वद्भिःप्रीतमानसः ततःसंकल्पयेद्देवंराममेवस्मरन्मुने अ
स्यांरामनवम्यांचरामाराधानतत्परः उपोष्याष्टसुयामेषुपूजयित्वायथाविधि इमांस्वर्णमयींरामप्रतिमांचप्रयत्नतः श्री
रामप्रीतयेदास्येरामभक्तायधीमते प्रीतोरामोहरत्वाशुपापानिसुबहूनिमे अनेकजन्मसिद्धानिअभ्यस्तानिमहांतिच वि
लिखेत्सर्वतोभद्रंवेदिकोपरिसुंदरं मध्येतीर्थोदकैर्युक्तंपात्रंसंस्थाप्यचर्चितं सौवर्णेराजतेताम्रेपात्रेषट्कोणमालिखेत् त
तःस्वर्णमयींरामप्रतिमांपलमात्रतः निर्मितांद्विभुजांदिव्यांवामांकस्थितजानकीं बिभ्रतींदक्षिणकरेज्ञानमुद्रांमहामुने
वामेनाधःकरेणेशांदेवीमालिंग्यसंस्थितां सिंहासनेराजतेत्रपलद्वयविनिर्मिते पंचामृतस्नानपूर्वंसंपूज्यविधिवत्ततः मू
लमंत्रेणनियतोन्यासपूर्वमतंद्रितः दिवैवंविधिवत्कृत्वारात्रौजागरणंततः दिव्यांरामकथांश्रुत्वारामभक्तैःसमन्वितः नृ
त्यगीतादिभिश्चैवरामस्तोत्रैरनेकधा रामाष्टकैस्तथापूजागंधपुष्पाक्षतादिभिः कर्पूरागरुकस्तूरीकल्हाराद्यैरनेकधा पू

जयेद्विधिवद्भक्त्यादिवारात्रंनयेद्बुधः ततःप्रातःसमुत्थायस्नानसंध्यादिकाःक्रियाः समाप्यविधिवद्रामंपूजयेद्विधिवन्मुने ततोहोमंप्रकुर्वीतमूलमंत्रेणमंत्रवित् पूर्वोक्तपद्मकुंडेवास्थंडिलेवासमाहितः लौकिकाग्नौविधानेनशतमष्टोत्तरंततः आज्येनपायसेनैवस्मरन्राममनन्यधीः ततोभक्त्यासुसंतोष्यआचार्यंपूजयेन्मुने कुंडलाभ्यांसरत्नाभ्यामंगुलीयैरनेकधा गंधपुष्पाक्षतैर्वस्त्रैर्विविचित्रैःसुमनोहरैः ततोरामंस्मरन्दद्यादेवंमंत्रमुदीरयेत् इमांस्वर्णमयींरामप्रतिमांसमलंकृताम् चित्रवस्त्रयुगच्छन्नांरामोहंराघवायते श्रीरामप्रीतयेदास्येतुष्टोभवतुराघवः इतिदत्वाविधानेनदद्याद्वैदक्षिणांपुनःअन्येभ्यश्चयथान्यायंगोहिरण्यादिशक्तितः दद्याद्वासोयुगंधान्यंयथाविभवमादृतः ब्राह्मणैःसहभुंजीततेभ्योदद्याच्चदक्षिणां ब्रह्महत्यादिपापेभ्योमुच्यतेनात्रसंशयः तुलापुरुषदानानिफलंप्राप्नोतिसुव्रतः अनेकजन्मसंसिद्धपापेभ्योमुच्यतेध्रुवम् बहुनाकिमिहोक्तेनमुक्तिस्तस्यकरेस्थिता कुरुक्षेत्रेमहापुण्येसूर्यपर्वण्यशेषतः तुलापुरुषदानाद्यैःकृतैर्यल्लभ्यतेफलं नतत्फलंलभतेमर्त्योदानेनानेनसद्व्रती इतिरामप्रतिमादानोद्यापनविधिः अथरामपूजा आचम्य-प्राणानायम्यमासपक्षाद्युल्लिख्यसकलपापक्षयकामःश्रीरामप्रीतयेरामनवमीव्रतमहंकरिष्ये तदंगत्वेनरामपूजांकरिष्ये यथाराममंत्रेणषडंगन्यासंकलशार्चनंचकरिष्ये फलपुष्पाक्षतासहितंजलपूर्णताम्रपात्रंगृहीत्वाउपोष्यनवमींत्वद्ययामेष्वष्टसुराघव तेनप्रीतोभवत्वंमेसंसारात्त्राहिमांहरे इतिमन्त्रेणपात्रस्थंजलंक्षिपेत् ततःशक्तितःहैमींरामप्रतिमांकृत्वा अग्न्युत्तारणपूर्वकंकपोलौस्पृष्ट्वामूलमंत्रंप्रणवादिचतुर्थ्यंतंनामरामायदेवत्वंसंख्यायस्वाहेतिमंत्रंपठन्प्राणप्रतिष्ठांकुर्यात् ततः कोमलाक्षंविशालाक्षमिंद्रनीलसमप्रभं दक्षिणांगेदशरथंपुत्रावेक्षणतत्परं पृष्ठतोलक्ष्मणंदेवंसच्छत्रंकनकप्रभं पार्श्वेभरतशत्रुघ्नौतालवृंतकरावुभौ अग्रेव्यग्रंहनूमंतंरामानुग्रहकांक्षिणं इतिध्यायेत् अथषोडशोपचारैःपूजयेत् आवाहयामिविश्वेशंजानकीवल्लभंप्रभुं कौशल्यातनयंविष्णुंश्रीरामंप्रकृतेःपरं सहस्रशीर्षेत्यावाहनम् श्रीरामगच्छप्र

गवन्रघुवीरनृपोत्तम जानकीसहराजेंद्रसुस्थिरोभवसर्वदा रामचंद्रमहेष्वासरावणांतकराघव यावत्पूजांसमाप्येहंतावत्त्वं
सन्निधौभव इतिसन्निधापनं रघुनायकराजर्षेनमोराजीवलोचन रघुनंदनमेदेवश्रीरामाभिमुखोभव इतिसंमुखीक
रणं राजाधिराजराजेंद्ररामचंद्रमहीपते रत्नसिंहासनंतुभ्यंदास्यामिस्वीकुरुप्रभो पुरुषएवेदमासनं त्रैलोक्यपावनानंत
नमस्तेरघुनायक पाद्यंगृहाणराजर्षेनमोराजीवलोचन एतावानस्येतिपाद्यं परिपूर्णपरानंदनमोरामायवेधसे गृहाणार्घ्यं
मयादत्तंकृष्णविष्णोजनार्दन त्रिपादूर्ध्वमर्घ्यं नमःसत्यायशुद्धायनित्यायज्ञानरूपिणे गृहाणाचमनंनाथसर्वलोकैकना
यक तस्माद्विराळाचमनीयं नमःश्रीवासुदेवायतत्त्वज्ञानस्वरूपिणे मधुपर्कंगृहाणेदंजानकीपतयेनमः मधुपर्कं पंचामृतं-
मयानीतंपयोदधिघृतंमधु शर्करामधुसंयुक्तंरामत्वंप्रतिगृह्यतां पंचामृतं शुद्धोदकेनस्नानं पुष्पं धूपं दीपं नैवेद्यं निर्माल्य
विसर्जनं ब्रह्मांडोदरमध्यस्थैस्तीर्थैरघुनंदन स्नापयिष्याम्यहंभक्त्यात्वंगृहाणजनार्दन पुरुषसूक्तेनस्नानं तप्तकांच
नसंकाशंपीतांबरमिदंहरे संगृहाणजगन्नाथरामचंद्रनमोस्तुते तंयज्ञमितिवस्त्रं श्रीरामाच्युतयज्ञेशश्रीधरानंतराघव ब्र
ह्मसूत्रंसोत्तरीयंगृहाणरघुनंदन तस्माद्यज्ञादितियज्ञोपवीतं कुंकुमागरुकस्तूरिकर्पूरंचंदनंतथा तुभ्यंदास्यामिराजेंद्रश्रीरा-
मस्वीकुरुप्रभो तस्माद्यज्ञात्सर्वहुतेतिगंधं॰ अक्षताःपरमादिव्या॰ अलंकारार्थेअक्षतान् तुलसीकुंदमंदारजातीपुन्नागचंप
कैः कदंबकरवीरैश्चकुसुमैःशतपत्रकैः नीलांबुजैर्बिल्वपत्रैरर्चयेद्राघवंविभुं पूजयिष्याम्यहंभक्त्यासंगृहाणजनार्दन त
स्मादश्वेतिपुष्पाणि अथांगपूजा श्रीरामचंद्रायनमः पादौपूजयामि राजीवलोचनाय॰ गुल्फौपू॰ रावणांतकाय॰ जानुनीपू॰
वाचस्पतये॰ ऊरूपू॰ विश्वरूपाय॰ जंघेपू॰ लक्ष्मणाग्रजाय॰ कटीपू॰ विश्वमूर्त्तये॰ मेढ्रंपू॰ विश्वामित्रप्रियाय॰ नाभिंपू॰ परमा-
त्मनेन॰ हृदयंपू॰ श्रीकंठाय॰ कंठंपू॰ सर्वास्त्रधारिणे॰ बाहूपू॰ रघूद्वहाय॰ मुखंपू॰ पद्मनाभाय॰ जिह्वांपू॰ दामोदराय॰ दंतान्पू॰
सीतापतये॰ ललाटंपू॰ ज्ञानगम्याय॰ शिरःपू॰ सर्वात्मनेन॰ सर्वांगंपू॰ वनस्पतिरसोद्भूतोगंधाढ्योगंधउत्तमः रामचंद्रमहीपा

लधूपोयंप्रतिगृह्यतां यत्पुरुषेतिधूपं ज्योतिषांपतयेतुभ्यंनमोरामायवेधसे गृहाणदीपकंचैवत्रैलोक्यतिमिरापहं ब्राह्म
णोस्येतिदीपं इदंदिव्यान्नममृतंरसैःषड्भिःसमन्वितं रामचंद्रेशनैवेद्यंसीतेशप्रतिगृह्यताम् चंद्रमामनसइतिनैवेद्यं ततः
आचमनं इदंफलमितिफलं नागवल्लीदलैर्युक्तंपूगीफलसमन्वितं तांबूलंगृह्यतांरामकर्पूरादिसमन्वितं इतितांबूलं
हिरण्यगर्भेतिदक्षिणां· नाभ्याआसीतिप्रदक्षिणां· नृत्यैर्गीतैश्चवाद्यैश्चपुराणपठनादिभिः पूजोपचारैरखिलैःसंतुष्टो-
भवराघव मंगलार्थंमहीपालनीराजनमिदंहरे संगृहाणजगन्नाथरामचंद्रनमोस्तुते नीराजनं नमोदेवाधिदेवायरघु
नाथायशार्ङ्गिणे चिन्मयानंतरूपायसीतायाःपतयेनमः सप्तास्यासन्नितिनमस्कारः सर्वलोकशरण्यायरामचंद्रायवे
धसे ब्रह्मानंदैकरूपायसीतायाःपतयेनमः यज्ञेनयज्ञमितिमंत्रपुष्पांजलिं यानिकानिचपापानिब्रह्महत्यासमानिच
तानितानिविनश्यंतिप्रदक्षिणपदेपदे इतिप्रदक्षिणां अशोककुसुमैर्युक्तंरामायार्घ्यंनिवेदयेत् दशाननवधार्थायध
र्मसंस्थापनायच राक्षसानांवधार्थायदैत्यानांनिधनायच परित्राणायसाधूनांजातोरामःस्वयंहरिः गृहाणार्घ्यंमयादत्तंभ्रा
तृभिःसहितोनघ इत्यर्घ्यं इतिपूजनम् अथकथा अगस्त्यउवाच रहस्यंकथयिष्यामिसुतीक्ष्णमुनिसत्तम चै
त्रमासेनवम्यांतुशुक्लपक्षेरघूत्तमः प्रादुरासीत्ततोब्रह्मन्ब्रह्मानंदैककेवलः तत्रजागरणंकुर्याद्रामस्यपुरतोबुधः प्रतिमायां
यथाशक्तिपूजाकार्यायथाविधि प्रातर्दशम्यांस्नात्वैवकृत्वासंध्यादिकाःक्रियाः संपूज्यविधिवद्रामंभक्तिवित्तानुसारतः ब्रा
ह्मणान्भोजयेत्सम्यक्दक्षिणाभिश्चतोषयेत् गोभूतिलहिरण्याद्यैर्वस्त्रालंकारभूषणैः रामंभक्त्याप्रयत्नेनप्रीणयेत्सरया
मुदा एवंयःकुरुतेभक्त्याश्रीरामनवमीव्रतं अनेकजन्मजातानिपापानिसुबहूनिच भस्मीभवंतिपापानियातिविष्णोःपरं
पदं सर्वेषामप्ययंधर्मोभुक्तिमुक्त्यैकसाधनः अशुचिर्वापिपापिष्ठःकृत्वेदंव्रतमुत्तमम् पूज्यःस्यात्सर्वभूतानांयथारामस्त
थैवसः यस्तुरामनवम्यांवैभुंक्तेसतुनराधमः कुंभीपाकेषुघोरेषुपतत्येवनसंशयः अकृत्वारामनवमीव्रतंसर्वोत्तमंव्रतम्

व्रतान्यन्यानिकुरुतेननस्यफलभाग्भवेत् महांत्यपिप्रणश्यंतिपापानिनवमीव्रतात् एकामपिततोभक्त्याश्रीरामनवमींव्रती उपोष्यकृतकृत्यःस्यात्सर्वपापैःप्रमुच्यते ततोरामनवम्यांतुश्रीरामप्रतिमापरः विधानेननरश्रेष्ठसमुक्तोनात्रसंशयः सुतीक्ष्णउवा॰ श्रीरामप्रतिमादानंविधानंवाकथंमुने कथयस्वयथारामभक्तस्यममविस्तरात् अगस्त्यउवा॰ कथयिष्यामितेभक्त्याप्रतिमादानमुत्तमं विधानंवापियत्नेनयतस्त्वंवैष्णवोत्तमः अष्टम्यांचैत्रमासेतुशुक्लपक्षेजितेंद्रियः दंतधावनपूर्वंतुप्रातःस्नात्वायथाविधि नद्यांतडागेकूपेवाह्रदेप्रस्रवणेपिवा संध्यादिकाःक्रियाःकुर्यात्संस्मरन्राघवंहृदि गृहमागत्यविप्रेंद्रकुर्यादौपासनादिकं दांतंकुटुंबिनंविप्रवेदशास्त्रविदांवरं श्रीरामपूजानिरतंशुचिंदंभविवर्जितं सर्वज्ञंराममंत्राणांराममंत्रैकसाधनं आहूयभक्त्यासंपूज्यवृणुयात्प्रार्थयेद्भुत श्रीरामप्रतिमादानंकरिष्येहंद्विजोत्तम तत्राचार्योभवप्रीतः श्रीरामोस्मित्वमेवच इत्युक्त्वाभोक्तुमायातस्थापयित्वाततःस्वयं तदैवाभ्यज्यचस्नायाच्चिंतयेद्राघवंहृदि श्वेतांबरधरंदेवंगंधमाल्यादिधारयेत् अर्चितोभूषितश्चैवकृत्वामाध्यान्हिकींक्रियां आचार्यपूजयेसम्यक्सात्विकान्नैःसुविस्तरं भुंजीयात्स्वयमप्येवंरामंहृदिअनुस्मरन् एकभक्तंव्रतंतत्रसहाचार्योजितेंद्रियः शयीतभूतलेसम्यक्श्रीरामार्पितमानसः ततः प्रातःसमुत्थायस्नात्वासंध्यांयथाविधि प्रातःसर्वाणिकर्माणिशीघ्रमेवसमापयेत् ततःस्वस्थमनाभूत्वाविद्वद्भिःसहितोनघ स्वगृहेचोत्तरेभागेमंडपंश्लक्ष्णमुज्ज्वलं मंडपंचचतुर्द्वारंध्वजाःकार्याःसुविस्तरैः फलैर्नानाविधैर्युक्तंपुष्पमालासुशोभनं कदलीस्तंभसंयुक्तंयज्ञियैस्तैरलंकृतंसतोरणैर्मनोरम्यैःपुष्पाद्यैःसमलंकृतं शंखचक्रहनूमद्भिःप्राग्द्वारेसमलंकृतं गरुत्मच्छार्ङ्गबाणैश्चदक्षिणेषुविभूषितं गदाखड्गांगदैश्चैवपश्चिमेचविभूषितम् पद्मस्वस्तिकनीलैश्चकौबेर्यांसमलंकृतम् मध्येतुचतुरस्रांचवेदिकांहस्तमायतां विप्रैश्चगीतनृत्यैश्चवाद्यैश्चापिसमन्वितम् पुण्याहंवाचयित्वाचविद्वद्भिःप्रीतमानसैः ततःसंकल्पयेद्देवंराममेवमनुस्मरन् अस्यांरामनवम्यांतुरामाराधनतत्परः उपोष्याष्टसुयामेषुपूजयित्वायथाविधि इमांस्वर्णमयींरामप्रतिमांतुप्रयत्नतः श्रीरामप्री

तयेदास्येरामभक्तायधीमते स्कृतोरामोद्हत्याशृपापानिकृ बहूनिमे अनेकजन्मलग्नानिअभ्यस्तानिमहांतिच विलिखे
त्सर्वतोभद्रंवेदिकोपरिसुंदरं तन्मध्येतीर्थोदकैर्युक्तंपात्रंसंस्थाप्यचर्चितं सौवर्णेराजतेताम्रेपात्रेषद्रोणमालिखेत् ततःस्वर्णमयीं-
रामप्रतिमांपलमात्रतः निर्मितांद्विभुजांरम्यांवामांकस्थितजानकीं बिभ्रतींदक्षिणेहस्तेज्ञानमुद्रांमहामुने वामेनाधःकरेणैनांदेह
मालिंग्यसंस्थितां सिंहासनंराजतंचपलद्वयविनिर्मितं पंचामृतस्नानपूर्वंसंपूज्यविधिवत्ततः मूलमंत्रेणनियतोदद्याद्वैवमतं
द्रितः एवंसंपूज्यविधिवद्रात्रौजागरणंतथा दिव्यांरामकथांश्रुत्वारामभक्तिसमन्वितः गीतनृत्यादिभिश्चैवरामस्तोत्रैरनेकधा
रामाष्टकेनसंस्तुत्यगंधपुष्पाक्षतादिभिः कर्पूरागरुकस्तूरीकल्हाराद्यैरनेकधा संपूज्यविधिवद्भक्त्यादिवारात्रिंनयेद्बुधः ततःप्रा
तःसमुत्थायस्नानसंध्यादिकाःक्रियाः संस्नाप्यविधिवद्रामंपूजयेद्विधिवन्मुने ततोहोमंप्रकुर्वीतमूलमंत्रेणमंत्रवित् पूर्वोक्तकुंडे
गृह्योक्तस्थंडिलेवासमाहितः लौकिकाग्नौविधानेनशतमष्टोत्तरंमुने आज्येनपायसेनैवस्मरन्राममतंद्रितः ततोभक्त्यासदातु
ष्टआचार्यंपूजयेन्मुने कुंडलाभ्यांसुवर्णाभ्यामंगुलीयैरनेकधा गंधपुष्पाक्षतैर्वस्त्रैर्विचित्रैस्तुमनोहरैः ततोरामंस्वयंदद्यादि
मंमंत्रमुदीरयेत् इमांस्वर्णमयींरामप्रतिमांसमलंकृताम् चित्रवस्त्रयुगच्छन्नांरामोहंराघवायते श्रीरामप्रतिमांदास्येप्रीतोभव-
तुराघवः इतिदत्वाविधानेनदद्याद्वैदक्षिणांफलं अन्येभ्यश्चयथाशक्त्यागोहिरण्यादिभक्तितः दद्याद्वासोधनंधान्यंयथालंक
रणानिच अगस्त्यउवा॰ एवंयःकुरुतेरामप्रतिमादानमुत्तमम् ब्रह्महत्यादिपापेभ्योमुच्यतेनात्रसंशयः तुलापुरुषदाने
नफलमाप्नोतिसुव्रतात् अनेकजन्मसंसिद्धपापेभ्योमुच्यतेध्रुवम् बहुनात्रकिमुक्तेनमुक्तिस्तस्यकरेस्थिता तुलापुरुषदा
नेनमुनेयल्लभतेफलम् तत्फलंलभतेमर्त्योदानेनानेनसुव्रत सुतीक्ष्णउवाच प्रायेणहिनराःसर्वेदरिद्राःकृपणामुने
अगस्त्यउवा॰ दरिद्रस्यमहाभागस्वस्यवित्तानुसारतः पलार्धेनतदर्धेनतदर्धार्धेनवापुनः वित्तशाठ्यमकृत्वैवकुर्यादेवंव्रतंमु
ने यदिघोरतरंदुष्टंपातकंनेहतेक्वचित् अकिंचनोपियत्नेनउपोष्यनवमीदिने समाहितोनियत्नेनउपोष्यनवमीदिने एकचि

त्तोनियत्नेनसर्वपापैःप्रमुच्यते प्राप्तेश्रीरामनवमीदिनेमर्त्यौविमूढधीः उपोषणंनकुरुतेकुंभीपाकेषुपच्यते यत्किंचिद्रामसुद्दिश्य
क्रियतेनस्वशक्तितः रौरवेसतुमूढात्मापच्यतेनात्रसंशयः सुतीक्ष्णउवा॰ यामाष्टकेतुपूजावैतत्रचोक्तामहामुने मूलमं-
त्रेणसंयुक्तातांकथांवदस्वप्रभव अगस्त्यउवा॰ सर्वेषांराममंत्राणांमंत्रराजंषडक्षरं इदंतुस्कांदेमोक्षखंडेश्रीरामंप्रतिरुद्र
गीतायांरुद्रवाक्यम् मुमूर्षोर्मणिकर्ण्यांनिअर्धोदकनिवासिनः अहंदिशामितेमंत्रं तारकस्योपदेशतः श्रीरामरामरामेतिए
तत्तारकमुच्यते अतस्त्वंजानकीनाथपरंब्रह्माभिधीयते तारकंब्रह्मचेत्स्यात्तेनपूजाप्रशस्यते पीठांगदेवतानांतुआवृत्तीनां
तथैवच आदावेवप्रकुर्वीतदेवस्यप्रीतमानसः उपचारैःषोडशभिःपूजाकार्यायथाविधि आवाहनंस्थापनंचसंमुखीकर
णंतथा एवंमुद्राप्रार्थनांचपूजामुद्रांप्रयत्नतः शंखपूजांप्रकुर्वीतपूर्वोक्तविधिनाततः कलशंवामभागेचपूजाद्रव्याणिचाद
रात् पीठेसंपूज्ययत्नेनआत्मानंमंत्रमुच्चरेत् पात्रासादनमप्येवंकुर्याद्यामेष्वतंद्रितः पीतांबराणिदेवायप्रार्पयन्नर्चयेत्सु
धीः स्वर्णयज्ञोपवीतानिदद्याद्देवायभक्तितः नानारत्नविचित्राणिदद्यादाभरणानिच हिमांबुघृष्टंरुचिरंघनसारंमनोहरं
क्रमात्तुमूलमंत्रेणउपचारान्प्रकल्पयेत् कल्हारैःकेतकैर्जात्यैःपुन्नागाद्यैःप्रपूजयेत् चंपकैःशतपत्रैश्चसुगंधैःसुमनोह
रैः पाद्यचंदनधूपैश्चतत्तन्मंत्रैःप्रपूजयेत् भक्ष्यभोज्यादिकंभक्त्यादेवायविधिनार्पयेत् येनसोपस्करंदेवंदत्वापापैःप्रमुच्य
ते जन्मकोटिकृतैर्घोरनानारूपैश्चदारुणैः विमुक्तःस्यात्क्षणादेवरामएवभवेन्मुने श्रद्धानस्यदातव्यंश्रीरामनवमीव्रतं सर्व
लोकहितायेदंपवित्रंपापनाशनं लोहेननिर्मितंवापिशिलयादारुणापिवा एकेनैवप्रकारेणयस्मैकस्मैथवामुने कृतंसर्वप्रय
त्नेनयत्किंचिदपिभक्तितः जपेदेकांतमासीनोयावत्सदशमीदिनम् अनेनस्यात्पुनःपूजादशम्यांभोजयेद्द्विजान् भक्त्याभो
ज्यैर्बहुविधैर्दद्याद्भक्त्याचदक्षिणां कृतकृत्योभवेत्तेनसद्योरामःप्रसीदति तूष्णींतिष्ठन्नरोवापिपुनरावृत्तिवर्जितः द्वाद
शाब्दकृतेनापियत्पापंचापिमुच्यते विलयंयातितत्सर्वंश्रीरामनवमीव्रतात् जपश्चराममंत्राणांयोनजानातितस्यवै उपो

ध्यसंस्मरेद्रामंन्यासपूर्वमतंद्रितः गुरुलब्धोयंमंत्रस्तन्न्यसेन्न्यासपुरःसरः यामेयामेचविधिनाकुर्यात्पूजांसमाहितः मुमुक्षुश्चसदाकुर्यात्श्रीरामनवमीव्रतं मुच्यतेसर्वपापेभ्योयातिब्रह्मसनातनं इतिश्रीस्कंदपुराणेअगस्त्यसंहितायांअगस्तिसुतीक्ष्णसंवादेरामनवमीव्रतोद्यापनंसंपूर्णम् अथरामनामव्रतं तत्रैवरामनवमीमारभ्यअथवसर्वकालेपिरामनामजपलेखनंकुर्यात् आचम्यप्राणानायम्यमासपक्षाद्युल्लिख्य सकलपापक्षयकामोवाविष्णुलोकप्राप्तिकामोवाश्रीरामप्रीतयेरामनामजपलेखनंकरिष्ये इतिसंकल्य अथरामनामपूजा नाममंत्रेणषोडशोपचारैःपूजयेत् अथकथोद्यापनंच पार्वत्युवाच

धन्यास्म्यनुगृहीतास्मिकृतार्थास्मिजगत्प्रभो विच्छिन्नोमेद्यसंदेहग्रंथिर्भवदनुग्रहात् त्वन्मुखाद्गलितंदेवत्वत्तोमृतरसायनं पिबंत्यामेमनोदेवनतृप्यतिभवापहम् श्रीरामस्यामृतंनामश्रुतंसंक्षेपतोमया इदानींश्रोतुमिच्छामिविस्तरेणस्फुटाक्षरं श्रीमहादेवउवा० शृणुदेविप्रवक्ष्यामिगुह्याद्गुह्यतरंमहत् प्राप्नोतिपरमांसिद्धिंदीर्घायुःपुत्रसंपदं रामनामलिखेद्यस्तुलक्षकोटिशतावधि एकैकमक्षरंपुंसांमहापातकनाशनम् सकामोपिलिखेद्यस्तुनिःकामेनतुकिंपुनः इहैवसुखमाप्नोतिअंतेचपरमंपदम् आदावंतेचमध्येचव्रतस्योद्यापनंचरेत् उद्यापनंविनानैवफलसिद्धिमवाप्नुयात् तस्मात्सर्वप्रयत्नेननाम्नउद्यापनंकुरु पार्वत्युवाच नतास्मिदेवदेवेशभक्तानुग्रहकारक नाम्नउद्यापनंब्रूहिविस्तरेणममप्रभो श्रीशिवउवा० शृणुदेविप्रवक्ष्यामिविस्तरेणयथाविधि नाम्नउद्यापनंचात्रभक्त्याभवदनुग्रहात् सौवर्णसुंदरंकुर्यात्सीतांरामंसलक्ष्मणम् हनूमत्प्रतिमांतत्रचतुर्थांशेनहाटकैः सुवर्णस्यप्रमाणंतुपलाष्टकमुदीरितं अशक्तश्चेत्पलेनैवतदर्धार्धेनवापुनः श्रीरामप्रतिमांकृत्वावित्तशाठ्यंनकारयेत् राजतेनासनंकुर्यान्माषैःषोडशसंमितैः पीतवस्त्रेणसंवेष्ट्यस्थापयेत्तंडुलोपरि तंडुलानांप्रमाणंतुभवेद्द्रोणचतुष्टयम् शुचौदेशेगृहेतीर्थेमंडपंकारयेत्सुधीः तोरणानिचतुर्द्वारेबंधयेदाम्रपल्लवैः भूमौगोमयलिप्तायां सर्वतोभद्रसंज्ञकं रचयेत्सप्तधान्येननानारंगैःसुशोभनम् कुंभानष्टौचपूर्वादौस्थापयेदव्रणान्सुभान् कुंभमेकंमध्यदेशेस्था

पयेत्तंडुलोपरि गंगाजलेनसंपूर्यपंचरत्नैःसपल्लवैः नारीकेरफलान्यष्टौ चैकंरामायदापयेत् आचार्यंवरयेत्तत्र वेदशास्त्रविशारद
म् ब्रह्मादिऋत्विजानांतुवरणंकारयेत्ततः मधुपर्केणसंपूज्यवस्त्रालंकारभूषणैः ऋत्विजःषोडशानष्टौवरयेद्वेदपारगान् स्ना
त्वानित्यंविधायादौपूजयेद्गणनायकं पुण्याहंवाचयित्वातुपूजयेद्रामचंद्रकं ततोग्निंचप्रतिष्ठाप्यस्वशास्त्रोक्तविधानतः वि-
ष्णुसूक्तेनहोतव्यंमूलमंत्रेणवापुनः नवग्रहांश्चदिक्पालान्तत्रानुक्तांश्चहोमयेत् पुरुषसूक्तेनहोतव्याःसमिदाज्यंचरुस्तिलाः
अष्टोत्तरसहस्रंतुराममंत्रेणहोमयेत् होमांतेपूजनंकुर्यात् राममंत्रादिदेवताः पूजयित्वाततोहुत्वाबलिंपूर्णाहुतिंतथा श्रेयः
संपाद्यदानंच अभिषेकंसमापयेत् रामंनत्वार्चयित्वाच प्रार्थयित्वापुनःपुनः आचार्यंपूजयेत्पश्चाल्लक्ष्मवर्णैर्वस्त्रधेनुभिः प्र
तिमांदानमंत्रेण आचार्यायनिवेदयेत् नतोस्मिदेवदेवेश बहुबुद्धिमहात्मभिः यश्चिंत्यतेकर्मपाशात् हृदिनित्यंमुमुक्षुभिः मा
ययागुणमय्यात्वंसृजस्यवस्यलुंपसि अतस्त्वत्सादभक्तोस्मित्वद्भक्तिस्त्वश्रियोधिका भक्तिमेवहिवांछंतित्वद्भक्ताःसारवेदिनः
अतस्त्वत्पादकमलेभक्तिरेवसदास्तुमे संसारामयतप्तानांभेषज्यंभक्तिरेवते सीतासौमित्रिहनुमद्भक्तयुक्तनरेश्वरः दानेनाने
नमेरामभक्तिमुक्तिप्रदोभव प्रतिमादानसिद्ध्यर्थंशक्त्यास्वर्णंतुदापयेत् दानंयद्दक्षिणाहीनंतत्सर्वंनिष्फलंभवेत् ब्राह्म-
णान्शतसाहस्रंभोजयेन्मधुसर्पिषा पक्वान्नैःपायसैःखाद्यैर्लड्डुकैःशर्करान्वितैः ऋत्विग्भ्योदक्षिणांदद्याद्भूयसींदक्षिणां
ददेत् तदंतेघृतपात्रंचतिलपात्रंचदापयेत् शय्यांचरथदानानि दशदानानिशक्तितः अशक्तश्चेत्स्वर्णमेकंदत्वारामंनमेत्पुनः
तिलकंकारयेत्पश्चादभिषिंचेत्सपल्लवैः द्विजैस्तुआशिषोदेयानत्वास्तुत्वाविसर्जयेत् उमामहेश्वरौपूज्यौभोजयेद्वटुकंतथा
कुमारीणांशतंभोज्यंयोगिराजंचभोजयेत् क्षेत्रपालबलिंदत्वाध्यात्वारामंसदाजपेत् ब्रह्मादिभिस्तुतत्पुण्यंवक्तुंशाक्तंन
किंचन अश्वमेधसहस्राणिवाजपेयशतानिच एकेनरामनाम्नातुतत्फलंलभतेनरः नारीवापुरुषोवापिशूद्रोवाप्यधमो
नरः रामनाम्नातुमुक्तास्ते सत्यंसत्यंवरानने मूलेकल्पद्रुमस्याखिलमणिविलसद्रत्नसिंहासनस्थंकोदंडंधारयंतंललि

तकरयुगेनार्पितंलक्ष्मणेन वामांकन्यस्तसीतंभरतधृतमहामौक्तिकछत्रकांतं शत्रुघ्नंचामराभ्यांविलसितमनिशंरामचंद्रंभजेहं वंदेतत्रमहेशानंचंडकोदंडखंडनं जानकीहृदयानंदवर्धनंरघुनंदनम् चरितंरघुनाथस्यशतकोटिप्रविस्तरं एकैकमक्षरं पुंसांमहापातकनाशनं इतिश्रीभविष्योत्तरपुराणेउमामहेश्वरसंवादेरामनामलेखनोद्यापनंसंपूर्णम् अथादुःखनवमीव्रतं भाद्रपदशुक्लनवम्यांमुहूर्तमात्रसत्वेपिपरयुतायांअदुःखनवमीव्रतम् देशकालौस्मृत्वाममेहजन्मनिजन्मांतरेचभर्त्रासहसकलपातकादिदुःखनाशार्थंव्रतखंडकल्पोक्तफलावाप्त्यर्थंश्रीगौरीदेवताप्रीत्यर्थंअदुःखनवमीव्रतपूजनमहं करिष्ये तत्रादौनिर्विघ्नतासिद्ध्यर्थंस्वस्तिपुण्याहवाचनंचकरिष्ये इतिसंकल्प्य गोमयेनोपलिप्तभूमौवेदिकांगुडक्षिप्तांइक्षुछादितां अपूपपायसान्वितांउपरिमंडपिकायुतां कृत्वा तत्रपीठेआसनादिकलशप्रतिष्ठांतंकृत्वा अन्युत्तारणपूर्वकंगौरीप्रतिमांसंस्थाप्यगणपतिचतुष्टयंइंद्रादिलोकपालांश्चावाह्य गौरीर्मिमायेति नमोदेव्याइतिवामंत्रेणसंपूज्य देवपात्रधरांदेवींविभूतिंचत्रिलोचनीं दुग्धान्नदाननिरतांगौरींत्वांचिंतयाम्यहं ध्यानं गौरींदुःखहरांदेवींशिवस्यार्धांगधारिणीम् शुक्लनीलवस्त्रसंयुक्तासुमामावाहयाम्यहं आवाहनं प्रसन्नवदनेमातर्नित्यंदेवर्षिसंस्कृते मयाभावेनयद्दत्तंपीठंतत्प्रतिगृह्यतां आसनं सर्वतीर्थमयंदिव्यंसर्वभूतोपजीवनं मयादत्तंचपानीयंपाद्यार्थंप्रतिगृह्यताम् पाद्यं अर्घ्यं गृहाणेत्यर्घ्यं गंगादिसर्वतीर्थेभ्योभक्त्यानीतंसुशीतलं गंधपुष्पाक्षतोपेतंगृहाणार्घ्यंनमोस्तुते अर्घ्यं मातःसर्वाणि तीर्थानिगंगाद्याश्चतथानदाः स्नानार्थंतवदेवेशिमयानीताःसुशोभनाः स्नानं सर्वभूषाधिकेसौम्येलोकलज्जानिवारणे मयोपपादितेतुभ्यंवाससीप्रतिगृह्यताम् वस्त्रं श्रीखंडमितिगंधं माल्यादीनीतिपुष्पं वनस्पतिरसइतिधूपं आज्यंचेतिदीपं अन्नंचतुर्विधमितिनैवेद्यं पूगीफलमितितांबूलं हिरण्यगर्भेतिदक्षिणां स्कंदमातर्नमस्तुभ्यंदुःखव्याधिविनाशिनि उत्तिष्ठगच्छभवनंवरदाभवपार्वति इतिपूजा अथकथा ऋषयऊचुः कदाचिन्नैमिषारण्येव्यासंधर्मवि-

दांवरम् कथयंतंकथांदिव्यामिदमूचुर्महर्षयः यज्ञधर्मविदांश्रेष्ठव्रतानिविविधानिच विपाकान्कर्मणांचैवप्राणिनांविविधागतीः आकर्ण्यविस्मिताःसर्वेकौतूहलसमन्विताः नतृप्तिमधिगच्छामोनाप्रियंचकथामृतं शृणुमश्चवयंसद्योव्रतंदुःखहरंत्विदं येनचीर्णेनधर्मज्ञाऽज्ञानदुःखंनजायते कृपांकुरुमहाबुद्धे ब्रूहिदुःखहरंव्रतं व्यासउवा॰ शृण्वंतुपुरुषाःसर्वेशौनकाद्यामहर्षयः येनराःपुण्यकर्माणोदंभाहंकारवर्जिताः श्रद्धयायमिनोनित्यमहिंसानिरताश्चये यथामीलितभोक्तारःकृरविनस्तेननते नहि गुह्यंचान्यत्तुवक्ष्यामिदुःखनाशनसूचकम् येदुःखनवमींप्राप्यनराश्चैवाप्यपंडिताः शिवांगच्छंतिशरणमुत्पत्तिस्थितिकारिणाम् जन्मांतरशतेवापिनतेदुःखस्यभागिनः ऋषयऊचुः अदुःखनवमीनामत्वयाकेयंनिरूपिता भविष्यतिकदाचेयंयदाचेयंभविष्यति पूजनीयाकथंगौरीविधानंकीदृशंतथा एतत्सर्वंविधानेनवक्तुमर्हस्यशेषतः व्यासउवाच एतद्गुह्यतमंपुण्यंशृणुध्वंगदतोमम नदेयंनास्तिकायैतद्दंभकायशठायच अहंवःश्रद्दधानेभ्योविधिंसर्वमशेषतः समाहितमनावच्मिभवतःपुण्यदायकम् सर्वस्याद्यामहादेवीत्रिगुणापरमेश्वरी नित्यानंदमयीदेवीतमःपारेप्रतिष्ठति ब्रह्मांडजननीचेयमुत्पत्तिस्थितिकारिणी पुरुषःप्रकृतिश्चेयमात्मानंबिभिदेद्विधा यथाशिवस्तथागौरीयथागौरीतथाहरः यथागौरीतथालक्ष्मीर्दुःखपापापहारिणी तासांपूजाविधानेननकश्चिद्दुःखभाग्भवेत् नभस्येशुक्लनवमीयावापूर्णातिथिर्भवेत् अस्तदोषादिरहितासर्वदुःखहरापरा प्रशस्तायांनरःस्नात्वाकृत्वानित्यविधिंततः मौनेनगृहमागत्यसंयतस्तत्परायणः अदुःखदायीभूत्वाचशुचिस्थानगतस्तथा गोमयेनविलिप्तायांशुचौमंडपिकांशुभाम् शुभकुंभंस्थापयेत्तत्र कुंकुमालिप्तभित्तिके आच्छादितांशुधूपैस्तासुमामानंददायिनीं आचार्यानुज्ञयातस्यांजगद्धात्रीप्रपूजयेत् पूजयित्वोपचारैस्तांनत्वानत्वापुनःपुनः वाणकंचददेत्तस्यांपक्वान्नफलसंयुतं शक्तश्चेदुपवासेननिशांचजागरैर्नयेत् अशक्तेनचभोक्तव्यंपयःप्राश्यमथापिवा फलंवापिप्रयत्नेननहिंसारतचेतसा रात्रौजागरणंकार्यंनृत्यगीतादिभिस्तथा प्रभातेविमलेजा

तेकृत्वानित्यविधिंपुनः ब्राह्मणान्भोजयेच्छक्त्यासपत्नीकांच्छुचींस्तथा देवींविसर्जयेत्पश्चादाचार्यंपूजयेत्तथा अचार्यस्तु स्वशाखोक्तोनववर्षाणिकारयेत् सौवर्णैर्भूषणैर्वस्त्रैर्नत्वातंचसमर्पयेत् पंचवाअथवाचैकंनारीकेरैश्चवायनं पक्वान्नंनवसंख्याकंब्राह्मणायनिवेदयेत् पश्चाद्बंधुजनैःसार्धंभुंजीयान्नियतःशुचिः श्रुत्वाकथांपुण्यतमांवाग्यतस्तत्परोयतः सकदाचिन्नदुःखेनयुज्यतेनात्रसंशयः भुक्त्वाभोगान्यथाकामंसयातिपरसंपदं अत्रैवोदाहरंतीममितिहासंपुरातनं अरण्येविषमेप्राप्यशापदग्धाप्सराःकिल आसीज्जातिस्मराकाचित्तिर्यग्योनिंसमागता कुक्कुटीनामतोह्यासीत्सदादुःखेन पीडिता तत्सखीमर्कटीनामतेचोभेशोककर्शिते अथतस्मिन्वनोद्देशेपरस्परहितेरते उभेप्यभूतांसहितेविचरंत्यौदिशोदश ततःकालेनसहितावर्षांतेचागतातिथिः अदुःखनवमीनामदुःखव्याधिविनाशिनी गत्वातांकुक्कुटीप्राहमर्कटींदैवयोगितः अद्यकिंचिन्नभोक्तव्यमावाभ्यांशृणुकारणम् तिर्यग्योनिगतेचादौपूर्वकर्मविपाकतः दुःखापन्नुत्तयेचाद्यनभोक्ष्येहंत्वयासह त्वंचेशशरणंगत्वानवमींस्तुव्रतस्थिता कृत्वाचलम शक्ताचेद्भुंक्ष्वशीर्णफलानिच महामायाप्रसादेनयाहिभद्रमहिंसया इत्युक्त्वाकुक्कुटीतूष्णींबभूवानश्नतीतदा मर्कट्यप्युररीकृत्यप्रशस्तंसंबभूवतुः अथसामर्कटीनामगत्वापूर्ववनंप्रतिस्थित्वातद्दिनशेषंतुक्षुधितापीडिताभृशं अजानन्तीतमेवार्थंपूर्वकर्मविशेषतः निशांतेतरसागत्वावनदेशेविचिन्वती ददर्शबर्हिणांडानि अतीवक्षुधितातदा भक्षयित्वामर्कटीसासुखंप्रक्षाल्यवारिणा पुनस्तदंतिकंप्राप्तादर्शयंतीक्षुधोव्यथाम् कुपिताकुक्कुटीवाक्यमुवाचमर्कटींप्रति किंचिद्भुक्तंत्वयादुष्टेव्रजत्वंहरिसंयुता व्रतभ्रष्टास्थिताचाथवारिवासितयात्वघे नाकरोस्त्वंममवचःप्राणाःकिंनगतास्तव केदारंशरणंयाहिमयासहभयंकरि देहायोगेनयोगेनगच्छावःपरसंपदं अथतेनिर्गतेचोभेकेदारंभूतभावनम् गत्वामनःसमाधायकुक्कुटींमनसास्मरत् उत्सत्स्येहंचसत्कुलेधनाढ्येवेदपारगे इतिमत्वास्वदेहंसावन्हिमध्येन्यपातयत् पुनर्भवेराजपत्नीइतिमत्वाचमर्कटी अकरोस्तुतनुत्यागंतद्वाक्येनैवबोधिता कुक्कुटीसामहादेव्याःप्रसा

देनतयाकुले विप्राणांकन्यकाभूत्वाभर्त्ताविमलरत्नदः दिव्यवर्धनशीलासानिरतापनिसेवने इतराराजपत्नीत्वंप्राप्तासावथम
र्कटी उभेजातिस्मरेजाते महादेव्याःप्रसादतः अथसाकुक्कुटीपंचपुत्रान्जज्ञेपितुःसमान् बभूवधनसंपन्नारूपशीलगुणा-
न्विता मर्कटीपुत्रशोकार्त्ताबभूवव्यथिताभृशं पूर्वकर्मस्मरंतीसाकदाचिद्दैवयोगतः अपश्यत्कुक्कुटीपुत्रान्पंचैवचपितुःसमा
न् अमारयत्स्वभृत्यैस्तान्पुत्रान्सामर्कटीतदा तच्छिरांसिगृहीत्वातुकुक्कुट्यैवाणकंददौ अदुःखनवमींप्राप्यव्रतस्थाचब
भूवसा गौरीकृपाविजननीजननीभक्तवत्सला शिरांस्यादायसर्वेषांपुत्रकांस्तानजीवयत् तद्वाणकंसुवर्णस्यशिरोभिःप
र्यकल्पयत् कुक्कुटीपूजयांचक्रेगौरींदुःखविनाशिनीं स्वतःसदाजीवतोयंभोक्तुंगृहमगात्ततः तदातद्वाणकंप्रेक्ष्यसुवर्णं
प्रेषितापशून् स्वभर्त्रेपुत्रयुक्ताय दृष्ट्वावेदयनंदिनी पुनर्वनागतांस्तांस्तुसाददर्शालिपुत्रकान् दृष्ट्वापुनःपुनःसाथरुरोद
भृशदुःखिता आत्मानंनिंदयामासमर्कटीविह्वलासती आगत्यसख्याःसदनमात्मानंसान्यवेदयत् पापिन्यहंदुराचाराद्दु
र्भगाश्रुतपूर्वकम् बालहत्यात्मकंपापंचरितंनात्रसंशयः इत्याकर्ण्यसखीवाक्यंकुक्कुटीविस्मिताभवत् अपृच्छत्कारणं
क्षिप्रंशोकसागरदायकम् इदंशीलंकथंभद्रेकस्मादुदसिचात्मवान् विभोगाराजपत्नीत्वंमान्यासमसखीष्वपि मर्कटीकु
क्कुटीवाक्यंश्रुत्वावृत्तंन्यवेदयत् गत्वाचकुक्कुटीपुत्रैःप्रायश्चित्तमकारयत् स्मरंतीचव्रतंदेव्याःकुरुत्वंचयथाविधि अथदेव्याः
प्रसादेनमर्कटीसुषुवेसुतं सुंदरंसुवरंनामपृथ्वीभारसहंवरं राजपत्नीविप्रपत्नीसुखिन्यौसंबभूवतुः इहलोकेदुःखित
स्यअदुःखनवमीव्रतम् सीतयायत्कृतंचैतद्दमयंत्याकृतंत्विदं अन्याभिर्बहुभिःस्त्रीभिर्व्रतमाचरितंत्विदं याकरोतिव्रत
मिदंशृणोतिचकथामिमाम् सादुःखभाङ्नभवतिसत्यंसत्यंवदाम्यहं सर्वदुःखहरंलोकेकिमन्यच्छ्रोतुमिच्छथ इ
तिश्रीस्कंदपुराणेअदुःखनवमीव्रतकथासमाप्ता अथआश्विनशुक्लनवम्यांदेवीव्रतंहेमाद्रौविष्णुधर्मे अथपूजा
विधिनापूजयेत्कंनभद्रकालींनराधिप नवम्यामाश्विनेमासिशुक्लपक्षेनरोत्तम पुष्करउवाच पूर्वोत्तरेतुदिग्भागेशिववा-

११०

स्रक्मनोहरे भद्रकाल्यागृहंकार्यंचित्रवस्त्रैरलंकृतं भद्रकालीगृहंकृत्वातत्रसंपूजयेद्द्विज अष्टादशभुजाकार्याभद्रकालीमनोह
रा आलीढस्थानसंस्थानाचतुःसिंहरथेस्थिता अक्षमालात्रिशूलंचखड्गंचर्मांकुशास्तथा बाणचापेचकर्तव्येशंखपद्मे
तथैवच स्रुक्स्रुवौचतथाकार्यौतथावेदिकमंडलू दंडशक्तीचकर्तव्येतथापाशाङ्कुताशनौ हस्ताभ्यांभद्रकाल्याश्चभवेत्कांति
करःपरः एवंसाध्यमहाभागरत्नपात्रधराभवेत् आश्विनेशुक्लपक्षस्यअष्टम्यांप्रयतःशुचिः तत्रचायुधंचर्माद्यंछत्रंवस्त्रंच
पूजयेत् पुष्पैर्मध्यैः फलैर्भक्ष्यैर्भोज्यैश्चस्रक्मनोहरैः बलिभिश्चविचित्रैश्चप्रोक्ष्यादानैस्तथैवच रात्रौजागरणंकुर्यात्त
त्रैवचवसुधाधिप उपोषितोद्वितीयेन्हिपूजयेत्सुनरेवतां आयुधाद्यंचसकलंपूजयेद्वसुधाधिप एवंसंपूजयेद्देवींवरदांभक्त
वत्सलाम् कात्यायनींकामगमांबहुरूपांवरप्रदाम् पूजितासर्वकामैःसाभनक्तिवसुधाधिप एवंहिसंपूज्यजगत्प्रधानांया-
त्रानुदेयावसुधाधिपेन प्राप्नोतिसिद्धिंपरमांमहेशाज्जनस्तथान्योपिचवित्तशक्त्या ब्रह्मोवाच शृणुसर्वंप्रवक्ष्यामिय
त्वंपरिपृच्छसि महासिद्धिप्रदंधान्यंसर्वशत्रुनिबर्हणं सर्वलोकोपकारार्थंपूजयेत्सर्ववृत्तिषु कृत्वर्थंब्राह्मणाद्यैश्च
क्षत्रियैर्भूमिपालने गोधनार्थेवत्सवैश्यैः शूद्रैःपुत्रसुखार्थिभिः सौभाग्यार्थंतथास्त्रीभिर्धनार्थेधनकांक्षिभिः महाव्र
तंमहापुण्यंशत्त्याद्यैश्चअनुष्ठितं कर्तव्यंदेवराजेंद्रदेव्याभक्तिसमन्वितैः कन्यासंस्थेरवौशुक्लेदेवीमाराध्यनंदिकां नं
दिकाप्रतिपत् अयाचितस्त्वथवैकाशीनक्ताशीत्वथवाव्यदः प्रातस्नायीदिनद्वंद्वत्रिकालंशिवपूजकः शिवश्चशिवान्च
शिवौ जपेहोमेसदाभक्तःकन्यकांभोजयेत्सदा अष्टम्यांनवमेचान्हिदारुजानिशुभानिच एकंवाचित्तभावेनकार
येत्सुसुरोत्तमं तस्मिन्देवीप्रकर्त्तव्याहैमीवाराजतीतुवा मृद्राक्षालवणोपेताखड्गशूलेनपूजयेत् सर्वोपहारसंपन्नवस्त्र
रत्नफलादिभिः कारयेद्रथलोहादिपूजांचबलिर्दैविकीम् बलिमाग्राहिणोदेवभैरवाद्याविनायकः तत्संबंधिनीबलि
दैविकीं पुष्पैश्चद्रोणबिल्वाद्यैर्जातीपुन्नागचंपकैः द्रोणःकुरुबकः विचित्रांरचयेत्पूजामष्टम्यामुपवासयेत् गुरुंच

शरणंगत्वागृण्हीयान्मंत्रमुत्तमं दुर्गाग्रतोजपेन्मंत्रंदुर्गापाठेनसंस्तुता तदर्धयामिनीशेषेविजयार्थंनृपोत्तम पंचाब्दंलक्षणोपे
तंमहिषाख्यंसुपूजितम् विधिवत्कालिकाखीनिजखङ्गेनघातयेत् तस्योत्थंरुधिरंमांसंगृहीत्वापूजनादिषु निर्ऋतायप्रदा
तव्यंमहाकौशिकमंत्रितं तस्याग्रतोनृपस्नायाच्छत्रुंकृत्वातुपिष्टजं खड्गेनघातयित्वातुदद्यात्स्कंदविशाखयोः ततोदेवींपुनः
प्रीतःक्षीरसर्पिर्जलादिभिः कुंकुमागरुकर्पूरचंदनैश्चापिधूपयेत् हेमादिपुष्परत्नानिवासांसिभूषणानिच नैवेद्यंपायसंचै
वदेयंदेव्याःसुभाविभिः देवीभक्तान्पूजयीतकन्यकाप्रमदादिच द्विजातीनथपाखंडानन्नदानेनतोषयेत् दुर्गाभक्तिपराये
तुमहाव्रतपराश्रये पूजयेत्तान्विशेषेणतद्रूपाश्चार्चकायतः मातृणांचैवयोगीनांपूजाकार्यातदानिशि ध्वजछत्रपताकादीनु
च्छ्रयेच्चंडिकागृहे रथ्यायांचबलिक्षेपंपटुवाद्यरवाकुलं कारयंस्तुष्यतेयेनदेवीशास्त्रविधानकैः अश्वमेधमवाप्नोतिभक्ति
तःसुरसत्तम महानवम्यांपूजेयंसर्वकामप्रदायका सर्वेषुवत्सवर्णेषुतवभक्त्याप्रकीर्तिता कृत्वाप्नोतियशोराज्यंपुत्रायु
र्धनसंपदः ब्रह्मोवाच आश्वयुक्शुक्लपक्षस्यनवम्यांप्रयतात्मवान् भक्त्यासंपूजयेद्देवदेवींसंप्रार्थयेत्ततः महिषघ्नि
महामायेचामुंडेमुंडमालिनि द्रव्यमारोग्यविजयंदेहिदेविनमोस्तुते भूतप्रेतपिशाचेभ्योरक्षोभ्यश्चमहेश्वरि देवेभ्यो-
मानुषेभ्यश्चभयेभ्योरक्षमांसदा उमेब्रह्माणिकौमारिविश्वरूपेप्रसीदमे कुमारीर्भोजयित्वाचदद्यादाच्छादनादिकं न
वसप्ताष्टकंचैवस्वस्यवित्तानुसारतः शास्त्रंचयस्ययच्चैकसतदन्नेनपूजयेत् ततःशास्त्रेषुसादेवीनिवसत्येवसंततं शास्त्र
मितिपाठः शास्त्रंतत्पुस्तकं येमूर्धमूर्धगतसंघकृताभिषेकांपंचामृतैर्गिरिसुतामभिषेचयंति तेदिव्यकल्पमनुभूय
सुवेषरूपाराज्याभिषेकमतुलंपुनराप्नुवंति दुर्गाभक्तितरंगिण्यांदेवीपुराणे सुगंधिपुष्पतोयेनस्नापयित्वानरःशिवां
नागलोकंसमासाद्यक्रीडतेपन्नगैःसह द्रोणपुष्पबिल्वपत्रंकरवीरोत्पलानिच स्नानकालेप्रयोज्यानिदेव्यैप्रीतिकराणिच
भगवत्यैनरोदत्वाविष्णुलोकेमहीयते स्नापयित्वानरोदुर्गांनवम्यांहेमवारिणा सौवर्णयानमारूढोवसुभिःसहमोदते-

रत्नोदकैर्विष्णुलोकंलभतेबांधवैःसह घृतेनस्नापयेद्यस्तुतस्यपुण्यफलंशृणु दशपूर्वान्दशापरानात्मानंचविशेषतः भवार्णवात्समुद्धृत्यदुर्गालोकेमहीयते क्षीरेणस्नापयेद्यस्तुश्रद्धाभक्तिसमन्वितः चंडिकांविधिवद्वीरइंद्रलोकेमहीयते स्नापयेद्विधिनावीरदध्नादुर्गांमहीपते राजतेनविमानेनशिवलोकेमहीयते पंचगव्येनयोदुर्गांनियाचकुशवारिणा स्नापयेद्विधिवन्मंत्रैर्ब्रह्मस्नानंहितत्स्मृतं एकाहेपिचयोदुर्गांपंचगव्येनचंडिकाम् स्नापयेन्नृपशार्दूलसगच्छेद्विष्णुसंन्निधौ

चंडीगायत्री नारायण्यैचविद्महेचंडिकायैचधीमहि तन्नोचंडिःप्रचोदयात् कात्यायन्यैचविद्महेकन्यकुमारीधीमहि तन्नोदुर्गिःप्रचोदयात् कपिलापंचगव्येनदधिक्षीरयुतेनच स्नानंशतगुणंप्रोक्तमितरेभ्योनराधिप चंडिकांस्नापयेद्यस्तुनरइक्षुरसेनच गरुडेनसयानेनविष्णुनासहमोदते पितॄनुद्दिश्ययोदुर्गांमधुनापयसापिच स्नापयेत्तस्यपितरस्तृप्तावर्षसहस्रकम् चतुर्दश्यांनवम्यांवाअष्टम्यांवानराधिप स्नापयित्वातीर्थजलैर्वाजपेयफलंलभेत् स्नापयित्वानदीतोयैर्गंधचंदनवारिणा चंद्रांशुनिर्मलःश्रीमान्चंद्रलोकेमहीयते स्नापयेद्यस्तुवैदेवींनरःकर्पूरवारिणा सगच्छेत्परंस्थानंयत्रसाचंडिकास्थिता चंडिकांस्नापयित्वातुश्रद्धयागरुवारिणा इंद्रलोकंसमासाद्यक्रीडतेसहकिन्नरैः

वाराहतंत्रे षडक्षरेणमंत्रेणपाद्यादीनथषोडश इतरैरुपचारैश्चपूर्वप्रोक्तैश्चभैरवम् द्वादशांगेनयोर्घेणचंडिकांपूजयेन्नरः दशपद्मसहस्राणिवर्षाणांमोदतेदिवि आपःक्षीरंकुशाग्राणिअक्षतादधितंडुलाः सहसिद्धार्थकादूर्वाकुंकुमंरोचनंमधु अर्घोयंकुरुशार्दूलद्वादशांगउदाहृतः महासिदेवी कुमारींउपक्रम्य अनेनपूजयेद्यस्तुसयातिपरमांगतिं अष्टांगार्घ्यंसमापूर्यदेव्यामूर्ध्निनिवेदयेत् दशवर्षसहस्राणिदुर्गालोकेमहीयते आपःक्षीरंकुशाग्राणिदधिसर्पिश्चतंडुलाः तिलाःसिद्धार्थकाश्चैवअष्टांगोर्घःप्रकीर्तितः रक्तबिल्वाक्षतैःपुष्पैर्दधिदूर्वाकुशैस्तिलैः सामान्यःसर्वदेवानामर्घोयंपरिकीर्तितः मृत्पात्रेणनरोदत्वावाजपेयफलंलभेत् ताम्रपात्रार्घ्यदानेनपौंडरीकफलंलभेत् दत्वासौव-

गपात्रेणलभेद्बहुसुवर्णकं हेमपात्रेणसर्वाणिईप्सितानिलभेद्भुवि अर्घ्यंदत्वातुरौप्येणआयूराज्यंशुभंलभेत् पलाशपद्मपत्राभ्यांगोसहस्रफलंलभेत् रौप्यपात्रेणदुर्गायैविष्णुयागफलंलभेत् कस्तूरीलेपनंकृत्वाज्योतिष्टोमफलंलभेत् चंदनागरुकर्पूरैःश्लक्ष्णपिष्टैःसकुंकुमैः दुर्गामालिप्यविधिवत्कल्पकोटिवसेद्दिवि चंदनंमदकर्पूररोचनंचचतुष्टयं एतेनलेपयेद्देवींसर्वकामानवाप्नुयात् मल्लिकाउत्पलंपद्मंशमीपुन्नागचंपकं अशोकंकर्णिकारंचद्रोणपुष्पंविशेषतः करवीरंशमीपुष्पंकुसुंभंनागकेसरं कुंदश्चयूथिकामल्लीपुन्नागंचंपकंनवं जपाचकेतकीमल्लीबृहतीशतपत्रिका तथाकुमुद्कल्हारबिल्वपाटलमालती यावनीबकुलाशोकरक्तनीलोत्पलानिच दमनंमरुबकंचैवशतधापुण्यवृद्धये केतकीचातिमुक्तश्चबंधूकंबकुलान्यपि कुमुदंकर्णिकारंचसिंदूराभंसमृद्धये भविष्ये प्रत्येकमुक्तपुष्पेषुदशनिष्कफलंलभेत् स्रग्बद्धेषुचतेष्वेवद्विगुणंकांचनस्यतु बिल्वपत्रैरखंडाद्यैःसकृद्देवींप्रपूजयेत् सर्वपापविनिर्मुक्तःशिवलोकेमहीयते मणिमौक्तिकमालांचवितानंचदुकूलकं घंटादिसर्वदादत्वाहेमपुष्पंतुशक्तितः तावद्भिश्चवृताःपुष्पैःपौत्रैश्चैवसमंततः श्रियासहैवयुज्यंतेहेमपुष्पैःशिवार्चनात् करवीरस्रजोभिश्चपूजयेद्यस्तुचंडिकाम् सोग्निष्टोमफलंलब्ध्वासूर्यलोकेमहीयते पूजयित्वानरोभक्त्याचंडिकांपद्ममालया ज्योतिष्टोमफलंप्राप्यसूर्यलोकेमहीयते शमीपुष्पस्रजाभिश्चआर्यांसंपूज्ययत्नतः गोसहस्रफलंप्राप्यविष्णुलोकेमहीयते पूजयित्वाचराजेंद्रश्रद्धयाविधिवन्नृप कुशपुष्पस्रजाभिस्तुपितृलोकमवाप्नुयात् सुगंधयुतपुष्पैस्तुपूजयेद्यस्तुचंडिकां मालाभिर्मालयावापिसोश्वमेधफलंलभेत् सुवर्णानांसुवर्णस्यशतेदत्तेफलंलभेत् मालयाबिल्वपत्राणांनवम्यांगुग्गुलेनच नीलोत्पलस्रजाभिश्चपूजयेद्यस्तुचंडिकाम् वाजपेयफलंप्राप्यरुद्रलोकेमहीयते नीलोत्पलसहस्रेणयोवैमालांप्रयच्छति वर्षकोटिसहस्राणिवर्षकोटिशतानिच दुर्गानुचरतांयातोरुद्रलोकेमहीयते तथा विलिप्तांपूजयेद्दुर्गांदिव्यपुष्पाधिवासितां तालवृंतेनसंवीज्यमहासत्रफलंलभेत् भविष्ये सर्वेषामेवधूपानांदुर्गाया

गुग्गुलुःप्रियः मंत्रस्तु धूपोयंदेवदेवेशिघृतगुग्गुलुयोजितः गृहाणवरदेमातदुर्गेदेविनमोस्तुते कृष्णागरुंनरोदत्वागोसहस्रफलंलभेत् माहिषाख्यंघृताभ्यक्तंदत्वाबिल्वमथापिवा वाजपेयफलंप्राप्यसूर्यलोकेमहीयते सकृष्णागरुधूपेनमाहिषाख्येनमंगला शोधयेत्सापकलिलंयथाग्निरिवकांचनं कृष्णागरुंसकर्पूरंचंदनंसिंहकंतथा तथाशब्दसमुच्चये भगवत्यैनरोधूपमिमंदत्वानराधिप इहकामानवाप्यांतेदुर्गालोकेमहीयते धृतदीपप्रदानेनचंडिकांपूजयेन्नरः सोश्वमेधफलंप्राप्यदुर्गायास्सुनरोभवेत् तैलदीपप्रदानेनपूजयित्वाचचंडिकाम् वाजपेयफलंप्राप्यमोदतेसहकिन्नरैः अग्निज्योतीरविज्योतिश्चंद्रज्योतिस्तथैवच ज्योतिषामुत्तमोदुर्गेदीपोयंप्रतिगृह्यतां देदीप्यतेसकनकोज्ज्वलपद्मरागरत्नप्रभाभरणहेममयेविमाने दिव्यांगनापरिवृतेनयनाभिरामंप्रज्वाल्यदीपममलंभवनेभवान्याः विशेषतोनवम्यांतुभक्त्याश्रद्धासमन्वितः यावंतंदीपसंघातंघृतेनापूर्यबोधितम् तावत्कल्पसहस्राणिदुर्गालोकेमहीयते दीपप्रदानंयोदद्याद्देवेषुब्राह्मणेषुच तेनदीपप्रदानेनअक्षय्यांगतिमाप्नुयात् गुडखंडंघृतान्नंचतथाशर्करयापिच घृतेनपरिपक्कान्नंदत्वाचब्रह्मणःपदम् स्यादितिशेषः शाल्योदनंरसालंचपानंबदरजंतथा यःप्रयच्छतिदुर्गायैसगच्छतिशिवालयं ईषदाम्लदधिशर्करापयःसाधितेंदुमरिचंसुगालितं पित्तनाशमरुचिंनिहंतिवैमोदनंचकुरुतेरसालयम् गौडमस्तुमनम्लंवापानकंसुरभीकृतं तदेवखंडमृद्वीकाशर्करासहितंपुनः साम्लंसुतीक्ष्णंसुहितंपानकंस्यान्निरत्ययं श्रद्धयापायससंयुतंशर्करासहितंनरः यःप्रयच्छतिदुर्गायैतस्यराज्यंकरेस्थितं आमिक्षांपरमान्नंचदधिचापिसशर्करं महादेव्यैनिवेद्यैववाजपेयफलंलभेत् दुर्गामुद्दिश्यपानीयंकेतकीपुष्पवासितं यःप्रयच्छतिरोद्राणांसगणाधिपतिर्भवेत् आम्रंचनारिकेरंचखर्जूरीबीजपूरकं यःप्रयच्छतिदुर्गायैसयातिपरमंपदं भक्ष्यंभोज्यंचखाद्यंचपेयंचोष्यंचपंचमं परमान्नंपिष्टकंचयावकंकृसरंतथा मोदकंपृथुकादीनिदेव्यैपक्कानिचोत्सृजेत् दद्यादित्यर्थः निवेदयेन्महादेव्यैसर्वाणिव्यंजना

निच क्षीरादीनिचगव्यानिमाहिषाणिचसर्वशः तांबूलानिचदत्वातुगंधर्वैःसहमोदते तंतुसंतानसन्नद्धं रंजितंरागवस्तुना-
दुर्गेदेविभजस्वेदं वासस्तेपरिधीयतां वस्त्राणितुविचित्राणिसूक्ष्माणिचमृदूनिच यःप्रयच्छतिदुर्गायैसगच्छतिशिवालयं
यावंतस्तंतवोवीरतेषुवस्त्रेषुसंस्थिताः तावद्वर्षसहस्राणिमोदतेचंडिकागृहे अलंकारंतुयोदद्याद्धिमायायायसुरायवा स
गच्छेद्वारुणंलोकंनानाभूषणभूषितः जातःपृथिव्यांकालेनततोद्वीपपतिर्भवेत् विभूषणप्रदानेनराजाभवतिभूतले सुव
र्णतिलकंयस्तुभगवत्यैप्रयच्छति सगच्छतिपरंस्थानंयत्रसापरमाकला सौवर्णेराजतेवापिअक्षिणीयःप्रयच्छति गोस
हस्रफलंप्राप्यसूर्यलोकेमहीयते श्रोणिसूत्रप्रदानेनमहींसागरमेखलाम् प्रशास्तिनिहतामित्रःमित्रवृद्ध्याचमोदते हे
मनूपुरदानेनस्थानंसर्वत्रविंदति देदीप्यतेकनकदंडविराजितैश्चसच्चामरैःप्रचलकुंडलसुंदरीभिः दिव्यांगनास्तुनवि
राजितभूषितांगः कृत्वातुचामरयुतांवरवस्त्रपूजाम् गौरीकस्यतुपात्राणिदुर्गायैयःप्रयच्छति तस्यपुण्यफलंप्रोक्तं
तारांगणपदंदिवि गौरिकंसुवर्णम् निष्ककोटिप्रदानाद्धिरजतस्यततोधिकं हेमपात्राणियद्दत्वापुण्यंस्याद्वेदपार
गे ताम्रपात्रप्रदानेनदेव्यैशतगुणंभवेत् तस्माच्छतगुणंप्रोक्तंदत्वामृन्मयमादरात् मृन्मयंकरकादि उपस्करप्रदाने
नप्रियमाप्नोत्यनुत्तमम् उपस्करःप्रपूजार्थंधूपदीपादिपात्रकम् चंद्रांशुनिर्मलंस्वच्छंदर्पणंमणिभूषितं पद्मोपशोभि
तंकृत्वादिव्यमाल्यानुलेपनैः दुर्गायाःपुरतःकृत्वाविष्णोर्वाशंकरस्यवा राजसूयफलंप्राप्यहंसलोकेमहीयते हंसःसूर्यः

दत्वातुयःपरमभक्तियुतोभवान्याघंटावितानमथचामरमातपत्रं केयूरहारमणिकुंडलभूषितोसौरत्नाधिपोभवति-
भूतलचक्रवर्ती शंखकुंदेंदुसंकाशंप्रवालमणिभूषितं हेमदंडमयंछत्रंदुर्गायैयःप्रयच्छति सच्छत्रेणविचित्रेणकिंकि
णीजालमालिना धार्यमाणेनशिरसिशिवलोकेमहीयते यानंशय्यांमणिंछत्रंपादुकेवाप्युपानहौ वाहनंगांगृहंवापित्रि
दशायैप्रयच्छति वायुलोकंसमासाद्यक्रीडतेवायुनासह आर्यायाश्चामरंदत्वामणिदंडविभूषितं सुवर्णरूपंचित्रंवादु

गोलोकेमहीयते मयूरपिच्छव्यजनंनानारत्नविभूषितं भगवत्यैनरोदत्वासलभेच्चसुवर्णकं तालवृंतंमहाबाहोचित्रकर्मोपशोभितम् भगवत्यैनरोदत्वावैष्णवस्यफलंलभेत् वैष्णवोयज्ञः घंटांनिवेदयेद्यस्तुलभतेवांछितंफलं हिनस्तिदैत्यतेजांसिस्वनेनापूर्ययाजगत् साघंटापातुनोदेविपापेभ्योनःसुतानिव इतिसंपूज्यनिवेदयेत् अनःशकटमानरीनिकोशात् यःशय्यांतुप्रयच्छेतदेवेषुचगुरुष्वपि ज्ञानवृद्धेषुविप्रेषुदाताननरकंव्रजेत् रत्नोपकरणैर्युक्तांसारदारुमयींशुभां शय्यांनिवेदयेद्यस्तुभगवत्यैनराधिप दुकूलवस्त्रतंतूनांपरिसंख्यातुयावती तावद्वर्षसहस्राणिदुर्गालोकेमहीयते पादुकासनदानेनभगवत्यैकृतेनतु अग्निष्टोमफलंप्राप्यविष्णुलोकेमहीयते योगांपयस्विनींशुद्धांतरुणींशीलमंडनाम् भगवत्यैनरोदद्यादश्वमेधफलंलभेत् वृषभंपरिपूर्णांगमुदासीनंशशिप्रभम् यस्तुदद्यान्नतोभक्त्याभगवत्यैसकृन्नरः यावंतिरोमकूपाणिवृषदेहस्थितानितु तावत्कल्पसहस्राणिरुद्रलोकेमहीयते सुविनीतांस्त्रियंदासींभृत्यकंवानराधिप प्रयच्छतिचदुर्गायैराजसूयाश्वमेधभाक् प्रतिपाद्यतथाभक्त्याध्वजंत्रिदशवेश्मनि निर्दहत्याशुपापानिमहापातकजान्यपि ध्वजंश्वेतपताकादिअथवापंचरंगिकां किंकिणीजालसंवीतांश्वेतपद्मोपशोभितां दत्वादेव्यैमहाबाहोशक्रलोकेमहीयते ध्वजमालाकुलंयस्तुकुर्याद्वैचंडिकालयं महाध्वजाष्टकंचापिदिशासुविदिशासुच कल्पानांतुशतंसाग्रंदुर्गालोकेमहीयते यावद्धनुःप्रमाणेनपताकाप्रतिपादिता तावद्वर्षसहस्राणिदुर्गालोकेमहीयते चतुर्हस्तंधनुः प्रभूतबलिदानंचनवम्यांविधिवच्चरेत् कूष्मांडमिक्षुदंडंचमद्यमांसानिचैवहि एतेबलिसमाःप्रोक्तास्तृप्तौच्छागसमामताः नतत्रदेशेदुर्भिक्षंनचदुःखंप्रवर्तते नाकालेम्रियतेकश्चित्पूज्यतेयत्रचंडिका शरत्कालेमहाष्टम्यांचंडिकांयःप्रपूजयेत् विमानवरमारुह्यमोदतेब्रह्मणासह अथावरणपूजा देव्यादक्षिणेसिंहंप्रपूजयेत् पूर्वादिक्रमेणएकादशदेवीर्नाममंत्रेणपूजयेत् ॐ ह्रींजयंत्यैनमः ॐ ह्रींमंगलायैनमः ॐ ह्रींकाल्यै० ॐ ह्रींभद्रकाल्यै० ॐ ह्रींकपालिन्यै० ५ ॐ ह्रींदुर्गायै० ॐ ह्रींक्षमायैन०

ॐ ह्रींशिवायै० ॐ ह्रींधात्र्यै० ॐ ह्रींस्वधायै०१०ॐ ह्रींस्वाहायै०११ इतिप्रथमावरणंनामपूजनं अनयारीत्यासर्वत्रादौ ॐकारः ह्रींकारश्चपठनीयः ॐ ह्रीं उग्रचंडिकायै०१ ॐ ह्रींप्रचंडायै०२ ॐ ह्रींस्वाहायै०३ ॐ ह्रींप्रव्हायै०४ ॐ ह्रींचंडवत्यै०५ ॐ ह्रींचंडरूपायै०६ ॐ ह्रीं उग्रदंष्ट्रायै०७ ॐ ह्रीं महादंष्ट्रायै०८ ॐ ह्रीं दंष्ट्राकरालायै०९ ॐ ह्रीं बहुरूपिण्यै०१० ॐ ह्रीं भीमसेनायै०११ ॐ विशालाक्ष्यै० श्यामयै० मंगलायै० मंगलदायै० नंदिन्यै० भद्रायै० लक्ष्म्यै० कामदायै० भोगदायै० पृथिव्यै० मेधायै० साध्व्यै० यशोवत्यै० शोभायै० बहुरूपायै० धृत्यै० आनंदायै० सुनंदायै० नंदायै० विजयायै० मंगलायै० महीधृत्यै० शिवायै० क्षमायै० सिध्यै० तुष्ट्यै० जयायै० पुष्ट्यै० ऋध्यै० रत्यै० दीप्त्यै० कांत्यै० पद्मायै० लक्ष्म्यै० ईश्वर्यै० वृधिदायै० शान्त्यै० जयवत्यै० ब्राह्म्यै० ५० जयंत्यै० अपराजितायै० अजितायै० मानिन्यै० श्वेतायै० दित्यै० मायायै० मोहिन्यै० रतिप्रियायै० लालसायै० तारायै० विमलायै० कौमार्यै० शरण्यै० गोरूपिण्यै० कामाक्ष्यै० मत्यै० दुर्गायै० क्रियायै० अरुंधत्यै० घंटायै० करालायै० कपालिन्यै० रौद्र्यैनमः कालिकायै० त्रिनेत्रायै० सुरूपायै० बहुरूपायै० रिपुहंत्र्यै० अंबिकायै० चर्चिकायै० देवपूजितायै० वैवस्वत्यै० कौमार्यै० माहेश्वर्यै० वैष्णव्यै० महालक्ष्म्यै० काल्यै० कौशिक्यै० शिवदूत्यै० चामुंडायै० शिवप्रियायै० मुंडहंत्र्यै० दुर्गपारायै० महिषमर्दिन्यै० ख्यात्यै० कृष्णायै० धूम्रायै० अग्निसौम्यायै० रौद्रायै० वाराह्यैनमः १०० रुद्राण्यै० मयूरवाहिन्यै० विंध्यवासिन्यै० गंगायै० महाचंडायै० नवचंड्यै० चंडिकायैनमः १०८ इतिनाममंत्रैःपूजयेत् ततः कालिकालीस्वाहा हृदयायनमः कालिकालिलोहदंडायैस्वाहा मुखे कालिकालिलोहदंडायै स्वाहा नेत्रे पुरतः अथपंचवक्त्राणि ईशानाय० शिरसि कालिकालिनसुरुषाय० मुखे वज्रेश्वरीघोराय० हृदये लोहदंडायै० नाभौ वामदेवाय० पादयोः स्वाहा सद्योजाताय० सर्वांगेपूजयेत् अथायुधानि दक्षिणोर्ध्वकरादि त्रिशूलं खड्गं बाणं शक्तिं वामे खेटं पाशं अंकुशं घंटां ततोवज्रनखदंष्ट्रायुधायमहासिंहासनाय ॐ हुं फट् नमः इतिसिंहं महिषासनाय० नागपा

शाय॰ इतिपूजा वर्षैःपञ्चसहस्रैस्तुयत्पापंसमुपार्जितं तत्सर्वंविलयंयाति घृताभ्यंगेनवैनृप घृतेनपयसादध्नास्नाप
येच्चंडिकांनृप निंबपत्रैश्चगंधाढ्यैर्घर्षयेद्यत्नतस्ततः इतिमहानवमीदुर्गाव्रतविधिः अथअक्षय्यनवमीव्रतप्रारंभः
वालखिल्याऊचुः कार्तिकेशुक्लनवमीतत्राभूद्द्वापरंयुगं पूर्वापराण्हगाग्राह्याक्रमाद्दानोपवासयोः अत्रकूष्मांडको
नामहतोदैत्यस्तुविष्णुना तद्रोमभिःसमुद्भूतावल्यःकूष्मांडसंभवाः तस्मात्कूष्मांडदानेनफलमाप्नोतिनिश्चितं कूष्मांडं
बहुबीजाढ्यंब्रह्मणानिर्मितंपुरा दास्यामिविष्णवेतुभ्यंपितृणांतारणायच कूष्मांडंपूजयेच्चैवगंधपुष्पाक्षतादिना पंच
रत्नैःसमायुक्तंगोघृतेनसमन्वितं फलान्नदक्षिणायुक्तंब्राह्मणायनिवेदयेत् देवस्यत्वेतिमंत्रेणपितृणांदत्तमक्षयं अस्यामे
वनवम्यांतुकुर्यात्कृष्णेनयोनरः स्वशाखोक्तेनविधिनातुलस्याःकरपीडनं कन्यादानफलंतस्यजायतेनात्रसंशयः कार्तिके
शुक्लनवमींसमवाप्यजितेंद्रियः हरिंविधायसौवर्णंतुलस्यासहितंशुभं पूजयेद्विधिवद्भक्त्याव्रतीतत्रदिनत्रयम् एवंयथो
क्तविधिनाकुर्याद्वैवाहिकंविधिं ग्राह्यंत्रिरात्रमत्रैवनवम्यामनुरोधतः मध्यान्हव्यापिनीग्राह्यानवमीपूर्ववेधिता धात्र्यश्व
त्थौचएकत्ररोपयित्वासमुद्वहेत् ननश्यतेतस्यपुण्यंकल्पकोटिशतैरपि अत्रैवोदाहरंतीममितिहासंपुरातनम् बभूवविष्णु
कांच्यांतुक्षत्रियःकनकाभिधः धनाढ्योवैश्यवृत्तिश्चवैष्णवोराजपूजितः बहुकालोगतस्तस्यविनापत्यंमुनीश्वराः ततोना
नाव्रतैर्जाताकन्याकमललोचना सुरूपालक्षणोपेतानानागुणसमन्विता पितातस्यानामचक्रेकिशोरीतिचविश्रुतं एक
दातद्गृहेयातोजन्मपत्रनिरीक्षकः दर्शयित्वाजन्मपत्रंकथंकन्याभवत्वियं ततस्तेनक्षणंध्यात्वाकनकश्शृणुमेवचः यदिब्र
वीमिसत्यंचेत्तवदुःखंभविष्यति यद्यसत्यमहंब्रूयांमिथ्यात्वंममजायते तस्मात्सत्यंवदिष्यामियद्वोचनितथाकुरु अ-
स्याःकरग्रहंकुर्यादसौवज्रान्मरिष्यति इतितद्वचनंश्रुत्वाकनकोदुःखितोभवत् नचाकारिविवाहोस्याःसाचब्राह्मण
पूजने नियुक्तान्यद्गृहंसातुनानेयामन्मुखाग्रतः दृष्ट्वेमांरूपसंपन्नांदुःखंमेबाधयिष्यति स्थित्वान्यस्मिन्गृहेसातुद्विजा

निश्चयमचीकरत् कदाचिद्दैवयोगेनतत्रागाद्द्विजपुंगवः यात्रार्थेविष्णुकांच्यास्तुवैशाखेमासिशंकरः कनकोविप्रभूस्मूषीज्ञात्वा
त्रैवसमागतः आगत्यांगणमध्येतु उपविष्टोद्विजोत्तमः किशोर्यागत्यचातिथ्यंशंकरस्यकृतंतदा दृष्ट्वातांतरुणींनम्रांसुवेषांविनयान्विताम् अजातकरपीडांचसर्वांदृष्ट्वाभ्यकवाचसः शंकरउवाच चंदनेवदशीघ्रंत्वंकिशोरीनविवाहिता किमत्रकारणंजातंतरुणीकामरूपिणी इतितद्वचनंश्रुत्वाचंदनासर्वमब्रवीत् तदाकृपालुनातेनतस्मिन्नग्रेनिवेदितम् अस्यैमंत्रंप्रयच्छामिश्रीविष्णोर्द्वादशाक्षरं करोतुवर्षत्रितयंजपमस्यसुलोचना प्रातःस्नानवतीचास्तुतुलसीवनपालिका कार्तिकस्यसितेपक्षेनवम्यांविष्णुनासह सौवर्णेनतुलस्याश्चविवाहंकारयत्वियम् तेनव्रतप्रभावेनविधवानभविष्यति तस्मित्रापितथेत्युक्त्वाप्रायश्चित्तंसदत्तवान् किशोर्यैवैष्णवंधर्मंसमग्रंचादिदेशसः द्विजेनतेनयत्प्रोक्तंकिशोर्यपितथाकरोत् वर्षत्रयंयथाशास्त्रंकिशोर्यातद्व्रतंकृतं चतुर्थेकार्तिकेमासिकिशोरीस्नपनायच प्रातःकालेगताबालातस्मिन्मार्गेसुलोचना क्षत्रियेणयदादृष्टाप्रापमोहंजडात्मकः पृष्ठेतस्यास्तुसंलग्नोभावयंस्तामनिंदिताम् केचित्तांददृशुर्दूरात्केचित्सन्नयंनिगुप्ततः स्त्रियोपितांप्रपश्यंतिपुरुषाणांतुकाकथा यथाद्वितीयाचंद्रस्यदर्शनेचोत्सुकाजनाः तथाराज्ञीप्रतीक्षंतिनद्वारेसकलाजनाः निमेषमात्रमर्कैणदृष्टास्थित्वातुबालिका अधिकंकिंवर्णनीयंतत्सौंदर्यंमुनीश्वराः केचिद्वदंति देवीयंनागकन्येतिचापरे रुद्रसंमोहनार्थायजातासाविश्वमोहिनी सानपश्यतिलोकांश्चनमार्गेनसखीगणं ध्यायंती हृदयेविष्णुंतुलसींदेवरूपिणीं तांगृहीतुंमनश्चक्रेविलेपीद्रव्यवान्बली नानाभेदाःकृतास्तेननलेभेचांतरंक्वचित् मालाकारगृहंगत्वातस्यैद्रव्यमयच्छत येनकेनप्रकारेणकिशोर्यासहसंगमः यथास्यात्क्रियतांभद्रेदेयमस्माच्चतुर्गुणम् प्रतिमासंकिशोर्यादीयमानात्द्रव्यादधिकंददामि तयाचबहवोपायादृष्टास्तद्ग्रहणायच नदर्शत्ततोपायमवदत्साविलेपिनम् नदृश्यतेमयोपायस्त्वयायत्प्रोच्यतेधुना मयातदेवकर्त्तव्यंद्रव्यग्रहणसिद्धये विलेपीउवाच तवकन्यातुभूत्वाहं

नयामिकुसुमानिच अग्रेयद्भाविभवतुगृहाणान्हिशनैंशनैं तयापिचतथेत्युक्तेसप्तम्यांनिश्चयःकृतः अष्टम्यांसा
गतातत्रकिशोरीतामुवाचह मालाकारेश्वोनवमीतुलस्याःपाणिपीडनम् तिष्ठत्वत्रत्वयानेयामुकुदाःपुष्पसंभवाः
मालिन्युवा॰ मत्कन्याचागताग्रामान्नानाकौतुककारिणी यद्यत्प्रोक्तंत्वयाबालेसमानेष्यतिसत्वरं तयापिचतथेत्युक्त्वा
मालिनीस्वगृहंययौ कथितःसर्ववृत्तांतोविलेप्यग्रेततोभवत् प्रासामहेंद्रपदवीत्येवंसुखमवापसः मालिन्यारचितारात्रौमु
कुदाविविधास्तदा विष्णुकांच्यांतदाराजाजयसेनोबभूवह तस्यपुत्रोमुकुंदोभूत्सूर्यभक्तिपरायणः किशोर्यारक्तस्तुतातेन
वार्तैश्चमतिसुंदरा तदातेनमुकुंदेनसंकल्पःकृतएवहि किशोरीयदिभार्यामेभविष्यतिदिवाकर तदान्नमहमश्नामिअन्य
थास्मान्मृतिर्मम कृत्वेत्थंसतुसंकल्पमुपवासानथचक्रमे सप्तमेहनिसूर्योसौस्वप्नेवचनमब्रवीत् सूर्यउवाच कि
शोर्याविधवायोगोवर्ततेसौकथंभवेत् सातेपत्नीप्रदास्यामित्वन्यांपद्मायतेक्षणाम् मुकुंदउवा॰ यदिदेवप्रसन्नोसित्वं
विश्वंसृजसिप्रभो बालवैधव्ययोगंचहंतुंत्वंचक्षमोह्यसि इतितस्यवचःश्रुत्वासांत्वनाबहुलाकृता तमन्यतेमुकुंदोसौतथे
त्युक्त्वागतोरविः तुलसीव्रतमाहात्म्यात्स्वप्नोभूत्कनकस्यतु इयंकन्यात्वयादेयामुकुंदायमहामते तुलस्युद्वाहमाहात्म्याद्वि
धवात्वंगमिष्यति रात्रौस्वप्नःकिशोर्यास्तुतस्यामेवाभ्यजायत आगताकन्यकाकाचिद्भर्त्रासहसमन्विता भर्तारंवदतिस्वप्ने
मममाताकिशोरिका तद्भर्त्रापितथेत्युक्तंप्रदास्येबलिमुत्तमं एतद्दत्तेनपश्चात्तुविवाहोस्याभविष्यति श्रुत्वाबलिप्रदानंसा-
स्वप्नेचिंतातुराभवत् क्वद्वादशाक्षरीविद्याक्वेदंविष्णुसमर्चनं नरकद्वारमूलंक्वमद्धस्तात्पक्षिमारणं एवंसातुसमुत्थायस्वप्नोय
मितिनिश्चितं भावयित्वासमाहूयचंदनांवाक्यमब्रवीत् निवेद्यदृष्टंस्वप्नंतुकीदृगस्यफलंवद चंदनोवाच फलंतुसम्यक्क
ल्याणिनवानिष्टंविनश्यति विवाहोभविताशीघ्रंतुलसीव्रतकारणात् इत्थंस्वप्नफलंश्रुत्वाततोकुक्कुटशब्दितं श्रुत्वासासह
सोत्थायस्नात्वोद्योगमचीकरत् यावदायातिसास्नानंकृत्वागेहेकिशोरिका तावद्विलेपीमालिन्याःपुत्रीभूत्वासमाययौ कृ

त्वाकेशांश्चगोपुच्छैःश्मश्रुचोत्पाटितंबलात् अंतरेशाकटंगृह्यनिंबुभ्यांचस्तनौकृतौ सर्वालंकारशोभाढ्याकटाक्षयतिनापरान् नज्ञातासातुकेनापिपुमान्स्त्रीरूपधारकः ध्यानंधृत्वातयाहस्तौप्रसार्यैतेयदातदा दत्तेविलेपीपुष्पाणिविलोकयतिसर्वतः कथमस्याममस्पर्शोभविष्यतिविचिंतयन् एवंदिनत्रयंतस्यप्रयातंतुमुनीश्वराः तस्मिन्नहनिसंजातोकनकःशोकपीडितः किंकार्यमधुनास्माभीराजपुत्रोवरिष्यति एवंचिंतयतस्तस्यप्रातःकालोबभूवह राजलोकाःसमायातागृहीत्वावस्त्रवाहनम् अभ्यंतरेसमागत्यमंत्रीवचनमब्रवीत् गृहेस्तितवकन्यैकामुकुंदार्थेप्रदीयताम् माविचारोस्तुभवतोनृपाज्ञापरिपाल्यताम् कनकेनतथेत्युक्तंममभाग्यमुपस्थितम् महाराजकुमारस्यवधूःकन्याभविष्यति ततःप्रोवाचमंत्रीतंद्वादश्यांलग्नमुत्तमम् रात्रौतिष्ठतियुग्माख्यंरविःषष्ठेविधुश्चखे भवेभौमोगुरुर्धर्मेपंचमेबुधभार्गवौ शनिस्तृतीयोरोराहुर्विवाहसमयःसतु उभौसंभृतसंभाराबुभावपिधनान्वितौ द्वादश्यामाययौसायंराजपुत्रःससैनिकः अब्रवीत्तत्रकनकंतेकौराजपुरोहितः तेकिरुवाच अथोनिरोधःक्रियतांकिशोर्याश्चनृपाज्ञया भविष्यतिमहादेवीनोदृश्यापुरुषैःक्वचित् इतितद्वचनंश्रुत्वापुरुषास्तुनिराकृताः जायारूपोविलेपीतुदैवात्तत्रैवसंस्थितः ततोर्धरात्रवेलायांमुकुंदोभ्यंतरंययौ तुलस्याग्रेस्थिताबालाकिशोरीसंस्मरन्हरिं ततोघनघटाशब्दस्तुमुलःसमपद्यत महावायुर्ववौतत्रप्रशांताःसर्वदीपकाः विद्युल्लताश्चकमिताअंधीभूतोखिलोजनः भास्वानुवाचनोमिथ्यामुकुंदोचिंतयन्हृदि अन्यैःप्रतर्कितंलोकेवैधव्यस्यतुकारणं भीतोमुकुंदोहृदयेयावध्यायतिभास्करं तस्यांसंधौधृतंतस्याःकरपद्मंविलेपिना तस्याःकरस्यसंसर्गात्स्वर्गाद्वज्रंपपातह नीतस्तेनविलेपीतुतत्कालंयममंदिरं बाह्यआसीत्कलकलोमुकुंदोयंमृतस्त्विति क्षणादेवततोज्ञानंमालाकारस्तुतामृता ततस्तयोर्विवाहोभूद्राज्यंपापकिशोरिका किशोर्याश्चसमुत्पन्नाप्राप्तारस्तुलसीव्रतात् आदौशास्त्रंसत्यमासीत्ततोदेवोदिवाकरः तुलसीव्रतमाहात्म्यात्कथंनस्युर्मनोरथाः सौभाग्यार्थंधनार्थंचविद्यार्थेरुङ्निवृत्तये सं

तस्यर्थंप्रकर्तव्यंतुलस्याःपाणिपीडनम् इतिश्रीसनत्कुरसंहितायांकार्तिकशुक्लनवम्यांअक्षय्यनवमीव्रतंसंपूर्णम् इतिनवमीव्रतानिसंपूर्णानि अथदशमीव्रतानिलिख्यंते अथज्येष्ठशुक्लदशम्यांदशहराख्यंस्नानदानादिकव्रतं स्कांदे ज्येष्ठस्यशुक्लदशमीसंवत्सरमुखास्मृता तस्यांस्नानंप्रकुर्वीतदानंचैवविशेषतः यांकांचित्सरितंप्राप्यप्रदद्याच्चतिलोदकम् मुच्यतेदशभिःपापैर्विष्णुलोकंसगच्छति ज्येष्ठशुक्लदशम्यांतुभवेत्सौम्यदिनंयदि ज्ञेयाहस्तर्क्षसंयुक्तासर्वपापहरातिथिः दशमीशुक्लपक्षेतुज्येष्ठमासेबुधेहनि अवतीर्णायतःस्वर्गाद्धस्तर्क्षेचसरिद्वरा हरतेदशपापानितस्माद्दशहरास्मृता ज्येष्ठेमासिसितेपक्षेदशम्यांबुधहस्तयोः गरानंदेव्यतीपातेकन्याचंद्रेवृषेरवौ दशयोगेनरःस्नात्वासर्वपापैःप्रमुच्यते तस्यांदशम्यामेतच्चस्तोत्रंगंगाजलेस्थितः पठेद्यद्दशवारंयःसर्वपापैःप्रमुच्यते सोपितत्फलमाप्नोतिगंगांसंपूज्ययत्नतः इतिदशहराविधिः अथदशहरास्तोत्रंपठेत् चतुर्भुजांत्रिनेत्रांचसर्वावयवशोभिताम् रत्नकुंभसितांभोजवरदाभयसत्कराम् श्वेतवस्त्रपरीधानांमुक्तामणिविभूषिताम् एवंध्यायेत्सुसौम्यांच चंद्रायुतसमप्रभां चामरैर्वीज्यमानांचश्वेतछत्रोपशोभितां सुप्रसन्नांचवरदांकरुणार्द्रांनिरंतरां सुधाप्लावितभूपृष्ठांदिव्यगंधानुलेपनां त्रैलोक्यनिर्मितांगंगांसर्वदेवैरधिष्ठितां दिव्यरत्नविभूषांचदिव्यमाल्यानुलेपनां ध्यात्वाजलेयथाप्रोक्तांतथार्चामंत्रपूर्ववत् ॐ नमोभगवतिहिलिहिलिमिलिमिलिगंगेमांपावयपावयस्वाहा अनेनमंत्रेणागमोक्तपंचोपचारपुष्पांजलिंश्रीगंगायैनिवेदयेत् माल्यादीनिसुगंधीनिमालत्यादीनिवैप्रभो मयाहृतानिपुष्पाणिपूजार्थंप्रतिगृह्यतां दशांगंगुग्गुलंधूपंसुगंधिंचमनोहरं गृहाणमंगलंदीपंघृतवर्तिसमन्वितम् रुद्ररूपेनमस्तेस्तुगृहाणवरदाभव परदारपरद्रव्यपरद्रोहपराङ्मुखः गंगाब्रूतेकदागत्यमामयंपावयिष्यति एवंश्रीगंगायाः ध्यानार्चनेविधायपश्चाज्जलमध्येस्थित्वा ज्येष्ठमासेसितेपक्षेप्रतिपदमारभ्यदशमीपर्यंतंप्रतिदिनमेकोत्तरवृध्यासर्वपापक्षयार्थंदशहरास्तोत्रजपमहंकरिष्ये ब्रह्मोवाच

ॐ नमःशिवायैगंगायैशिवदायैनमोनमः नमस्तेविष्णुरूपिण्यैब्रह्ममूर्त्यैनमोनमः नमस्तेब्रह्मरूपिण्यैशांकर्यैतेनमोनमः सर्वदेवस्वरूपिण्यैनमोभेषजमूर्तये सर्वस्यसर्वव्याधीनांभिषक्श्रेष्ठ्यैनमोस्तुते स्थाणुजंगमसंभूतविषहंत्र्यैनमोस्तुते संसारविषनाशिन्यैजीवनायनमोस्तुते तापत्रितयसंहृत्र्यैप्राणेश्यैतेनमोनमः शांतिसंतानकारिण्यैनमस्तेशुद्धमूर्त्तये सर्वसंसिद्धिकारिण्यैनमःपापारिमूर्तये भक्तिमुक्तिप्रदायिन्यैभद्रदायैनमोनमः भोगोपभोगदायिन्यैभोगवत्यैनमोस्तुते मंदाकिन्यैनमस्तेस्तुस्वर्गदायैनमोनमः नमस्त्रैलोक्यभूषायैत्रिपदायैनमोनमः नमस्त्रिशुक्लसंस्थायैतेजोवत्यैनमोनमः नंदायैलिंगधारिण्यैसुधाधारात्मनेनमः नमस्तेविश्वमुख्यायैनमोदेव्यैनमोनमः बृहत्यैतेनमस्तेस्तुलोकधात्र्यैनमोनमः नमस्तेविश्वमित्रायैनंदिन्यैतेनमोनमः पृथ्व्यैशिवामृतायैचसुवृषायैनमोनमः परापरशताढ्यायैतारायैतेनमोनमः पाशजालनिकृंतिन्यैअभिन्नायैनमोनमः शांतायैचवरिष्ठायैवरदायैनमोनमः उग्रायैसुखजग्ध्यैचसंजीविन्यैनमोस्तुते ब्रह्मिष्ठायैब्रह्मदायैदुरितघ्न्यैनमोनमः प्रणतार्तिप्रभंजिन्यैजगन्मात्रेनमोस्तुते सर्वापत्प्रतिपक्षायैमंगलायैनमोनमः शरणागतदीनार्तपरित्राणपरायणे सर्वस्यार्तिहरेदेविनारायणिनमोस्तुते निर्लेपायैदुर्गहंत्र्यैदक्षायैतेनमोनमः परापरपरायैच गंगेनिर्वाणदायिनी गंगेमामग्रतोभूयागंगेमे देविपृष्ठतः गंगेमेपार्श्वयोर्देवित्वयिगंगेस्तुमेस्थितिः आदौत्वमंतेमध्येच सर्वंत्वंगांगतेशिवे त्वमेवमूलप्रकृतिस्त्वंपुमान्परएवहि गंगेत्वंपरमात्माचशिवस्तुभ्यंनमःशिवे यइदंपठते स्तोत्रंभक्त्यानित्यंनरःप्रियः शृणोतिश्रद्धयायुक्तःकायवाक्चितसंवैः दशधाःसंस्थितैर्दोषैः सर्वैरेवप्रमुच्यते-रोगस्थोमुच्यतेरोगादापद्भ्यश्चप्रमुच्यते द्विषद्भ्योबंधनाद्येश्चभयेभ्यश्चप्रमुच्यते सर्वान्कामानवाप्नोतिप्रेत्यब्रह्मणिलीयते इमंस्तवंगृहेयस्तुलेखयित्वाविनिक्षिपेत् नाग्निचोरभयंतत्रपापेभ्योहिभयंनहि ज्येष्ठेमासिसितेपक्षे दशमीहस्तसंयुता संहरेत्त्रिविधंपापंबुधवारेणसंयुता तस्यांदशम्यामेतच्चस्तोत्रंगंगाजलेस्थितः यःपठेद्दशकृत्व

रुक्दरिद्रोवापिचाक्षमः सोपितत्फलमाप्नोतिगंगांसंपूज्ययत्नतः पूर्वोक्तेनविधानेनयत्फलंसंप्रकीर्तितम् यथागौरीतथागंगातस्माद्गौर्यारुक्पूजने विधिश्चविहितःसम्यक्सोपिगंगाप्रपूजने यथाशिवस्तथाविष्णुर्यथालक्ष्मीस्तथाउमा लक्ष्मीरुमातथागंगाचतूरूपंनभिद्यते विष्णुरुद्रांतरंयच्चश्रीगौर्योरंतरंतथा गंगागौर्योरंतरंचयोब्रूतेसच मूढधीः रौरवादिषुघोरेषुनरकेषुपतत्यधः प्रदत्तानामुपादानंहिंसाचैवाविधानतः परदारोपसेवाचकायिकंत्रिविधंस्मृतं पारुष्यमनृतंचैवपैशून्यंचापिसर्वतः असंबद्धप्रलापश्चवाङ्मयंस्याच्चतुर्विधं परद्रव्येष्वभिध्यानंमनसानिष्टचिंतनं वितथाभिनिवेशश्चमानसंत्रिविधंस्मृतम् एतानिदशपापानिहरत्वमथजान्हवि दशपापहरायस्मात्तस्माद्दशहरास्मृता एतैर्दशविधैःपापैःकोटिजन्मसमुद्भवैः मुच्यतेनात्रसंदेहो ब्रह्मणोवचनंयथा दशत्रिंशच्छतान्सर्वान्पितॄनथपितामहान् उद्धरत्येवसंसारान्मंत्रेणानेनपूजिता ॐनमोभगवत्यैनारायण्यैदशपापहरायैशिवायैगंगायैविष्णुमुख्यायैक्षयायैरेवत्यैभागीरथ्यैनमोनमः ज्येष्ठेमासिसितेपक्षेदशम्यांबुधहस्तयोः गरानंदेव्यतीपातेकन्याचंद्रेवृषेरवौ दशयोगेनरःस्नात्वासर्वपापैःप्रमुच्यते सितकनकनिषण्णांशुभ्रवर्णांत्रिनेत्रांकरधृतकलशाब्जामुद्यताभीत्यभीष्टां विधिहरिहरसूर्याग्नींदुकोटीरजुष्टांकलितसितदुकूलांजान्हवींतांनमामि आदावादिपितामहस्यनियमव्यापारपात्रेजलंपश्चात्पन्नगशायिनोभगवतःपादोदकंपावनं भूयःशंभुजटाविभूषणमणिर्जन्होर्महर्षेरियंकन्याकल्मषनाशिनीभगवतीभागीरथीदृश्यते इतिकाशीखंडेदश॰स्तोत्रंसंपूर्णं अथआषाढशुक्लदशमीमन्वादिः सापूर्वाण्हव्यापिनीग्राह्या तत्रशुक्लदशम्यांआषाढदशमीव्रतंहेमाद्रौभविष्ये युधिष्ठिरउवा॰ कथमाशादशम्येषागोविंदक्रियतेकदा दमयंत्या नलस्येवययाज्ञातःसमागमः कृष्णउवाच राज्याशयाराजपुत्रःकृष्यर्थंचकृषीवलः वाणिज्यार्थंवणिक्पुत्रःपुत्रार्थंगुर्विणीतथा धर्मकामार्थसंसिध्यैलोकःकन्यावरार्थिनी यष्टुकामोद्विजवरोयोगीश्रेयोर्थमेवच चिरप्रवसितेकांतेबालेदंतनिपीडिते एत

दन्येषुकर्तव्यमाज्ञाव्रतमिदंतथा यस्माद्यस्यभवेदार्तिःकर्तव्यंतेनतद्व्रतं शुक्लपक्षेदशम्यांतुस्नात्वासंपूज्यदेवताः नक्तमाशासुपूज्या वैपुष्पभक्तकचंदनैः गृहांगणेलेखयित्वायवैःपिष्टातकेनवा स्त्रीरूपाश्चाधिदेवस्यशस्त्रवाहनचिन्हिताः अधिदेवस्यतत्तद्दिक्पालस्यइंद्रादयस्तच्छत्रैर्वाहनैश्चचिन्हितालेखयित्वेत्यर्थः दत्वाघृताक्तंनैवेद्यंपृथक्दीपांश्चदापयेत् फलानिकामजातानिततः कार्यंनिवेदयेत् ततः आशास्त्वाशाःसदासंतुसिध्यंतांमेमनोरथाः भवतीनांप्रसादेनसदाकल्याणमास्थिताः एवंसंपूज्यविधिवद्दत्वाविप्रायदक्षिणां अनेनक्रमयोगेनमासिमासिसमाचरेत् वर्षमेकंकुरुश्रेष्ठततःपश्चात्समुद्ययेत् अर्वाक्संवत्सरस्यापिसिध्यर्थेवासमुद्ययेत् सौवर्णीकारयेदाशारौप्यापिष्टातकेनवा ज्ञातिबंधुजनैःसार्द्धंततःसम्यगलंकृतः पूजाश्चक्रमयोगेनमंत्रैरेभिर्गृहाणभो त्वयिसन्निहितःशक्रःसुरासुरनमस्कृतः पूर्वात्वंभुवनस्यास्यऐंद्रीदिग्देवतेनमः अग्नेःपरिग्रहाद्दाशेत्वमाग्नेयेतिपठ्यते तेजोरूपापराशक्तिराग्नेयीवरदाभव धर्मराजंसमाश्रित्यलोकान्संयमयस्यमून् तेनसंयमिनीचासियाम्येसत्कामदाभव खड्गहस्तानिविकृतानिर्ऋतिस्थानमाश्रिता तेननिर्ऋतिनामासित्वमाशांपूरयस्वमे त्वयास्तेभुवनाधारोवरुणोयादसांपतिः कामार्थंममधर्मार्थंवारुणीप्रवणाभव अधिष्ठितासियस्मात्त्वंवायुनाजगदायुना वायव्येत्वमतःशांतिंनित्यंयच्छममालये धनदेनाधिष्ठितात्वंप्रख्यातात्वमिहोत्तरा निरुत्तराभवास्मासुदत्वासद्योमनोरथम् ऐशानिजगदीशेनशंभुनात्वमलंकृता पूरयस्वाशुमेदेविवांछितानिनमोनमः भुजंगाष्टकुलेनत्वंसेवितासियतोह्यधः नागांगनाभिःसहिताहिताभवममाद्यवै सर्वलोकोपरिगतासर्वदात्वंशिवायच सनकाद्यैःपरिवृताब्राह्मिमांपाहिसर्वदा नक्षत्राणिचसर्वाणिग्रहास्तारागणस्तथा नक्षत्रमातरोयाश्चभूतप्रेतविनायकाः सर्वेममेष्टसिद्ध्यर्थंभवंतुप्रवणाःसदा एभिर्मंत्रैःसमभ्यर्च्यपुष्पधूपादिनाततः वासोभिरभिषेकाद्यैःफलानिविनिवेदयेत् ततोघंटानिनादेनगीतवादित्रमंगलैः नृत्यंतीभिर्वरस्त्रीभिर्जाग्रत्याञ्चनिशांनयेत् कुंकुमाक्षततांबूलदानमानादिभिःसुखम् प्रभातेवेदविदुषेब्राह्मणायनिवेदयेत् अनेनविधिनासर्वंक्षमाप्यप्रतिपत्यच भुंजीतमित्रसहितःसुहृद्बंधुजनेनच ए

वंयःकुरुतेपार्थदशमीव्रतमादरात् सर्वान्कामानवाप्नोतिमनोभिलषितान्नरः स्त्रीभिर्विशेषतःकार्यंव्रतमेतद्युधिष्ठिर प्राणिवर्गे-
यतोनार्यःश्रद्धाकामपरायणाः धन्यंयशस्यमायुष्यंसर्वकामफलप्रदं कथितंतेमहाराजमयाव्रतमनुत्तमम् येमानवामनुजपुंगव
कामकामाःसंपूजयंतिदशमीषुसदादशाशाः तेषांविशेषनिहितान्हृदयेपिकामानाशाःफलंत्यलमलंबहुनोदितेन इतिश्रीभ-
विष्योत्तरेआशादशमीव्रतं अथभाद्रशुक्लदशम्यांदशावतारव्रतंभविष्योत्तरे युधिष्ठिरउवाच व्रतंदशावताराख्यंकृष्णब्रूहि
सविस्तरम् समंत्रंसरहस्यंच सर्वपापोपशांतिदं कृष्णउवाच दशम्यांशुक्लपक्षस्यमासेप्रोष्ठपदेशुचिः स्नात्वाजलाशयेस्वच्छे
पितृदेवादितर्पणम् कृत्वाकुरुकुलश्रेष्ठगृहमागत्यमानवः गृण्हीयाद्धान्यचूर्णस्यस्वहस्तप्रसृतित्रयं क्रमेणपाचयेत्तत्तु पुंसंज्ञंघृत
पायसं वर्षेवर्षेदिनेतस्मिन्नेवंवर्षाणिवैदश प्रथमेपूपकान्वर्षेद्वितीयेघृतपूरिकान् तृतीयेपूपकासारान् चतुर्थेमोदकान्शुभान्
सोहालिकान्पंचमेवैषष्ठेतुखंडवेष्टकान् सप्तमेद्वेकोकरसानर्कपुष्पान्तथाष्टमे नवमेकर्णवेष्टांश्चदशमेमंडकान्शुभान् दशात्म
नोदशाहरेर्दशविप्रायदापयेत् क्रमेणभक्षयेद्दत्वायथोक्तविधिनानृप अर्धार्धंविष्णवेदेयमर्धार्धंचद्विजातये ततोपराह्णसम्भीयाङ्
त्वारम्येजलाशये दशावतारमभ्यर्च्यपुष्पधूपविलेपनैः मंत्रेणाणेनमेधावीहरिमभ्युक्ष्यवारिणा मत्स्यंकूर्मंवराहंचनारसिंहंच
वामनं रामंरामंचकृष्णंचबौधंचकल्किनंतथेति गतोस्मिशरणंदेवंहरिंनारायणंविभुं प्रणतोस्मिजगन्नाथंसमेविष्णुःप्रसीदतु
छिनत्तुवैष्णवींमायांभक्त्याप्रीतोजनार्दनः श्वेतद्वीपंनयत्वस्मान् मयात्मासन्निवेशितः अत्रहैमीर्महार्हाश्चदशमूर्तीःसुलक्षणाः
गंधपुष्पैश्चनैवेद्यैरर्चयेद्विधिपूर्वकम् एवंयःकुरुतेभक्त्याविधिनानेनसुव्रत व्रतंदशावताराख्यंतस्यपुण्यफलंशृणु श्राव्यं
तेयास्त्विमाल्लोकेपुरुषाणांदशादश ताश्छिनत्तिनसंदेहश्चक्रप्रहरणोविभुः संसारसागराद्घोरात्समुद्धृत्यजगत्पतिः श्वेत
द्वीपंनयत्याशुव्रतेनानेनतोषितः किंतस्यनभवेल्लोकेयस्यतुष्टोजनार्दनः यद्दुर्लभंफलंप्राप्तुंमनसोयन्नगोचरं तदप्यप्रार्थि
तंध्यातोददातिमधुसूदनः सोहंजनार्दनःसाक्षात् कालरूपधरोच्युतः मर्त्यलोकेस्वयंप्राप्यभूभारोत्तारणायच यास्त्रीव्र

तमिदंपार्थकरिष्यतिमयोदितं साचलक्ष्म्यायुनानित्यंपुत्रभक्तिसमन्विता मर्त्यलोकेचिरंस्थित्वामर्त्यलोकेमहीयते येपूजयंतिपुरुषाःपुरुषोत्तमस्यमत्स्यादिकांस्तुदशमीषुदशावतारान् गन्येदशस्वपिदशासुसुखंविहृत्यतेयांतियानमधिरुह्यसुरारिलोकं

इतिभविष्येभाद्रपदशुक्लदशम्यांदशावतारव्रतंसंपूर्णम् अथआश्विनशुक्लदशम्यांविजयादशमीव्रतं साचतारकोदयव्यापिनीग्राह्या तदुक्तंचिंतामणौ आश्विनस्यसितेपक्षेदशम्यांतारकोदये सकालोविजयोनामसर्वकामार्थसाधकः रत्नकोशे ईषत्संध्यामतिक्रांतःकिंचिदुद्भिन्नतारकः विजयोनामकालोयंसर्वकामार्थसाधकः दिनद्वयेतद्व्याप्तावव्याप्तौवा अपराजितपूजायांपूर्वैव तदुक्तंहेमाद्रौस्कांदे दशम्यांतुनरैःसम्यक्पूजनीयापराजिता ईशानींदिशमाश्रित्यअपराण्हेप्रयत्नतः यापूर्णानवमीयुक्तातस्यांपूज्यापराजिता क्षेमार्थेविजयार्थेचपूर्वोक्तविधिनानरैः नवमीशेषसंयुक्तदशम्यामपराजिता ददातिविजयंदेवीपूजिताजयवर्धिनी आश्विनेशुक्लपक्षेतुदशम्यांपूजयेन्नरः एकादश्यांनकुर्वीतपूजनंचापराजितम् आश्विनस्यसितेपक्षेदशमीसर्वराशिषु सायंकालेशुभायात्रादिवाचविजयक्षणे एकादशमुहूर्तोयोविजयःसंप्रकीर्तितः तस्मिन्सर्वैर्विधातव्यायात्राविजयकांक्षिभिः दिनद्वयेएकादशमुहूर्तेव्याप्तावव्याप्तौवाश्रवणयुक्ताग्राह्या तथाच हेमाद्रौमदनरत्नेकश्यपः उदयेदशमीकिंचित्संपूर्णैकादशीयदि श्रवणर्क्षंयदाकालेसातिथिर्विजयाभिधा श्रवणर्क्षेतुपूर्णायांकाकुत्स्थःप्रस्थितोयतः उल्लंघयेयुःसीमांतंतद्दिनर्क्षेततोनराः अत्रकृत्यंभविष्ये शमींशुभलक्षणोपेतामीशान्याशांप्रतिष्ठितां संप्रार्थ्यतांचसंपूज्यत्वीशानीसंमुखोभवेत् शमीपूजा ध्यानं शमीशमयतेपापंशमीशत्रुविनाशिनी अर्जुनस्यधनुर्धारीरामस्यप्रियवादिनी शमीशमयतेपापंशमीलोहितकंटका धारिण्यर्जुनबाणानांरामस्यप्रियवादिनी करिष्यमाणयात्रायांयथाकालंसुखंमया तत्रनिर्विघ्नकर्त्रीत्वंभवश्रीरामपूजिते गृहीत्वासाक्षतामार्द्रांशमीमूलगतांमृदम् गीतवादित्रनिर्घोषैरानयेत्स्वगृहंप्रति ततोभूषणवस्त्रादिधारयेत्स्वजनैःसह शम्यभावेवनराजपूजाकार्या तत्रमंत्रः आदिराजमहाराजवनराजवनस्पते इष्टदर्शनमिष्टान्नंशत्रूणांचपराजयः अथापराजितदशम्यां

पूर्वोक्तेविजयामुहूर्तेउक्तं प्रास्थानिकमित्युपक्रम्य अथविजयाख्यानं कृष्णउवाच अलंकृतोभूषितभृत्यवर्गःपरिष्कृतोत्तुंगतुरंगनागः वादित्रनादप्रतिनादिताशः स्वमंगलाचारपरंपराशीः राजानिर्गत्यभवनात्पुरोहितपुरोगमः प्रास्थानिकंविधिंकृत्वाप्रतिष्ठेत्पूर्वतोदिशि गत्वानगरसीमांतंवास्तुपूजांसमाचरेत् संपूज्यचाथदिक्पालान्पूजयेत्पथिदेवताः मंत्रैर्वैदिकपौराणैःपूजयेच्चशमीतरुं अमंगलानांशमनींसर्वसिद्धिकरींशुभां दुःस्वप्नशमनींधन्यांप्रपद्येहंशमींशुभाम् ततःकृताशीःपूर्वस्यांदिशिविष्णुक्रमात्क्रमेत् शत्रोःप्रतिकृतिंकृत्वाध्यात्वारामंतथार्थदं शरेणस्वर्णपुंखेनविध्येद्धृदयमर्मणि दिशाविजयमंत्राश्चपठितव्याःपुरोधसा एवमेवविधिंकृत्वादक्षिणादिभिरर्चयेत् पूज्यान्द्विजांश्चसंपूज्यसावत्सरपुरोहितौ गजवाजिपदातीनांमेक्षाकौतुकमाचरेत् जयमंगलशब्देनततःस्वभवनंविशेत् नीराजमानःपुण्याभिर्गणिकाभिःस्वमंगले यएवंकुरुतेराजावर्षेवर्षेसुमंगलं आयुरारोग्यमैश्वर्यंविजयंचसगच्छति नाधयोव्याधयश्चैवनभवंतिपराजयाः श्रियंपुण्यमवाप्नोतिविजयंचसदासुवि

उक्तंप्रख्यानंव्याख्यास्यामः जनेषुगमिष्यत्सुपार्थिवश्चदुंदुभीन्वीणाश्चोपवादयेत् ततः आश्विनस्यसितेपक्षेदशम्यांचघटोत्थापनानंतरंसुचारुवेषैःसहसंभारान्नुपकल्पयित्वाएकादशमुहूर्तेश्रवणयोगेसीमांतेगत्वापश्चाद्गेहेजनैःसहसुवर्णसहितंग्रामंआविशेत् योषितांकौतुकैश्चप्रज्वालितैर्दीपैरंजनानुलेपनंकारयित्वावासोगंधस्रक्पुष्पैश्चपूजयित्वाहिरण्यरूपमितिमंत्रेणसुवर्णपूजनंकृत्वाआशिषःप्रतिगृह्यलक्ष्मींनमस्कुर्यात् सर्वाभगिनीःवस्त्रालंकारभूषणैःपूजयेत् ब्राह्मणान्पूजयेत्तत्रगंधपुष्पैश्चदीपकैः इतिभविष्येविजयादशमीव्रतंसंपूर्णम् इतिदशमीव्रतानिसमाप्तानि अथएकादशीव्रतानि तत्रएकादश्यामुपवासनिर्णयः निषेधपरिपालनात्मकोव्रतरूपश्च साचद्विधाशुद्धादशमीविद्धाचतत्रवेधोपिद्विविधः अरुणोदयेदशमीसंबंधात्सूर्योदयेच तत्रआद्योवैष्णवैस्त्याज्यः तथाचभविष्ये अरुणोदयकालेतुदशमीयदिदृश्यते साविद्धैकादशीतत्रपापमूलमुपोषणं तथा दशमीशेषसंयुक्तोयदिस्यादरुणोदयः नैवोपोष्यंवैष्णवेनतद्दिनेकादशीव्रतम् अरुणोदयस्वरू

पंतुहेमाद्रौस्मृत्यंतरेदर्शितम् निशिप्रांतेतुयामार्धेदेववादित्रनिःस्वने सारस्वतेअध्ययनेअरुणोदयउच्यते यामार्धमुहूर्तद्वय
लक्षणम् अतएवसौरधर्मे आदित्योदयवेलायांयामुहूर्तद्वयान्विता सैकादशीतिसंपूर्णाविद्धान्यापरिकीर्तिता यत्तुमा
धवीयेस्कांदे उदयात्प्राक्चतस्रस्तुघटिकाअरुणोदयः तदपिद्वात्रिंशत्घटिकारात्रिमानपक्षेतुमुहूर्तद्वयस्यतावत्परिमाण-
त्वमुक्तमितिद्वैतनिर्णयः ब्रह्मवैवर्तेच चतस्रोघटिकाःप्रातररुणोदयनिश्चयः चतुष्टयविभागोत्रवेधादीनांकिलोदितः अरु
णोदयवेधःस्यात्सार्धंतुघटिकात्रयम् अतिवेधोद्विघटिकःप्रभासंदर्शनाद्रवेः महावेधोपितत्रैवदृश्यतेर्कोनदृश्यते तुरीय-
स्तत्रविहितोयोगःसूर्योदयेसति अन्यच्च पंचपंचउषःकालःसप्तपंचारुणोदयः अष्टपंचभवेत्प्रातःशेषःसूर्योदयःस्मृतः
वैष्णवलक्षणंतुस्कांदे परमापदमापन्नोहर्षेवासमुपस्थिते नैकादशींत्यजेद्यस्तुतस्यदीक्षास्तुवैष्णवी भविष्ये यथाशुक्ला
तथाकृष्णायथाकृष्णातथोत्तरा तुल्येतेमन्यतेयस्तुसहिवैष्णवउच्यते अतिवेधादयःसर्वेयेवेधास्तिथिषुस्मृताः सर्वेप्येवे
धाविज्ञेयावेधःसूर्योदयःस्मृतः तत्रशुक्लाविद्धाएकादशीचतुर्धा अधिकाएकादशी अधिकाद्वादशी उभयाधिका अनुभ
याधिकाचशुद्धायांएकादश्याधिक्येपरेद्युरुपवासमाहनारदः संपूर्णैकादशीयत्रद्वादश्यांवृद्धिगामिनी द्वादश्यांलंघनंकार्यं-
त्रयोदश्यांतुपारणम् वृद्धवसिष्ठः एकादशीयदालुप्तापरतोद्वादशीभवेत् उपोष्याद्वादशीतत्रयदीच्छेत्परांगतिं भृगुः संपूर्णैकादशीयत्र
प्रभातेपुनरेवसा ततोपोष्याद्वितीयातुपरतोद्वादशीयदि प्रथमेहनिसंपूर्णाव्याप्याहोरात्रसंयुता द्वादश्यांतुतदोपोष्योद
श्यतेपुनरेवसा पूर्वाकार्यागृहस्थैश्चयतिभिश्चोत्तराविभो मार्कंडेयः संपूर्णैकादशीयत्रपरत्रपुनरेवच पूर्वामुपवसेत्का
मीनिष्कामस्तुपरांवसेत् हेमाद्रौ विद्धाप्यविद्धाविज्ञेयापरतोद्वादशीनचेत् अविद्धापिचविद्धास्यात्परतोद्वादशीयदि ए
कादशीविवृद्धाचेच्छुक्लेकृष्णेविशेषतः उत्तरांतुयतिःकुर्यात्पूर्वामुपवसेद्गृही सनत्कुमारः नकरोतिहियोमूढएकादश्या
मुपोषणम् सनरोनरकंयातिरौरवेतमसावृते यदीच्छेद्विपुलान्भोगान्मुक्तिंचात्यंतदुर्लभाम् उपोष्यैकादशींनित्यंप

क्षयोरुभयोरपि माधवेप्युक्तं एकादशीद्वादशीचेत्तूभयंवर्धते यदा तदापूर्वदिनंत्याज्यंस्मार्तैर्ग्राह्यंपरंदिनं त्रयोदश्यांनलभ्येत
द्वादशीयदिकिंचन उपोष्यैकादशीतत्रदशमीमिश्रितायदीति स्कांदात् हेमाद्रिमते शुद्धाविद्धाद्विधानंदात्रिधान्यूनसमाधिकैः ष
ड्प्रकारास्तुनस्त्रेधा द्वादश्यूनासमाधिकैः इत्यष्टैकादशीभेदाः पाद्मे संपूर्णैकादशीत्याज्यापरतोद्वादशीयदि उपोष्याद्वा
शीशुद्धाद्वादश्यामेवपारणम् पारणाहेनलभ्येतद्वादशीकलयापिचेत् तदानींदशमीविद्धाउपोष्यैकादशीतिथिः बहुवाक्य
विरोधेनसंदेहोजायतेयदा द्वादशीतुतदाग्राह्यात्रयोदश्यांतुपारणं इतिमार्कंडेयोक्तेः कात्यायनः अष्टवर्षाधिकोमर्त्योह्य
शीतिन्यूनवत्सरः एकादश्यामुपवसेत्पक्षयोरुभयोरपि भविष्ये ब्रह्मचारीचनारीचशुक्लामेवसदागृही सधवायारुक्तभर्त्रा
ज्ञयाधिकारः पत्यौजीवतियानारीउपोष्यव्रतमाचरेत् आयुष्यंहरतेभर्तुःसानारीनरकंव्रजेत् कौर्मेतदुक्तंमदनरत्नेस्मृत्यंतरे -
शयनीबोधिनीमध्येयाकृष्णैकादशीभवेत् सैवोपोष्यागृहस्थेननान्याकृष्णाकदाचन नान्याकृष्णेतिननिषेधः संक्रांत्यामुप
वासंचकृष्णैकादशिवासरे चंद्रसूर्यग्रहेचैवनकुर्यात्पुत्रवान्गृही नारदः आदित्येहनिसंक्रांतौग्रहणेचंद्रसूर्ययोः पारणंचोप
वासंचनकुर्यात्पुत्रवान्गृही माधवीयेकात्यायनः अर्कपर्वद्वयेरात्रौचतुर्दश्यष्टमीदिवा एकादश्यामहोरात्रंभुक्त्वाचांद्रायणंच
रेत् अथकाम्यव्रतविधिः कांस्यंमांसंमसूरांश्चचणकान्कोरदूषकान् शाकंमधुपरान्नंचत्यजेदुपवसन्स्त्रियम् शाकंमाषं
मसूरांश्चपुनर्भोजनमैथुनम् द्यूतमत्यंबुपानंचदशम्यांवैष्णवस्त्यजेत् मदनरत्नेनारदीये अक्षारलवणाःसर्वेहविष्यान्ननि
षेविणः अवनीतल्पशयनाःप्रियासंगविवर्जिताः हेमाद्रौदेवलः असकृज्जलपानाच्चसकृत्तांबूलचर्वणात् उपवासःप्रणश्ये
तदिवास्वापाच्चमैथुनात् अशक्तौतुमदनरत्नेदेवलः अत्ययेचांबुपानेचनोपवासःप्रणश्यति अत्ययेकष्टे विष्णुरहस्ये गा
त्राभ्यंगंशिरोभ्यंगंतांबूलंचानुलेपनम् व्रतस्थोवर्जयेत्सर्वंयच्चान्यच्चनिराकृतं एषुप्रायश्चित्तं स्तेनहिंसकयोःसख्यंकृत्वा-
स्तैन्यंचहिंसनं प्रायश्चित्तंव्रतीकुर्याज्जपेन्नामशतत्रयम् मिथ्यावादेदिवास्वापेबहुशोंबुनिषेवणे अष्टाक्षरंजपेन्मंत्रंशतमष्टो

तरंशुचिः ॐ नमोनारायणायेतिअष्टाक्षरः हेमाद्रौवसिष्ठः उपवासेतथाश्राद्धेनकुर्याद्दंतधावनम् दंतानांकाष्ठसंयोगोदहत्यासप्तमंकुलं एकादश्यांश्राद्धेप्राप्तेमाधवीयेकात्यायनः उपवासोयदानित्यःश्राद्धंनैमित्तिकंभवेत् उपवासंतदाकुर्यादाघ्रायपितृसेवितं मातापित्रोःक्षयेप्राप्तेभवेदेकादशीयदि अभ्यर्च्यपितृदेवांश्चआजिघ्रेत्पितृसेवितम् प्राप्तेहरिदिनेसम्यक्विधायनियमंनिशि दशम्यामुपवासंचप्रकुर्याद्वैष्णवंव्रतम् तत्रएकादश्यांसंकल्पः गृहीत्वौदुंबरंपात्रंवारिपूर्णमुदङ्मुखः उपवासंतुगृण्हीयाद्यथासंकल्पयेद्बुधः औदुंबरंताम्रमयं मंत्रः एकादश्यांनिराहारःस्थित्वाहमपरेहनि भोक्ष्यामिपुंडरीकाक्षशरणंमेभवाच्युत शैवादीनांतुहेमाद्रौसौरेपुराणे सावित्र्याप्यथवानाम्नासंकल्पंतुसमाचरेत् वाराहे इत्युच्चार्यततोविद्वान्पुष्पांजलिमथार्पयेत् अष्टाक्षरेणमंत्रेणत्रिर्जप्तेनाभिमंत्रितम् उपवासफलंप्रेप्सुःपिबेत्पात्रगतंजलं इतिकात्यायनोक्तेः मध्यरात्रेउदयेवादशमीवेधेरात्रौसंकल्पइतिमाधवः विद्धोपवासेनभ्रंस्यदिनंत्यक्त्वासमाहितः रात्रौसंपूजयेद्विष्णुंसंकल्पंचसदाचरेत् देवलः देवस्यपुरतःकुर्याज्जागरंनियतोव्रती अज्ञानतिमिरांधस्यव्रतेनानेनकेशव प्रसीदसुमुखोनाथज्ञानदृष्टिप्रदोभव दिवानिद्रांपरान्नंचपुनर्भोजनमैथुनं क्षौद्रंकांस्यंमाषतैलंद्वादश्यामष्टवर्जयेत् पुनर्भोजनमध्यायोभारआयासमैथुने उपवासफलंहन्युर्दिवानिद्राचपंचमी स्कांदे असंभाष्यान्हिसंभाष्यतुलस्याश्चार्पितंदलं आमलक्याःफलंवापिपारणेभक्ष्यशुद्ध्यति भोजनानंतरंविष्णोरर्पितंतुलसीदलं भक्षणात्पापनिर्मुक्तिश्चांद्रायणशताधिका इतिविष्णूक्तेः सूतकांतेनरःस्नात्वापूजयित्वाजनार्दनम् दानंदत्वाविधानेनव्रतस्यफलमश्नुते स्त्रीभिस्तुरजोदर्शनेपिकार्यं एकादश्यांनभुंजीतनारीदृष्टेरजस्यपि इतिमात्स्योक्तेः यदाद्वादश्यांश्रवणर्क्षंतदाशुद्धामप्येकादशींत्यक्त्वाद्वादशीमुपवसेत् शुक्लावायदिवाकृष्णाद्वादशीश्रवणान्विता तयोरेवोपवासःस्यात्त्रयोदश्यांतुपारणं इतिनारदोक्तेः तत्रशुद्धाधिकैकादशीउन्मीलिनी द्वादशीवर्द्धतेचेत्साव्यंजुली वासरत्रयस्पर्शिनीत्रिस्पर्शा अग्रेपर्वणःसंपूर्णाधिकत्वेपक्षवर्धिनी पुष्यर्क्षयुताजया श्रवणयुताविजया पुनर्वसुयुताजयंतीरोहिणीयुतापापनाशिनीएताअ

ष्टौमहाद्वादश्यः एताःपापक्षयमुक्तिकामउपवसेत् अत्रमूलंहेमाद्रौज्ञेयं द्वादश्याःप्रथमःपादोहरिवासरसंज्ञितः तमतिक्रम्यकुर्वीतपारणंविष्णुतत्परः अन्यत्र सर्वेषामुपवासानांप्रातरेवहिपारणं इतिएकादशीनिर्णयः अथशुक्लकृष्णैकादश्युद्यापनं मार्गशीर्षेशुक्लपक्षेकार्तिकेवातथैवच शुभमासेतुकार्यासाशुक्लकृष्णाउभेतयोः व्रतविधिः दशम्यामेकभुक्तंतु दंतधावनपूर्वकं एकादश्यांशुचिर्भूत्वा आचार्यंवरयेत्ततः तत्रसंकल्पः गणेशस्मरणपूर्वकंमासपक्षाद्युल्लिख्यतिथ्यादिसंकीर्त्यमया ऽ चरितस्याचरिष्यमाणस्यवाशुक्लकृष्णैकादशीव्रतस्यसांगतासिद्ध्यर्थंसंपूर्णफलप्राप्त्यर्थंदेशकालाद्यनुसारतोयथाज्ञानेनशुक्लकृष्णैकादशीव्रतोद्यापनमहंकरिष्ये तदंगत्वेनगणपतिपूजनंपुण्याहवाचनमाचार्यवरणंचकरिष्ये ततोगणेशंषोडशोपचारैःपूजयेत् ततःकरिष्यमाणशुक्लकृष्णैकादशीव्रतोद्यापनकर्मणःपुण्याहंभवंतोब्रुवंतु अस्तुपुण्याहं स्वस्तिभवंतोब्रुवंतु आयुष्मतेस्वस्ति ऋद्धिंभवंतोब्रुवंतु कर्मऋद्ध्यतां श्रीरस्त्वितिभवंतोब्रुवंतु अस्तुश्रीः वर्षशतंपूर्णमस्तु शिवंकर्मास्तु गोत्राभिवृद्धिरस्तु प्रजापतिःप्रीयतां उद्यापनकर्मणिआचार्यंवरयेत् श्रुताध्ययनसंपन्नौक्रोधलोभविवर्जितौ आचार्यौवरयेत्सश्वाद्ब्रह्मज्ञानसमन्वितौ अस्मिन्कर्मणिआचार्योभव यथाज्ञानेनकर्मकरिष्यामि उपोष्यनियतोराजाआचार्यसहितोव्रती कुर्यादाराधनंविष्णोर्यथाशक्त्याजगद्गुरोः देवालयेगवांगोष्ठेशुचौदेशेथवागृहे अष्टांगुलोच्छ्रितांवेदींचतुरस्रांप्रकल्पयेत् वितस्तिद्वयविस्तीर्णांतिलैःकृष्णैःप्रपूरयेत् तस्यांशोडशपत्रंचकमलंपरिकल्पयेत् तन्मध्येस्थापयेत्कुंभंनवीन् मव्रणंशुभं कृष्णैस्तिलैश्चसंपूर्णंकृष्णवस्त्रोपशोभितं अश्वत्थपर्णयुग्मेनपंचरत्नैःसमन्वितं समंतादंतिकंचैवनामसंकर्षणादिभिः उपचारैःषोडशभिःपूजयेत्प्रयतोनरः आग्नेयादिचतुष्पत्रेपूजयेद्ऋणमातृकाः गणेशंमातृकाश्चैवदुर्गांक्षेत्राधिपंतथा समाहितमनाःकोणेष्वाग्नेयादिषुविन्यसेत् शुक्लामेकादशींतद्वत्तिलैःशुक्लैश्चपूजयेत् शुक्लवस्त्रेणसंवेष्ट्यपूजयेत्सरयामुदा समंतादंतिकंचैवनामभिःकेशवादिभिः गणेशंमातृकाश्चैवदुर्गांक्षेत्राधिपंतथा समाहितमनाःकोणेष्वाग्नेयादिषुविन्यसेत् तदग्रे-

सर्वतोभद्रंलिखेत् देवतासान्निध्यार्थंसुवर्णमूर्तावग्न्युत्तारणंकरिष्ये ततोदेवंचसौवर्णंस्नाप्यपंचामृतादिभिः गंधपुष्पाक्षतोपेतमथपुण्यजलैःशुभैः गृहीत्वावाहयेत्कुंभेरमायुक्तंचतुर्भुजं एवंविष्णुमावाहयेत् ॐनमोविष्णावेतुभ्यंभगवन्परमात्मने कृष्णोसिदेवकीपुत्रपरमेश्वरउत्तम अजोनादिश्चविश्वात्मासर्वलोकपितामहः क्षेत्रज्ञःशाश्वतोविष्णुःश्रीमान्नारायणःपरः त्वमेवपुरुषःसत्योतींद्रियोसिजगत्पते यत्तेतेजःपरंसूक्ष्मंतेनेमांवेदिकांविश ॐभूःपुरुषंआवाहयामि ॐभुवःपुरुषं ॐस्वःपुरुषं ॐभूर्भुवःस्वःपुरुषंआ० विष्णोइहागच्छइहतिष्ठपूजांगृहाणसुप्रसन्नोवरदोभव रुक्मिणींसहजांबवतींसत्यभामांश्रियंचपूर्वपश्चिमदलाभ्यंतरेषुशोडशस्त्रीसहस्त्राणिकल्पयेत् शंखंचक्रंगदांपद्ममीशानादिषुकल्पयेत् तद्बहिःपूर्वपत्रादिष्वष्टपत्रेष्वनुक्रमात् विमलोत्कर्षिणीज्ञाना ३ क्रिया ४ योगा ५ तथैवच प्रव्ही ६ सत्या ७ तथाज्ञाना ८ नुग्रहापद्ममध्यगा देवस्याग्रेततःकृत्वावेदिकायांखगेश्वरम् एवमावाह्य लोकपालानवस्थाप्यदिक्षुपूर्वादिषुक्रमात् देवान्तदस्त्वितिस्थापयेत् अतोदेवाइत्यादिषोडशमंत्रैःषोडशोपचारैःपूजयेत् ततःपूर्वादिद्वादशपद्मपत्रेषुकेशवादीनावाह्य अतोदेवा १ इदंविष्णु २ विष्णोःकर्माणिपश्यत० ३ त्रीणिपदाव ४ तद्विष्णोः ५ सद्विमासोविचक्रमे ६७ विष्णोर्नुकं ८ प्रतद्विष्णु ९ नतेविष्णो १० प्रविष्णावे ११ तदस्य १२ इरावती १३ तावां १४ वषट्ते १५ नुक्रमेणहि प्रदद्यादासनंपाद्यमर्घ्यमाचमनीयकं स्नानंवस्त्रंचोपवीतंगंधपुष्पाणिवैततः धूपंदीपंचनैवेद्यंनीराजनप्रदक्षिणे केशवाय० १ नारायणाय० २ माधवाय० ३ गोविंदाय० ४ विष्णवे० मधुसूदना० ६ त्रिविक्रमाय० ७ वामनाय० ८ श्रीधराय० ९ हृषीकेशाय० १० पद्मनाभाय० ११ दामोदराय० १२ एताःशुक्लैकादश्यांमंडलदेवताः एवमेवकृष्णैकादशीमंडले संकर्षणाय०संकर्षणंआ० वासुदेवं०प्रद्युम्नं०अनिरुद्धं०पुरुषोत्तमं० अधोक्षजं०नारसिंहं०अच्युतं०जनार्दनं०उपेंद्रं०हरिं०श्रीकृष्णं० १२ इतिकृष्णैकादश्याः उभयैकादश्यांयदाएकआचार्यःतदाद्वादशपद्मदलेषुपूर्वादिक्रमेणएकत्रदेवताःस्थाप्यपूजयेत् स्तवनंविष्णुसूक्तैश्चपरिचर्यांचनामभिः नमोंतवैष्णवैर्मंत्रैस्तन्मूर्त्तौ

पूजयेत्सुधीः ततोदेवादयोभूमौ सर्वतोभद्रमंडले ब्रह्माद्यादेवताःसर्वाःपूजनीयाह्यनुक्रमात् उपचारादिकंकुर्यान्नैवकार्यंविसर्जनम् गीतवाद्यैस्तथानृत्यैरितिहासैर्मनोरमैः पुराणैःसत्कथाभिश्चरात्रिशेषंनयेत्सुधीः प्रभातेविमलेस्नात्वाकृत्वाशौचादिकाःक्रियाः चतुर्विंशतिसंख्याकान्विप्रानागमदर्शिनः आकारयेत्ततःपश्चात्पूजयेच्चसमागतान् आचार्येणसमंकुर्यादुपचारादिकंततः होमसंख्यानुसारेणस्थंडिलंकारयेत्ततः उल्लेखनादिकंकृत्वाप्रणीतास्थापनंततः अस्मिन्शुक्लकृष्णैकादशीव्रतोद्यापनहोमंकर्तुंस्थंडिलादिकर्मकरिष्ये अग्निध्यानांतंकृत्वाततोन्वाधानं क्रियमाणे शुक्लकृष्णैकादशीव्रतोद्यापनहोमेदेवतापरिग्रहार्थमन्वाधानंकरिष्ये चक्षुषीआज्येनेत्यंतमुक्त्वा अत्रप्रधानं अग्निं इंद्रं प्रजापतिं विश्वान्देवान् ब्रह्माणं पुरुषं नारायणं प्रत्यृजं आज्येन वासुदेवं बलदेवं॰ श्रीविष्णुंसप्तवारं अग्निं॰वायुं॰सूर्यं॰प्रजापतिं एताःप्रधानदेवताःपायसद्रव्येण केशवादिद्वादशदेवताः आज्यमिश्रितपायसद्रव्येण विष्णुंअष्टोत्तरशताहुत्यावापायसद्रव्येण ब्रह्मादिदेवताश्चएकैकयाआज्याहुत्याशेषेणस्विष्टकृतमित्यादि प्रणीताप्रणयनांतंकृत्वा अन्वाधानसमिद्भिर्जुहुयात् पायसंश्रपयित्वाचरोःप्रापणमुद्धरेत् पवित्रंतेइतिमंत्रंजपन्प्रापणमुद्धरेत् पायसादुद्धृतंकिंचित्प्रापणंतत्प्रकीर्तितम् अन्वाधानादिकंकुर्यादाज्यभागांतमेवच आज्यसंस्कारादिकंआज्यभागांतंकृत्वा इदमुपकल्पितंहवनीयद्रव्यंयथादैवतमस्तु अनादेशाहुतीःपंचहोतव्याःसर्पिषाततः पौरुषेणाथसूक्तेनप्रत्यृचंजुहुयाद्धुतं पायसंसघृतंचैवहुनेदष्टोत्तरंशतं घृताक्ततिलपालाशसमिद्भिर्जुहुयात्पृथक् अष्टोत्तराहुतीनांचविष्णुमंत्रेणकारयेत् इदंविष्ण्वितिसूक्तेनजुहुयात्तिलसर्पिषा वासुदेवायस्वाहा बलदेवायस्वाहा श्रियैस्वाहा विष्णवे॰ विष्णोर्नुकंऋक् तदस्यप्रिय॰ प्रतद्विष्णु॰ परोमात्रया॰ इदंविष्णुर्विचक्रमे॰ त्रीणिपदाऋक् व्याहृतिभिश्चेतिजुहुयात् केशवादिद्वादशनामभिः पायसंहुत्वा विष्णुंअष्टोत्तरशतंपायसेनजुहुयात् कृष्णैकादश्यांएवंसंकर्षणादिद्वादशनामभिरेवं शुक्लकृष्णैकादश्याः एकाचार्यएकस्थंडिलपक्षेचतुर्विंशतिनामभिर्हुत्वामुख्यदेवतां अष्टोत्तरशतंहुत्वाब्रह्मादिदेवताः एकैकयाआज्याहुत्याहुनेत्-

ततःप्रापणार्थंभगवत्प्रार्थना त्वामेकमाद्यंपुरुषंपुराणंनारायणंविश्वसृजंभजामः मयैकभागोविहितोविधेयो गृहाणहव्यंजगता
मधीश इतिप्रापणंनिवेद्यउपतिष्ठेत चतुरोवा प्रदक्षिणमग्निंवेदिकांचपरिक्रम्य भिंधिविश्वाइतिजानुनीनिपात्य ध्रुवसूक्तंज
पेत् पुरुषसूक्तंवा अष्टौपदानिप्रतिदिशंएनैर्मंत्रैर्जपन् कृष्णायवासुदेवायहरयेपरमात्मने शरण्यायाप्रमेयायगोविंदायनमोनमः
नमःस्थूलायसूक्ष्मायव्यापकायाव्ययायच अनंतायजगद्धात्रेब्रह्मणेनंतमूर्तये अथतंनिवेदितंप्रापणंमूर्ध्निकृत्वाघोषयेत् केवै
ष्णवाः केवैष्णवाइतिउच्चैर्वदेत् वयंवैष्णवाःवयंवैष्णवाः इतिप्रवदेत् तेभ्यःसमानेभ्योहविर्देयं द्वादशाक्षरमंत्रेण ॐनमोभ
गवतेवासुदेवायेति इदमहममृतंप्राश्नामि इतिप्राश्य आचम्य गृहमागत्य सिद्धयेस्वाहेतिजुहुयात् यतइंद्रभयामहइ
त्यात्मानमभिमंत्र्य सर्वप्रायश्चित्तादिसमापयेत् स्विष्टकृदादिहोमशेषंसमाप्य उत्तरपूजांकृत्वा विष्णुसूक्तानिजप्त्वा अतोदे
वाइति॰ ॐभूःपुरुषं उद्वासयामिक्रमेणउद्वासयेत् ततोहोमावसानेचगामरोगांपयस्विनीं सवत्सांकृष्णवर्णांचसवस्त्रांकांस्य
दोहिनीम् दद्याद्व्रतसमाप्त्यर्थमाचार्यायसदक्षिणाम् भूषणानिविचित्राणिवासांसिविविधानिच चतुर्विंशतिसंख्यानिपक्वा-
न्नानिचदापयेत् आचार्यायप्रदेयानिदक्षिणाभूयसींतदा यदीच्छेदात्मनःश्रेयोव्रतस्योद्यापनंचरेत् विप्रान्द्वादशसंख्याका
न्नामभिःपृथगर्चयेत् उपवीतानितेभ्योवैदद्यात्कुंभान्सदक्षिणान् पक्वान्नफलसंयुक्तान्वस्त्रयुक्तांस्तदापयेत् भोजयित्वा
ततोविप्रान्पक्वान्नेनचभक्तितः अन्यानपियथाशक्तिब्राह्मणान्भोजयेद्व्रती व्रतंममास्तुसंपूर्णमित्युक्तैःपूजितैर्द्विजैः अस्तुसंपू
र्णमित्युक्त्वाआचार्यसहितोव्रती जप्त्वावैष्णवसूक्तानिप्रणम्यचपुनःपुनः ॐभूःपुरुषंउद्वासयामि इतिक्रमेणोद्वासयेत् इ
दंविष्णुरितिपाठंआचार्यतुभ्यमहंसंप्रददे देवस्यत्वेतिमंत्रेणप्रतिगृह्यतांप्रतिगृण्हामि अस्यमयाकृतस्यशुक्लकृष्णैकादशीव्रतो
द्यापनकर्मणःसांगतासिद्ध्यर्थंचतुर्विंशतिब्राह्मणान्भोजयिष्ये नमम ततोबंधुजनैःसार्द्धंशिष्टैरिष्टैश्चभोजयेत् इत्याहभगवा
न्बौधायनः इतिबौधायनोक्तशुक्लकृष्णैकादशीव्रतोद्यापनंसंपूर्णम् अथपूजा विधिर्ब्राह्मे एकादश्यांशुभेपक्षेनिराहारःस

माहितः नानापुष्पैर्मुनिश्रेष्ठविचित्रंमंडपंशुभम् स्नात्वासम्यग्विधानेनसोपवासोजितेंद्रियः संपूज्यविधिवद्विष्णुंश्रद्धयासुसमाहि
तः गंधपुष्पैस्तथाधूपैर्दीपैर्नैवेद्यकैःपरैः उपचारैर्बहुविधैर्जपहोमैःप्रदक्षिणैः स्तोत्रैर्नानाविधैर्दिव्यैर्गीतवाद्यैर्मनोहरैः दंडवत्प्रणि
पातैश्चजयशब्दैस्तथोत्तमैः एवंसंपूज्यविधिवद्रात्रौकृत्वाप्रजागरं यातिविष्णोःपरंस्थानंनरोनास्त्यत्रसंशयः पंचामृतेनसंस्नाप्यए
कादश्यांजनार्दनम् द्वादश्यांपयसास्नाप्यहरिसारूप्यमश्नुते इतिपूजाविधिः अथशुक्लकृष्णैकादश्युद्यापनविधिः अर्जु
नउवाच कीदृग्व्रतविसर्गोत्रविधानंचात्रकीदृशं संपूर्णंहिभवेद्येनतन्मेवदकृपानिधे श्रीकृष्णउवा० शृणुपांडवयत्नेनप्रवक्ष्या
मितद्व्ययं शक्तःस्वर्णसहस्रंतुअशक्तःकाकिणीतथा ददातिश्रद्धयापार्थसमंस्यादुभयोरपि शक्तश्चेद्द्विगुणंदद्याद्यथोक्तोमध्य
मोविधिः उक्तार्धमप्यशक्तस्यदानंपूर्णफलप्रदं तद्रूपविधिमप्येकंकथयामितवाग्रतः यानिकष्टेनचीर्णानिव्रतानिकुरुसत्तम विफ
लान्येवसर्वाणिउद्यापनविधिंचरेत् प्रबोधसमयेपार्थकुर्यादुद्यापनक्रियां मार्गशीर्षेविशेषेणउद्यापनविधिंचरेत् दशम्यांदिन
शेषेणरात्रौगुरुगृहंव्रजेत् एकादशीदिनेप्राप्तेगुरुमभ्यर्च्यशक्तितः गृहीत्वाचरणौमूर्ध्नातदर्थंचविचक्षणः पुण्यदेशोद्भवंविप्रं
शांतंसर्वगुणान्वितं सदाचाररतंपार्थवेदवेदांगपारगं अस्मदीयंव्रतंविप्रविष्णुवासरसंभवं संपूर्णंतुभवेद्येनतत्कुरुष्वद्विजोत्तम-
तस्याग्रेनियमःकार्योदंतधावनपूर्वकः एकादश्यांनिराहारःस्थित्वाचैवपरेहनि भोक्ष्यामिपुंडरीकाक्षशरणंमेभवाच्युत एवंप्रभा
तसमयेशुचिर्भूत्वासमाहितः पाखंडिनांचसर्वेषांपतितानांचसंगमं कामंदुरोदरंपार्थदूरतःपरिवर्जयेत् स्नानंकृत्वामंत्रपूर्वंनद्या
दौविमलेजले तर्पयित्वापितॄन्देवान्पूजयेन्मधुसूदनं उपलिप्यशुचौदेशेकीटकेशास्थिवर्जिते वर्णैश्चसर्वतोभद्रंनीलपीतसिता
सितैः मंडलंचोद्धरेद्भूपसर्वकर्मसुपूजितं अष्टांगुलोच्छ्रितांवेदींचतुरस्रांप्रकल्पयेत् वितस्तिद्वयविस्तीर्णामक्षतैःपरिपूरिताम् त
स्यांषोडशपत्रंचकमलंपरिकल्पयेत् तन्मध्येस्थापयेत्कुंभंनवीनंसुस्थिरंशुभं अथवातंडुलानांचअष्टपत्रांबुजंचरेत् वारिपूर्णंघ
टंताम्रपात्रंरौप्यसमुद्भवं जातरूपमयंदेवंलक्ष्म्यायुक्तंजनार्दनम् पल्लवैश्चसमायुक्तंसहिरण्यंसवाससम् अक्षमालासमायुक्तंशंख

चक्रगदाधरं ॐ भूः पुरुषं आवाह० ॐ भुवः पुरुषं आ० ॐ स्वः पुरुषं आ० ॐ भूर्भुवःस्वः पुरुषं आ० रुक्मिणीं जांबवतीं सत्यभामां
शतोत्तरशोडशसहस्रैः श्रियाच सह तत्पद्मे कल्पयेत् ब्रह्मादिदेवताः सर्वाः पूजनीया अनुक्रमात् शक्त्याक्तवर्णपुष्पैश्च पूजनं पुष्टिवर्द्धनं
अन्यैर्कृतूद्भवैः पुष्पैरर्चयेद्विधिवन्नरः नैवेद्यांश्च चतुर्विंशत्यथ दद्यादनुक्रमात् भक्त्याचतुर्विंशतिषु तिथिषु परंतप इच्छया वान
थाद्द्याद्यदैवोद्यापनं भवेत् मोदकान्गुडकांश्चूर्णान्घृतपूरकमंडकान् सोहलिकादिकं सारः सर्वाः सक्तव एवच वटकान्पायसं दुग्धं
शालिदध्योदनं तथा इंडिकान्पूरिकान्पार्थ अपूपान्गुडमोदकान् तिलपिष्टं कर्णवेष्टं शालिपिष्टं सशर्करं रंभाफलं च सघृतं सुद्गचू
र्णं गुडौदनं एवं क्रमेण नैवेद्यं पृथग्वा चरमेहनि दामोदराय पादौ तु जानुनी माधवाय च गुह्यं वै कामपतये कट्यां वामनमूर्तये पद्मना-
भाय नाभिं तु ह्युदरं विश्वमूर्तये हृदयं ज्ञानगम्याय कंठं श्रीकंठसंगिने सहस्रबाहवे बाहू चक्षुषी योगयोगिने ललाटं सुरुगायेतिना
सांनाकस्करेश्वरम् श्रवणौ श्रवणेशाय शिखायां सर्वकामदं सहस्रशीर्षाय शिरः सर्वांगं सर्वरूपिणे शुभेन नारिकेरेण बीजपूरेण
वा पुनः हृदि ध्यात्वा जगन्नाथं दद्यादर्घ्यं विधानतः साक्षतं च सपुष्पं च सजलं चंदनान्वितं रात्रौ जागरणं कुर्याद्गीतशास्त्रविनोदतः
इष्टं दत्तं धरादानं पिंडोदत्तो गयाशिरे कृतं दानं कुरुक्षेत्रे यैः कृतं जागरं हरेः नृत्यगीतं प्रकुर्वंति वीणावाद्यं तथैव च ये पठंति पुराणानि ते
नराः कृष्णवल्लभाः शास्त्रैर्वाप्यथवा भक्त्या शुचिर्वाप्यथवाशुचिः कृत्वा जागरणं विष्णोर्मुच्यते पापकोटिभिः भुक्तो वाप्यथवा सु
क्तो जागरे समुपस्थितः मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति यावत्पदानि स्वगृहात्केशवायतनं प्रति अश्वमेधसमानि स्युर्जा
गरार्थं प्रयच्छतः पादयोः पांसुकणिका धरण्यां निपतंति याः तावद्वर्षसहस्राणि जागराद्वसते दिवि बहून्यपि च पापानि कृतं जागर
णं हरेः निर्दहेन्मेरुतुल्यानि युगकोटिशतान्यपि मनसा संस्मरेद्देवं तां रात्रिमतिवाह्य च प्रभाते विमले स्नात्वा विप्रानाकारयेत्सु
धीः चतुर्विंशतिसंख्याकान् विप्रानागमदर्शकान् सर्वं कुर्याद्विधानेन जपहोमार्चनादिकं स्वगृह्योक्तेन विधिना कृत्वाग्निस्थापनं
ततः उल्लेखनादिकं कुर्यात्प्रणीतास्थापनादिकं तत्राग्नौ च चरुं कृत्वा चरोः प्रापणमुद्धरेत् पवित्रं ते विततमिति मंत्रं पठेत् अन्वा

धानादिकंकुर्यादाज्यभागांतमाचरेत् तिलाज्यपायसान्नैश्चसमिद्भिर्जुहुयात्पृथक् शतमष्टोत्तरंहोमःसर्वत्रापिप्रशस्यते इदंविष्णुर्द्विजातीनांहोममंत्रःप्रकीर्तितः शूद्राणांचैवसर्वेषांमंत्रमष्टाक्षरंविदुः विविधैरपिवस्त्रैश्चभाजनैरासनैःसह छत्रोपानहगोभिश्चदद्यात्तार्थपृथक्पृथक् द्वादशैवाथशक्त्यावावस्त्रालंकारभूषणैः पूजयेत्पुष्पमालाभिःसपत्नीकान्द्विजोत्तमान् कुंभाद्वादशदातव्याःपक्वान्नजलपूरिताः भोजयित्वाततोविप्रान्भक्ति नोवित्तरेद्बुधः एकाहिकपिलादेयासर्वकामफलप्रदा यथास्वर्गश्चमोक्षश्चइहसंपूर्णताव्रते नमस्तेकपिलेदेविसंसारार्णवतारिणि मयादत्ताद्विजेंद्रायप्रीयतांमेजनार्दनः सपत्नीकोगुरुःपूज्योमंडलेहरिसन्निधौ भूषणाच्छादनैर्भोज्यैः प्रणामैःपरितोषयेत् समाप्यवैष्णवंधर्मंदद्यात्सर्वंधनंजय इष्टंचान्यद्यथाशक्त्यावित्तशाठ्यविवर्जितः जलदानंविशेषेणभूमिदानमतःपरम् प्रार्थयेत्पुरुषाधीशंततोभक्त्याकृतांजलिः मयाद्यास्मिन्व्रतेदेवयदपूर्णंकृतंविभो सर्वंभवतुसंपूर्णंत्वत्प्रसादाज्जनार्दन त्वयिभक्तिःसदैवास्तुममदामोदरप्रभो पुण्येबुद्धिःसतांसेवासर्वधर्मफलंचमे जपच्छिद्रंतपश्छिद्रंयच्छिद्रंव्रतकर्मणि सर्वंसंपूर्णतांयातुत्वत्प्रसादाद्रमापते प्रदक्षिणांततःकृत्वादंडवत्प्रणिपत्यच मंडलंमूर्तिसंयुक्तंसोपहारंसदक्षिणं प्रीयतांविष्णुरित्युक्त्वा आचार्यायनिवेदयेत् सर्वंविसर्जयेत्पश्चात्संतोष्यपरिभोज्यच तदाज्ञयाततःकुर्यात्पारणंबंधुभिःसह एकादशीव्रतंचैवयथाविधिकृतंपुरा यौवनाश्वेनभूपेनकथितंपुरतस्तव धनंजयतवप्रीत्याभक्त्यानुग्रहकारणात् यःकरोतिनरोभक्त्याव्रतमेतदघापहं सयातिवैष्णवंस्थानंदाहप्रलयवर्जितं उक्तमुद्यापनंचैवसुभयोःकुरुसत्तम किमन्यैर्बहुभिर्वाक्यैःप्रशंसापरमाभुवि एकादश्याःपरतरंत्रैलोक्येनहिविद्यते अत्रदानंतुगोदानंभूमिदानमथापिवा गोरोमबीजमूलानांसमसंख्यायुगानिहि दातारोविष्णुभवनेएकादश्यांवसंतिहि येपिशृण्वंतिसततंकथ्यमानांकथामिमाम् तेपिपापविनिर्मुक्ताःस्वर्गंयांतिनसंशयः इत्याकर्ण्यार्जुनोवाक्यंकृष्णस्यपरमाद्भुतं आनंदंपरमंप्रापसौख्यंचापिनिरंतरं इतिसाधारणएकादशीव्रतोद्यापनंसंपूर्णं अथगोपद्मव्रतोद्यापनविधिः तत्रपूजाविधिः चतुर्भुजंमहाकायंजांबूनदसमप्र-

भं शंखचक्रगदापद्मरमागरुडशोभितं सेवितंमुनिभिर्देवैर्यक्षगंधर्वकिन्नरैः एवंविधंहरिंध्यात्वाततोयजनमारभेत् ध्यानं
आवाहयामिदेवेशभक्तानामभयप्रद संस्निग्धंवरदंशांतंमनसावाहयाम्यहं आवाहयामि सुवर्णमणिभिर्दिव्यैःखचितेदेवनि
र्मिते दिव्यसिंहासनेस्निग्धेप्रविशत्वंसुराधिप आसनं गंगोदकंसुरश्रेष्ठसुवर्णकलशस्थितम् गंधपुष्पाक्षतैर्युक्तंगृहाणरमया
सह पाद्यंसम० अष्टगंधसमायुक्तंस्वर्णपात्रेस्थितंजलं अर्घ्यंगृहाणभोदेवभक्तानामभयप्रद अर्घ्यं० देवदेवनमस्तुभ्यंपुराण
पुरुषोत्तम मयादत्तमिदंतोयंगृण्हीष्वाचमनीयकम् आचम० पयोदधिघृतैःस्नानंमधुशर्करयायुतैः मध्येमध्येचपूजाचक
र्तव्याव्रतिभिःसदा पंचामृतस्नानं नदीनांचैवसरसांमयानीतंजलंशुभं अनेनस्नानकुरुभोमंत्रैर्वारुणसंभवैः स्नानं व
स्त्रयुग्मंसमानीतंपट्टसूत्रेणनिर्मितं सूक्ष्मंकार्पासतंतूनांसुवर्णेनविराजितम् वस्त्रं नारायणनमस्तेस्तुत्राहिमांभवसागरा
त् ब्रह्मसूत्रंसोत्तरीयंगृहाणपुरुषोत्तम यज्ञोपवीतंस० केयूरमुकुटैश्चैवनूपुरैरंगुलीयकैः पूजितोसिप्रयत्नेनरत्नैराभरणै
र्विभो आभरणानि चंदनंमलयोद्भूतंकस्तूर्यगरुसंयुतं कर्पूरेणचसंमिश्रंस्वीकुरुष्वानुलेपनम् चंदनं शतपत्रैःकर्णिका
रैश्चंपकैर्मल्लिकादिभिः पुष्पैर्नानाविधैश्चैवपूजयामिसुरेश्वर पुष्पाणि दशांगोगुग्गुलोद्भूतःसुगंधिश्चमनोहरः आघ्रेयोदे
वदेवेशधूपोयंप्रतिगृह्यताम् धूपंसमर्पयामि एकार्तिकंसुरश्रेष्ठगोघृतेनसुवर्तिना संयुक्तंतेजसाकृष्णागृहाणादित्यदीपित दी
पं० अन्नंचपायसंभक्ष्यंसितालेह्यसमन्वितं दधिक्षीरघृतैर्युक्तंगृहाणसुरपूजित नैवेद्यं नागवल्लीदलैर्युक्तंपूगीफलसम-
न्वितम् कर्पूरखदिरैर्युक्तंतांबूलंप्रतिगृह्यतां तांबूलं हिरण्यगर्भेतिदक्षिणां नीराजनंगृहाणेशपंचवर्तिभिरावृतं तेजोराशे
मयादत्तंलोकानंदकरप्रभो नीराजनं अंजलिस्थानिपुष्पाणिअर्पयामिजगत्पते गृहाणसुसुखोभूत्वाजगदानंददायक पुष्पां
जलिं यानिकानीतिप्रदक्षिणां० नमस्तेदेवदेवेशनमस्तेगरुडध्वज नमस्तेविष्णवेतुभ्यंव्रतस्यफलदायक नमस्कारान्
मंत्रहीनंक्रियाहीनंभक्तिहीनंसुरेश्वर व्रतेनानेनसुप्रीतःसंपूर्णफलदोभव प्रार्थना सांगतासिध्यर्थंवायनप्रदानंकरिष्ये

परमान्नमिदंदिव्यंकांस्यपात्रेणसंयुतं वाणकंद्विजवर्यायसहिरण्यंददाम्यहं इतिपूजासमाप्ता अथकथा व्या
संवसिष्ठनप्तारंशक्तेःपौत्रमकल्मषम् पराशरात्मजंवंदेशुकतातंतपोनिधिम् सूतउवाच द्वापरेद्वारवत्यांचनारदः
कृष्णदर्शनात् उत्साहेनाभ्यगात्तत्रददर्शयदुनंदनं पूजितश्चैवकृष्णेनविष्टरादिभिरादरात् ततःप्रोवाचतंविष्णुर्नार-
दंलोकपूजितं श्रीकृष्णउवा॰ शृणुलोकज्ञदेवर्षेभुवनेविचरन्सदा लोकांनरेषुचरितंयद्विशेषंवदस्वमे नारदउ
वाच भगवन्देवदेवेशभक्तोस्मितवचांकितम् तत्राश्चर्यमिदंवक्ष्येधर्मस्यसदसिस्थितम् तत्रसर्वेसमासीनाःशक्राइं
द्राश्चतुर्दश आहुश्चैकादशारुद्राआदित्याद्वादशस्मृताः वसवोष्टौतथानागायक्षराक्षसपन्नगाः तेसर्वेयममाहुश्चस्थितं
सिंहासनेशुभे मानुष्यंदुंदुभेश्चर्माच्छादनार्थेवदस्वनः यमउवाच चातुर्मास्यव्रतंचैकंसंक्रांतिव्रतमेवच नकुर्वंति
चयानार्यस्तासामाच्छादनंत्वचा कुर्वंतुदुंदुभेश्चास्यविचार्यध्वंमहाभटाः तेतस्यवचनंश्रुत्वाभटाःप्रविविशुर्भुवम् स्वामि
न्निदंमहाश्चर्यमतस्त्वांप्रवदामिच तच्छ्रुत्वात्वरितंकृष्णः प्राहलोकान्पुरस्थितान् तथाकुर्वंतुलोकाश्चनार्यःपुर्यानसंति
हि तच्छ्रुत्वाचरितंकृष्णनारीभिर्नगरेषुच कृष्णाज्ञयाकृष्णदूताः प्रोचुस्तेसर्वयोषितः पुरःसराःप्रशृण्वंतुनगरस्थाश्चयो-
षितः अन्यच्चयत्रकुत्रापिऊचुस्तायदुनंदनं त्वत्सोदरींविनास्वामिन्नान्यानार्योत्रसंतिहि तच्छ्रुत्वाभयसंत्रस्तःसोदरींप्र
त्यभाषत कृष्णउवाच सुभद्रेकिंकरोषीह आगतायमसेवकाः व्रतंत्वयाकृतंभद्रेपुरापुण्योद्भवंशुभं सुभद्रोवा॰
सर्वव्रतानिहेकृष्णकृतान्यद्यनसंशयः नोचेत्त्वत्सोदरीनस्यांयोषिच्चाप्यर्जुनस्यच नस्यांमाताभिमन्योर्वैयमदूताःकथं-
विभो कृष्णउवाच कुरुत्वंभगिनीमेद्यव्रतमेकंशुभप्रदं गोपद्मामितिविख्यातंव्रतंलोकेषुविश्रुतं सूतेनकथितंपू
र्वमृषीणांहितकाम्यया नैमिषंहिमवत्पार्श्वेसिद्धाश्रममनुत्तमम् तत्रसूतोगमद्द्रष्टुंमुनीनांयज्ञमुत्तमम् तंदृष्ट्वामुनयःसर्वे
हर्षिताश्चमुहुर्मुहुः अर्चितश्चततस्सर्वैरर्घ्यादिभिर्यथाविधि अभ्यर्च्यतंमुनिंविप्राऊचुस्तेप्रीतिपूर्वकम् ऋषयऊचुः

भवाँल्लोकस्यधर्मज्ञोभक्तानांज्ञानसाधनः समर्थसर्वमुक्तीनांसर्वसौभाग्यकारकं कृपयामुनिशार्दूलकथयस्वोत्तमव्रतम् सू
तउवाच शृणुध्वमृषयःसर्वेव्रतानामुत्तमंव्रतम् गोपद्ममितिविख्यातंसर्वपापहरंपरम् सर्वदुःखोपशमनंसर्वसंपत्प्रदायकम् य
मस्यदंडनंयस्माद्दूरीकृतमनुत्तमं सुवासिन्यास्तुसौभाग्यंपुत्रपौत्रप्रवर्द्धनं ऋषयऊचुः कस्मिन्मासिकथंकृत्वाकिंफलंक
स्यपूजनं केनचीर्णंपुरासाधोतत्सर्वंकथयस्वनः सूतउवाच आषाढस्यशुक्लपक्षस्यएकादश्यांविशेषतः तदारभ्यकार्तिकस्य
द्वादश्यंतंव्रतंचरेत् गोष्ठेचशुद्धगोस्थानेगोमयेनोपलिप्यच त्रयस्त्रिंशच्चपद्मानिकारयेद्व्रीहिपिष्टकैः शोभयेत्पंचरंगैश्चगंधपुष्पैः
प्रपूजयेत् तत्संख्ययाचकर्तव्यानमस्कारप्रदक्षिणाः तत्संख्ययाह्यपूपांश्च ब्राह्मणायनिवेदयेत् वायनंद्विजवर्यायप्रथमेव
त्सरेशुभम् द्वितीयेवत्सदेदद्यात्पायसंरेवनिर्मितं तृतीयेमंडकान्दद्याच्चतुर्थेपूर्णमिश्रितान् पंचमेघारिकादद्यात्पूर्णेउद्यापनंच
रेत् एकादश्यामुपवसेद्दंतधावनपूर्वकम् मंडपंकारयेत्तत्रकदलीस्तंभमंडितम् नानापुष्पैश्चशोभाढ्यंमखवरंतत्रकारयेत् तन्म-
ध्येसर्वतोभद्रंपंचरंगैःसमन्वितम् पुण्याहंवाचयित्वातुप्रतिमायांयजेद्धरिं कर्षमात्रसुवर्णेनतदर्धार्धेनवापुनः आचार्यंवरयित्वाच
कलशांस्थापयेत्ततः लक्ष्मीनारायणंस्थाप्यसौवर्णेनप्रकल्पितम् ब्रह्माद्यावाहनंतत्रपूजयेद्धूपदीपकैः द्वादशैवतुनामानिप्रत्ये
कंपूजयेद्व्रती रात्रौजागरणंकृत्वागीतवाद्यादिमंगलैः ततःप्रभातेउत्थायस्नात्वाहोमंतुकारयेत् सतिलाज्यसमिद्द्रव्यंहुनेद्वाद
शनामभिः पायसंचशतंचाष्टौहुत्वापूर्णाहुतिंचरेत् वत्सेनसहितांधेनुंआचार्यायनिवेदयेत् विप्रान्पंचसपत्नीकान्भोजये
त्षड्रसैर्व्रती भुंजीतबंधुभिःसार्द्धमेकाग्रकृतमानसः अन्यानपियथाशक्त्याब्राह्मणानपिभोजयेत् कृत्वाचेदंव्रतंपुण्यंसर्वा
न्कामानवाप्नुयात् अंतेस्वर्गपदंगच्छेत्सर्वपापविवर्जितः कृष्णस्यवचनंश्रुत्वासुभद्रानत्तथाकरोत् पंचाब्दव्रतमेतस्यारात्रौ
यामचतुष्टये गोपद्मानिचसंपूज्यप्रातर्हुत्वाहुताशनम् एवंव्रतेकृतेपश्चात्सुर्यायमभटाविशन् यमभटाऊचुः सुभद्रेत
वदेहस्यचर्मार्थेचागतावयम् सुभद्रोवाच गोष्ठेपद्मानिचान्यत्रसर्वंपश्यंतुहेभटाः अन्योन्यवादसमयेविष्णुदूताःसमाग

ताः तान्दृष्ट्वाताडयामासुर्व्रतस्यास्यप्रभावतः पलायितामहाभीताःस्मरंतोयमशासनम् तान्दृष्ट्वारक्तदिग्धांगान्यमोभयसमन्वितः कस्येदंकृत्यमितिचज्ञात्वातींद्रियदर्शनात् उवाचदूताःशृणुतयत्रसंपूज्यतेहरिः नगंतव्यंभवद्भिश्चसत्यंसत्यंवदाम्यहं प्राप्तवंतोदैववशाद्धिविशध्वंमहाभटाः इत्युक्त्वाधर्मराजोसौशालायांचविवेशह तेनैवऋषिणांमध्येकथितंव्रतमीदृशम् दमयंत्यातथाबाल्येराज्यभ्रंशात्कृतंव्रतम् व्रतस्यास्यप्रभावेनराज्यसौभाग्यसंपदः पुत्रपौत्रादिसौभाग्यंभुक्त्वामोक्षमवाप्नुयात् ऋषयऊचुः त्वत्प्रसादात्कृतार्थाभोगच्छामःस्वाश्रमालयम् प्रणम्यमुनिभिःसाकंसूतश्चांतर्हितोभवत् मुनिभिःसर्वलोकेषुकथितंव्रतमुत्तमम् नातःपरतरंपुण्यंत्रिषुलोकेषुविश्रुतम् इतिश्रीभविष्योत्तरपुराणेगोपद्मव्रतोद्यापनंसंपूर्णम् अथपुरुषोत्तममासस्यैकादशी युधिष्ठिरउवाच भगवन्श्रोतुमिच्छामिव्रतानामुत्तमंव्रतम् सर्वपापहरंचैवफलंमुक्तिप्रदायकम् पुरुषोत्तमस्यमासस्यकथांब्रूहिजनार्दन कोविधिःकिंफलंतस्यकोदेवस्तत्रपूज्यते अधिमासेतुसंप्राप्तेव्रतंब्रूहिजनार्दन कस्यदानस्यकिंपुण्यंकिंकर्तव्यंनृभिःप्रभो कथंस्नानंचकिंजाप्यंकथंपूजाविधिःस्मृतः किंभोज्यमुत्तमंचान्नंमासेवैपुरुषोत्तमे श्रीकृष्णउवाच कथयिष्यामिराजेंद्रभवतःस्नेहकारणात् अधिमासेतुसंप्राप्तेभवेदेकादशीतुया कमलानामनामेतिनिर्थीनामुत्तमातिथिः तस्याश्चैवप्रभावेनकमलाभिमुखीभवेत् ब्राह्मेमुहूर्तेचोत्थायस्मृत्वातंपुरुषोत्तमम् स्नात्वाचैवविधानेनव्रतीनियममाचरेत् गृहेत्वेकगुणंजाप्यंनद्यांदशगुणंस्मृतं गवांगोष्ठेशतगुणमग्न्यागारेदशाधिकं शिवक्षेत्रेषुतीर्थेषुदेवतानांचसन्निधौ सहस्रंशतकोटीनामनंतंविष्णुसन्निधौ अवंत्यामभवद्विप्रःशिवधर्मेतिनामतः तस्यात्मजेषुपंचेषुकनिष्ठोदुष्टकर्मकृत् तदापित्रापरित्यक्तस्त्यक्तःस्वजनबांधवैः स्वकर्मणःप्रभावेनगतोदूरतरंवनम् एकदादैवयोगेनतीर्थराजंसमागमत् क्षुत्क्षामोदीनवदनस्त्रिवेण्यांस्नानमाचरत् ऋषीणामाश्रमंतत्रविचिन्वन्क्षुधयार्दितः हरिमित्रमुनेस्तत्रत्वाश्रमंचददर्शह पुरुषोत्तममासेतुश्रद्धयाकमलाकृता एकादशीपुण्यतमाभुक्तिमुक्तिप्रदायिनी पुरुषोत्तम

मासस्यजनानांचसमागमे यत्राश्रमेकथयतांकथांकल्मषनाशिनीं जपन्श्रमेणतांश्रुत्वाकमलांपापहारिणीं व्रतंकृतंचतैःसार्द्धंस्थित्वाशून्यालयेतदा निशीथेसमनुप्राप्तेकमलात्रसमागता वरंददामिभोविप्रकमलायाःप्रभावतः विप्रउवाच कात्वंकस्यासिरंभोरुप्रसन्नाचकथंमम ऐंद्रीत्वमिंद्रदेवस्यभवानीशंकरस्यच वधूर्वाचंद्रसूर्यस्यगंधर्वीकिन्नरीतथा त्वत्सदृशीनदृष्टाचनश्रुतावशुभानने लक्ष्मीरुवाच प्रसन्नासांप्रतंजानावैकुंठादहमागता प्रेरिताहरिदेवेनएकादश्याःप्रभावतः पुरुषोत्तममासस्यकृष्णपक्षेतुयाभवेत् कमलानामसाप्रोक्ताकमलांदातुमागता पुरुषोत्तममासस्य यापक्षेप्रथमाभवेत् तस्याव्रतंत्वयाचीर्णंप्रयागेमुनिसन्निधौ व्रतस्यास्यप्रभावेनवशगाहंनसंशयः तववशेभविष्यंतिमानवाद्विजसत्तम लभंतेमत्प्रसादंतुसत्यंतेव्याहृतंमया विप्रउवाच प्रसन्नायदिमेपद्मेव्रतंविस्तरतोवद यत्कथासुप्रवर्त्तंतेराजानोयेजगद्धिताः लक्ष्मीरुवाच श्रोतृणांपरमंश्राव्यंपवित्राणामनुत्तमम् दुःस्वप्ननाशनंपुण्यंश्रोतव्यंयत्नतस्ततः उत्तमश्रद्धयायुक्तःश्लोकंश्लोकार्द्धमेवच पठित्वामुच्यतेसद्योमहापातककोटिभिः मासानांपरमोमासःपक्षिणांगरुडोयथा नदीनांचयथागंगातिथीनांद्वादशीतिथिः तमर्चयंतिविबुधानारायणमनामयं येयजंतिसदाभक्त्यानारायणमनामयं तानर्चयंतिसततंब्रह्माद्यादेवतागणाः नारायणपरायेचहरिकीर्तनतत्पराः हरिप्रजागरायेचकृतार्थास्तेकलौयुगेशुक्लेवायदिवाकृष्णेभवेदेकादशीद्वयम् गृहस्थानांचपूर्वातुयतीनामुत्तरास्मृता एकादशीद्वादशीचरात्रिशेषेत्रयोदशी व्रतंक्रतुशतंपुण्यंत्रयोदश्यांतुपारणे एकादश्यांनिराहारःस्थित्वाहमपरेहनि भोक्ष्यामिपुंडरीकाक्षशरणंमेभवाच्युत असुंमंत्रंसमुच्चार्यदेवदेवस्यचक्रिणः भक्तिभावेनतुष्टात्माचोपवासंसमर्पयेत् देवदेवस्यपुरतोजागरंनियतोव्रती गीतैर्वाद्यैश्चनृत्यैश्चपुराणपठनादिभिः ततःप्रातःसमुत्थायद्वादशीदिवसेव्रती स्नात्वाविष्णुंसमभ्यर्च्यविधिवत्प्रयतेंद्रियः पंचामृतेनसंस्नाप्यएकादश्यांजनार्दनं द्वादश्यांचपयःस्नानंहरेःसारूप्यमश्नुते अज्ञानतिमिरांधस्यव्रतेनानेनकेशव प्रसीदसुमुखोनाथज्ञानदृष्टिप्रदोभव एवंविज्ञाप्यदेवेशंदेवदेवंचचक्रिणं ब्राह्मणान्भोजयेत्सश्रात्तेभ्योद

द्याच्चदक्षिणां ततःसबंधुभिःसार्द्धंनारायणपरायणः कृत्वापंचमहायज्ञान्स्वयंभुंजीतवाग्यतः एवंयःप्रयतःकुर्यात्पुण्यमेकादशीव्रतं सयातिविष्णुभवनंपुनरावृत्तिदुर्लभम् इत्युक्त्वाकमलातस्मैप्रसन्नातस्यवंशजान् सोपिविप्रोधनीभूत्वापितुर्गेहंसमाविशत् एवंयःकुरुतेराजन्कमलाव्रतमुत्तमम् शृणुयाद्वासरेविष्णोःसर्वपापैःप्रमुच्यते इतिश्रीब्रह्मांडपुराणेपुरुषोत्तममासेकमलानामैकादशीमाहात्म्यंसंपूर्णं अथकार्तिकशुक्लैकादश्यांप्रबोधविधिः हेमाद्रौब्राह्मे एकादश्यांतुशुक्लायांकार्तिकेमासिकेशवं प्रसुप्तंबोधयेद्रात्रौश्रद्धाभक्तिसमन्वितः नृत्यैर्गीतैस्तथावेदैर्ऋग्यजुःसाममंगलैः वीणापणवशब्दैश्चपुराणश्रवणेनच वासुदेवकथाभिश्चस्तोत्रैरन्यैश्चवैष्णवैः सुभाषितैरिंद्रजालैर्भूरिशोभाभिरेवच पुष्पैर्धूपैश्चनैवेद्यैर्दीपमालासुशोभनैः होमैर्भक्ष्यैरपूपैश्चफलैःशार्करपायसैः इक्षुविकारैर्मधुरैर्द्राक्षाद्यैःसहदाडिमैः कुठेरकस्यमंजर्यामालत्याकमलेनच कुठेरकःपर्णशरःकृष्णातुलसीतिकेचित् हृताभ्यांश्वेतरक्ताभ्यांचंदनाभ्यांचसर्वदा कुंकुमारक्तकाभ्यांचरक्तसूत्रैःसकंकणैः तथानानाविधैःपुष्पैर्द्रव्यैर्वीरक्रियाहृतैः क्रयमाणःक्रयोवीरक्रयविहितंमूल्यंदत्वा तस्यांरात्र्यांव्यतीतायांद्वादश्यामरुणोदये आदौघृतेनैक्षवेणमधुनास्नापयेत्ततः दध्नाक्षीरेणचतथापंचगव्येनपूजयेत् उद्वर्तयेन्माषचूर्णशर्करामलकीनतथा सर्षपांश्चप्रियंगूश्चमातुलिंगरसैस्तथा सर्वौषधीःसर्वगंधान्सर्वबीजानिकांचन मंगलानियथाकामंरत्नानिचकुशोदकं एवंसंशोध्यदेवेशंदद्याद्गोरोचनंशुभम् ततस्तुकलशान्स्थाप्ययथाप्राप्तांस्त्वलंकृतान् जातीपल्लवसंयुक्तान्सफलांश्चसकांचनान् पुण्याहवेदशब्देनवीणावेणुरवेणच एवंसंस्नाप्यगोविंदंस्वनुलिप्तंस्वलंकृतं कृत्वासंसंतुसंपूज्यसुमनोभिःसकुंकुमैः धूपैर्दीपैर्मनोज्ञैश्चपायसेनचभूरिणा हविष्यैश्चान्नदानैश्चहोमैःपुष्पैःसदक्षिणैः वासोभिर्भूषणैरन्यैर्गोभिरश्वैर्मनोजवैः ब्राह्मणाःपूजनीयाश्चविष्णोरीड्याश्चमूर्त्तयः यत्तुशिष्टामृतंपश्चाद्भोक्तव्यंब्राह्मणैःसह इतिउद्यापनउत्सवविधिः अथकार्तिकशुक्लैकादश्यांभीष्मपंचकव्रतम् हेमाद्रौनारदीये नारदउवाच यदेतदचलंपुण्यंव्रतानामुत्तमव्रतं कर्तव्यंकार्तिकेमासिप्रयत्नाद्भीष्मपंच

कं विज्ञानंतस्यविस्पष्टंफलंचापिततोवरं कथयस्वप्रसादेनमुनीनांहितकाम्यया ब्रह्मोवाच प्रवक्ष्यामिमहापुण्यंव्रतंव्रतविदांव
र भीष्मेणैवचसंप्राप्तंव्रतंपंचदिनात्मकं सकाशाद्वासुदेवस्यतेनोक्तंभीष्मपंचकं व्रतस्यास्यगुणान्वक्तुंकःशक्तःकेशवादृते व्रतं
चैतन्महापुण्यंमहापातकनाशनं अतोवरंप्रयत्नेनकर्तव्यंभीष्मपंचकं वालखिल्याऊचुः कार्तिकस्यासितेपक्षेस्नात्वासम्यग्य
तव्रतः एकादश्यांतुगृण्हीयाद्व्रतंपंचदिनात्मकं शरपंजरसुप्तेनभीष्मेणतुमहात्मना राजधर्मादानधर्मामोक्षधर्मास्ततःपरं कथि
ताःपांडुदायादैःकृष्णेनापिश्रुतास्तदा ततःप्रीतेनमनसावासुदेवेनभाषितम् धन्यधन्योसिभीष्मत्वंधर्माःसंश्राविताःस्त्वया एका
दश्यांकार्तिकस्ययाचितंचजलंत्वया अर्जुनेनसमानीतंगांगंबाणस्यवेगतः तुष्टानितवगात्राणितस्मादद्यदिनावधि पूर्णांतंसर्व
लोकास्त्वांतर्पयंत्वर्घ्यदानतः तस्मात्सर्वप्रयत्नेनममसंतुष्टिकारकम् एतद्व्रतंप्रकुर्वंतुभीष्मपंचकसंज्ञितं कार्तिकस्यव्रतंकृत्वानकु
र्याद्भीष्मपंचकं समग्रंकार्तिकव्रतंवृथातस्यभविष्यति अशक्तश्चेन्नरोभूयादसमर्थश्चकार्तिके भीष्मस्यपंचकंकृत्वाकार्तिकस्य
फलंलभेत् सत्यव्रतायशुचयेगांगे ।महात्मने भीष्मायैतद्ददाम्यर्घ्यमाजन्मब्रह्मचारिणे सव्येनानेनमंत्रेणतर्पणंसार्ववर्णिकं
व्रतांगत्वात्पूर्णिमायांप्रदेयःपापपूरुषः अपुत्रेणप्रकर्तव्यंसर्वथाभीष्मपंचकं यःपुत्रार्थंव्रतंकुर्यात्सस्त्रीकोभीष्मपंचकम् प्रदत्वापा
पपुरुषंवर्षमध्येसुतंलभेत् अवश्यमेवकर्तव्यंतस्माद्भीष्मस्यपंचकम् विष्णुप्रीतिकरंप्रोक्तंमयाभीष्मस्यपंचकं अत्रैवहिप्रकर्त
व्यःप्रबोधस्तुहरेःस्वग हतःशंखासुरोदैत्योनभसःशुक्लपक्षके एकादश्यांततोविष्णुश्चातुर्मास्येप्रसुप्तवान् क्षीरोदधौजाग्रतो
स्यावेकादश्यांतुकार्तिके अतःप्रबोधनंकार्यमेकादश्यांतुवैष्णवैः उत्तिष्ठोत्तिष्ठशंखघ्नउत्तिष्ठांभोधिचारक उत्तिष्ठमुनिनोधारत्रै-
लोक्येमंगलंकुरु उत्तिष्ठधरणीधारवराहादिकधारक कूर्मरूपधरोत्तिष्ठत्रैलोक्येमंगलंकुरु उत्तिष्ठोत्तिष्ठवाराहदंष्ट्रोद्धृतवसुंधर
हिरण्याक्षप्राणघातिन्त्रैलोक्येमंगलंकुरु हिरण्यकशिपुघ्नत्वंप्रल्हादानंददायक लक्ष्मीपतेसमुत्तिष्ठत्रैलोक्ये॰ उत्तिष्ठबलिदर्पघ्न
देवेंद्रपददायक उत्तिष्ठादितिपुत्रत्वंत्रैलो॰ उत्तिष्ठहैहयाधीशसमस्तकुलनाशन रेणुकापुत्रत्वमुत्तिष्ठत्रैलो॰ उत्तिष्ठरक्षोदलनप्र

योध्यास्वर्गदायक समुद्रसेतुकर्तस्त्वंत्रै॰ उत्तिष्ठकंसहरणमदघूर्णितलोचन उत्तिष्ठहलपाणेत्वंत्रै॰ उत्तिष्ठत्वंगयावासिंस्त्य
क्तलौकिकवत्तक उत्तिष्ठपद्मासनगत्रै॰ उत्तिष्ठम्लेंछनिवहखड्गसंहारकारक अश्ववाहयुगांतेत्वंत्रै॰ उत्तिष्ठोत्तिष्ठगोविंद उ
त्तिष्ठगरुडध्वज उत्तिष्ठकमलाकांतत्रैलोक्येमंगलंकुरु इत्युक्त्वाशंखभेर्यादिप्रातःकालेतुवादयेत् वीणावेणुमृदंगादि-
गीतनृत्यादिकारयेत् उत्थापयित्वादेवेशंपूजांतस्यविधायच सायंकालेप्रकर्तव्यस्तुलस्युद्वाहजोविधिः अवश्यमेवक
र्तव्यः प्रतिवर्षंतुवैष्णवैः विधिंतस्यप्रवक्ष्यामियथासांगाक्रियाभवेत् विष्णोस्तुप्रतिमांकुर्यात्पलस्यस्वर्गजांशुभाम्
तदर्धार्धंतदर्धार्धंयथाशक्त्याप्रकल्पयेत् प्राणप्रतिष्ठांकृत्वाचतुलसीविष्णुरूपयोः ततउत्थापयेद्देवंपूर्वोक्तैश्चस्तवादिभिः
उपचारैःषोडशभिःपुरुषसूक्तेनपूजयेत् देशकालौततःस्मृत्वागणेशंतत्रपूजयेत् पुण्याहंवाचयित्वाथनांदीश्राद्धंसमाचरे
त् वेदवाद्यादिनिर्घोषैर्विष्णुमूर्तिंसमानयेत् तुलस्यानिकटेसातुस्थाप्याचांतरितापटैः आगच्छभगवन्देवअर्चयिष्या
मिकेशव तुभ्यंददामितुलसींसर्वकामप्रदोभव दद्यात्त्रिवारमर्घ्यंचपाद्यंविष्टरमेवच ततश्चाचमनीयंचत्रिरुक्त्वाचप्रदा
पयेत् ततोदधिघृतंक्षौद्रंकांस्यपात्रपुटीकृतं मधुपर्कंगृहाणत्वंवासुदेवनमोस्तुते ततोयेस्वकुलाचाराःकर्तव्याविष्णुतु
ष्टये हरिद्रालेपनाभ्यंगःकार्यःसर्वंविधायच गोधूलिसमयेपूज्यौतुलसीकेशवौपुनः पृथक्पृथक्ततःकार्यौस्तुसुखमं
गलंपठेत् ईषद्दृष्टेभास्करेतुसंकल्पंतुसमर्पयेत् स्वगोत्रप्रवरानुक्त्वातथात्रिपुरुषादिकं अनादिमध्यनिधनत्रैलोक्य
प्रतिपालक इमांगृहाणतुलसींविवाहविधिनेश्वर पार्वतीबीजसंभूतांवृंदाभस्मनिसंस्थितां अनादिमध्यनिधनांवल्ल
भांचददाम्यहं पयोघटैश्चसेवाभिःकन्यावद्वर्धितामया त्वत्प्रियांतुलसींतुभ्यंदास्यामित्वंगृहाणभोः एवंदत्वातुतुलसीं
पश्चात्तौपूजयेत्ततः रात्रौजागरणंकुर्याद्विवाहोत्सवपूर्वकं प्रतिवर्षमिदंकुर्यात्कार्तिकव्रतसिद्धये इतिसनत्कुमार
संहितायांकार्तिकशुक्लैकादश्यांतुलसीविवाहविधिः वालखिल्याऊचुः ततःप्रभातसमयेतुलसींविष्णुमर्चयेत्

वन्हिसंस्थापनंकृत्वाद्वादशाक्षरविद्यया पायसाज्यक्षौद्रतिलैर्हुनेदष्टोत्तरंशतं ततःस्विष्टकृतंहुत्वादद्यात्पूर्णाहुतिंततः आचा
र्यंचसमभ्यर्च्यहोमशेषंसमापयेत् चतुरोवार्षिकान्मासान्नियमंयस्ययत्कृतं कथयित्वाद्विजेभ्यस्तत्तथान्यत्सरिपूजयेत् इ
दंव्रतंमयादेवकृतंप्रीत्यैतवप्रभो न्यूनंसंपूर्णतांयातुत्वत्प्रसादाज्जनार्दन रेवतीतुर्यचरणेद्वादशीसंयुतेनरः नकुर्यात्पारणं
कुर्वन्व्रतंनिष्फलतांव्रजेत् ततोयेषांपदार्थानांवर्जनंतुकृतंभवेत् चातुर्मास्येथवान्योर्जेब्राह्मणेभ्यःसमर्पयेत् ततःसर्वसम-
श्नीयान्यद्यद्युक्तंव्रतेस्थितः दंपतीभ्यांसहैवात्रभोक्तव्यंवाद्विजैःसह ततोभुक्त्युत्तरंयानिगलितानिदलानिच तुलस्यास्ता
निभुक्त्वातुसर्वपापैःप्रमुच्यते भोजनानंतरंविष्णोरर्पितंतुलसीदलं भक्षणात्पापनिर्मुक्तिश्चांद्रायणशताधिका इक्षुखंडंत
थाधात्रीफलंपूगीफलं तथा भुक्त्वातुभोजनस्यांतेतयोच्छिष्टंविनश्यति एषुत्रिषुनभुक्तंचेदेकैकमपियेनतु ज्ञेयउच्छिष्टआ
वर्षंनरोसौनात्रसंशयः ततःसायंपुनःपूज्यौइक्षुवंशैश्चमंडितौ तुलसीवासुदेवौचकृतकृत्योभवेत्ततः ततोविसर्जनंकुर्या
द्दत्वादेयादिकंहरेः वैकुंठंगच्छभगवन्तुलस्यासहितःप्रभो मत्कृतंपूजनंगृह्यसंतुष्टोभवसर्वदा गच्छगच्छसुरश्रेष्ठस्वस्थाने
परमेश्वर यत्रब्रह्मादयोदेवास्तत्रगच्छजनार्दन एवंविसर्ज्यदेवेशमाचार्यायप्रदापयेत् मूर्त्यादिकंसर्वमेवकृतकृत्योभवेन्न
रः प्रतिवर्षंकरोत्येवंतुलस्यउद्वहनंशुभम् इहलोकेपरत्रापिविपुलंसद्यशोलभेत् प्रतिवर्षंतुयःकुर्यात्तुलसीकरपीडनं भ
क्तिमान्धनधान्यैश्चयुक्तोभवतिनिश्चितं इतिश्रीसनत्कुमारसंहितायांकार्तिकशुक्लैकादशीव्रतंसंपूर्णम् अथमा
र्गशीर्षकृष्णैकादशी अर्जुनउवाच ॐनमोनारायणायाव्यक्तायात्मस्वरूपिणे सृष्टिस्थित्यंतकर्त्रेचकेशवायनमोस्तु
ते त्वमेवजगतांनाथअंतर्यामीत्वमेवच शास्त्राणांचकवीशश्चवक्तात्वंचजगत्पते एकादशीकथंस्वामिन्नुत्पन्नाइतिगीयते
एतंहिसंशयंमेद्यच्छेतुमर्हसित्वंप्रभो ब्रूयुःस्निग्धस्यशिष्यस्यगुरवोगुह्यमप्युत ममोपरिकृपांकृत्वाइदानींवक्तुमर्हसि मा
र्गशीर्षेकृष्णपक्षेकिंनामैकादशीभवेत् किंनामकोविधिस्तस्याःकोदेवस्तत्रपूज्यते कृताकेनपुरादेवएतद्विस्तरतोवद श्रीकृ

ष्णउवाच शृणुराजन्प्रवक्ष्यामिकथांपातकनाशिनीं पृष्टाचयात्वयाराजन्लोकानांहितकाम्यया मार्गशीर्षेकृष्णपक्षेचोत्प
त्तिर्नामनामतः तस्यासुपोषणेनैवधार्मिकोजायतेनरः धर्माद्भवतिसत्यंवैलक्ष्मीःसत्यानुसारिणी पुरावैसुरनाशायउत्पन्नांम
मवल्लभां येकुर्वंतिनराराजन्तेषांसौख्यंभवेद्ध्रुवं तथापापानिनश्यंतिनहियांतियमालयं अर्जुनउवाच उत्पन्नासाक
थंदेवकथंपुण्याधिकाशुभा कथंदेवपवित्रावैकथंचदेवताप्रिया श्रीकृष्णउवा॰ पुराकृतयुगेपार्थमुरुनामेतिदान
वः अत्यद्भुतोमहारौद्रःसर्वलोकभयंकरः इंद्रउच्छेदितस्तेनख्याद्योदेवःपुरंदरः आदित्याश्चशिवोब्रह्मावायुरग्निस्तथैवच न
वंप्रतिष्ठितंतेनएवमादिधनंजय देवतानिर्जितास्तेनअत्युग्रेणतुपांडव स्वर्गान्निराकृतादेवाविचरंतिमहीतले साशंकाभय
भीतास्तेगताःसर्वेमहेश्वरं इंद्रेणकथितंसर्वमीश्वरस्यापिचाग्रतः स्वर्गलोकंपरित्यज्यविचरंतिमहीतले मर्त्येषुसंस्थिता
देवानशोभंतेमहेश्वर उपायंब्रूहिमेदेवअमराणांतुकागतिः शिवउवाच गच्छगच्छसुरश्रेष्ठयत्रास्तिगरुडध्वजः
शरणागतदीनार्त्तपरित्राणपरायणः ईश्वरस्यवचःश्रुत्वादेवराजोमहामतिः त्रिदशैःसहितःसर्वैर्गतस्तत्रधनंजय अप्सरो
गणगंधर्वैःसिद्धविद्याधरोरगैः यत्रैवसजगन्नाथःसुप्तोस्तिचजनार्दनः कृतांजलिपुटोभूत्वाइदंस्तोत्रमुदीरयत् ॐ न-
मोदेवदेवेशदेवानामपिवंदित दैत्यारेपुंडरीकाक्षत्राहिमांमधुसूदन नमस्तेस्थितिनाशायनमस्तेस्तुजगत्पते नमोदैत्यवि
नाशायत्राहिमांमधुसूदन सुराःसर्वेसमायुक्ताभयभीताःसमागताः शरणंत्वांजगन्नाथपाहिमांभयविह्वलं त्राहिमां
देवदेवेशत्राहिमांत्वंजनार्दन त्राहिमांत्वंसुरानंददानवानांविनाशक त्वंगतिस्त्वंमतिर्देवत्वंकर्त्तात्वंपरायणः त्वंमातासर्वगो
सित्वंत्वमेवहिजगत्पिता अत्युग्रेणतुदैत्येननिर्जितास्त्रिदशाःप्रभो स्वर्गंत्यक्त्वाजगन्नाथविचरंतिमहीतले इंद्रस्यवच
नंश्रुत्वाविष्णुर्वचनमब्रवीत् विष्णुरुवाच कीदृशोवोभवच्छत्रुःकिन्नामाकीदृशंबलं किंस्थानंतस्यदुष्टस्यकिं
वीर्यंकःपराक्रमः इंद्रउवाच बभूवपूर्वंदेवेशासुरोब्रह्मसमुद्भवः नालजंघेतिनाम्नाचअत्युग्रोतिमहाबलः त

स्यपुत्रोतिविख्यातो मुरनामेतिदानवः उत्कटश्चमहावीर्योब्रह्मलब्धवरोमहान् पुरीचंद्रवतीनामतत्रस्थानेवसत्यसौ निर्जितादेवताःसर्वाःस्वर्गाच्चैवनिराकृताः इंद्रोन्यश्चकृतस्तेन अन्योदेवोहुताशनः चंद्रसूर्यौकृतौचान्यौयमोवरुणएवच सर्वमात्मीकृतंतेनसत्यंसत्यंजनार्दन तस्यतद्वचनंश्रुत्वाकोपाविष्टोजगत्पतिः हनिष्येदानवंदुष्टमित्याहभगवान्हरिः त्रिदशैःसहितस्तत्रगतश्चंद्रवतींपुरीं दृष्ट्वादेवान्संयुयुधेदानवोबलदर्पहा असंख्यातैश्चशस्त्रास्त्रैर्दिव्यप्रहरणायुधः हन्यमानास्ततस्तैर्देवाअसुरैश्चपुनःपुनः भग्नादेवास्ततःसर्वेगताःसर्वेदिशोदश हरिर्निरीक्ष्यतत्रस्थंतिष्ठतिष्ठाब्रवीद्वचः सतंनिरीक्ष्यप्रोवाचअसुरंमधुसूदनः रेदानवदुराचारममबाहुंनिरीक्ष्यच चक्रंचैवसमायातंसक्रोधोरक्तलोचनः ततस्तेसंमुखाःसर्वेविष्णुनादानवाहताः हतोबाणैःपुनर्दिव्यैर्बभूवासोतिविह्वलः चक्रंमुक्तंतुकृष्णेनदैत्यसैन्येचपांडव तेनैवच्छिन्नशिरसोबहवोनिधनंगताः एकांगोदानवस्तत्रयुध्यमानोमुहुर्मुहुः नष्टाःसर्वेसुरास्तेननिर्जितोमधुसूदनः निर्जितेनचदैत्येनबाहुयुद्धंचयाचितम् बाहुयुद्धंकृतंतेनदिव्यंवर्षसहस्रकं विष्णुश्चिंतांप्रपन्नश्चनष्टाःसर्वेदिवौकसः विष्णुःपराजितस्तेनगतोबदरिकाश्रमं गुहांसिंहवतींनामतत्रसुप्तोजनार्दनः दानवःपृष्ठतोलग्नःप्रविष्टस्तांगुहोत्तमां प्रसुप्तंतत्रमांदृष्ट्वादानवेनसुभाषितं हनिष्यामिनसंदेहोअसुराणांभयंकरः इत्येवमुक्तेवचनेदैत्येनामित्रकर्षिणा निर्गताकन्यकाचैकाजनार्दनशरीरतः रूपेणातिस्वरूपाढ्यादिव्यप्रहरणायुधा विष्णुतेजःसमुद्भूतामहाबलपराक्रमा मोहितोदानवस्तत्रमुरनामेतिपांडव साकन्यायुयुधेतेनसर्वयुद्धविशारदा निहतोदानवस्तत्रतयादेवःप्रबुद्धवान् पतितंदानवंदृष्ट्वाततोविस्मयमागतः केनेत्थंनिहतोरौद्रोममशत्रुर्भयंकरः नदेवोनचगंधर्वोनसमोस्यास्तिभूतले एवंपार्थतदाजातोविस्मितोमधुसूदनः अकस्मादेवसोवाचवाचादिव्याशरीरिणी

एकादश्युवाच मयाचनिहतोदुष्टोदेवासुरभयंकरः जितायेनसुराःसर्वेस्वर्गाच्चैवनिराकृताः सतस्यास्तद्वचनंश्रुत्वाविष्णुर्वचनमब्रवीत्

विष्णुरुवाच उपकारस्त्वयाभद्रेममकारुण्यभावतः दानवोनिहतोदुष्टःसुराणांचभयंकरः सोहंविनिर्जि

नोयेनकंसोयेननिपातितः विष्णोस्तद्वचनंश्रुत्वादेवीवचनमब्रवीत् एकादश्यस्म्यहंविष्णोसर्वशत्रुविनाशिनी मयाचनिह
तोदैत्यःसुराणांत्रासकारकः इत्येतद्वचनंश्रुत्वादेवदेवोजनार्दनः प्राहतुष्टोस्मिभद्रंतेवरंवरयवांछितं निहतेदानवेंद्रेचसं
तुष्टास्तत्रदेवताः हृष्टपुष्टास्ततोगत्वाआनंदंचसमागताः आनंदस्त्रिषुलोकेषुमुनयोमुदमागताः ब्रूहित्वंवचनंभद्रेयत्तेमनसिवर्त
ते ददामिचनसंदेहःसुराणामपिदुर्लभं एकादश्युवा॰ यदितुष्टोसिमेदेवसत्यमुक्तंजनार्दन यदिसत्यंजगन्नाथस्तिस्रोवाचोददस्व
मे श्रीभगवानुवा॰ सत्यमेतन्मयाप्रोक्तमवश्यंतवसुव्रतेवश्यंतिस्रोवाचोमयादत्तास्तववाक्यंभवेदिति एकादश्युवाच
त्रैलोक्येषुचदेवेशमन्वंतरयुगेष्वपि अहंचत्वत्प्रियानित्यंयथास्यांकुरुमेवरं सर्वतिथिप्रधानाचसर्वविघ्नविनाशिनी स
र्वपापापहंत्रीचआयुर्बलविवर्धिनी येउपोष्यंतिमेमर्त्यामहाभक्त्याजनार्दन सर्वसिद्धिर्भवेत्तेषांयदितुष्टोसिमाधव
श्रीकृष्णउवाच यत्त्वंवदसिकल्याणितत्सर्वंचभविष्यति धर्मार्थकाममोक्षंचयस्त्वामेवंकरिष्यति ममभक्ताश्चयेलो
कायेचभक्तास्तवापिच चतुर्युगेषुविख्यातास्त्रिषुलोकेषुवैपरं त्वांचभक्तामहंमन्येएकादशिव्रतेस्थिताः ममपूजांकरि
ष्यंतिएकादश्यांनसंशयः सर्वतिथ्युत्तमात्वंचमत्प्रसादाद्भविष्यसि एवमुक्त्वाततःसातुतत्रैवांतरधीयत पुराकैकटकेदे-
शेकर्णीकनगरेषुच कर्णसेनेतिराजर्षिर्न्यवसत्ऋद्धिमत्प्रजः ब्राह्मणैःक्षत्रियैर्वैश्यैःशूद्रैश्चैवानुमोदितः नदुर्भिक्षंनदारिद्र्यं
तस्मिन्राज्ञिस्थितेप्रभो अकालवृष्टिर्नोव्याधिर्नैवतस्करतापिच संपत्संततिहीनश्च कोपितत्रनविद्यते पुत्रदुःखंपिताक्वापि
पश्यतिनचकुत्रचित् एतादृशेमहाराजेप्रशासतिप्रजाःप्रभौ धनहीनोद्विजःकोपिक्षुत्क्षामोविपदंगतः कुटुंबभरणास-
क्तःकृच्छ्रांतमनुवर्त्तते भर्त्तुःशुश्रूषणेसक्तासदाचारेगृहेस्थिता सुदामानामविप्रर्षिर्भार्यासाध्वीचसत्तमा रहःपृच्छ-
तिभर्त्तारंम्लानतावदनेनसा स्वामिन्यापेक्षतेपूर्वंधर्महीनस्तुजायते धर्महीनेधनंनास्तिधर्महीनेक्रियानहि तस्मात्केनाप्यु
पायेनधर्मस्यजननंकुरु एतस्मिन्नंतरेराजन्देवर्षिःसमुपागतः दंपतीचोत्थितौतत्रमधुपर्कंगृहाणभो आसनेतिष्ठभोस्त्वा

मिन्अर्घ्यंगृण्हनमोस्तुते अद्यमेसफलंजन्म अद्यमेसफलाःक्रियाः अद्यमेसफलंसर्वंभवतोदर्शनेनच अस्मिन्सुरेषुयेस्वामिन्स
र्वेतेसुखिनोजनाः अहंतुधनहीनत्वान्महादुःखेनपीडितः कथयस्वप्रसादेनधनाढ्यःस्यामहंकथं धनहीनस्यलोकेस्मिन्वृ
थाजन्ममनोरथाः एवंश्रुत्वातुराजेंद्रवचनंनारदोब्रवीत् नारदउवाच मार्गशीर्षेसितेपक्षेउत्पत्तिर्नामनामतः तस्या
मुपोषणेनैवधनाढ्योजायतेध्रुवम् तथापापानिनश्यंतिएतत्सत्यंवदामिते सर्वसौख्यकरंनृणांहरिवासरमुत्तमं गतेतुनारदेप-
श्चाद्व्रतंकृत्वाप्रयत्नतः तस्याव्रतप्रभावेनसुप्रसन्नोजनार्दनः स्वयमेवाश्रितालक्ष्मीर्यत्रासीद्द्विजमंदिरं भोगान्सविपुलान्भु-
क्त्वागतोवैकुंठसन्निधौ एतस्मात्कारणाद्राजन्कर्त्तव्यंहरिवासरं अंतरंनैवकर्तव्यंप्रशस्तंव्रतकारिभिः तिथिरेकाभवेत्सर्वाप
क्षयोरुभयोरपि उदयेकादशीस्वल्पाअंतरेचत्रयोदशी मध्येचद्वादशीपूर्णात्रिस्पृष्टासाहरिप्रिया एकाउपोषितान्नैवसहस्रै
कादशीफलं सहस्रगुणितंदानमेकादश्यांतुपारणे अष्टम्येकादशीषष्ठीतृतीयाचचतुर्दशी पूर्वविद्धानकर्तव्याकर्तव्यापरसंयु
ता एकासुपोषयेत्तांतुद्वादशींविष्णुवल्लभां दशमीवेधसंयुक्ताहंतिपुण्यंपुराकृतम् एकादशीअहोरात्रंप्रभातेघटिकाभवेत् सा
तिथिःपरिहर्तव्याउपोष्याद्वादशीयुता एवंविधामयाप्रोक्तापक्षयोरुभयोरपि एकादश्यांप्रकुर्वीतउपवासंनसंशयः सयातिपर-
मंस्थानंयत्रास्तेगरुडध्वजः धन्यास्तेमानवालोकेविष्णुभक्तिपरायणाः एकादश्याश्चमाहात्म्यंपर्वकालेतुयःपठेत् गोसह-
स्रफलंतस्यपुण्यंभवतिभारत दिवावायदिवारात्रौयःशृणोतीहभक्तितः कुलकोटिसमायुक्तोविष्णुलोकेवसेद्ध्रुवम् एकाद
श्याश्चमाहात्म्यंपठ्यमानंशृणोतियः ब्रह्महत्यादिपापानिनश्यंतेनात्रसंशयः एकादशीसमानास्तिसर्वपातकनाशिनी
इतिश्रीभविष्योत्तरपुराणेमार्गशीर्षकृष्णैकादशीउत्पत्तिर्नाममाहात्म्यंसंपूर्णम् अथमार्गशीर्षशुक्लैकादश्यांवैतरणी
व्रतंहेमाद्रौभविष्ये कृष्णउवाच शरतल्पगतंभीष्मंपर्यपृच्छद्युधिष्ठिरः व्रतेनयेनपुण्येनयमलोकोनदृश्यते ना
रीवापुरुषोवापियमलोकंनपश्यति तत्समाचक्ष्वधर्मज्ञपितामहकृपांकुरु भीष्मउवाच एकादशीवैतरणीनाकृता

चविमुच्यते यमलोकंनपश्येच्चशोकंचैवनविंदति युधिष्ठिरउवाच केनतातविधानेनकर्तव्यासामहाफला पितामह समाख्याहितद्विधानंममप्रभो भीष्मउवाच एकादशींतिथिंकृत्वामार्गशीर्षगतांशुभां तामासाद्यनरःसम्यक्गृण्हीयान्नियमंशुचिः एकादशीतिथिःकृष्णानाम्नावैतरणीशुभा साव्रतेनत्वयाकार्यावर्षेनक्तोपवासिना मध्यान्हेतुनरःस्नात्वानित्यानिवर्त्यसत्क्रियाः रात्रौसुरभिमानीयकृष्णामर्चेद्यथाविधि सापूर्वाभिमुखीकार्याकृष्णागौःकिलभूतले अग्रपादात्समारभ्यपश्चात्पादद्वयावधि गोपुच्छंतुसमासाद्यकुर्याद्वापितृतर्पणं ततःपूजाप्रकर्तव्याशास्त्रदृष्टविधानतः गांचैवंश्रद्धयायुक्तश्चंदनेनानुलेपितां गंधतोयेनचरणौशृंगेप्रक्षाल्यशक्तितः ततोनुपूजयेद्भक्त्यापुष्पैर्गंधादिवासितैः मंत्रैःपुराणसंप्रोक्तैर्यथास्थानंयथाविधि ततोगोरग्रपादाभ्यांगोरास्यायनमोस्तुते गोशृंगाभ्यांचसंपूज्यगोस्कंधाभ्यांतथैवच गोःपुच्छायनमस्तेस्तुगोःपुच्छात्पादयोस्तथा गोःसर्वांगेषुसंपूज्यस्थानेस्थानेषुदेवताः स्थानेष्वेतेषुगंधांश्चप्रक्षिपेच्छुद्धमानसः पश्चात्सदापयेद्धूपंगोर्दीपःप्रतिगृह्यताम् असिपत्रादिकंघोरंनदींवैतरणींतथा प्रसादात्तेतरिष्यामिगोर्मातस्तेनमोनमः यज्ञसाधनभूतायाविश्वस्याघौघनाशिनि विश्वरूपधरोदेवःप्रीयतामनयागवा सुखेनतीर्यतेयस्मान्नदीवैतरणीध्रुवम् तस्मादेकादशींकृत्वानाम्नावैतरणींनरः हेमशृंगींरौप्यखुरींसघंटाभरणांबरां ताम्रपृष्ठींकांस्यदोग्ध्रींसुवर्णोत्तरदक्षिणां सवत्सांद्विजमुख्यायपूजयित्वासमर्पयेत् आनंदकृत्सर्वलोकेदेवानांचसदाप्रिया गौस्त्वंपाहिजगन्नाथदीपोयंप्रतिगृह्यतां आच्छादनंगवेदद्यात्सम्यक्शुद्धंसुनिर्मलं सुरभिर्वस्त्रदानेनप्रीयतांपरमेश्वरी मार्गशीर्षादिकेभक्त्यावर्षमेकंतुपूजयेत् मासिमासिप्रकुर्वीतमासद्वादशकव्रतम् उद्यापनंततःकुर्यात्पूर्णेसंवत्सरेतदा युधिष्ठिरउवाच मार्गशीर्षेसितेपक्षेउद्यापनविधिंवद कृष्णउवाच यइच्छेत्सफलंजन्मजीवितंचसुजीवितं विनाशंसर्वपापानांसकुर्याद्वादशीमिमां युधिष्ठिरकिमिष्टेनशिष्टैरन्यैरनुष्ठितैः दुष्टानीनरदुर्गाणितोषयस्वचकेशवं मार्गशीर्षे-

सितेपक्षेद्वादश्यांकारयेदिदं यदावाभक्तिरुत्पन्नादेवदेवंजनार्दनं एकादश्यांनिराहारोमासिमास्यर्चयेद्धरिं द्वादश्यांद्वादशैना
निनामानिपरिकीर्तयेत् केशवंमार्गशीर्षेच्चपौषेनारायणंविदुः माधवंमाघमासेतुगोविंदमथफाल्गुने चैत्रेविष्णुंतथाविंद्याद्वै-
शाखेमधुसूदनं त्रिविक्रमंतथाज्येष्ठेआषाढेवामनंविदुः श्रावणेश्रीधरंविद्धिहृषीकेशंतुभाद्रके आश्विनेपद्मनाभंचऊर्जेदा
मोदरंविदुः कृष्णोनंतोच्युतश्चक्रीवैकुंठोयजनार्दनः उपेंद्रोयज्ञपुरुषोवासुदेवस्तथाहरिः योगीशःपुंडरीकाक्षोमासनामान्य
नुक्रमात् एतानिनामानुत्थाययःपठेत्पुरुषःसदा अपिदुर्गतिकास्तस्यपितरःस्वर्गमाप्नुयुः तिलपात्रद्वादशकंयोदद्यात्प्रत्यहंद्विजे
एवंद्वादशभिर्मासैर्व्रतंपारंगमिष्यति व्रतांतेब्राह्मणान्शांतान्माससंख्यान्निमंत्रयेत् द्वादशाश्वत्थपत्रेषुस्थापयेच्छुक्लतंडुलैः
ॐतस्मैनमआयातु इतिआवाहयेत्पृथक् संस्थाप्याग्निंततःप्राच्यांध्यायेद्यआत्मसंमुखान् आसनंपाद्यमर्घ्यंचगंधपुष्पादिना
तथा धूपदीपांश्चवासांसिहोमशेषंसमापयेत् दत्वाचाचमनंपश्चाद्धोमशेषंनिवेदयेत् अष्टाष्टसमिधोहोमेहुत्वाष्टाष्टघृताहुतीः
यवस्याहुतिमेकैकामष्टाष्टौचतिलाहुतीः अग्निप्रतिष्ठितंहोमंदेवेभ्यश्चनिवेदयेत् पूर्णाहुतौभवेन्मंत्रस्तद्विष्णोःपरमंपदं एवंकृ
तेतुहोमांतेगाःकृष्णाद्वादशाष्टवा षट्चतस्रोपिवादेयाएकावापिपयस्विनी शय्यासतूलिकाकार्यादंपत्योःपरिधानकं सव-
त्साकृष्णवर्णातुधेनुर्देयापयस्विनी सौवर्णींसुरभिंकृत्वास्थापयेत्तूलिकोपरि सुरभिंपूजयेन्मंत्रैःपूर्वोक्तैर्भक्तिसंयुतः तत
स्तुगुरवेदद्यात्सर्वंतत्रक्षमापयेत् कृष्णभक्तायशांतायविधिज्ञायमहात्मने तेप्रीयतामितिप्रोक्तादेवाद्वादशमासिकान् मामे
वसुद्धरस्वेतिगवांवाच्यःपरिग्रहः मासिमासिभवेत्तेषुतिलपात्रेषुतैर्घटैः तस्मिन्कालेप्रदातव्याघटास्तेमासनामभिः समा
प्यतुव्रतंपुण्यंतस्मादर्घ्यंप्रदापयेत् उद्धारयेसितृगणान्दशपूर्वान्दशापरान् आत्मानमेकविंशञ्चकृष्णैकादश्युपोषणात् भारो
लोहस्यदातव्यःकार्पासोद्रोणसंयुतः वैतरिण्यांसमास्यर्थेब्राह्मणायकुटुंबिने नारीवापुरुषोवापिव्रतस्यास्यप्रभावतः राज्यंबहुदिनंभु
क्त्वास्वर्गलोकेमहीयते इतिश्रीभविष्योत्तरपुराणेमार्गशीर्षकृष्णैकादश्यांवैतरणीव्रतोद्यापनंसंपूर्णम् इतिएकादशीव्रतानिसमाप्तानि

श्रीगणेशायनमः अथकथा सूतउवाच एवंप्रीत्यापुराविप्राःश्रीकृष्णेनपरंव्रतम् कथितंतत्प्रयत्नेनयःकुर्याद्भुविमा
नवः १ भुक्त्वाभोगाननेकांश्च विष्णुलोकंप्रयातिसः पार्थउवाच उपवासस्यनक्तस्यतथैवायाचितस्यभो २ किंपुण्यंकिं-
विधानंहि ब्रूहिसर्वंजनार्दन श्रीकृष्णउवाच हेमंतेचैवसंप्राप्तेमासिमार्गशिरेशुभे ३ शुक्लपक्षेतथापार्थएकादश्यामुपोष्य-
च दशम्यांचैवयत्किंचित्प्रकुर्यात्सुदृढव्रतं ४ नक्तंचतद्दिनेकृत्वादशम्यांदंतधावनम् दिवसस्याष्टमेभागेमंदीभूतेदिवाक-
रे तन्नक्तंविजानीयान्ननक्तंनिशिभोजनम् ५ ततःप्रभातसमयेसंकल्प्यनियमांश्चरेत् मध्यान्हेचतथापार्थशुचिःस्नानःस-
माहितः ६ नद्यांतडागेवाप्यांवाप्युत्तमंमध्यमंत्वधः क्रमाज्ज्ञेयंतथाकूपेतदभावेप्रशस्यते ७ अश्वक्रांतेरथक्रांतेविष्णुक्रांते
वसुंधरे मृत्तिकेहरमेपापंयन्मयापूर्वसंचितं ८ त्वयाहतेनपापेनगच्छामिपरमांगतिम् अनेनमृत्तिकास्नानंविदध्यात्तुव्रतीन-
रः ९ नालपेत्पतितैश्चौरैस्तथापाखंडिभिःसह मिथ्यापवादिनोदेवदेवब्राह्मणनिंदकान् १० अन्यांश्चैवदुराचारानगम्यागा-
मिनस्तथा परद्रव्यापहर्तॄंश्चदेवद्रव्यापहारिणः ११ नसंभाषेतदृष्ट्वापिभास्करंचावलोकयेत् ततोगोविंदमभ्यर्च्यनैवेद्यादिभि-
रादरात् १२ दीपंदद्याद्गृहेचैवभक्तियुक्तेनचेतसा तद्दिनेवर्जयेत्सार्थनिंदांमैथुनमेवच १३ गीतशास्त्रविनोदेनदिवारात्रींनयेद्व्रती
रात्रौजागरणंकृत्वाभक्तियुक्तेनचेतसा १४ विप्रेभ्योदक्षिणांदत्वाप्रणिपत्यक्षमापयेत् यथाशक्त्यातथाकृष्णामान्यावैधर्मतत्परैः
१५ एकादश्योर्द्वयोराजन्विभेदंनैवकारयेत् एवंहिकुरुतेयस्तुशृणुतस्यापियत्फलम् १६ शंखोद्धारेनरःस्नात्वादृष्ट्वादेवंगदाधर-
म् एकादश्युपवासस्यकलांनार्हतिषोडशीम् १७ व्यतीपातेचदानस्यलक्षमेकंफलंस्मृतम् संक्रांतिषुचतुर्लक्षंयोददातिधनंजय
१८ कुरुक्षेत्रेचयत्पुण्यंग्रहणेचंद्रसूर्ययोः तत्सर्वंलभतेयस्तुकृत्वैकादश्यामुपोषितः १९ अश्वमेधस्ययज्ञस्यकरणाद्यत्फलंलभेत्
ततःशतगुणंपुण्यमेकादश्युपवासतः २० तपस्विनोगृहेनित्यंलक्षंयस्यचभुंजते षष्टिवर्षसहस्राणितस्यपुण्यंचयद्भवेत् २१ ए-
कादश्युपवासेनफलंप्राप्नोतिमानवः गोसहस्रेचयत्पुण्यंदत्तेवेदांगपारगे २२ तस्मात्पुण्यंदशगुणमेकादश्युपवासिनाम् नित्यं

चभुंजतेयस्यदशाचैवद्विजोत्तमाः २३ भवेत्तद्वैदशगुणंभोजनेब्रह्मचारिणःएतत्सहस्रंभूदानेकन्यादानेतुतत्स्मृतम् २४ तस्माद्दश
गुणंप्रोक्तंविद्यादानेतथैवच विद्याद्दशगुणंचान्नंयोददातिबुभुक्षिते २५ अन्नदानसमंदानंनभूतंनभविष्यति तृप्तिमायांतिकौं
तेयस्वर्गस्थाःपितृदेवताः २६ एकादश्याव्रतस्यापिपुण्यसंख्यानविद्यते एतत्पुण्यप्रभावंचयत्सुरैरपिदुर्लभम् २७ नक्तस्यार्द्धफ
लंतस्यएकभक्तस्यसत्तम एकभक्तंचनक्तंचउपवासस्तथैवच २८ एतेष्वन्यतमंवापिव्रतंकुर्याद्धरेर्दिने नावद्गर्जंतितीर्थानिदाना-
निनियमायमाः २९ एकादशीनसंप्राप्तायावत्तावन्मखाअपि तस्मादेकादशीसर्वैरुपोष्याभवभीरुभिः ३० ननखेनपिबेत्तोयंन-
हन्यान्मत्स्यसूकरान् एकादश्यांनभुंजीतयन्मांत्वंपृच्छसेर्जुन ३१ एतत्तेकथितंसर्वंव्रतानामुत्तमंव्रतम् एकादशीसमंनास्ति
कृतंयज्ञसहस्रकम् ३२ अर्जुनउवाच उक्तात्वयाकथंदेवपुण्येयंसर्वतस्तिथिः सर्वेभ्योपिपवित्रेयमुक्ताह्येकादशीतिथिः ३३
श्रीकृष्णउवाच पुराकृतयुगेपार्थमरुनामाहिदानवः अत्यद्भुतोमहारौद्रःसर्वदेवभयंकरः ३४ इंद्रोविनिर्जितस्तेनअत्स्वग्रे-
णत्वपांडव इंद्रेणकथितःसर्ववृत्तांतःशंकरायवै ३५ सर्वलोकपरिभ्रष्टाविचरामोमहीतले उपायंब्रूहिमेदेवअमराणांतुकागतिः ३६
ईश्वरउवाच देवराजसुरश्रेष्ठयत्रास्तिगरुडध्वजः शरण्यश्चजगन्नाथःपरित्राणपरायणः ३७ तत्रगच्छामहेसर्वेसनःका
र्यंविधास्यति ईशस्यवचनंश्रुत्वादेवराजोमहामनाः ३८ पुरस्कृत्यमहादेवंसगणंसमरुद्गणम् यत्रदेवोजगन्नाथःप्रसुप्तोहिज-
नार्दनः ३९ जलमध्येप्रसुप्तंतुदृष्ट्वादेवंजगत्पतिं कृतांजलिपुटोभूत्वारुद्रःस्तोत्रमुदीरयत् ४० ॐनमोदेवदेवायदेवदेवैःसुवंदि
त दैत्यारेपुंडरीकाक्षत्राहिनोमधुसूदन ४१ दैत्यभीताइमेदेवामयासहसमागताः शरणंत्वांजगन्नाथत्वंकर्तात्वंचकारकः ४२
त्वंमातासर्वलोकानांत्वमेकजगतःपिता त्वंस्थितिस्त्वंतयोत्पत्तिस्त्वंचसंहारकारकः ४३ सहायस्त्वंचदेवानांत्वंचशांतिकरःप्रभो
त्वंधराचलमाकाशःसर्वविश्वोपकारकः ४४ भवस्त्वंचस्वयंब्रह्मात्रैलोक्यप्रतिपालकः त्वंरविस्त्वंशशांकश्चत्वंचदेवोहुताशनः
४५ हव्यंहोमोहुतस्त्वंचमंत्रतंत्रर्त्विजोजपः यजमानश्चयज्ञस्त्वंफलभोक्तात्वमीश्वरः ४६ नत्वयारहितंकिंचित्त्रैलोक्येसचरा

चरे भगवन्देवदेवेशशरणागतवत्सल ४७ त्राहित्राहिमहायोगिन्भीतानांशरणंभव दानवैर्निर्जितादेवाः स्वर्गभ्रष्टाःकृताविभो ४८
स्थानभ्रष्टाजगन्नाथविचरंतिमहीतले रुद्रस्यवचनंश्रुत्वाविष्णुर्वचनमब्रवीत् ४९ श्रीभगवानुवाच कोसौदैत्योमहामायोदे
वायेनविनिर्जिताः किंस्थानंतस्यकिंनामकिंबलंकस्तदाश्रयः ५० एतत्सर्वंसमाचक्ष्वमघवन्निर्भयोभव इंद्रउवाच भगवन्देवदे
वेशभक्तानुग्रहकारक ५१ दैत्यःपूर्वंमहानासीन्नाडीजंघइतिस्मृतः ब्रह्मवंशसमुद्भूतोमहोग्रःसुरसूदनः ५२ तस्यपुत्रोतिविख्यातोमरु
नामामहासुरः तस्यचंद्रवतीनामनगरीचगरीयसी ५३ तस्यांवसन्सदुष्टात्माविश्वंनिर्जित्यवीर्यवान् सुरान्स्ववशमानिन्येनिराकृत्य-
त्रिविष्टपात् ५४ इंद्राग्नियमवाय्वीशसोमनिर्ऋतिपाशिनाम् पदेषुस्वयमेवासीत्सूर्योभूत्वातपत्यपि ५५ पर्जन्यःस्वयमेवासीद्देवस-
र्वाश्चदेवताः जहितंदानवंविष्णोसुराणांजयमावह ५६ तस्यतद्वचनंश्रुत्वाकोपाविष्टोजनार्दनः उवाचशक्रंदेवेंद्रहनिष्येतंमहाबलं
५७ प्रयांतुसहिताःसर्वेचंद्रवत्यांमहाबलाः इत्युक्त्वाप्रययुःसर्वेपुरस्कृत्यहरिंसुराः ५८ दृष्टोदेवैस्सदैत्येंद्रोगर्जमानस्सदानवैः अ
संख्यातसहस्रैस्तुदिव्यप्रहरणायुधैः ५९ हन्यमानास्तदादेवाअसुरैर्बाहुशालिभिः संग्रामंतेसमुत्सृज्यपलायंतेदिशोदश ६० त
तोदृष्ट्वाहृषीकेशंसंग्रामेसमुपस्थितम् अन्वधावन्नभिक्रुद्धाविविधायुधपाणयः ६१ अथतान्प्रद्रुतान्दृष्ट्वाशंखचक्रगदाधरः वि
व्याधसर्वगात्रेषुशरैराशीविषोपमैः ६२ तेनाहतास्तेशतशोदानवानिधनंगताः एकांगोदानवःस्थित्वायुयुध्यमानोमुहुर्मुहुः ६३ तस्यो
परिहृषीकेशोयद्यदायुधमुत्सृजत् पुष्पवत्तंसमभ्येतिकुंठितंतस्यतेजसा ६४ शस्त्रास्त्रैर्विध्यमानोपियदाजेतुंनशक्यते युयोध
चतदाक्रुद्धोबाहुभिःपरिघोपमैः ६५ बाहुयुद्धंकृतंतेनदिव्यवर्षसहस्रकं तेनश्रांतःसभगवान्गतोबदरिकाश्रमम् ६६ तत्रहैमव
तीनाम्नीगुहापरमशोभना तांप्रविश्यमहायोगीशयनार्थंजगत्पतिः ६७ योजनद्वादशायामाएकद्वाराधनंजय अहंतत्रप्रसुप्तोस्मि
भयभीतोनसंशयः ६८ महायुद्धेनतेनैवश्रांतोहंपांडुनंदन दानवःपृष्ठतोलग्नःप्रविवेशसतांगुहाम् ६९ प्रसुप्तंमांतदादृष्ट्वाचिंतयद्दा
नवोहृदि हरिमेनंहनिष्येहंदानवानांक्षयावहम् ७० एवंकृतदुर्मतेस्तस्यव्यवसायंव्यवस्यच समुद्भूताममांगेभ्यःकन्यैकाचमहाप्रभा

७१ दिव्यप्रहरणादेवीयुद्धायसमुपस्थिता ईक्षितादानवेंद्रेण मरुणापांडुदन ७२ युद्धंसमाहितंतेनस्त्रियातत्रप्रयाचितम् तेना
युध्यतसानित्यंतां दृष्ट्वाविस्मयंगतः ७३ केनेयंनिर्मितारौद्राभस्रूयाशनिपातिनी इत्युक्त्वादानवेंद्रोसौयुयुधेकन्ययातया ७४ तत
स्तयामहादेव्यात्वरयादानवोबली छित्वासर्वाणिशस्त्राणिक्षणेनविरथः कृतः ७५ बाहुप्रहरणोपेतोधावमानोमहाबलात् तले-
नाहत्यहृदयेतयादेव्यानिपातितः ७६ पुनरुत्थायसोधावत्कन्याहननकांक्षया दानवंपुनरायांतंरोषेणाहत्यतच्छिरः ७७ क्षणान्नि
पातयामासभूमौतच्चसमज्वलत् दैत्यःकृत्तशिराःसोथययौवैवस्वतालयम् ७८ शेषाभयार्दितादीनाःपातालंविविशुर्द्विषः ततः
समुत्थितोदेवःपुरोदृष्ट्वासुरंहतं ७९ कन्यांपुरस्थितांचापिकृतांजलिपुटांनताम् विस्मयोत्फुल्लनयनःप्रोवाचजगतांपतिः ८० केना
यंनिहतःसंख्येदानवोदुष्टमानसः येनदेवाःसगंधर्वाःसेंद्राश्चसमरुद्गणाः ८१ सनागाःसहलोकेशालीलयैवविनिर्जिताः येनाहं-
निर्जितोभूत्वाभीतःसुप्तोगुहामिमाम् ८२ केनकारुण्यभावेनरक्षितोहंपलायितः कन्योवाच मयाविनिर्हतोदैत्यस्त्वदंशो
द्भूतयाप्रभो ८३ दृष्ट्वासुप्तंहरेत्वांतुयतोहंतुंसमुद्यतः त्रैलोक्यकंटस्येत्थंव्यवसायंप्रबुध्यच ८४ हतोमयादुरात्मासौदेवतानिर्भयाः
कृताः नवैवाहंमहाशक्तिःसर्वशत्रुभयंकरी ८५ त्रैलोक्यरक्षणार्थायहतोलोकभयंकरः निहतंदानवंदृष्ट्वाकिमाश्चर्यंवदप्रभो ८६
श्रीभगवानुवाच निहतेदानवेंद्रेस्मिन्संतुष्टोहंतवानघे हृष्टाःपुष्टाश्चवैदेवाआनंदःसमजायत ८७ आनंदस्त्रिषुलोकेषु
देवानांयस्त्वयाकृतः प्रसन्नोस्म्यनघेतुभ्यंवरंवरयसुव्रते ८८ ददामितंनसंदेहोयत्सुरैरपिदुर्लभम् कन्योवाच यदितु-
ष्टोसिमेदेवयदिदेयोवरोमम ८९ तारयेहंमहापापादुपवासपरंनरं उपवासस्ययत्पुण्यंतस्यार्द्धंनक्तभोजने ९० तदर्द्धंचभवेत्तस्य
एकभुक्तंकरोतियः यःकरोतिव्रतंभक्त्यादिनेममजितेंद्रियः ९१ सगत्वावैष्णवंस्थानंकल्पकोटिशतानिच भुंजानोविविधान्भो-
गानुपवासीजितेंद्रियः ९२ भगवंस्त्वत्प्रसादेनभवत्वेषवरोमम उपवासंचनक्तंचएकभुक्तंकरोतियः तस्यधर्मंचवित्तंचमोक्षंदे-
हिजनार्दन ९३ श्रीभगवानुवाच यत्त्वंवदसिकल्याणितत्सर्वंचभविष्यति ममभक्ताश्चयेलोकास्तवभक्ताश्चयेनराः ९४

त्रिषुलोकेषुविख्याताःप्राप्स्यंतिममसन्निधिम् एकादश्यांसमुत्पन्नाममभक्तिःपरायतः ९५ अतएकादशीत्येवंतवनामभविष्यति द
ग्ध्वापापानिसर्वाणिदास्यामिपदमव्ययं ९६ तृतीयाचाष्टमीचैवनवमीचचतुर्दशी एकादशीविशेषेणतिथयोमेमहाप्रियाः ९७ सर्व
तीर्थाधिकंपुण्यंसर्वदानाधिकंफलं सर्वव्रताधिकंचैवसत्यंसत्यंवदामिते ९८ एवंदत्वावरंतस्यास्तत्रैवांतरधीयत हृष्टातुष्टातुसा
जातानदाएकादशीतिथिः ९९ इमामेकादशींपार्थकरिष्यंतिनराश्चये तेषांशत्रुंहनिष्यामिदास्यामिपरमांगतिम् १०० अन्येपिये
करिष्यंतिएकादश्यामहाव्रतम् हरामितेषांविघ्नांश्चसर्वसिद्धिंददामिच १ एवमुक्तासमुत्पत्तिरेकादश्याःपृथासुत इयमेकादशी
नित्यासर्वपापक्षयंकरी २ एकैवचमहापुण्यासर्वपापनिषूदनी उदितासर्वलोकेषुसर्वसिद्धिकरीतिथिः ३ शुक्लावाप्यथवाकृष्णा
इतिभेदंनकारयेत् कर्त्तव्येउभयेपार्थनतुल्याद्वादशीतिथिः ४ अंतरंनैवकर्तव्यंसमस्तैर्व्रतकारिभिः तिथिरेकाभवेत्सर्वा प
क्षयोरुभयोरपि ५ एकादशीतुसंपूर्णाप्रभातेघटिकायदि सातिथिःपरिहर्तव्याउपोष्याद्वादशीतदा ६ एवंविधामयाप्रोक्ता
पक्षयोरुभयोरपि उपवासंप्रकुर्वंतिएकादश्यांनराश्चये ७ तेयांतिपरमंस्थानंयत्रास्तेगरुडध्वजः धन्यास्तेमानवालोकेविष्णुभ
क्तिपरायणाः ८ एकादश्यास्तुमाहात्म्यंसर्वलोकेषुयःपठेत् अश्वमेधस्ययत्पुण्यंतदाप्नोतिनसंशयः ९ एकादश्यांनिराहा
रःस्थित्वाचाहंपरेहनि भोक्ष्यामिपुंडरीकाक्षशरणंमेभवाच्युत १० इत्युच्चार्यततोविद्वान्पुष्पांजलिमथार्पयेत् अष्टाक्षरेण
मंत्रेणत्रिर्जप्तेनाभिमंत्रितम् ११ उपवासफलप्रेप्सुःपिबेत्पात्रगतंजलम् दिवानिद्रांपरान्नंचपुनर्भोजनमैथुने १२ क्षौद्रंकांस्या
मिषंतैलंद्वादश्यामष्टवर्जयेत् असंभाष्यांहिसंभाष्यभक्षयेत्तुलसीदलम् १३ आमलक्याःफलंवापिपारणेभक्ष्यशुद्ध्यति
आमध्यान्हाच्चराजेंद्रद्वादश्यामरुणोदये १४ स्नानार्चनक्रियाःकार्यादानहोमादिसंयुताः संकटेविषमेप्राप्तेद्वादश्यांपारणंकथ
म् १५ अद्भिस्तुपारणंकुर्यात्पुनर्भुक्तंनदोषकृत् यःशृणोतिदिवारात्रौनरोविष्णुपरायणः १६ तद्भक्तमुखनिष्पन्नांकथांविष्णोः
सुमंगलां कल्पकोटिसमायुक्तोविष्णुलोकेमहीयते १७ एकादश्याश्चमाहात्म्यंपादमेकंशृणोतियः ब्रह्महत्यादिकंपापंनश्यतेनात्रसं

शयः १८ विष्णुधर्मसमंनास्तिव्रतंनामसनातनं १९ इतिश्रीभविष्यो० श्रीकृष्णार्जुनसंवादेमार्गशीर्षकृष्णैकादशीमाहात्म्यंसंपू
र्णम् अथमार्गशीर्षशुक्लैकादशीकथा युधिष्ठिरउवाच वंदेविष्णुंप्रभुंसाक्षाल्लोकत्रयसुखप्रदम् विश्वेशंविश्वकर्तारंपु
राणंपुरुषोत्तमं १ पृच्छामिदेवदेवेशसंशयोस्तिमहान्मम लोकानांतुहितार्थायपापानांचक्षयायच २ मार्गशीर्षेसितेपक्षेकिंनामैका
दशीभवेत् कीदृशश्चविधिस्तस्याःकोदेवस्तत्रपूज्यते ३ एतदाचक्ष्वमेस्वामिन्विस्तरेणयथातथं श्रीकृष्णउवाच सम्यक्पृ
ष्टंत्वयाराजन्साधुतेविपुलंयशः ४ कथयिष्यामिराजेंद्रहरिवासरमुत्तमम् उत्पन्नासासितेपक्षेद्वादशीममवल्लभा ५ मार्गशी
र्षेसमुत्पन्नाममदेहान्नराधिप मुरस्यचवधार्थायप्रख्यानाममवल्लभा ६ कथितासामयाचैवत्वदग्रेराजसत्तम पूर्वमेकादशीरा
जन्त्रैलोक्येसचराचरे ७ मार्गशीर्षेसितेपक्षेचोत्पत्तिरितिनामतः अतःपरंप्रवक्ष्यामिमार्गशीर्षसितांतथा ८ तस्याःश्रवणमात्रे
णवाजपेयफलंलभेत् मोक्षानाम्नीतिविख्यातासर्वपापहरापरा ९ देवंदामोदरंतस्यांपूजयेच्चप्रयत्नतः तत्रापिपूजनंचैवगीतनृ
त्यैःसुमंगलैः १० शृणुराजेंद्रवक्ष्यामिकथांपौराणिकींशुभां अधोगतिंगतायेवैपितृमातृसुतादयः ११ अस्याःपुण्यप्रभावेनस्वर्गं
यांतिनसंशयः एतस्मात्कारणाद्राजन्महिमानंशृणुष्वतम् १२ पुरावैनगरेरम्येगोकुलेन्यवसन्नृपः वैखानसेतिराजर्षिःपुत्रवत्सा
लयन्प्रजाः १३ द्विजांश्चन्यवसंस्तत्रचतुर्वेदपरायणान् एवंसराज्यंकुर्वाणोरात्रौतुस्वप्नमध्यतः १४ ददर्शजनकंस्वंतुअधोयोनि
गतंनृपः एवंदृष्ट्वातुतंतत्रविस्मयोत्फुल्ललोचनः १५ कथयामासवृत्तांतंद्विजाग्रेस्वप्नसंभवम् राजोवाच मयातुस्वपिताहृ
ष्टोनरकेपतितोद्विजाः तारयस्वेतिमांतातअधोयोगिगतंसुत १६ इतिब्रुवाणःसतदामयादृष्टःपितास्वयम् तदाप्रभृतिभोविप्रा
नाहंशर्मलभाम्यहो १७ एतद्राज्यंममहदसह्यमसुखंतथा अश्वागजारथाश्चैवनमांरोचंतिसर्वथा १८ नशोकोपिसुखाये
तिनकिंचित्सुखदंमम नदारानसुतामह्यंरोचंतिद्विजसत्तमाः १९ किंकरोमिक्वगच्छामिशरीरंमेतुदह्यते दानंव्रतंतपोयोगोयेनै
वममपूर्वजाः २० मोक्षमायांतिविप्रेंद्रास्तदेवकथयंतुमे किंतेनजीवतालोकेसुपुत्रेणबलीयसा २१ पितातुयस्यनरकेतस्यज-

न्मनिरर्थकम् ब्राह्मणाऊचुः पर्वतस्यमुनेरत्रआश्रमोनिकटेनृप २२ गम्यतांराजशार्दूलभूतंभव्यंविजानतः तेषांश्रुत्वाततोवाक्यं
वैखानोराजसत्तमः २३ जगामतत्रयत्रासावाश्रमेपर्वतोमुनिः ब्रह्मार्णैर्वेष्टितःशांतैःप्रजाभिश्चसमंततः २४ आश्रमोविपुलस्तस्य-
मुनिभिःसन्निषेवितः ऋग्वेदिभिर्याजुषैश्चसामाथर्वणकोविदैः २५ वेष्टितोमुनिभिस्तत्रद्वितीयइवपद्मजः दृष्ट्वातंमुनिशार्दूलं
राजावैखानसस्तदा २६ जगामचावनिंमूर्ध्नादंडवत्प्रणनामच पप्रच्छकुशलंतस्यसप्तस्वंगेष्वसोमुनिः २७ राज्येनिःकंटकत्वं
चराज्यंसौख्यसमन्वितं राजोवाच प्रसादात्कुशलंविप्रअंगेषुममसप्तसु २८ विभवेष्वनुकूलेषुकश्चिद्विघ्नउपस्थितः एतं
मेसंशयंब्रह्मन्प्रष्टुंत्वांचसमागतः २९ एवंश्रुत्वानृपवचःपर्वतोमुनिसत्तमः ध्यानस्तिमितनेत्रोसौभूतंभव्यंविचिंतयन् ३० मुहूर्तमे
कंध्यात्वाचप्रत्युवाचनृपोत्तमं मुनिरुवाच जानेहंतवराजेंद्रपितुःपापंविकर्मणः ३१ पूर्वजन्मनितेपित्रासपत्नीकृतद्वेषतः कामासक्तेन
चैकत्रऋतुभंगःकृतस्त्रियः ३२ त्राहिदेहीतिजल्पंत्याऋतुदानंनराधिप तेनचैतवपित्रातुनदत्तोऋतुराग्रहात् ३३ कर्मणा
तेनसततंनरकेपतितोह्ययम् राजोवाच केनवैव्रतदानेनमोक्षस्तस्यभवेन्मुने ३४ निरयात्पापसंयुक्तात्तन्ममाचक्ष्वपृच्छतः
मुनिरुवाच मार्गशीर्षेसितेपक्षेमोक्षानाम्नीहरेस्तिथिः ३५ सर्वैस्तैनव्रतंकृत्वापित्रेपुण्यंप्रदीयताम् तस्याःपुण्यप्रभावेनमोक्ष
स्तस्यभविष्यति ३६ मुनेर्वाक्यंततःश्रुत्वानृपःस्वगृहमागतः आग्रहायणिकींकृच्छ्रात्प्राप्तोभरतसत्तम ३७ अंतःपुरचरैःसर्वैःपुत्रै
र्दारैस्तथानृपः व्रतंकृत्वाविधानेनपुण्यंदत्वानृपायतत् ३८ तस्मिन्दत्तेतदापुण्येपुष्पवृष्टिरभूद्दिवः वैखानसपितातेनगतःस्वर्गं
स्तुतोगणैः ३९ राजानमंतरिक्षाच्चशुभांगिरमभाषत स्वस्त्यस्तुतेपुत्रसदेत्युक्त्वासत्रिदिवंगतः ४० एवंयःकुरुतेराजन्मोक्षामेका
दशीमिमाम् तस्यपापंक्षयंयातिमृतोमोक्षमवाप्नुयात् ४१ नान्यापरतराकाचिन्मोक्षदाविमलाशुभा॥ पुण्यसंख्यांतुराजेंद्र
नजानेहंतुयैःकृता ४२ पठनाच्छ्रवणात्तस्यावाजपेयफलंलभेत् चिंतामणिसमाह्येषास्वर्गमोक्षप्रदायिनी ४३ इतिश्रीब्रह्मांड
पुराणेमार्गशीर्षशुक्लैकादश्यांमोक्षानाम्न्यामाहात्म्यंसमाप्तम् अथपौषकृष्णैकादशीकथा युधिष्ठिरउवाच पौषस्यकृष्णा

पक्षेतु द्वादशीयाभवेत्प्रभो किंनामकोविधिस्तस्याः कोदेवस्तत्रपूज्यते १ एतदाचक्ष्वमेस्वामिन्विस्तरेणजनार्दन श्रीकृष्णउवाच क
थयिष्यामिराजेंद्र भवतः स्नेहकारणात् २ नयातुष्टिर्नमेराजन्क्रतुभिश्चाप्तदक्षिणैः यथातुष्टिर्भवेन्मह्यमेकादश्याव्रतेनवै ३ तस्मात्स
र्वप्रयत्नेन कर्तव्योहरिवासरः पौषस्यकृष्णपक्षेतु द्वादशीयाभवेन्नृप ४ तस्याश्चैवचमाहात्म्यंशृणुष्वेकाग्रमानसः गदितायाश्च-
वैराजन्एकादश्योभवंतिहि ५ तासामपिहिसर्वासांविकल्पंनैवकारयेत् तथापिह्येकादश्याश्चशृणुराजन्कथानकम् ६ अतःपरं
प्रवक्ष्यामिपौषस्यैकादशींतव लोकानांचहितार्थायकथयिष्येविधिंतव ७ पौषस्यकृष्णपक्षेयासफलानामनामतः नारायणोधि
देवोस्याःपूजयेत्तंप्रयत्नतः ८ पूर्णेनविधिनाराजन्कर्तव्यैकादशीजनैः नागानांचयथाशेषःपक्षिणांगरुडोयथा ९ यथाश्वमे-
धोयज्ञानांनदीनांजान्हवीयथा व्रतानांचतथाराजन्प्रवरैकादशीतिथिः १० तेजनाभरतश्रेष्ठममपूज्याश्चसर्वशः हरिवास
रसंसक्तावर्ततेयेजनाभृशं ११ सफलानामयाप्रोक्तातस्याःपूजाविधिंशृणु फलैर्मांपूजयेत्तत्रकालदेशोद्भवैःशुभैः १२ नारिके
रफलैःशुभ्रैस्तथावैबीजपूरकैः जंबीरैर्दाडिमैश्चैवतथापूगीफलैरपि १३ लवंगैर्विविधैश्चान्यैस्तथाचाम्रफलादिभिः पूजयेद्दे
वदेवेशंधूपैर्दीपैर्यथाक्रमम् १४ सफलायांदीपदानंविशेषेणप्रकीर्तितं रात्रौजागरणंतत्रकर्तव्यंचप्रयत्नतः १५ यावदुन्मील
येन्नेत्रंतावज्जागर्तियोनिशि एकाग्रमानसोभूत्वातस्यपुण्यंशृणुष्वतत् १६ तत्समोनास्तिवैयज्ञस्तीर्थंतत्सदृशंनहि तत्सम
न्नव्रतंकिंचिदिहलोकेनराधिप १७ पंचवर्षसहस्राणितपस्तप्त्वाचयत्फलम् तत्फलंसमवाप्नोतिसफलायाव्रतेनवै १८ श्रूय
तांराजशार्दूलसफलायाःकथानकम् चंपावतीतिविख्यातापुरीमाहिष्मतस्यच १९ माहिष्मतस्यराजर्षेश्चत्वारश्चाभवन्सु-
ताः तेषांमध्येतुयःश्रेष्ठःसमहापापसंयुतः २० परदाराभिगामीचवेश्यासंगरतःसदा पितुर्द्रव्यंसपापिष्ठोगमयामाससर्वशः
२१ असद्वृत्तिरतोनित्यंदेवताद्विजनिंदकः वैष्णवानांचदेवानांनित्यंनिंदारतःसवै २२ ईदृग्विधंतदादृष्ट्वापुत्रंमाहिष्मतोनृ
पः लुंपकोनामनाम्नेतिकृतवानत्यमर्षितः २३ राज्यान्निष्काशितस्तेनपित्राचैवापिबंधुभिः परिवारजनैःसर्वैस्त्यक्तोराज्ञोप

यादिति २४ लुंपकोपितदात्यक्तश्चिंतयामासह्येकलः मयात्रकिंप्रकर्तव्यंत्यक्तःपित्राचबांधवैः २५ इतिचिंतापरोभूत्वामतिंपापेतदा
करोत् मयानुगमनंकार्यंवनेत्यक्त्वापुरंपितुः २६ तस्माद्धनासितुःसर्वंव्यापयिष्येपुरंनिशि दिवावनेचरिष्यामिरात्रावपिपितुःपुरम्
२७ इत्येवंसमतिंकृत्वालुंपकोदैवपातितः निर्जगामपुरात्तस्माद्गतोसौगहनंवनम् २८ जीवघातकरोनित्यंनित्यंस्तेयपरायणः स
र्वंचनगरंतेनमुषितंपापकर्मणा २९ गृहीतश्चपरित्यक्तोराज्ञोमाहिष्मतेर्भयात् जन्मांतरीयपापेनराज्यभ्रष्टःसपापकृत् ३० आ-
मिषाभिरतोनित्यंनित्यंवैफलभक्षकः आश्रमस्तस्यदुष्टस्यवासुदेवस्यसंमतः ३१ अश्वत्थोवर्तनेतत्रजीर्णोबहुलवार्षिकः देव-
त्वंतस्यवृक्षस्यवर्तनेतद्वनेमहत् ३२ तत्रैवनिवसंश्चासौलुंपकःपापबुद्धिमान् एवंकालक्रमेणैववसतस्तस्यपापिनः ३३ दुष्क-
र्मनिरतस्यास्यकुर्वतःकर्मनिंदितम् पौषस्यकृष्णपक्षेतुपूर्वाण्हेसफलादिने ३४ दशमीदिवसेराजन्निशायांशीतपीडितः लुंप
कोवस्त्रहीनोवैनिश्चेष्टोह्यभवत्तदा ३५ पीड्यमानस्तुशीतेनअश्वत्थस्यसमीपगः ननिद्रानसुखंतस्यगतप्राणइवाभवत् ३६
पीडयन्दशनैर्दंतानेवंचगमितानिशा भानूदयेपितस्याथनसंज्ञासमजायत ३७ लुंपकोगतसंज्ञस्तुसफलादिवसेतदा मध्या
न्हसमयेप्राप्तेसंज्ञांलेभेसलुंपकः ३८ प्राप्तसंज्ञोमूहूर्तेनच्चोत्थितोसौतदासनात् प्रस्खलंश्चपदन्यासैःपंगुवच्चलितोमुहुः ३९
वनमध्येगतस्तत्रक्षुत्तृषापीडितोभवत् नशक्तिर्जीवघातस्यलुंपकस्यदुरात्मनः ४० फलानिभूमौपतितान्याजहारसलुंपकः याव
त्तत्रागतस्तत्रतावदस्तमगाद्रविः ४१ किंभविष्यतितातेतिविललापातिदुःखितः फलानितानिसर्वाणिवृक्षमूलेन्यवेदयत् ४२ प्र
भुवाचफलैरेभिःप्रीयतांभगवान्हरिः उपविष्टोलुंपकश्चनिद्रांलेभेनवैनिशि ४३ तेनजागरणंजातंभगवान्मधुसूदनः फलानांपू
जनंमेनेसफलायास्तथाव्रतम् ४४ कृतमेवंलुंपकेनह्यकस्माद्व्रतमुत्तमं तेनव्रतप्रभावेनप्राप्तंराज्यमकंटकं ४५ पुण्यांकुरोदया-
द्राजन्यथाप्राप्तंतथाशृणु रवेरुदयवेलायांदिव्योश्वश्चाजगामह ४६ दिव्यवस्तुपरीवारोलुंपकस्यसमीपतः तस्थौसतुरगोराज
न्वागुवाचाशरीरिणी ४७ प्राप्नुहित्वंनृपसुतस्वराज्यंहतकंटकम् वासुदेवप्रसादेनसफलायाःप्रभावतः ४८ पितुःसमीपंगच्छ

त्वंभुंक्ष्वराज्यमकंटकं तथेत्युक्त्वासौतत्रदिव्यरूपधरोभवत् ४९ कृष्णेमतिश्चतस्यासीत्सरमावैष्णवीतथा दिव्याभरणशोभाढ्यस्तातंनत्वास्थितोगृहे ५० वैष्णवायततोदत्तंपित्राराज्यमकंटकम् कृतंराज्यंतुतेनैववर्षाणिसुबहून्यपि ५१ हरिवासरसंलीनोविष्णुभक्तिरतःसदा मनोज्ञास्तस्यपुत्राःस्युर्दाराःकृष्णप्रसादतः ५२ ततःसर्वाधिकेराज्येप्राप्तेपुत्रंनिवेश्यच वनंगतःसंयतात्माविष्णुभक्तिपरायणः ५३ साधयित्वातथात्मानंविष्णुलोकंजगामह गतःकृष्णस्यसान्निध्येयत्रगत्वानशोचति ५४ एवंयेवैप्रकुर्वंतिसफलैकादशीव्रतम् इहलोकेयशःप्राप्यमोक्षंयास्यंत्यसंशयः ५५ धन्यास्तेमानवालोकेसफलाव्रतकारिणः अस्मिन्जन्मनितेमोक्षंलभंतेनात्रसंशयः ५६ सफलायाश्चमाहात्म्यश्रवणाद्धिविशांपते राजसूयफलंप्राप्यवसेत्स्वर्गेचमानवः ५७ इतिश्रीपौषकृष्णैकादशीसफलानाम्न्यामाहात्म्यंसंपूर्णम् अथपौषशुक्लैकादशीकथा युधिष्ठिरउवाच कथितावैत्वयाकृष्णसफलैकादशीशुभा कथयस्वप्रसादेनशुक्लापौषस्ययाभवेत् १ किंनामकोविधिस्तस्याःकोदेवस्तत्रपूज्यते कस्मैतुष्टोहृषीकेशस्त्वमेवपुरुषोत्तम २ श्रीकृष्णउवाच शृणुराजन्प्रवक्ष्यामिशुक्लापौषस्ययाभवेत् तस्याविधिंमहाराजन्लोकानांचहितायवै ३ पूर्णेनविधिनाराजन्कर्तव्यैषाप्रयत्नतः पुत्रदेतिचनाम्नासौसर्वपापहरापरा ४ नारायणोधिदेवोस्याःकामदःसिद्धिदायकः नातःपरतराकाचित्त्रैलोक्येसचराचरे ५ शृणुराजन्प्रवक्ष्यामिकथांपापहरांपरां पुरीभद्रावतीनाम्नीराजातत्रसुकेतुमान् ६ तस्यराज्ञोथराज्ञीचशैब्यानाम्नीतिविश्रुता पुत्रहीनेनराज्ञातुकालोनीतोमनोरथैः ७ नैवात्मजंनृपोलेभेवंशकर्तारमेवच तेनैवराज्ञाधर्मेणचिंतितंबहुकालतः ८ किंकरोमिक्वगच्छामिसुतप्राप्तिःकथंभवेत् नराष्ट्रेनपुरेसौख्यंलेभेराजासुकेतुमान् शैब्ययाकांतयासार्द्धंप्रत्यहंदुःखितोभवत् ९ तावुभौदंपतीनित्यंचिंताशोकपरायणौ पितरस्तुजलंदत्तंकवोष्णमुपभुंजते १० राज्ञःपश्चान्नपश्यामोयोस्मान्संतर्पयिष्यति इत्येवंसंस्मरंतोस्यपितरोदुःखिनोऽभवन् ११ तेषांतुदुःखमूलंचज्ञात्वाराजाप्यतप्यत नबांधवानमित्राणिनामात्याःसुहृदस्तथा १२ रोचंतेतस्यभूपस्यनगजाश्वपदातयः नैराश्यंभू

पनेस्तस्यमनस्येवमजायत १३ नरस्यपुत्रहीनस्यनास्तिवैजन्मनःफलम् अपुत्रस्यगृहंशून्यंहृदयंदुःखितंसदा १४ पितृदेवम-
नुष्याणांनानृणित्वंसुतंविना तस्मात्सर्वप्रयत्नेनसुतमुत्पादयेन्नरः १५ इहलोकेयशस्तेषांपरलोकेशुभागतिः येषांतुकर्मकर्तृ-
णांपुण्यंजन्मशतोद्भवम् १६ आयुरारोग्यसंपत्तिस्तेषांगेहेप्रवर्तते पुत्राःपौत्राश्चलोकाश्चभवेयुःपुण्यकर्मणाम् १७ पुण्यंविना
नचप्राप्तिर्विष्णुभक्तिंविनातथा पुत्राणांसंपदोवापिविद्यायाश्चेतिमेमतिः १८ एवंचिंतयमानोसौराजाशर्मनलब्धवान् प्रत्यू
षेचिंतयद्राजानिशीथेचिंतयत्तथा १९ ततश्चात्मविनाशंवैविचार्याथसुकेतुमान् आत्मघातेदुर्गतिंचचिंतयित्वातदानृपः २०
दृष्ट्वात्मदेहंप्रक्षीणमपुत्रत्वंतथैवच पुनर्विचार्यात्मबुध्यास्वात्मनोहितकारणं २१ अश्वारूढस्ततोराजाजगामगहनंवनम् पु
रोहितादयःसर्वेनजानंतिगतंनृपम् २२ गंभीरेविपिनेराजामृगपक्षिनिषेविते विचचारतदातस्मिन्वनवृक्षान्विलोकयन्
२३ वटानश्वत्थबिल्वांश्चखर्जूरान्पनसांस्तथा बकुलांश्चसदापर्णान्तिंदुलांस्तिलकानपि २४ शालांस्तालांस्तमालांश्चददर्श
सरलान्नृपः इंगुदीककुभांश्चैवश्लेष्मातकबिभीतकान् २५ शल्लकीकरमर्दांश्चपाटलान्खदिरानपि शाकांश्चैवपलाशांश्चशो
भितान्ददृशेपुनः २६ मृगव्याघ्रवराहांश्चसिंहान्शाखामृगानपि ददर्शभुजगान्राजावल्मीकादभिनिःसृतान् २७ तथावनगजा
न्मत्तान्कलभैःसहसंगतान् यूथपांश्चचतुर्दंतान्करिणीगणमध्यगान् २९ तान्दृष्ट्वाचिंतयामासस्वात्मनःसगजान्नृपः तेषांसवि
चरन्मध्येराजाशोकमवापह ३० महदाश्चर्यसंयुक्तंददर्शविपिनंनृपः क्वचिच्छिवारुतंशृण्वन्नुलूकविरुतंतथा ३१ तांस्तान्पक्षि
गणान्पश्यन्बभ्रामवनमध्यगः एवंददर्शगहनंनृपोमध्यंगतेरवौ ३२ क्षुत्तृड्भ्यांपीडितोराजाइतश्चेतश्चधावति चिंतयामास
नृपतिःसंशुष्कगलकंधरः ३३ मयातुकिंकृतंकर्मप्राप्तंदुःखंयदीदृशम् मयावैतोषितादेवायज्ञेपूजाभिरेवच ३४ तथैवब्राह्मणा
दानैस्तोषितामिष्टभोजनैः प्रजाश्चैवयथाकालंपुत्रवत्परिपालिताः ३५ कस्माद्दुखंमयाप्राप्तमीदृशंदारुणंमहत् इतिचिंताप
रोराजाजगामाथाग्रतोवनम् ३६ सुकृतस्यप्रभावेनसरोदृष्टंमनोरमं मानसंस्पर्धमानंचपद्मिनीपरिशोभितम् ३७ कारंडवैश्च

क्रवाकैराजहंसैश्चनादितम् मकरैर्बहुभिर्युक्तमन्यैर्जलचरैर्युतम् ३८ समीपेसरसस्तत्रमुनीनामाश्रयान्बहून् ददर्शराजाल
क्ष्मीवान्निमित्तैःशुभसंसिभिः ३९ सव्यात्परतरंचक्षुःप्रास्फुरच्चतथाकरः स्फुरितैस्तस्यराज्ञश्चशंसितंशुभलक्षणं ४० तस्यती-
रेमुनीन्दृष्ट्वाकुर्वाणान्नैगमंजपम् अवतीर्यहयात्तस्मान्मुनीनामग्रतःस्थितः ४१ पृथक्पृथक्ववंदेसमुनींस्तान्शंसितव्रतान् कृ-
तांजलिपुटोभूत्वादंडवच्चप्रणम्यसः ४२ हर्षेणमहताविष्टोबभूवनृपसत्तमः तमूचुस्तेपिमुनयःप्रसन्नास्मोवयंतव ४३ कथयस्वा
द्यवैराजन्यत्तेमनसिवर्तते राजोवाच केयूयमुग्रतपसःकिमाख्याभवतामपि ४४ किमर्थमागतायूयंवदंतुममतत्वतः मु
नयऊचुः विश्वेदेवावयंराजन्स्नानार्थमिहचागताः ४५ माघोनिकटमायातएतस्मात्पंचमेहनि अद्यत्वेकादशीराजन्पुत्र
दानामनामतः ४६ पुत्रंददात्यसौशुक्लापुत्रदापुत्रमिच्छताम् राजोवाच एषवैसंशयोमह्यंकृतस्योत्पादनेमहान् ४७ यदि
तुष्टाभवंतोमेपुत्रोवैदीयतांतदा मुनयऊचुः अस्मिन्नेवदिनेराजन्पुत्रदानामवर्तते ४८ एकादशीतिविख्याताक्रियतांव्रतमु
त्तमम् आशीर्वादेनचास्माकंकेशवस्यप्रसादतः ४९ अवश्यंतवराजेंद्रपुत्रप्राप्तिर्भविष्यति इत्येववचनात्तेषांकृतंराज्ञांव्रतंशु
भम् ५० द्वादश्यांपारणंकृत्वामुनीन्नत्वापुनःपुनः आजगामगृहंराजाराज्ञीगर्भंसमादधौ ५१ मुनीनांवचनेनैवपुत्रदायाःप्रसा
दतः पुत्रोजातस्तथाकालेतेजस्वीपुण्यकर्मकृत् ५२ पितरंतोषयामासप्रजापालोबभूवसः एतस्मात्कारणाद्राजन्कर्तव्यंपुत्रदा
व्रतम् ५३ लोकानांचहितार्थायतवाग्रेकथितंमया एतद्व्रतंतुयेमर्त्याःकुर्वंतिपुत्रदाभिधम् ५४ तेषांचैवभवेत्पुत्रोह्यवश्यंमोक्षभा
गिनाम् पठनाच्छ्रवणाद्राजन्नश्वमेधफलंलभेत् ५५ इतिश्रीभविष्योत्तरपुराणेपौषशुक्लैकादशीपुत्रदानाम्न्यामाहात्म्यंसं
पूर्णम् अथमाघकृष्णैकादशीकथा दाल्भ्यउवाच मर्त्यलोकेतुसंप्राप्ताःपापंकुर्वंतिजंतवः ब्रह्महत्यादिपापैश्चह्यन्यै
श्चविविधैर्युताः १ परद्रव्यापहाराश्चपरव्यसनमोहिताः कथंनायांतिनरकान्ब्रह्मंस्तद्ब्रूहितत्वतः २ अनायासेनभगवन्दानेना
ल्पेनकेनचित् पापंप्रशममायातियेनतद्वक्तुमर्हसि ३ गभस्तिरुवाच साधुसाधुमहाभागगुह्यमेतदुदाहृतम् यन्नक-

स्यचिदाख्यानंब्रह्मविष्ण्वींद्रदेवतैः ४ तदहंकथयिष्यामित्वयापृष्टोद्विजोत्तम ततोमाघेतिसंप्राप्तेशुचिःस्नातोजितेंद्रियः ५ कामक्रो-
धाभिमानेर्ष्यालोभपैशून्यवर्जितः देवदेवंचसंस्मृत्यपादौप्रक्षाल्यवारिणा ६ भूमावपतितंग्राह्यंगोमयंतत्रमानवः तिलान्प्रक्षिप्य-
कार्पासपिंडकांश्चैवकारयेत् ७ अष्टोत्तरशतंचैवनात्रकार्याविचारणा ततोमाघेचसंप्राप्तेह्यादौचैवभवेद्यदि ८ मूलेनाकृष्णपक्ष-
स्यैकादश्यांनियमंततः गृह्णीयात्पुण्यफलदंविधानंतत्रमेशृणु ९ देवदेवंसमभ्यर्च्यसुस्नातःप्रयतःशुचिः कृष्णनामानिसंकीर्त्यक्षु-
तज्जृंभासुसर्वदा १० रात्रौजागरणंकुर्याद्रात्रौहोमंचकारयेत् अर्चयेद्देवदेवेशंशंखचक्रगदाधरं ११ चंदनागरुकर्पूरैर्नैवेद्यंकृसरंत
या संस्मृत्यनाम्नाचततःकृष्णाख्येनपुनःपुनः १२ कूष्मांडैर्नारिकेरैश्चह्यथवाबीजपूरकैः सर्वाभावेपिविप्रेंद्रशस्तंपूगीफलंतथा १३
अर्घ्यंदत्वाविधानेनपूजयित्वाजनार्दनम् कृष्णाकृष्णाकृपालुस्त्वमगतीनांगतिप्रद १४ संसारार्णवमग्नानांप्रसीदपरमेश्वर न-
मस्तेपुंडरीकाक्षनमस्तेविश्वभावन १५ सुब्रह्मण्यनमस्तेस्तुमहापुरुषपूर्वज गृहाणार्घ्यंमयादत्तंलक्ष्म्यासहजगत्पते १६ त-
तस्तुपूजयेद्विप्रमुदकुंभंप्रदापयेत् छत्रोपाहनवस्त्रैश्चकृष्णोमेप्रीयतामिति १७ कृष्णाधेनुःप्रदातव्यायथाशक्त्याद्विजोत्तम
तिलपात्रंद्विजश्रेष्ठदद्यात्तत्रविचक्षणः १८ स्नानप्राशनयोःशस्ताःश्वेताःकृष्णास्तिलामुने तान्प्रदद्यात्प्रयत्नेनयथाशक्त्याद्विजो-
त्तम १९ तावद्वर्षसहस्राणिस्वर्गलोकेमहीयते तिलस्नायीतिलोद्वर्तीतिलहोमीतिलोदकी २० तिलभुक्तिलदाताचषट्तिला
पापनाशकाः नारदउवाच कृष्णाकृष्णमहाबाहोनमस्तेभक्तभावन २१ षट्तिलैकादशीभूतंकीदृशंफलमश्नुते सोपा-
ख्यानंममब्रूहियदितुष्टोसियादव २२ श्रीकृष्णउवाच शृणुब्रह्मन्यथावृत्तंदृष्टंतत्कथयामिते मृत्युलोकेपुराह्यासीद्ब्रा-
ह्मणीतत्रनारद २३ व्रतचर्यारतानित्यंदेवपूजारतासदा मासोपवासनिरताममभक्ताचसर्वदा २४ कृष्णोपवाससंयुक्ताम-
मपूजापरायणा शरीरंक्लेशितंनित्यमुपवासैर्द्विजोत्तम २५ दीनामांब्राह्मणानांचकुमारीणांचभक्तितः गृहादिकंप्रयच्छंती-
सर्वकालंमहामतिः २६ अतिकृच्छ्ररतासातुसर्वकालेषुवैद्विज शुद्धमस्याःशरीरंहिव्रतैःकृच्छ्रैर्नसंशयः २७ अथिनंवैष्णवंलोकं-

कायक्लेशेनवैतथा नदत्तमन्नदानंहियेनतृप्तिःपराभवेत् २८एत ज्ञातंमयाब्रह्मन्मृत्युलोकमुपागतः कापिलंरूपमास्थायभिक्षापा
त्रेणायाचिना २९ ब्राह्मण्युवाच कस्मात्त्वमागतोब्रह्मन्वदयस्मात्समागतः पुनरेवमयाप्रोक्तंदेहिभिक्षांचसुंदरि ३० तयाकोपे
नमहता मृत्पिंडस्ताम्रभाजने क्षिप्तोयावत्तयादेव्यापुनःस्वर्गगतोद्विज ३१ ततःकालेनमहतातापसीसुमहाव्रता कदाचित्स्वर्गमा
याता व्रतचर्याप्रभावतः ३१ मृत्पिंडस्यप्रभावेनगृहंप्राप्तंमनोरमं संजातंनैवविप्रर्षेधान्यकोशविवर्जितं ३३ गृहंयावन्निरीक्षेतन-
किंचित्तत्रपश्यति तावद्गृहाद्विनिष्क्रांताममांतेचागताद्विज ३४ क्रोधेनमहताविष्टाइदंवचनमब्रवीत् मयाव्रतैश्चकृच्छ्रैश्च
त्थुपवासैरनेकशः ३५ पूजयाराधितोदेवःसर्वलोकस्यभावनः नधनंदृश्यतेकिंचिद्गृहेममजनार्दन ३६ ततश्चोक्तामयासातुगृ
हंगच्छयथागतम् आगमिष्यंतिसुतरांकौतूहलसमन्विताः ३७ देवपत्न्यस्त्वद्रष्टुंविस्मयेनसमन्विताः द्वारंनोद्घाटनीयंहि
षट्तिलापुण्यवाचनात् ३८ एवमुक्त्वागतासातुयदावैमानुषीतदा अत्रांतरेसमायातादेवपत्न्यश्चनारद ३९ ताभिश्चकथितंतत
त्रत्वांद्रष्टुंहिसमागताः द्वारमुद्घाटयत्वंनपश्यामस्त्वांशुभानने ४० मानुष्युवाच यदिद्रष्टुंमयाकार्यंसत्यंवाच्यंविशेषतः ष
ट्तिलावदतपुण्यंद्वारोद्घाटनकारणात् ४१ एकापितत्रनवदत्षट्तिलाव्रतनाशतः अन्ययाकथितंतत्रद्रष्टव्यामानुषीमया ४२
ततोद्वारंसमुद्घाट्यदृष्टाताभिश्चमानुषी नदेवीनचगंधर्वीनासुरीनचपन्नगी ४३ दृष्टापूर्वंतयानारीईदृशीसाद्विजर्षभ रूपकां
तिसमायुक्ताक्षणेनसमपद्यत ४४ धनंधान्यंचवस्त्रादिस्वर्णरौप्यमेवच सर्वंभवनसंपन्नंषट्तिलायाःप्रसादतः ४५ अतितृष्णा
नकर्तव्यावित्तशाठ्यंविवर्जयेत् आत्मवित्तानुसारेणतिलान्वस्त्रादिदापयेत् ४६ लभतेचैवमारोग्यंततोजन्मनिजन्मनि दारिद्र्यंन
चकष्टंवैनचदौर्भाग्यमेवच ४७ नभवेद्वैद्विजश्रेष्ठषट्तिलायामुपोषणात् अनेनविधिनाराजन्तिलदानान्नसंशयः ४८मुच्य
तेपातकैःसर्वैर्नात्रकार्याविचारणा दानंचविधिनासम्यक्सर्वपापप्रणाशनम् नानर्थःकश्चिन्नायासःशरीरेमुनिसत्तम ५०
इतिश्रीभविष्योत्तरपुराणेमाघकृष्णैकादशीषट्तिलानाम्नीमाहात्म्यंसंपूर्णम् अथमाघशुक्लैकादशीकथा युधिष्ठिरउ०

साधुकृष्णत्वयाप्रोक्ताआदिदेवजगत्पते स्वेदजाअंडजाश्चैवउद्भिजाश्चजरायुजाः १ तेषांकर्ताविकर्ताचपालकःक्षयकारकः मा
घस्यकृष्णपक्षेतुषट्तिलाकथितात्वया २ शुक्लेचैकादशीयाचकथयस्वप्रसादतः किंनामकोविधिस्तस्याः कोदेवःस्तत्रपूज्यते
३ श्रीकृष्णउवाच कथयिष्यामिराजेंद्रशुक्लेमाघस्ययाभवेत् जयानाम्नीतिविख्यातासर्वपापहरापरा ४ पवित्रापापहं
त्रीचपिशाचत्वविनाशिनी नैवतस्याव्रतेचीर्णेप्रेतत्वंजायतेनृणाम् ५ नातःपरतराकाचित्पापघ्नीमोक्षदायिनी एतस्मात्कार
णाद्राजन्कर्तव्येयंप्रयत्नतः ६ श्रूयतांराजशार्दूलकथांपौराणिकिंशुभां पंकजेचपुराणेस्यामहिमाकथितोमया ७ एकदानागलो
केवैइंद्रोराज्यंचकारह देवाश्चतत्रसौख्येननिवसंतिमनोरमे ८ पीयूषपाननिरताह्यप्सरोगणसेविताः नंदनंतुवनंतत्रपारिजातो
पशोभितम् ९ रमंयंतिरमंत्यत्रह्यप्सरोभिर्दिवौकसः एकदारममाणोसौदेवेंद्रःस्वेच्छयानृप १० नर्तयामासहर्षात्सपंचाश
त्कोटिनायिकाः गंधर्वास्तत्रगायंतिगंधर्वःपुष्पदंतकः ११ चित्रसेनश्चतत्रैवचित्रसेनसुतातथा मालिनीतिचनाम्नातुचित्रसेनस्य
कामिनी १२ मालिन्यांतुसमुत्पन्नःपुष्पवानितिनामतः पुष्पदंतस्यपुत्रोवैमाल्यवान्नामनामतः १३ गंधर्वीपुष्पवत्याख्यामाल्यव
त्यतिमोहिता कामस्यचशरैस्तीक्ष्णैर्विद्धांगीसाबभूवह १४ तयाभावकटाक्षैश्चमाल्यवांस्तुवशीकृतः लावण्यरूपसंपन्नातस्या
रूपंनृपशृणु १५ बाहूतस्यास्तुकामेनकंठपाशौकृताविव चंद्रवद्वदनंतस्यानयनेश्रवणायते १६ कर्णौतुशोभितौतस्याःकुंडला
भ्यांनृपोत्तम कंबुग्रीवायुताचैवदिव्याभरणभूषिता १७ पीनोन्नतौकुचौतस्यामुष्टिमात्रंचमध्यमम् नितंबौविपुलौतस्याविस्ती
र्णंजघनस्थलं १८ चरणौशोभमानौतौरक्तोत्पलसमद्युती ईदृश्यापुष्पवत्याचमाल्यवानतिमोहितः १९ शक्रस्यपरितोषाय
नृत्यार्थंतौसमागतौ गायमानौचतौतत्रह्यप्सरोगणसंगतौ २० नशुद्धगानंगायेतांचित्तभ्रमसमन्वितौ बद्धदृष्टीतथान्योन्यं
कामबाणवशंगतौ २१ ज्ञात्वालेखर्षभस्तत्रसंगतंमानसंतयोः तालकालक्रियामानलोपाद्गीतावभंजनात् २२ चिंतयित्वातु
मघवानवज्ञातंतयात्मनः कुपितश्चतयोरित्थंशापंदास्यन्निदंजगौ २३ धिग्वांपापरतौमूढावाज्ञाभंगकरौमम युवांपिशाचौभ

वनांदेपंतीरूपधारिणौ २४ मृत्यल्लोकमनुप्राप्तौभुंजानौकर्मणःफलं एवंमघवनाशापात्तुभौदुःखितमानसौ २५ हिमवंतंगि-
रिंप्राप्ताविंद्रशापविमोहितौ उभौपिशाचतांप्राप्तौदारुणंदुःखमेवच २६ संतप्तमानसौतत्रमहाकृच्छ्रगतावुभौ गंधरसंच-
स्पर्शंचनजानंतौविमोहितौ २७ पीड्यमानौतुदाहेनदेहपातकरेणच तौननिद्रांसुखंप्राप्तौकर्मणातेनपीडितौ २८ परस्परंखा-
दमानौचेरतुर्गिरिगह्वरे पीड्यमानौतुशीतेनतुषारप्रभवेनतौ २९ दंतघर्षप्रकुर्वाणौरोमांचितवपुर्धरौ ऊचेपिशाचःशीता-
र्तःस्वपत्नींतुपिशाचिकाम् ३० किमावाभ्यांकृतंपापमत्यंतंदुःखदायकम् येनप्राप्तंपिशाचत्वंस्वेनदुष्कृतकर्मणा ३१ नर-
कंदारुणंमत्वापिशाचत्वंचगर्हितं तस्मात्सर्वप्रयत्नेनपापंनैवसमाचरेत् ३२ इतिचिंतापरौतत्रस्थ्यास्तांदुःखेनकर्शितौ दैव-
योगात्तयोःप्राप्तामाघस्यैकादशीसिता ३३ जयानाम्नीतिविख्यातातिथीनामुत्तमातिथिः तस्मिन्दिनेतुसंप्राप्तेतावाहार-
विवर्जितौ ३४ आसातेतत्रनृपतेजलपानविवर्जितौ नकृतोजीवघातश्चनपत्रफलभक्षणम् ३५ अश्वत्थस्यसमीपेतुपतितौदुः-
खसंयुतौ रविरस्तंगतोराजन्तथैवास्थितयोस्तयोः ३६ प्राप्ताचैवनिशाघोरादारुणाशीतधारिणी वेपमानौतुतौतत्रहिमेनच-
जडीकृतौ ३७ परस्परेणसंलग्नौगात्रयोर्भुजयोरपि ननिद्रांनरतिंतत्रनचसौख्यमविंदताम् ३८ एवंतौराजशार्दूलशापेनेंद्र-
स्यपीडितौ इत्थंतयोर्दुःखितयोर्निजगामतदानिशा ३९ जयायास्तुव्रतेचीर्णेरात्रौजागरणेकृते तयोर्व्रतप्रभावेनयद्यथासी-
त्तथाशृणु ४० द्वादशीदिवसेप्राप्तेताभ्यांचीर्णेजयाव्रते विष्णोःप्रभावान्नृपतेपिशाचत्वंतयोर्गतं ४१ पुष्पवतीमाल्यवांश्चपू-
र्वरूपौबभूवतुः पुरातनस्नेहयुतौपूर्वालंकारसंयुतौ ४२ विमानमधिरूढौतावप्सरोगणसेवितौ स्तूयमानौतुगंधर्वैस्तुंबरुप्र-
मुखैस्तथा ४३ हावभावसमायुक्तौगतौनाकेमनोरमे देवेंद्रःस्याग्रतोगत्वाप्रणामंचक्रतुर्मुदा ४४ तथाविधौतुतौदृष्ट्वामघवा-
न्विस्मितोऽब्रवीत् इंद्रउवाच वदतंकेनपुण्येनपिशाचत्वंविनिर्गतं ४५ ममशापवशंप्राप्तौकेनदेवेनमोचितौ माल्य-
वानुवाच वासुदेवप्रसादेनजयायाःकृतव्रतेनच ४६ पिशाचत्वंगतंस्वामिन्सत्यंभक्तिप्रभावतः इतिश्रुत्वावचस्तस्यप्रत्युवा

चस्करेश्वरः ४७ पवित्रौपावनौजातौवंदनीयौममापिच हरिवासरकर्तारौविष्णुभक्तिपरायणौ ४८ हरिभक्तिरतायेचशिव
भक्तिरतास्तथा अस्माकमपितेमर्त्याःपूज्यावंद्यानसंशयः ४९ विहरस्वयथासौख्यंपुष्पवत्यासुरालये एतस्मात्कारणाद्रा
जन्कर्तव्योहरिवासरः ५० जयाव्रतंतुराजेंद्रब्रह्महत्यापहारकम् सर्वदानानिदत्तानियज्ञास्तेनकृतानृप ५१ सर्वतीर्थेषुसु
स्नातःकृतंयेनजयाव्रतम् यःकरोतिनरोभक्त्याश्रद्धायुक्तोजयाव्रतम् ५२ कल्पकोटिशतंयावद्वैकुंठेमोदतेध्रुवम् पठना
च्छ्रवणाद्राजन्नग्निष्टोमफलंलभेत् ५३ इतिश्रीभविष्योत्तरपुराणेमाघशुक्लैकादशीजयानाम्न्यामाहात्म्यंसंपूर्णम्
अथफाल्गुनकृष्णैकादशीकथा युधिष्ठिरउवाच फाल्गुनस्यासितेपक्षेकिंनाम्न्येकादशीभवेत् वासुदेवप्रसादेन
कथयस्वममाग्रतः १ श्रीकृष्णउवाच कथयिष्यामिराजेंद्रकृष्णायाफाल्गुनीभवेत् विजयेतिचसाप्रोक्ताकर्तृणांजय
दासदा २ तस्याश्चव्रतमाहात्म्यंसर्वपापहरंपरं नारदःपरिपप्रच्छब्रह्माणंकमलासनम् ३ फाल्गुनस्यासितेपक्षेविजयानाम
यातिथिः तस्याव्रतंसुरश्रेष्ठकथयस्वप्रसादतः ४ इतिपृष्टोनारदेनप्रत्युवाचपितामहः ब्रह्मोवाच शृणुनारदवक्ष्या-
मिकथांपापहरांपराम् ५ यन्नकस्यचिदाख्यातंमयैतद्धिजयाव्रतम् पुरातनंव्रतंह्येतत्पवित्रंपापनाशनं ६ जयंददातिविज
यानृणांचैषनसंशयः रामस्तपोवनंयातोवर्षाण्येवचतुर्दश ७ न्यवसत्पंचवट्यांतुससीतश्चसलक्ष्मणः तत्रैववसतस्त-
स्यराघवस्यमहात्मनः ८ रावणेनहृताभार्यासीतानाम्नीतपस्विनी तेनदुःखेनरामोसौमोहमभ्यागतस्तदा ९ भ्रमंजटायु
षंतत्रददर्शविगतायुषं कबंधोनिहतःपश्चाद्भ्रमतारण्यमध्यतः १० राज्ञेविज्ञाप्यतत्सर्वंसोपिमृत्युवशंगतः सुग्रीवेणसमंस-
ख्यमर्जयंसमजायत ११ वानराणामनीकानिरामार्थंसंगतानिवै ततोहनूमतादृष्टालंकोद्यानेतुजानकी १२ रामसंज्ञापनंत-
स्यैदत्तंकर्ममहत्कृतम् समेत्यरामेणपुनःसर्वंतत्रनिवेदितम् १३ अथश्रुत्वारामचंद्रोवाक्यंचैवहनूमतः सुग्रीवानुमतेनैवप्र-
स्थानेसमरोचयत् १४ सगत्वावानरैःसार्द्धंतीरंनदनदीपतेः दृष्ट्वाब्धिंदुस्तरंरामोविस्मितोभूत्कपिप्रियः १५ प्रोत्फुल्ललोचनो

भूत्वालक्ष्मणोवाक्यमब्रवीत् सौमित्रेकेनपुण्यनतीर्यतेवरुणालयः १६ अगाधसलिलैःपूर्णोनक्रैर्भीमैःरामाकुलः उपायंनैवपश्यामियेनैवसुतरोभवेत् १७ लक्ष्मणउवाच   आदिदेवस्त्वमेवासिपुराणपुरुषोत्तमः बकदाल्भ्योमुनिश्चात्रवर्ततेद्वीपमध्यतः १८ अस्मात्स्थानाद्योजनार्द्धेआश्रमस्तस्यराघव अनेनदृष्टाब्रह्माणोबहवोरघुनंदन १९ तंपृच्छगत्वाराजेंद्रपुराणमृषिपुंगवम् इतिवाक्यंततःश्रुत्वालक्ष्मणस्यातिशोभनम् २० जगामराघवोद्रष्टुंबकदाल्भ्यंमहामुनिं प्रणनाममुनिंमूर्ध्नारामाविष्णुमिवामरः २१ मुनिर्ज्ञात्वाततारामंपुराणपुरुषोत्तमं केनापिकारणेनैवप्रविष्टंमानुषींतनुं २२ उवाचसऋषिस्तत्रकुतोरामतवागमः रामउवाच त्वत्प्रसादादहंविप्रवरुणालयसन्निधिं २३ आगतोस्मिससैन्योत्रलंकांजेतुंसराक्षसाम् भवतश्चानुकूल्येनतीर्यतेब्धिर्यथामया २४ तमुपायंवदमुनेप्रसादंकुरुसुव्रत एतस्मात्कारणादेवद्रष्टुंत्वामहमागतः २५ मुनिरुवा० कथयिष्याम्यहंरामव्रतानामुत्तमंव्रतम् कृतेनयेनसहसाविजयस्तेभविष्यति २६ लंकांजित्वाराक्षसांश्चदीर्घांकीर्तिमवाप्स्यसि एकाग्रमानसोभूत्वाव्रतमेतत्समाचर २७ फाल्गुनस्यासितेपक्षेविजयैकादशीभवेत् तस्याव्रतेकृतेरामविजयस्तेभविष्यति २८ निःसंशयंसमुद्रंचतरिष्यसिसवानरः विधिस्तुश्रूयतारामव्रतस्यास्यफलप्रदः २९ दशमीदिवसप्राप्तेकुंभमेकंचकारयेत् हैमंवाराजतंवापिताम्रंवाप्यथमृन्मयम् ३० स्थापयेच्छोभितंकुंभंजलपूर्वंसपल्लवम् तस्योपरिन्यसेद्देवंहमंनारायणंप्रभुम् ३१ एकादशीदिनेप्राप्तेप्रातःस्नानंसमाचरेत् निश्चलंस्थापयेत्कुंभंगंधमाल्यानुलेपनैः ३२ दाडिमैर्नारिकेलैश्चपूजयेच्चविशेषतः सप्तधान्यान्यधस्तत्रयवानुपरिविन्यसेत् ३३ गंधैर्धूपैस्तथादीपैर्नैवेद्यैर्विविधैरपि कुंभाग्रेतद्दिनंरामनीयतेभक्तिभावतः ३४ रात्रौजागरणंतत्रतस्याग्रेकारयेद्बुधः द्वादशीदिवसेप्राप्तेमार्तंडस्योदयंप्रति ३५ नीत्वाकुंभंजलोद्देशेननद्यांप्रस्रवणेतथा तडागेस्थापयित्वावापूजयित्वायथाविधि ३६ दद्यात्सदैवतंकुंभंब्राह्मणवेदपारगे कुंभेनसहराजेंद्रमहादानानिदापयेत् ३७ अनेनविधिनारामयूथपैःसहसंगतः कुरुयत्नंप्रयत्नेनविजयस्तेभविष्यति ३८ इतिश्रु

त्वावचोरामोयथोक्तमकरोत्तदा कृतेव्रतेसविजयीबभूवरघुनंदनः ३९ अनेनविधिनाराजन्येकुर्वंतिनराभुवि इहलोकेज
यस्तेषांपरलोकेनथाक्षयः ४० एतस्मात्कारणात्पुत्र कर्तव्यंविजयाव्रतम् विजयायाश्चमाहात्म्यंसर्वकिल्बिषनाशनम् ४१
पठनाच्छ्रवणात्तस्यवाजपेयफलंलभेत् ४२ इतिश्रीस्कंदपुराणेफाल्गुनकृष्णैकादशीविजयानाम्नीमाहात्म्यंसंपूर्णम्
अथफाल्गुनशुक्लैकादशी मांधातोवाच वदब्रह्मन्महाभागयेनश्रेयोभवेन्मम ईदृग्ब्रूहिब्रह्मयोनेयद्यनुग्रहतामयि १
सरहस्यंसेतिहासंव्रतानामुत्तमंव्रतं वसिष्ठउवाच कथयाम्यधुनातुभ्यंसर्वव्रतफलप्रदम् २ आमलक्याव्रतंराजन्महा
पातकनाशनम् मोक्षदंसर्वलोकानांगोसहस्रफलप्रदम् ३ अत्रैवोदाहरंतीममितिहासंपुरातनम् यथामुक्तिमनुप्राप्तोव्या
धोहिंसासमन्वितः ४ वैदिशंनगरंनामहृष्टपुष्टजनाकुलम् ब्राह्मणैःक्षत्रियैर्वैश्यैःशूद्रैश्चसमलंकृतं रुचिरंनृपशार्दूल
ब्रह्मघोषनिनादिकम् ननास्तिकोदुष्कृतिकस्तस्मिन्पुरवरेसदा ६ तत्रसोमान्वयेराजाविख्यातःशशबिंदुकः राजाचैत्रर
थोनामधर्मात्मासत्यसंगरः ७ नागायुतबलःश्रीमांच्छस्त्रशास्त्रार्थपारगः तस्मिन्शासतिधर्मज्ञेधर्मात्मनिधरांप्रभो ८ कृपणो
नैवकुत्रापिदृश्यतेनैवनिर्धनः सुकालःक्षेममारोग्यंतस्मिन्राज्यंप्रशासति ९ विष्णुभक्तिरतालोकास्तस्मिन्पुरवरेसदा हरिपू
जारताश्चैवराजाचापिविशेषतः १० नशुक्लांनैवकृष्णांचद्वादशींभुंजनेजनाः सर्वधर्मान्परित्यज्यहरिभक्तिपरायणाः ११एवंसं
वत्सराजग्मुर्बहवोराजसत्तम जनस्यसौख्ययुक्तस्यहरिभक्तिरतस्यच १२ अथकालेनसंप्राप्ताद्वादशीपुण्यसंयुता फाल्गुन
स्यसितेपक्षेनाम्नाह्यामलकीस्मृता १३ तामवाप्यजनाःसर्वेबालकाःस्थविरानृप नियमंचोपवासंचसर्वेचक्रुर्नराविभो १४म
हाफलंव्रतंज्ञात्वास्नानंकृत्वानदीजले तत्रदेवालयेराजालोकयुक्तोमहाप्रभुः १५ पूर्णकुंभमवस्थाप्यछत्रोपानहसंयुतं पंचरत्न
समायुक्तंदिव्यगंधादिवासितम् १६दीपमालान्वितंचैवजामदग्न्यसमन्वितं पूजयामासुरव्यग्राधात्रींसमुनिभिर्जनाः १७जाम
दग्न्यनमस्तेस्तुरेणुकानंदवर्द्धन आमलकीकृतच्छायभुक्तिमुक्तिवरप्रद १८ धात्रिधातृसमुद्भूतेसर्वपातकनाशिनि आमल-

किनमस्तुभ्यंगृह्णाणार्घ्योदकंमम १९ धात्रिब्रह्मस्वरूपासित्वंनुरामेणपूजिता प्रदक्षिणविधानेनसर्वपापहराभव २० तत्रजाग
रणंचक्रुर्जनाःसर्वस्तु नर्त्तितः एवंस्मिन्नवकालेतु व्याधस्तत्रसमागतः २१ क्षुधाश्रमपरिव्याप्तोमहाभारेणपीडितः कुंटुंबार्थं
जीवघातीसर्वेधर्मबहिर्जातः २२ जागरंतत्रसोपश्यदामलक्यांक्षुधातुरः दीपमालाकुलंदृष्ट्वातत्रैवनिषसादसः २३ किमेतदि
तिसंचिंत्यप्राप्तोविस्मयतांभृशं ददर्शकुंभंतत्रस्थंदेवंदामोदरंतथा २४ ददर्शामलकीवृक्षंतत्रस्थांचैवदीपकान् वैष्णवंचतथा
ख्यानंकथयावपठतांशृणोत् २५ एकादश्याश्चमाहात्म्यंश्रुत्वाव क्षुधितोपिसन् जाग्रतस्तस्यसारात्रिर्गताविस्मितचेतसः २६ ततःप्र
भातसमयेविविशुर्नगरंजनाः व्याधोपिगृहमागत्यबुभुजेप्रीतमानसः २७ ततःकालेनमहताव्याधःपंचत्वमागतः एकादश्याः
प्रभावेनरात्रौजागरणेनच २८ राज्यंप्रपेदेसुमहच्चतुरंगबलान्वितम् जयंतीनामनगरीतत्रराजाविदूरथः २९ तस्मात्सुतनयोज-
ज्ञेनाम्नावसुरथोबली चतुरंगबलोपेतोधनधान्यसमन्वितः ३० दशायुतानिग्रामाणांबुभुजेभयवर्जितः तेजसादित्यसदृशः-
कांत्याचंद्रसमप्रभः ३१ पराक्रमेविष्णुसमःक्षमयापृथिवीसमः धार्मिकःसत्यवादीचविष्णुभक्तिपरायणः ३२ ब्रह्मज्ञःकर्मशी
लश्चप्रजापालनतत्परः यजतेविविधान्यज्ञान्सराजापरदर्पहा ३३ दानानिविविधान्येवप्रददातिचसर्वदा एकदामृगयांया
तोदैवान्मार्गपरिच्युतः नदिशंनैवविदिशंवेत्तितत्रमहीपतिः उपधायचदोर्मूलमेकाकीगहनेवने ३५ श्रांतश्चक्षुधितोत्यंतंसे
विवेशमहीपतिः अत्रांतरेम्लेंच्छगणःपर्वतांतरवासभाक् ३६ आययौतत्रयत्रास्तेराजापरबलार्दनः कृतवैरास्तुतेराज्ञासर्वदै
वोपतापिताः ३७ परिवार्यततस्तस्थूराजानंभूरिदक्षिणम् हन्यतांहन्यतांचायंपूर्ववैरविरुद्धधीः ३८ अनेननिहताःपूर्वंपितरो
भ्रातरःसुताः पौत्राश्चभागिनेयाश्चमातुलाश्चनिपातिताः ३९ निष्काशिताश्चस्वस्थानाद्विक्षिप्ताश्चदिशोदश एतावदुक्त्वाते-
सर्वेतत्रैनंहंतुमुद्यताः ४० पाशैश्चपट्टिशैःखड्गैर्बाणैर्धनुषिसंस्थितैः सर्वतोरिगणास्तेचराजानंहंतुमुद्यताः ४१ सर्वाणिश-
स्त्राणिसमाद्रवंतिनवैशरीरेप्रविशंतितस्य तेचापिसर्वेहतशस्त्रसंघाम्लेंछाबभूवुर्गतदेहजीवाः ४२ यदापिचलितुंतत्रनत्रो

कुस्तेऽरयोभृशं शस्त्राणिकुंटितांजग्मुःसर्वेषांहतचेतसां ४३ दीनाबभूवुस्तेसर्वेयेनहंतुंसमागताः एतस्मिन्नेवकालेतुतस्य-
राज्ञःशरीरतः ४४ निःसृताप्रमदात्यकासर्वावयवशोभना दिव्यगंधसमायुक्तादिव्याभरणभूषिता ४५ दिव्यमाल्यांबरधरा
भृकुटीकुटिलानना स्फुलिंगाभ्यांचनेत्राभ्यांपावकंवमतीबहु ४६ चक्रोद्यतकराचैवकालरात्रिरिवापरा अभ्यधावतसंक्रुद्धाम्लें-
च्छानत्यंतदुःखितान् ४७ निहतास्ततदाम्लेंच्छास्तेविकर्मरतास्तथा ततोराजाविबुद्धःसन् ददर्शमहदद्भुतं ४८ हतान्म्लेंच्छगणां-
न्दृष्ट्वाराजाहर्षमवापसः इहकेनहताम्लेंच्छाअत्यंतवैरिणोमम ४९ केनचेदंमहत्कर्मकृतमस्मद्धितार्थिना एतस्मिन्नेवकालेतु
वागुवाचाशरीरिणी ५० तंस्थितंनृपतिंदृष्ट्वानिकामंविस्मयान्वितम् शरणंकेशवादन्यानास्तिकोपिहितायकः ५१ वनात्तस्मात्स-
कुशलीसमायातोपिभूमिभुक् राज्यंचकारधर्मात्माधरायांदेवनेशवत् ५१ वसिष्ठउवाच तस्मादामलकींराजन्येकुर्वंति-
नरोत्तमाः तेयांतिवैष्णवंलोकंनात्रकार्याविचारणा ५२ इतिश्रीब्र० फाल्गुनशुक्लैकादशीमाहात्म्यंसंपूर्णम् अथचैत्रकृ-
ष्णैकादशीकथा युधिष्ठिरउवाच फाल्गुनस्यसितेपक्षेश्रुतासामलकीमया चैत्रस्यकृष्णपक्षेतुकिंनामैकादशीभवेत् १
श्रीकृष्णउवाच शृणुराजेंद्रवक्ष्यामिअज्ञानपापनाशनम् यल्लोमशोब्रवीत्सष्टामांधात्राचक्रवर्तिना २ मांधातोवाच
भगवन्श्रोतुमिच्छामिलोकानांहितकाम्यया चैत्रमास्यासितेपक्षेकिंनामैकादशाभवत् ३ कोविधिःकिंफलंतस्याःकथयस्वप्रसाद-
नः लोमशउवाच श्रूयतांराजशार्दूलकामदांसिद्धिदांतथा कथांविचित्रांशुभदांपापहांधर्मदायिनीम् ४ पुराचैत्ररथोद्देशे
अप्सरोगणसेविते वसंतसमयेप्राप्तेपुष्पैराकुलितेवने ५ गंधर्वकन्यास्तत्रैवरमंतिसहकिन्नरैः पाकशासनमुख्याश्चक्रीडंतेचदि-
वौकसः ६ नापरंसुंदरंकिंचिद्वनाच्चैत्ररथाद्वनं तस्मिन्वनेतुमुनयस्तपंतिबहुलंतपः ७ सहदेवैस्तुमघवारमतेमधुमाधवौ एकोमु-
निवरस्तत्रमेधावीनामनामतः ८ अप्सरास्तंमुनिवरंमोहनायोपचक्रमे मंजुघोषेतिविख्याताभावंतस्यविचिन्वती ९ क्रोशमात्रं
स्थितातस्यभयादाश्रमसन्निधौ गायंतीमधुरंसाधुपीडयंतीविपंचिकां १० गायतींतांमयालोक्यपुष्पचंदनवेष्टितां कामोपि-

विजयाकांक्षीशिवभक्तंमुनीश्वरम् ११ तस्याःशरीरसंसर्गेशिववैरमनुस्मरन् तुल्यभ्रुवौधनुःकोटीगुणंकृत्वाकटाक्षकम् १२
मार्गणौनयनेकृत्वापक्षयुक्तौयथाक्रमं कुचौकृत्वापटकुटौविजयायोपसंस्थितः १३ मंजुघोषाभवत्तत्रकामस्येववरूथिनी मे
धाविनंमुनिंदृष्ट्वासापिकामेनपीडिता १४ यौवनोद्भिन्नदेहोसौमेधाव्यतिविराजते सितोपवीतसहितोदंडीस्मरइवापरः १५
मेधावीवसतिस्मासौच्यवनस्याश्रमेशुभे मंजुघोषास्थितातत्रदृष्ट्वातंमुनिपुंगवम् १६ मदनस्यवशंप्राप्तासामंदंमंदमगायत र
णद्वलयसंयुक्तासिंजन्नूपुरमेखला १७ गायंतींभावसंयुक्तांविलोक्यमुनिपुंगवः मदनेनससैन्येननीतोमोहवशंबलात् १८ मं
जुघोषासमागम्यमुनिंदृष्ट्वातथाविधं हावभावकटाक्षैस्तंमोहयामासचांगना १९ अधःसंस्थाप्यवीणांसासस्वजेतंमुनी
श्वरम् वल्लीवाकुलितावृक्षेवातवेगेनवेपिता २० सोपिरेमेतयासार्द्धंमेधावीमुनिपुंगवः तस्मिन्नेववनोद्देशेदृष्ट्वातद्देहमुत्त
मम् २१ शिवतत्वंगतंतस्यकामतत्ववशंगतः ननिशानदिनंसोपिरमन्ज्ञानातिकामुकः २२ बहुलश्चगतःकालोमुनेराचारलो
पकः मंजुघोषादेवलोकंगमनायोपचक्रमे २३ गच्छंतीप्रत्युवाचाथरमंतंमुनिपुंगमव :आदेशोदीयतांब्रह्मन्स्वधामगमना
यमे २४ मेधाव्युवा० अद्यैवत्वंसमायाताप्रदोषादौवरानने यावत्प्रभातसंध्यास्यात्तावत्तिष्ठममांतिके २५ इतिश्रुत्वामुनेर्वा
क्यंभयभीताबभूवसा पुनर्वैरमयामासतंमुनिंऋषिसत्तमं २६ मुनिशापभयाद्भीताबहुलान्परिवत्सरान् वर्षाणांपंचपंचा
शच्छतंमासान्दिनत्रयं २७ सारेमेमुनिनानेननिशार्द्धमिवचाभवत् साचतंप्रत्युवाचाथतस्मिन्कालेगतंमुनिम् २८ आदेशोदीय
तांब्रह्मन्गंतव्यंस्वगृहेमम मेधाव्युवाच प्रातःकालोधुनैवास्तेश्रूयतांवचनंमम कुर्वेसंध्यांदिनेयावत्तावत्त्वंवैस्थिराभव
२९ इतिवाक्यंमुनेःश्रुत्वाभयेनचसमाकुला स्मितंकृत्वातुसाकिंचित्प्रत्युवाचसुविस्मिता ३० अप्सराउवा० कियत्प्रमा
णाविप्रेंद्रतवसंध्यागतानवा मयिप्रसादंकृत्वातुगतःकालोविचार्यताम् ॥३१ इतितस्यावचःश्रुत्वाविस्मयोत्फुल्ललोचनः संध्या-
तात्हृदिविप्रेंद्रःप्रमाणमकरोत्तदा ३२ समाश्वसत्सपंचाशद्गतामममतयासह नेत्राभ्यांविस्फुलिंगान्समुंचमानोतिकोपनः ३३

कालरूपांचतांदृष्ट्वातपसःक्षयकारिणीं दुःखार्जितंममतपोनीतंनंदनयाक्षयम् ३४ सकंपोष्ठोमुनिस्तत्रप्रत्युवाचाकुलेंद्रियः सतांशशापमेधावीत्वंपिशाचीभवेतिच ३५ धिक्त्वांपापेदुराचारेकुलटेपातकप्रिये तस्यशापेनसादग्धाविनयावनतास्थिता ३६ उवाचवचनंसुभ्रूःप्रसादंवांछतीमुनिम् प्रसादंकुरुविप्रेंद्रशापस्यानुग्रहंकुरु ३७ सतांसंगोहिफलतिवचोभिःसमंमेपादे त्वयासहममब्रह्मन्गताःसुबहवःसमाः ३८ एतस्मात्कारणात्स्वामिन्प्रसादंकुरुसुव्रत मुनिरुवाच शृणुमेवचनंभद्रेशापानुग्रहकारकम् किंकरोमित्वयापापेक्षयंनीतंमहत्तपः ३९ चैत्रस्यकृष्णपक्षेयाभवेदेकादशीशुभा पापमोचनिकानामसर्वपापक्षयंकरी ४० तस्याव्रतेकृतेसुभ्रूःपिशाचत्वंप्रयास्यति इत्युक्त्वातांसमेधावीजगामपितुराश्रमम् ४१ तमागतंसमालोक्यवचनंप्रत्युवाचह किमेतद्विहितंपुत्रत्वयापुण्यक्षयःकृतः ४२ मेधाव्युवाच पापंकृतंमहत्तातरमिताचाप्सरामया प्रायश्चित्तंब्रूहितातयेनपापक्षयोभवेत् ४३ च्यवनउवाच चैत्रस्यचासितेपक्षेनाम्नावैपापमोचनी अस्याव्रतेकृतेपुत्रपापराशिःक्षयंव्रजेत् ४४ इतिश्रुत्वापितुर्वाक्यंकृतंतेनव्रतोत्तमं गतंपापंक्षयंतस्यपुण्ययुक्तोबभूवसः ४५ साप्येवंमंजुघोषाचकृत्वातद्व्रतमुत्तमम् पिशाचत्वविनिर्मुक्तापापमोचनिकाव्रतात् ४६ दिव्यरूपधरासापिगतानाकंवराप्सराः लोमशउवा० इत्थंभूतप्रभावंहिपापमोचनिकाव्रतम् ४७ पापमोचनिकांराजन्येकुर्वंतिचमानवाः तेषांपापंचयत्किंचित्तत्सर्वंक्षयतांव्रजेत् ४८ पठनाच्छ्रवणाद्राजन्गोसहस्रफलप्रदा ब्रह्महाहेमहारीचसुरापोगुरुतल्पगः ४९ व्रतस्यचास्यकरणात्पापमुक्ताभवंतिते बहुमुक्तिप्रदंह्येतत्करणाद्व्रतमुत्तमम् ५० इतिश्रीभविष्येचैत्रकृष्णैकादशीपापमोचनीमाहात्म्यंसंपूर्णं अथचैत्रशुक्लैकादशीकथा सूतउवाच देवकीनंदनंकृष्णंवसुदेवात्मजंहरिं नमस्कृत्वाप्रवक्ष्यामिमहापातकहानितु १ युधिष्ठिरायकृष्णेनकथितानिमहात्मना एकादशीमहाख्यानिनानापापहराणिच २ अष्टादशपुराणेभ्योविविच्यसुमहात्मना चतुर्विंशतिसंख्यानिनानाख्यानैर्युतानिच ३ तानिवक्ष्यामिभोविप्राःशृणुध्वंसुसमाहिताः युधिष्ठिरउवाच वासुदेवनमस्तुभ्यंकथयस्वममाग्रतः ४ चैत्रस्यशुक्लप

स्सेतुकिंनामैकादशीभवेत् श्रीकृष्णउवा० शृणुष्वैकमनाराजन्कथामेनांपुरातनीं ५ वसिष्ठोयामकथयत्प्राग्दिलीपायपृ
च्छते दिलीपउवा० भगवन्श्रोतुमिच्छामिकथयस्वप्रसादतः ६ चैत्रेमासिसितेपक्षेकिंनामैकादशीभवेत् वसिष्ठउवाच
साधुपृष्टंनृपश्रेष्ठ कथयामितवाग्रतः चैत्रस्यशुक्लपक्षेतुकामदानामनामतः ७ एकादशीपुण्यतमापापेंधनदवानला शृणुराजन्क
थामेतांपापघ्नींपुण्यदायिनीं ८ पुराभोगिपुरेरम्येहेमरत्नविभूषिते पुंडरीकमुखानागानिवसंतिमदोत्कटाः ९ तस्मिन्पुरेपुंड
रीकोराजाराज्यंकरोतिच गंधर्वैःकिन्नरैश्चैवह्यप्सरोभिःसुसेव्यते १० वराप्सरास्तुललितागंधर्वोललितस्तथा उभौरागेण-
संयुक्तौदंपतीकामपीडितौ ११ रेमातेस्वगृहेरम्येधनधान्ययुतेसदा ललितायास्तुहृदयेपतिर्वसतिसर्वदा १२ हृदयेतस्यललि
तानित्यंवसतिभामिना एकदापुंडरीकाद्याःक्रीडंतिसदसिस्थिताः १३ गीतमानंप्रकुरुतेललितोदयितांविना पदबंधेस्खलज्जि
ह्वोबभूवललितांस्मरन् १४ मनोभावंविदित्वास्यकर्कटोनागसत्तमः पदबंधच्युतिंतस्यपुंडरीकेन्यवेदयत् १५ शशापललि
तंतत्रमदनातुरचेतसम् राक्षसोभवदुर्बुद्धेक्रव्यादःपुरुषादकः १६ यतःपत्नीवशोजातोगायमानोममाग्रतः वचनात्तस्यराजेंद्र र
क्षोरूपोबभूवह १७ रौद्राननोविरूपाक्षोदृष्टमात्रोभयंकरः बहुयोजनविस्तीर्णौमुखंकंदरसन्निभं १८ चंद्रसूर्यनिभेनेत्रेग्रीवापर्वत
सन्निभा नासारंध्रेतुविवरेअधरौयोजनार्द्धकौ १९ शरीरंतस्यराजेंद्रउच्छ्रितंयोजनाष्टकं ईदृशोराक्षसःसोभूद्भुंजानःकर्मणःफ
लं २० ललितातमथालोक्यस्वपतिंविकृताकृतिं चिंतयामाससमनसादुःखेनमहतार्दिता २१ किंकरोमिक्वगच्छामिपतिःपापेनपी
डितः इतिसंस्मृत्यमनसानशर्मलभतेतुसा २२ चचारपतिनासार्द्धंललितागहनेवने बभ्रामविपिनेदुर्गेकामरूपःसराक्षसः २३
निर्घृणःपापनिरतोविरूपःपुरुषादकः नसुखंलभतेरात्रौनदिवापापपीडितः २४ ललितादुःखितातीवपतिंदृष्ट्वातथाविधम् भ्रमं
तीतेनसार्द्धंसारुदंतीगहनेवने २५ कदाचिदगमद्विंध्यशिखरेबहुकौतुके ऋष्यशृंगमुनेस्तत्रदृष्ट्वाश्रमपदंशुभम् २६ शीघ्रंजगामल
लिताविनयावनतास्थिता प्रत्युवाचमुनिर्दृष्ट्वाकात्वंकस्यसुताशुभे २७ किमर्थमिहसमायातासत्यंवदममाग्रतः ललितोवाच

वीरधन्वेतिगंधर्वःसुतस्तस्यमहात्मनः २८ ललितांनाममांविद्धिपत्न्यर्थमिहचागताम् भर्तामेशापदोषेणराक्षसोभून्महामुने
२९ रौद्ररूपोदुराचारस्तंदृष्ट्वानास्तिमेसुखं सांप्रतंशाधिमांब्रह्मन्प्रायश्चित्तंवदप्रभो ३० येनपुण्येनविप्रेंद्रराक्षसत्वाद्विमुच्यते
ऋषिरुवाच चैत्रमासस्यरंभोरुशुक्लपक्षस्यसांप्रतं ३१ कामदैकादशीनाम्नायाकृताकामदानृणाम् कुरुष्वतद्व्रतंभद्रे
विधिपूर्वंमयोदितम् ३२ तस्यव्रतस्ययत्पुण्यंतत्त्वभर्त्रेप्रदीयताम् दत्तेपुण्येक्षणात्तस्यशापदोषःप्रशाम्यति ३३ इतिश्रुत्वामुने
र्वाक्यंललिताहर्षिताभवत् उपोष्यैकादशींराजन्द्वादशीदिवसेतदा ३४ विप्रस्यैवसमीपेतुवासुदेवाग्रतःस्थिता वाक्यमूचेच
ललितास्वपत्युस्तारणायवै ३५ मयातुयद्व्रतंचीर्णंकामदायामुपोषणं तस्यपुण्यप्रभावेनगच्छत्वस्यपिशाचता ३६ ललिता
वचनादेववर्तमानोपितत्क्षणे गतपापःसललितोदिव्यदेहोबभूवह ३७ राक्षसत्वंगतंतस्यप्राप्तोगंधर्वतांपुनः हेमरत्नसमा
कीर्णोरेमेललितयासह ३८ तौविमानसमारूढौपूर्वरूपाधिकावुभौ दंपतीचापिशोभेतांकामदायाःप्रभावतः ३९ इतिज्ञात्वा
नृपश्रेष्ठकर्तव्यैषाप्रयत्नतः लोकानांचहितार्थायतवाग्रेकथितामया ४० ब्रह्महत्यादिपापघ्नीपिशाचत्वविनाशिनी नातःपरत
राकाचित्त्रैलोक्येसचराचरे ४१ पठनाच्छ्रवणाद्वापिवाजपेयफलंलभेत् ४२ इतिश्रीवराहपुराणेचैत्रशुक्लाकामदानामैका
दशीमाहात्म्यंसंपूर्णम् अथवैशाखकृष्णैकादशीकथा युधिष्ठिरउवाच वैशाखस्यासितेपक्षेकिंनामैकादशीभवेत्
महिमानंकथयमेवासुदेवनमोस्तुते १ श्रीकृष्णउवाच सौभाग्यदायिनीराजन्निहलोकेपरत्रच वैशाखकृष्णपक्षेतुनाम्नाचै
ववरूथिनी २ वरूथिन्यांव्रतेनैवसौख्यंभवतिसर्वदा पापहानिश्चभवतिसौभाग्यप्राप्तिरेवच ३ दुर्भगापिकरोत्येनांस्त्रीसौभाग्य
मवाप्नुयात् लोकानांचैवसर्वेषांभुक्तिमुक्तिप्रदायिनी ४ सर्वपापहरानृणांगर्भवासनिकृंतनी वरूथिन्यांव्रतेनैवमांधातास्वर्गतिं
गतः ५ धुंधुमारादयश्चान्येराजानोबहवस्तथा ब्रह्मकपालनिर्मुक्तोबभूवभगवान्भवः ६ दशवर्षसहस्राणितपस्तप्यतियो
नरः तत्तुल्यंफलमाप्नोतिवरूथिन्याव्रतादपि ७ श्रद्धावान्यस्तुकुरुतेवरूथिन्यांव्रतंनरः वांछितंलभतेसोपिइहलोकेपरत्रच ८

पवित्रापावनीह्येषामहापातकनाशिनी भुक्तिमुक्तिप्रदाह्येषाकर्तॄणांनृपसत्तम ९ अश्वदानान्नृपश्रेष्ठगजदानंविशेषतः गज
दानाद्भूमिदानंतिलदानंततोधिकम् १० ततःसुवर्णदानंतु अन्नदानंततोधिकं अन्नदानात्परंदानंनभूतंनभविष्यति ११ पितृ
देवमनुष्याणांतृप्तिरन्नेनजायते तत्समंकविभिःप्रोक्तंकन्यादानंनृपोत्तम १२ धेनुदानंचतत्तुल्यमित्याहभगवान्स्वयम् प्रोक्ते
भ्यःसर्वदानेभ्योविद्यादानंविशिष्यते १३ तत्फलंसमवाप्नोतिनरःकृत्वावरूथिनीं कन्यावित्तेनजीवंतियेनराःपापमोहिताः १४
तेनराःनरकंयांतियावदाभूतसंप्लवम् तस्मात्सर्वप्रयत्नेननग्राह्यंकन्यकाधनम् १५ यश्चगृण्हातिलोभेनकन्यांक्रीत्वाचतद्धन
म् सोन्यजन्मनिराजेंद्रओतुर्भवतिनिश्चितम् १६ कन्यांवित्तेनयोदद्याद्यथाशक्तिस्वलंकृताम् तत्पुण्यसंख्यांकर्त्तुंहिचित्रगु
प्तोभवत्यलं १७ तत्फलंसमवाप्नोतिनरःकृत्वावरूथिनीं कांस्यंमांसंमसूरान्नंचणकांकोद्रवांस्तथा १८ शाकंमधुपरान्नंचपुन
र्भोजनमैथुने वैष्णवोव्रतकर्ताचदशम्यांदशवर्जयेत् १९ द्यूतक्रीडांचनिद्रांचतांबूलंदंतधावनम् परापवादंपैशून्यंपतितैःस
हभाषणम् २० क्रोधंचैवानृतंवाक्यमेकादश्यांविवर्जयेत् कांस्यंमांसमसूरांश्चक्षौद्रंवितथभाषणम् २१ व्यायामंचप्रवासंच
पुनर्भोजनमैथुने क्षौद्रंतैलंपरान्नंचद्वादश्यांपरिवर्जयेत् २२ अनेनविधिनाराजन्विहितायैर्वरूथिनी सर्वपापक्षयंकृत्वाद
द्यात्यांतेक्षयांगतिं २३ रात्रौजागरणंकृत्वापूजितोयैर्जनार्दनः सर्वपापविनिर्मुक्तास्तेयांतिपरमांगतिं २४ तस्मात्सर्वप्रयत्नेनक
र्तव्यापापभीरुभिः क्षपारितनयाद्भीतैर्नरदेववरूथिनी २५ पठनाच्छ्रवणाद्राजन्गोसहस्रफलंलभेत् सर्वपापविनिर्मुक्तोविष्णु
लोकेमहीयते २६ इतिश्रीभविष्योत्तरपुराणेवैशाखकृष्णवरूथिनीनाम्न्येकादशीमाहात्म्यंसंपूर्णम् अथवैशाखशुक्लै
कादशीकथा युधिष्ठिरउवा० वैशाखशुक्लपक्षेतुकिंनामैकादशीभवेत् किंफलंकोविधिस्तस्याःकथयस्वजनार्दन १
श्रीकृष्णउवाच कथयामिकथामेतांशृणुष्वंधर्मनंदन वसिष्ठोयामकथयत्पुरारामायपृच्छते २ रामउवाच भगवन्
श्रोतुमिच्छामिव्रतानामुत्तमंव्रतम् सर्वपापक्षयकरंसर्वदुःखनिकृंतनम् ३ मयादुःखानिभुक्तानिसीताविरहजानिवै ततो

हंभयभीतोस्मिपृच्छामित्वांमहामुने ४ वसिष्ठउवाच साधुपृष्टंत्वयारामतवैषानैष्ठिकीमतिः त्वन्नामग्रहणेनैवपूतोभवति
मानवः ५ तथापिकथयिष्यामिलोकानांहितकाम्यया पवित्रंपावनानांचव्रतानामुत्तमंव्रतम् ६ वैशाखस्यसितेपक्षेद्वादशीराम
याभवेत् मोहिनीनामसाप्रोक्तासर्वपापहरापरा ७ मोहजालात्प्रमुच्येतपातकानांसमूहतः अस्याव्रतप्रभावेनसत्यंसत्यंवदा
म्यहम् ८ अतस्तत्कारणाद्रामकर्तव्यैषाभवादृशैः पातकानांक्षयकरीमहादुःखविनाशिनी ९ शृणुष्वैकमनारामकथांपुण्यप्रदांशुभा
म् अस्याःश्रवणमात्रेणमहापापंप्रणश्यति १० सरस्वत्यास्तटेरम्येपुरीभद्रावतीशुभा द्युतिनाम्नामनृपतिस्तत्रराज्यंकरोतिवै ११
सोमवंशोद्भवोराजाधृतिमान्सत्यसंगरः तत्रवैश्योनिवसतिधनधान्यसमृद्धिमान् १२ धनपालइतिख्यातःपुण्यकर्मप्रवर्तकः प्र
पासत्राद्यायतनतडागारामकारकः १३ विष्णुभक्तिरतःशांतस्तस्यासन्पंचपुत्रकाः सुमनाद्युतिमांश्चैवमेधावीसुकृतीतथा १४ प
चमोधृष्टबुद्धिश्चमहापापरतःसदा वारस्त्रीसंगतिरतोविटगोष्ठीविशारदः १५ द्यूतादिव्यसनासक्तःपरस्त्रीरतिलालसः नदे
वान्नातिथीन्वृद्धान्पितॄंश्चैवद्विजानपि १६ अन्यायकर्तादुष्टात्मापितुर्द्रव्यक्षयंकरः अभक्ष्यभक्षकःपापःसुरापानरतःसदा १७
वेश्याकंठक्षिप्तबाहुर्भ्रमद्दृष्टिश्चतुष्पथे पित्रानिष्काशितोगेहात्परित्यक्तश्चबांधवैः १८ स्वदेहभूषणान्येवक्षयंनीतानितेनवै
गणिकाभिःपरित्यक्तोनिंदितश्चधनक्षयात् १९ ततश्चिंतापरोजातोवस्त्रहीनःक्षुधार्दितः किंकरोमिक्वगच्छामिकेनोपायेनजी
व्यते २० तस्करत्वंसमारब्धंतत्रैवनगरेपुनः गृहीतोराजपुरुषैर्मुक्तश्चपितृगौरवात् २१ पुनर्बद्धःपुनर्मुक्तःपुनर्मुक्तःससंभ्रमैः
धृष्टबुद्धिर्दुराचारोनिबद्धोनिगडैर्दृढैः २२ कशाघातैस्ताडितश्चपीडितश्चपुनःपुनः नस्थातव्यंहिमंदात्मन्त्वयामद्देशगोचरे
२३ एवमुक्ताततोराज्ञामोचितोदृढबंधनात् निर्जगामभयात्तस्यगतोसौगहनंवनं २४ क्षुत्तृषापीडितश्चायमितश्चेतश्चधाव
ति सिंहवन्निजघानासौमृगसूकरचित्तलान् २५ आमिषाहारनिरतोवनेतिष्ठतिसर्वदा करेशरासनंकृत्वानिषंगंपृष्ठसंगतम्
२६ अरण्यचारिणोहंतिपक्षिणश्चचतुष्पदान् चकोरांश्चमयूरांश्चकंकांस्तित्तिरमूषकान् २७ एनानन्यान्हंतिनित्यंधृष्टधीर्निर्गे

तद्घृणः पूर्वजन्मकृतैःपापैर्निमग्नःपापकर्दमे २८ दुःखशोकसमाविष्टश्चिंतयत्सोप्यहर्निशं कौंडिन्यस्याश्रमपदंप्राप्तःपुण्य
वशात्कचित् २९ माधवेमासिजान्हव्यांकृतस्नानंतपोधनम् आससादधृष्टबुद्धिःशोकभारेणपीडितः ३० तद्वस्त्रबिंदुस्पर्शे
नगतपाप्माहताशुभः कौंडिन्यस्याग्रतःस्थित्वाप्रत्युवाचकृतांजलिः ३१ धृष्टबुद्धिरुवाच प्रायश्चित्तंवदब्रह्मन्विनाय
त्नेनयद्भवेत् आजन्मकृतपापस्यनास्तिवित्तंममाधुना ३२ ऋषिरुवाच शृणुष्वैकमनाभूत्वायेनपापक्षयस्तव वैशाखस्य
सितेपक्षेमोहिनीनाममनामतः ३३ एकादशीव्रतंतस्याःकुरुमद्वाक्यनोदितः मेरुतुल्यानिपापानिक्षयंनयतिदेहिनां ३४ बहु
जन्मार्जितान्येषामोहिनीसमुपोषिता इतिवाक्यंमुनेःश्रुत्वाधृष्टबुद्धिर्हसन्हृदि ३५ व्रतंचकारविधिवत्कौंडिन्यस्योपदेशतः कृ
तेव्रतेनृपश्रेष्ठहतपापोबभूवसः ३६ दिव्यदेहस्ततोभूत्वागरुडोपरिसंस्थितः जगामवैष्णवंलोकंसर्वोपद्रववर्जितं ३७ इती
दृशंरामचंद्रतमोमोहनिकृंतनं नातःपरतरंकिंचित्त्रैलोक्येसचराचरे ३८ यज्ञादितीर्थदानानि कलांनार्हंतिषोडशीं पठना-
च्छ्रवणाद्राजन्गोसहस्रफलंलभेत् ३९ इतिश्रीकूर्मपुराणेवैशाखशुक्लमोहिनीनामैकादशीमाहात्म्यंसंपूर्णम् अथज्ये
ष्ठकृष्णैकादशीकथा युधिष्ठिरउवाच ज्येष्ठस्यकृष्णपक्षेतुकिंनामैकादशीभवेत् श्रोतुमिच्छामिमाहात्म्यंतद्वदस्व
जनार्दन १ श्रीकृष्णउवाच साधुपृष्टंत्वयाराजंल्लोकानांहितकाम्यया बहुपुण्यप्रदाह्येषामहापातकनाशिनी २ अ
परानामराजेंद्रअपारफलदायिनी लोकेप्रसिद्धतांयातिअपरांयस्तुसेवते ३ ब्रह्महत्याभिभूतोपिगोत्रहाभ्रूणहानतथा प
रापवादवादीचपरस्त्रीरसिकोपिच ४ अपरासेवनाद्राजन्विपाप्माभवतिध्रुवम् कूटसाक्ष्यंमानकूटंतुलाकूटंकरोतियः ५ कू
टवेदंपठेद्विप्रः कूटशास्त्रंकरोतिच ज्योतिषीकूटगणकः कूटायुर्वेदकोभिषक् ६ कूटसाक्षीसमाह्येतेविज्ञेयानरकौकसः
अपरासेवनाद्राजन्पापमुक्ताभवंतिते ७ क्षत्रियःक्षात्रधर्मंयस्त्यक्त्वायुद्धात्पलायते सयातिनरकंघोरंस्वीयधर्मबहिष्कृ
तः ८ अपरासेवनाद्राजन्पापंत्यक्त्वादिवंव्रजेत् विद्यामधीत्ययःशिष्योगुरुनिंदांकरोतिच ९ महापातकयुक्तोपिनिरयंयाति

दारुणं अपरासेवनात्सोपिसद्गतिंप्राप्नुयान्नरः १० महिमानंचापरायाः शृणुराजन्वदाम्यहं पुष्करत्रितयेस्नात्वाकार्तिक्यांयत्फ
लंलभेत् ११ गयायांपिंडदानेनपितॄणांतृप्तिदोयथा सिंहस्थितेदेवगुरौगौतमीस्नातकोनरः १२ यत्फलंसमवाप्नोतिकुंभेकेदार
दर्शनात् बदर्याश्रमयात्रायांतत्तीर्थसेवनादपि १३ यत्फलंसमवाप्नोतिकुरुक्षेत्रेरविग्रहे गजाश्वहेमदानानियज्ञेकृत्स्नसुव
र्णदः १४ यत्फलंसमवाप्नोति अपरायाव्रतान्नरः अर्द्धप्रसूतांगांदत्वासुवर्णवसुधांतथा १५ नरस्तत्फलमाप्नोतिअपराव्रत
सेवनात् पापद्रुमकुठारोयंपापेंधनदवानलः १६ पापांधकारसूर्योयंपापसारंगकेसरी बुद्बुदाइवतोयेषुपुत्तिकाइवजंतुषु १७
जायंतेमरणायैवएकादश्याव्रतंविना अपरांसमुपोष्यैवपूजयित्वात्रिविक्रमम् १८ सर्वपापविनिर्मुक्तोविष्णुलोकंव्रजेन्नरः -
लोकानांचहितार्थायतवाग्रेकथितंमया १९ पठनाच्छ्रवणाद्राजन्सर्वपापैःप्रमुच्यते २० इतिश्रीब्रह्मांडपुराणेज्येष्ठकृष्णैकाद
शीअपरानाम्नीमाहात्म्यंसंपूर्णम् अथज्येष्ठशुक्लैकादशीकथा भीमसेनउवा० पितामहमहाबुद्धेशृणुमेपरमंवचः
युधिष्ठिरश्चकुंतीचतथाद्रुपदनंदिनी १ अर्जुनोनकुलश्चैवसहदेवस्तथैवच एकादश्यांनभुंजंतिकदाचिदपिसुव्रत २तेमांब्रुवं
तिवैनित्यंमाभुंक्ष्वत्वंवृकोदर अहंतानब्रुवंतातबुभुक्षादुःसहामम ३ दानंदास्यामिविधिवत्पूजयिष्यामिकेशवम् विनोपवासंल
भ्येनकथमेकादशीव्रतम् ४ भीमसेनवचःश्रुत्वाव्यासोवचनमब्रवीत् व्यासउवा० यदिस्वर्गोत्यभीष्टस्तेनरकोदुष्टएवच ५
एकादश्यांनभोक्तव्यंपक्षयोरुभयोरपि भीमसेनउवा० पितामहमहाबुद्धेकथयामितवाग्रतः ६ एकभुक्तेनशक्तोहमुपवासः
कुतोमुने वृकनामापियोवह्निःससदाजठरेमम ७ अनीवार्थंयदाश्नामि तदासमुपशाम्यति एकंशक्तोस्म्यहंकर्तुंचोपवासंमहामु
ने ८ येनैवप्राप्यतेस्वर्गस्तत्करोमियथानथम् तदेकंवदनिश्चित्ययेनश्रेयोहमाप्नुयाम् ९ व्यासउवा० श्रुतामेमानवाधर्मावैदिका
श्चश्रुतास्त्वया कलौयुगेनशक्यंतेतेवैकर्तुंनराधिप १० सुखोपायंचाल्पधनमल्पक्लेशंमहाफलं पुराणानांचसर्वेषांसारभूतंव
दामिते ११ एकादश्यांनभुंजीतपक्षयोरुभयोरपि एकादश्यांनभुंक्तेयोनयातिनरकंतुसः १२ व्यासस्यवचनंश्रुत्वाकंपितोश्वत्थ

पत्रवत् भीमसेनोमहाबाहुर्भीतोवाक्यमभाषत १३ भीमसेनउवा॰ पितामहनशक्तोहमुपवासेकरोमिकिं ततोबहुफलंब्रूहि ब
तमेकंममप्रभो १४ व्यासउवा॰ वृषस्थेमिथुनस्थेपाशुक्लाद्येकादशीभवेत् ज्येष्ठमासेप्रयत्नेन सोप्योष्याजलवर्जिता १५ स्नानेचा
चमनेचैव वर्जयित्वोदकंबुधः माषमात्रसुवर्णस्ययत्रमज्जतिवैमणिः १६ एतदाचमनंप्रोक्तंपवित्रंकायशोधनम् गोकर्णकृतह-
स्तेनमाषमात्रंजलंपिबेत् १७ तन्न्यूनमधिकंपीत्वासुरापानसमंभवेत् उपयुंजीतनैवान्यं व्रतभंगोन्यथाभवेत् १८ उदयादुदयं
यावद्वर्जयित्वातथोदकम् अप्रयत्नादवाप्नोतिद्वादशद्वादशीफलम् १९ प्रभातेविमलेजातेद्वादश्यांस्नानमाचरेत् जलंसुवर्णं
दत्वाचद्विजातिभ्योयथाविधि २० भुंजीतकृतकृत्यस्तु ब्राह्मणैःसहितोवशी एवंकृतेतुयत्पुण्यंभीमसेनशृणुष्वतत् २१ संवत्स
रस्ययामध्ये एकादश्योभवंतिवै तासांफलमवाप्नोतिअत्रमेनास्तिसंशयः २२ इतिमांकेशवःप्राहशंखचक्रगदाधरः सर्वधर्मा
न्परित्यज्य मामेकंशरणंव्रज २३ एकादश्यांनिराहारान्नरःपापात्प्रमुच्यते द्रव्यशुद्धिःकलौनास्ति संस्कारःस्मार्तएवच २४ वैदि
कश्चकुतस्त्वास्तेप्राप्तेदुष्टकलौयुगे किंतुतेबहुनाक्तेन वायुपुत्रःपुनःपुनः २६ एकादश्यांनभुंजीतपक्षयोरुभयोरपि एकाद-
श्यांसितेपक्षेज्येष्ठस्योदकवर्जितं २६ उपोष्यफलमाप्नोतितच्छृणुष्ववृकोदर सर्वतीर्थेषुयत्पुण्यं सर्वदानेषुयत्फलं २७ तत्फ
लंसमवाप्नोति इमांकृत्वावृकोदर २८ उपोषितास्ताः सर्वास्युरेकादश्योनसंशयः धनधान्यमहायुर्दाःपुत्रारोग्यफलप्रदाः २९
उपोषितानरव्याघ्र इतिसत्यंवदामिते यमदूतामहाकायाः करालाःकृष्णपिंगलाः ३० दंडपाशधरारौद्रानोपसर्पंतितंनरम्
पीतांबरधराःसौम्याश्चक्रहस्तामनोजवाः ३१ अंतकालेनयंत्येवमानवंवैष्णवींपुरीम् तस्मात्सर्वप्रयत्नेनसोपोष्योदकवर्जिता
३२ जलधेनुंतथादत्वासर्वपापैःप्रमुच्यते इतिश्रुत्वातदाचक्रुःपांडवाजनमेजय ३३ तथात्वमपिभूपालसोपवासार्चनंहरेः कु
रुत्वंचप्रयत्नेनसर्वपापप्रशांतये ३४ करिष्याम्यद्यदेवेशजलवर्जमुपोषणम् भोक्ष्येपरेन्हिदेवेशाद्यन्नंवातववासरान् ३५ इत्यु
च्चार्यततोमंत्रमुपवासपरोभवेत् सर्वपापविनाशायश्रद्धादमसमन्वितः ३६ मेरुमंदरमानंतुस्त्रियोयपुरुषस्यवा सर्वंतद्भस्मतां

यातिएकादश्याःप्रभावतः ३७ सकांचनःप्रदातव्योघटोवस्त्रेणसंयुतः तोयस्यनियमंतस्यांकुरुतेवैसपुण्यभाक् ३८ पलकोटि
सुवर्णस्ययामेयामेश्नुतेफलम् स्नानंदानंजपंहोमंयदस्यांकुरुतेनरः ३९ तत्सर्वंचाक्षयंप्रोक्तमेतत्कृष्णस्यभाषितं किंवापरेणध
र्मेणनिर्जलैकादशीनृप ४० उपोषिताचविधिवद्वैष्णवंपदमाप्नुयात् सुवर्णमन्नंवासांसियदस्यांसंप्रदीयते ४१ तस्यैवचकुरुश्रे
ष्ठसर्वंचाप्यक्षयंभवेत् एकादशीदिनेयोन्नंभुंक्तेपापंभुनक्तिसः ४२ इहलोकेसचांडालोमृतःप्राप्नोतिदुर्गतिम् येप्रदास्यंतिदा
नानिद्वादशींसमुपोष्यत ४३ ज्येष्ठमासेसितेपक्षेप्राप्स्यंतिपरमंपदं ब्रह्महामद्यपस्तेनोगुरुद्वेष्टासदानृती ४४ मुच्यंतेपातकैःस
र्वैर्द्वादशीयैरुपोषिता विशेषंशृणुकौंतेयनिर्जलैकादशीदिने ४५ यत्कर्तव्यंनरैःस्त्रीभिःश्रद्धादमसमन्वितैः जलशायीतुसंपू
ज्योदेयाधेनुश्चतन्मयी ४६ प्रत्यक्षांवानृपश्रेष्ठघृतधेनुमथापिवा दक्षिणाभिश्चश्रेष्ठाभिर्मिष्टान्नैश्चपृथग्विधैः ४७ तोषणी
याःप्रयत्नेनद्विजाधर्मभृतांवर तुष्टोभवतिवैक्षिप्रंतैस्तुष्टैर्मोक्षदोहरिः ४८ आत्मद्रोहःकृतस्तैस्तुयैर्नैषासमुपोषिता पापात्मा
नोदुराचाराद्दुष्टास्तेनात्रसंशयः ४९ कुलानांचशतंसाग्रमनाचाररतंसदा आत्मनासहसन्नीतंवासुदेवस्यमंदिरम् ५० शांते-
दांतपरैश्चैवअर्चद्भिश्चतथाहरिं कुर्वद्भिर्जागरंरात्रौयैर्नरैःसमुपोषिता ५१ अन्नंपानंतथागावोवस्त्रंशय्यासनंशुभम् कमंड
लुस्तथाछत्रंदातव्यंनिर्जलादिने ५२ उपानहौचयोदद्यात्पात्रभूतेद्विजोत्तमे ससौवर्णेनयानेनस्वर्गलोकेव्रजेद्ध्रुवम् ५३ यश्चे
मांशृणुयाद्भक्त्यायश्चापिपरिकीर्तयेत् उभौतौस्वर्गतौस्यातांनात्रकार्याविचारणा ५४ यत्फलंतुसिनीवाल्यांराहुग्रस्तेदिवाकरे
कृत्वाश्राद्धंलभेन्मर्त्यस्तदस्याःश्रवणादपि ५५ नियमंचप्रकुर्वीतदंतधावनपूर्वकम् एकादश्यांनिराहारोवर्जयिष्यामिवैजल-
म् ५६ केशवप्रीणनार्थायअन्यदाचमनादृते द्वादश्यांदेवदेवेशःपूजनीयस्त्रिविक्रमः ५७ गंधपुष्पैस्तथादीपैर्वारिभिःप्रीणयेद्ध
रिम् पूजयित्वाविधानेनमंत्रमेनमुदीरयेत् ५८ देवदेवहृषीकेशसंसारार्णवतारक उदकुंभप्रदानेननयमांपरमांगतिम् ५९ ततः
कुंभाःप्रदातव्याब्राह्मणेभ्यःस्वशक्तितः सान्नावस्त्रयुताभीमछत्रोपानत्फलान्विताः ६० दानान्यन्यानिदेयानिजलधेनुर्विशेष

तः भोजयित्वाततोविप्रान्स्वयंभुंजीनवाग्यतः ६१ एवंयःकुरुतेपूर्णांद्वादशींपापनाशिनीं सर्वपापविनिर्मुक्तःपदंगच्छत्यनामयं ६२
ततःप्रभृतिभीमेन कृताह्येकादशीशुभा पांडवद्वादशीनाम्नालोकेख्याताबभूवह ६३ इतिश्रीब्रह्मवैवर्तपुराणेज्येष्ठशुक्लनिर्ज-
लैकादशीमाहात्म्यंसंपूर्णम् आषाढकृष्णैकादशीकथा युधिष्ठिरउवा॰ ज्येष्ठशुक्लेनिर्जलायामाहात्म्यंवैश्रुतंमया
आषाढकृष्णपक्षेतुकिंनामैकादशीभवेत् १ कथयस्वप्रसादेनममाग्रेमधुसूदन श्रीकृष्णउवा॰ व्रतानामुत्तमंराजन्कथ-
यामितवाग्रतः २ सर्वपापक्षयकरंभुक्तिमुक्तिप्रदायकं आषाढस्यासितेपक्षेयोगिनीनामनामतः ३ एकादशीनृपश्रेष्ठमहा
पातकनाशिनी संसारार्णवमग्नानांपोतरूपासनातनी ४ जगत्त्रयेसारभूतायोगिनीतिनराधिप कथयामिकथांतस्याः
पौराणींपापहारिणीम् ५ अलकाधिपतिर्नाम्नाकुबेरःशिवपूजकः तस्यासीत्पुष्पबटुको हेममालीतिनामतः ६ तस्यप-
त्नीसुरूपाचविशालाक्षीतिनामतः सतस्यांस्नेहसंयुक्तःकामपाशवशंगतः ७ मानसात्पुष्पनिचयमानीयस्वगृहेस्थितः पत्नी
प्रेमसमायुक्तोनकुबेरालयंगतः ८ कुबेरोदेवसदनेकरोतिशिवपूजनम् मध्यान्हसमयेराजन्पुष्पाणिप्रसमीक्षते ९ हेममा
लीस्वभवनेरमतेकांतयासह यक्षराड्प्रत्युवाचाथकालातिक्रमकोपितः १० कस्मान्नायातिभोयक्षाहेममालीदुरात्मवान्
निश्चयःक्रियतामस्यप्रत्युवाचपुनःपुनः ११ यक्षाऊचुः वनिताकामुकोगेहे रमतेस्वेच्छयानृप तेषांवाक्यंसमाकर्ण्य
कुबेरःकोपपूरितः १२ आह्वयामासतंपूर्णंबटुकंहेममालिनम् ज्ञात्वाकालात्ययंसोपिभयव्याकुललोचनः १३ आजगामनम-
स्कृत्यकुबेरस्याग्रतःस्थितः तंदृष्ट्वाधनदःक्रुद्धःकोपसंरक्तलोचनः १४ प्रत्युवाचरुषाविष्टःकोपात्प्रस्फुरिताधरः धनदउ
वाच रेपापदुष्टदुर्वृत्तकृतवान्देवहेलनम् १५ अतोभवश्वित्रयुक्तोवियुक्तःकांतयासदा अस्मात्स्थानादपध्वस्तोगच्छस्था
नमथाधमम् १६ इत्युक्तंवचनंतेनतस्मात्स्थानात्सपातसः महादुःखाभिभूतश्चकुष्टैःपीडितविग्रहः १७ नवैतोयंनभक्ष्यंचवनेरौ
द्रेलभत्यसौ नसुखंदिवसेतस्यननिद्रांलभतेनिशि १८ छायायांपीडितस्तनुर्निदाघेत्यंतपीडितः शिवपूजाप्रभावेनस्मृतिस्तस्य

नल्लुप्यते १९ पातकेनाभिभूतोपिपूर्वकर्मस्मरत्यसौ भ्रममाणस्ततोगच्छद्धिमाद्रिंपर्वतोत्तमम् २० तत्रापश्यन्मुनिवरंमार्कंडेयं
तपोनिधिम् यस्यायुर्विद्यतेराजन्ब्रह्मणोदिनसप्तकं २१ आश्रमंसगतस्तस्यऋषेर्ब्रह्मसदःसमम् ववंदेचरणौतस्यदूरतःपाप
कर्मकृत् २२ मार्कंडेयोमुनिवरोदृष्ट्वातंकुष्ठिनंतदा परोपकरणार्थायसमाहूयेदमब्रवीत् मार्कंडेयउवा० कस्मात्कुष्ठाभिभू
तस्त्वंकुतोनिंद्यतरोह्यसि इत्युक्तःप्रत्युवाचेत्थंमार्कंडेयेनधीमता २४ हेममाल्युवाच यक्षराजस्यानुचरोहेममाली
तिनामतः मानसात्पुष्पनिचयमानीयप्रत्यहंमुने २५ शिवपूजनवेलायांकुबेरायसमर्पयत् एकस्मिन्दिवसेकाललोपश्चविहि
तोमया २६ पत्नीसौख्यप्रसक्तेनकामव्याकुलचेतसा ततःक्रुद्धेनशप्तोहंराजराजेनवैमुने २७ कुष्ठाभिभूतःसंजातोविभक्तः
कांतयासह अधुनातवसान्निध्यंप्राप्तोस्मिशुभकर्मणा २८ सतांस्वभावतश्चित्तंपरोपकरणक्षमं इतिज्ञात्वामुनिश्रेष्ठशा
धिमांचकृतेनसम् २९ मार्कंडेयउवा० त्वयासत्यमिहप्रोक्तंनासत्यंभाषितंयतः अतोव्रतोपदेशंतेकरिष्यामिशुभप्रद
म् ३० आषाढेकृष्णपक्षेत्वंयोगिनीव्रतमाचर अस्यव्रतस्यपुण्येनकुष्ठात्त्वंमुच्यसेध्रुवम् ३१ इतिवाक्यंमुनेःश्रुत्वादंडवत्प
तितोभुवि उत्थापितश्चमुनिनाबभूवातीवहर्षितः ३२ मार्कंडेयोपदेशेनकृतंतेनव्रतोत्तमं तद्व्रतस्यप्रभावेनदेवरूपोबभू
वसः ३३ संयोगंकांतयालेभेबुभुजेसौख्यमुत्तमम् ईदृग्विधंनृपश्रेष्ठकथितंयोगिनीव्रतं ३४ अष्टाशीतिसहस्राणिद्वि
जान्भोजयतेतुयः तत्फलंसमवाप्नोतियोगिनीव्रतकृन्नरः ३५ महापापप्रशमनीमहापुण्यफलप्रदा शक्तौकृष्णैकादशीच
कथितायोगिनीनृप ३६ इतिश्रीब्रह्मवैवर्त्तेआषाढकृष्णैकादशीयोगिनीनाममाहात्म्यंसंपूर्णम् अथआषाढशुक्लैका
दशीकथा युधिष्ठिरउवा० आषाढस्यसितेपक्षेकिंनामैकादशीभवेत् कोदेवःकोविधिस्तस्याएतदाख्याहिकेशव
१ श्रीकृष्णउवा० कथयामिमहीपालकथामाश्चर्यकारिणीम् कथयामासयांब्रह्मानारदायमहात्मने २ नारद
उवाच कथयस्वप्रसादेनविष्णोराराधनायमे आषाढशुक्लपक्षेतुकिंनामैकादशीभवेत् ३ ब्रह्मोवाच वैष्णवोसि

मुनिश्रेष्ठसाधुपृष्टंकलिप्रिय नातःपरतरंलोकेपवित्रंहरिवासरात् ४ कर्तव्यंतुप्रयत्नेनसर्वपापापनुत्तये तस्मात्तेहंप्रवक्ष्यामिशुक्लाएकादशीव्रतं ५ एकादश्याव्रतंपुण्यंपापघ्नंसर्वकामदम् नकृतंयैर्नरैर्लोकेतेनरानिरयैषिणः ६ पद्मानामेतिविख्यातानभस्यैकादशीसिता हृषीकेशप्रीतयेतुकर्तव्यंव्रतमुत्तमं ७ कथयामितवाग्रेहंकथांपौराणिकींशुभां यस्याःश्रवणमात्रेणमहापापंप्रणश्यति ८ मांधातानामराजर्षिर्विवस्वद्वंशसंभवः बभूवचक्रवर्तीससत्यसंधःप्रतापवान् ९ धर्मतःपालयामासप्रजाःपुत्रानिवौरसान् नतस्यराज्येदुर्भिक्षंनाधयोव्याधयस्तथा १० निरातंकाःप्रजास्तस्यधनधान्यसमन्विताः नान्यायोपार्जितंद्रव्यंकोशेतस्यमहीपतेः ११ तस्यैवंकुर्वतोराज्यंबहुवर्षगणोगतः अथोकदाचित्संप्राप्तोविपाकेपापकर्मणः १२ वर्षत्रयंनद्विषयेनववर्षबलाहकः तेनोद्विग्नाःप्रजास्तत्रबभूवुःक्षुधयार्दिताः १३ स्वाहास्वधावषट्कारवेदाध्ययनवर्जिताः बभूवुर्विषयास्तस्यसस्याभावेनपीडिताः १४ अथप्रजाःसमागत्यराजानमिदमब्रुवन् श्रूयतांवचनंराजन्प्रजानांहितकारकम् १५ आपोनाराइतिप्रोक्ताःपुराणेषुमनीषिभिः अयनंताभवतस्तेननारायणःस्मृतः १६ पर्जन्यरूपीभगवान्विष्णुःसर्वगतःसदा सएवंकुरुतेवृष्टिंवृष्टेरन्नंततःप्रजाः १७ तदभावेननृपतेक्षयंगच्छंतिवैप्रजाः तथाकुरुनृपश्रेष्ठयोगक्षेमोयथाभवेत् १८

राजोवाच सत्यमुक्तंभवद्भिश्चनमिथ्याभिहितंवचः अन्नंब्रह्ममयंप्रोक्तमन्नेसर्वंप्रतिष्ठितं १९ अन्नाद्भवंतिभूतानिजगदन्नेनवर्धते इत्येवंश्रूयतेलोकेपुराणेबहुविस्तरे नृपाणामपचारेणप्रजानांपीडनंभवेत् नाहंपश्याम्यात्मकृतंदोषंबुध्याविचारयन् २१ तथापिप्रयतिष्यामिप्रजानांहितकाम्यया इतिकृत्वामतिंराजापरिमेयबलान्वितः २२ नमस्कृत्यविधातारंजगामगहनंवनं चचारमुनिमुख्यानामाश्रमांस्तपसैधितान् २३ ददर्शाथब्रह्मसुतमृषिमंगिरसंनृपः तेजसाद्योतितदिशंद्वितीयमिवपद्मजं २४ तंदृष्ट्वाहर्षितोराजाअवतीर्यचवाहनात् नमश्चक्रेस्यचरणौकृतांजलिपुटोवशी २५ मुनिस्तमभिनंद्याथस्वस्तिवाचनपूर्वकं प्रपच्छकुशलंराज्येसप्तस्वंगेषुभूपतेः २६ निवेदयित्वाकुशलंप्रपच्छानामयंनृपः ततश्चमुनिनाराजापृष्टाग

मनकारणः २७ अब्रवीन्मुनिशार्दूलस्त्वस्यागमनकारणम् राजोवाच भगवन्धर्मविधिनाममपालयनोमहीम् २८ अनावृ
ष्टिः संप्रवृत्तानाहंवेद्म्यत्रकारणम् संशयच्छेदनार्थोत्रत्वागतोहंतवांतिकम् २९ योगक्षेमविधानेनप्रजानांकुरुनिर्वृतिम् ऋषि
रुवाच एतत्कृतयुगंराजन्युगानामुत्तमंस्मृतम् अत्रब्रह्मोत्तरालोकाधर्मश्चात्रचतुष्पदः ३० अस्मिन्युगेतपोयुक्ताब्राह्मणा
नेतरेजनाः विषयेतवराजेंद्रवृषलोयत्तपस्यति ३१ अकार्यकरणात्तस्यनवर्षतिबलाहकः कुरुतस्यवधेयत्नंयेनदोषःप्रशा
म्यति ३२ राजोवाच नाहमेनंवधिष्यामितपस्यंतमनागसं धर्मोपदेशंकथयत्वुपसर्गविनाशनं ३३ ऋषिरुवाच
यद्येवंतर्हिनृपतेकुरुष्वैकादशीव्रतम् शुचिमासेसितेपक्षेपद्मानामेतिविश्रुता ३४ तस्याव्रतप्रभावेनसुवृष्टिर्भविताध्रुव
म् सर्वसिद्धिप्रदाह्येषासर्वोपद्रवनाशिनी ३५ अस्याव्रतंकुरुनृपसप्रजःसपरिच्छदः इतिवाक्यंमुनेःश्रुत्वाराजास्वगृहमाग-
तः ३६ आषाढमासेसंप्राप्तेपद्माव्रतमथाकरोत् प्रजाभिःसहसर्वाभिश्चातुर्वर्ण्यसमन्वितः ३७ एवंकृतेव्रतेराजन्प्रववर्षबला
हकः जलेनप्लाविताभूमिरभवत्सस्यमालिनी ३८ हृषीकेशप्रसादेनजनाःसौख्यंप्रपेदिरे एतस्मात्कारणादेवकर्तव्यंव्रत
मुत्तमम् ३९ भुक्तिमुक्तिप्रदंचैवलोकानांसुखदायकं पठनाच्छ्रवणादस्याःसर्वपापैःप्रमुच्यते ४० इयमेकादशीराजन्शय
नीत्यभिधीयते विष्णोःप्रसादसिध्यर्थमस्यांचशयनव्रतं ४१ कर्तव्यंराजशार्दूलजनैर्मोक्षेच्छुभिःसदा चातुर्मास्यव्रतारं
भोप्यस्यामेवविधीयते ४२ युधिष्ठिरउ० कथंकृष्णाप्रकर्त्तव्यंश्रीविष्णोःशयनव्रतम् तद्ब्रूहिकृपयादेवचातुर्मास्यव्रतानि
च ४३ श्रीकृष्णउवाच शृणुपार्थप्रवक्ष्यामिगोविंदशयनव्रतं चातुर्मास्येचयान्युक्तान्यासंस्तानिव्रतानिच ४४ कर्क
राशिगतेसूर्येशुचौशुक्लेतुपक्षके एकादश्यांजगन्नाथंस्वापयेन्मधुसूदनं ४५ तुलाराशिस्थितेतस्मिन्पुनरुत्थापयेद्धरिम् अ
धिमासेपिपतितेनएषएवविधिःक्रमात् ४६ नान्यथास्वापयेद्देवंनचैवोत्थापयेद्धरिम् आषाढस्यसितेपक्षेएकादश्यामुपोषि
तः ४७ चातुर्मास्यव्रतानांतुकुर्वीतपरिकल्पनम् एवंचप्रतिमांविष्णोःस्वापयित्वायुधिष्ठिर ४८ स्नापयेत्प्रतिमांविष्णोःशंख

चक्रगदाधराम् पीतांबरधरांसौम्यांपर्यंकेवैसितेशुभे ४९ सितवस्त्रसमाच्छन्नेसोपधानेयुधिष्ठिर इतिहासपुराणज्ञोब्राह्मणो
वेदपारगः स्नापयित्वादधिक्षीरघृतक्षौद्रसितादिभिः ५० समालेप्यशुभैर्गंधैर्धूपैर्दीपैश्चभूरिशः पूजयेत्कुसुमैःशस्तैर्मंत्रेणा
नेनपांडव ५१ शायितस्त्वंहृषीकेशपूजयित्वाश्रियासह प्रसादंकुरुदेवेशलक्ष्म्यासहजनार्दन ५२ सुप्तेत्वयिजगन्नाथजग
त्सुप्तंचराचरम् एवंतांप्रतिमांविष्णोःस्थापयित्वायुधिष्ठिर ५३ तस्याएवाग्रतःस्थित्वागृण्हीयान्नियमान्नरः चत्वारोवार्षि
कान्मासान्देवस्योत्थापनावधि ५४ प्रातःसंध्यादिकंसर्वंनित्यकर्मसमाप्यच गृहीष्येनियमान्शुद्धान्निर्विघ्नंकुरुमेप्रभो ५५
इतिसंप्रार्थ्यदेवेशंप्रव्हःसंशुद्धमानसः स्त्रीवानरोवामद्भक्तोधर्मार्थीचधृतव्रतः ५६ गृण्हीयान्नियमानेतान्दंतधावनपूर्वकम्
व्रतप्रारंभकालास्तुप्रोक्ताःपंचैवविष्णुना ५७ उपक्रमंचतुर्मासव्रतानांचनरःशुचौ एकादशीद्वादशीचपौर्णिमाचतथाष्टमी ५८
कर्कटाचैवसंक्रांतिस्तेषुकुर्याद्यथाविधि चतुर्धागृह्यवैचीर्णंचातुर्मास्यव्रतंनरः ५९ कार्तिकेशुक्लपक्षेतुद्वादश्यांतत्समापयेत्
तेषांफलानिवक्ष्यामिकर्तॄणांतेपृथक्पृथक् ६० आषाढेशुक्लपक्षेतुएकादश्यामुपोषितः चातुर्मास्यव्रतंकुर्याद्यत्किंचिद्वनी
पते ६१ नान्यथाचाब्दकंपापंविनिहंतिप्रयत्नतः नशौशवंनमौढ्यंचशुक्रगुर्वोर्नवार्धकम् ६२ खंडत्वेचिंतयेदादौचातुर्मास्य
विधौनरः खंडांगव्यापीमार्तंडोयद्यखंडाभवेत्तिथिः ६३ अशुचिर्वाशुचिर्वापियदिस्त्रीयदिवापुमान् व्रतमेकंनरःकृत्वामु
च्यतेसर्वपातकैः ६४ असंक्रांतंतथामासंदैवेपित्र्येचकर्मणि मलरूपमशौचंचवर्जयेन्मतिमान्नरः ६५ प्रतिवर्षंतुयःकु
र्याद्व्रतंवैसंस्मरन्हरिं देहांतेतिप्रदीप्तेनविमानेनार्कतेजसा ६६ मोदतेविष्णुलोकेसौयावदाभूतसंप्लवं देवतायतनेनित्यंमा
र्जनंजलसेचनं ६७ प्रलेपनंगोमयेनरंगवल्यादिकंतथा यःकरोतिनरःश्रेष्ठचातुर्मास्यमतंद्रितः ६८ समाप्तौचयथाशक्त्या
कृत्वाब्राह्मणभोजनम् सप्तजन्मसुविप्रेंद्रःसत्यधर्मपरोभवेत् ६९ दध्नाक्षीरेणचाज्येनक्षौद्रेणसितयातथा स्नापयेद्विधि
नादेवंचातुर्मास्येजनाधिप ७० सयातिविष्णुसारूप्यंसुखमक्षय्यमश्नुते नृपेणभूमिर्दातव्यायथाशक्त्याचकांचनम् ७१

विप्रायदेवमुद्दिश्यसफलंचसदक्षिणम् अक्षय्यांल्लभतेभोगान्स्वर्गइंद्रइवापरः ७२ लोकंचसमवाप्नोतिविष्णोरत्रनसंशयः दे
वायहेमपद्मंतुदद्यान्नैवेद्यसंयुतम् ७३ गंधपुष्पाक्षताद्यैर्योदेवब्राह्मणयोरपि पूजांयःकुरुतेनित्यंचातुर्मास्येव्रतीनरः ७४अ
क्षय्यंसुखमवाप्नोतिपुरंदरपुरंव्रजेत् यस्तुवैचतुरोमासान्तुलस्याहरिमर्चयेत् ७५ तुलसींकांचनींकृत्वाब्राह्मणायनिवेदयेत्
कांचनेनविमानेनवैष्णवींलभतेगतिम् ७६ देवायगुग्गुलंयोवैदीपंचार्पयतेनरः सभोगीजायतेश्रीमान्तथासौभाग्यवानपि
७७ समासौधूपिकांदद्याद्दीपिकांचमहामते प्रदक्षिणांतुयःकुर्यान्नमस्कारंविशेषतः ७८ अश्वत्थस्याथवाविष्णोःकार्तिक्याम
वधिर्भवेत् पादंपादांतरेन्यस्यकरौकृत्वाचसंयुतौ ७९ स्तुतिंवाचित्तहृदिज्ञानंचतुरंगांप्रदक्षिणां संध्यादीपप्रदोयस्तुप्रांगणेद्वि
जदेवयोः ८० समासौदीपिकांदद्याद्वस्त्रंचैलंचकांचनम् वायुमाल्लभतेयस्तुतेजस्वीसभवेदिह ८१ वैमानिकोभवेद्देवोगंधर्वा
प्सरसेवितः विष्णुपादोदकंयस्तुपिबेच्छ्रद्धासमन्वितः विष्णोर्लोकमवाप्नोतिनचास्मिन्जायतेनरः शतमष्टोत्तरंयस्तुगायत्रीजप
माचरेत् ८३ त्रिकालंवैष्णवेहर्म्येसनपापेनलिप्यते अक्षसूत्रंपुस्तकंचधत्तेपद्मंकमंडलुं ८४ चतुर्वक्त्रातुगायत्रीश्रोत्रियाणांगृहे
स्थिता सर्वलोकमयीदेवीगायत्रीयात्रयीमयी नित्याशास्त्रसमाख्यातालोकान्यातुप्रबोधयेत् ८५ व्यासस्तुष्यतितस्याशुवि
ष्णुलोकंसगच्छति अत्रचोद्यापनेशास्त्रपुस्तकंदानमेवच ८६ सर्वविद्यासमंज्ञानकरणंललिताक्षरम् पुस्तकंसंप्रयच्छामिप्रीता
भवतुभारती ८७ पुराणंशृणुयान्नित्यंधर्मशास्त्रमथापिवा पुण्यवान्धनवान्भोगीसत्यशौचपरायणः ८८ ज्ञानवान्लोकविख्यातो
बहुशिष्यःसुधार्मिकः कांचनेनयुतंपुण्यंपुस्तकंचनिवेदयेत् ८९ नाममंत्रव्रतपरःशंभोर्वाकेशवस्यवा समासौप्रतिमांद
द्यात्तस्यदेवस्यकांचनीम् ९० पंचवक्त्रोवृषारूढःप्रतिवक्त्रंत्रिलोचनः कपालशूलखड्गांगीचंद्रमौलिःसदाशिवः ९१ त्वयासु
राणाममृतंविहायहालाहलंसंहृतमेवयस्मात् तथासुराणांत्रिपुरंचदग्धमेकेषुणालोकहितार्थमीश ९२ तद्रूपदानाद्बहुपुण्य
वांश्चदोषैर्वियुक्तश्चगुणालयोहं तथाकुरुत्वांशरणंप्रपद्येममप्रभोदेववरप्रसीद ९३ कृतनित्यक्रियोभूत्वासूर्यायार्घ्यंनिवेदये

त् सूर्यमंडलमध्यस्थंदेवंध्यात्वाजनार्दन् ९४ समासौकांचनंदद्याद्रक्तवस्त्रंचगांतथा आरोग्यंपूर्णमायुश्चकिर्तिंलक्ष्मींबलंलभे
त् ९५ तिलहोमंतुयःकुर्याच्चातुर्मास्येदिनेदिने भक्त्याव्याहृतिभिर्मंत्रैर्गायत्र्यावाव्रतान्वितः ९६ अष्टोत्तरशतंचाथअष्टाविंशति
रेववा तिलपात्रंसमासौतुदद्याद्विप्रायधीमते ९७ वाङ्मनःकायजनितैःपापैर्मुच्येतसंचितैः नरोगैरभिभूयेतलभेत्संततिमुत्तमां
९८ देवदेवजगन्नाथवांच्छितार्थफलप्रद तिलपात्रंप्रदास्यामितेनपापंव्यपोहतु ९९ अन्यहोमंतुयःकुर्याच्चातुर्मास्यमतंद्रितः
समासौघृतकुंभंतुवस्त्रकांचनसंयुतम् १०० आरोग्यंकांतिमतुलांपुत्रसौभाग्यसंपदः शत्रुक्षयंचलभतेब्रह्मणाप्रतिमोभवे
त् १०१ अश्वत्थसेवांयःकुर्यात्सर्वपापैःप्रमुच्यते विष्णुभक्तोभवेत्पश्चाद्दंतेवस्त्रंप्रदापयेत् १०२ सकांचनंब्राह्मणायनैवरो
गान्सविंदते तुलसींधारयेद्यस्तुविष्णुप्रीतिकरांशुभं १०३ विष्णुलोकमवाप्नोतिसर्वपापैःप्रमुच्यते ब्राह्मणान्भोजयेत्पश्चा
द्विष्णुमुद्दिश्यपांडव १०४ यस्तुस्पृशेद्धृषीकेशेदूर्वाममृतसंभवाम् सदाप्रातर्वहेन्मूर्ध्निकृत्वात्माचकृतुहृये १०५ मंत्रेणा-
नेनराजेंद्रलक्ष्मीनाथस्यतुष्टये त्वंदूर्वेमृतजन्मासिवंदितासिसुरासुरैः १०६ सौभाग्यंसंततिंदत्वासद्यःकार्यकरीभव व्रतां
तेचकुरुश्रेष्ठदूर्वास्वर्णविनिर्मितां १०७ साग्रसर्वदलोपेतांसवस्त्रांद्विजपुंगवे प्रदद्याद्दक्षिणासार्द्धंमंत्रेणानेनसुव्रत १०८य
थाशाखाप्रशाखाभिर्विस्तृतासिमहीतले तथाममापिसंतानंदेहित्वमजरामरं १०९ एवंव्रतंयःकुर्वीतचातुर्मास्यमतंद्रितः
नचदुःखभयंतस्यनचरोगभयंभवेत् ११० नाशुभंप्राप्नुयाज्जातुपापेभ्यःप्रविमुच्यते भुक्त्वातुसकलान्भोगान्स्वर्गलोकेम
हीयते १११ गीतंतुदेवदेवस्यकेशवस्यशिवस्यवा करोतिनित्यमाप्नोतिनरोजागरणेफलम् १२ व्रतांतेचव्रतीदद्यान्घंटांदेवाय
सुस्वराम् गुरोरवज्ञयायच्चानध्यायेध्ययनंकृतम् १३ सरस्वतीजगन्नाथजगज्जाड्यापहारिणी साक्षाद्ब्रह्मकलत्रंचविष्णुरुद्रा
दिभिःस्तुता १४ तन्ममाध्ययनोत्पन्नंजाड्यंहरवरानने घंटादानेनतुष्टात्वंब्रह्माणीलोकपालिनी १५ विप्रपादविनिर्मुक्तंतोयंयः
प्रत्यहंपिबेत् चातुर्मास्येनरोभक्त्यामद्रूपंब्राह्मणंस्मरन् १६ मनोवाक्कायजनितैर्मुक्तोभवतिकिल्बिषैः व्याधिभिर्नाभिभूयेत-

श्रीरायुस्तस्यवर्द्धते १७ समासौगोयुगंदद्याद्गामेकांवापयस्विनीम् तत्राप्यशक्तोराजेंद्रदद्याद्वासोयुगंव्रती १८ ब्राह्मणंवंदते
यस्तुसर्वदेवमयंस्मृतम् कृतकृत्योभवेत्सद्यःसर्वपापैःप्रमुच्यते १९ अक्षय्यंसुखमाप्नोतिपितृभक्तिपरोनरः समासौभोज
येद्विप्रानायुर्वित्तंचविंदति २० संध्यामानंनरःकृत्वासमासौघृतकुंभदः वस्त्रयुग्मंतिलान्घंटांब्राह्मणायनिवेदयेत् २१ सारस्व
तंयातितत्त्वंविद्यावांस्तुभवेदिति संस्पृशेत्कपिलांयोवैनित्यंभक्तिसमन्वितः २२ तामेवालंकृतांदद्यात्सर्वांभूमिमथापिवा सार्वभौमो
भवेद्राजादीर्घायुश्चप्रतापवान् २३ दानशीलःसदारंभःसर्वकंटकवर्जितः रूपवान्भाग्यसंपन्नोलभतेसुखमक्षयम् २४ सवत्सोदिंद्र
वत्स्वर्गेवत्सरान्रोमसंमितान् नमस्करोतियःसूर्यंगणेशंवापिनित्यशः १२५ आयुरारोग्यमैश्वर्यंलभतेकांतिमुत्तमाम् विघ्नराजप्र
सादेनप्राप्नुयादीप्सितंफलम् २६ सर्वत्रविजयंचैवनात्रकार्याविचारणा रविःकार्यःसुवर्णस्यसिंदूरारुणसंनिभः २७ निवेदयेद्ब्रा-
ह्मणायसर्वकामार्थसिद्धये उरसाशिरसादृष्ट्यामनसावचसातथा २८ पद्भ्यांकराभ्यांजानुभ्यांप्रणामोष्टांगउच्यते अष्टांगसहितेना
पिनमस्कारेणयोर्चयेत् २९ सयांगतिमवाप्नोतिनतांक्रतुशतैरपि यस्तुरौप्यंशिवप्रीत्यैदद्याद्धर्षाकृतुद्धये १३० ताम्रंवाप्रत्यहंदद्यात्स्व
शक्त्याशिवतुष्टये सुरूपांल्लभतेपुत्रान्रुद्रभक्तिपरायणान् १३१ समासौमधुपूर्णंतुपात्रंराजतमुत्तमम् प्रदद्यात्ताम्रदानेतुताम्रपात्रंगु
डान्वितम् ३२ ताम्रंपुष्टिकरंदेवदेवप्रीतिकरंशुभम् सर्वरक्षाकरंनित्यमतःशांतिंप्रयच्छमे ३३ यस्तुसतेहृषीकेशेस्वर्णदानं
स्वशक्तितः वस्त्रयुग्मतिलैःसार्द्धंदत्वापापैःप्रमुच्यते ३४ इहभुक्त्वामहाभोगानंतेशिवपुरंव्रजेत् सुवर्णंरजतंताम्रंनित्यदानंच
धान्यकम् ३५ नित्यश्राद्धंदेवपूजासर्वमेतत्सदक्षिणम् वस्त्रदानंतुयःकुर्याच्चातुर्मास्येद्विजातये ३६ अभ्यर्च्यगंधपुष्पाद्यैःस
विष्णुःप्रीयतामिति शय्यांदद्यात्समासौतुवासःकांचनपट्टिकां ३७ अक्षयंसुखमाप्नोतिधनंचधनदोपमम् योगोपीचंदनंदद्या
न्नित्यंवर्षासुमानवः ३८ श्रीपतिस्तस्यसंतुष्टोभुक्तिंमुक्तिंददातिच यद्वैदेवांगसंलग्नंकुंकुमादिविलेपनम् ३९ जलक्रीडासुगोपी
नांद्वारवत्यांमृदान्वितं गोपीचंदनमित्युक्तंमुनींद्रैःकिल्बिषापहं ४० तस्माद्देयंप्रयत्नेनविष्णुर्दिशतिवांछितं समासावपितद्द्या

तुलापरिमितंशुभम् ४१ तदर्धंवातदर्धंवासवस्त्रंचसदक्षिणम् यस्तुस्वपेत्हृषीकेशेप्रत्यहंतुव्रतान्वितः ४२ दद्याद्दक्षिणयासा
र्द्धंशर्करामपिवागुडम् अमृतस्यकलाप्रोक्ताइक्षुसारजशर्करा ४३ तस्यादानेनसंतुष्टोभानुर्दिशतिवांछितम् एवंव्रतेतुसंपूर्णेकुर्यादु
द्यापनंबुधः ४४ कारयेत्ताम्रपात्राणिप्रत्येकंतुपलाष्टकम् वित्तशाठ्यमकुर्वाणोयद्वापलचतुष्टयम् ४५ अष्टौचत्वार्यथैकंवाप्रत्येकंचस
शर्करम् दक्षिणाफलवस्त्रेणप्रत्येकंवेष्टितानिच ४६ सहधान्यानिविप्रेभ्यःश्रद्धयाप्रतिपादयेत् ताम्रपात्रंसवस्त्रंचशर्कराहेमसंयु
तम् ४७ सूर्यप्रीतिकरंयस्माद्रोगघ्नंपापनाशनम् पुष्टिदंकीर्तिदंनृणांनित्यंसंतानकारकम् ४८ सर्वकामप्रदंस्वर्ग्यमायुर्वर्धनमुत्त
मम् तस्मादस्यप्रदानेनकीर्तिरस्तुसदामम ४९ एवंव्रतंतुयःकुर्यात्तस्यपुण्यफलंशृणु गंधर्वविद्यासंपन्नःसर्वयोषित्प्रियोभवेत् ५०
राजापिलभतेराज्यंपुत्रार्थीलभतेसुतान् अर्थार्थीप्राप्नुयादर्थंनिष्कामोमोक्षमाप्नुयात् ५१ यस्तुवैचतुरोमासान्शाकमूलफलादिकम् नि
त्यंददातिविप्रेभ्यःशक्त्यायत्संभवेद्द्विजः ५२ व्रतांतेवस्त्रयुग्मंचशक्त्यादद्यात्सुदक्षिणम् सुखीभूत्वाचिरंकालंराजयोगीभवेन्नरः ५३
सर्वदेवप्रियंयस्माच्छाकंतृप्तिकरंनृणाम् देवर्षिप्रीतिदंकंदमूलपत्रसपुष्पकम् ५४ ददामितेनदेवाद्याःसदाकुर्वंतुमंगलं यस्तुस्व
पेत्हृषीकेशेप्रत्यहंतुऋतुद्वये ५५ दद्यात्कटुत्रयंमर्त्योगृहपर्यासमादरात् ब्राह्मणायसुशीलायदिनेशप्रीतयेनघ ५६ दक्षिणासहि
तंविप्रमंत्रेणानेनसुव्रत कटुत्रयमिदंयस्माद्रोगघ्नंसर्वदेहिनां ५७ तस्मादस्यप्रदानेनप्रीतोभवतुभास्करः एवंकृत्वाव्रतंसम्यक्कु
र्यादुद्यापनंबुधः ५८ कृत्वास्वर्णमयींशुंठींमरीचींमगधीमपि सवस्त्रांदक्षिणायुक्तांदद्याद्विप्रायधीमते ५९ एवंव्रतंयःकुरुतेस
जीवेच्छरदांशतम् प्राप्नुयादीप्सितानर्थानंतेस्वर्गंव्रजेदिति ६० सुपक्वफलानियोनित्यंदद्याद्विप्रायसन्मतिः अन्नवान्कीर्तिमान्
श्रीमान्जायतेवसुधाधिप ६१ चातुर्मास्येप्रत्यहंतुक्षीरकुंभंप्रदापयेत् वेष्टयित्वासुवस्त्रेणफलैर्दक्षिणयासह ६२ सुवासिनीं-
श्रियंमत्वागंधपुष्पैस्तथार्चयेत् तांबूलंफलमेकंवादद्याच्छ्रीपतयेपुनः ६३ समाप्तौयोषितंविप्रंसूक्ष्मवस्त्रविभूषणैः मिथुनंपूज
यित्वातुजातीपुष्पैःसुशोभनैः ६४ पुमांस्तुस्त्रियमाप्नोतिनारीभर्तारमाप्नुयात् पुमांस्तुश्रियमाप्नोतिकमलामिवमाधवः ६५ तांबू

लदानंयःकुर्याद्वर्जयेद्वाजितेंद्रियः रक्तवस्त्रद्वयंदद्यात्करकंचसदक्षिणं ६६ महालावण्यमाप्नोतिसर्वरोगविवर्जितः मेधावीसु
भगःप्राज्ञोरक्तकंठश्चजायते ६७ गंधर्वत्वमवाप्नोतिस्वर्गलोकंचगच्छति तांबूलंश्रीकरंभद्रंब्रह्मविष्णुशिवात्मकम् ६८ अस्य
प्रदानाद्ब्रह्माद्याःश्रियंददतुपुष्कलां पूगेब्रह्माहरिःपत्रेचूर्णेसाक्षान्महेश्वरः ६९ एतेषांसंप्रदानेनसंतुमेभाग्यसंपदः पूरितंपूग-
चूर्णेननागवल्लीदलान्वितं ७० सचूर्णखादिरंचैव पत्रीफलग्रांसमन्विनम् एलालवंगसंमिश्रंगंधर्वाप्सरसांप्रियम् ७१ कन
कलंनिरातंकंत्वंप्रसादात्कुरुष्वमाम् चातुर्मास्यव्रतोपेतःसुवासिन्यैद्विजायच ७२ नारीवापुरुषोवापिहरिद्रांसंप्रयच्छति ल
क्ष्मीमुद्दिश्यगौरींवानसात्रंदक्षिणान्वितं ७३ प्रदद्याद्भक्तिसंयुक्तंदेवीमेप्रीयतामिति भर्त्रासहसुखंभुंक्तेनारीनार्यातथापुमान्
७४ सौभाग्यमक्षयंधान्यंधनपुत्रसमुन्नतिं संप्राप्यरूपलावण्येदेवीरूपेमहीयते ७५ उमामहेशामुद्दिश्यचातुर्मास्येदिनेदिने सं
पूज्यविप्रमिथुनंतस्मैविप्रायशक्तितः ७६ दद्यात्सदक्षिणांहेमउमेशःप्रीयतामिति उमेश प्रतिमांहैमींदद्यादुद्यापनेबुधः ७७ पं
चोपचारैःसंपूज्यधेन्वाचवृषभेणच भोजयेदपिमिष्टान्नंतस्यपुण्यफलंशृणु ७८ सौभाग्यंपूर्णमायुष्यंसंपत्तिश्चानपायिनी संप
त्तिरक्षयाकीर्तिर्जायतेव्रतवैभवात् ७९ इहभुक्त्वाखिलान्कामानंतेशिवपुरंव्रजेत् तत्रस्थित्वाचिरंकालमुपभुज्यसुखंमहत्
८० पुण्यशेषादिहागत्यजायतेधरणीपतिः फलदानंतुयःकुर्याच्चातुर्मास्यमतंद्रितः ८१ समाप्तौकालधौतानितानिदद्याद्द्विजा
तये सर्वान्मनोरथान्प्राप्यसंततिंचानपायिनीम् ८२ फलदानस्यमाहात्म्यान्मोदतेनंदनेवने पुष्पदानव्रतेचापिस्वर्णपुष्पादि
दापयेत् ८३ ससौभाग्यंपरंप्राप्यगंधर्वपदमाप्नुयात् वासुदेवेप्रसुप्तेचचातुर्मास्यमतंद्रितः ८४ नित्यंवामनमुद्दिश्यदध्यन्नं-
स्वादुषड्रसैः भोजयेदथवादद्यादेकादश्यांनभोजयेत् ८५ दानमेवप्रकुर्वीतग्रहणादौतथैवच अशक्तौनित्यदानेतुकुर्यात्संवसु
पर्वसु ८६ भूताष्टम्याममायांचपूर्णिमायांतथापिच प्रत्यर्कवारमथवाप्रतिभार्गववासरम् ८७ पक्षद्वयेपिद्वादश्यामवश्यंदा
नमिष्यते एवंकृत्वासमाप्तौतुयथाशक्तिमहींददेत् ८८ अशक्तौभूमिदानेतुधेनुंदद्यादलंकृताम् तत्राप्यशक्तौवासश्चसरुक्मं

पादुकेतथा ८९ छत्रोपानहस्त्रयुतंदानंसर्वप्रशस्यते द्विजानांभोजनंचैवक्षत्रियस्ययथासुखम् भूम्यादिमुनिशार्दूलवैश्यस्य
वसुधांविना ९० ब्राह्मणस्यापिशक्तस्यशूद्रस्यापितथामतम् कुबेरेणपुराचीर्णंशंकरस्योपदेशतः ९१ जन्हुनागौतमेनापिशु
क्रेणापिकृतंपुरा अक्षय्यमन्नमाप्नोतिपुत्रपौत्रादिसंपदम् ९१ हृढांगःपूर्णमायुष्यंलभतेवैरिनाशनं सुस्थिरांविष्णुभक्तिंचप्र
यातिहरिमंदिरम् ९२ आरोग्यंसौख्यमतुलंरूपसंपत्तिमेवच अवंध्याकर्तृकंचेदमनंतफलदायकम् ९४ नित्यंपयस्विनींदद्या
त्सालंकारांशुभावहाम् दत्वातुदक्षिणांशक्त्याससर्वज्ञानवान्भवेत् ९५ नपरंप्रेष्यतांयातिब्रह्मलोकंचगच्छति अक्षय्यं
सुखमाप्नोतिपितृभिःसहितोनरः ९६ वार्षिकान्चतुरोमासान्प्राजापत्यंचरेन्नरः समाप्तौगोयुगंदद्यात्कृत्वाब्राह्मणभोज
नम् ९७ सर्वपापविशुद्धात्मायातिब्रह्मसनातनम् एकांतरोपवासेतुसीराण्यष्टौप्रदापयेत् ९८ वस्त्रकांचनयुक्तानिशय्ययास
हभामिनी अनडुद्वयसंयुक्तंलांगलंकर्षणक्षमम् ९९ सर्वोपस्करसंयुक्तंददामिप्रीयतांहरिः शाकमूलफलैर्वापिचातुर्मास्यंन
येन्नरः २०० समाप्तौगोप्रदानेनसगच्छेद्विष्णुमंदिरं पयोव्रतीतयाप्नोतिब्रह्मलोकंसनातनं १ व्रतांतेचतयादद्याद्गामेकांच
पयस्विनीम् रंभायाश्चपलाशेषुयोभुंक्तेचक्रतुद्वये २ वस्त्रयुग्मंचकांस्यंचशक्त्यादद्यात्सुखीभवेत् कांस्येब्रह्माशिवोल
क्ष्मीःकांस्यमेवविभावसुः ३ कांस्यंविष्णुमयंयस्मांदत्तःशांतिंप्रयच्छमे नित्यंपलाशभोजीचतैलाभ्यंगविवर्जितः ४ सदह
त्यतिपापानितूलराशिमिवानलः ब्रह्मघ्नश्चसुरापश्च बालघातकरश्चयः ५ असत्यवादिनोयेचस्त्रीघातीभ्रूणघातकः अगम्या
गामिनश्चैवविधवागामिनस्तथा ६ चांडालगामिनश्चैवविप्रस्त्रीगामिनस्तथा तेसर्वेपापनिर्मुक्ताव्रतेनानेनकेशव ७ समा
प्तौकांस्यपात्रंतुचतुःषष्टिपलैर्युतम् सवत्सांगांचयोदद्यात्सालंकारांपयस्विनीं ८ अलंकृतायविदुषेसुवस्त्रायसुवेषिणे
भूमौविलिप्ययोभुंक्तेदेवंनारायणंस्मरन् ९ दद्याद्भूमिंयथाशक्तिकृष्यांबहुजलांतिके आरोग्यपुत्रसंपन्नोराजाभवतिधा
र्मिकः १० शत्रोर्भयंनलभतेविष्णुलोकंसगच्छति अयाचितेत्वनड्वाहंसहिरण्यंसचंदनं ११ षड्रसंभोजनंदद्यात्सया-

तिपरमांगतिम् यस्तुसुप्तेहृषीकेशेनक्तंचकुरुतेव्रतम् १२ ब्राह्मणान्भोजयेत्सम्यक्छिवलोकेमहीयते एकभक्तंनरःकृत्वामिता
शीचदृढव्रतः १३ योर्चयेच्चतुरोमासान्वासुदेवंसनाकभाक् समाप्तौभोजयेद्विप्रान्शक्त्यादद्याच्चदक्षिणाम् १४ यस्तुसुप्तेहृषी
केशेक्षितिशायीभवेन्नरः शय्यांसोपस्करांदद्याच्छिवलोकेमहीयते १५ पादाभ्यंगंनरोयस्तुवर्जयेच्चऋतुद्वये पादाभ्यंगंनरःकु
र्यात्तुब्राह्मणानांचभोजनम् १६ दक्षिणांचयथाशक्त्यासगच्छेद्विष्णुमंदिरम् आषाढादिचतुर्मासान्वर्जयेन्नखकृंतनं १७
आरोग्यपुत्रसंपन्नोराजाभवतिधार्मिकः पायसंलवणंचैवमधुसर्पिःफलानिच १८ चातुर्मास्येवर्जयतिगौरीशंकरतुष्टये का
र्तिक्यांचपुनस्तानिब्राह्मणायनिवेदयेत् १९ सरुद्रलोकमाप्नोतिरुद्रव्रतनिषेवणात् यवान्नंभक्षयेद्यस्तुअथवाशालयःशुभाः
२० पुत्रपौत्रादिभिःसार्द्धंशिवलोकेमहीयते तैलाभ्यंगपरित्यागीविष्णुभक्तःसदाव्रती २१ वर्षासुविष्णुमभ्यर्च्यवैष्णवींलभते
गतिं समाप्तौकांस्यपात्रंचसुवर्णेनसमन्वितं २२ तैलेनपूरितंकृत्वाब्राह्मणायनिवेदयेत् वार्षिकान्चतुरोमासान्शाकादिप-
रिवर्जयेत् २३ विष्णुलोकमवाप्नोतिपितृतृप्तिःप्रजायते व्रतांतेहरिमुद्दिश्यपात्रंराजतमेवहि २४ वस्त्रेणवेष्टयेद्गंधपत्रपुष्पैःस
मर्चयेत् मूलपत्रकरीराग्रफलकांडादिरूढकाः २५ त्वक्पुष्पंकवचंचेतिशाकमष्टविधंस्मृतम् समभ्यर्च्ययथाशक्त्याब्राह्मणा
न्वेदपारगान् २६ दद्याद्दक्षिणयासार्द्धंव्रतसंपूर्णहेतवे शिवसायुज्यमाप्नोतिप्रसादाच्छूलपाणिनः २७ अपूपवर्जनंकृत्वाभो
जनव्रतमाचरेत् कार्तिकेस्वर्णगोधूमान्वस्त्रंदत्वाश्वमेधकृत् २८ गोधूमाःसर्वजंतूनांबलपुष्टिविवर्धनाः मुख्याश्चहव्य-
कव्येषुतस्मान्मेददतःश्रियं २९ आषाढादिचतुर्मासान्वृंताकंवर्जयेन्नरः कारवल्लीफलंवापि आलाबुंपडूलंतथा ३० यद्यत्फ
लंप्रियंवापिवर्जयित्वातुतत्फलं चातुर्मास्येततोवृत्तेरौप्याण्येतानिकारयेत् ३१ मध्येविद्रुमयुक्तानित्वर्चयित्वातुशक्तितः
दद्याद्दक्षिणयासार्द्धंब्राह्मणायातिभक्तितः ३२ अभीष्टंदेवमुद्दिश्यदेवोमेप्रीयतामिति सदीर्घमायुरारोग्यंपुत्रपौत्रान्सरूप
ताम् ३३ भक्ष्यांसंततिंकीर्तिंलब्ध्वास्वर्गेमहीयते फलत्यागीभवेद्यस्तुविष्णुलोकेसपूज्यते ३४ समाप्तौकलधौतानितानि

दद्याद्विजातये श्रावणेवर्जयेच्छाकंदधिभाद्रपदेतथा ३५ दुग्धमाश्वयुजेमासिकार्तिकेद्विदलंत्यजेत् चत्वार्येतानिनित्यानिच
तुराश्रमवर्तिनाम् ३६ प्रथमेमासिकर्तव्यंनित्यंशाकव्रतंनरैः द्वितीयेमासिकर्तव्यंदधिव्रतमनुत्तमम् ३७ पयोव्रतंतृतीयेतुचतु
र्थेद्विदलंतथा कूष्मांडराजमाषांश्चमूलकंगृंजरंतथा ३८ करमर्दंचेक्षुदंडचातुर्मास्येत्यजेन्नरः मसूरंबहुबीजंचवृंताकंचैव
वर्जयेत् ३९ नित्यान्येतानिविप्रेंद्रव्रतान्याहुर्मनीषिणः विशेषाद्बदरींधात्रीमालाबुंचिंचिणींत्यजेत् ४० चीर्णधात्रीफलंग्राह्यंजी
र्णाग्राह्याचचिंचिणी वार्षिकान्चतुरोमासान्प्रसुप्तेचजनार्दने ४१ मंचखट्वादिशयनंवर्जयेद्भक्तिमान्नरः अनृतौवर्जयेद्भार्यांऋ
तौगच्छन्नदुष्यति ४२ मधुवल्लींचशिग्रुंचचातुर्मास्येत्यजेन्नरः वृंताकंचकलिंगंचबिल्वोदुंबरभिःसटाः ४३ उदरेयस्यजीर्य्यंते
तस्यदूरतरोहरिः उपवासस्तथानक्तमेकभक्तमयाचितम् ४४ अशक्तस्तुयथाकुर्यात्सायंप्रातरखंडितं स्नानपूजादिसंयुक्तः
सनरोहरिलोकभाक् ४५ गीतवाद्यकरोविष्णोर्गांधर्वंलोकमाप्नुयात् मधुस्वरश्चभवेद्राजापुरुषोगुडवर्जनात् ४६ लभेच्चसंत
तिंदीर्घांपुत्रपौत्रादिवर्धिनीम् तैलस्यवर्जनाद्राजन्सुंदरांगःप्रजायते ४७ कौसुंभतैलसंत्यागाच्छत्रुनाशमवाप्नुयात् मधू-
कतैलत्यागाच्चसुसौभाग्यफलंलभेत् ४८ पुष्पादिभोगत्यागेनस्वर्गेविद्याधरोभवेत् योगाभ्यासीभवेद्यस्तुसब्रह्मपदवीमिया
त् ४९ कटुतिक्तंचमधुरकषायलवणान्रसान् वर्जयेत्सचवैरूप्यंदौर्गंध्यंनाप्नुयात्सदा ५० तांबूलवर्जनाद्रोगीसद्योमुक्तामयो
भवेत् पादाभ्यंगपरित्यागाच्छिरोभ्यंगस्यपार्थिव ५१ दीप्तिमान्दीप्तिकरणोयक्षद्रव्यपतिर्भवेत् दधिदुग्धपरित्यागोगोलोकंल
भतेनरः ५२ इहलोकमवाप्नोतिस्थालीपाकविवर्जनात् एकांतरोपवासेनब्रह्मलोकेमहीयते ५३ चतुरोवार्षिकान्मासान्नरव
रोमाणिधारयेत् कल्पस्थायीभवेद्राजन्सनरोनात्रसंशयः ५४ नमोनारायणायेतिजपित्वानंतकंफलं विष्णुपादांबुजस्पर्शा-
त्कृतकृत्योभवेन्नरः ५५ लक्षप्रदक्षिणायस्तुकरोतिहरिमव्ययम् हंसयुक्तविमानेनसयातिवैष्णवींपुरीम् ५६ त्रिरात्रभो
जनत्यागान्मोदतेदिविदेववत् परान्नवर्जनाद्राजन्देवोवैमानुषोभवेत् ५७ प्राजापत्यंचरेद्योवैचातुर्मास्येव्रतंनरः मुच्यतेपा

तर्कैःसर्वैस्त्रिविधैर्नात्रसंशयः ५८ तप्तकृच्छ्रातिकृच्छ्राभ्यांयःक्षिपेच्छयनंहरेः सयानिपरमंस्थानंपुनरावृत्तिवर्जितम् ५९ चां
द्रायणेनयोराजन्क्षिपेन्मासचतुष्टयम् दिव्यदेहोभवेत्सोथशिवलोकंचगच्छति ६० चातुर्मास्येनरोयोवैत्यजेदन्नादिभक्षणं स
गच्छेद्धूरिसायुज्यंनभूयस्सप्रजायते ६१ भिक्षाभोजीनरोयोहिसभवेद्वेदपारगः पयोव्रतेनयोराजन्क्षिपेन्मासचतुष्टयम् ६२ त
स्यवंशसमुच्छेदःकदाचिन्नोपपद्यते पंचगव्याशनःपार्थचांद्रायणफलंलभेत् ६३ दिनत्रयंजलत्यागान्नरोगैरभिभूयते एवमादि
व्रतैःपार्थतुष्टिमायातिकेशवः ६४ सूतउवाच शृणुध्वंऋषयःसर्वेश्रावणेव्रतमुत्तमम् सर्वदुःखोपशमनंसर्वसंपत्प्रदायकम् ६५
यमस्यदंडनंयस्माद्दूरीकृतमनुत्तमम् सुवासिनीनांसौभाग्यपुत्रपौत्रप्रवर्धनम् ६६ ऋषयऊचुः कस्मिन्मासिकथंकृत्वाकिं
फलंकस्यपूजनं कोविधिःकेचनियमास्तत्सर्वंकथयस्वनः ६७ सूतउवाच श्रावणेशुक्लपक्षस्यप्रतिपद्यांविशेषतः तदारभ्य
चदर्शांतमाचरेद्व्रतमुत्तमं ६८ युधिष्ठिरउवाच यत्कृत्वामुच्यतेजंतुर्महापातकपंचकात् तत्सर्वंब्रूहिगोविंदयदितुष्टोसिकेशव
६९ श्रीकृष्णउवाच श्रावणस्यविधिंवक्ष्येसम्यक्शृणुयुधिष्ठिर यच्छ्रुत्वासादरंभूयोननरोजायतेभुवि ७० पुण्यमासेसि-
तेपक्षेप्रतिपद्यारभेद्व्रतम् एतेष्वन्यतमंपक्षंसमारभ्यव्रतंचरेत् ७१ नभमासेप्रियंदेवमर्कंगणपतिंशिवां उमापतिंचसहितंमाध
वंपूजयेन्नरः ७२ पंचामृतैर्गंधपुष्पैर्नैवेद्यैर्धूपदीपकैः नपुष्पैःपूजयेद्यस्तुमाधवंचशिवापतिम् ७३ कुलनाशोभवेत्तस्यपुण्यंतस्य
विनश्यति श्रावणेपूजयेद्देवंबिल्वपत्रैश्चपुष्पकैः ७४ कुलकोटिसमायुक्तोमोदतेविष्णुमंदिरे मौल्यादानीयपुष्पाद्यैर्यस्त्रीशूद्राद्यैर्नृ
पोत्तम ७५ ब्राह्मणैःकारयेत्पूजांमासमेकंनिरंतरम् माधवंतुलसीपत्रैःकर्कटस्थेदिवाकरे ७६ सकृदभ्यर्च्यदेवेशंनपुनर्जायते-
भुवि यःकुर्यात्तुलसीहीनांश्रावणेसिंहगेरवौ ७७ कुलानांचशतंस्वस्यनरकेपातयत्यसौ योर्चयेद्बिल्वपत्रेणशिवंगणपतिंशिवा
म् ७८ कुलकोटिसमुयुक्तोशिवलोकेमहीयते पितॄन्गुरून्समुद्दिश्यतुलसीविष्णवेर्पिता ७९ ब्रह्महत्याकोटिशतमगम्यानांस
हस्रकम् यःपूजयतिदेवेशंकमलैःकमलेक्षणम् ८० तस्यपुण्यफलंवक्तुंकःशक्तोदिविवाभुवि श्रावणेमासियोदद्याज्जातीपुष्पमु

मापतिम् ८१ जन्मकोटिसहस्रेषुनदरिद्रोभवेन्नरः वैधव्यंनैवप्राप्नोतिनारीजन्मशतेष्वपि ८२ नारीवापुरुषोवापिनभेपुष्पंसुगंधिच
दत्वाचैकंमहाविष्णोर्ब्रह्महत्यांव्यपोहति ८३ दशांगंगुग्गुलुंधूपंसमर्पयतिविष्णवे नतस्यसंततेर्हानिर्नपापीजायतेकुले ८४ घंटाना
दंतुयःकुर्यात्पूजाकालेमहात्मनः स्तूयमानोमुनिगणैर्विष्णुलोकेमहीयते ८५ घंटानादविहीनंतुयःकुर्याद्देवतार्चनम् सभुन्कानरकान्
घोरान्समूकोबधिरोभवेत् ८६ दीपदानंतुयःकुर्याद्देवायपरमात्मने अज्ञानांधतमोभित्वासाक्षात्पश्यतितंहरिम् ८७ दीपायतैलं
वर्तिंवापात्रंवायोददातिच स्त्रीनराश्चपुनःकर्मलेशमात्रंनविद्यते ८८ तैलंपात्रंतथावर्तिंनददातिस्वशक्तितः अभावेसर्वथाकुर्यात्प
रदीपप्रबोधनं ८९ भूत्वापश्चाद्द्विजकुलेजन्मसोपिमहायशाः कर्पूरस्यार्तिकंभक्त्याविष्णोर्यस्तुनिवेदयेत् ९० ब्रह्मलोकंसमासाद्य-
भुक्त्वाभोगान्मनोरथान् नभेमासिशिवंविष्णुंकुर्याद्यदिप्रदक्षिणम् ९१ पदेपदेश्वमेधस्यफलंप्राप्नोतिनित्यशः एवंसंपूज्यदेवेशं
कथांश्रुत्वाहरेरिमाम् ९२ एवंस्नात्वामासमेकमर्चयेन्माधवंशिवम् इमाःकथास्तथाश्रुत्वानगर्भेवसतिध्रुवम् ९३ युधिष्ठिरउ॰
तववागमृतंपीत्वातृप्तिर्नासीन्ममात्मनः विनाजडमतिंलोकेश्रवणात्कोनुतृप्यति ९४ भूयःश्रावणमाहात्म्यंतातविस्तरतोवद श्री
भगवानु॰ शृणुराजेंद्रवक्ष्यामिनभोमाहात्म्यमुत्तमम् ९५ यत्ज्ञात्वाजायतेशुद्धिर्मनसोमहदंहसः श्रावणेतुस्फुरवेतिष्ठन्यः
स्नायादुष्णवारिणा ९६ वह्निराशौमहाघोरेपतत्याशुनसंशयः श्रावणेमाधवंदेवंपयसास्नापयेद्यदि ९७ स्नापयेत्पंचगव्येनस
कोटिकुलमुद्धरेत् रुद्रसूक्तेनदेवेशंस्नापयेन्माधवंशिवम् ९८ कल्पकोटिसहस्राणिमोदतेशिवमंदिरे श्रावणेमासिराजेंद्रयःकु
र्यान्नक्तभोजनं ९९ अश्वमेधफलंप्राप्यशिवलोकंचगच्छति यःकुर्याच्छ्रावणेमासिमुनिपत्रेषुभोजनम् ३०० ब्रह्मलोकंसमासा
द्यमोदतेब्रह्मवर्चसा शिवंविष्णुंसमुद्दिश्यब्राह्मणान्भोजयेद्यदि १ श्रावणेशुक्लद्वादश्यांमुच्यतेचऋणत्रयात् श्रावणेमासिक
र्तव्यंफलराशिविमोक्षणं २ तस्यवैसंततेर्हानिराकल्पंनैवजायते योदद्याच्छ्रावणेमासिमातुलिंगंद्विजातये ३ तस्यपुत्रोभवेद्रा
जन्सर्वपापैःप्रमुच्यते श्रावणेतुव्यतीपातेब्राह्मणान्भोजयेद्यदि ४ पायसेनघृताक्तेनवंध्यापुत्रमवाप्नुयात् येचविष्णुकथासक्ता

येचतद्यजनाशयाः ५ गायत्रीजपनिरतानतेयांनियमालयम् सहस्रनामपठनेनिरतास्तोत्रपाठकाः ६ गीतापाठेचनिरतास्तेनयां
नियमालयम् गोदानस्यप्रदातारःशिवयात्रापरायणाः ७ गोपीचंदनलिप्तांगानतेयांनियमालयम् येषांगृहेअग्निहोत्रंपुस्तकंभा
गवतस्यच ८ गीतायाःपुस्तकंवापिनतेयांनियमालयम् रुद्राक्षंचप्रवालंचहेममुक्तागलेस्थिताः ९ धारयन्खड्गपात्रंचनतेयांनि
यमालयम् श्रावणेमासिकर्तव्यंसोमवारव्रतंशुभम् १० नक्तव्रतंप्रदोषेचकर्तव्यंविधिपूर्वकम् इत्यादिष्टाभगवताऋषयःशंसि
तव्रताः ११ सदाविष्णुकथासक्तचेतसांभावितात्मनाम् कर्मलोपंपूरयंति कृत्वाकृत्वाप्यहर्निशं १२ स्नात्वाविष्णुकथांश्रुत्वा तथासं
पूज्यमाधवम् सर्वबंधाद्विनिर्मुक्तोविष्णोःसायुज्यमाप्नुयात् १३ आदावंतेतथामध्येयथाशक्तियथारुचि उद्यापनंविनाराजन्
फलंनैवभवेत्क्वचित् १४ तस्मात्सर्वप्रयत्नेनउद्यापनविधिंचरेत् पंचाशद्वाशतंवापिब्राह्मणान्भोजयेत्ततः १५ एतच्छास्त्रप्रवक्तारं
यथाविभवमर्चयेत् अपूजयित्वावक्तारंयःशृणोतिकथामिमां १६ इक्षुयंत्रेचिरंस्थित्वाप्नुविंध्यालोहिजायते नशृणोतिकथांय
स्तुवाच्यमानाद्विजोवरः १७ अरण्येनिर्जलेदेशेभवतिब्रह्मराक्षसः धर्मशास्त्रप्रवक्तारंशांतंदांतंजितेंद्रियम् १८ मिष्टान्नै
र्भोजयेद्यस्तु सर्वपापैःप्रमुच्यते अनेनविधिनायस्तुचातुर्मास्यव्रतंचरेत् १९ तस्यपुण्यफलंवक्तुंविष्णुर्ब्रह्माशिवोयमः नेंद्रो
नसूर्योवरुणोमन्वाद्याःकिमुतापरे २० व्रतैरनेकैर्नियमैःपांडवश्रेष्ठभावनः कल्पस्थायीविष्णुलोकेवसतेनात्रसंशयः २१ ततोविवा
हयेद्देवंशंखचक्रगदाधरम् कार्तिकेशुक्लपक्षस्यत्वेकादश्यांपृथासुत २२ उत्तिष्ठोत्तिष्ठदेवेशयोगनिद्रांविहायच लक्ष्मींविसृज्य
लोकेत्वमलक्ष्मींनुदकेशव २३ शृणोतिध्यातियस्तौतिजुहोत्याख्यातियोनरः हरेर्भक्तिकरःपार्थसगच्छेद्वैष्णवंपदं २४ दुग्धा
ब्धिर्वाविशयनेभगवाननंतोयस्मिन्दिनेस्वपितिचाथविबुध्यतेच तस्मिन्ननन्यमनसामुपवासभाजांपुंसांददातिचगतिंगरुडा
सनोसौ २५ इतिश्रीभविष्योत्तरपुराणेविष्णोःशयन्येकादशीचातुर्मास्यमाहात्म्येश्रावणकृत्यंसंपूर्णम् अथश्रावणकृ
ष्णैकादशीकथा युधिष्ठिरउवाच आषाढशुक्लपक्षेतुयद्देवशयनव्रतम् तन्मयाश्रुतपूर्वंहिपुराणेबहुविस्तरं १ श्रावणेशु

कृपक्षेतुकिंनामैकादशीभवेत् एतत्कथयगोविंदवासुदेवनमोस्तुते २ श्रीकृष्णउवाच शृणुराजन्प्रवक्ष्यामिव्रतंपापप्रणाशनम्
नारदायपुराराजन्पृच्छतेचपितामहः ३ परंयदुक्तवान्ताततदहंतेवदामिच नारदउवाच भगवन्श्रोतुमिच्छामित्वत्तोहंकमलासन ४
श्रावणस्यासितेपक्षेकिंनामैकादशीभवेत् कोदेवःकोविधिस्तस्याःकिंपुण्यंकथयप्रभो ५ ब्रह्मोवाच शृणुनारदतेवच्मिलोका
नांहितकाम्यया श्रावणैकादशीकृष्णाकामिकेतिचनामतः ६ तस्याःश्रवणमात्रेणवाजपेयफलंलभेत् तस्यांयःपूजयेद्देवंशंख
चक्रगदाधरम् ७ श्रीधराख्यंहरिंविष्णुंमाधवंमधुसूदनं यजतेध्यायतेयोवैतस्यपुण्यफलंशृणु ८ नगंगायांनकाश्यांवैनैमिषे
नचपुष्करे तत्फलंसमवाप्नोतियत्फलंविष्णुपूजनात् ९ केदारेचकुरुक्षेत्रेराहुग्रस्तेदिवाकरे नतत्फलमवाप्नोतियत्फलंकृष्णपूज
नात् १० ससागरवनोपेतांयोददातिवसुंधराम् गोदावर्यांगुरौसिंहेव्यतीपातेचगंडके ११ नतत्फलमवाप्नोतियत्फलंकृष्णपूजना
त् कामिकाव्रतकारीचत्वुभौफलसमौस्मृतौ १२ प्रसूयमानांयोधेनुंदद्यात्सोपस्करांनरः तत्फलंसमवाप्नोतिकामिकाव्रतकार
कः १३ श्रावणेश्रीधरंदेवंपूजयेद्योनरोत्तमः तेनैवपूजितादेवागंधर्वोरगपन्नगाः १४ तस्मात्सर्वप्रयत्नेनकामिकादिवसेहरिःपूज
नीयोयथाशक्त्यामनुष्यैःपापभीरुभिः १५ संसारार्णवमग्नायेपापपंकसमाकुलाः तेषामुद्धरणार्थायकामिकाव्रतमुत्तमं १६ नातः
परतराकाचित्पवित्रापापहारिणी एवंनारदजानीहिस्वयमाहपुराहरिः १७ अध्यात्मविद्यानिरतैर्यत्फलंप्राप्यतेनरैः ततोबहुतरं
विद्धिकामिकाव्रतसेवनात् १८ रात्रौजागरणंकुर्यात्कामिकाव्रतकृन्नरः नपश्यतियमंरौद्रंनैवपश्यतिदुर्गतिम् १९ नपश्यतिकुयो
निंचकामिकाव्रतसेवनात् कामिकायाव्रतेनैवकैवल्यंयोगिनोगताः २० सर्वैःसर्वप्रयत्नेनकर्तव्यानियतात्मभिः तुलसीप्रभवैःप
त्रैर्योनरःपूजयेद्धरिं २१ नवैसलिप्यतेपापैःपद्मपत्रमिवांभसा सुवर्णभारमेकंतुरजतंचचतुर्गुणम् तत्फलंसमवाप्नोतितुलसीद
लपूजनात् २२ रत्नमौक्तिकवैडूर्यप्रवालादिभिरर्चितः नतुष्यतितथाविष्णुस्तुलसीपूजनाद्यथा २३ तुलसीमंजरीभिस्तुपूजितो
येनकेशवः आजन्मकृतपापस्यतेनसंमार्जितालिपिः २४ यादृष्टानिखिलाघसंघशमनीस्पृष्टावपुःपावनीरोगाणामभिवंदितानिर

सनीसिक्कांतकत्रासिनी प्रत्यासत्तिविधायिनीभगवतःकृष्णस्यसंरोपिनान्यस्नानञ्चरणेविमुक्तिफलदानस्यैतुलस्यैनमः २५ दीपंद-
दातियोमर्त्यौदिवारात्रौहरेर्दिने तस्यपुण्यस्यसंख्यानंचित्रगुप्तोपिवेत्तिन २६ कृष्णाग्रेदीपकोयस्यज्वलेदेकादशीदिने पितरस्तस्य
तृप्यंतिअमृतेनदिविस्थिताः २७ घृतेनदीपंप्रज्वाल्यतिलतैलेनवापुनः प्रयातिसूर्यलोकेसौदीपकोटिशतैर्वृतः २८ अयंतवाग्रेकथि
तःकामिकामहिमामया अतोनरैःप्रकर्तव्यासर्वपातकहारिणी २९ ब्रह्महत्याधहारिणीभ्रूणहत्याविनाशिनी त्रिदिवस्थानदात्रीच
महापुण्यफलप्रदा ३० श्रुत्वामाहात्म्यमेतस्यानरःश्रद्धासमन्वितः विष्णुलोकमवाप्नोतिसर्वपापैःप्रमुच्यते ३१ इतिश्रीब्रह्मवै
वर्तपुराणेश्रावणकृष्णैकादशीकामिकानाम्नीमाहात्म्यंसंपूर्णम् अथश्रावणशुक्लैकादशीकथा युधिष्ठिरउवा॰ श्रावण
स्यसितेपक्षेकिंनामैकादशीभवेत् कथयस्वप्रदानेनममाग्रेमधुसूदन १ श्रीकृष्णउवा॰ शृणुष्वावहितोराजन्कथांपाप
हरांपराम् यस्याःश्रवणमात्रेणवाजपेयफलंलभेत् २ द्वापरस्ययुगस्यादौपुरामाहिष्मतीपुरे राजामहीजिदाख्यातोराज्यंपा-
लयतिस्वयम् ३ पुत्रहीनस्यतस्यैवनतद्राज्यंसुखप्रदं अपुत्रस्यसुखंनास्तिइहलोकेपरत्रच ४ यततोस्यसुतप्राप्तौकालोब
हुतरोगतः नप्राप्तश्चसुतोराज्ञासर्वसौख्यप्रदोनृणाम् ५ दृष्ट्वात्मानंप्रवयसंराजाचिंतापरोभवत् सदोगतःप्रजामध्येइदंवचन
मब्रवीत् ६ इहजन्मनिभोलोकानमयापातकंकृतम् ७ अन्यायोपार्जितंवित्तंक्षिप्तंकोशेमयानहि ब्रह्मस्वंदेवद्रविणंनगृहीतं
मयाक्वचित् ८ न्यासापहारोनकृतःपरस्यबहुपापदः सुतवत्पालितालोकाधर्मेणविजितामही ९ दुष्टेषुपातितोदंडोबंधुपुत्रोप
मेष्वपि शिष्टाःसुपूजितालोकाद्वेष्याश्चापिमहाजनाः १० इत्येवंव्रजतोमार्गेधर्मयुक्तेद्विजोत्तमाः कस्मान्ममगृहेपुत्रोनजातस्त
द्विचार्यताम् ११ इतिवाक्यंद्विजाःश्रुत्वासप्रजाःसपुरोहिताः मंत्रयित्वानृपहितंजग्मुस्तेगहनंवनं १२ इतस्ततश्चपश्यंतश्चाश्र
मान्नृषिसेविताम् नृपतेर्हितमिच्छंतोददृशुर्मुनिसत्तमं १३ तप्यमानंतपोघोरंचिरानंदंनिरामयम् निराहारंजितात्मानंजितक्रो-
धंसनातनम् १४ लोमशंधर्मतत्त्वज्ञंसर्वशास्त्रविशारदं दीर्घायुषंमहात्मानमनेकब्रह्मसंमितम् १५ कल्पेगतेयस्यएकमेकंलो

प्रविशीर्यते अतोलोमशनामानंत्रिकालज्ञंमहामुनिं १६ तंदृष्ट्वाहर्षिताःसर्वेआजग्मुस्तस्यसन्निधौ यथान्यायंयथार्हंतेनमश्चक्रुर्यथो
दितं १७ विनयावनताःसर्वेऊचुश्चैवपरस्परं अस्मद्भाग्यवशादेवप्राप्तोयंमुनिसत्तमः १८ तांस्तथाप्रणतान्दृष्ट्वाह्युवाचमुनिसत्तमः
लोमशउवाच किमर्थमिहसंप्राप्ताःकथयध्वंस्वकारणम् १९ मद्दर्शनाल्हादगिरःस्तुवंतइहमांकिमु असंशयंकरिष्यामिभ
वतांयद्धितंभवेत् २० परोपकृतयेजन्ममादृशानांनसंशयः जनाऊचतुः श्रूयतामभिधास्यामोवयमागमकारणं २१ संशय
च्छेदनार्थायतवसन्निधिमागताः पद्मयोनेःपरतरस्त्वत्तःश्रेष्ठोनविद्यते २२ अतःकार्यवशात्प्राप्ताःसमीपंभवतोवयम् महीजि
न्नामराजासौपुत्रहीनोस्तिसांप्रतं २३ वयंतस्यप्रजाब्रह्मन्पुत्रवत्तेनपालिताः तंपुत्ररहितंदृष्ट्वातस्यदुःखेनदुःखिताः २४ तपः
कर्तुमिहायातामतिंकृत्वातुनैष्ठिकीं तस्यभाग्यवशाद्दृष्टस्त्वमस्माभिर्द्विजोत्तम २५ महतांदर्शनेनैवकार्यसिद्धिर्भवेन्नृणाम् उप
देशंवदमुनेराज्ञःपुत्रोयथाभवेत् २६ इतितेषांवचःश्रुत्वामुहूर्तंध्यानमास्थितः प्रत्युवाचमुनिर्ज्ञात्वातस्यजन्मपुरातनं २७
लोमशउवाच पूर्वजन्मनिवैश्योयंधनहीनोनृशंसकृत् वाणिज्यकर्मणिरतोग्रामाद्ग्रामांतरंभ्रमन् २८ ज्येष्ठमासिसिते
पक्षेदशमीदिवसेतथा मध्यान्हेद्युमणौप्राप्तेग्रामसीम्निजलाशयम् २९ कूपिकांसजलांदृष्ट्वाजलपानेमनोदधौ सद्यःसूतास
वत्साचधेनुस्तत्रसमागता ३० तृषातुरानिदाघार्त्तातस्यांनीरंपपौतुसा पिबंतींवारयित्वातामसौतोयंस्वयंपपौ ३१ कर्मणस्त
स्यपाकेनसपुत्ररहितोनृपः पूर्वजन्मकृतात्पुण्यात्प्राप्तंराज्यमकंटकम् ३२ जनाऊचुः पुण्यात्पापक्षयंयातिपुराणेश्रूय
तेमुने पुण्योपदेशंकथययेनपापक्षयोभवेत् ३३ यथाभवत्प्रसादेनपुत्रोस्यभवितातथा लोमशउवाच श्रावणेशुक्लप
क्षेतुपुत्रदानामविश्रुता एकादशीतिथिश्चास्तिकुरुध्वंतद्व्रतंजनाः ३४ यथाविधियथान्यायंयथोक्तंजागरान्वितम् तस्याःपुण्यं
शुविमलंददंतुनृपतेर्जनाः ३५ एवंकृतेशुनियतंराज्ञःपुत्रोभविष्यति श्रुत्वैतल्लोमशवचस्तंप्रणम्यद्विजोत्तमम् ३६ प्रजग्मुः-
स्वगृहान्सर्वेहर्षोत्फुल्लविलोचनाः श्रावणंतुसमासाद्यश्रुत्वालोमशभाषितम् ३७ राज्ञासहव्रतंचक्रुःसर्वेश्रद्धासमन्विताः

द्वादशीदिवसेपुण्यंदद्युर्नृपतयेजनाः ३८ दत्तेपुण्येयथाराज्ञीगर्भमाधत्तशोभनम् प्राप्तेप्रसवकालेसासुषुवेपुत्रमूर्जितम् ३९ एवमेषानृ
पश्रेष्ठपुत्र दानामविश्रुता कर्तव्यासुखमिच्छद्भिरिहलोकेपरत्रच ४० श्रुत्वामाहात्म्यमेतस्याः सर्वपापैःप्रमुच्यते इह पुत्र सुखंप्रा
प्यपरत्रस्वर्गतिर्भवेत् ४१ इतिश्रीभविष्योत्तरपुराणेश्रावणकृष्णैकादशीपुत्रदानाममाहात्म्यंसंपूर्णम् अथभाद्रपदकृष्णैकाद
शीकथा युधिष्ठिरउवाच भाद्रस्यकृष्णपक्षेतुकिंनामैकादशीभवेत् एतदिच्छाम्यहंश्रोतुंकथयस्वजनार्दन १ श्रीकृष्णउवा
च शृणुष्वैकमनाराजन्कथयिष्यामिविस्तरात् अजेतिनामतःप्रोक्तासर्वपापप्रणाशिनी २ पूजयित्वाहृषीकेशंव्रतंतस्याःकरोतियः
पापानितस्यनश्यंतिव्रतस्यश्रवणादपि ३ नातःपरतराराजँल्लोकद्वयहितावहा सत्यमुक्तंमयाह्येतन्नासत्यंभाषितंमम ४ हरिश्चंद्रइति
ख्यातोबभूवनृपतिःपुरा चक्रवर्तीसत्यसंधोसमस्तायाभुवःपतिः ५ कस्यापिकर्मणोयोगाद्राज्यभ्रष्टोबभूवसः विक्रीत्वावनितांपुत्रं
सचकारात्मविग्रहम् ६ पुल्कसस्यचदासत्वंगतोराजासपुण्यकृत् सत्यमालंब्यराजेंद्रमृतचैलापहारकः ७ सोभवन्नृपतिश्रेष्ठोन-
सत्याच्चलितस्तथा एवंगतस्यनृपतेर्बहवोवत्सरागताः ८ ततश्चिंतापरोराजाबभूवासतदुःखितः किंकरोमिक्वगच्छामिनिष्कृति
र्मेकथंभवेत् ९ इतिचिंतयतस्तस्यमग्नस्यवृजिनार्णवे आजगाममुनिःकश्चिज्ज्ञात्वाराजानमातुरं १० परोपकरणार्थायनिर्मितो
ब्रह्मणाद्विजः सतंदृष्ट्वाद्विजवरंननामनृपसत्तमः ११ कृतांजलिपुटोभूत्वागौतमस्याग्रतःस्थितः कथयामासवृत्तांतमात्मनोदुःखसं
युतम् १२ श्रुत्वानृपतिवाक्यानिगौतमोविस्मयान्वितः उपदेशंनृपतयेव्रतस्यास्यमुनिर्ददौ १३ मासिभाद्रपदेराजन्कृष्णपक्षेतुशो
भना एकादशीसमायाताअजानाम्न्यतिपुण्यदा १४ तस्याःकुरुव्रतंराजन्पापनाशोभविष्यति तवभाग्यवशादेषासप्तमेन्हिस
मागता १५ उपवासपरोभूत्वारात्रौजागरणंकुरु एवंतस्याव्रतेचीर्णेसर्वपापक्षयोभवेत् १६ तवपुण्यप्रभावेनचागतोहंनृपोत्तम
इत्येवंकथयित्वातुमुनिरंतरधीयत १७ मुनिवाक्यंनृपःश्रुत्वाचकारव्रतमुत्तमं कृतेतस्मिन्व्रतेराज्ञःपापस्यांतोभवत्क्षणात् १८ श्रू
यतांराजशार्दूलप्रभावोस्यव्रतस्यच यद्दुःखंबहुभिर्वर्षैर्भोक्तव्यंतत्क्षयोभवेत् १९ निस्तीर्णदुःखोराजासीद्व्रतस्यास्यप्रभावतः

पत्न्यासहस्समायोगंपुत्रजीवनमापसः २० देवदुंदुभयोनेदुःपुष्पवर्षमभूद्दिवः एकादश्याःप्रभावेनप्राप्तंराज्यमकंटकं २१ स्वर्गंलेभेहरिश्चं
द्रः सपुरःसपरिच्छदः ईदृग्विधंव्रतंराजन्येकुर्वंतिद्विजोत्तमाः २१ सर्वपापविनिर्मुक्तास्त्रिदिवंयांतितेध्रुवम् पठनाच्छ्रवणाद्राजन्अ
श्वमेधफलंलभेत् २३ इतिश्रीब्रह्मवैवर्तपुराणेभाद्रपदकृष्णाअजानाम्न्यैकादशीमाहात्म्यंसंपूर्णम् अथभाद्रपदशुक्लैकादशीक
थाप्रारभ्यते युधिष्ठिरउवाच नभस्यासितपक्षेतुकिंनामैकादशीभवेत् कोदेवःकोविधिस्तस्याःकिंपुण्यंचवदस्वनः १ श्रीकृष्ण
उवाच कथयामिमहापुण्यांस्वर्गमोक्षप्रदायिनीम् वामनैकादशींराजन्सर्वपापहरांपरां २ इमामेवजयंत्याख्यांप्राहुरेकादशींनृप
यस्याःश्रवणमात्रेणसर्वपापक्षयोभवेत् ३ वाजपेयफलंप्रोक्तंनातःपरतरंनृणां पापिनांपापनाशायजयंतीव्रतमुत्तमम् ४ नातःपरतरा
राजन्नैवमोक्षप्रदायिनी एतस्मात्कारणाद्राजन्कर्तव्यागतिमिच्छता ५ वैष्णवैर्ममभक्तैस्तुमनुजैर्मत्परायणैः नभस्येवामनोयैस्तु
पूजितस्तैर्जगत्त्रयम् ६ पूजितंनात्रसंदेहस्तेयांतिहरिसन्निधिं वामनःपूजितोयेनकमलैःकमलेक्षणः ७ नभस्यासितपक्षेतुजयंत्ये-
कादशीदिने तेनार्चितंजगत्सर्वंत्रयोदेवाःसनातनाः ८ एतस्मात्कारणाद्राजन्कर्तव्योहरिवासरः अस्मिन्कृतेनकर्तव्यंकिंचिदस्तिज
गत्त्रये ९ अस्यांप्रसुप्तोभगवानेत्यंगपरिवर्तनं तस्मादेतांजनाःसर्वेवदंतिपरिवर्तिनीं १० युधिष्ठिरउवाच संशयोस्तिमहान्म
ह्यंश्रूयतांचजनार्दन कथंसुप्तोसिदेवेशकथंयास्यंगवर्तनम् ११ किमर्थंदेवदेवेशबलिर्बद्धस्त्वयासुरः संतुष्टःपृथिवीदेवाःकि
मकुर्वन्जनार्दन १२ कोविधिःकिंव्रतंचैवचातुर्मास्यमुपासताम् त्वयिसुप्तेजगन्नाथकिंकुर्वंतिजनाःप्रभो १३ एतद्विस्तरतो-
ब्रूहिसंशयंहरमेप्रभो श्रीकृष्णउवाच श्रूयतांराजशार्दूलकथांपापहरांपरां १४ बलिर्वैदानवःपूर्वमासीत्त्रेतायुगेनृप अपूज
यंश्चमान्नित्यंमद्भक्तोमत्परायणः १५ जपैस्तुविविधैःसूक्तैर्यजतेमांसनित्यशः द्विजानांपूजकोनित्यंयज्ञकर्मकृताशयः १६ परंत्विं
द्रकृतद्वेषीदेवलोकमजीजयत् मद्दत्तमिहलोकंवैजितंतेनमहात्मना १७ विलोक्यचततःसर्वेदेवाःसहत्यमंत्रयन् सर्वैर्मिलित्वागं
तव्यंदेवंविज्ञापितुंप्रभुम् १८ ततश्चदेवऋषिभिःसाकमिंद्रोगतःप्रभुम् शिरसाद्यवनींगत्वास्तुतइंद्रेणसूक्तिभिः १९ गुरुणादेव

तैःसार्द्धंबहुधापूजितोह्यहम् ततोवामनरूपेणत्ववतीर्णश्चपंचमे २० अत्युग्ररूपेणतदासर्वब्रह्मांडरूपिणा बालकेनजितःसोवैस
त्यमालंब्यतस्थिवान् २१ युधिष्ठिरउवाच त्वयावामनरूपेणसोसुरश्चजितःकथम् एतत्कथयदेवेशमह्यंभक्तायविस्तरात् २२
श्रीकृष्णउवाच मयाल्लोकेनसबलिःप्रार्थितोबटुरूपिणा पदत्रयमितांभूमिंदेहिमेभुवनत्रयं २३ दत्तंभवतितेराजन्नात्र-
कार्याविचारणा इत्युक्तश्चमयाराजादत्तवांस्त्रिपदांभुवम् २४ संकल्पमात्राद्ववृधेदेहस्त्रैविक्रमःपरम् भूर्लोकेतुकृतौपादौभुवर्लो
केतुजानुनी २५ स्वर्लोकेतुकटिंन्यस्यमहर्लोकेतथोदरम् जनलोकेतुहृदयंतपोलोकेचकंठकम् २६ सत्यलोकेमुखंस्थाप्यउत्तमां
गंततोर्ध्वतः चंद्रसूर्यग्रहाश्चैवभगणायोगसंयुतः २७ सेंद्राश्चैवतदादेवानागाःशेषादयःपरे स्तुवंतोवेदसंभूतैःसूक्तैश्चविविधै-
स्तुमाम् २८ करेगृहीत्वातुबलिमब्रुवंवचनंतदा एकेनपूरितापृथ्वीद्वितीयेनत्रिविष्टपम् २९ तृतीयस्यतुपादस्यस्थानंदेहिममानघ
एवमुक्तेमयासोपिमस्तकंदत्तवान्बलिः ३० ततोवैमस्तकेह्येकंपदन्यस्तंमयातदा क्षिप्तोरसातलेराजन्दानवोममपूजकः ३१ विन
यावनतंदृष्ट्वाप्रसन्नोस्मिजनार्दनः बलेवसामिसततंसन्निधौतवमानद ३२ इत्यवोचंमहाभागंबलिंवैरोचनिंतदा नभस्यशुक्लप
क्षेतुपरिवर्तिनिवासरे ३३ ममैकातत्रमूर्तिश्चबलिमाश्रित्यतिष्ठति द्वितीयाशेषपृष्ठेवैक्षीराब्धौसागरोत्तमे ३४ सुप्यतेचहृषीकेशो
यावच्चायातिकार्तिकी तावद्भवतितत्पुण्यंसर्वपुण्योत्तमोत्तमं ३५ एतस्मात्कारणाद्राजन्कर्तव्यैषाप्रयत्नतः एकादशीमहापुण्यापवि
त्रापापहारिणी ३६ अस्यांप्रसुप्तोभगवानेत्यंगपरिवर्तनम् एतस्यांपूजयेद्देवंत्रैलोक्यस्यपितामहं ३७ दधिदानंप्रकर्तव्यंरौप्यतंदुल
संयुतं रात्रौजागरणंकृत्वामुक्तोभवतिमानवः ३८ एवंयःकुरुतेराजन्नेकादश्यांव्रतंशुभम् सर्वपापहरंचैवभुक्तिमुक्तिप्रदायकम् ३९
सदेवलोकंसंप्राप्यभ्राजतेचंद्रमायथा शृणुयाच्चैवयोमर्त्यःकथांपापहरांपराम् ४० अश्वमेधसहस्रस्यफलमाप्नोतिमानवः ४१
इतिश्रीस्कंदपुराणेभाद्रपदशुक्लपरिवर्तिनीनामैकादशीमाहात्म्यंसंपूर्णम् अथआश्विनकृष्णैकादशीकथा युधिष्ठिरउवा०
कथयस्वप्रसादेनममाग्रेमधुसूदन आश्विनेकृष्णपक्षेतुकिंनामैकादशीभवेत् १ श्रीकृष्णउवाच आश्विनस्यासितेपक्षेइंदि

रानामनामतः तस्याव्रतप्रभावेन महापापंप्रणश्यति २ अधोयोनिगतानांचपितॄणांगतिदायिनी शृणुष्वावहितोराजन् कथांपापहरां
पराम् ३ यस्याःश्रवणमात्रेण वाजपेयफलंलभेत् पुराकृतयुगेराजा बभूवरिपुसूदनः ४ इंद्रसेन इति ख्यातःपुरींमाहिष्मतींप्रति
सराज्यंपालयामासधर्मेणयशसान्वितः ५ पुत्रपौत्रसमायुक्तोधनधान्यसमन्वितः माहिष्मत्यधिपोराजाविष्णुभक्तिपरायणः ६ जपन्
गोविंदनामानिमुक्तिदानिनराधिपः कालंनयतिविधिवदध्यात्मस्यविचिंतकः ७ एकस्मिन्दिवसेराज्ञिसुखासीनेसदोगते अवतीर्याग
मच्छ्रीमान्नंबरान्नारदोमुनिः ८ तमागतमभिप्रेत्यप्रत्युत्थायकृतांजलिः पूजयित्वार्घविधिनाचासनेसन्यवेशयत् ९ सुखोपविष्टःस
मुनिःप्रत्युवाचनृपोत्तमम् कुशलंतवराजेंद्रसप्तस्वंगेषुवर्तते १० धर्मेमतिर्वर्ततेतेविष्णुभक्तिरतस्तथा इतिवाक्यंतुदेवर्षेःश्रुत्वाराजा
तमब्रवीत् ११ राजोवाच त्वत्प्रसादान्मुनिश्रेष्ठसर्वत्रकुशलंमम अद्यक्रतुक्रियाःसर्वाःसफलास्तवदर्शनात् १२ प्रसादंकुरुविप्र
र्षेब्रूह्यागमनकारणम् इतिराज्ञोवचःश्रुत्वादेवर्षिर्वाक्यमब्रवीत् १३ नारदउवाच श्रूयतांराजशार्दूलमद्वचोविस्मयप्रदम् ब्र
ह्मलोकादहंप्राप्तोयमलोकंनृपोत्तम १४ शमनेनार्चितोभक्त्याउपविष्टोवरासने धर्मशीलःसत्यवांश्चभास्करिंसमुपासते १५ बहुपुण्य
प्रकर्ताचव्रतवैकल्पदोषतः सभायांश्राद्धदेवस्यमयादृष्टःपितातव १६ कथितस्तेनसंदेशस्तंनिबोधजनेश्वर इंद्रसेनइतिख्यातोरा
जामाहिष्मतीप्रभुः १७ तस्याग्रेकथयब्रह्मन्स्थितंमांयमसन्निधौ केनापिचांतरायेणपूर्वजन्मोद्भवेनवै १८ स्वर्गंप्रेषयमांपुत्रइंदिरा-
व्रतदानतः इत्युक्तोहंसमायातःसमीपंतवपार्थिव १९ पितुःस्वर्गतयेराजन्निंदिराव्रतमाचर तेनव्रतप्रभावेनस्वर्गंयास्यतितेपिता२०
राजोवाच कथयस्वप्रसादेनभगवन्निंदिराव्रतम् विधिनाकेनकर्तव्यंकस्मिन्पक्षेतिथौतथा २१ नारदउवाच शृणुराज
न्हितंवच्मिव्रतस्यास्यविधिंशुभम् आश्विनस्यासितेपक्षेदशमीदिवसेशुभे २२ प्रातःस्नानंप्रकुर्वीतश्रद्धायुक्तेनचेतसा ततोमध्या
न्हसमयेस्नानंकृत्वाबहिर्जले २३ पितॄणांप्रीतयेश्राद्धंकुर्याच्छ्रद्धासमन्वितः एकभुक्तिंततःकृत्वारात्रौभूमौशयीतच २४ प्रभातेविम-
लेजातेप्राप्तेचैकादशीदिने मुखप्रक्षालनंकुर्याद्दंतधावनपूर्वकम् २५ उपवासस्यनियमंगृण्हीयाद्भक्तिभावतः अद्यस्थित्वानिराहारः

सर्वभोगविवर्जितः २६ श्वोभोक्ष्येपुंडरीकाक्षशरणंमेभवाच्युत इत्येवंनियमंकृत्वामध्यान्हसमयेतथा २७ शालग्रामशिलाग्रेतुश्राद्धंकृत्वायथाविधि भोजयित्वाद्विजान्शक्त्यान्दक्षिणाभिःसुपूजितान् २८ पितृशेषंसमाघ्रायगवेदद्याद्विचक्षणः पूजयित्वाहृषीकेशंधूपगंधादिभिस्तथा २९ रात्रौजागरणंकुर्यात्केशवस्यसमीपतः ततःप्रभातसमयेसंप्राप्तेद्वादशीदिने ३० अर्चयित्वाहरिंभक्त्याभोजयित्वाद्विजानथ बंधुदौहित्रपुत्राद्यैःस्वयंभुंजीतवाग्यतः ३१ अनेनविधिनाराजन्कुरुव्रतमतंद्रितः विष्णुलोकंप्रयास्यंतिपितरस्तवभूपते ३२ इत्युक्त्वानृपतिंराजन्मुनिरंतरधीयत यथोक्तविधिनाराजाचकारव्रतमुत्तमम् ३३ अंतःपुरेणसहितःपुत्रभृत्यसमन्वितः कृतेव्रतेतुकौंतेयपुष्पवृष्टिरभूद्दिवः ३४ तस्मिनागरुडारूढोजगामहरिमंदिरम् इंद्रसेनोपिराजर्षिःकृत्वाराज्यमकंटकम् ३५ राज्येनिवेश्यतनयंजगामत्रिदिवंस्वयम् इंदिराव्रतमाहात्म्यंतवाग्रेकथितंमया ३६ पठनाच्छ्रवणाच्चास्यसर्वपापैःप्रमुच्यते भुक्त्वेहनिखिलान्भोगान्विष्णुलोकेवसेच्चिरम् ३७ इतिश्रीब्रह्मवैवर्तपुराणेआश्विनकृष्णैकादशीइंदिरामाहात्म्यंसंपूर्णम् अथआश्विनशुक्लैकादशीकथा युधिष्ठिरउवाच कथयस्वप्रसादेनभगवन्मधुसूदन इषस्यशुक्लपक्षेतुकिंनामैकादशीभवेत् १ श्रीकृष्णउवाच शृणुराजेंद्रवक्ष्यामिमाहात्म्यंपापनाशनम् शुक्लपक्षेचाश्वयुजिभवेदेकादशीतुया २ पाशांकुशेतिविख्यातासर्वपापहरापरा पद्मनाभाभिधानंतुपूजयेत्तत्रमानवः ३ सर्वाभीष्टफलप्राप्त्यैस्वर्गमोक्षप्रदंनृणां तपस्तप्त्वानरस्तीव्रंचिरंसुनियतेंद्रियः ४ यत्फलंसमवाप्नोतितन्नत्वागरुडध्वजं कृत्वापिबहुशःपापंनरो मोहसमन्वितः ५ नयातिनरकंघोरंनत्वापापहरंहरिम् पृथिव्यांयानितीर्थानिपुण्यान्यायतनानिच ६ तानिसर्वाणिप्राप्नोतिविष्णोर्नामानुकीर्तनात् देवंशार्ङ्गधरंविष्णुंयेप्रपन्नाजनार्दनम् ७ नतेषांयमलोकस्थ नृणांवैजायतेक्वचित् उपोष्यैकादशीमेकांप्रसंगेनापिमानवाः ८ नयांतियातनांयामींपापंकृत्वातुदारुणम् वैष्णवःपुरुषोभूत्वाशिवनिंदांकरोतियः ९ योनिंदेद्वैष्णवंलोकंसयातिनरकंध्रुवम् अश्वमेधसहस्राणिराजसूयशतानिच १० एकादश्युपवासस्यकलांनार्हंतिशोडशीं एकादशीसमंपुण्यंकिंचिल्लोकेनविद्यते ११ नेदृशंपा

कनंकिंचित्त्रिषुलोकेषुविद्यते यादृशंपद्मनाभस्यदिनंपातकहानिदम् १२ तावत्पापानितिष्ठंतिदेहेस्मिन्मनुजाधिप यावन्नोपोष्य
तेजंतुःपद्मनाभदिनंशुभम् १३ व्याजेनापिकृताराजन्नदर्शयतिभास्करिं स्वर्गमोक्षप्रदात्व्येषाशरीरारोग्यदायिनी १४ सुकलत्र
प्रदाह्येषाधनपुत्रप्रदायिनी नगंगानगयाराजन्नकाशीनचपुष्करं १५ नचापिकौरवंक्षेत्रंपुण्यंभूपहरेर्दिनात् ० रात्रौजागरणंकृत्वासमु
पोष्यहरेर्दिनं १६ अनायासेनभूपालप्राप्यतेवैष्णवंपदम् दशवैमातृकेपक्षेदशराजेंद्रपैतृके १७ प्रियायादशपक्षेतुपुरुषानुद्धरेन्न
रः चतुर्भुजादिव्यरूपानागारिकृतकेतनाः १८ स्रग्विणःपीतवस्त्राश्चप्रयांतिहरिमंदिरम् बालत्वेयौवनत्वेनवृद्धत्वेचनृपोत्तम १९
उपोष्यद्वादशीनूनंनैतिपापोपिदुर्गतिम् पांशांकुशासुपोष्यैव आश्विनस्यासितेतरे २० सर्वपापविनिर्मुक्तोहरिलोकंसगच्छति दत्वा
हेमतिलान्भूमिंगामन्नमुदकंतथा २१ उपानहस्त्रछत्रादिनपश्यतियमंनरः यस्यपुण्यविहीनानिदिनान्यपगतानिच २२ सलो
हकारभस्त्रेवश्वसन्नपिमृतोहिवै नवंध्यंदिवसंकुर्याद्दरिद्रोपिनृपोत्तम २३ समाचरन्यथाशक्तिस्नानदानादिकाःक्रियाः तडागा
रामसौधानांसत्राणांपुण्यकर्मणां २४ कर्तारोनैवपश्यंतिधीरास्तांयमयातनाम् दीर्घायुषोधनाढ्याश्चकुलीनारोगवर्जिताः २५ दृ
श्यंतेमानवाल्लोकेपुण्यकर्तारईदृशाः किमत्रबहुनोक्तेनयांत्यधर्मेणदुर्गतिं २६ आरोहंतिदिवंधर्मैर्नात्रकार्याविचारणा इतितेकथि
तंराजन्यत्पृष्टोहंत्वयानघ २७ पाशांकुशायामाहात्म्यंकिमन्यच्छ्रोतुमिच्छसि २८ इतिश्रीब्रह्मवैवर्तपुराणेआश्विनशुक्लैका
दशीपाशांकुशानाम्नीमाहात्म्यंसंपूर्णम् अथकार्तिककृष्णैकादशीकथा युधिष्ठिरउवाच कथयस्वप्रसादेनममके
हाज्जनार्दन कार्तिकस्यासितेपक्षेकिंनामैकादशीभवेत् १ श्रीकृष्णउवाच श्रूयतांराजशार्दूलकथयामितवाग्रतः कार्ति-
केकृष्णपक्षेतुरमानाम्नीसुशोभना २ एकादशीसमाख्याता महापापहरापरा अस्याःप्रसंगतोराजन्माहात्म्यंप्रवदामिते ३ सु
चुकुंदइतिख्यातोबभूवनृपतिःपुरा देवेंद्रेणसमंयस्यमित्रत्वमभवन्नृप ४ यमेनवरुणेनैवकुबेरेणसमंतथा बिभीषणेनए
तस्यसखित्वमभवत्सह ५ विष्णुभक्तःसत्यसंधोबभूवनृपतिःसदा तस्यैवंशासतोराजन्राज्यंनिहतकंटकम् ६ बभूवदु

हितागेहेचंद्रभागासरिद्वरा शोभनायचसादत्ताचंद्रसेनसुतायवै ७ सकदाचित्समायातःश्वशुरस्यगृहेनृप एकादशीव्रतमि
दंसमायातंसुपुण्यदम् ८ समायातेव्रतदिनेचंद्रभागात्वचिंतयत् किंभविष्यतिदेवेशममभर्त्तापिदुर्बलः ९ क्षुधांनसहतेसोढुंपिता
चैवोग्रशासनः पटहस्ताड्यतेयस्यसंप्राप्तेदशमीदिने १० नभोक्तव्यंनभोक्तव्यंनभोक्तव्यंहरेर्दिने श्रुत्वापटहनिर्घोषंशोभनस्त्वब्रवी
त्प्रियां ११ किंकर्तव्यंमयाकांतेदेहिशिक्षांसुशोभने कृतेनयेनमेसम्यक्जीवितंनविनश्यति १२ चंद्रभागोवाच मत्पितुर्वेश्म
निविभोभोक्तव्यंनापिकेनचित् गजैरश्वैस्तथाचोष्ट्रैरन्यैःपशुभिरेवच १३ तृणमन्नंतथावारिनभोक्तव्यंहरेर्दिने मानवैश्चकुतःकां
तभुज्यतेहरिवासरे १४ यदित्वंभोक्ष्यसेकांततोगेहात्प्रयास्यताम् एवंविचार्यमनसासुदृढंमानसंकुरु १५ शोभनउवाच सत्य
मेतत्त्वयैवोक्तंकरिष्येहमुपोषणम् दैवेनविहितंयद्वैतत्तथैवभविष्यति १६ इतिदिष्टेमतिंकृत्वाचकारव्रतमुत्तमम् क्षुत्तृषापीडित
तनुःसबभूवातिदुःखितः १७ इतिचिंतयतस्तस्यआदित्योस्तमगाद्गिरिम् वैष्णवानांनराणांसानिशाहर्षविवर्द्धिनी १८ हरिपूजा
रतानांचजागरासक्तचेतसाम् बभूवनृपशार्दूलशोभनस्यातिदुःसहा रवेरुदयवेलायांशोभनःपंचतांगतः दाहयामासराजा
तंराजयोग्यैश्चदारुभिः २० चंद्रभागानात्मदेहंददाहपितृवारिता कृत्वौर्ध्वदैहिकंतस्यतस्थौजनकवेश्मनि २१ शोभनेननृप
श्रेष्ठरमाव्रतप्रभावतः प्राप्तंदेवपुरंरम्यंमंदराचलसानुनि २२ अनुत्तममनाधृष्यमसंख्येयगुणान्वितं हेमस्तंभमयैःसौधैरत्न
वैडूर्यमंडितैः २३ स्फाटकैर्विविधाकारैर्विचित्रैरुपशोभितम् सिंहासनसमारूढःसुश्वेतच्छत्रचामरः २४ किरीटकुंडलयुतो
हारकेयूरभूषितः स्तूयमानश्चगंधर्वैरप्सरोगणसेवितः शोभनःशोभतेतत्रदेवराडपरोयथा २५ सोमशर्मेतिविख्यातोमुचुकुं
दपुरेवसन् तीर्थयात्राप्रसंगेनभ्रमन्विप्रोददर्शतम् २६ नृपजामातरंज्ञात्वातत्समीपंजगामसः आसनादुत्थितःशीघ्रंनमश्चक्रे
द्विजोत्तमम् २७ चकारकुशलप्रश्नंश्वशुरस्यनृपस्यच २८ सोमशर्मोवाच कुशलंवर्ततेराजन्श्वशुरस्यगृहेतव चंद्रभागा
कुशलिनीसर्वतःकुशलंपुरे २९ स्ववृत्तंकथ्यतांराजन्आश्चर्यंपरमंमम पुरंविचित्रंरुचिरंनदृष्टंकेनचित्क्वचित् ३० एतदाचक्ष्वनृप

नेकुतःप्राप्तमिदंत्वया शोभनउवाच कार्तिकस्यासितेपक्षेनाम्नाचैकादशीरमा ३१ तामुपोष्यमयाप्राप्तंद्विजेंद्रपुरमध्रुवम् ध्रु
वंभवतियेनैवतत्कुरुष्वद्विजोत्तम ३२ द्विजेंद्रउवाच कथमध्रुवमेतद्धिकथंहिभवतिध्रुवम् तत्त्वंकथयराजेंद्रतत्करिष्यामिना
न्यथा ३३ शोभनउवाच मयैतत्कथितंविप्रश्रद्धाहीनंव्रतोत्तमं तेनाहमध्रुवंमन्येध्रुवंभवतितच्छृणु ३४ मुचुकुंदस्यदुहिता-
चंद्रभागासुशोभना तस्यैकथयवृत्तांतंध्रुवमेतद्भविष्यति ३५ तच्छ्रुत्वाथद्विजवरस्तस्यैसर्वंन्यवेदयत् श्रुत्वाथसाद्विजवचोविस्म
योत्फुल्ललोचना ३६ प्रत्यक्षमथवास्वप्नस्त्वयैतत्कथ्यतेद्विज ३७ सोमशर्मोवाच प्रत्यक्षंपुत्रितेकांतोमयादृष्टोमहावने ३७दे
वतुल्यमनाधृष्यंदृष्टंतस्यपुरंमया अध्रुवंतेनतत्प्रोक्तंध्रुवंभवतितत्कुरु ३८ चंद्रभागोवाच तत्रमांनयविप्रर्षेपतिदर्शनला
लसाम् आत्मनोव्रतपुण्येनकरिष्यामिपरंध्रुवम् ३९ आवयोर्द्विजसंयोगोयथाभवतितत्कुरु प्राप्यतेहिमहत्पुण्यंकृत्वायोगंवियुक्त
योः ४० इतिश्रुत्वासहतयासोमशर्माजगामह आश्रमंवामदेवस्यमंदराचलसंन्निधौ ४१ वामदेवोशृणोत्सर्वंवृत्तांतंकथितंतयोः
अभ्यषिंचच्चंद्रभागांवेदमंत्रैरथोर्जितं ४२ ऋषिमंत्रप्रभावेनविष्णुवासरसेवनात् दिव्यदेहाबभूवासौदिव्यांगतिमवापह ४३
पत्युःसमीपमगमत्प्रहर्षोत्फुल्ललोचना सहर्षःशोभनोतीवदृष्ट्वाकांतांसमागताम् ४४ समाहूयस्वकेवामेपार्श्वेतांसन्यवेशयत् सा
चोवाचप्रियंहर्षाच्चंद्रभागाशुभंवचः ४५ शृणुकांतहितंवाक्यंयत्पुण्यंविद्यतेमयि अष्टवर्षाधिकाजातायदाहंपितृवेश्मनि ४६ म
याततःप्रभृतिचकृतमेकादशीव्रतं यथोक्तविधिसंयुक्तंश्रद्धायुक्तेनचेतसा ४७ तेनपुण्यप्रभावेनभविष्यतिपरंध्रुवम् सर्वकाम
समृद्धंचयावदाभूतसंप्लवम् ४८ एवंसानृपशार्दूलरमतेपतिनासह दिव्यभोगादिव्यरूपादिव्याभरणभूषिता ४९ शोभनो
पितयासार्द्धंरमतेदिव्यविग्रहः रमाव्रतप्रभावेनमंदराचलसानुनि ५० चिंतामणिसमाह्येषाकामधेनुसमाथवा रमाभिधाना
नृपतेतवाग्रेकथितामया ५१ ईदृशंचव्रतंराजन्येकुर्वंतिनरोत्तमाः ब्रह्महत्यादिपापानिनाशंयांतिनसंशयः ५२ एकादशीव्रता
नांचपक्षयोरुभयोरपि यथाशुक्लातथाकृष्णानितिभेदंनकारयेत् ५३ सेवितैकादशीनृणांभक्तिमुक्तिप्रदायिनी धेनुःकृष्णा

तथाश्वेताउभयोःसदृशंपयः ५४ तथैवतुल्यफलदंस्मृतमेकादशीव्रतं एकादशीव्रतानांचमाहात्म्यंशृणुयान्नरः सर्वपापविनिर्मुक्तो
विष्णुलोकेमहीयते ५५ इतिश्रीब्र० कार्तिककृष्णैकादशीरमानाम्नीमा०संपूर्णम् अथकार्तिकशुक्लैकादशीकथा ब्रह्मो
वाच प्रबोधिन्याश्चमाहात्म्यंपापघ्नंपुण्यवर्द्धनम् मुक्तिप्रदंसुबुद्धीनांशृणुष्वमुनिसत्तम १ तावद्गर्जतिविप्रेंद्रगंगाभागीरथीक्षि
तौ यावन्नायातिपापघ्नीकार्तिकेहरिबोधिनी २ तावद्गर्जंतितीर्थानिसमुद्रादिसरांसिच यावत्प्रबोधिनीविष्णोस्तिथिर्नायातिका
र्तिकी ३ अश्वमेधसहस्राणिराजसूयशतानिच एकेनैवोपवासेनप्रबोधिन्यालभेन्नरः ४ नारदउवाच एकभुक्तेनकिंपुण्यं
किंपुण्यंनक्तभोजने उपवासेनकिंपुण्यंतन्मेब्रूहिपितामह ५ ब्रह्मोवाच एकभुक्तेनजन्मोत्थंनक्तेनद्विजनुर्भवं सप्तजन्मभवं
पापमुपवासेननश्यति ६ यद्दुर्लभंयदप्राप्यंत्रैलोक्येनतुगोचरम् यदप्यप्रार्थितंपुत्रददातिहरिबोधिनी ७ मेरुमंदरमात्राणिपा
पान्युग्राणियानितु एकेनैवोपवासेनदहतेपापहारिणी ८ पूर्वजन्मसहस्रैस्तुयद्दुष्कर्मउपार्जितम् जागरेणप्रबोधिन्यांदहतेतू
लराशिवत् ९ उपवासंप्रबोधिन्यांयःकरोतिस्वभावतः विधिवन्मुनिशार्दूलयथोक्तंलभतेफलम् १० यथोक्तंसुकृतंयस्तुविधि
वत्कुरुतेनरः स्वल्पंमुनिवरश्रेष्ठमेरुतुल्यंभवेत्फलम् ११ विधिहीनंतुयःकुर्यात्सुकृतंमेरुमात्रकम् अणुमात्रंनचाप्नोतिफलं
धर्मस्यनारद १२ संध्याहीनेव्रतभ्रष्टेनास्तिकेहेतुकेशठे नैतेषांतिष्ठतेदेहेधर्मशास्त्रविदूषके १३ परदाररतेमूर्खेकृतघ्नेवंचकेत
था धर्मोनतिष्ठतेदेहेएतेषामपिदेहिनाम् १४ ब्राह्मणोवापिशूद्रोवासेवतेपरयोषितम् ब्राह्मणींचविशेषेणचांडालसदृशावुभौ
१५ सभर्तृकांवाविधवांब्राह्मणोब्राह्मणींयदि सेवतेमुनिशार्दूलसान्वयोयातिसंक्षयम् १६ परदाराभिगमनंकुरुतेयोद्विजा
धमः संततिर्नभवेत्तस्यफलंजन्मार्जितंनहि १७ गुरुणासहविप्रैश्चयोहंकारेणवर्तते सुकृतान्नश्यतेशीघ्रंधनंनाप्नोतिपत
तिम् १८ आचारभ्रष्टदेहानांवृषलीगामिनांसुत यस्तैःसेव्यमानोपिधर्मस्तेषांपराङ्मुखः १९ पापिनस्तेनरालोकेसंगतिं
पतितैःसह येकुर्वंतिनृपश्रेष्ठतेगच्छंतियमालयम् २० धर्मोनष्टोनृणांयेषांस्वागतासनभोजनैः तेषांवैनश्यतेस्वर्गःकीर्तिरायुः

प्रजाक्षरवम् २१ साधूनामपमानंतुयेकुर्वंतिनराधमाः त्रिवर्गफलहीनास्तेदह्यंतेनरकाग्निना २२ कृत्वावमानंसाधूनांयेहृष्यंतिनराधमाः
चारयंतिनयेमूढास्तेपश्यंतिकुलक्षयम् २३ आचारभ्रष्टदेहस्यहैतुकस्यशठस्यच ददतोजुह्वतोवापिगतिस्तस्यनविद्यते २४ तस्मा
न्नत्वाचरेत्किंचिदशुभंलोकगर्हितम् सदाचारवताभाव्यंयथाधर्मोननश्यति २५ येध्यायंतिमनोवृत्त्याकरिष्यामःप्रबोधिनीम् तेषांवि
लीयतेपापंपूर्वजन्मशतोद्भवम् २६ समतीतंभविष्यंचवर्तमानंकुलायुतम् विष्णुलोकंनयत्याशुप्रबोधिन्यांतुजागरे २७ वसंतिपितरो
हृष्टाविष्णुलोकेस्वलंकृताः विमुक्तानारकैर्दुःखैःपूर्वकर्मसमुद्भवैः २८ कृत्वातुपातकंघोरंब्रह्महत्यादिकंनरः कृत्वातुजागरंविष्णो
र्धौतपापोभवेन्मुने २९ दुःप्राप्यंयत्फलंविप्रैरश्वमेधादिभिर्मखैः प्राप्यतेतत्सुखेनैवप्रबोधिन्यांतुजागरे ३० आप्लुत्यसर्वतीर्थेषु
दत्वागाःकांचनंमहीं नतत्फलमवाप्नोतियत्कृत्वाजागरंहरेः ३१ जातःसएकसुकृतीकुलंतेनैवपावितम् कार्तिकेमुनिशार्दूलकृताये
नप्रबोधिनी ३२ यथाध्रुवंनृणांमृत्युर्धननाशस्तथाध्रुवम् इतिज्ञात्वामुनिश्रेष्ठकर्तव्यंवैष्णवंदिनम् ३३ यानिकानिचतीर्थानित्रै
लोक्येसंभवंतिच तानितस्यगृहेसम्यग्यःकरोतिप्रबोधिनीम् ३४ सर्वंकृत्यंपरित्यज्यतुष्ट्यर्थंचक्रपाणिनः उपोष्यैकादशींर
म्यांकार्तिकेहरिबोधिनीम् ३५ सज्ञानीसचयोगीचसतपस्वीजितेंद्रियः भोगोमोक्षश्चतस्यास्तिह्युपास्तेहरिबोधिनीम् ३६
विष्णुप्रियतरात्येषाधर्मसारस्यदायिनी सकृदेनामुपोष्यैवमुक्तिभाक्त्वभवेन्नरः ३७ प्रबोधिनीमुपोषित्वानगर्भेविशतेनरः सर्व
धर्मान्परित्यज्यतस्मात्कुर्वीतनारद ३८ कर्मणामनसावाचापापंयत्समुपार्जितम् तत्क्षालयतिगोविंदःप्रबोधिन्यांतुजागरे ३९ स्ना
नंदानंजपोहोमःसमुद्दिश्यजनार्दनम् नरैर्यत्क्रियतेवत्सप्रबोधिन्यांतदक्षयम् ४० येर्चयंतिनरास्तस्यांभक्त्यादेवंचमाधवं समुपो
ष्यप्रमुच्यंतेपापैस्तेशतजन्मजैः ४१ महाव्रतमिदंपुत्रमहापापौघनाशनम् प्रबोधवासरंविष्णोर्विधिवत्समुपोषयेत् ४२ व्रतेनानेन
देवेशंपरितोष्यजनार्दनम् विराजयन्दिशःसर्वाःप्रयातिभवनंहरेः ४३ कर्तव्यैषाप्रयत्नेननरैःकांतिमभीप्सुभिः द्वादशीद्विपदांश्रे
ष्ठकार्तिकेतुप्रबोधिनी ४४ बाल्येयच्चार्जितंवत्सयौवनेवार्धकेतथा शतजन्मकृतंपापंस्वल्पंवायदिवाबहु ४५ शुष्कमार्द्रंमुनिश्रे

षस्त्वगुह्यमपिनारद तत्क्षालयतिगोविंदोह्यस्यामभ्यर्च्यशक्तितः ४६ धनधान्यवहापुण्यासर्वपापहरापरा तामुपोष्यहरेर्भक्त्या
दुर्लभंनभवेत्क्वचित् ४७ चंद्रसूर्योपरागेचयत्फलंपरिकीर्तितं तत्सहस्रगुणंप्रोक्तंप्रबोधिन्यांतुजागरे ४८ स्नानंदानंजपोहोमःस्वा
ध्यायोभ्यर्चनंहरेः तत्सर्वंकोटिगुणितंप्रबोधिन्यांतुयत्कृतम् ४९ जन्मप्रभृतियत्पुण्यंनरेणाभ्यर्जितंभवेत् वृथाभवतितत्सर्व
मकृत्वाकार्तिकव्रतम् ५० अकृत्वानियमंविष्णोःकार्तिकंयःक्षिपेन्नरः जन्मार्जितस्यपुण्यस्यफलंनाप्नोतिनारद ५१ तस्मात्त्वयाप्रय
त्नेनदेवदेवोजनार्दनः उपासनीयोविप्रेंद्रसर्वकामफलप्रदः ५२ परान्नंवर्जयेद्यस्तुकार्तिकेविष्णुतत्परः परान्नवर्जनात्कृत्स्नचांद्रायण
फलंलभेत् ५३ नित्यंशास्त्रविनोदेनकार्तिकंयःक्षिपेन्नरः निर्दहेत्सर्वपापानियज्ञायुतफलंलभेत् ५४ नतथातुष्यतेयज्ञैर्नजानैर्वा-
गजादिभिः यथाशास्त्रकथालापैःकार्तिकेमधुसूदनः ५५ येकुर्वंतिकथांविष्णोर्येशृण्वंतिसमाहिताः श्लोकार्द्धंश्लोकमेकंवाकार्ति
केगोशतंफलं ५६ सर्वधर्मान्परित्यज्यकार्तिकेकेशवाग्रतः शास्त्रावधारणंकार्यंश्रोतव्यंचमहामुने ५७ श्रेयसांलोभबुद्ध्यावायःक
रोतिहरेःकथाम् कार्तिकेमुनिशार्दूलकुलानांतारयेच्छतम् ५८ नियमेननरोयस्तुशृणुतेवैष्णवींकथाम् कार्तिकेतुविशेषेणगोसह
स्रफलंलभेत् ५९ प्रबोधवासरेविष्णोःकुरुतेयोहरेःकथाम् सप्तद्वीपवतीदानेतत्फलंलभतेमुने ६० श्रुत्वाविष्णुकथांदिव्यांयेर्चयं
तिकथाविदम् स्वशक्त्यामुनिशार्दूलतेषांलोकाःसनातनाः ६१ ब्रह्मणोवचनंश्रुत्वानारदःपुनरब्रवीत् नारदउवाच विधानंब्रू
हिमेस्वामिन्नेकादश्याःसुरोत्तम ६२ चीर्णेनयेनभगवन्यादृशंफलमाप्नुयात् नारदस्यवचःश्रुत्वाब्रह्मावचनमब्रवीत् ६३ ब्रा
ह्मेमुहूर्तेचोत्थायत्वेकादश्यांद्विजोत्तम स्नानंचैवप्रकर्तव्यंदंतधावनपूर्वकम् ६४ नद्यांतडागेकूपेवावाप्यांगेहेतथैवच केशव
श्चैवसंपूज्यःकथायाःश्रवणंतथा ६५ नियमार्थंमहाभागइमंमंत्रमुदीरयेत् एकादश्यांनिराहारःस्थित्वाहनिपरेह्यहम् ६६ भो
क्ष्यामिपुंडरीकाक्षशरणंमेभवाच्युत अमुंमंत्रंसमुच्चार्यदेवदेवस्यचक्रिणः ६७ भक्तिभावेनतुष्टात्माह्युपवासंसमर्पयेत् रात्रौजा
गरणंकुर्याद्देवदेवस्यसन्निधौ ६८ गीतंनृत्यंचवाद्यंचतथाकृष्णकथांमुने यःकरोतिसपुण्यात्मात्रैलोक्योपरिसंस्थितः ६९ बहु

पुष्पैर्बहुफलैः कर्पूरागरुकुंकुमैः हरेःपूजाविधातव्याकार्तिक्यांबोधवासरे ७० वित्तशाठ्यंनकर्तव्यंसंप्राप्तेहरिवासरे यस्मात्पुण्य-
मसंख्यातंप्राप्यतेमुनिसत्तम ७१ फलैर्नानाविधैर्दिव्यैःप्रबोधिन्यांतुजागरे शंखेतोयंसमादायत्वर्घ्योदेयोजनार्दने ७२ यत्फलंस
र्वतीर्थेषुसर्वदानेषुयत्फलम् तत्फलंकोटिगुणितंदत्वार्घंबोधवासरे ७३ अगस्त्यकुसुमैर्देवंपूजयेद्योजनार्दनं देवेंद्रोपिमुनिश्रेष्ठ
करोतिकरसंपुटम् ७४ नतत्करोतिविप्रेंद्रतपसातोषितोहरिः यत्करोतिहृषीकेशोमुनिपुष्पैरलंकृतः ७५ बिल्वपत्रैश्चयेकृष्णं
कार्तिकेकलिवर्धन पूजयंतिमहाभक्त्यामुक्तिस्तेषांमयोदिता ७६ तुलसीदलपुष्पैश्चपूजयंतिजनार्दनम् कार्तिकेसकलंवत्स
पापजन्मायुतंदहेत् ७७ दृष्टा स्पृष्टा थवाध्याताकीर्तितानमितास्तुता रोपितासिंचितानित्यंपूजितातुलसीशुभा ७८ नवधा
तुलसीभक्तिंयेकुर्वंतिदिनेदिने युगकोटिसहस्राणितेवसंतिहरेर्गृहे ७९ रोपितातुलसीयावत्कुरुतेमूलविस्तरम् तावद्युगसह
स्राणितनोतिसुकृतंमुने ८० यावच्छाखाप्रशाखाभिर्बीजपुष्पदलैर्मुने रोपितातुलसीपुंभिर्वर्ततेवसुधातले ८१ कुलेतेषांतु
येजातायेभविष्यंतियेगताः आकल्पयुगसाहस्रंतेषांवासोहरेर्गृहे ८२ कदंबकुसुमैर्देवंयेर्चयंतिजनार्दनम् तेषांयमालयंनैव
प्रसादाच्चक्रपाणिनः ८३ दृष्ट्वाकदंबकुसुमंप्रीतोभवतिकेशवः किंपुनःपूजितोविप्रसर्वकामप्रदोहरिः ८४ यःपुनःपाटलापु
ष्पैर्वसंतेगरुडध्वजम् अर्चयेत्परयाभक्त्यामुक्तिभागीभवेद्विजः ८५ बकुलाशोककुसुमैर्येर्चयंतिजगत्पतिम् विशोकास्ते-
भविष्यंतियावच्चंद्रोदिवाकरः ८६ येर्चयंतिजगन्नाथंकरवीरैःसितासितैः चतुर्युगानिविप्रेंद्रप्रीतोभवतिकेशवः ८७ मंज
रींसहकारस्यकेशवोपरियेनराः यच्छंतितेमहाभागागोकोटिफलभागिनः ८८ दूर्वांकुरैर्हरेर्यस्तुपूजांकालेप्रयच्छति पूजा
फलंशतगुणंसम्यगाप्नोतिमानवः ८९ शमीपत्रैश्चयेदेवंपूजयंतिसुखप्रदम् यममार्गोमहाघोरोनिस्तीर्णस्तैस्तुनारद ९० वर्षा
कालेतुदेवेशंकुसुमैश्चंपकोद्भवैः येर्चयंतिनतेमर्त्याःसंसरेयुःपुनर्भवे ९१ कुंभीपुष्पंतुविप्रर्षेयेयच्छंतिजनार्दनम् सुवर्णप-
लमात्रंतेलभंतेवैफलंमुने ९२ सुवर्णकेतकीपुष्पंयोददाति जनार्दने कोटिजन्मार्जितंपापंदहतेगरुडध्वजः ९३ कुंकुमारु

णवर्णांचगंधाढ्यांशतपत्रिकाम् योददातिजगन्नाथेश्वेतद्वीपालयेवसेत् ९४ एवंसंपूज्यरात्रौचकेशवंभुक्तिमुक्तिदम् प्रातरुत्थायच
ब्रह्मन्गत्वातुसजलांनदीम् ९५ तत्रस्नात्वाजपित्वाचकृत्वापूर्वाण्हिकाःक्रियाः गृहेगत्वाचसंपूज्यःकेशवोविधिवन्नरैः ९६ व्रतस्यपू
रणार्थायब्राह्मणान्भोजयेत्सुधीः क्षमापयेच्चशिरसाभक्तियुक्तेनचेतसा ९७ गुरुपूजाततःकार्याभोजनाच्छादनादिभिः दक्षिणा
गौश्चदातव्यातुष्ट्यर्थंचक्रपाणिनः ९८ भूयसीचैवसंदेयाब्राह्मणेभ्यःप्रयत्नतः नियमश्चैवसंत्याज्योब्राह्मणाग्रेप्रयत्नतः ९९क
थयित्वाद्विजेभ्यश्च दद्याच्छक्त्याचदक्षिणाम् नक्तभोजीनरोराजन्ब्राह्मणान्भोजयेच्छुभान् १०० अयाचितेबलीवर्दंसहिर
ण्यंप्रदापयेत् अमांसाशीनरोयस्तुप्रददेद्गांसदक्षिणां १ धात्रीस्नायीनरोदद्याद्दधिमाक्षिकमेवच फलानांनियमेराजन्फलदा
नंसमाचरेत् २ तैलस्थानेघृतंदेयंघृतस्थानेपयःस्मृतम् धान्यानांनियमेराजन्दीयंतेशालितंडुलाः ३ दद्याच्छयनेशय्यांसतूलां
सपरिच्छदाम् पत्रभोजीनरोराजन्भाजनंघृतसंयुतम् ४ मौनेघंटांतिलांश्चैवसहिरण्यंप्रदापयेत् दंपत्योर्भोजनंदेयंनिःस्नेहं
सर्पिसत्कृतम् ५ धारणेचस्वकेशानामादर्शंदापयेद्बुधः उपानहौप्रदातव्यौउपानत्परिवर्जनात् ६ लवणस्यचसंत्यागेशर्करांचप्र
दापयेत् नित्यंदीपप्रदोयस्तुविष्णोर्वाविबुधालये ७ सदीपंसघृतंताम्रंकांचनंवादशायुतम् प्रदद्याद्विष्णुभक्तायसंपूर्णव्रतहे
तवे ८ एकांतरोपवासेतुकुंभानष्टौप्रदापयेत् सवस्त्रान्कांचनोपेतान्सर्वान्सालंकृतान्शुभान् ९ सर्वेषामप्यलाभेतुयथोक्तकरणं
विना द्विजवाक्यंस्मृतंराजन्संपूर्णव्रतसिद्धिदम् १० नत्वाविसर्जयेद्विप्रान्ततोभुंजीतचस्वयम् यत्त्यक्तंचतुरोमासान्समाप्तिंत
स्यचाचरेत् ११ एवंयआचरेत्पार्थसोनंतफलमाप्नुयात् अवसानेतुराजेंद्रवासुदेवपुरंव्रजेत् १२ यश्चाविघ्नंसमाप्यैवंचातुर्मास्य
व्रतंनृप सभवेत्कृतकृत्यस्तुनपुनर्मानुषोभवेत् १३ एतत्कृत्वामहीपालपरिपूर्णव्रतंभवेत् व्रतवैकल्यमासाद्यह्यंधःकुष्ठीप्रजायते
१४ एतत्तेसर्वमाख्यातंयत्पृष्टोहमिहत्वया पठनाच्छ्रवणाद्वापिलभेद्गोदानजंफलम् ११५ इतिश्रीस्कंदपुराणेकार्तिकशुक्लै
कादशीप्रबोधिनीमाहात्म्यंसंपूर्णम् युधिष्ठिरउवाच परिम्लुचस्यमासस्यकावाएकादशीभवेत् किंनामकोविधि

स्तस्याः कथयस्वजनार्दन १ श्रीकृष्णउवाच मलमासस्ययापुण्याप्रोक्तानाम्नाचपद्मिनी सोपोषिताप्रयत्नेनपद्मनाभपुरं
नयेत् २ मममासेमहापुण्याकीर्तिताकल्मषापहा तस्याःफलंकथयितुंनशक्तश्चतुराननः ३ नारदायपुराप्रोक्तंविधिनाव्रतमुत्त
मम् पद्मिन्याःपापराशिघ्नंभक्तिमुक्तिफलप्रदम् ४ श्रुत्वावाक्यंमुरारेस्तुप्रोवाचातिमुदान्वितः युधिष्ठिरोजगन्नाथंविधिंप्रपच्छ
धर्मवित् ५ श्रुत्वाराज्ञस्तुवचनंप्रोत्फुल्लांबुजेक्षणम् शृणुराजन्प्रवक्ष्यामिमुनीनामप्यगोचरं ६ दशमीदिवसेमासेव्रतारंभो
विधीयते कांस्यंमांसंमसूरांश्चचणकान्कोद्रवांस्तथा ७ शाकंमधुपरान्नंचदशम्यांदशवर्जयेत् हविष्यान्नंचभुंजीतअक्षारलवणं
तथा ८ भूमिशायीब्रह्मचारीभवेच्चदशमीदिने एकादशीदिनेप्रातेमानरुत्थायसादरम् ९ विधायचमलोत्सर्गंनकुर्याद्दंतधावनम् गं
डूषान्द्वादशान्कृत्वा शुचिर्भूत्वासमाहितः १० सूर्योदयेशुभेतीर्थेस्नानार्थंप्रव्रजेत्सुधीः गोमयंमृत्तिकांगृह्यतिलान्दर्भान्शुचिस्थ
लात् ११ चूर्णैरामलकीभूतैर्विधिनास्नानमाचरेत् उद्धृतासिवराहेणकृष्णेनशतबाहुना १२ मृत्तिकेब्रह्मदत्तासिकाश्यपेनाभिमंत्रि
ता त्वंमेकुरुपवित्रांगंलग्नानेत्रेशिरोरुहे १३ हरिपूजनयोग्यंमांमृत्तिकेकुरुतेनमः सर्वौषधिसमुत्पन्नंगवोदरमधिष्ठितम् १४ पवि
त्रकरणंभूमेर्मांपावयतुगोमयम् ब्रह्मष्ठीवनसंभूताधात्रीभुवनपावनी १५ संस्पृष्टा पावयांगंमेनिर्मलंकुरुतेनमः देवदेवजग
न्नाथशंखचक्रगदाधर १६ देहिविष्णोममानुज्ञांतवतीर्थावगाहने वारुणांश्चजपेन्मंत्रान्स्नानंकुर्याद्विधानतः १७ गंगादिती
र्थंसंस्मृत्ययत्रकुत्रजलाशये पश्चात्संमार्जयेद्गात्रंविधिनानृपसत्तम १८ मुखेपृष्ठेचहृदयेबाह्वोःशिरसिचाप्यधः परिधायसुखं
वासोशुक्लंशुचिद्यखंडितम् ततःकुर्याद्धरेःपूजांमहापापंविनश्यति १९ संध्यामुपास्यविधिनातर्पयित्वापितॄन्सुरान् हरेर्मं
दिरमागम्यपूजयेत्कमलापतिम् २० स्वर्णमाषकृतंदेवंराधिकासहितंहरिम् पार्वत्यासहितंदेवंपूजयेद्विधिपूर्वकम् २१ कुंभोपरि
न्यसेद्देवंताम्रपात्रेथमृन्मये दिव्यवस्त्रसमायुक्तेदिव्यगंधानुवासिते २२ तस्योपरिन्यसेत्पात्रंताम्रंरौप्यंहिरण्मयम् तस्मिन्सं-
स्थापयेद्देवंविधिनापूजयेत्ततः २३ संस्नाप्यसलिलैःश्रेष्ठैःगंधधूपादिवासितैः चंदनागरुकर्पूरैःपूजयेद्देवमीश्वरम् २४ नाना

कुसुमकस्तूरीकुंकुमेनसितांबुजैः तत्कालजातैःकुसुमैःपूजयेत्परमेश्वरं २५ नैवेद्यैर्विविधैःशक्त्यातथानीराजनादिभिः धू
पैर्दीपैःसकर्पूरैःपूजयेत्केशनंशिवम् २६ नृत्यंगीतंतदग्रेतुकुर्याद्भक्तिपुरःसरम् नालपेत्पतितान्पापान्तस्मिन्नहनिनस्पृशेत् २७
नानृतंहिवदेद्वाक्यंसत्यपूतंवचोवदेत् रजस्वलांनपश्येतननिंदेद्ब्राह्मणंगुरुं २८ पुराणंपुरतोविष्णोःशृणुयात्सहवैष्णवैः निर्ज
लासाप्रकर्तव्यायाचशुक्लेमलिम्लुचे २९ जलपानेनवाकुर्याद्दुग्धाहारेणनान्यथा रात्रौजागरणंकुर्याद्गीतवादित्रसंयुतम् ३० प्र
थमेप्रहरेपूजानारिकेलार्घमुत्तमम् द्वितीयेश्रीफलैश्चैवतृतीयेबीजपूरकैः ३१ चतुर्थेपूजयेत्पूगैर्नारिंगैश्चविशेषतः प्रथमेप्रहरे
पुण्यमग्निष्टोमस्यजायते ३२ द्वितीयेवाजपेयस्यतृतीयेहयमेधजम् चतुर्थेराजसूयस्यजाग्रतोजायतेफलम् ३३ नातःपरतरंपु-
ण्यंनातःपरतरामखाः नातःपरतराविद्यानातःपरतरंतपः ३४ पृथिव्यांयानितीर्थानिपुण्यान्यायतनानिच तत्स्नातानिचहस्ता-
नियेनाकारिहरेर्व्रतम् ३५ एवंजागरणंकुर्याद्यावत्सूर्योदयोभवेत् सूर्योदयेशुभेतीर्थेगत्वास्नानंसमाचरेत् ३६ स्नात्वैवागत्य
भवनेपूजयेद्देवमीश्वरम् पूर्वोदितेनविधिनाभोजयेद्ब्राह्मणान्शुभान् ३७ कुंभादिकंचयत्सर्वंप्रतिमांकेशवस्यच पूजयित्वा
विधानेनब्राह्मणायसमर्पयेत् ३८ एवंविधंव्रतंयोवैकुरुतेभुविमानवः सफलंजायतेतस्यव्रतंमुक्तिफलप्रदम् ३९ एतत्तेसर्व
माख्यातंयत्पृष्टोहंत्वयानृप मलिम्लुचस्यमासस्यशुक्लायाविधिमुत्तमम् ४० पद्मिन्याःप्रीतियुक्तोयःकुरुतेव्रतमुत्तमम् व्रता-
नितेनचीर्णानिसर्वाणिनृपनंदन ४१ कृष्णायामलमासस्यविधिस्तस्यापितादृशः परमासातुविज्ञेयासर्वपापक्षयंकरी ४२ अ
त्रतेकथयिष्यामिकथामेकांमनोरमाम् नारदायपुलस्त्येनविस्तरेणनिवेदिताम् ४३ कार्तवीर्येणकारायांनिक्षिप्तंवीक्ष्यरावण
म् विमोचितःपुलस्त्येनयाचयित्वामहीपतिम् ४४ तदाश्चर्यंतदाश्रुत्वानारदोदिव्यदर्शनः पप्रच्छचयथाभक्त्यापुलस्त्यं-
मुनिपुंगवं ४५ दशाननेनविजिताःसर्वेदेवाःसवासवाः कार्तवीर्येणविजितःकथंरणविशारदः ४६ नारदस्यवचःश्रुत्वापु
लस्त्योमुनिरब्रवीत् शृणुवत्सप्रवक्ष्यामिकार्तवीर्यसमुद्भवम् ४७ पुरात्रेतायुगेराजन्माहिष्मत्यांमहत्तरः हैहयानांकुलेजा

नःकृतवीर्योमहीपतिः ४८ सहस्रंप्रमदास्तस्यनृपस्यप्राणवल्लभाः नतासांतनयंकिंचिल्लेभेराज्यधुरंधरम् ४९ यजन्देवान्पितॄन्सिद्धान्प्रचिकित्सान्महत्तरान् तेषांवाक्याद्व्रतंकुर्वन्नलब्धस्तनयस्तदा ५० सुतंविनातदाराज्यंनसुखायमहीपतेः क्षुधितस्ययथाभोगानभवंतिसुखप्रदाः ५१ विचार्यचित्तेनृपतिस्तपस्तप्तुंमनोदधे तपसैवसदासिद्धिर्जायतेमनसेप्सिता ५१ इत्युक्त्वासौसभार्यश्चचीरवासाजटाधरः तपस्तप्तुंगतःसद्योगृहेन्यस्यसुमंत्रिणं ५३ निर्गतंनृपतिंवीक्ष्यपद्मिनीप्रमदोत्तमा हरिश्चंद्रस्यतनयाइक्ष्वाकुकुलसंभवा ५४ पतिव्रताप्रियंदृष्ट्वास्तपस्तप्तुंकृतोद्यमं भूषणानिपरित्यज्यचीरमेकंसमाश्रयत् ५५ जगामपतिनासार्द्धंपर्वतेगंधमादने गत्वातत्रतपस्तेपेवर्षाणामयुतंनृपः ५६ नलेभेतनयंराज्येध्यायन्देवंगदाधरम् अस्थिस्नायुमयंकांतंदृष्ट्वासाप्रमदोत्तमा ५७ अनुसूयांमहासाध्वींपप्रच्छविनयान्विता भर्त्तुःप्रतपतःसाध्विवर्षाणामयुतंगतम् ५८ तथापिनप्रसन्नोभूत्केशवःकष्टनाशनः व्रतंमममहाभागेकथयस्वयथातथम् ५९ येनप्रसन्नोभगवान्ममभक्त्याप्रजायते येनमेजायतेपुत्रश्चक्रवर्त्तीमहत्तरः ६० श्रुत्वातस्यास्तद्वचनंपतिव्रतपरायणा यंप्रव्रजंतंनृपतिंस्वयंप्रव्राजदीक्षितम् ६१ तदाप्रोवाचसंतुष्टापद्मिनींपद्मलोचनाम् स्नात्वामलिम्लुचेसुक्लमासद्वादशसंमितम् ६२ द्वात्रिंशद्दिनैश्चभवतिमासःपूर्णःशुभानने तन्मध्येद्वादशीयुग्मंपद्मिनीपरमातथा ६३ उषोष्यतत्प्रकर्तव्यंविधिनाजागरैःसमम् शीघ्रंप्रसन्नोभगवान्भविष्यतिसुतप्रदः ६४ इत्युक्त्वाकथयत्सर्वंमयापूर्वोदितंनृप विधिंव्रतस्यविधिवत्प्रसन्नाकर्दमांगजा ६५ श्रुत्वाव्रतविधिंसर्वंयथोक्तमनुसूयया चक्रेराज्ञीचतत्सर्वंपुत्रप्राप्तिमभीप्सती ६६ एकादश्यांनिराहारासदाजानाचनिर्मला जागरेणयुतारात्रौगीतनृत्यसमन्विता ६७ पूर्णेव्रतेचवैशीघ्रंप्रसन्नःकेशवःस्वयम् बभाषेगरुडारूढोवरंवरयशोभने ६८ श्रुत्वावाक्यंजगद्धातुःकृत्वाप्रीत्याशुचिस्मिता ययाचेद्यवरंब्रूहिममभर्त्तुर्महत्तरम् ६९ पद्मिन्यास्तद्वचःश्रुत्वाकृष्णःप्रीतःप्रियंवदाम् त्वयाहंतोषितोभद्रेप्रत्युवाचजनार्दनः ७० मलिम्लुचस्यमासोसौनान्योमेप्रीतिदायकः तन्मध्येकादशीरम्याम

मत्प्रीतिविवर्द्धना ७१ सात्वयोपोषितासुभ्रुयथोक्तविधिनाशुभे तेनत्वयाप्रसन्नोहंकृतोस्मिसुभगानने ७२ नवभर्तुःप्रदास्या
मिवरंयन्मनसेप्सितम् इत्युक्त्वानृपतिंप्राहविष्णुर्विश्वार्तिनाशनः ७३ वरंवरयराजेंद्रयत्तेमनसिकांक्षितम् संतोषितोहंप्रिययात्
वसिद्धिंचिकीर्षया ७४ श्रुत्वातद्वचनंविष्णोःप्रसन्नोनृपसत्तमः वव्रेसुतंमहाबाहुंसर्वलोकनमस्कृतम् ७५ नदेवैर्मानुषैर्नागैर्दै
त्यदानवराक्षसैः जेतुंशक्योजगन्नाथविनात्वांमधुसूदन ७६ इत्युक्तोबाढमित्युक्त्वातत्रैवांतरधीयत नृपोपिसुप्रसन्नात्मा
हृष्टःपुष्टःप्रियायुतः ७७ समायात्स्वपुरंरम्यंनरनारीमनोरमं सपद्मिन्यांसुतंलेभेकार्तवीर्यंमहाबलम् ७८ नतेनसदृशःकश्चि
त्त्रिषुलोकेषुमानवः तस्मात्पराजितःसंख्येरावणोदशकंधरः ७९ नतंजेतुंसमर्थोस्तित्रिषुलोकेषुकश्चन विनानारायणंदेवंचक्रपा
णिंगदाधरम् ८० नत्वयाविस्मयःकार्योरावणस्यपराजये मलिम्लुचप्रसादेनपद्मिन्याश्चाप्युपोषणात् ८१ दत्तोदेवाधिदेवेनका
र्तवीर्योमहाबलः इत्युक्त्वाप्रययौविप्रःप्रसन्नेनांतरात्मना ८२ श्रीकृष्णउवाच एतत्तेसर्वमाख्यातंयत्पृष्टोहंत्वयानघ म
लिम्लुचस्यमासस्यशुक्लायाःसंभवोमहान् ८३ येकरिष्यंतिमनुजास्तेयास्यंतिहरेःपदम् त्वमेवंकुरुराजेंद्रयदिचेष्टमभीप्ससि
८४ केशवस्यवचःश्रुत्वाधर्मराजोतिहर्षितः चक्रेव्रतंविधानेनबंधुभिःपरिवारितः ८५ सूतउवाच एतत्तेसर्वमाख्यातंय
त्पृष्टोहंपुराद्विज पुण्यंपवित्रंपरमंकिंभूयःश्रोतुमिच्छसि ८६ एवंविधंयेपिव्रतंमनुष्याभक्त्याकरिष्यंतिमलिम्लुचस्य उपोषि
तायैरुक्तसुखप्रदात्रीयाशुक्लपक्षेभुवितेपिधन्याः ८७ श्रोष्यंतियेतस्यविधिंसमग्रंतेप्यंशभाजोमनुजाःप्रशस्ताः येवैपठिष्यंति
कथांसमग्रांतेवैगमिष्यंतिहरेर्निवासम् ८८ इतिअधिकशुक्लाएकादशीसमाप्ता अथअधिककृष्णाएकादशीकथा यु
धिष्ठिरउवाच मलिम्लुचस्यमासस्यकृष्णाकाकथ्यतेविभो किंनामकोविधिस्तस्याःकथयस्वजगत्पते १ श्रीकृष्णउवाच
परमेतिसमाख्यातापवित्रापापहारका भुक्तिमुक्तिप्रदानृणांस्त्रीणांचापियुधिर २ पूर्वोक्तविधिनाकार्यायाकृष्णैकादशीजनैः
पूजयेत्परयाभक्त्यानाम्नादेवंनरोत्तमं ३ अत्रतेकथयिष्यामिकथामेतांमनोरमाम् कांपिल्यनगरेजातांमुनीनामग्रतःश्रुताम् ४

आसीद्द्विजवरःकश्चित्सुमेधानामधार्मिकः तस्यपत्नीपवित्राख्यापातिव्रत्यपरायणा ५ कर्मणाकेनचिद्विप्रोधनधान्यविवर्जितः नक्वा
पिलभतेभिक्षांयाचन्नपिपरान्बहून् ६ नभोज्यंलभतेतादृङ्वस्त्रंनैवमंडनं रूपयौवनमाधुर्यैनारीशुश्रूषतेपतिम् ७ अतिथिंपूज
येत्क्वापिनदासाक्षुधितागृहे तिष्ठत्येवविशालाक्षीचाम्लानमुखपंकजा ८ विलोक्यभार्यांरुदतींकर्षतींस्वकलेवरम् नभर्तारंकि
ञ्चिच्चैवनास्त्यन्नमितिभाषते ९ विचार्यब्राह्मणश्चित्ते भार्यायाःप्रेमबंधनम् निंदन्भाग्यंस्वकंविप्रःप्रोचेवाक्यंप्रियंवदाम् १० कांतेकरो
मिकिंकार्यंनमयालभ्यतेधनम् याचयामिनरान्भव्यान्नयच्छंतिचमेधनम् ११ किंकरोमिक्वगच्छामित्वंमेकथयशोभने विनाधने
नसुश्रोणिगृहकार्यंनसिद्ध्यति १२ देह्याज्ञांपरदेशायगच्छामिधनलब्धये यस्मिन्देशेचयत्प्राप्यंभाग्यंतत्रैवलभ्यते १३ उद्यमेन
विनासिद्धिःकर्मणांनोपलभ्यते तस्माद्बुधाःप्रशंसंतिसर्वथैवशुभोद्यमम् १४ श्रुत्वाकांतस्यवचनंसाश्रुनेत्राविचक्षणा प्रोवाचप्रां
जलिर्भूत्वाविनयानतकंधरा १५ त्वत्तोनास्तिसुविज्ञातात्वयाज्ञप्ताब्रवीम्यहम् हितैषिणोनराब्रूयुःशश्वत्साध्वसाध्वपि १६ पू
र्वदत्तंहिलभ्येतयत्रकुत्रमहीतले विनादानंनलभ्येतमेरौकनकपर्वते १७ पूर्वदत्ताहियाविद्यापूर्वदत्तंहियद्धनम् पूर्वदत्ताहियाभूमि
रिहजन्मनिलभ्यते १८ यद्धात्रालिखितंभालेतत्तत्रैवहिलभ्यते विनादत्तेनकिंक्वापिलभ्यतेनैवकिंचन १९ पूर्वजन्मनिविप्रेंद्रनम
यानत्वयाक्वचित् सत्पात्राणांकरेदत्तंस्वल्पंभूर्यपिसद्धनम् २० इहदेशेपरेवापिदत्तंसर्वत्रलभ्यते अन्नमात्रंतुविश्वेशोविनाद-
त्तेनयच्छति २१ तस्मादत्रैवविप्राग्र्यस्थातव्यंभवतामया भवद्विनानतिष्ठामिक्षणमात्रंमहामुने २२ नमातानपिताभ्रातानश्व
श्रूःश्वशुरोजनः नसत्कुर्वंतितांकेपिस्वजनाश्चापरेकुतः २३ भर्तृहीनांविनिंदंतिदुर्भगेतिवदंतिताम् तस्मादत्रस्थिरोभूत्वावि
हरस्वयथासुखम् २४ भवतोभाग्ययोगेनप्राप्तिश्चात्रभविष्यति श्रुत्वातस्यास्तुवचनंस्थितस्तत्रविचक्षणः तावत्तत्रसमाया
तःकौंडिन्योमुनिसत्तमः दृष्ट्वासमागतंहृष्टःसुमेधाद्विजसत्तमः २६ सभार्यःसहसोत्थायननामशिरसासकृत् धन्योस्म्यनुगृही
तोस्मिसफलंजीवितंमम २७ यद्दृष्टोसिमहद्भाग्यादित्युवाचमुनीश्वरम् दत्वासुविष्टरंतस्मैपूजयामासतंद्विजम् २८ भोजयित्वावि

धानेनपप्रच्छप्रमदोत्तमा विद्वन्केनप्रकारेणदारिद्र्यस्यक्षयोभवेत् २९ विनादत्तंकथंलभ्येद्धनंविद्यांकुटुंबिनीम् मांमेभर्त्तापरित्यज्य
गंतुकामोद्यवर्त्तते ३० अन्यदेशेपरान्लोकान्याचितुंपरपत्तने रक्षितोस्मिमयाविद्वन्हेतुवाक्यैर्महत्तरैः ३१ नादत्तंलभ्यतेकिंचिदित्युक्त्वा
सनिवारितः ममभाग्यान्मुनींद्राद्यत्वमत्रैवसमागतः ३२ त्वत्प्रसादाद्दरिद्रंमेशीघ्रंनश्यत्यसंशयम् केनोपायेनविप्रेंद्रदारिद्र्यंनश्यति
ध्रुवम् ३३ कथयस्वकृपासिंधोव्रतंतीर्थंनपादिकम् श्रुत्वातस्याःसुशीलायाभाषितंमुनिपुंगवः ३४ प्रोवाचप्रवरंचित्तेविचार्यव्रतमु
त्तमम् मलिम्लुचेमहाभागेव्रतानामुत्तमंव्रतम् ३५ सर्वपापौघशमनंदुःखदारिद्र्यनाशनम् परमानामविख्याताविष्णोस्तिथिरनुत्त
मा मलिम्लुचेतुयाकृष्णाभक्तिमुक्तिफलप्रदा ३६ तस्यामुपोषणंकृत्वाधनधान्ययुतोभवेत् विधिनाजागरैःसाकंगीतवादित्रसं
युतम् ३७ धनदेनपुराचीर्णंव्रतमेतत्सुशोभनम् तदाहृष्टेनरुद्रेणधनानामधिपःकृतः ३८ हरिश्चंद्रेणचकृतंपुराक्रीतस्तेनवै
पुनःप्राप्ताप्रियातेनराज्यंनिहतकंटकम् ३९ तस्मात्कुरुविशालाक्षिव्रतमेतत्सुशोभनम् विधिनाविधियुक्तेनसमंजागरणेनच
४० इत्युक्त्वातद्विधिंसर्वंकथयामासवाडवः प्रीत्यापरमसंतुष्टस्ततोभक्त्याप्रसादितः ४१ पुनःप्रोवाचतंविप्रंपंचरात्रव्रतंशुभ
म् यस्यानुष्ठानमात्रेणभुक्तिर्मुक्तिश्चप्राप्यते ४२ परमादिवसेप्रातःकृत्वापूर्वाण्हिकंविधिम् कुर्यात्सुनियमान्शक्त्यापंचरात्र
व्रतादरात् ४३ प्रातःकृत्वानिराहारोयस्तिष्ठेद्दिनपंचकम् सगच्छेद्वैष्णवंस्थानंपितृमातृप्रियायुतः ४४ एकाशनस्तुयोभूयाद्दि
नानांपंचकंनरः भोजितंतेनविधिनासदेवासुरमानुषं ४६ पूर्णकुंभंस्तुतोयेनयोददातिद्विजातये दत्तंतेनैवसकलंब्रह्मांडंसचरा
चरम् ४७ तिलपात्रंतुयोदद्याद्ब्राह्मणायविपश्चिते तिलसंख्यावसेत्स्वर्गेसनरोनाकमंडले ४८ घृतपात्रंतुयोदद्यात्स्नात्वापंचदि-
नंनरः सभुक्त्वाविपुलान्भोगान्सूर्यलोकेमहीयते ४९ ब्रह्मचर्येणयस्तिष्ठेद्दिनानांपंचकंनरः सस्वर्गेभुंजतेभोगान्स्वर्वेश्याभिः
समंमुदा ५० एवंविधंव्रतंसाध्विकुरुत्वंपतिनाशुभे धनधान्ययुताभूत्वास्वर्गंयास्यसिसुव्रते ५१ इत्युक्त्वासाव्रतंचक्रेकौंडिन्ये
नयथोदितम् भर्त्रासमंभावयुतास्नात्वामासिमलिम्लुचे ५२ पंचरात्रव्रतेपूर्णेपरायाःप्रियसंयुता सापश्यद्राजभवनादायांतंनृप

नंदनम् ५३ दत्वानवीनंभुवनंदिव्यवस्त्रसमन्वितम् वासयामासविधिनाविधिनाप्रेरितास्स्वयम् ५४ दत्वाग्रामंवृत्तिकरंब्राह्मणायसुमेधसे प्रसन्नस्तपसाराजासंस्कृत्वास्वगृहंययौ ५५ मलिम्लुचस्यमासस्यपरायाःपरमादरात् कृष्णाद्युपोषणात्सद्यःपंचरात्रव्रतेनच ५६ सर्वपापविनिर्मुक्तःसर्वसौख्यसमन्वितः भुक्त्वाभोगान्प्रियासार्द्धमंतेविष्णुपुरंययौ ५७ येकरिष्यंतिमनुजाःपरायाव्रतमुत्तमम् पंचरात्रभवंपुण्यंमयावक्तुंनशक्यते ५८ पुष्कराद्यानितीर्थानिगंगाद्याःसरितस्तथा धेनुमुख्यानिदानानितेनचीर्णानिसर्वथा ५९ गयाश्राद्धंकृतंतेनपितरःपरितोषिताः व्रतानितेनचीर्णानिव्रतखंडोदितानिवै ६० द्विपदांब्राह्मणःश्रेष्ठोगौर्वरिष्ठाचतुष्पदाम् देवानांवासवःश्रेष्ठस्तथामासोमलिम्लुचः ६१ मलिम्लुचेपंचरात्रंमहापापहरंस्मृतम् पंचरात्रेचपरमापद्मिनीपापशोभिणी ६२ साप्यशक्तैःप्रकर्तव्यायथाशक्त्याविचक्षणैः मानुषंजनुरासाद्यनस्नातोयैर्मलिम्लुचः ६३ तेजन्मघातिनोनूनंनोपोष्यंतिहरेर्दिनम् चतुराशीतिलक्षाणिभ्रमंतेयोनिसंकटे ६४ प्राप्यतेमानुषंजन्मदुर्लभंपुण्यसंचयैः तस्मात्कार्यंप्रयत्नेनपरमायाव्रतंशुभम् ६५ श्रीकृष्णउवाच एतत्तेसर्वमाख्यातंयत्पृष्टोहंत्वयानघ मलिम्लुचस्यमासस्यपरमायाःसमुद्भवम् ६६ तत्सर्वंतेसमाख्यातंशृणुष्वावहितोनृप ६७ श्रुत्वैनद्यदुपतिनोदितंमाहात्म्यंतच्चक्रेव्रतमनुजैःप्रियासमेतः भुक्त्वासौदिविभुविदुर्लभांश्चभोगान्नीतोसौसुरवरमंदिरंसुहृष्टः ६८ येप्येवंभुविमनुजामलिम्लुचस्यसुस्नाताःशुभविधिनाव्रतंचरंति तेभुक्त्वाभुविविभवंसुरेंद्रतुल्यंगच्छेयुस्त्रिभुवनवंदितस्यगेहम् ६९ इतिअधिकमासकृष्णैकादशीपरनाम्नीमाहात्म्यंसंपूर्णम्

अथद्वादशीव्रतानिलिख्यंते

तत्रचैत्रशुक्लद्वादश्यांदमनोत्सवः द्वादश्यांचैत्रमासस्यशुक्लायांदमनोत्सवः बौधायनादिभिःप्रोक्तःकर्तव्यःप्रतिवत्सरम् रामार्चनचंद्रिकोक्तेः ऊर्जेव्रतंमधौदोलांश्रावणेतंतुपूजनम् चैत्रेचदमनारोपमकुर्वाणोव्रजत्यधः इदंशुक्रास्तादावपिकार्यं उपाकर्मोत्सर्जनंचपवित्रंदमनार्पणम् ईशानस्यबलिंविष्णोःशयनंपरिवर्तनम् कुर्याच्छुक्रेगुरौमूढेहृज्ञागार्ग्येणउच्यते इतिचैत्रद्वादशी

वैशाखशुक्लद्वादश्यांयोगविशेषोहेमाद्रौ पंचाननस्थौगुरुभूमिपुत्रौमेषेरविःस्याद्यदिशुक्लपक्षे पाशाभिधाना

करभेणयुक्तातिथिर्व्यतीपातइतीहयोगः अत्रस्नानादिकंकुर्याद्गोभूवस्त्रहिरण्यकैः नरःपापात्प्रमुच्येतमाधवस्यतुपूजनात् पंचाननःसिंहराशिःपाशाभिधानामतिथिर्द्वादशी करभोहस्तः इतिवैशाखद्वादशी आषाढशुक्लद्वादश्यां अनूराधायोगरहितायांपारणंकुर्यात् तथाचहेमाद्रौभविष्ये आभाकासितपक्षेषुमैत्रश्रवणरेवती संगमेनहिभोक्तव्यंद्वादशद्वादशींहरेत् आषाढभाद्रकार्तिकशुक्लद्वादशीषुअनूराधाश्रवणरेवतीयोगेपारणंनकुर्यात् अत्रविष्णुधर्मे मैत्राद्यपादेस्वपितीहविष्णुःपौष्णांत्यपादेप्रतिबोधमेतिश्रुतेश्चमध्येपरिवर्तमेतिक्षिप्रबोधपरिवर्तनमेववर्ज्यम् इतिआषाढशुक्लद्वादशी अथश्रावणशुक्लद्वादश्यांदधिव्रतम् तक्रादीनांननिषेधः तत्रदध्यव्यवहारात् तत्रैवद्वादश्यांविष्णोःपवित्रारोपणमुक्तम् हेमाद्रौविष्णुरहस्ये श्रावणस्यसितेपक्षेकर्कटस्थेदिवाकरे द्वादश्यांवासुदेवायपवित्रारोपणंस्मृतं द्वादश्यांश्रावणेवापिपंचम्यामथवाद्विज अनुकूलेषुकर्तव्यंपंचदश्यामथापिवा पवित्रारोपणंविप्राच्छ्रावणेनभवेद्यदि कार्तिक्यवधिशुक्लास्तेकर्तव्यमितिनारदः हेमरौप्यताम्रक्षौमैःसूत्रैःकौशेयपद्मजैः कुशैःकाशैश्चकार्पासैर्ब्राह्मण्याकर्तितैःशुभैः कृत्वात्रिगुणितंसूत्रंत्रिगुणीकृत्यशोधयेत् ततोत्तमंपवित्रंतुषष्ट्यासहशतैस्त्रिभिः समस्त्यासहितंद्वाभ्यांशताभ्यांमध्यमंस्मृतं साशीतिनाशतेनैवकनिष्ठंतत्समाचरेत् साधारणपवित्राणित्रिभिःसूत्रैःसमाचरेत् उत्तमंतुशतग्रंथिपंचाशद्ग्रंथिमध्यमम् कनिष्ठंतुपवित्रंस्यात्षड्त्रिंशद्ग्रंथिशोभितं षड्त्रिंशच्चतुर्विंशतद्वात्रिंशादिनिकेचन चतुर्विंशद्वादशाष्टावित्येकेमुनयोविदुः शिवपवित्रंतुतत्रैव एकादशभिर्वासूत्रैस्त्रिंशताबेष्टयुक्तया पंचाशतावाकर्तव्यंतुल्यंग्रंथ्यंतरालकम् द्वादशांगुलमानिव्यासादष्टांगुलानिच लिंगविस्तारनामानिचतुरंगुलकानिच नकरोतिविधानेनपवित्रारोपणंतुयः तस्यसांवत्सरीपूजानिष्फलामुनिसत्तम तस्माद्भक्तिसमायुक्तैर्नरैर्विष्णुपरायणैः वर्षेवर्षेप्रकर्तव्यंपवित्रारोपणंहरेः इतिश्रीभविष्योत्तरपुराणेश्रावणशुक्लद्वादश्यांविष्णुपवित्रारोपणविधि अथभाद्रशुक्लद्वादश्यांश्रावणद्वादशीयोगेकार्यं तथाचमात्स्ये द्वादशीश्रवणस्पृष्टास्पृशेदेकादशींयदि सएववैष्णवोयोगोविष्णुशृंखलसंज्ञितः तस्मिन्नुपोष्यविधिवन्नरःसंक्षीणकल्मषः प्राप्नोत्यनुत्तमांसिद्धिंपुन-

राप्नोतिदुर्लभां विष्णुधर्मे एकादशीद्वादशीचविष्ण्वर्क्षमपियत्रच तद्विष्णुशृंखलंनामविष्णुसायुज्यकृद्भवेत् एकादशीतितंत्रेणद्वादश्यामुपवासकृत् संस्पृश्यैकादशींराजन्द्वादशींयदिसंस्पृशेत् श्रवणंज्योतिषांश्रेष्ठंब्रह्महत्यांव्यपोहति भाद्रशुक्लद्वादश्यांश्रवणयोगरहितायांपारणंकुर्यात् आभाकासितपक्षेषुइतिदिवोदासोदाहृतवचनात् उपोष्यैकादशींमोहात् पारणंश्रवणेयदि करोतिहंतियत्पुण्यंद्वादशद्वादशीभवम् विशेषेणमहीपालश्रवणंवर्द्धतेयदि तिथिक्षयेणभोक्तव्यंद्वादशींलंघयेन्नहि इहचश्रवणर्क्षंत्रेधाविभज्यमध्यविंशतिघटिकायोगंत्यक्त्वापारणंकार्यं तदुक्तंविष्णुधर्मे श्रुतेश्चमध्येसुप्तिप्रबोधपरिवर्तनमेववर्ज्यं- केचित्तु चतुर्धाविभज्यमध्यपादद्वयमित्याहुः अत्रैवविष्णुपरिवर्तनोत्सवंकुर्यात् अत्रैवशक्रोत्थापनमुक्तमपरार्केगर्गेण द्वादश्यांतुसितेपक्षेमासिप्रोष्ठपदेतथा शक्रमुत्थापयेद्राजाविश्वश्रवणवासरे इयमेवश्रवणद्वादशीनाम्ना तत्रैकादश्यांद्वादशीश्रवणयोगेसैवोपोष्या विष्णुशृंखलविशेषयोगात् एकादश्यांश्रवणयोगाभावेपितद्दिनावच्छेदेनश्रवणस्पृष्टद्वादशीयोगादेवविष्णुशृंखलमिति हेमाद्रौमतं निर्णयामृतेतु श्रवणद्वादशीयोगएव विष्णुशृंखलंनान्यथेति यथानिशीथानंतरंसूर्योदयावधिकलामात्रमपिश्रवणर्क्षंतदापिपूर्वैव दिवोदासीयेतुरात्रेःप्रथमयामेश्रवणयोगेपूर्वा अन्यथोत्तरेत्युक्तम् इयंचबुधवारेऽतिप्रशस्ता यदातुएकादशीश्रवणयुतानद्वादशीतदाएकादश्यामेवव्रतम् अशक्तस्तु एकादश्यांगौणोपवासंकृत्वाद्वादशीमुपवसेत् इदंव्रतंकाम्यमितिगौडाः नित्यमितिदाक्षिणात्याः पारणंतुउभयांतेअन्यतरांतेवाकुर्यात् भाद्रपदेश्रवणैकादश्यांमध्यान्हेवामनावतारः श्रवणयुक्तशुक्लैकादश्यलाभेतुदशमीविद्धापिश्रवणयुताग्राह्या तथाचमदनरत्नेवन्हिपुराणे दशम्यैकादशीयत्रसानोपोष्याभवेत्तिथिः श्रवणेनतुसंयुक्तासोपोष्यासर्वकामदा अस्यांद्वादश्यांदुग्धव्रतसंकल्पः दुग्धव्रतेतुपायसादिकंवर्ज्यं दधिघृतादयस्तुविकाराग्राह्याएव नन्वेवंसंधिन्यादीक्षीरनिषेधोपिदध्यादिग्राह्यंस्यादितिचेत् तत्रवाचनिकनिषेधसत्वात् तद्वाह अपरार्केशंखः क्षीराणियान्यभक्ष्याणितद्विकाराशनेबुधः सप्तरात्रंव्रतंकुर्यात्प्रयत्नेनसमाहितः व्रतंगोमूत्रपानकं अथव्रतविधिः कृष्णउवाच विधानंशृणुराजेंद्र

१६८

यादृष्टंमनीषिभिः यथोक्तंनियमंकुर्यादेकादश्यामुपोषितः दंतान्संशोध्ययत्नेनवाग्यतोनियतेंद्रियः श्रवणद्वादशीयोगेसमुपोष्यजनार्दनम् अर्जयित्वाविधानेनत्रयोदश्यांपरेहनि नदीनांसंगमेस्नायादर्चयेदत्रवामनम् सौवर्णींवस्त्रसंयुक्तांद्वादशांगुलमुच्छ्रिताम् पीनवस्त्रैःशुभैर्वेष्ट्यमृत्पात्रमव्रणंनवं हिरणमयेनपात्रेणअर्घ्यपात्रंप्रकल्पयेत् दध्यक्षतफलैश्चैवसहिरण्यंसचंदनम् नमस्तेपद्मनाभायनमस्तेजलशायिने तुभ्यमर्घ्यंप्रयच्छामिबालवामनरूपिणे नमःशार्ङ्सीरबाणपाणयेवामनायच यज्ञभुक्फलदात्रेचवामनायनमोनमः देवेश्वरायदेवायदेवसंभूतिकारिणे प्रभवेसर्वदेवानांवामनायनमोनमः मत्स्यकूर्मवराहेभ्योनारसिंहस्वरूपिणे रामचंद्रायरामायवामनायनमोनमः श्रीधरायनमस्तेस्तुनमस्तेगरुडध्वज चतुर्बाहोनमस्तेस्तुनमस्तेधरणीधर एवंसंस्तूयविधिवन्नरःप्रस्कंदनामभिः रात्रौजागरणंकुर्यात्सुरतोजलशायिनः धृत्वाबालमयंरूपंदेवोक्रीडत्पयोनिधौ ब्रह्मांडमुदरेयस्यमहद्भूतैरधिष्ठितं मायावीमानवःश्रीशःसोत्रायातुजगत्पतिः एवंसंस्तूयतांभक्त्याद्वादश्यामुदयेरवेः शृंगारसहितंतंचब्राह्मणायनिवेदयेत् वामनःप्रतिगृह्णातिवामनोहंददामिते वामनंसर्वतोभद्रंद्विजायप्रतिपादये जलधेनुंतथादद्याच्छत्रंचैवतुपादुके सहिरण्यानिवस्त्राणिवृषधेनुंतथानृप यत्किंचिद्दीयतेतत्रतद्दानंप्राप्यतेध्रुवं श्रवणद्वादशीयोगेसंपूज्यगरुडध्वजं दत्वादानंद्विजातिभ्योवियोगेपारणंततः सिंहस्थितेतुमार्तंडेश्रवणस्थेनिशाकरे युधिष्ठिरउवाच उपवासासमर्थानांकिंस्यादेकमुपोषितम् महाफलंमहादेवतन्ममाचक्ष्वपृच्छतः श्रीकृष्णउवा॰ याराजंच्छ्रवणोपेताद्वादशीमहतीतुसा तस्यामुपोषितःस्नातःपूजयित्वाजनार्दनम् प्राप्नोत्ययज्ञाद्धर्मज्ञद्वादशद्वादशीफलम् दध्योदनयुतंतस्यांजलपूर्णंतथाघटम् वस्त्रसंवेष्टितंदत्वाछत्रोपानहमेवच नदुर्गतिमवाप्नोतिगतिमग्र्यांचविंदति अक्षय्यंस्थानमाप्नोतिनात्रकार्याविचारणा श्रवणद्वादशीयोगेबुधवारोभवेद्यदि अत्यंतमहतीनामद्वादशीसाप्रकीर्तिता स्नानंजाप्यंतथादानंहोमःश्राद्धंसुरार्चनं सर्वमक्षय्यमाप्नोतितस्यांशृणुकुलोद्वह तस्मिन्दिनेतथास्नानोयत्रक्वचनसंगमे सगंगास्नानजंराजन्फलंप्राप्नोत्यसंशयम् श्रवणे

संगमाःसर्वैपरंतुष्टिप्रदाःसदा विशेषाद्द्वादशीयुक्ताबुधयुक्ताविशेषतः तथैवद्वादशीप्रोक्ताबुधःश्रवणसंयुता शुद्धाश्रवणसंयुक्तासं
गमेविजयास्मृता वारिकुंभप्रदोयस्यांदध्योदनसमायुतम् प्रेतयोनौनजायेतपूजयित्वात्रवामनम् वंशाःसमुद्धृतस्तेनमुक्तःपितृऋणाद
सौ नभस्येसंगमेस्नात्वावामनोयेनपूजितः सयातिपरमंस्थानंविष्णुसायुज्यमाप्नुयात् युधिष्ठिरउवाच उपवासासमर्थानांतदेव
पुरुषोत्तम एकायाद्द्वादशीपुण्यातांवदस्वममानघ श्रीकृष्णउवाच मासेभाद्रपदेशुक्लाद्वादशीश्रवणान्विता सर्वकामप्रदापुण्याउ
पवासमहाफला संगमेसरितांस्नात्वाद्वादश्यांसमुपोषितः समग्रंसमवाप्नोतिद्वादशद्वादशीफलम् त्वमेवतीर्थराजोसित्वमेवसरितांपतिः
संगमस्त्वंप्रसन्नोमेप्रसादंकुरुसंगम साधेनुद्वादशीज्ञेयातस्यांभाद्रपदेशुभा दशम्येकादशीयत्रसानोपोष्याभवेत्तिथिः श्रवणेनतु
संयुक्तासाशुभासर्वकामदा पारणंतिथिवृद्धौतुद्वादश्याशुद्धसंक्षयात् वृद्धौकुर्यात्त्रयोदश्यांतत्रदोषोनविद्यते इत्येषाकथिताराजन्द्वा
दश्यांश्रवणेनया कर्तव्यासाप्रयत्नेनइहामुत्रफलप्रदा द्वादश्यामुपवासोत्रत्रयोदश्यांतुपारणम् निषिद्धमपिकर्तव्यमित्याज्ञापारमेश्व
श्वरी बुधश्रवणसंयुक्तासैवचेद्द्वादशीभवेत् अतीवमहतीतस्यांसर्वंकृतमिहाक्षयम् द्वादशीश्रवणोपेतायदाभवतिभारत संगमेस
रितांस्नात्वागंगादिस्नानजंफलम् सोपवासःसमाप्नोतिनात्रकार्याविचारणा जलपूर्णंतदाकुंभंस्थापयित्वाविचक्षणः पंचरत्नसमो
पेतंसोपवीतंसवस्त्रकम् तस्योपरिस्थापयित्वालक्ष्म्यासहजनार्दनम् यथाशक्त्यास्वर्णमयंशंखशार्ङ्गविभूषितम् स्थापयित्वावि
धानेनसितचंदनचर्चितम् सितवस्त्रयुगच्छन्नंछत्रोपानद्युगान्वितम् ॐ नमोवासुदेवायशिरःसंपूजयेत्ततः श्रीधरायमुखंतद्वद्वै
कुंठहृदयेनमः नमःश्रीपतयेनेत्रेभुजौसर्वास्त्रधारिणे व्यापकायनमःकुक्षीकेशवायोदरंनमः त्रैलोक्यजनकायेतिमेढ्रंसंपूजयेद्धरेः
सर्वाधिपतयेजंघेपादौसर्वात्मनेनमः अनेनविधिनाराजन्पुष्पधूपैःसमर्चयेत् ततस्तस्याग्रतोदेयंनैवेद्यंघृतपाचितम् द्वादशब्राह्मणान्कुंभान्शक्त्यादद्याच्चदक्षिणाम्
एवंसंपूज्यगोविंदंजागरंतत्रकारयेत् प्रभातेविमलेस्नात्वासंपूज्यगरुडध्वजम् पुष्पधूपादिनैवे
द्यैःफलैर्वस्त्रैःसुशोभनैः पुष्पांजलिंततोदत्वामंत्रमेतमुदीरयेत् नमोनमस्तेगोविंदबुधश्रवणसंज्ञक अघौघसंक्षयंकृत्वासर्वसौख्य

प्रदोभव अनंतरंब्राह्मणेतुवेदवेदांगपारगे पुराणज्ञेविशेषेणविधिवत्संप्रदापयेत् प्रीयतांदेवदेवेशोममनित्यंजनार्दनः अनेनैववि
धानेनदद्यात्स्त्रीवानरोत्तमः सर्वंनिवर्तयेत्सम्यगेकभक्तिरतोपिसन् श्रीकृष्णउवाच अत्राप्युदाहरंतीममितिहासंपुरातनम् महत्य
रण्येयद्वृत्तंभूमिपालशृणुष्वतत् देशोदाशार्णकोनामतस्यभागेतुपश्चिमे अस्तिराजन्मरुद्देशः सर्वसत्वभयंकरः स्रुतसवालुकाभूमि
र्यत्रदुष्टामहोरगाः अल्पच्छायाद्रुमास्तत्रमृतप्राणिसमाकुलाः शमीरखदिरपालाशकरीरैश्चसपीलुभिः यत्रभीमगणावृक्षामर्कटैः
परिवेष्टिताः दग्धप्राणिगणाकीर्णायत्रभूर्दृश्यतेक्वचित् अर्कप्रतापैःसंतप्तापरुषानिस्तृणामही ज्वलिताग्निसमंचैवयत्किंचित्तत्र
दृश्यते तथापिलोकाजीवंतिसर्वेकर्मनिबंधनात् नोदकंनोतृषार्भीताराजंस्तत्रबलाहकाः कदाचिदपिदृश्यंतेप्लवमानाविहंगमाःतैः
कांतारगतैःकश्चित्तृषितैःशिशुभिःसमम् सैकतेष्वेवनश्यंतिजलैःसैकतसेतुवत् तस्मिंस्तथाविधेदेशेकश्चिद्दैववशाद्वणिक् हरिद
त्तइतिख्यातोवणिक्धर्मोपजीवकः निजसार्थपरिभ्रष्टःप्रविष्टोमरुजांगले दृष्टवान्मलिनान्वृक्षान्निर्मांसान्भीमदर्शनान् बभ्रा
मभ्रांतहृदयःक्षुत्तृषाश्रमकर्शितः क्वग्रामःक्वजनःक्वाहंक्वयास्यामिकिमाचरे अथप्रेतान्ददर्शासौक्षुत्तृषाव्याकुलेंद्रियः क्षुत्क्षामा
न्लंबवृषणान्निर्मांसान्दृश्यकीकसान् स्नायुबद्धास्थिचरणान्धावमानानितस्ततः वणिक्सोपितदाश्चर्यंदृष्ट्वाभयमुपागतः भी
तभीतस्ततैःसार्धंजगामपथिवंचयन् ततोगत्वापिशाचास्तेन्यग्रोधंमहदाश्रयम् शीतच्छायंस्फविस्तीर्णंतत्रतेसमुपाविशन् निवि
ष्टेषुततस्तेषुएकदेशेस्थितोवणिक् प्रेतस्कंधसमारूढमेकंविकृतदर्शनम् ददर्शबहुभिःप्रेतैःसमंतात्परिवारितं आगच्छच्छवण्मक्षी
सस्कृतिशब्द पुरःसरम् प्रेतस्कंधान्महींगत्वातस्यांतिकमुपागमत् सोपिवाचावणिक्श्रेष्ठमिदंवचनमब्रवीत् अस्मिन्घोरतरेदेशे
प्रवेशोभवतःकथम् तमुवाचवणिक्धीमान्सार्थभ्रष्टस्तदावशः प्रवेशोदैवयोगेनकष्टकर्मकृतेनतु तृष्णामेबाधतेत्यर्थंक्षुत्तृषौच
भृशंतथा प्राणाःकंठमनुप्राप्तावचनंनश्यतीवमे अत्रोपायंनपश्यामिजीवेयंयेनकेनचित् श्रीकृष्णउवा० इत्येवमुक्तःप्रेतस्त
वणिजंवाक्यमब्रवीत् पुन्नागमिममाश्रित्यप्रतीक्षस्वमुहूर्तकम् कृतातिथ्योयथापश्चाद्गमिष्यसियथासुखम् एवमुक्तस्तथाचक्रे

सवणिक्तृषयार्दितः मध्यान्हसमयेप्राप्तेनतस्तंदेशमागतः पुन्नागवृक्षाच्छीतोदावारिधानीमनोरमा दध्योदनसुयुक्तेनवर्धमानेनसंयुता अवतीर्यततःसोग्रेददावतिथयेनदा दध्योदनंचतोयंचक्षुत्तृड्भ्यांपीडितायवै दध्योदनेनतोयेनपरांतृप्तिमुपागतः वितृष्णोविज्वरश्चापिक्षणेनचबभूवह ततस्तुप्रेतसंघस्यतस्माद्भागंक्रमाद्ददौ दध्योदनात्सपानीयात्प्रेतास्तृप्तिंपरांगताः अतिथिंतर्पयित्वाचप्रेतलोकंचसर्वशः ततःस्वयंचबुभुजेभक्तशेषंयथासुखम् ततोभुक्तवतस्त्वन्नंपानीयंचस्वयंपपौ प्रेताधिपंततस्तुष्टोवणिग्वचनमब्रवीत् वणिगुवाच आश्चर्यमेतत्परमंवनेस्मिन्प्रतिभातिमे अन्नपानस्यसंप्राप्तिःपरमस्यकुतस्तव स्तोकेनचतथान्नेनबिभर्षिसुबहून्वने तृप्तिंगताःकथंत्वेतेनिर्मांसाभीमकुक्षयः अपरंचकथंत्वेहमवासावापरिक्षयम् हिमाचलंचकस्मात्त्वंसंप्राप्तोनिर्जलेवने तृप्तश्चासिकथंग्रासमात्रेणैवशुभंब्रवीः पिशाचपतिरुवा० शृणुराजन्प्रवक्ष्यामिदुष्कृतंकर्मचात्मनः शाकलेनगरेरम्येअहमासंसुदुर्मतिः वणिगासंपुराकालेततोभद्रमवापह शाकलेनगरेरम्येनास्तिकस्यदुरात्मनः धनलोभात्तथातत्रकदाचित्म मदेरिता नदत्ताभिक्षवेभिक्षानृषितेतुकदाचन प्रतिवेश्यस्तुतत्रासीद्ब्राह्मणोगुणवान्मम श्रवणद्वादशीयोगेमासिभाद्रपदेतथा सकदाचिन्मयासार्द्धंतापींनामनदींययौ तस्यास्तुसंगमःपुण्योयत्रासीच्चंद्रभागया चंद्रभागासोमसुतातापीचैवार्कनंदिनी तयोःशीतोष्णसलिलेसंगमेसुमनोहरे तत्तीर्थवरमासाद्यप्रतिवेश्यःसमेद्विजः श्रवणद्वादशीयोगेस्नातश्चैवोपवासकृत् चंद्रभागस्यतोयस्यवारिकुंभंनवंदृढं दध्योदनयुतैःसार्द्धंसंपूर्णवर्द्धमानकैः छत्रोपानद्युगंवस्त्रंप्रतिमांविधिवद्वरैः प्रददौविप्रमुख्यायरहस्यज्ञोमहामुनिः वित्तसंरक्षणार्थायतस्यापिचततोमया सोपवासेनदत्तावैवारिधानीसुशोभना चंद्रभागस्यविप्रायदध्योदनयुतातदा एतत्कृत्वागृहंप्राप्तस्ततःकालेनकेनचित् पंचत्वमहमासाद्यनास्तिक्यात्प्रेततांगतः अस्यामटव्यांघोरायांयथास्वंकुशलंतदा पुरोहितोमयादृष्टःस्नात्वागृहमुपागतः शिक्यहस्तःसकलशोद्वादश्यांसमुपोषितः तेनापिकथितातत्रश्रवणद्वादशीशुभा सविनयंसोपदेशंव्रतंकृत्वामयानघ तस्येयंकर्मणःपुष्टिर्येयंदृष्टात्वयानघ यदन्नंचमयादत्तंसजलंघटकांचनम्

१७०

तत्तन्मांभजतेनित्यंपिशाचत्वेपिनित्यशः सेयंमध्यान्हसमयेदिवसेदिवसेमम उपतिष्ठतिवैश्योहंयथादृष्टंत्वयानघ उपवासफलेनैवजातिस्मरणंमे
वृत्त दधिभक्तप्रसादेनजलान्नंचाक्षयंमम ब्रह्मस्वहारिणस्त्वेतेपापाःप्रेतत्वमागताः परदाररताःकेचित्स्वामिद्रोहरताःपरे मित्रद्रोहरताःकेचिद्वेशोस्मि
न्कष्टदारुणे ममैतेभृत्यतांप्राप्ताअन्नदानादिकेनच अक्षय्योभगवान्विष्णुः परमात्मासनातनः यद्दीयतेतमुद्दिश्यअक्षय्यंत
त्प्रकीर्तितम् तेनाक्षय्येनचान्नेनतृप्ताएतेपुनःपुनः प्रेतभावाच्चदौर्बल्यंनमुंचंतिकदाचन अहंचपूजयित्वात्वामतिथिंसमुपस्थि
तं प्रेतभावाद्विनिर्मुक्तोयास्यामिपरमांगतिं मयाविहीनाःकिंत्वेतेवनेस्मिन्भृशदारुणे पीडामनुभवंत्येतेदारुणांकर्मयोनिजाम्
एतेषांतुमहाभागममानुग्रहकाम्यया अनेकनामगोत्राणिगृह्णीष्वत्वंविलंबम अस्तिकक्षागतानांचैवनलसंपुटिकाशुभा हिम
वंतमथासाद्यतत्रत्वंलप्स्यसेनिधिं गयाशीर्षंततोगत्वाश्राद्धंकुरुमहामते एकमेकमथोद्दिश्यप्रेतेप्रेतेयथाक्रमम् एवंसंभाष्यमा
णस्तंतप्तजांबूनदप्रभः समारुह्यविमानंसस्वर्गलोकमितोगतः स्वर्गतेप्रेतनाथेवैप्रभावात्सवणिक्क्रमात् नामगोत्राणिसंगृह्यप्र
यातःसहिमालयं तत्रप्राप्यनिधिंगत्वाविनिक्षिप्यस्वकेगृहे धनभारमुपादायगयाशीर्षवटंययौ प्रेतानांक्रमशस्तत्रचक्रेश्राद्धंदिनेदिने यस्ययस्ययथाश्राद्धंसकरोतिदिनेवणिक् सोपितस्यतदास्वप्नेदर्शयत्यात्मनस्तनुम् ब्रवीतिचमहाभागप्रसादेनतवान
घ प्रेतभावमिमंत्यक्त्वाप्राप्तोस्मिपरमांगतिम् ततस्तेतेविमानस्थाऊचुश्चवणिजंतथा त्वयाहितारिताःसर्वेकिल्बिषाद्वणिजोत्त
म प्रयामःस्वर्गतिंसर्वेइदानींत्वत्प्रसादतः साधुसंगोनहिव्यर्थाकदाचिदपिजायते एवमुक्त्वागताःसर्वेविमानैःसूर्यसन्निभैः दिव्य
रूपधराःसर्वेद्योतयंतोदिशोदश हरिदत्तश्चतान्सर्वान्समुद्धृत्यजगामह स्वदेशस्थंचनगरंस्वगृहंचविवेशह सकृत्वाधनलोभेन
प्रेतानांसङ्गतिंवणिक् जगामस्वगृहंतत्रमासिभाद्रेयुधिष्ठिर श्रवणद्वादशीयोगेपूजयित्वाजनार्दनं दानंदत्वाचविप्रेभ्यःसोपवासोजितेंद्रियः संगमेचमहानद्योःप्रतिवर्षमतंद्रितः चकारविधिवत्स्नानंततोदेहांतमागतः अवापपरमंस्थानंदुर्लभंसर्वमानवैः य
त्रकामफलावृक्षानद्यःपायसकर्दमाः शीतलामलपानीयाःपुष्करिण्योमनोरमाः तद्देशमासाद्यवणिक्महात्माप्रतप्तजांबूनदप्र-

षितांगः कल्पंसमग्रंसुरसुंदरीभिःस्वर्गेसरेमेमुदितःसदैव बुधश्रवणसंयुक्ताद्वादशीसर्वकामदा दानंदध्योदनंशस्तमुपवासः
परोविधिः सगरेणककुत्स्थेनधुंधुमारेणगाधिना एतैश्चान्यैश्चराजेंद्रकामदाद्वादशीकृता यद्वादशीबुधयुताश्रवणेनसार्द्धंसावै
जयेतिकथितामुनिभिर्नभस्ये तामादरेणसमुपोष्यनरोहिसम्यक्प्राप्नोतिसिद्धिमणिमादिगुणोपपन्नाम् इतिहेमाद्रौभवि
ष्योत्तरेश्रवणद्वादशीव्रतं अस्यामेववामनजयंतीव्रतम् हेमाद्रौभविष्ये श्रीकृष्णउवाच द्वादश्यास्तेविधिःप्रोक्तः
श्रवणेनयुधिष्ठिर सर्वपापप्रशमनःसर्वसौख्यप्रदायकः एकादशीयदासास्याछ्रवणेनसमन्विता विजयासातिथिःप्रोक्ताव्रतिना
मभयप्रदा पुरादेवगणैःसर्वैःसमेत्यचयुधिष्ठिर वरदःप्रार्थितोविष्णुरिंद्राग्न्यनिलसंयुतैः बलवानजितोदैत्योबलिर्नाममहाबलः ते
नदेवगणाःसर्वेपातितानिजमंदिरम् त्वंगतिःसर्वदेवानांशीघ्रंकष्टात्समुद्धर दैत्यंजहिमहाबाहोबलिंबलवतांवर श्रुत्वाविष्णुस्तदा
वाक्यंदेवानांकरुणोदयम् उवाचवाक्यंवाक्यज्ञोदेवानांहितकाम्यया विष्णुरुवाच जातंवैरोचनेःपुत्रंबलिंत्रैलोक्यशंकितं
तपसाभावितात्मानंशांतंदांतंजितेंद्रियम् मद्भक्तंमद्गतप्राणंसत्यसंधंमहाबलम् प्रजापतिसमंस्वात्मप्रजानांप्रियकारणम् नगुणा
स्तस्यशक्यंतेवक्तुंकेनापिभूतले अवश्यंतपसोपेतैर्भोक्तव्यंतपसःफलम् तपसोंतस्तुबहुनाकालेनास्यभविष्यति यदाचविजयंदैत्य
ज्ञास्येकालेनकेनचित् समाहृत्यश्रियंतस्यतदादास्येदिवौकसाम् अदितिर्मामयत्नाद्वैपुत्रार्थेपुत्रगृध्निनी तस्यामनीषितंदेवकार्यं
विष्णुरचिंतयत् सचिंतयित्वासुचिरंदेव्यांगर्भावधारणम् अदितिंवरयामासवांछितंतेभविष्यति अथकालेबहुतिथेगतेसागु
र्विणीभवत् सुषुवेनवमेमासिपुत्रंसावामनंहरिं ह्रस्वपादंह्रस्वकायंमहाशिरसमर्भकम् पाणिपादोदरकृशंह्रस्वजंघोरुकेस
रं दृष्ट्वातुवामनंजातमदितिर्मोदमापवै भयंबभूवदैत्यानांदेवानांतोषआगमत् जातकादीन्शुभकरान्संस्कारान्स्वयमेवहि चका
रकश्यपोधीमान्प्रजापतिसमन्वितः आबद्धमेखलोदंडीजटीयज्ञोपवीतवान् कुशश्चर्माजिनधरःकमंडलुविभूषितः बलेर्बलवतोय
ज्ञंजगामबहुविस्तरम् दृष्ट्वादैत्यबलंसर्वंवामनस्तुजगादह अर्थ्यहंयज्ञपतेदीयतांमममेदिनी पदत्रयप्रमाणोहिपठनार्थंम-

ठोमम दत्तादत्तातवतथाबलिःप्राहद्विजोत्तमम् ततोवर्धितुमारब्धोवामनोनंतविक्रमः पादौभूमौप्रतिष्ठाप्यशिरसावृत्यरोदसी ताभ्यांस्वर्गादिकान्लोकान्ललाटेब्रह्मणःपदम् नतृतीयंपदंलेभेकिंददेममतद्वद तद्दृष्ट्वामहदाश्चर्यंसिद्धादेवर्षयस्तथा साधुसाध्विति देवेशंप्रशशंसुर्मुदान्विताः ततोदैत्यगणान्सर्वान्जित्वात्रिभुवनंवशी बलिंप्राहचभोगच्छपातालंसबलानुगः तत्रत्वंमामितान्भोगान्भुक्त्वामद्बाहुपालितः अस्यैंद्रस्यावसानेतुत्वमेवेंद्रोभविष्यसि एवमुक्तोबलिःप्रायान्नमस्कृत्यसुरोत्तमम् विसर्जंचबलिंदेवोलोकपालानुवाचह स्वानिधिष्ण्यानिगच्छध्वंतिष्ठध्वंविगतज्वराः देवेनोक्तागतादेवाःप्रहृष्टाःपूज्यवामनम् देवःकृत्वाजगत्कार्यंतत्रैवांतरधीयत एतत्सर्वंसमभवदेकादश्यांनराधिप तेनेष्टादेवदेवस्यसर्वथाविजयातिथिः मासिभाद्रपदेशुक्लेद्वादशीश्रवणान्विता विजयाप्रोच्यतेसद्भिःकोटिकोटिगुणोत्तरा एकादश्यांसोपवासोरात्रौसंपूजयेद्धरिम् रौप्येसुवर्णपात्रेवादारुवंशमयेपि वा सौवर्णंवामनंकुर्यात्स्ववित्तस्यानुसारतः शिखाकमंडलुधरंछत्रयज्ञोपवीतकम् एवंलक्षणसंपन्नंवामनंपूजयेद्धरिम् आच्छाद्यपात्रंवासोभिरहतैःफलसंयुतैः मार्गेणचर्मणाकुर्याद्भक्त्यावाशक्त्यपेक्षया तिलाढकेनसंपूर्णप्रस्थेनकुडवेनच अलाभेयवगोधूमैः फलैःशुक्लतिलैर्भवेत् अतसीपुष्पसंकाशंतिलकृष्णाजिनोपरि पुष्पैर्गंधैःफलैर्धूपैःकालोत्थैरर्चयेद्धरिम् नानाविधैश्चनैवेद्यैर्भक्ष्यभोज्यैर्गुडौदनैः स्वस्यवित्तानुसारेणसहिरण्यंचकारयेत् एभिर्मंत्रपदैस्तत्रपूजयेद्गरुडध्वजम् उपहारैर्नरश्रेष्ठशुचिर्भूत्वासमाहितः धृत्वाबालमयंदेवंदेवदेवस्यचक्रिणः ब्रह्मांडसुदरेयस्यमहद्भूतैरधिष्ठितं मायावीवामनःश्रीशोसमायातुजगत्पतिः युधिष्ठिरउवाच उपवासासमर्थानांयाचेयंपुरुषोत्तमम् एकांचद्वादशींपुण्यांवदस्ववदतांवर श्रीकृष्णउवाच मासिभाद्रपदेशुक्लेद्वादशीश्रवणान्विता सर्वकामप्रदापार्थउपोष्यानियमात्सदा सरितांसंगमेस्नात्वाद्वादशींसमुपोषयेत् स्नानंदानंजपोहोमःस्वाध्यायःपितृतर्पणम् तस्यांयत्क्रियतेपार्थतदनंतफलंलभेत् युधिष्ठिरउवा॰ त्वत्प्रसादाच्छ्रुतंकृष्णमयातुवामनव्रतम् इदानींब्रूहिमेकृष्णव्रतोद्यापनमुत्तमं श्रीकृष्णउवाच शृणुपांडववक्ष्यामिव्रतोद्यापनमुत्तमम् कृतेनसफलंपार्थव्रतंभवतिनिश्चितम् आदौ

मध्येतथाचांते व्रतस्योद्यापनंभवेत् ममइहजन्मनिजन्मांतरेचकृतदोषप्रायश्चित्तार्थंपुत्रपौत्राद्यभिवृद्ध्यर्थंवामनजयंतीव्रतमहंकरिष्ये व्रतस्यसंपूर्णतासिद्ध्यर्थंउद्यापनंचकरिष्ये इतिसंकल्प्य श्रवणद्वादशीव्रतांगत्वेनपुरुषसूक्तेनषोडशोपचारैःवामनपूजनंचकरिष्ये द्वादशीश्रवणोपेतायदाभवतिभारत सरितांसंगमेस्नात्वाहृदेवापियथाक्रमात् पितृदेवार्चनंकृत्वाध्यायेच्चपरमेश्वरम् जलेनपूरयेत्कुंभंस्थापयित्वाविचक्षणः पंचरत्नसमोपेतंतिलोपरिसुपूजितम् तस्मिन्संसूत्रघटितेस्थापयित्वाचवामनम् सौवर्णंचयथाशक्त्याशंखशार्ङ्गविभूषितम् शुभगंवस्त्रसंयुक्तंद्वादशांगुलमुच्छ्रितम् पीतवस्त्रैःशुभैर्वेष्ट्यअजिनंचकमंडलुम् अतसीपुष्पसंकाशंतिलकृष्णाजिनोपरि स्थापयित्वाविधानेनचंदनेनानुलेपयेत् धृत्वाबालमयंरूपंदेवदेवस्यचक्रिणः ब्रह्मांडमुदरेयस्यमहद्भूतैरधिष्ठितम् मायावीवामनःश्रीशोसमायातुजगत्पतिः आवाहनं अजयाथमहेशायजलजास्यायशंखिने नमस्तेकेशवानंतवासुदेवनमोस्तुते ध्यानं कमंडलुशिखाधारीकुब्जरूपोसिवामन छत्रदंडधरोदेवपाद्यंगृण्हनमोस्तुते पाद्यं सहस्रशीर्षत्वंदेवश्रवणर्क्षसमन्वितः अर्घ्यंगृहाणदेवेशरमयासहितोहरे अर्घ्यं कमंडलुस्थितंचारुगंगोदकप्रपूरितं देवेशाचमनार्थंचतोयंमेप्रतिगृह्यताम् आचमनीयं गंगासरस्वतीरेवापयोष्णीयमुनाजलैः स्नापितोसिमयादेवतथाशांतिंप्रयच्छमे स्नानं अतसीपुष्पसंकाशंतिलकृष्णाजिनोपरि कुरुक्षेत्रेप्रतिष्ठाप्यंवामनंस्थापयाम्यहम् प्रतिष्ठापनं प्रसीददेवदेवेशनमस्तेस्वस्तिवामन नमस्तेब्रह्मरूपायपीतनिर्मलवाससे वस्त्रं श्रीखंडंचंदनंदिव्यंगंधाढ्यंसुमनोहरम् विलेपनंसुरश्रेष्ठचंदनंप्रतिगृह्यतां चंदनं मल्लिकाशतपत्रंचजातिपुष्पसुगंधकं चंपकैर्जलजैर्युक्तंपुष्पंगृण्हनमोस्तुते पुष्पं नमःकमलकिंजल्कपीतनिर्मलवाससे महाहवरिपुस्कंदधृतचक्रायचक्रिणे पूजामंत्रः मत्स्यंकूर्मंवराहंचनारसिंहंचवामनं रामंरामंरामकृष्णंबौद्धंकल्किंहितेनमः पादाद्येकैकमस्यांगंपूजयेच्छीर्षमंततः पादौमत्स्यायचनमोनमःकूर्मायजानुनी वराहायनमोगुह्यंनृसिंहायेतिनाभितः उरस्तेवामनायेतिभुजौरामायवैनमः कर्णौरामायचनमःकृष्णायचनमोमुखम् बौद्धायचनमोनेत्रेकल्किनेचनमःशिरः इत्यंगपूजा धूपोयंदेवदेवेशशं

रवचक्रगदाधर अच्युतानंतगोविंदवासुदेवनमोस्तुते धूपं त्वमेवपृथिवीज्योतिर्वायुराकाशमेवच त्वमेवज्योतिषांज्योतिर्दीपोयंप्रतिगृह्यताम् दीपं अन्नंचतुर्विधंस्वादुरसैःषड्भिःसमन्वितम् मयानिवेदितंदेवप्रसीदपरमेश्वर अग्निर्यमोवैश्रवणःपापंमेहंतुचाव्ययः नैवेद्यं आचमनं करोद्वर्तनं फलं तांबूलं दक्षिणां नीराजनं मंत्रपुष्पांजलिं प्र दक्षिणा नमस्कारान् प्रार्थना जगदादिर्जगद्रूप अनादिर्जगदंतकृत् जलाशयेजगद्योनिःप्रीयतांमेजनार्दनः अनेककर्मनिर्बंधध्वंसिनंजलशायिनम् नतोस्मिमथुरावासंमाधवंमधुसूदनम् नमोवामनरूपायनमस्तेस्तुत्रिविक्रम नमस्तेबलिबंधायवासुदेवनमोस्तुते इत्युक्त्वाथगुरुंनत्वापूजयित्वाजनार्दनं भूमौजपेज्जपःक्रोधःशब्दादिविषयैर्जितः उद्यापनंततःकुर्याद्द्वादशैर्वत्सरैस्तदा सौवर्णींराजतींताम्रींमूर्तिंकृत्वाचतुर्भुजाम् द्वादश्यास्तुदिनेप्राप्तेगुरुमभ्यर्च्यशक्तितः सदाचाररतंप्रार्थ्यवेदवेदांगपारगम् अस्मदीयंव्रतंविप्रविष्णुवासरसंभवं संपूर्णंतुभवेद्येनतत्कुरुष्वद्विजोत्तम तस्याग्रेनियमःकार्योदंतधावनपूर्वकम् स्नानंकृत्वामंत्रपूर्वंनद्यादौविमलेजले तर्पयित्वापितृन्देवान्पूजयेन्मधुसूदनम् एवंसंपूज्यविधिवद्रात्रौजागरणंचरेत् ततःप्रभातसमयेस्नात्वाचार्यादिभिःसह वामनंपूजयेत्प्राग्वत्होमंकुर्याद्विधानतः मंत्रेणेदंविष्णुरितिसमिदाज्यतिलोदनैः प्रतिद्रव्यंसहस्रंवाशतमष्टोत्तरंहुनेत् ब्राह्मणान्भोजयित्वातुद्वादशाष्टव्रती नृप प्रतिमांचतथाधेनुमाचार्यायनिवेदयेत् एवंकृतेतुराजेंद्रगाःकृष्णाद्वादशाष्टवा षट्चतस्रोथवादेयाएकावापिपयस्विनी वामनःप्रतिगृण्हातिवामनोवैददातिच वामनस्तारकोभाभ्यांवामनायनमोनमः एवंदत्वाततःप्रातर्भोजनंपृषदाज्यकम् पूर्वंदद्याद्ब्राह्मणेभ्यःपश्चाद्भुंजीतवाग्यतः प्रत्येकंब्राह्मणान्कुंभान्दक्षिणावस्त्रचंदनम् भूयोयथेच्छयाराजन्सर्वत्रैषविधिःस्मृतः एवंव्रतेकृतेब्रह्मन्यत्पुण्यंतन्निबोधमे यावत्कल्पशतंपुण्यमेकसप्ततिसंख्यया प्राप्यविष्णुपुरंभोगान्भुंजतेकालमक्षयम् इहागत्यभवेद्राजराजभिश्वसुसेवितः अथशिक्यदानसंकल्पः कृतश्रवणद्वादशीव्रतांगत्वेनविहितंश्रीवामनप्रीत्यर्थंइदंदध्योदनसहितंशिक्यदानंकरिष्ये ब्राह्मणपूजनं वायनमंत्रः दध्योदनयुतंशिक्यंवारिधानीयुतंविभो छत्रोपानहसंयुक्तंब्राह्मणाय-

ददाम्यहं इदंदध्योदनसहितंशिक्यंअमुकशर्मणेब्राह्मणायतुभ्यमहंसंप्रददे इतिवायनम् इतिश्रीभविष्योत्तरपुराणेवामनद्वादशीव्रतोद्यापनंसंपूर्णम् अथपौषकृष्णद्वादश्यांसुरूपद्वादशीव्रतं गुर्जरदेशेप्रसिद्धं उमोवाच भगवन्श्रोतुमिच्छामि प्रसादंकुरुमेप्रभो कथितव्यंप्रसादेनयद्यस्तिमयिसौहृदम् व्रतेनकेनचीर्णेनविरूपत्वंप्रणश्यति सौभाग्यंचैवमतुलंप्राप्यतेकस्यपूजनात् तन्मेकथयदेवेशपरमाभीष्टदायकं ईश्वरउवाच श्रूयतांपरमंगुह्यंव्रतंपापहरंशुभम् सुरूपाद्वादशीनाममहापातकनाशिनी सुरूपदायिनीचैवमहापातकनाशिनी कुलवृद्धिकरीचैवसर्वसौख्यप्रदायिनी तच्छृणुष्वप्रयत्नेनकथ्यमानंमयानघे पुरावैद्वापरस्यांतेविष्णुर्दैत्यनिषूदनः अवतीर्णोमर्त्यलोकेवसुदेवकुलेकिल तेनोढारुक्मिणीनामभीष्मकस्यसुतासुरा अत्यंतरूपसुभगापतिव्रतपरायणा नहितस्याविनाकृष्णःस्तोकमुद्वहतेसुखम् श्वश्रूःश्वसुरयोःपादौववंदेसापुनःपुनः केनापिकर्मदोषेणकुपिताविष्णुमातरः नप्रसादयतिक्षिप्रमितिज्ञात्वातुदेवकी कृष्णंप्रोवाचकुपितायदितेजननीह्यहम् ततस्त्वयाहिवैवाह्याकुलरूपगुणाधिका मद्वाक्यमन्यथाकर्तुंनार्हसित्वंकुलोद्वह कृष्णउवाच मायांतुरुक्मिणींत्यक्त्वाउद्वहेहंकथंशुभे यःपरित्यजतेभार्यामविकृतशरीरिणीम् संप्राप्नोतिहिमंदत्वंदौर्भाग्यंसप्तपौरुषं विरूपत्वमवाप्नोतिनसुखंविंदतेक्वचित् व्याधिर्वाजायतेलोकेनिंदनीयःसदेहिनाम् इत्यहंदेविजानामिकथंकुर्यांवचस्तव देवक्युवाच सर्वेषामेवदेवानांतीर्थादीनामपिध्रुवम् मातागुरुतरापुत्रकस्तस्यावचनंत्यजेत् ममवाक्यस्यकरणात्कथंपापिष्ठताभवेत् जननीपूज्यतेतेनभार्याचयदुनंदन कृष्णउवाच परित्यजामिनोभीरुंप्रियांप्राणधनेश्वरीं इतितूष्णींपराभूतांमातरंप्रेक्ष्यकेशवः चिंतयामासपरमंकथंसौख्यंभवेदिति एतस्मिन्नेवकालेतुनारदोभगवान्ऋषिः अभ्युज्जगामसहसाविष्णुंसंप्रेक्ष्यविस्मितम् पूजितःपरयाभक्त्याअर्घ्येजग्राहनारदः उपविष्टोयथान्यायंपर्यपृच्छदनामयम् नारदउवाच किंत्वंखेदंकरोषीत्थंकथमुद्वेगकारणम् किंनसिद्ध्यतितेभीष्टंत्यजोद्वेगंयदूत्तम कृष्णउवाच मात्रानियुक्तोदेवर्षेपरिणेतुंद्विजोत्तम कन्यामुद्वाहयिष्यामिसुरूपांकस्यचित्प्रभो नारदउवाच श्रूयतामभिधा

स्यामिपूर्ववृत्तांतमादरात् लक्ष्मीयुक्तःपुरानाथःक्रीडमानोहिनंदते तत्रागमत्सभगवान्दुर्वासाऋषिसत्तमः अभ्युत्थानादिविधिनास
त्कृतंज्ञानमूर्तिना प्रेक्ष्यवीभत्सरूपंतंदेव्याहास्यंकृतंतदा सकोपेनमहातेजावैश्वानरसमप्रभः शशापलक्ष्मींदुर्वासामुनिःक्रोधेनसंयु
तः हसितोहंत्वयामुग्धेआत्मनोरूपमीक्ष्यच विरूपाभवदुर्वृत्तेकिंनज्ञातोद्यहंत्वया इत्युक्तयातयादेव्यायथाशक्त्याप्रसादितः प्र
सन्नोजगदेवाक्यंमच्छापोनान्यथाभवेत् जन्मांतरेणास्यफलंकरिष्यतिविरूपिता सेयंमर्त्येवतीर्णाहिगोपकस्यगृहेशुभा सत्य
भामाविरूपाक्षाविरूपदशनातथा कर्णनासातिविकृतासंजातानस्वभावतः पाणिपादकटिग्रीवंसर्ववैरूप्यलक्षणम् तत्रगच्छम
हाप्राज्ञसनेकन्यांप्रदास्यति कृष्णउवाच विरूपवदनांब्रह्मन्कथंद्रक्ष्यामिनित्यशः कांगतिंवैगमिष्यामितांविवाह्यकुरूपि
णीं नारदउवाच रुक्मिण्यास्त्वत्प्रसादेनशापान्मुच्येततत्क्षणात् उत्तमंप्राप्स्यतेरूपंसौभाग्यंपरमंसुखम् देवक्याश्चप्रसा
देनधर्मकामार्थसिद्धये एवंभविष्यतितवसंबंधोविहितःसुरैः त्वयाचनान्यथाकार्यंगुरूणांवचनंमहत् मातागुरुतराभूमेरितिवे
देषुगीयते ईश्वरउवाच एवमुक्त्वामहादेविनारदस्त्रिदिवंगतः कृष्णोपिमातरंमाहवैवाह्यंहिविधीयते विवाहिताचसातेन
वेदोक्तविधिनाततः आनीयस्वगृहंमातुर्दर्शयामासतांवधूम् पश्याद्यैवमयाभामापरिणीताशुचिव्रता निवृत्तिंपरमांगच्छप्रसा
दसुसुखीभव इत्युक्त्वावीक्ष्यतांकृष्णःप्रणिपत्यचमातरम् बभूवकृतकार्याणांकृतकृत्योमहाबलः तांदृष्ट्वादेवमाताचबभौदुःखा
धिकाभृशम् ईदृक्विरूपांविकृतांकथंभर्तास्मिगोपिनाम् चिंतामवापमहतीमतीवोद्विग्नमानसा कस्यापिनावचक्षेयाविरूपं
तच्छरीरजम् अथकस्मिन्सुकालेतुरुक्मिणीतत्रभावतः नमस्कृत्यततःश्वश्रूंसंस्पृष्टंगोमयंतदा उवाचप्रसृतंवाक्यंभक्तियुक्तं
शुभावहम् अंबाहंद्रष्टुमिच्छामिसपत्नींकृष्णवल्लभां तांदर्शयितुमेशीघ्रंप्रसादंसुविधायताम् देव्युवाच श्वश्रूर्यद्यहंते
सुभगेममापिवचनंकुरु पूर्वमाचरितंसुभ्रूःसुरूपाद्वादशीव्रतम् संप्रयच्छसिचेत्तस्यैदर्शनंतेभविष्यति रुक्मिण्युवाच
कष्टेनक्रियतेधर्मोव्रतंचापिसुदुष्करम् कथंतस्यैप्रयच्छामिफलंदेवैःसुदुर्लभम् देवक्युवाच अर्धंप्रदीयतामस्यैतदर्धंम

थवापुनः पंचमांशमथोषष्ठंषोडशांशमथापिवा रुक्मिण्युवाच सुरूपाद्वादशीपुण्यंतिलार्द्धमपिनोलहे किंपुनःशोडशांशंतुस-
पत्न्यांदुःखचेतसि एवमुक्त्वाजगामाशुमंदिरंस्वंशुभेक्षणा पुनःपप्रच्छकृष्णंसाप्रणिपातेनवैरुषा देवपृच्छामितेसर्वंननुतुष्टोसि
मेप्रभो कथंपश्यामितामद्यनवोढांकृष्णवल्लभाम् श्रीकृष्णउवाच दर्शयिष्येह्यहंसुभ्रूर्विरूपांतांसुमध्यमे विरूपश्रवणा
क्षीतांकुरूपांविकृताननाम् अदृष्टवैचित्र्यकृतंरूपाद्यत्रनसंशयः इत्युक्त्वारुक्मिणींकृष्णःसत्यभामांतदाब्रवीत् प्रार्थयाथप्रियां
सुभ्रूंसुरूपाद्वादशीव्रतम् तिलादपिहिषष्ठांशंदेहिमेसेवकास्म्यहं सागतातत्सकाशंतुपिधायद्वारमादरात् उवाचरुक्मिणीं
सातुसत्यभामाशुचिव्रता एकामप्याहुतिंदेविदेहिभीष्मकनंदिनि अर्धाहुतिर्वामेदेयायद्यस्तिमयिसौहृदम् रुक्मिण्युवाच
कोयंमतिभ्रमस्तेवैसुरूपाद्वादशींप्रति तिलाहुतिंप्रयच्छामिउद्घाटयकपाटकम् इत्युक्त्वात्वरितंस्नात्वादत्वाह्येकांतिलाहुतिम्
तस्यांचैवप्रदत्तायांरूपेणसाधिकाभवत् तांदृष्ट्वाविस्मयपरांपप्रच्छदयितांहरेः कथ्यतांममकाहित्वंकिमर्थमिहचागता स
त्यभामोवाच तवाहंभगिनीभद्रेकृष्णेनोढास्मिधार्मिके सत्यभामेतिमेनाम नमामिचरणौतव इतिश्रुत्वातुवचनंविस्मयोत्फु
ल्ललोचना नोवाचकिलचार्वंगीत्यत्यर्थंविस्मिताभवत् एतस्मिन्नेवकालेतुवागुवाचाशरीरिणी तवदानप्रभावेनसत्यासीत्वसु
रूपिणी सुरूपाद्वादशीपुण्यंदेवानामपिदुर्लभम् देव्युवाच कर्मणाकेनकर्तव्याकिमाचारंवदस्वमे नियमंहोमदानंचप्रसादं
मेविधीयताम् ईश्वरउवाच पौषेकृष्णेतुसंप्राप्तेपुष्यऋक्षंयदाभवेत् तस्यांरात्रौसंयतात्माध्यात्वाविष्णुंसनातनम् श्वेतागौ
रेकवर्णावातस्याग्राह्यंतुगोमयम् अंतरिक्षात्तुपतितंशुचिर्मौनमवस्थितः तस्यकृत्वाहुतीनांतुशतमष्टोत्तरंतिलैः प्रतीक्षेद्द्वादशींकृ
ष्णामुपवासपरायणः स्नात्वानद्यांतडागेवाविष्णुमेवाथचिंतयेत् सौवर्णंतुहरिंकृत्वारौप्यंवाभक्तिशक्तितः तिलपात्रोपरिस्थंचततो
विष्णुंप्रपूजयेत् इतिसंपूज्यविधिवत्पुष्पधूपैःसुदीपकैः नैवेद्यंतिलमिश्रंतुफलानिविविधानिच नमःपरमशांतायविरूपाक्षनमोस्तु
ते सर्वसंकटनाशायगृहाणार्घ्यंनमोस्तुते इत्यर्घ्यं एवंसंपूज्यदेवेशंकुर्याद्धोमंसमाहितः आवाह्यदेवंलक्ष्मीशंहोमयेद्गोमयाहुतीः

शतमष्टाधिकंचैवतिलान्व्याहृतिसंयुतान् सहस्रशीर्षेतिमंत्रेणहृदिध्यात्वाजनार्दनं लक्ष्मीयुक्तंचमेघाभंशंखचक्रगदाधरम् होमां
तेकारयेच्छ्राद्धंवैष्णवंद्विजसत्तमैः दत्वाचभोजनंतेभ्योघृतकुंभंसदक्षिणं कथाश्रवणसंयुक्तंजागृयात्तुततोनिशां तत्कुंभंवैष्णवीं
मूर्तिंविप्रायप्रतिपादयेत् मंत्रहीनंविहीनंचसर्वंतत्क्षमापयेत् ईश्वरउवाच एवंयःकुरुतेदेविस्वरूपाद्वादशीव्रतम् नरोवाय
दिवानारीतच्चपुण्यंशृणुष्वमे दौर्भाग्यंनश्यतेतस्यअपिजन्मांतरार्जितम् अपिधूमस्यसंपर्कोजायतेकारणांतरात् तस्यापिनश्यतेदुः
खंवैरूप्यंजन्मजन्मनि पतिनानवियोगःस्यान्नष्टैःसहवियोगता जायतेगोत्रवृद्धिःस्यात्कीर्तिमान्जायतेभुवि जातिस्मरणमाप्नोतिपदं
निर्वाणमाप्नुयात् पठ्यमानमिदंभक्त्यायःशृणोतिसमाहितः पुण्यमाप्नोतिसततंस्वर्गलोकेमहीयते इतिश्रीभविष्योत्तरपुराणेस्वरू
पाद्वादशीव्रतोद्यापनंसंपूर्णं इतिद्वादशीव्रतानिसमाप्तानि अथत्रयोदशीव्रतानिलिख्यंते आषाढशुक्लत्रयोदश्यांजयापार्वतीव्र
तम् भविष्योत्तरपुराणे श्रीलक्ष्मीरुवाच देवदेवजगन्नाथभुक्तिमुक्तिप्रदायक कथयस्वप्रसादेनलोकानांहितकाम्यया नारीणां
तुव्रतंदेवअवैधव्यकरंशुभम् येनचीर्णेननारीणामखंडफलदंभवेत् श्रीभगवानुवाच सत्यमुक्तंत्वयादेविनचमिथ्यात्वयोदितम्
तद्व्रतंकथयिष्यामिनाख्यातंकस्यचित्सुरा अकथ्यंपरमंगुह्यंपवित्रंपापनाशनम् येनचीर्णेननारीणामवैधव्यंप्रजायते आषाढेचप्रक
र्तव्याशुक्लपक्षेत्रयोदशी गृण्हीयान्नियमंमंत्रदंतधावनपूर्वकम् तत्रमंत्रः आयुर्बलंयशोवर्चःप्रजाःपशुवसूनिच ब्रह्मप्रज्ञांचमेधांच
त्वंनोदेहिवनस्पते नियमात्फलमाप्नोतिनिष्फलंनियमंविना एतत्सर्वंप्रयत्नेनव्रतंनियमपूर्वकम् एकभुक्तंव्रतंचैवकरिष्येहंसुदाधुना
स्वादहीनेनधान्येनममपापंव्यपोहतु उमामहेश्वरौकार्यौसुवर्णरजतादिभिः अथवामृन्मयौकार्यौवृषस्कंधोपरिस्थितौ गोष्ठेदेवाल
येवापितथाब्राह्मणवेश्मनि स्थापयेद्वेदमंत्रेणप्रतिष्ठांतत्रकारयेत् तद्दिनेदंतकाष्ठंहियोथिकंचवरानने स्नानशुद्धिंततःकृत्वाततःपूजां
प्रकल्पयेत् सप्तर्षिभिःसमंतत्रपूजांकृत्वापृथक्पृथक् कुंकुमागरुकस्तूरीसिंदूरैरष्टगंधकैः चंपकैःशतपत्रैश्चयूथिकादिऋतूद्भवैःश्री
वासूत्रेणदूर्वाभिःपूजयित्वाविधानतः अर्घ्येणवारिशुद्धेनउत्तरीययुगेनच श्रीफलद्राक्षदाडिंबैर्ऋतुजातफलेनच आद्येदेविचशर्वाणि

शंकरस्यसदाप्रिये अर्घ्यंगृहाणदेवेशिममोपरिकृपांकुरु इतिपूजाप्रकर्तव्याकथांश्रूयाद्द्विजोत्तमात् श्रीमहालक्ष्मीरुवाच अच्युतायनमस्तुभ्यंपुरुषायादिरूपिणे व्रताध्यक्षमहाप्राज्ञत्वंवृद्धिक्षयकारक कथयस्वप्रसादेनव्रतानामुत्तमंव्रतम् केनचादौपुराचीर्णं मर्त्यलोकेचकारकः एतत्सर्वंप्रयत्नेनब्रूहिमेजगदीश्वर श्रीभगवानुवा० अथातःसंप्रवक्ष्यामिपार्वत्याश्चकथामिमां यांश्रुत्वा सर्वपापेभ्योमुच्यतेनात्रसंशयः आसीत्पुराकृतयुगेकौंडिन्येनगरेवरे ब्राह्मणोवेदतत्वज्ञःसत्यशौचपरायणः गुणवान्शीलसंपन्नो वामनोनाममनामतः तस्यभार्याप्रियासत्यारूपलक्षणसंयुता धनाढ्येवेदविदुषोगृहेवैसर्वसंपदः पूर्वकर्मविपाकेनसंतानरहितोभवत् अपुत्रस्यगृहंशून्यंश्मशानसदृशोपमम् दंपतीतेनदुःखेनक्षीणौजातौशरीरतः एकदाशुभकालेतुनारदोगृहमागतः अर्घ्यपाद्यादिकंकृत्वाकथांचक्रेमुनासह वामनउवाच नारदत्वमृषिश्रेष्ठःसर्वज्ञानपरायणः कथयस्वप्रसादेनकथंदुःखंप्रशाम्यति दानेनकेनदेवर्षेव्रतेननियमेनच तीर्थेनचमुनिश्रेष्ठसंतानंमेकथंभवेत् नारदउवाच शृणुविप्रप्रवक्ष्यामिसंतानंतेभविष्यति वनस्य दक्षिणेपार्श्वेबिल्वयूथस्यमध्यतः भवानीसहितःशूलीलिंगरूपेणतिष्ठति सपर्यांकुरुयत्नेनतुष्टोदास्यतिसंततिम् अपूज्यलिंगमभ्यर्च्यसंततिश्चप्रजायते अनाथप्रेतसंस्कारीकोटियज्ञफलंलभेत् इत्युक्त्वानारदःस्वर्गंगतोवैमुनिपुंगवः वनमध्येगतौद्वौतुदंपतीपुत्रकांक्षिणौ बिल्वमध्येततोदृष्ट्वाशिवलिंगंपुरातनम् बिल्वपत्रैश्चजीर्णैश्चपिहितंसर्वतस्ततः विहायबिल्वपत्राणिसम्ममार्जोपलेपनम् पंचामृतेनप्रक्षाल्यपूजांचक्रेमनोरमाम् नित्यंनियमसंयुक्तःपूजयेत्परमेश्वरं पंचाब्दंपूजितस्तेनपार्वतीसहितोहरः एकदातुगतःसोथपुष्पार्थेब्राह्मणोत्तमः कुसुमंगृह्यतेयावत्तावद्दृष्टःसपन्नगैः पतितस्तद्वनेघोरेसिंहव्याघ्रसमाकुले तृतीयेनमुहूर्तेनतद्भार्याचिंतयत्तदा केनापिकारणेनैवकथंनायातिमेपतिः रुदंतीशोकसंयुक्तावनमध्येगतासती आगतायत्रतत्रास्तेभर्त्ताचपतितोभुवि भर्त्तारंपतितंदृष्ट्वातदामोहमुपागमत् ततश्चाचेतनायुक्तासास्मरद्वनदेवताम् पार्वतीतुसमायातायत्रतिष्ठतिब्राह्मणी आक्रंदमानांतांदृष्ट्वापार्वतीवरदाभवत् सुधांसुभगहस्तेनविप्रवक्त्रेविमुंचति उत्थितोब्राह्मणस्तत्रनिशीथेनिद्रितोयथा तावेवचरणौ

गृह्यदंपतीविनयान्वितौ पार्वत्याःपूजनंभक्त्याचक्रतुस्तौमुन्वितौ पार्वत्युवाच त्वत्पूजनादहंप्रीतावरंवरयसुव्रते ब्राह्मण्युवा॰ त्वत्प्रसादेनरुद्राणिमयालब्धंचवांछितम् संतानंचैवमेनास्तिएतद्दुःखंचमेहृदि पार्वत्युवाच व्रतंकुरुविधानेनममनाम्नाचविश्रुतम् जयाममव्रतंनामत्रैलोक्येपावनंपरम् जयापार्वतीव्रतंनामआषाढेचारुलोचने स्वादहीनेनधान्येनत्याज्यंलवणमुत्तमम् दृढव्रतंचकर्तव्यंभोक्तव्यंदिनपंचकं त्रयोदश्यांव्रतारंभस्तृतीयायांसमापनम् शुक्लपक्षेव्रतारंभःकृष्णापक्षेसमापनम् पंचाब्दंगोधुमान्नेन व्रतंकार्यंप्रयत्नतः पंचाब्दंहियवैश्चैवव्रतंतुलवणंविना पंचाब्दंतंडुलैःकार्यंइक्षूरसविवर्जितम् मुद्गैःकार्यंपंचवर्षमेवंहायनविंशति विंशत्यब्देसमाप्तेतुव्रतोद्यापनमाचरेत् दंपत्योःपरिधानंहिदद्याद्भूषणपूर्वकम् भोजनंचसुवासिन्यैतृतीयायांयथोदितम् विंशतिप्रथमेवर्षेवित्तशाठ्यमतःपरम् पंचकेपंचकेकार्यंपरिधानैश्चभोजनैः नानारसैःसमायुक्तंघृतखंडसमन्वितं सभर्तृकांश्चदातव्यंभोज्यंसौभाग्यहेतवे कुंकुमंकज्जलंदेयमब्देअब्देस्वशक्तितः रात्रौजागरणंकुर्यादखंडफलदंभवेत् अनेनविधिनायस्तुकुरुतेव्रतमुत्तमम् रात्रौजागरणंकार्यंव्रतसंपूर्णहेतवे व्रतेनतुविनानारीविधवाजन्मजन्मनि शोचतीदुःखसंयुक्तानचसौभाग्यभाग्भवेत् नारीणांतुव्रतेदानैर्यदिभक्त्यातनःपरम् सौभाग्यमतुलंयातिपतिसंतोषदानतः एवमुक्त्वाव्रतमिदंतत्रैवांतरधीयत पश्चाद्गृहंसमागत्यदंपतीचमुदान्वितौ पूर्वोक्तेनविधानेनप्राप्तंपुत्रसुखंतयोः दंपतिभ्यांविशेषेणअवैधव्यंपरंसुखम् भुक्त्वाचविविधान्भोगानंतेप्राप्तंशिवालयम् एवंयाकुरुतेनारीनचभर्त्रावियुज्यते कुलत्रयंसमुद्धृत्यनीयतेशिवमंदिरम् सान्निध्यसुखमाप्नोतिशिवलोकेमहीयते कथांश्रुत्वाविधानेनसर्वपापात्प्रमुच्यते इतिश्रीभविष्योत्तरपुराणेजयापार्वतीव्रतोद्यापनंसंपूर्णम् इतिगुर्जरदेशेगुर्जराचारप्राप्तम् अथभाद्रपदशुक्लत्रयोदश्यांगोत्रिरात्रव्रतंहेमाद्रौभविष्योत्तरे युधिष्ठिरउवा॰ भगवंस्त्वत्प्रसादेनबहूनिसुकृतानिमे श्रुतानिबहुपुण्यानिकृतानिमधुसूदन सर्वपापहराणिस्फुःसर्वकामप्रदानिच सांप्रतंश्रोतुमिच्छामिव्रतानामुत्तमंव्रतम् किंचिद्योगव्रतंब्रूहियदितुष्टोसिमाधव यत्कृत्वासर्वपापेभ्योनरोनारीप्रमुच्यते श्रीकृष्णउवा॰ कथयामिनृपश्रेष्ठव्रतानामुत्तमंव्रतं यन्नकस्यचि

दारव्यातंतच्छृणुष्वनृपोत्तम यान्यान्कामान्वांछयतिलभेत्तांस्तांस्तथैवच तत्क्षणादेवमुच्यंतेनरानार्यश्चसर्वशः प्रभोर्भगवतोराजन्कामधेनोःप्रसादतः सौभाग्यंसंततिंलक्ष्मींप्राप्नोतिसुखमुत्तमम् युधिष्ठिरउवाच यदितुष्टोसिभगवन्व्रतस्यास्यविधिंशुभम् ब्रूहिमेदेवदेवेशकरोमित्वत्प्रसादतः केमंत्राःकेनमस्कारादेवतार्थेप्रकीर्तिताः किंदानमत्र मर्घ्यंचकथयस्वसुरोत्तम

श्रीकृष्णउवाच नारदेनपुराराजन्यदुक्तंसगरादिषु स्मारितंतत्त्वयाराजन्शृणुष्वैकमनाव्रतम् मासिभाद्रपदेशुक्लेत्रयोदश्यां समारभेत् त्रयोदश्यांप्रभातेतुसमुत्थायशुचिर्भवेत् गृण्हीयान्नियमंपूर्वंदंतधावनपूर्वकम् आचम्योदकमादायइमंमंत्रमुदीरयेत् गोत्रिरात्रव्रतस्यास्योपवासकरणेमम शरणंभवदेवित्वंनमस्तेधेनुरूपिणि प्रसीदतुमहादेवोलक्ष्मीनारायणःप्रभुः लक्ष्मीनारायणंदेवंसौवर्णंवास्वशक्तितः पंचामृतेनगव्येनस्नापयेत्कमलापतिम् स्थापयेत्सर्वतोभद्रेमंडलेष्टदलेपिवा गंधपुष्पैःसनैवेद्यैस्तुतिगीतादिनर्तनैः नारिकेलार्घ्यदानेनप्रीणयेद्वाहरिंतथा लक्ष्मीकांतजगन्नाथगोत्रिरात्रव्रतंमम परिपूर्णंकुरुष्वेदंगृहाणार्घ्यंनमोस्तुते आर्तिक्यंचततःकुर्याद्भक्त्याकृष्णस्यतुष्टिदम् नवकुंभंजलभृतंहविष्यान्नेनपूरितम् कृत्वादिनत्रयंपार्थप्रीतयेविनिवेदयेत् धेनुपूजांततःकुर्याज्जलधारांप्रदक्षिणाम् पुरादत्वातुमुकुटंकुंडलंकुंडमंतथा अन्नाच्छादनगंधादिदिव्यपुष्पैःसदीपकैः अहोरात्रभवंकिंचित्घृतदीपंदिनत्रयम् अर्घ्यदानंततःकुर्यान्नारीकेलादिभिःफलैः अर्घ्यमंत्रः पंचगावःसमुत्पन्नामथ्यमानेमहोदधौ तासांमध्येतुयानंदातस्यैधेन्वैनमोनमः प्रदक्षिणीकृतायेनधेनुर्मार्गानुसारिणी प्रदक्षिणीकृतातेनसप्तद्वीपावसुंधरा गावोममाग्रतःसंतुगावोमेसंतुपृष्ठतः गावोमेहृदयेसंतुगवांमध्येवसाम्यहं आरार्तिकंसनैवेद्यंगीतवाद्यमहोत्सवैः कुंकुमंकलशंसूत्रंधेन्वैदद्याद्विचक्षणः एवंसंपूज्यतांधेनुंसम्यक्भक्त्यादिनत्रयम् यवांश्चयवसंचैवचारयेत्पारयेदपः गोमयादागतैर्धौतैःकुर्यात्तैरेवपारणं धेन्वैप्रजागरंकुर्यात्सर्वपापप्रणाशनम् त्रिविधान्मुच्यतेपापात्प्रहरार्धेनपांडव तस्योत्तरात्कृतात्पापात्प्रहरार्धेनमुच्यते चत्वारिवेणुपात्राणिकारयित्वाप्रपूरयेत् नारिकेलासुफदलद्राक्षाखर्जूरदाडिमैः शुभैर्विरूढैःसिंदूरैर्वस्त्रकुंकुमकज्जलैः प्रथमेबीज-

पूरार्घ्यंद्वितीयेदाडिमंशुभम् तृतीयेनारिकेलंचदद्यादर्घ्यंदिनत्रयम् प्राकारास्त्रत्रयःकार्याहविष्यान्नेनपूरिताः लक्ष्मीनारायणंदेवंब्राह्मणंभार्ययासह पूजयेत्कुंकुमैर्वस्त्रैर्हैमसूत्रैर्युधिष्ठिर दंपत्योर्भोजनंदेयंधेनुभक्त्यादिनत्रयम् पारणेगौरिणींविप्रान्मिष्टान्नंधूंश्चभोजयेत् गुरुरूपायतांधेनुंद्विजायप्रतिपादयेत् सकुंकुमांसवत्सांचघंटासुकुटभूषिताम् गीतवादित्रनृत्यादिशांतिपाठपुरःसरम् यायाद्विप्रगृहंयावत्तान्नयेत्तत्फलस्यवै एवंयाकुरुतेपार्थगोत्रिरात्रव्रतोत्तमम् दुर्लभंतुसदास्त्रीणांनारीणांनृपसत्तम अश्वमेधसहस्राणिवाजपेयशतानिच कृत्वायत्फलमाप्नोतिगोत्रिरात्रव्रतेकृते प्रभासेचकुरुक्षेत्रेचंद्रसूर्यग्रहेतथा हेमभारशतंदद्यात्फलंतत्प्राप्नुयान्नृप धेनुदानंततःपश्चात्सवस्त्रंसर्वकामदं सागरांबरसंयुक्तादत्तातेनवसुंधरा एवंयाकुरुतेपार्थत्रिरात्रव्रतमुत्तमम् भवांतरकृतात्पापात्त्रिविधान्मुच्यतेनरः यावाकाचिन्नपश्येतभर्तृदुःखंनराधिप पुत्रपौत्रकृखंतस्याभविष्यतिनसंशयः जन्मांतरेप्यसौनारीवैधव्यंनैवपश्यति वैधव्यंचमहद्दुःखंनभवेत्तुभवांतरे अपुत्रालभतेपुत्रान्धनहीनाधनंलभेत् कायेनमनसाचैवकर्मणायदुपार्जितम् तत्सर्वंविलयंयातिगोत्रिरात्रव्रतेनवै इहभोगान्नृपविपुलान्भुक्त्वायुःपूर्णमेवच व्रतस्यास्यप्रभावेनगोलोकेचमहीयते कीर्तिदंधनदंचैवसौभाग्यकरणंनृप आयुरारोग्यकरणंसर्वपापप्रणाशनम् एतस्मात्कारणाद्राजन्सभार्यस्त्वंकुरुव्रतम् राज्यंवायदिसत्कीर्तिंनित्यंप्राप्तुमिहेच्छसि तच्छ्रुत्वापांडवश्रेष्ठोव्रतंचक्रेसमाहितः व्रतस्यास्यप्रभावेनलब्धंराज्यमकंटकम् इतिहेमाद्रौभविष्येगोत्रिरात्रव्रतंसं०

अथआश्विनशुक्लत्रयोदश्यांगुर्जराचारप्राप्तंगोत्रिरात्रव्रतम् युधिष्ठिरउवाच येनलक्ष्मीचसकलानराणांभवनेभवेत् संततिर्वर्धतेस्त्रीणांतद्व्रतंवदमेप्रभो श्रीकृष्णउवाच शृणुराजन्प्रवक्ष्यामिव्रतानामुत्तमंव्रतम् येनवैक्रियमाणेनसर्वपापक्षयोभवेत् गोत्रिरात्रमितिख्यातंनृस्त्रीणांफलदायकम् वांछितंजायतेतेषांयेषांचेतसिवर्तते युधिष्ठिरउवाच कीदृशंतद्व्रतंदेवविधानंतत्रकीदृशम् कथमेषासमुत्पन्नाकस्मिन्कालेतुकेशव श्रीकृष्णउवाच पुराकृतयुगेपार्थमनुर्नामबभूवह वैवस्वतकुलेजातोबभूवपृथिवीपतिः तदन्वयेदिलीपश्चप्रसूतःपतिरुत्तमः नृपाःसर्वेवशंतस्यसंजाताःकरदायकाः नित्यंधर्मपरोराजापूजनीयोमनीषिभिःनजा

यतेसुसंतानंतस्यनीतिमतःसदा वांछयंस्तनयंराजा सर्वकोसलपालकः पुत्रार्थंचसपत्नीकोवसिष्ठस्याश्रमंययौ पश्यन्हिपथिकल्याणं सारसैस्तोरणंकृतम् विविधानिअरण्यानिमार्गेषुफलितानिवै राजामहिष्यासहितोगजारूढःसवाहनः संध्यायांयोगिनस्तस्यमहर्षेःप्रापदाश्रमम् सारथिंचसमादिश्यवाजीन्विश्रामयेत्यथ रथादुत्तीर्यदंपत्या वाश्रमंजग्मतुर्मुनेः स्थितंकर्मणिसंध्यायांदिलीपोददृशेगुरुम् अरुंधत्यासहासीनंसावित्र्यैवपितामहम् तौप्रणम्यगुरुंतत्रमुनिपत्नींविशेषतः स्थितौतस्यसमीपेतुप्रीतावानंदपूरितौ दिलीपंचतथात्यर्थंधर्मज्ञंलोकपालकम् पप्रच्छकुशलंराज्येवसुधायाश्चवैमुनिः दिलीपउवाच कुशलंमेसदादेवस्थितेत्वयिगुरौसति सुराणांचमनुष्याणांविपत्तौरक्षिताभवान् विषयेममकांतायामपत्यंकिंनजायते किंतुकार्यंधरित्र्यामेनिराशाःपितरोगताः तथाकुरुमुनिश्रेष्ठपुत्रोभवतिमेयथा राज्ञांविपदिशासायांनदापत्यसुखंमुने वदेतिकथितंराज्ञामुनयेवैयुधिष्ठिर तदामुनिःक्षणंतस्थौध्यानस्तिमितलोचनः कारणंसंततेराज्ञोमुनिर्दृष्ट्वासमाधिना पश्चान्निवेदितंतस्मैदिलीपायप्रयत्नतः वसिष्ठउवाच पूर्वंवृत्रारिमाराध्यवसुधांगच्छतात्वया कल्पमूलेचतिष्ठंतीकामधेनुर्नवंदिता जातस्तस्यास्तदाकोपोदत्तस्तेशापईदृशः नवंदिताहंभवतासांप्रतंयदिभूमिप भविष्यतिनतेपुत्रस्तच्छापोनश्रुतस्त्वया नपूजयेद्यःपूज्यानांवंद्यानांयानवंद्यते नजायतेतुकल्याणंपातकैरेवलिप्यते दिलीपउवाच कृतोमयापराधोयंकरोमिकिमहंमुने संततिर्जायतेयेनतद्व्रतंवदमेप्रभो वसिष्ठउवाच अन्यैर्नानाविधैःपुण्यैस्तपोभिर्नृपदुःसहैः नजायतेतुसंतानंगोत्रिरात्रव्रतंविना सपत्नीकःसवत्सांमेधेनुंराजन्फलप्रदाम् आराधयैकाग्रमनागोत्रिरात्रव्रतंकुरु यावदित्थंदिलीपस्यमुनिनाकथितंव्रतम् तावच्चनंदिनीधेनुर्वनादावृतेशुभा कुंभोध्नीग्रीवलंबासुकृतसुखफलदानंदिनी लोकमातादेवानांवरदाशुभोदधिप्रभवाकामप्रदापाटला गीर्वाणाःसकलाःसुतावपुषिवैतिष्ठंतियस्याश्चते संपूर्णाःशशिनःकलाश्चदधतीश्रेयस्करीपौर्णिमा भाद्रेमासिसमायातुशुक्लपक्षेतुपार्थिव प्रातःकुर्यात्त्रयोदश्यांनियमंतुसुभक्तितः समुपोष्यगोत्रिरात्रंभक्त्याकृत्वाव्रतंनव भोक्ष्येहनिचतुर्थेऽहंसौभाग्यंदेहिगोमम इतिनियममंत्रः ततोगावंसमभ्यर्च्यमंडलेगंधदीपकैः तग

रैःशतपत्रैश्चचंपकाद्यैःशुभाननाम् गावोमेअग्रतःसंतुगावोमेसंतुपृष्ठतः गावोमेहृदयेसंतुगवांमध्येवसाम्यहम् पंचगावःसमुत्पन्नामथ्यमानेमहोदधौ
तासांमध्येतुयानंदातस्यैधेन्वैनमोनमः इतिपूजामंत्रः फलैर्नानाविधैःपुष्पैर्गंधैरपिस्वशक्तितः पूजनीयाप्रयत्नेनदद्यादर्घ्यंविधानतः नारीकेलंसकू
ष्मांडंमातुलिंगंचदाडिमम् हविष्यान्नंचनैवेद्यंकारयेद्यवसंयुतम् गोत्रिरात्रव्रतार्थायसफलंचकरेधृतम् सर्वकामप्रदेदेविगृहाणार्घ्यंनमोस्तु
ते इत्यर्घ्यमंत्रः वस्त्रयुग्मंविधानेनदद्याद्वासांसिदक्षिणाम् सपत्नीकायगुरवेस्वशक्त्याचव्रतीनरः दिनानिव्रतिभिस्त्रीणिश्रोत-
व्याचकथाशुभा जितक्रोधैस्ततःसर्वैस्त्रीभिर्वापुरुषैरपि एवंसंपूज्यविधिवल्लक्ष्मीयुक्तंतुकेशवम् चतुर्थेदिवसेप्राप्तेततोधेनुंविसर्ज
येत् ततोधेनुंसवत्सांतुमंत्रेणानेनपार्थिव दद्याद्विप्रायविदुषेधर्मिणेशास्त्रज्ञानिने परिपूर्णव्रतंकृत्वादत्वाकामानभीप्सितान् विप्रा
यत्वंमयादत्तामातर्गच्छयथासुखम् दानमंत्रः सर्वदानानिदेयानिस्वशक्त्यानतिभिर्नरैः विविधेभ्योद्विजेभ्यश्चदक्षिणांचस्वशक्ति
तः वित्तशाठ्यंनकृत्वातुदापयेच्चततोनरः गृहंयावद्व्रजेत्पृष्ठेगीतनृत्यपुरःसरम् गोपालानांचपाथेयंदद्याद्धेनुतुष्टये यवाद्याश्च
रितानित्यंफलैर्नानाविधैःसह युक्तावैकामधेन्वाचसंयुक्तागोमयेनतु पारणंतैःप्रकर्तव्यंसर्वैरिष्टजनैःसह सपत्नीकायगुरवेदद्याच्चा
न्नंसदक्षिणम् श्रीकृष्णउवाच भाद्रमासिसितेपक्षेत्रयोदश्यांनराधिप एवमाराध्यतांधेनुंदिलीपोभक्तितत्परः ततःप्रजानाम
धिपःप्रभातेसुरभिंमुनेः सुपूजितांविधानेनमुमोचत्वरितंशुचिः संध्यायाःप्रभृतिस्थित्वाआययौपुनराश्रमे अर्चांसुदक्षिणाकर्तुं
गृहीत्वाविधिवद्बलिम् ययौधेनोःसमीपेतुबलिंदत्वादिनत्रयम् अनुयातस्ततोधेनोर्वनंगत्वाततःपरम् जयशब्दंप्रवदतःपक्षिणःसु
दराननाम् दृष्ट्वाचवनदेवीभिर्गीयमानंतथायशः शुश्रावचततोराजाभृशंमनसिहर्षितः चिरंशुभेवनेव्यक्तेभूमिपेभ्रमितेसति धे
नुश्चशुशुभेराज्ञाराजाधेन्वाबभौपुनः तद्दिनेचमुनेर्धेनूराज्ञोभावंचपश्यती विविशागह्वरंतत्रपार्वत्याश्चपितुर्नृप कृत्रिमश्चकृतःसिं
होमुनिधेन्वाभयंकरः सिंहश्चददृशेराज्ञाधेनुंकर्षन्बलेनवै दृष्ट्वाराजाचतांधेनुंक्रंदमानांस्वरोल्बणैः ततोधनुर्धरःसोपितांमोक्तुमु
पचक्रमे वध्यसिंहवधार्थायराजाबाणंकरेदधौ उत्पन्नस्तुतदाशोकःकोपयुक्तोबभूवसः धनुष्यारोपयन्बाणंचित्रन्यस्तइवास्थितः

हस्तस्यनिश्चलत्वेन क्रोधस्तस्यव्यवर्धत विस्मयन्प्रापयन्सिंहोराजानंवैयुधिष्ठिर मानवस्यगिराप्राह दुष्टत्वेनगविस्थितः सिंहउवा० बाणःप्रयुक्तोभवतावृथामयिभविष्यति ततःकष्टेनमहताश्रमंमाकुरुसर्वथा मामारुतस्यवेगोपिपर्वतोन्मूलनेक्षमः ज्ञायतेनमहाराज गवांककुदिवैस्थितः महेश्वरस्यमांराजन्नाम्नाकुंभोदरेणतु सेवकानांचसर्वेषांमुख्यंजानीहिभूमिप विलोकयेमंपुरतोदेवदारुंमहाद्रुमम् सिक्तःस्नेहेनभूपालशिवयाचसुतःकृतः कदाचिदागतोहस्तीभग्नस्तेनमहाद्रुमः तस्यसंरक्षणार्थायनियुक्तोहंशिवेनतु कृत्वाशिवेनसिंहत्वमुक्तोहंतीव्रभोजने तर्हीयंखलुगौराजन्भक्ष्यामेसमुपागता त्यक्त्वालज्जांनिवर्तस्वभक्तोसिगुरवेभवान् आपत्कालइदंवृत्तंनस्याच्छस्त्रभृतोयदि दोषोनजायतेतस्ययशोराजन्नगच्छति श्रुत्वागिरंचसिंहस्यराजाचैनमुवाचह ईश्वरेणसमोनान्योयदिसिंहोभवानपि समीपाच्चकथंयातिममधेनुर्गुरोरियम् प्रसीदभक्षमेदेहंधेनुंमुंचसवत्सकाम् भविष्यतिजनन्याश्चवत्सोमार्गंविलोकयन् सिंहेनतुदिलीपश्चकथितोवैतदापुनः देहांतरेचदृष्टानिभयंकाराणिकुर्वतां स्तोकेनहेतुनापार्थकीर्तिच्छत्रंचसत्कृतम् सर्वस्यजगतोराज्यंवपुरेतन्नवंवयः त्यक्तुमिच्छसिवाराजन्मूर्खस्त्वमीदृशःकथम् ददासिचकथंप्राणान्प्रजापालनतत्परः जीवन्नकिंमहाराजमुनेःकोपमपास्यसि ततोरक्षयदेहंस्वंराज्यंस्वंकुरुभूमिप यावच्चोवाचसिंहोसौनगेनानुगतांगिरम् दिलीपोपितदापार्थवाणीमेनामुवाचह धेन्वानिरीक्षितश्चैवभूमिपोदीनयागिरा किंनोराज्येनमेसिंहविषयेजीवनेनवा यशोगतंचमेसर्वंयदिधेनुंग्रसिष्यसि एवमुक्त्वाततश्चाग्रेसिंहस्यपतितस्तदा यावदित्थंचपतितोमांसस्यपिंडवन्नृपः तावत्सिंहोरवंकृत्वाधावितश्चभयंकरः दृष्ट्वासिंहनिपातंचचंचलोनबभूवह तावत्तस्योपरिष्टाच्चपुष्पवृष्टिःपपातवै उत्तिष्ठवत्सभूपालवाचमित्थंनिशम्यसःउत्थितस्तत्पुनश्चाग्रेगांददर्शनवैहरिम् सेवयाचगुरोःपार्थभक्त्याचापिविशेषतः प्रीताकामदुघातस्यवरंवरयसुव्रत योजयित्वाकरौ राज्ञायाचेतनयस्ततः वंशकर्तामहाप्राज्ञोशिवभक्तोनिरंतरम् गौरुवाच गोत्रिरात्रव्रतंराजन्यद्भक्त्याभवताकृतम् भविष्यति चनेदक्षःपुत्रःपौरुषविग्रहः अन्येपियेकरिष्यंतिगोत्रिरात्रव्रतंमम तेषांकामंचदास्यामिमनसीष्टंनसंशयः इत्युक्त्वाचलिताधेनुर्वसि

ष्ठस्याश्रमंप्रति बलिंसंगृह्यविधिवद्ययावाशक्तदक्षिणा पूजांकृत्वाविधानेनराजपत्नीविशेषतः प्रदक्षिणात्रयंकृत्वा चलितावैयुधिष्ठिर आश्रमंचततोगत्वादिलीपोसौपुनस्तदा गुरोरग्रेचतत्सर्वंवृत्तांतमवदत्पुनः नंदिनींचतदापार्थदंपतीतौकृतकोमलौ पारणंचततः कृत्वा प्रस्थितौनगरंप्रति हुताशंचनमस्कृत्यहोतारंगांतथैवच आगतश्चततोराजा अयोध्यानगरंपुनः दिलीपश्चमहाराजः प्रजापालनतत्परः दिनैःकतिपयैरेवगोत्रिरात्रप्रभावतः राज्यंचकुर्वतस्तस्यसुषुवेमहिषीतदा प्रभातेसुमुहूर्तेचउत्पन्नोरघुवंशजः रम्यंजातंतदासर्वंसंजातानिर्मलादिशः आददेब्राह्मणेभ्यश्चगावोवैवस्त्रसंयुताः मृदंगस्यस्वनैर्दिव्यैरम्यंजातंपुरंमहत् प्रजाःसर्वास्तदापार्थवर्दंतिस्मपुनःपुनः गोत्रिरात्रप्रभावाच्चराज्ञःपुत्रोबभूवह पुरंदरस्यजेताचमहाधर्मपरायणः दिशांजेताचयज्ञस्यकर्तासोपियुधिष्ठिर तदाप्रभृतिलोकेस्मिन्लोकाःकुर्वंतितद्व्रतम् देवैःसर्वैःकृतंतत्रसर्वकामार्थसिद्धये सर्वाभिर्देवपत्नीभिःकृतंचव्रतमुत्तमम् गोत्रिरात्रव्रतंपुण्यंविधानेनफलप्रदं कुरुष्वत्वंमहाराजभक्त्याचापियुधिष्ठिर साक्षादनंतरंमातुःकृत्वामनसिवर्तते भाद्रपदेसवत्सांतुभक्त्यात्वाराधयस्वगां एवंयःकुरुतेभक्त्यागोत्रिरात्रव्रतंपुनः सिद्ध्यंतिसर्वकार्याणिसुखंचैवप्रवर्द्धते कर्तव्यंपुत्रकामेनगोत्रिरात्रव्रतंशुभम् तपोभिर्दुष्करैःकिंचिद्यज्ञैस्तीर्थगयादिभिः नभवेत्तत्फलंराजन्भवेत्तच्चविधानतः कुर्वंतियेव्रतमिदंजगतिप्रसिद्धंपापापहंसकलचिंतितकामदंच आरुह्यचैवतुविमानमनुत्तमंचस्वर्गंप्रयातियमतोहिभयंविहाय इतिगोत्रिरात्रव्रतम् अथउद्यापनम् युधिष्ठिरउवाच कथयस्वमहापुण्यंगोत्रिरात्रव्रतस्यवै उद्यापनविधिंकृष्णयेनचीर्णेनतत्फलं श्रीकृष्णउवाच वर्षेचतुर्थेसंप्राप्तेगोत्रिरात्रव्रतस्यवै उद्यापनविधिंवक्ष्येसर्वेषांव्रतसिद्धये तृतीयेदिवसेस्नायान्मध्यान्हेविधिपूर्वकं देवान्पितृन्समभ्यर्च्यशुद्धेचस्वगृहेव्रती रात्रौचसर्वतोभद्रंगौरीतिलकमेवच पूरयेत्पंचभिर्वर्णैःशोभमानंभवेद्यथा ताम्रस्यकलशंकृत्वापूर्णपात्रसमन्वितम् माषेणचसुवर्णेनलक्ष्मीनारायणंप्रभुम् नूतनंवस्त्रयुग्मंतुसूक्ष्मंतत्रप्रकल्पयेत् वंशपात्राणिकुर्वीतसौभाग्यद्रव्यसंयुतैः विरूढवस्त्रपक्वान्नैर्नारीकेलादिभिःफलैः विलेपनैश्चपुष्पैश्चधूपैर्दीपैस्तथोत्तमैः पंचामृतैश्चनैवेद्यैःपूजयेद्विधिपूर्वकम् लक्ष्मी

नारायणंदेवंगांसवत्सांविशेषतः रात्रौजागरणंकृत्वागीतवादित्रनिस्वनैः ततःप्रभातसमयेहोमंकुर्याच्चवैष्णवैः आचार्यंवरयेत्तत्रवेदवेदांगपारगम् तदाज्ञयाचकर्तव्यंसाधुकर्मप्रयत्नतः तिस्रोगावःप्रदातव्याएकावापिसवत्सका बहुदोग्ध्रीसुशीलाचतरुणीचसुशोभना दंपतीपरिधानंचवस्त्रैराभरणैःशुभैः शय्यांसोपस्करांदद्यात्पानपात्रंकमंडलुम् चामरंघृतपात्रंचतिलपात्रंसदक्षिणम् दानानिचसुवर्णानांभोज्यागव्येनवैद्विजाः एवंधेनुंचविप्रायदत्वाचपृष्ठतोव्रजेत् पदेपदेश्वमेधस्यफलंप्राप्नोत्यसंशयम् अथान्यानिचदानानिदद्याद्विप्रेभ्यएवच भूयसींदक्षिणांदद्याद्व्रतसंपूर्णहेतवे गोपालेभ्यश्चपाथेयंशष्कुल्यादिचकंबलम् सर्वंक्षमापयित्वातुपारणंचततश्चरेत् अनाथैर्व्याधियुक्तैश्चसीदद्भिश्चकुडुंबकैः गवाभक्षितमन्नंचदुग्धेनपरिपाचितम् तेनान्नेनप्रकर्तव्यंदेहस्यपरिपालनं भक्तिभावेद्विजानुज्ञांगृण्हीयुर्व्रतिनःसदा तयातत्पूर्णतामेतिनान्यथापिकदाचन एवमुद्यापनंकार्यंव्रतस्यफलमिच्छता नारीवापुरुषोवापिपुत्रवान्जायतेध्रुवं इहलोकेसुखंभुक्त्वाअंतेगोलोकमाप्नुयात् श्रीकृष्णउवा॰ एतत्तेकथितंराजन्व्रतस्योद्यापनंशुभम् श्रोष्यंतियेपठंतीतितेषांसर्वेमनोरथाः येकरिष्यंत्यसंदेहंतेषांलोकाश्चशाश्वताः इतिश्रीभविष्योत्तरपुराणेगोत्रिरात्रव्रतंसंपूर्णम् अथचैत्रशुक्लत्रयोदश्यांअशोकत्रिरात्रव्रतंभविष्ये साचपूर्वाग्राह्या तत्रत्रयोदशीतिथिःपूर्वासितेतिदीपिकोक्तेः

श्रीकृष्णउवा॰ शृणुराजन्पुरावृत्तमयोध्यायांव्रतंशुभम् वसिष्ठेनमुनींद्रेणसीतायैयन्निवेदितम् विधायरावणवधंयदारामःपुरेभ्यगात् तदादेवीप्रणम्याथवसिष्ठंवाक्यमब्रवीत् सीतोवाच भगवन्दंडकारण्याद्रावणेनहृतापुरा नपश्यामितदाकिंचिदात्मीयंविकलेंद्रिया लंकायांप्रापितातेनराक्षसेनहृताह्यहम् अशोकवृक्षंप्रणतामहाचिंतापरायणा उक्तंत्रिजटयातत्रवाक्यंहेत्वर्थसंयुतम् अशोकस्यव्रतंकृत्वाविशोकात्वंभविष्यसि तथेत्युक्तंमयाब्रह्मन्यथोक्तंत्रिजटावचः ततःप्रभृत्यहंशश्वदशोकव्रतमारभम् तेनव्रतप्रभावेनहनूमान्पवनात्मजः शतयोजनविस्तीर्णंतीर्त्वासागरमद्भुतम् मयादृष्टःकपिश्रेष्ठःसाभिज्ञानोमहाबलः पुनश्चकुशलीजातोदग्ध्वालंकांमहाबलः ततोमेप्रत्ययोजातोव्रतस्यास्यमहातरौः व्रतराजप्रभावेनरामःप्रीतोमहाहरिः ततःकैश्चिद

होरात्रैर्भर्त्तामेराघवोबली निहत्यरावणंसंख्येमांविशुद्धांगृहीतवान् तदहंभगवन्विप्रपृच्छामित्वांदृढव्रतम् अशोकस्यप्रभावंमेव
क्तुमर्हस्यशेषतः व्रतस्यतस्यपुण्यंतुपुराणोक्तंमहीतले अथवासुरलोकेषुसुरनारीनिषेवितम् वसिष्ठउवाच एवमेतज्जनकजे
यथावक्ष्यसिसुव्रते अशोकस्यप्रभावेनरामोदृष्टःपुनस्त्वया शृणुचात्रमहाख्यानंनंदनेदिव्यकानने बृहस्पतिमुखाल्लब्ध्वायज्ञा
तंपरमाद्भुतम् वृत्रासुरमहायुद्धेदेवेंद्रश्चमहासुरं निहत्यसर्वधर्माणांस्थापनंचचकारह ब्रह्महत्यामवाप्याथदेवेंद्रोनष्टचेतनः त्रै
लोक्यराज्यंत्यक्त्वाप्सुममज्जारिभयार्दितः एतस्मिन्नंतरेदेविनहुषोनृपसत्तमः त्रैलोक्यराज्यंसकलंजहार बलदर्पितः ततःशची
प्रव्यथिताहृतंराज्यमवेक्ष्यसा नंदनांतंसमासाद्यतपस्तेपेसुदुष्करम् तांश्रुत्वाधर्मनिरतांबृहस्पतिरुदारधीः आगत्यनंदनंदेवींवा
क्यमाहमहातपाः बृहस्पतिरुवाच किमर्थंतप्यतेदेवितपःपरमदुष्करम् त्वयाकिंप्रार्थ्यतेतेनतपसाब्रूहिकारणम् शच्युवा
च हृताहिभूतंदेवेंद्रंहृतराज्यंहृतद्विषम् क्वापिप्रनष्टंविप्रनजानेहंप्रियंपतिम् एतस्मात्कारणाद्ब्रह्मन्तपउग्रंसमाश्रितम् यथा
पुनर्निजंराज्यंदेवेंद्रःप्राप्नुयादिति क्वतिष्ठतिमुनेब्रूहिसुरराट्शत्रुतापनः प्रसीदकुरुमेदेवसंयोगंतेनचाप्नुयां वाचस्पतिरुवाच
शृणुपौलोमिदेवेंद्रोयथानष्टोभयातुरः मानसांभसिसंभूतंपंकजांतरमाश्रितः वृत्रहत्याप्रभावेनउद्वेगंकुरुमाश्रितः अभिभूतमि-
वापश्यंस्तपोप्सुनिलयंगतः कामंतपःप्रसंगेनसर्वंप्राप्स्यसिसुव्रते बहुकालंस्थितंयस्मात्तपसालभ्यतेफलम् स्त्रीणांपुष्टिकरंत्वेकं
व्रतंप्रोक्तंस्वयंभुवा सावित्र्याःपृच्छमानायास्तत्त्वंकर्त्तुमिहार्हसि अशोकव्रतमित्येकंनाम्नाख्यातंत्रिविष्टपे येनचीर्णेनवैसद्योना
रीदुःखंनसंस्मरेत् हरःस्वयंवसन्साक्षाद्वृक्षराजेषुनंदते अस्मिंस्तुष्टेहरस्तुष्टइतिजानामिनिश्चितम् शच्युवाच पुन्नागंना
गबकुलंचंपकाद्यान्महीरुहान् परित्यज्यकथंचान्यान्हरोस्मिन्कृतसन्निधिः वाचस्पतिरुवाच निर्मायवृक्षप्रवरंप्रणस्यप्र
त्यार्चयित्वाविधिमस्यविप्रम् पप्रच्छदेवीपुनराहविप्रोदेविशृणुध्वंविधिमस्यसर्वम् वाचस्पतिरुवाच आरभ्यतद्व्रतंका
र्यंत्रिरात्रंसमुपोषणं त्रिरात्रंदेविविख्यातमशोकतरुमूलके कार्यंनारीभिरमलंमनोवाक्कायकर्मभिः ततःप्रदक्षिणादेयाअष्टोत्तरशा

नैःफलैः नारीकेरैश्चखर्जूरैर्गोस्तनीभिर्दिनेदिने मंत्रेणानेनमनसाध्यात्वानित्यंसदाशिवम् अशोकशोकापनुद सर्वकामफलप्रद व्रतेनानेनचीर्णेनयथोक्तफलदोभव ततस्तृतीयेदिवसेसम्यगभ्यर्च्यभामिनि महादेवंवृषयुतं वंशपात्राणिकारयेत् अनेनैवविधानेनयाकुर्याद्व्रतमुत्तमम् वैधव्यंनाप्नुयान्नारीपुत्रसौख्ययुताभवेत् वसिष्ठउवाच बृहस्पतिमुखाच्छ्रुत्वाशचीचक्रेव्रतंशुभम् शास्त्रोक्तविधिनासीनेभक्त्यादेवःसमागतः वृत्रहत्याविनिर्मुक्तोनात्रकार्याविचारणा तथात्वमपिवांछार्थंव्रतमेतत्समाचर तथासाध्विसुपुत्रश्रीप्राधान्यंजायतेक्षितौ व्रतएवंकृतेलोकेख्यातादेविभविष्यसि श्रीकृष्णउवा० व्रतमेतदशोकस्यअयोध्यायांचकारसा सीताव्रतेकृतेतस्मिन्दुःखहीनाबभूवह युधिष्ठिरउवा० अशोकस्यसमाख्यातापूजादेवविधानतः कादेवतातत्रपूज्यानारीणांव्रतसिद्धये

श्रीकृष्णउवा० अशोकवृक्षेतिष्ठंतिसर्वेदेवायुधिष्ठिर पल्लवेषुचशाखासुशिवाद्याःसर्वदेवताः अशोकसन्निधौरामःपूजनीयःसलक्ष्मणः सीतयासहितोराजन्विष्णोरंशोयतोमतः पृथङ्मंत्रैःपृथग्वस्त्रैरशोकाख्यायथाक्रमम् पूजाचभरतश्रेष्ठपुराणोक्तविधानतः अशोकवृक्षनिहिताःशिवाद्यायेसुरोत्तमाः अशोकपूजनेनाशुतुष्टास्तेमेभवंत्विह गौर्यालक्ष्म्यातथेंद्राण्याअरुंधत्याचसीतया त्वंसमाराधितःपूर्वमशोकफलदोभव अशोकवाटिकामध्येसीताभूत्त्वत्प्रसादतः अशोकशार्वसफलंगृहाणार्घ्यंकृतंमया रावणस्यवधार्थायउत्पन्नस्त्वंमहीतले विष्णोरंशोसिदेवेशगृहाणार्घ्यंनमोस्तुते दशावतारग्रहणंकरोषित्वंप्रभावतः गृहाणार्घ्यंमयादत्तंसीतालक्ष्मणसंयुत तातभक्त्युन्मुखंवीरं वनंयोनुययौतदा तंलक्ष्मीवर्धनंगौरंलक्ष्मणंपूजयाम्यहम् अवनीतलसंभूतेसीतेसर्वांगसुंदरि गृहाणार्घ्यंमयादत्तंपूजांजनकनंदिनि लक्ष्मीस्त्वंसर्वदेवस्यविष्णोरसिमहीतले अवतीर्णामयादत्तंगृहाणार्घ्यंनमोस्तुते एवंसंपूज्यविधिनासर्वशोकविनाशनं सर्वपापप्रशमनंसर्वकीर्तिविवर्द्धनम् अपुत्रयापुरापार्थपार्वत्यामंदराचले अशोकःशोकशमनः पुत्रत्वेपरिकल्पितः जातकर्मादिकंतस्यत्वशोकस्यमहातरोः कारितंविधिवत्तस्यतेनवृक्षोनगोत्तमः याव्रतंकुरुतेनारीपुराणोक्तविधानतः अशोकस्यप्रसादेनसर्वान्कामानवाप्नुयात् अवैधव्ययुतासातुलक्ष्मीसान्निध्यमाप्नुयात् सर्वोपहारान्राजेंद्रब्राह्मणायनिवेदये

त कथामपिसमाकर्ण्ययःकुर्याद्द्विजतर्पणम् व्रतस्यफलमाप्नोतिसकृव्रतोपिनसंशयः युधिष्ठिरउवाच विशेषंब्रूहिमेदेवह्यशोकत
रुपूजने येनार्चितेनतरौकृष्णाप्राप्यतेसकलंफलम् श्रीकृष्णउवाच कथयामिकथांराजन्याभिर्व्रतमिदंकृतम् मनुष्यदेवगंधर्व
नारीभिःपुत्रवृन्दये अनुसूययात्रिपत्न्याह्यरुंधत्यातथैवच देवक्यासीतयाचैवद्रौपद्यासत्यभामया दमयंत्याचसावित्र्याकृतं
तद्व्रतमुत्तमम् सर्वाभिःपूजितोवृक्षोयथावच्छृणुपार्थिव अंशोकंराजतंचैवसौवर्णंचतथाशिवम् तथैवकारयेत्सीतांसौवर्णौरा
मलक्ष्मणौ पूजयेद्विविधैर्मंत्रैःपूर्वोक्तैर्नृपसत्तम अशोकंपूजयेद्वृक्षंमारूढंशुभपल्लवैः विरूढैःसप्तधान्यैश्चगुणकैर्मोदकैःशुभैः
कालोद्भवैःशुभैर्दिव्यैर्नारिकेलैःसदाडिमैः पुष्पादिनातथाधूपैःपूजयेत्तरुमुत्तमम् अशोकंपांडवश्रेष्ठ शोकोनश्यतितत्क्षणात् पि
तृमातृपतीनांवैश्वश्रुराणांतथैवच अशोकत्वंशोकहरोभवसर्वत्रनःकुले अशोककलिकाश्चाष्टौयेपिबंतिचहस्तभे चैत्रशुक्लत्र-
योदश्यांनतेशोकमवाप्नुयुः त्वामशोकहराभीष्टमधुमाससमुद्भवम् पिबामिशोकसंतप्तोमामशोकंसदाकुरु हस्तर्क्षेचबुधोपेता-
चैत्रशुक्लत्रयोदशी प्रातस्तुविधिवत्स्नात्वावाजपेयफलंलभेत् इतिश्रीभ० संपूर्णम् अथचैत्रकृष्णात्रयोदश्यांमहावारुणीसंज्ञ
कोयोगः तदुक्तंवाचस्पतिनिबंधे शनिवारसमायुक्तासामहावारुणीस्मृता मधौकृष्णात्रयोदश्यांशनौशतभिषायदि गंगायांय-
दिलभ्येतकोटिसूर्यग्रहाधिका शुभयोगसमायुक्ताशनौशतभिषायदि महायोगेतिविख्यातात्रिकोटिकुलमुद्धरेत् इतिवारुणीम
हावारुणीत्रयोदशी अथस्कंदपुराणेशनिप्रदोषव्रतम् सूतउवाच शनौशुक्लत्रयोदश्यांकार्तिकेश्रावणेथवा जयापूर्वापराग्रा
ह्याव्याप्ताचेद्व्रजनोसुखम् लोमशउवाच पुरावृत्रादिभिर्दैत्यैर्वर्तमानेमहाहवे हतःशक्रेणनमुचिरपांफेनेनवैबली दैत्यान्पलायि
तान्दृष्ट्वाहन्यमानान्सुरैर्भृशम् वृत्रःकोपपराविष्टोदेवान्योद्धुमथाययौ कालाग्निरूपसदृशंरूपंकृत्वामहाजवम् व्यवर्धतमहातेजा
रोदसीपूरयन्निव तंदृष्ट्वाभयवित्रस्तादेवाःशक्रपुरोगमाः कर्तव्यंनाभ्यपद्यंततदागुरुरुवाचह गुरुरुवाच तपसासुमहोग्रेणव्र
तेननियमेनच अजेयोयंमहातेजावृत्रःशत्रुविनाशनः आराधयततोदेवंपूज्यंशंकरमव्ययम् व्रतेनविधियुक्तेनवृत्रंज्येष्यथमाचिरम्

देवाऊचुः गुरोकेनविधानेनकीदृशेनव्रतेनच आराधनीयोगौरीशोत्यस्माभिर्जयकामुकैः तद्वदस्वकराचार्यत्वंहिनःपरमागतिः गुरुरुवाच कार्तिकादिषुमासेषुमंदवारेत्रयोदशी विशेषाच्छुक्लपक्षेषुसर्वकामकरीशुभा तस्यांप्रदोषसमयेलिंगरूपीसदाशिवः पूजनीयोहिदेवेंद्रैःसर्वकामसमृद्धये स्नात्वामध्यान्हसमयेतिलामलकसंयुतम् शिवस्यचार्चनंकुर्याद्गंधपुष्पफलादिभिः पश्चात्प्रदोषसमयेस्थावरंलिंगमर्चयेत् स्वयंभुस्थापितंचापिपौरुषेयमपौरुषं जनेवाविजनेवापिअरण्येवातपोवने ग्रामाद्बहिःस्थितंलिंगंग्राम्याच्छतगुणंस्मृतम् बाह्याच्छतगुणंपुण्यमरण्येचप्रपूजने वन्याच्छतगुणंपुण्यंलिंगंवैपर्वतेस्थितम् पर्वताच्चायुतंपुण्यंतपोवनसमाश्रितम् काश्यादिसंस्थितंलिंगंपूजितंस्यादनंतकम् एवंविशेषलिंगानांतीर्थानांनिपुणैर्भृशम् ज्ञात्वाचशिवपूजायाविधिंशंभुंप्रपूजयेत् कूपवापीतडागेषुदेवखातनदीषुच क्रमाच्छतगुणंपुण्यंगंगायांस्यादनंतकम् पंचपिंडा ननुधृत्यस्कस्नायात्सरवारिणि ततःप्रदोषसमयेस्नात्वामौनंसमाचरेत् प्रदीपानांसहस्रेणदीपनीयःसदाशिवः शतेनाप्यथवादेवोद्वात्रिंशद्दीपमालया घृतेनदीपयेद्दीपान् शिवस्यपरितुष्टये तथाफलैश्चधूपैश्चनैवेद्यैर्विविधैरपि उपचारैःषोडशभिर्लिंगरूपीसदाशिवः पूज्यःप्रदोषसमयेनृभिःसर्वार्थसिद्धये नाम्नांशतेनरुद्रोसौस्तोतव्यश्चस्तुतिप्रियः नमोरुद्रायभीमायनीलकंठायवेधसे कपर्दिनेसुरेशायव्योमकेशायवैनमः वृषध्वजायसोमायसोमनाथायवैनमः दिगंबरायभर्गायउमाकांतकपर्दिने तपोमयायव्यासायशिपिविष्टायवैनमः व्यालप्रियायव्यालायव्यालानांपतयेनमः महीधरायव्याघ्रायपशूनांपतयेनमः त्रिपुरांतकायसिंहायशार्दूलायऋषायच मितायमितनाथायसिद्धायपरमेष्ठिने कामांतकायबुद्धायबुद्धीनांपतयेनमः कपोतायविशिष्टायशिष्टायपरमात्मने वेदगीतायगुप्तायवेदगुह्यायवैनमः दीर्घायदीर्घरूपायदीर्घार्थायमृडायच नमोजगत्प्रतिष्ठायव्योमरूपायवैनमः गर्वकल्पकमहादैत्यअंधकासुरभेदिने नीललोहितशुक्लायचंडमुंडप्रियायच भक्तिप्रियायदेवायज्ञातज्ञानाव्ययायच महेशायनमस्तुभ्यंमहादेवहरायच त्रिनेत्रायत्रिवेदायवेदांगायनमोनमः अर्थायअर्थरूपायपरमार्थायवैनमः विश्वरूपायविश्वायविश्वनाथायवैनमः शंकरायचकालायकालावयवरूपिणे अ

रूपायविरूपायसूक्ष्मसूक्ष्मायवैनमः श्मशानवासिनेतुभ्यंनमस्तेकृत्तिवाससे शशांकशेखरायैवरुद्रभूमिश्रयायच दुर्गायदुर्गपारायदुर्गावयवसाक्षिणे लिंगरूपायलिंगायलिंगानांपतयेनमः नमःप्रभावरूपायप्रणवार्थायवैनमः नमोनमःकारणकारणायमृत्युंजयायात्मभवस्वरूपिणे त्रियंबकायासितकंठगर्भगौरीपतेमंगलहेतवेनमः नाम्नांशतंमहेशस्यउच्चार्यंव्रतिनासदा प्रदक्षिणानमस्काराएतत्संख्याःप्रयत्नतः कार्याःप्रदोषसमयेतुष्ट्यर्थंशंकरस्यच एतद्व्रतंमयादिष्टंतवशक्रमहामते शीघ्रंकुरुमहाभागपश्चाद्युद्धंकुरुप्रभो शंभोःप्रसादात्सर्वंतेभविष्यतिजयादिकम् शक्रउवाच वृत्रःकदामहेशानंसमाराधयदादरात् कथंचसवरंप्राप्तःपुराकश्चाभवद्द्विज

गुरुरुवाच वृत्रोह्यहंमहातेजास्तपस्वीतपसासुरा शिवंप्रसादयामासपर्वतेगंधमादने नाम्नाचित्ररथोराजावनंचित्ररथस्यतत् एतज्ज्ञानीहिभोइंद्र तवपुर्याःसमीपतः यस्मिन्वनेमहाभागवसंतिचमहर्षयः तस्माच्चैत्ररथंनामवनंपरममंगलम् तस्यदत्तंशिवेनैवयानंचपरमाद्भुतम् कामदंकिंकिणीयुक्तंसिद्धचारणसंयुतम् गंधर्वैरप्सरोयक्षैःकिन्नरैरुपशोभितम् ततस्तेनैवयानेनपृथिवींपर्यटन्सुरा तथागिरीन्समुद्रांश्चद्वीपांश्चविविधांस्तथा एकदापर्यटन्राजानाम्नाचित्ररथोमहान् कैलासमागतस्तत्रददर्शपरमाद्भुतम् तदासभांमहेशस्यगणैश्चैवविराजिताम् अर्धांगलग्नयादेव्याशोभितंचमहेश्वरं निरीक्ष्यदेव्यासहितंसदाशिवंकर्पूरगौरंवरसंबुजेक्षणम् कपर्दिनंचंद्रकलाविभूषितंगंगाधरंदेववरंसभायाम् प्रहस्यराजाचतयागिरीशंन्यायान्वितंवाक्यमिदंबभाषे वयंचशंभोविषयान्विताश्चमर्त्यादयःस्त्रीविजितास्तथान्ये नलोकमध्येचमयाविलोकिताश्चालिंग्यकांतांसदसिप्रविष्टाः एवंवाक्यंनिशम्याथगिरीशःप्रहसन्निव उवाचन्यायसंयुक्तंसर्वेषामपिशृण्वताम् शिवउवाच ममलोकापवादश्चसर्वेषांनभवेद्यथा भक्षितंकालकूटंमेसर्वेषामपिदुर्जयम् लोकातीतंचमेवृत्तंतथाप्युपहसत्यसौ ततश्चित्ररथंदेवीगिरिजावाक्यमब्रवीत् कथंदुरात्मनानेनशंकरश्चोपहासितः मयासहैवमंदात्मन्नीक्षसेकर्मणःफलम् साधूनांसमचित्तानासुपहासंकरोतियः देवोवाप्यथवामर्त्यः सविज्ञेयोधमाधमः एतेमुनींद्राश्चमहानुभावास्तथाहिएतेऋषयोवेदगर्भाः तथैवसर्वेसनकादयोह्यमीअज्ञाननाशाच्छिवमर्चयंति

रेमूढसर्वेषुजनेष्वभिज्ञस्त्वमेवचैकोसिपरोनकश्चन तस्मादतिप्रौढतरंनरंत्वांसंशिक्षयेनैवकुर्याद्यथालम् अस्मात्सतविमानात्त्वंदैत्यो
भूत्वासुदुर्मते ममशापेनदग्धस्त्वंगच्छाद्यचमहीतलं एवंशप्तस्तदादेव्याभवान्याराजसत्तमः राजाचित्ररथःसद्यःपपातसहसादिवः
आसुरींयोनिमापन्नोवृत्रोनाम्नाभवत्तदा तपसापरमेणैवत्वष्ट्रासंयोजितःक्रमात् तपसाब्रह्मचर्येणशंभोराराधनेनच व्रतेनानेन
चबलीजेतुंशक्योनकेनचित् आसुरेणाहिभावेनव्यंगंचक्रेव्रतंयतः तेनच्छिद्रेणचैवासौपश्चाज्जेयोभविष्यति तस्मात्त्वमपिदे
वेंद्र कृत्वाचेदंव्रतंशुभम् हनिष्यसिमहाबाहोवृत्रंनास्त्यत्रसंशयः गुरोस्तद्वचनंश्रुत्वाह्युवाचाथशतक्रतुः उद्यापनविधिंब्रू-
हिप्रदोषस्यचमेधुना गुरुरुवाच कार्तिकेश्रावणेप्राप्तेमंदवारेत्रयोदशी संपूर्णातुभवेद्यासासमयव्रतसिद्धये वृषभोरा
जतःकार्योपृष्ठेतस्यसुपीठकम् तस्योपरिन्यसेद्देवमुमाकांतंत्रिलोचनम् पंचवक्त्रंदशभुजमर्धांगेगिरिजांसतीम् सौवर्णीप्र
तिमांकृत्वाताम्रकुंभंजलैर्युतम् पंचरत्नफलोपेतंपंचपल्लवशोभितम् चंदनेनसुगंधेनमिश्रितंशोभितंतथा रौप्यपात्रंततःकृत्वा
कुंभस्योपरिविन्यसेत् अशक्तौमृन्मयंकुंभंवंशपात्रमथापिवा पर्णशरावंसंस्थाप्यसौवर्णीप्रतिमांतथा शक्त्याकृतांप्रतिष्ठा
प्यवस्त्रमाल्यविभूषणैः पूजयित्वाविधानेनरात्रौजागरणंचरेत् पुष्पमंडपिकामादौकृत्वाश्रद्धासमन्वितः वितानमंडपंकुर्या
न्नानावर्णैःसमन्वितम् ततःप्रभातसमयेनद्यादौविमलेजले स्नात्वापुनःसमभ्यर्च्यजुहुयात्पायसेनच उमयासहितंरुद्रंपृथगष्टोत्तरं
हुनेत् गौरीर्मिमायमंत्रेणत्र्यंबकेणचशंकरं आचार्यंचसपत्नीकंवस्त्रालंकारचंदनैः तोषयित्वाशक्तिंदांतंगांदद्याच्चपयस्विनीं ब्रा
ह्मणान्भोजयेत्पश्चाद्दक्षिणाभिःप्रतोषयेत् दीनानाथांश्चसंतर्प्यह्यछिद्रंवाचयेत्ततः लब्ध्वानुज्ञांब्राह्मणेभ्योबंधुभिःसहितःशुचिः
हृदिस्मरन्शिवंभक्त्याभुंजीतनियमेनच अनेनैवविधानेनकुर्यादुद्यापनंव्रती एवंयःकुरुतेभक्त्याप्रदोषव्रतमुत्तमम् शनिवारेण
संयुक्तंसोद्यापनविधिंनरः आयुरारोग्यमैश्वर्यंपुत्रपौत्रसमन्वितः शत्रून्विजयतेनित्यंप्रसादाच्छंकरस्यच तस्मात्त्वमपिदेवेंद्रपू
जयस्वसदाशिवम् एवंप्रदोषविधिनायुद्धेवृत्रंविजेष्यसि एवंनिशम्यगुरुणाकथितंतदानीमिंद्रोयमेनविधिनागिरिशंप्रपूज्यलो

कंप्रसंतमिवदैत्यपतिंप्रवृद्धंतंतत्क्षणादगमयत्क्षयमीशतुष्ट्या ईश्वरउवाच त्रयोदश्यांतथारात्रौसोपहारंत्रिलोचनम् पश्यतिप्रथमेयामेमुच्यतेसर्वपातकैः देव्युवाच देवकेनविधानेनप्रदोषव्रतमुत्तमं विधातव्यंनरैःस्त्रीभिःसंतानफलसिद्धये ईश्वरउवाच यदात्रयोदशीकृष्णामंदवारेणसंयुता आरब्धव्यंव्रतंतत्रसंतानफलसिद्धये ऋणनिर्मोचनार्थायभौमवारेणसंयुता आयुरारोग्यसिद्ध्यर्थंभानुवारेणसंयुता एकवत्सरपर्यंतंप्रतिपक्षेत्रयोदशी प्रदोषेशिवमभ्यर्च्यनक्तंभोक्ष्यामिशंकर तत्रचोक्तेनमंत्रेणव्रतसंकल्पमाचरेत् स्नात्वातुद्धोहितेभानौनद्यादौनियमीव्रती शिवालयेनतोगत्वाप्रदोषेशिवमर्चयेत् पूजामंत्रः ॐ भवायनमः महादेवाय० रुद्राय० नीलकंठाय० शशिमौलिने० उग्राय० उमाकांताय० ईशानाय० विश्वेश्वराय० त्र्यंबकाय० त्रिपुरुषाय० त्रिपुरांतकाय० त्रिकालाग्निकालाय० कालाग्निरुद्राय० नीलकंठाय० सर्वेश्वराय० १६ पंचामृतेनस्नपनमेभिर्मंत्रैःप्रपूजयेत् दधिभक्तेननैवेद्यंपक्वान्नैर्घृतसंयुतम् दत्वासुसुरभवासंचतांबूलंक्रमुकादिकम् समर्प्याष्टदिशस्तत्रदीपानाज्यसमन्वितान् यथाभवान्समस्तानांभक्तानांपापमोचनः तथाव्रतेनसंतुष्टःपुत्रंदेहिसलक्षणम् ऋणरोगादिदारिद्र्यपापक्षुद्रापमृत्यवः भयशोकमनस्तापानश्यंतुममसर्वदा पृथिव्यांयानितीर्थानिसागरांतानियानिच अंडमाश्रित्यतिष्ठंतिप्रदोषेगोवृषस्यतु स्पृष्ट्वातुवृषणौतस्यशृंगमध्येविलोक्यच पुच्छंचककुदंचैवसर्वपापैःप्रमुच्यते निवेद्यकर्मजातंचदद्याद्वित्तानुसारतः दक्षिणाब्राह्मणेभ्यश्चततोमौनंविसर्जयेत् मंदवारेप्रदोषोयंशुक्लेकृष्णेत्रयोदशी यश्चतुर्विंशतिंकुर्याद्यथोक्तफलमाप्नुयात् अथपूजनम् आवाहयेत्प्रथमतोमंत्रेणानेनसुव्रत एह्येहित्वमुमाकांतस्थानेचात्रस्थिरोभव यावद्व्रतंसमाप्येतकृपयादीनवत्सल आवाहनं० आसनेस्मिन्नुमाकांतसुखस्पर्शेसुनिर्मले उपविश्यमृडेदानींसर्वशांतिप्रदोभव आसनं० पाद्यंचतेमयादत्तंपुष्पगंधसमन्वितम् गृहाणदेवदेवेशमयादत्तंहिभक्तितः अर्घ्यं० शीतलंनिर्मलंतोयंकर्पूरेणसुवासितं आचम्यतांसुरश्रेष्ठमयादत्तंहिभक्तितः आचमनीयं० पंचामृतेनस्नपनंततन्मंत्रैश्चकारयेत् गोक्षीरधामन्देवेशगोक्षीरेणमयाकृतम् स्नपनंदेवदेवेशगृहाणपरमेश्वर दुग्धस्नानं० दध्नाचैवमयादेवस्नपनंक्रियतेनव गृहाणभक्त्यादत्तंमेप्रसन्नो

मेभवाव्यय दधि॰ सर्पिषादेवदेवेशस्नपनंक्रियतेमया उमाकांतगृहाणेदंश्रद्धयासुरसत्तम घृतस्नानं इदंमधुमयादत्तंतवतुष्ट्यर्थमेवच
गृहाणशंभोत्वंभक्त्याममशांतिप्रदोभव मधुस्नानं सितयादेवदेवेशस्नपनंक्रियतेमया गृहाणशंभोमेभक्त्यासुप्रसन्नोभवप्रभो श
र्करास्नानं॰ कावेरीनर्मदावेणीतुंगभद्रासरस्वती गंगाचयमुनाचैवताभ्यःस्नानार्थमाहृतं गृहाणत्वमुमाकांतस्नानायश्रद्धयाजलम् स्ना
नं॰ एतद्वासोमयादत्तंसोत्तरीयंसुशोभनम् गृहाणत्वंसुरश्रेष्ठममवासःप्रदोभव वस्त्रं॰ यज्ञोपवीतंसौवर्णंमयादत्तंचशंकर गृहा
णपरयातुष्ट्यातुष्टिदोभवसर्वदा उपवीतं॰ सुगंधंचंदनंदिव्यंमयादत्तंतवप्रभो भक्त्यापरमयाशंभोसुभगंकुरुमेप्रभो चंदनं॰
मालतीचंपकादीनिकुसुदान्युत्पलानिच बिल्वपत्राणिपूजार्थंस्वीकुरुत्वमुमापते पुष्पं॰ धूपंविशिष्टंपरमंसर्वौषधिविजृंभितम्
गृहाणपरमेशानप्रभोपरिदयांकुरु धूपं॰ दीपंचपरमंशंभोघृतवर्त्तिषुयोजितम् दत्तंगृहाणदेवेशममज्ञानप्रदोभव दीपं॰ शा
ल्योदनघृतापूपपायसादिसमन्वितम् नैवेद्यंविविधंदत्तंभक्त्यामेप्रतिगृह्यताम् नैवेद्यं॰ नैवेद्यमध्येपानीयंमयादत्तंहिभक्तितः
स्वीकुरुष्वमहादेवप्रसन्नोभवसर्वदा मध्येपानीयं· उत्तरापोशनार्थंवाआनीतंजलमुत्तमम् गृहाणत्वमुमाकांतसर्वदुःखनिवारक
उत्तरापोशनं कर्पूरैलालवंगादिपूगीफलसमन्वितम् तांबूलंकल्पितंभक्त्यागृहाणगिरिजाप्रिय तांबूलं· इदंफलंमयादेवस्था
पितंपुरतस्तव तेनमेसफलावाप्तिर्भवेज्जन्मनिजन्मनि फलं॰ हिरण्यगर्भगर्भस्थंहेमबीजंविभावसोः दक्षिणाकांचनीदेवस्था
पितामेतवाग्रतः दक्षिणां॰ दीपावलीमयादत्तासुवर्त्तिघृतसंयुता पंचार्त्तिक्यप्रदानेनममतेजःप्रदोभव पंचार्त्तिक्यं· यानि-
कानिचपापानिजन्मांतरकृतानिच तानितानिविनश्यंतिप्रदक्षिणपदेपदे प्रदक्षिणां॰ मृत्युंजयायरुद्रायनीलकंठायशंभवे अमृ
तेशायशर्वायमहादेवायतेनमः नमस्कारं· सेवंतिकाबकुलचंपकपाटलाब्जैःपुन्नागजातिकरवीररसालपुष्पैः बिल्वप्रवालतुलसी
दलमालतीभिस्त्वांपूजयामिजगदीश्वरमेप्रसीद मंत्रपुष्पं· निपत्यदंडवद्भूमौप्रणम्यचपुनःपुनः क्षमापयित्वादेवेशंरात्रौजागर
णंचरेत् गीतवादित्रनृत्याद्यैर्गृहेवादेवतालये एवंपूजाप्रकर्त्तव्याशंकरस्यचतुष्टिदा इच्छितंचनराणांतुददातिभगवान्हरः इतिश्री

स्कंदपुराणेशनिप्रदोषव्रतकथोद्यापनपूजासमाप्ता अथप्रदोषव्रतम् सूतउवाच काचिच्चविप्रवनितासपुत्रादुःखकर्षिता शांडिल्यस्यमुखाच्छ्रुत्वाप्रदोषेशिवपूजनम् इत्युक्तासुनिनासाध्वीसाविप्रवनितापुनः तंप्रणम्याथपप्रच्छशिवपूजाविधेःक्रमात् शांडिल्यउवा॰ पक्षद्वयेत्रयोदश्यांनिराहारोभवेद्दिवा घटित्रयादस्तमयात्पूर्वंस्नानंसमाचरेत् शुक्लांबरधरोभूत्वावाग्यतोनियमान्वितः कृतसंध्याजपविधिःशिवपूजांसमारभेत् देवस्यपुरतःसम्यगुपलिप्यनवांभसा विधायमंडपंरम्यंधौतवस्त्रादिभिर्वृतं वितानाद्यैरलंकृत्यफलपुष्पनवांकुरैः विचित्रंपद्ममुल्लिख्यवर्णपंकजसंयुतम् तत्रोपविश्यतुशुभेसूपविष्टःस्थिरासने सम्यक्संपादिताशेषपूजोपकरणःशुचिःआगमोक्तेनमंत्रेणपीठमामंत्रयेत्सुधीः ततःकृत्वात्मशुद्धिंचभूतशुद्ध्यादिकंक्रमात् प्राणायामत्रयंकुर्याद्बीजमंत्रैःसबिंदुकैः मातृकान्यस्य विधिवद्ध्यात्वातांदेवतांपराम् वामभागेगुरुंनत्वादक्षिणेगणपंयजेत् अंभोरुयुग्मेधर्मादीन्न्यस्यनाभौचपार्श्वयोः अधर्मादीननंतादीन् हृदिपीठमनुन्यसेत् आधारशक्तिमारभ्यज्ञानात्मानमनुक्रमात् उक्तक्रमेणविन्यस्यहृदयेसाधुभाविते नवशक्तिमयेरम्येध्यायेद्देवमुमापतिम् चंद्रकोटिप्रतीकाशंत्रिनेत्रंचंद्रभूषणम् आपिंगलजटाजूटंरत्नमौलिविराजितं नीलग्रीवमुदारांगंनानाहारोपशोभितम् वरदाभयहस्तंचहरिणंचपरश्वधम् दधानंनागवलयंकेयूरांगदभूषणम् व्याघ्रचर्मपरीधानंरत्नसिंहासनेस्थितम् ध्यात्वातद्वामभोगेचगिरिजांभक्तवत्सलाम् भास्वज्जपाप्रसूनाभामुदयार्कसमप्रभां विद्युत्कंजनिभांतन्वींमनोनयननंदिनीम् बालेंदुशेखरांस्निग्धांनीलाकुंचितकुंतलाम् भृंगसंघातरुचिरनीलालकविराजिताम् मणिकुंडलविद्योतमुखमंडलविभ्रमाम् नवकुंकुमपंकाभांकपोलतलदर्पणाम् मधुरस्मितविभ्राजदरुणाधरपल्लवाम् कंबुकंठींशिवामुद्यत्कुचपंकजकुड्मलाम् पाशांकुशाभयाभीष्टविलसंतींचतुर्भुजाम् अनेकरत्नविलसत्कंकणांगदरोरुहाम् वलित्रयेणविलसद्धेमकांचीगुणान्विताम् रक्तमाल्यांबरधरांदिव्यचंदनचर्चिताम् दिक्पालवनितामौलिसन्नतांघ्रिसरोरुहाम् रत्नसिंहासनारूढांसर्पराजपरिच्छदाम् एवंध्यात्वामहादेवंदेवींचगिरिजांशुभाम् न्यासक्रमेणसंपूज्यदेवं गंधादिभिःक्रमात् पंचभिर्ब्रह्मभिःकुर्यात्प्रोक्तःस्थानेषुवाहृदि पृथक्पुष्पांजलिंदेहेमूलेनचहृदित्रयम् पुनःस्वयंशिवोभूत्वामूलमं

त्रेणसाधकः ततःसंपूजयेद्देवंबाह्यपीठेपुनःक्रमात् ३५ संकल्पंप्रवदेत्तत्रपूजारंभेसमाहितः कृतांजलिपुटोभूत्वाचिंतयेद्धृदिशंकरं ऋणपातक
दौर्भाग्यदारिद्र्यविनिवृत्तये अशेषाघविनाशायप्रसीदममशंकर दुःखशोकाग्निसंतप्तंसंसारभयपीडितं बहुरोगाकुलंदीनंत्राहिमांवृषवाह
न आगच्छदेवदेवेशमहादेवाभयंकर गृहाणसहपार्वत्यात्वंचपूजांमयाकृताम् इतिसंकल्प्यविधिवद्बाह्यपूजांसमाचरेत् गुरुंगणपतिंचैवय
जेत्सव्यापसव्ययोः क्षेत्रेशमीशकोणेतुयजेद्वास्तोष्पतिंक्रमात् वाग्देवींचयजेत्तत्रततःकात्यायनींयजेत् धर्मज्ञानंसवैराग्यमैश्वर्यंचनमोंत
कैःस्वरैरीशादिकोणेषुपीठपादाननुक्रमात् आभ्यांबिंदुविसर्गाभ्यामधर्मादीन्प्रपूजयेत् गात्ररूपांचतुर्दिक्षुमध्येनंतंसतारकम् सत्वादित्रि
गुणांस्तत्तुरूपान्पीठेषुविन्यसेत् अतऊर्ध्वंच्छेदमायालक्ष्म्यै देव्याशिवेनच तदंतेचांबुजंभूयःसकलंमंडलोत्तमम् यत्रकेसरकिंजल्कव्याप्तं
तत्राक्षरैःक्रमात् आत्मत्रयमथाभ्यर्च्यमध्येमंडपमादरात् वामांज्येष्ठांचगौरींचभवार्थैदिक्षुपूजयेत् वामाद्यानवशक्तीश्चनवस्वरयुताजपे
त् हृदिबीजत्रयाद्यैश्चपीठमंत्रेणचार्चयेत् आवृत्तिःप्रथमांगैस्तुपंचभिर्मूर्तिपंक्तिभिः त्रिंशद्भिर्मूर्तिभिश्चान्यैर्निधिद्वयसमन्वितैः अनंताद्यैः
पराद्यान्यामातृभिश्चवृषादिभिः सिद्धिभिश्चाणिमाद्याभिरिंद्राद्यैश्चतदायुधैः वृषभक्षेत्रचंडेशदुर्गाश्चस्कंदनंदिनौ गणेशसैन्यपौचैवस्व
स्वलक्षणलक्षितौ ४० अणिमामहिमाचैव गरिमालघिमातथा ईशित्वंचवशित्वंचप्राप्तिःप्राकाम्यमेवच अष्टैश्वर्याणिचोक्तानितेजोरू
पाणिकेवलम् पंचभिर्ब्रह्मभिःपूर्वंहृल्लेखाद्यादिभिःक्रमात् अंगैरुमाद्यैरिंद्राद्यैःपूर्वोक्तैर्मुनिभिःस्तुतैः उमांचंडेश्वरादींश्चपूजयेदुत्तरा
दितः एवमावरणैर्युक्तंतेजोरूपंसदाशिवम् उमयासहितंदेवमुपचारैःप्रपूजयेत् सुप्रतिष्ठितशंखस्यतीर्थैःपंचामृतैरपि अभिषिच्य
महादेवंरुद्रसूक्तैःसमाहितः कल्पयेद्वैदिकैर्मंत्रैरासनाद्युपचारकान् आसनंकल्पयेद्धैमंदिव्यवस्त्रसमन्वितम् अर्घ्यमष्टगुणोपेतंपाद्यं
शुद्धोदकेनच तेनैवाचमनंदद्यान्मधुपर्कमधूत्तमम् पुनराचमनंदत्वास्नानमंत्रैःप्रकल्पयेत् वसनेचोपवीतंचभूषणानिनिवेदयेत् गंधम
ष्टांगसंयुक्तंस्रक्पूतंविनिवेदयेत् ततश्चबिल्वमंदारकल्हारसरसीरुहम् धत्तूरंकर्णिकारंचद्रोणपुष्पंचमल्लिकाम् अपामार्गंचतुलसीमाध
वीचंपकादिकम् बृहतीकरवीराणियथालब्धानिभामिनि निवेदयेत्स्रक्गंधीनिमाल्यानिविविधानिच धूपंकालागरूत्पन्नंदीपंचविम

लंक्षभम् अथपायसनैवेद्यंसघृतंसोपदंशकम् मोदकापूपसंयुक्तंशर्करागुडसंयुतम् मधुरान्नंदधियुतंजलपानसमन्वितं तेनैववह्निविषाव
न्हौजुहुयान्मंत्रभाविते आगमोक्तेनविधिनागुरुवाक्यनियंत्रितः नैवेद्यंशंभवेभूयोदत्वातांबूलमुत्तमम् फलंनीराजनंदिव्यंछत्रंदर्पणमु
त्तमम् समर्पयित्वाविधिवन्मंत्रैर्वैदिकतांत्रिकैः यद्यशक्तःस्वयंनिस्वोयथाविभवमर्चयेत् भक्त्यादत्तेनगौरीशःपुष्पमात्रेणतुष्यति अ
थांगभूतान्सकलान्गणेशादीन्प्रपूजयेत् स्तवैर्नानाविधैस्तुत्वासाष्टांगंप्रणमेद्बुधः ततःप्रदक्षिणीकृत्यवृषचंडेश्वरादिकान् पूजांस
मर्प्यविधिवत्प्रार्थयेद्गिरिजापतिम् जयदेवजगन्नाथजयशंकरशाश्वत जयसर्वसुराध्यक्षजयसर्वसुरार्चित जयसर्वगुणातीतजयस
र्ववरप्रद ६० जयनित्यंनिराधारजयविश्वंभरायच जयविश्वैकवंद्येशजयनागेंद्रभूषण जयगौरीपतेशंभोजयनित्यंनिरंजन जयना
थकृपासिंधोजयभक्तार्तिभंजन जयदुस्तारसंसारसागरोत्तारणप्रभो प्रसीदमेमहादेवसंसारादद्यखिद्यतः सर्वपापक्षयंकृत्वारक्षमांप
रमेश्वर महादारिद्र्यमग्नस्यमहापापहतस्यच महाशोकनिविष्टस्यमहारोगातुरस्यच ऋणभारपरीतस्यदह्यमानस्यकर्मभिः ग्रहैःप्र
पीड्यमानस्यप्रसीदममशंकर दरिद्रीप्रार्थयेद्देवंपूजांतेगिरिजापतिम् अभाग्योवापिराजावाप्रार्थयेद्देवमीश्वरम् दीर्घमायुःसदारो
ग्यंकोशवृद्धिर्बलोन्नतिः ममास्तुनित्यमानंदःप्रसादात्तवशंकर शत्रवश्चक्षयंयांतुप्रसीदंतुममप्रजाः नश्यंतुदस्यवोराज्येजनाःसंतुनि
रापदः दुर्भिक्षमरिसंतापाःशमंयांतुमहीतले सर्वसस्यसमृद्धिश्चभूयात्सुखमयादितः एवमाराधयेद्देवंप्रदोषेगिरिजापतिम् ब्राह्मणा
न्भोजयेत्तश्चाद्दक्षिणाभिश्चपूजयेत् सर्वपापक्षयकरीसर्वदारिद्र्यनाशिनी शिवपूजेयमाख्यातासर्वाभीष्टफलप्रदा महापातकसं-
घातमधिकंचोपपातकम् शिवद्रव्यापहरणात्सर्वमन्यद्विनाशयेत् ब्रह्महत्यादिपापानांपुराणेषुस्मृतिष्वपि प्रायश्चित्तानिदृष्टानिनशि
वद्रव्यहारिणाम् बहुनात्रकिमुक्तेनश्लोकार्द्धेनब्रवीम्यहम् ब्रह्महत्याशतंवापिशिवपूजाविनाशयेत् मयाकथितमेतत्तेप्रदोषेशिवपूज
नम् रहस्यंसर्वजंतूनामत्रास्त्येवनसंशयः एताभ्यामपिपुत्राभ्यांशिवपूजाविधीयताम् अतःसंवत्सरादेवपरांसिद्धिमवाप्स्यथ इति-
शांडिल्यवचनमाकर्ण्यद्विजभामिनी ताभ्यांतुसहबालाभ्यांप्रणनाममुनेःपदे स्त्रीरुवाच अहमद्यकृतार्थास्मितवदर्शनमात्रतः एतौकु

मारौभगवन्त्वामेवशरणंप्रभो एषमेतनयोब्रह्मन्शुचिव्रतइतीरितः ८० एषराजसुतोनाम्नाधर्मगुप्तःसुतोमया एतावहंचभगव
न्भवच्चरणकिंकराः समुद्धरास्मिन्पतितान्घोरेदारिद्र्यसागरे इतिप्रपन्नाशरणंद्विजांगनातस्याथवाक्यैरमृतोपमानैः उपादिदेशापि
तयोःकुमारयोर्मुनिःशिवाराधनमंत्रविद्याम् अथोपदिष्टौमुनिनाकुमारौब्राह्मणीचसा तंप्रणम्यसमामंत्र्यजग्मुस्तेशिवमंदिरात् ततः
प्रभृतितौबालौमुनिवर्योपदेशतः प्रदोषेपार्वतीशस्यपूजांचक्रतुरंजसा एवंपूजयतोर्देवंद्विजराजकुमारयोः सुखेनैवव्यतीयायतयो
र्मासचतुष्टयम् कदाचिद्राजपुत्रेणविनासौद्विजनंदनः स्नातुंगतोनदीतीरेचचारबहुलीलया तत्रनिर्झरनिष्पातनिर्भिन्नेवप्रकर्दमे नि
धानकलशंस्थूलंप्रस्फुरंतंददर्शह तंदृष्ट्वासहसागत्यहर्षकौतुकविह्वलः देवोपपन्नमन्वानोगृहीत्वाशिरसादधौ ससंभ्रमंसमानीय-
निधानकलशंबलात् निधायभवनस्यांतंमातरंसमभाषत मातर्मातरिमंपश्यप्रसादंगिरिजापतेः निधानंकुंभरूपेणदर्शितंकरुणात्मना
अथसाविस्मितासाध्वीसमाहूयनृपात्मजम् स्वपुत्रंप्रतिनंद्याहमानयंतीशिवार्चनम् शृणुतांमेवचःपुत्रौनिधानकलशीमिमाम् समंवि-
भज्यगृण्हीतांममशासनगौरवात् इतिमातृवचःश्रुत्वातुतोषद्विजनंदनः प्रत्याहराजपुत्रस्तांविश्रब्धःशंकरार्चने मातस्तवसुतस्यैव
सुकृतेनसमागतम् नाहंगृहीतुमिच्छामिविभक्तंधनसंचयम् आत्मनःसुकृताल्लब्धंस्वयमेवभुनक्त्वसौ सएवभगवानीशःकरिष्यति
कृपांमयि एवमभ्यर्चतोःशंभुंभूयोपिपरमामुदा संवत्सरोव्यतीयायतस्मिन्नेवगृहेतयोः अथैकदाराजसूनुःसहतेनद्विजन्मना वसंत
समयेप्राप्तेविजहारवनांतरे अथदूरंगतौक्वापिवनेद्विजनृपात्मजौ गंधर्वकन्याःक्रीडंतीःशतशस्तावपश्यताम् ताःसर्वाश्चारुसर्वांगीर्वि
हरंतीर्मनोहरं दृष्ट्वाद्विजात्मजोदूरादुवाचनृपनंदनम् इतःपरंनगंतव्यंविहरंत्यग्रतःस्त्रियः स्त्रीसंनिधानंविबुधास्त्यजंतिविमलाशयाः
एताःकैतवधारिण्योधनयौवनदुर्मदाः मोहयंत्योजनंदृष्ट्वावाचानुनयकोविदाः अतःपरित्यजेत्स्त्रीणांसन्निधिंसहभाषणम् निज
धर्मरतोविद्वान्ब्रह्मचारीविशेषतः अतोहंनोत्सहेगंतुंक्रीडास्थानंमृगीदृशाम् इत्युक्त्वाद्विजपुत्रस्तुनिवृत्तोदूरतःस्थितः अथासौराज
पुत्रस्तुकौतुकाविष्टमानसः तासांविहारपदवीमेकएवाभयोययौ तत्रगंधर्वकन्यानांमध्येत्वेकावरांगना दृष्ट्वायांतंराजपुत्रंचिंतयामा

सचेतसा अहोकोयमुदारांगोयुवासर्वांगसुंदरः मत्तमातंगगमनोलावण्यामृतवारिधिः लीलालोलविशालाक्षोमधुरस्मितपेशलः मदनोपमरूपश्रीःसुकुमारांगलक्षणः इत्याश्चर्ययुताबालादूराद्दृष्ट्वानृपात्मजम् सर्वाःसखीःसमालोक्यवचनंचेदमब्रवीत् इतोप्यदूरेहेसख्योवनमस्त्येकमुत्तमम् विचित्रचंपकाशोकपुन्नागबकुलैर्युतम् तत्रगत्वातरूंसर्वंप्रसिच्यकुसुमोत्करम् भवंत्यःपुनरायांतुतावत्तिष्ठाम्यहंत्विह इत्यादिष्टःसखीवर्गोजगामापिवनांतरम् सापिगंधर्वजातस्थौन्यस्तदृष्टिर्नृपात्मजे तांसमालोक्यतन्वंगींनवयौवनशालिनीम् बालांस्वरूपसंपत्त्यापरिभूततिलोत्तमाम् राजपुत्रःसमागम्यकौतुकोत्फुल्ललोचनः अवापदैवयोगेनमदनस्यशरव्यथाम् गंधर्वतनयासापिप्राज्ञायनृपसूनवे उत्थायतरसातस्मैप्रददौपल्लवासनम् कृतोपचारमासीनंतमासाद्यसुमध्यमा पप्रच्छतद्गुणैर्ध्वस्तवीर्याकुलेंद्रिया कस्त्वंकमलपत्राक्षकस्माद्देशादिहागतः कस्यपुत्रइतिप्रेम्णापृष्टःसर्वंन्यवेदयत् विदर्भराजतनयंविध्वस्तपितृमातृकम् शत्रुभिश्चहृतस्थानमात्मानंपरयागिरा सर्वभावेनभूयस्तांपप्रच्छनृपनंदनः कात्वंवामोरुकिंचात्रकार्यंतेकस्यचात्मजा किमिवध्यायसिहृदिकिंवावक्तुमिहेच्छसि इत्युक्तासापुनःप्राहशृणुराजेंद्रसत्तम आस्तेविद्रविकोनामगंधर्वाणांकुलाग्रणीः तस्याहमस्मितनयानाम्नाचांशुमतीशुभा त्वामायातंविलोक्याहंत्वत्संभाषणलालसा त्यक्त्वासखीजनंसर्वमेकैवास्मिमहामते सर्वसंगीतविद्यासुनमत्तोन्यास्तिकाचन ममगानेनतुष्यंतिसर्वाअपिसुरस्त्रियः साहंसर्वकलाभिज्ञाज्ञातसर्वजनेंगिता तवाहमेप्सितंवेद्मिमयितेसंगतंमनः तथाममापितेसौख्यंदैवेनप्रतिपादितम् आवयोःस्नेहभेदोत्रनाभिभूयादितःपरंइतिसंभाष्यतेनाशुप्रेम्णागंधर्वकन्यका मुक्ताहारंददौतस्मैस्वकुचांतरभूषणम् तमादायाद्भुतंहारंसतस्याःपरमाकुलः गूढहर्षपरासिक्तामिदमाहनृपात्मजः सत्यमुक्तंत्वयाभीरुतथाप्येकंवदाम्यहम् त्यक्तराज्यस्यनिःस्वस्यकथंमेभवसिप्रिया यात्वंपितृमतीबालाविलंघ्यपितृशासनम् स्वच्छंदाचरणंकर्तुमूढेत्वंकथमर्हसि इतितस्यवचःश्रुत्वातंप्रत्याहशुचिस्मिता अस्तुनामतथैवाहंकरिष्येपश्यकौतुकम् गच्छस्वभवनंकांतपरश्वःप्रातरेवतु आगच्छपुनरत्रैवकार्यमस्तिचनोमृषा इत्युक्त्वातंनृपंकांतंसासंगतसखीजना अपक्रामतचार्वंगीसचापिनृपनं

दनः ससमभ्येत्यहर्षेणद्विजपुत्रस्यसन्निधिं सर्वमाख्यायतेनैवसार्धंस्वभवनंययौ तांचविप्रसुतांभूयोहर्षयित्वानृपात्मजः परश्वोद्विजपुत्रेणसार्धंतस्मिन्वनेययौ सतयापूर्वनिर्दिष्टंस्थानंप्राप्यनृपात्मजः गंधर्वराजमद्राक्षीद्दुहित्राचसमन्वितम् सगंधर्वपतिःप्राप्तावभिनंद्यकुमारकौ उपवेश्यासनेरम्येराजपुत्रमभाषत गंधर्वउवाच राजेंद्रपुत्रपूर्वेद्युःकैलासंगतवानहम् तत्रापश्यंमहादेवंपार्वत्यासहितंविभुं आहूयमांसदेवेशःसर्वेषांत्रिदिवौकसाम् सन्निधावाहभगवान्करुणामृतवारिधिः धर्मगुप्ताह्वयःकश्चिद्राजपुत्रोस्तिभूतले अकिंचनोभ्रष्टराज्योहतबंधुश्चशत्रुभिः सबालोगुरुवाक्येनमदर्चायांरतःसदा अद्यतत्पितरःसर्वेमांप्राप्तास्तत्प्रभावतः तस्यत्वमपिसाहाय्यंकुरुगंधर्वसत्तम यथासनिजराज्यस्थोहतशत्रुर्भविष्यति इत्याज्ञप्तोहमीशेनसंप्राप्यनिजमंदिरम् अनयाचदुहित्राचबहुशोभ्यर्थितस्तथा ज्ञात्वेमंसकलंशंभोर्नियोगंकरुणात्मनः आदायेमांदुहितरंप्राप्तोस्मीदंवनांतरम् अतएनांप्रयच्छामिकन्यामंशुभमतींतव हत्वाशत्रून्स्वराष्ट्रेत्वांस्थापयामिशिवाज्ञया तस्मिन्पुरेत्वमनयाभुक्त्वाभोगान्यथोचितान् दशवर्षसहस्रांतेगंतासिगिरिशालयम् तत्रापिममकन्येयंत्वामेवप्रतिपत्स्यते अनेनैवस्वदेहेनदिव्येनशिवसन्निधौ इतिगंधर्वराजस्तमाभाष्यनृपनंदनम् तस्मिन्वनेस्वदुहितुःपाणिग्राहमकारयत् पारिबर्हमदात्तस्मैरत्नभारान्महोज्ज्वलान् चूडामणिंचंद्रनिभंमुक्ताहारांश्चभास्वरान् दिव्यालंकारवासांसिकार्तस्वरपरिच्छदान् गजानामयुतंभूयोनियुतंनीलवाजिनाम् स्यंदनानांसहस्राणिसौवर्णानिमहांतिच पुनरेकंकथंदिव्यंधनुश्चक्रायुधोपमम् मंत्रास्त्राणांसहस्राणितूणौचाक्षय्यसायकौ अभेद्यांसर्वजंतूनांशक्तिंचरिपुमर्दिनीम् दुहितुःपरिचर्यार्थंदासीनांचसहस्रकम् ददौप्रीतमनास्तस्मैधनानिविविधानिच गंधर्वसैन्यमत्युग्रंचतुरंगसमन्वितम् पुनश्चतत्सहायार्थंगंधर्वाधिपतिर्ददौ इत्थंराजेंद्रतनयःसंप्राप्यश्रियमुत्तमां अभीष्टजायासहितोमुमुदेनिजसंपदा कारयित्वास्वदुहितुर्विवाहंसमयोचितम् ययौविमानमारुह्यगंधर्वाधिपतिर्दिवम् धर्मगुप्तःकृतोद्वाहःसहगंधर्वसेनया निःशेषितारातिबलःप्रविवेशनिजंपुरम् ततोभिषिक्तःसचिवैर्ब्राह्मणैश्चमहोत्तमैः रत्नसिंहासनारूढश्चक्रेराज्यमकंटकम् याविप्रवनितापूर्वंतमपुष्णात्स्वपुत्रवत् सैवमाताभ

वत्तस्यसम्प्राताद्विजनंदनः गंधर्वतनयाजायाविदर्भविषयेश्वरः आराध्यदेवंगिरिशंधर्मगुप्तोनृपोभवेत् एवमन्येसमाराध्यप्रदोषेगि
रिजापतिम् लभंतेभीप्सितान्कामान्देहांतेतुपरांगतिम् सूतउवाच एतन्महाव्रतंपुण्यंप्रदोषेशंकरार्चनम् धर्मार्थकाममोक्षाणांयदेत
त्साधनंपरम् यएतच्छृणुयान्नित्यमाख्यानंपरमाद्भुतम् प्रदोषेशिवपूजांतेकथयेद्वासमाहितः नभवेत्तस्यदारिद्र्यंजन्मांतरशतेष्वपि
ज्ञानैश्वर्यसमायुक्तःसोंतेशिवपुरंव्रजेत् येप्राप्यदुर्लभमिदंमनुजाःशरीरंकुर्वंत्यहोत्रपरमेश्वरपादपूजाम् धन्यास्तएवनिजपुण्य
जितत्रिलोकास्तेषांपदांबुजरजोभुवनंपुनाति १६४ अथोद्यापनंशनिप्रदोषव्रतम् तिथ्यादीनांतुसंकल्प्यपुण्यवाचनपूर्वकम्
अब्दमेकव्रतंकृत्वाततोद्यापनमाचरेत् उमयासहितंरुद्रंस्वर्णेनचकारयेत् रौप्येणवृषभंकृत्वाकलशोपरिपूजयेत् ब्रह्माद्यावा
हयेत्तत्रलिंगतोभद्रमंडले स्वशाखोक्तेनविधिनाहुनेत्घृततिलोदनम् पृथक्शिवशिवामंत्रैरष्टोत्तरशतद्वयम् इतिश्रीस्कंदपुरा
णेसोद्यापनपक्षप्रदोषःसमाप्तः अथमार्गशीर्षशुक्लत्रयोदश्यामनंगत्रयोदशीव्रतम् श्रीकृष्णउवाच शृणुपार्थव्रतंश्रेष्ठं
नाम्नानंगत्रयोदशी याशिवायैपुराप्रोक्ताप्रसन्नेनेंदुमौलिना गौर्युवाच पुरासौभाग्यकरणाख्यातानंगत्रयोदशी तस्या
व्रतंमहादेवममापिकथयप्रभो कस्मिन्मासेप्रकर्त्तव्यंसंपूर्णंचकथंभवेत् पूज्यानिकानिनामानिविधिनाकेनवैमृड दुर्भगानां
चनारीणांसौभाग्यकरणंप्रभो वंध्यानांपुत्रजनकंधनधान्यविवर्द्धनं एतद्व्रतंमहादेवप्रसादाद्वक्तुमर्हसि ईश्वरउवाच क
थयामिनसंदेहोमहापुण्यंमहाफलम् चीर्णेनयेनदेवेशिसर्वसंपद्यतेसुखम् स्त्रीभिश्चैवविधातव्यंकर्तव्यंचप्रयत्नतः हेमंतेहिऋ
तौप्राप्तेमासिमार्गशिरेशुभे शुक्लपक्षेत्रयोदश्यामुपवासंतुकारयेत् मल्लिकादंतकाष्ठंचपूजांचमरुवेणतु नारंगेणार्घ्यदानंचनैवे-
द्येफाणिकास्तथा गंधपुष्पैस्तथाधूपैरर्चयेच्चयथाविधि अक्षतैश्चफलैश्चैवएकाग्रहृदयस्थितः सम्यक्जितेंद्रियोभूत्वाअनंगं-
हृदिकल्पयेत् पश्चात्प्रदक्षिणांकृत्वाअर्घ्यंचैवनिवेदयेत् नमस्कुर्यादनंगंचमंत्रेणानेनभामिनि नमोस्त्वनंगदेवायसर्वसंग-
निवासिने हृद्युपस्थायनित्यायसूक्ष्मायपरमेष्ठिने स्वर्गेचैवतुपातालेमर्त्यलोकेतथैवच सर्वव्यापिन्ननंगत्वंगृहाणार्घ्यंनमोस्तुते

इत्यर्घ्यम् पूजयेत्स्वस्थचित्तेनप्राशयेन्मधुवैनिशि रंभातुल्याभवेन्नारीसौभाग्यमतुलंभवेत् नश्यंतिसर्वपापानिह्यन्यजन्मकृतानिच लावण्यमतुलंचैवरूपैश्वर्यसमन्वितम् अश्वमेधस्ययज्ञस्यफलंप्राप्नोतिमानवः पौषेशुक्लत्रयोदश्यामौदुंबरंदंतधावनं जातिपुष्पैःपूजनंस्याद्दाडिमेनार्घ्यमेवच अशोकवर्तिकाःस्निग्धानैवेद्यंचप्रकल्पयेत् उपोष्यपूजयेद्देवंभक्त्यानाद्येश्वरंप्रिये नाद्येश्वरायसर्वाययईश्वरायनमोनमः नमस्तेभुवनेशायगृहाणार्घ्यंनमोनमः इत्यर्घ्यं व्रतस्थःस्वस्थचित्तेनचंदनंप्राशयेन्निशि सर्वपापविशुद्धात्मासौभाग्यमतुलंभवेत् माघेशुक्लत्रयोदश्यामुपवासंचकारयेत् विष्णुक्रांतेनकाष्ठेनदंतान्संशोधयेच्छुचिः कुंदपुष्पैःसमभ्यर्च्यअर्घ्यंजंबीरपूरकम् नैवेद्येशर्करांदद्याद्देवोयोगेश्वरस्तथा योगेश्वरायदेवाययोगजंबूनिवासिने गृहाणार्घ्यंमयादत्तंयोगेश्वरनमोस्तुते इत्यर्घ्यं मौक्तिकंप्राशयेद्रात्रौवाजपेयफलंलभेत् फाल्गुनस्यसितेपक्षेत्रयोदश्यांशुचिस्मिता बदर्यादंतकाष्ठंचजपापुष्पैस्तुपूजयेत् अपूपैस्तुचनैवेद्यंवीरेशंनामपूजनम् वीरेश्वरवीरभद्रउमाकांतसुरेश्वर सपूगंचगृहाणार्घ्यंमयादत्तंमहेश्वर सीतातुल्याभवेन्नारीकंकोलंप्राशयेन्निशि चैत्रशुक्लत्रयोदश्यामल्लिकादंतधावनम् दमनेनार्चयेद्देवंजंबीरार्घ्यंप्रकल्पयेत् नैवेद्येकर्जिकाःप्रोक्ताविश्वरूपंतुपूजयेत् नमस्तेविश्वरूपायस्वरूपायमहात्मने गृहाणार्घ्यंमयादत्तंविश्वरूपनमोस्तुते इत्यर्घ्यं उमातुल्याभवेन्नारीकर्पूरंप्राशयेन्निशि वैशाखशुक्लपक्षेतुअपामार्गेणपूर्ववत् पूजाचमल्लिकापुष्पैःखर्जूरार्घ्यंतुदापयेत् नैवेद्येवटकंदद्यान्महारूपंतुपूजयेत् महारूपनमस्तेस्तुसर्वविज्ञानरूपिणे गृहाणार्घ्यंमयादत्तंमहारूपनमोस्तुते इदमर्घ्यम् ततःशुद्धमनाभूत्वाजातीतोयंपिबेन्निशि ज्येष्ठेशुक्लत्रयोदश्यांनिर्गुंडीदंतधावनम् पूजाबकुलपुष्पैश्चश्रीफलेनार्घ्यकल्पना नैवेद्येमंडकान्दद्याल्लवंगंप्राशयेन्निशि प्रद्युम्नंपूजयेद्देवंसर्वपापप्रणाशनम् नमस्तेपशुपतयेप्रद्युम्नभुवनेश्वर गृहाणार्घ्यंमयादत्तंप्रद्युम्नपरमेश्वर इत्यर्घ्यम् सुवर्णशतदानस्यफलमष्टगुणंभवेत् शुचिशुक्लत्रयोदश्यांनारिंगंदंतधावनम् कदंबैःपूजयेद्देवंनारिकेलार्घ्यदानतः नैवेद्यंदधिभक्तंचपूजयेच्चउमापतिम् स्वस्थेनमनसातत्रबिल्वतोयंपिबेन्निशि उमापतेमहाबाहोका

मदेवस्यनायक गृहाणार्घ्यंचंद्रमौलेउमाकांतनमोस्तुते इत्यर्घ्यम् वाजपेयस्ययज्ञस्यफलंप्राप्नोतिमानवः श्रावणस्यसितेपक्षे
त्रयोदश्यांशुभव्रतः कारंजंदंतकाष्ठंचपद्मपुष्पैस्तुपूजयेत् मातुलिंगंचार्घ्यदानेदद्यात्प्रह्वेनचेतसा नैवेद्यंपायसंदद्याच्छूलपाणिं
तुपूजयेत् प्राशयेदगरुंचैवरात्रौजागरणंचरेत् नमस्तेगिरिजानाथनमस्तेभक्तिभावन गृहाणार्घ्यंमयादत्तंशूलपाणेनमोस्तुते इत्य
र्घ्यम् सौत्रामणेश्चयज्ञस्यफलमष्टगुणंभवेत् भाद्रेशुक्लत्रयोदश्यांकंकोलंदंतधावनम् अर्चयेच्चंपकैःपुष्पैर्नैवेद्येघृतपूरिकाः अर्घ्येनिं
बूफलंदद्यात्सद्योजातंतुपूजयेत् ततःस्वस्थमनाभूत्वाकेशरंप्राशयेन्निशि त्रिदशेशायदेवायसद्योजातायवैनमः गृहाणार्घ्यंमयादत्तंसद्यो
जातनमोस्तुते इत्यर्घ्यम् दशानामश्वमेधानांफलमाप्नोतिमानवः आश्विनेचत्रयोदश्यांकंकतीदंतधावनम् अर्चयेत्करवीरैस्तुअ-
र्घ्यंकर्कटिकाफलम् त्रिदशाधिपतिःपूज्योनैवेद्येशुभ्रमंडकान् प्राशयेत्कांचनंतोयंनिशिदेवंप्रपूज्यच त्रिदशाधिपदेवेशउमाकांतमहेश्व
र त्रिधारूपमयस्त्वंहि अर्घ्योयंप्रतिगृह्यतां इत्यर्घ्यम् चातुर्मासस्ययज्ञस्यफलंदशगुणंभवेत् कार्तिकेचत्रयोदश्यांकदंबंदंतधावन
म् रक्तोत्पलैःपूजनंचकूष्मांडार्घ्यंप्रदापयेत् नैवेद्येपूरिकादद्यात्पूजयेज्जगदीश्वरं प्राशयेन्मौक्तिकजलंनिशिचैवंसमाहितः नमस्ते-
जगदीशायतापिनेशूलपाणये गृहाणार्घ्यंमहेशानजगदीशनमोस्तुते इत्यर्घ्यं पूजांतेजागरंकुर्याद्गीतवाद्यमहोत्सवैः अर्धनारीश्व
रंकुर्यात्सौवर्णंस्वयमेवच वस्त्रयुग्मेनसंवेष्ट्यशय्यायांविनिवेशयेत् एवंकृत्वातुदेवेशंशोभांतत्रतुकारयेत् श्वेतपुष्पैस्तुसंपूज्यश्वेतचंद
नचर्चितम् धूपैर्दीपैश्चनैवेद्यैःसवत्सांगांपयस्विनीम् श्वेतवस्त्रपरीधानांघंटाभरणभूषिताम् स्तुसूक्ष्मवस्त्रयुगुलमाचार्यायनिवे
दयेत् तथैवदक्षिणांदद्यादासनंचैवपादुके छत्रंचमुद्रिकांचैवकंकणंभूषणंशुभम् शय्यांदिव्यांप्रदेयांतुतूलाच्छादनसंयुताम्
गृहोपस्करसंयुक्तांभक्तिसंयुक्तचेतसा तत्रोपवेश्यचाचार्यंसुपवासव्रतीततः पादौमूर्ध्निसमारोप्यप्रणिपत्यवचोवदेत् भगवंस्त्वत्प्र
सादेनव्रतसंपूर्णतामम एवमस्त्वितिसब्रूयात्तवतुष्टोस्तुशंकरः ईश्वरउवाच एवंकृत्वाप्रयत्नेनदंपतीचैवपूजयेत् तयोश्चभो
जनंदद्याद्दंपत्योःपारितोषकम् अनेनविधिनातुष्याम्यहंयुक्तस्त्वयानघे तेभ्योदत्तंचयत्किंचिदक्षयंनात्रसंशयः आचार्यमग्रतःकृ

ज्ञातस्यादेशंतुकारयेत् नह्याचार्यसमंतीर्थं नह्याचार्यसमं तपः तस्याहंकायमास्थायसर्वसिद्धिंनयेध्रुवम् तेनैवाचार्यदानेनसर्वंभ
वतिचाक्षयम् एतद्व्रतंममश्रेष्ठंगुह्याद्गुह्यतरंपरम् राज्यमर्थान्सुतान्सिद्धिमवैधव्यंप्रयच्छति रूपंधनंधान्यमायुरारोग्यंचप्रदापये इष्ट
लाभंचसौभाग्यंवर्धयिष्येवरानने त्रयोदशीव्रतन्नास्तिसौभाग्यकरणंपरम् इतिभविष्योत्तरे अनंगत्रयोदशीव्रतंसंपूर्णम् इतित्र
योदशीव्रतानिसमाप्तानि अथचतुर्दशीव्रतानिलिख्यंते तत्रचैत्रशुक्लत्रयोदशीपूर्वाग्राह्या निशिभ्रमंतिभूतानिशक्तयःशूलभृ
द्यतः अतस्तत्रचतुर्दश्यांसत्यांतत्पूजनंभवेत् मधोःश्रावणमासस्यशुक्लायातुचतुर्दशी सारात्रिव्यापिनीग्राह्यानान्याशुक्लाकदाचन
चैत्रकृष्णचतुर्दश्यांविशेषःस्मर्यते पृथ्वीचंद्रोदयेपुलस्त्यः चैत्रकृष्णचतुर्दश्यांयःस्नायाच्छिवसन्निधौ नप्रेतत्वमवाप्नोतिगंगायांतुवि-
शेषतः इयंचपूर्वाग्राह्या इतिचैत्रशुक्लकृष्णचतुर्दशी अथवैशाखशुक्लचतुर्दश्यांनृसिंहचतुर्दशीव्रतम् तच्चप्रदोषव्यापिन्यांकार्य
म् तदुक्तंनृसिंहपुराणेहेमाद्रौ वैशाखेशुक्लपक्षेतुचतुर्दश्यांनिशामुखे मज्जन्मसंभवंपुण्यंव्रतंपापप्रणाशनं वर्षेवर्षेचकर्तव्यंममसंतु
ष्टिकारणमिति स्कांदेपि वैशाखस्यचतुर्दश्यांसोमवारेनिलर्क्षके अवतारोनृसिंहस्यप्रदोषसमयेद्विजाः अनिलर्क्षस्वाती दिनद्वयेत
द्व्याप्तावव्याप्तौअंशतःसमव्याप्तौचपरा विषमव्याप्तौत्वधिकव्याप्तिरिति दिनद्वयेप्यव्याप्तौपूर्वा पूर्वदिनेगौणकालव्याप्तेःसत्वात्परदिनेचत
दभावात् अस्यांचसंकल्परूपव्रतोपक्रमोमध्यान्हएवकर्तव्यः स्वातीनक्षत्रयोगेचशनिवारेमद्व्रतम् सिद्धियोगस्यसंयोगेवणिजेकरणे
तथा पुंसांसौभाग्ययोगेनलभ्यतेदैवयोगतः एभिर्योगैर्विनापिस्यान्मद्दिनंपापनाशनं सर्वेषामेववर्णानामधिकारोस्तिमद्व्रते तथा अनं
गेनसमायुक्तानसोपोष्याचतुर्दशी धनापत्यैर्वियुज्येततस्मात्तांपरिवर्जयेत् इतितत्रैवनिषेधात् विज्ञायमद्दिनंयस्तुलंघयेत्सापकृन्नरःस
यातिनरकंघोरंयावच्चंद्रदिवाकरौ ततोमध्यान्हवेलायांनद्यादौस्नानमाचरेत् परिधायततोवस्त्रंव्रतकर्मसमारभेत् इतिव्रतविधिः अथ
कथा सूतउवाच हिरण्यकशिपुंहत्वादेवदेवंजगद्गुरुम् सुखासीनंचनृहरिंशांतकोपंरमापतिं प्रल्हादोज्ञानिनांश्रेष्ठःपालयन्राज्यमुत्तम
म् एकाकीचतदुत्संगेप्रियंवचनमब्रवीत् प्रल्हादउवाच नमस्तेभगवन्विष्णोनृसिंहरूपिणेनमः त्वद्भक्तोहंसुरेशैकंत्वांपृच्छामितुतत्वतः

स्वामिन्त्वयिममाभिन्नाभक्तिर्जातात्वनेकधा कथंचतेप्रियोजातः कारणंमेवदप्रभो नृसिंहउवाच कथयामिमहाप्राज्ञशृणुष्वैकाग्रमानसः भक्तेर्यत्कारणंवत्सप्रियत्वस्यचकारणम् पुराकालेह्यभूद्विप्रः किंचित्त्वंनाप्यधीतवान् नाम्नात्वंवासुदेवोहिवेश्यासंसक्तमानसः तस्मिन्जातु नचैवत्वंचकर्थसुव्रतंकियत् कृतवान्मद्व्रतंचैकंवेश्यासंगतिलालसः मद्व्रतस्यप्रभावेनभक्तिर्जातातवानघ प्रह्लादउवाच श्रीन्नृसिंहोच्यतांनावत्सकस्यपुत्रस्यकिंव्रतम् वेश्यायांवर्तमानेनकथंतच्चकृतंमया येनत्वत्प्रीतिमापन्नोवक्तुमर्हसिसांप्रतम् नृसिंहउवाच पुरावतीपुरे ह्यासीद्ब्राह्मणोवेदपारगः तस्यनामसुशर्मेतिबहुलोकेषुविश्रुतम् नित्यहोमक्रियांनैवविदधातिद्विजोत्तमः ब्रह्मक्रियासुनियतःसर्वासुकिलनतत्परः अग्निष्टोमादिभिर्यज्ञैरिष्टाःसर्वेसुरोत्तमाः तस्यभार्यासुशीलाभूद्विख्याताभुवनत्रये पतिव्रतासदाचारापतिभक्तिपरायणा जज्ञिरेस्यांसुताःपंचतस्माद्द्विजवरात्तथा सदाचारेषुविद्वांसःपितृभक्तिपरायणाः तेषांमध्येकनिष्ठस्त्वंवेश्यासंगतितत्परः तथापिविद्यमानेनसुरापानंसुपातकम् सौवर्णंचाप्यपहृतंचोरैःसार्द्धंत्वयाबहु विलासिन्यासमंचैवत्वयाचीर्णमघंबहु एकदातद्गृहेचासीन्महान्कलिस्त्वयासह तेनकलहभावेनव्रतमेतत्त्वयाकृतम् अज्ञानान्मद्व्रतंजातंव्रतानामुत्तमंहितत् तस्यांविहारायोगेनरात्रौजागरणंकृतम् वेश्यायाचावल्लभःकिंचित्प्रजातंनत्वयासह रात्रौजागरणंचीर्णंत्यक्तंभोज्यमनेकधा व्रतेनानेनचीर्णेनमोदंतिदिविदेवताः

सृष्ट्यर्थंचपुराब्रह्माचक्रेह्येतदनुत्तमम् मद्व्रतस्यप्रभावेननिर्मितंसचराचरम् ईश्वरेणपुराचीर्णंवधार्थंत्रिपुरस्यच महाप्राज्ञेनविहितंव्रतमेतन्महाफलं एतद्व्रतप्रभावेनसर्वेसिद्धिमुपागताः वेश्यापिमत्प्रियाजातात्रैलोक्येसुखचारिणी ईदृशंमद्व्रतंवत्सत्रैलोक्येषुसुविश्रुतम् कलहेनविलासिन्याव्रतमेतदुपस्थितम् प्रह्लादतेनतेभक्तिर्मयिजाताह्यनुत्तमा धूर्तयाचविलासिन्याज्ञात्वाव्रतमिदंमहत् कलहश्चकृतोयेनमद्व्रतंयत्कृतंभवेत् सावेश्यातुवराजाताभुक्त्वाभोगाननेकशः मुक्ताकर्मविलीनातुत्वंप्रह्लादविशस्वमां कार्यार्थेचभवानास्तेमच्छरीरपृथक्तया विधायसर्वकार्याणिशीघ्रंचैवगमिष्यसि यइदंव्रतमावश्यंप्रकरिष्यंतिमानवाः नतेषांपुनरावृत्तिरतःकल्पशतैरपि अपुत्रोलभतेपुत्रंधनकामोधनंतथा ज्ञानीचममभक्तश्चदिव्यंसौख्यंलभेन्नरः स्त्रियोवापुरुषाश्चापिकुर्वंतिव्रतमुत्त

मं तेभ्योददाम्यहंसौख्यंभुक्तिमुक्तिसमन्वितं बहुनोक्तेनकिंवत्सव्रतस्यफलमुत्तमम् प्रह्लादउवाच व्रतस्यास्यफलंसाधुत्वयिमेभक्ति
कारणम् स्वामिन्जातंविशेषेणत्वत्तःपापनिकृंतनम् अधुनाश्रोतुमिच्छामिव्रतस्यास्यविधिंपरम् कस्मिन्मासेभवेदेतत्कस्मिन्वातिथिवासरे
एतद्विस्तरतोदेववक्तुमर्हसिसांप्रतम् विधिनायेनवैस्वामिन्समग्रफलभुग्भवेत् ममोपरिकृपांकृत्वाब्रूहित्वंसकलंप्रभो नृसिंहउवाच
साधुसाधुमहाभागव्रतस्यास्यविधिंपरम् सर्वंकथयतोमेद्यत्वमेकाग्रमनाःशृणु वैशाखशुक्लपक्षेतुचतुर्दश्यांसमाचरेत् मज्जन्मसंभ
वंपुण्यंव्रतंपापप्रणाशनम् वर्षेवर्षेतुकर्तव्यंममसंतुष्टिकारकं महापुण्यमिदंश्रेष्ठंमानुषैर्भवभीरुभिः तेनैवक्रियमाणेनसहस्रद्वादशी
फलं जायतेमद्व्रताद्धिमानुषाणांमहात्मनां स्वातीनक्षत्रयोगेचशनिवासरसंयुते सिद्धियोगस्ययोगेचवणिजेकरणेतथा पुण्यसौ
भाग्ययोगेनलभ्यतेदैवयोगतः सर्वैरेतैस्तुसंयुक्तंहत्याकोटिविनाशनम् केवलेपिचकर्तव्यंमद्दिनेव्रतमुत्तमम् अन्यथानरकंयातिया
वच्चंद्रदिवाकरौ यथायथाप्रवृत्तिःस्यात्पातकस्यकलौयुगे तथातथाप्रणश्यंतिसर्वेधर्मानसंशयः एतद्व्रतप्रभावेनमद्भक्तिःस्याद्दुरा
त्मनां विचार्येत्थंप्रकर्तव्यंमाधवेमासितद्व्रतं निश्चयश्चप्रकर्तव्योदंतधावनपूर्वकम् श्रीनृसिंहदयांकृत्वामहाविष्णोममोपरि अद्या
हंतेविधास्यामिव्रतंनिर्विघ्नतांनय इतिनियममंत्रः व्रतस्थेननकर्तव्यासंगतिःपापिभिःसह मिथ्यालापोनकर्तव्यःसमग्रफलकां
क्षिभिः स्त्रीभिर्दुष्टैश्चआलापान्व्रतस्थोनैवकारयेत् स्मर्तव्यंचमहारूपंमद्दिनेसकलंशुभे ततोमध्यान्हवेलायांनद्यादौविमलेज
ले गृहेवादेवखातेवातडागेविमलेजले वैदिकेनचमंत्रेणस्नानंकुर्याद्विचक्षणः मृत्तिकागोमयेनैवतथाधात्रीफलेनच तिलैश्चसर्वपापघ्नैःस्नानंकार्यंमहात्मभिःपरि -
धायशुचिर्वासोनित्यकर्मसमाचरेत् ततोगृहंसमागत्यस्मरन्मांभक्तियोगतः गोमयेनप्रलिप्याथकुर्यादष्टदलंशुभम् कलशंत
त्रसंस्थाप्यताम्रंरत्नसमन्वितम् तस्योपरिन्यसेत्पात्रंवंशजंव्रीहिपूरितं हैमीतत्रचमन्मूर्तिःस्थाप्यालक्ष्म्यास्तथैवच पलेनवातद
र्धेनतदर्धार्धेनवापुनः यथाशक्त्यथवाकार्यावित्तशाठ्यविवर्जितैः पंचामृतेनसंस्नाप्यपूजनंतुसमाचरेत् ततोब्राह्मणमाहूयतमा
चार्यमलोलुपम् सदाचारसमायुक्तंशांतंदांतंजितेंद्रियम् तेनैवकारयेत्पूजांदृष्ट्वाशास्त्रानुसारतः आचार्यवचनाद्धीमान्पूजांकुर्या

यथाविधि मंडपंकारयेत्तत्रपुष्पस्तबकशोभितम् ऋतुकालोद्भवैःपुष्पैःपूजयेत्स्वस्थमानसः उपचारैःषोडशभिर्मंत्रैर्वेदोद्भवैस्तथा ततः पौराणिकैर्मंत्रैःपूजनीयोयथाविधि चंदनंशीतलंदिव्यंकस्तूरीकुंकुमंतथा ददामितवतुष्ट्यर्थंनृसिंहपरमेश्वर कालोद्भवानिपुष्पाणितुलस्यादीनिवैप्रभो सम्यक्गृहाणदेवेशलक्ष्म्यासहनमोस्तुते पुष्पाणि कृष्णागरुमयंधूपंश्रीनृसिंहजगत्पते तवतुष्ट्यैप्रदास्यामिसर्वदेवनमोस्तुते धूपं सर्वतेजोद्भवंतेजस्तस्माद्दीपंददामिते श्रीनृसिंहमहाबाहोतिमिरंमेविनाशय दीपं नैवेद्यंगृह्यतांदेवभक्ष्यभोज्यसमन्वितम् ददामितेरमाकांतसर्वपापक्षयंकुरु नैवेद्यं पीतांबरमहाबाहोप्रल्हादभयनाशन तथाभूतेनार्चनेनयथोक्तफलदोभव इतिप्रार्थना रात्रौजागरणंकुर्याद्गीतवादित्रनिःस्वनैः पुराणश्रवणाद्यैश्चश्रोतव्याश्चकथाःशुभाः ततःप्रभातसमयेस्नानंकृत्वाजितेंद्रियः पूर्वोक्तेनविधानेनपूजयेन्मांप्रयत्नतः वैष्णवान्प्रजपेन्मंत्रान्मदग्रेस्वस्थमानसः ततोदानानिदेयानिवक्ष्यमाणानिचानघ पात्रेभ्यस्तुद्विजेभ्योहिलोकदर्पजिगीषया सिंहःस्वर्णमयोदेवोममसंतोषकारकः गोभूतिलहिरण्यानिदेयानिचफलेप्सुभिः शय्यासतूलिकादेया सप्तधान्यसमन्विता अन्यानिचयथाशक्त्यादेयानिममतुष्टये वित्तशाठ्यंनकुर्वीतयथोक्तफलकांक्षया ब्राह्मणान्भोजयेत्पश्चात्तेभ्यो दद्याच्चदक्षिणां निर्धनेनापिकर्तव्यंदेयंशक्त्यनुसारतः सर्वेषामेववर्णानामधिकारोस्तिमद्व्रते मद्भक्तैस्तुविशेषेणकर्तव्यंमत्परायणैः तद्वंशेनभवेद्दुःखंनदोषोमत्प्रसादतः मांसमुद्धरदेवेशदुस्तराद्भवसागरात् पातकार्णवमग्नस्यव्याधिदुःखांबुवासिभिः जीवैस्तुपरिभूतस्यमोहदुःखगतस्यमे करावलंबनंदेहिशेषशायिन्जगत्पते श्रीनृसिंहरमाकांतभक्तानांभयनाशन क्षीरांबुनिधिवासिन्त्वंचक्रपाणे जनार्दन व्रतेनानेनदेवेशभुक्तिमुक्तिप्रदोभव एवंप्रार्थ्यततोदेवंविसृज्यचयथाविधि उपहारादिकंसर्वमाचार्यायनिवेदयेत् दक्षिणाभिस्तुसंतोष्यब्राह्मणांस्तुविसर्जयेत् मध्यान्हेतुसुसंयत्तेभुंजीतसहबंधुभिः यइदंशृणुयाद्भक्त्याव्रतंपापप्रणाशनं यस्यस्मरणमात्रेणब्रह्महत्याव्यपोहति पवित्रंपरमंगुह्यंकीर्तयेद्यस्तुमानवः सर्वान्कामानवाप्नोतिव्रतस्यचफलंलभेत् इतिहेमाद्रौब्रह्मपुराणेनृसिंहचतुर्दशीव्रतकथासमाप्ता अथअनंतचतुर्दशीव्रतम् सापराकार्यापूजनकालव्यापित्वात् तथाच अनंतंपूजयेद्यस्तुप्रातःका

लेसमाहितः अनंताल्लभतेसिद्धिंचक्रपाणेःप्रसादतः इतिब्रह्मपुराणात् तदभावेपूर्वा उभयंदिनेसूर्योदयव्यापित्वेपिपूर्णाशुक्लत्वेपिपरैवग्राह्या भाद्रेसितेचतुर्दश्यामनंतंपूजयेत्सुधीः ह्रासेनसर्वकर्माणिप्रातरेवहिपूजनम् शुक्लभाद्रपदस्यापिअनंताख्याचतुर्दशी उदयव्यापिनीग्राह्याघटिकैकापियाभवेत् इतिहेमाद्रिः तस्मात्परैवेतिसर्वसंमतं अथअनंतपूजाविधिः प्रातर्नद्यादिकेस्नात्वानित्यकर्मसमाप्यच अनंतंहृदयेकृत्वाशुचिस्तत्रसमाहितः अव्रणंकलशंचैववस्त्रयुग्मेनवेष्टितम् मुष्टिमात्रेणदर्भैस्तुफणिराजंचकारयेत् स्थापयेत्कलशस्याग्रेजगदाधारमव्ययम् आराधयेदनंतंचतस्मिन्कुंभेविशेषतः गोचर्ममात्रमालिप्यगोमयेनविचक्षणः तन्मध्येस्थंडिलंकृत्वापद्ममष्टदलंलिखेत् तस्योपरिन्यसेत्कुंभंचूतपल्लवसंयुतम् प्राणायामंततःकृत्वातिथ्यादिपरिकल्पयेत् ममसकुटुंबस्यक्षेमस्थैर्यायुरारोग्यचतुर्विधपुरुषार्थसिद्ध्यर्थंममआचरितस्यआचीर्यमाणस्यव्रतस्यसंपूर्णफलप्राप्त्यर्थंश्रीमदनंतपूजनमहंकरिष्ये तथाचासनादिकलशाराधनंकरिष्ये कलशस्य॰ सर्वेसमुद्रा॰ सितासिते॰ कलशेवरुणंसंपूज्य ततोशंखंघंटांचपूजयेत् अपवित्रः॰प॰ पूजाद्रव्याणिआत्मानंचप्रोक्ष्य यमुनांपूजयेत् श्रीमदनंतव्रतांगत्वेनश्रीयमुनापूजनंकरिष्ये तद्यथा लोकपालस्तुतांदेवीमिंद्रनीलसमुद्भवाम् यमुनेत्वामहंध्यायेसर्वकामार्थसिद्धये ध्यानं सरस्वतिनमस्तुभ्यंसर्वकामप्रदायिनि आगच्छदेवियमुनेव्रतसंपूर्णहेतवे इमंमेगंगे इत्यावाह्य सिंहासनेसमारूढेदेवशक्तिसमन्विते सर्वलक्षणसंपूर्णेयमुनायैनमोस्तुते आसनं रुद्रपादेनमस्तुभ्यंसर्वलोकहितप्रिये सर्वपापप्रशमनितरंगिण्यैनमोस्तुते पाद्यं गरुडपादेनमस्तुभ्यंशंकरप्रियभामिनि सर्वकामप्रदेदेवियमुनेतेनमोनमः अर्घ्यं विष्णुपादोद्भवेदेविसर्वाभरणभूषिते कृष्णामूर्त्तेमहादेविकृष्णावेण्यैनमोनमः आचमनं सर्वपापहरेदेविविश्वस्यप्रियदर्शिनि सौभाग्यंयमुनेदेहियमुनायैनमोस्तुते मधुपर्कं नंदिपादेमहादेविशंकरार्धशरीरिणि सर्वलोकहितेदेविभीमरथ्यैनमोस्तुते पंचामृतस्नानं सिंहपादोत्तमेदेविनारसिंहसमप्रभे सर्वलक्षणसंपूर्णेभवनाशिनितेनमः शुद्धोदकस्नानं॰ विष्णुपादाब्जसंभूतेगंगेत्रिपथगामिनि सर्वपापहरेदेविभागीरथ्यैनमोस्तुते श्वेतवस्त्रं त्र्यंबकस्यजटोद्भूतेगौतमस्याघनाशिनि सप्तधासागरंयांतिगोदावरि

नमोस्तुते कंचुकीं माणिक्यमुक्तावलिकौस्तुभांश्च गोमेदवैडूर्यसुपुष्परागैः वज्रैश्चनीलैश्चसुशोभितानि गृहाणसर्वाभरणानिदेवि आभरणानि . चंदनागरुकस्तूरीरोचनंकुंकुमंतथा कर्पूरेणसमायुक्तंगंधंदद्मिचभक्तितः गंधं श्वेतांश्चचंद्रवर्णाभान्हरिद्रारागरंजितान् अक्षतांश्चसुरश्रेष्ठेददामियमुनेशुभे अक्षतान् मंदारमालतीजातीकेतकीपाटलैःशुभैः पूजयामिच देवेशि यमुने भक्तवत्सले पुष्पाणि अथांगपूजा चंचलायै० पादौपू० चपलायै० जानुनीपू० भक्तवत्सलायै० कटीपू० हरायै० नाभिंपू० मन्मथवासिन्यै० गुह्यंपू० अज्ञाननाशिन्यै० हृदयंपू० भद्रायै० स्तनौपू० अघहंत्र्यै० भुजौपू० रक्तकंठ्यै० कंठंपू० भवहृत्यै० मुखं० गौर्यै० नेत्रेपू० भागीरथ्यै० ललाटंपू० यमुनायै० शिरःपूज० सरस्वत्यै० सर्वांगंपू० अथनामपूजा यमुनायै० सितायै० कमलायै० उत्पलायै० अभीष्टप्रदायै० धात्र्यै० हरिहररूपिण्यै० गंगायै० नर्मदायै० गौर्यै० भागीरथ्यै० तुंगायै० भद्रायै० कृष्णावेण्यै० भवनाशिन्यै० सरस्वत्यै० कावेर्यैनमः सिंधवे० गौतम्यै० गोमत्यै० गायत्र्यै० गरुडायै० गिरिजायै० चंद्रचूडायै० सर्वेश्वर्यै० महालक्ष्म्यैनमः सर्वपापहरेदेविसर्वोपद्रवनाशिनि सर्वसंपत्प्रदेदेवियमुनायैनमोस्तुते इतिनामपूजा दशांगगुग्गुलोद्भूतश्चंदनागरुसंयुतः कपिलाघृतसंयुक्तोधूपोयंप्रतिगृह्यताम् धूपं· घृतवर्तिसमायुक्तंवन्हिनायोजितंमया गृहाणदीपकंदेविसर्वैश्वर्यप्रदायिनि दीपं· शर्करामधुसंयुक्तदधिक्षीरंचसर्पिषा पक्वमन्नंमयादत्तंनैवेद्यंप्रतिगृह्यतां नैवेद्यं पानीयंपावनंश्रेष्ठंगंगादिसरिदुद्भवम् हस्तप्रक्षालनंदेविगृहाणमुखशोधनम् हस्तप्रक्षालनं· मुखप्रक्षालनं· कर्पूरेणसमायुक्तंयमुनेचारुचंदनम् समर्पितंमयातुभ्यंकरोद्वर्तनकंकुरु करोद्वर्तनार्थे चंदनं इदंफलमितिफलम् पूगीफलमितितांबूलं हिरण्यगर्भेतिदक्षिणां· त्रैलोक्यपावनेगंगेअंधकारविनाशिनि पंचार्तिक्यंगृहाणेदंविश्वप्रीत्यैनमोस्तुते आर्तिक्यं· केतकीजातिकुसुमैर्मल्लिकामालतीभवैः पुष्पांजलिर्मयादत्तस्तवप्रीत्यैनमोस्तुते पुष्पांजलिः यानिकानिचेतिप्रदक्षिणां· अन्यथाशरणंनास्तीतिनमस्कारं सुरासुरेंद्रादिकिरीटमौक्तिकैर्युक्तंसदायत्तवपादपंकजम् परावरंपातुवरंसुमंगलंनमामिभक्त्यातवकामसिद्धये भवानिचमहालक्ष्मीसर्वकामप्रदायिनि व्रतंसंपूर्णतांयातुयमुनायैनमोस्तुते इतिप्रार्थनां

इतियमुनापूजासमाप्ता अथानंतपूजा ततस्तुमूलमंत्रेणनमस्कृत्यजनार्दनं नवाम्रपल्लवाभासंपिंगभ्रूश्मश्रुलोचनं पीतांबरधरंदेवं
शंखचक्रगदाधरम् अलंकृतंसमुद्रस्थंविश्वरूपंविचिंतये ध्यायामि आगच्छानंतदेवेशतेजोराशेजगत्पते इमांमयाकृतांपूजांगृह्ण
णपुरुषोत्तम सहस्रशीर्षेत्यावाहनं· विष्टरंधेहिगोविंदगोवर्धनधरप्रभो अनंतदीयतेयन्मेरत्नसिंहासनेविश पुरुषएवेदमित्यासनं
यथात्वंसर्वदेवानामिंद्रादीनांचरक्षसि तथामांपालयानंतत्वदंघ्रिशरणागतम् एतावानस्येतिपाद्यं· अनंतानंतदेवेशअनंतफलदायक
अनंतानंतरूपोसिगृहाणार्घ्यंनमोस्तुते त्रिपादूर्ध्वइत्यर्घ्यं गंगोदकंसमानीतंहेमकुंभेनयोजितम् आचम्यतांहृषीकेशप्रसीदपुरु
षोत्तम तस्माद्विराळेत्याचमनीयं· अनंतगुणरूपायविश्वरूपधरायच नमोमहात्म्यदेवायअनंतायनमोनमः यत्पुरुषेणेतिस्नानं· त
तः·पंचामृतस्नानं· सुरभेस्तुसमुत्पन्नंदेवानामपिदुर्लभम् पयोददामिदेवेशस्नानार्थंप्रतिगृह्यताम् आप्यायस्वेतिपयस्नानं· चंद्रमंडल
संकाशंसर्वदेवप्रियंहियत् ददामिदधिदेवेशस्नानार्थंप्रतिगृह्यताम् दधिक्राव्णोअकारिषमितिदधिस्नानं आज्यंसुराणामाहारआ-
ज्यंयज्ञेप्रतिष्ठितम् आज्यंपवित्रंपरमंस्नानार्थंप्र॰ घृतंमिमिक्षेइतिघृतस्नानं· सर्वौषधिसमुत्पन्नंपीयूषसदृशंमधु स्नानायतेमयादत्तं
गृहाणपरमेश्वर मधुवातेतिमधु इक्षुदंडात्समुद्भूतांशर्करांमधुरांशुभां स्नानायतेमयादत्तांगृहाणपरमेश्वर स्वादुःपरस्वेतिशर्करा-
स्नानं शुद्धोदकस्नानं नाममंत्रैःपूजयेत् पुरुषसूक्तेनअभिषेकः तप्तकांचनवर्णाभंकौशेयंचसुनिर्मितम् वस्त्रंगृहाणदेवेशलक्ष्मीयु
क्तनमोस्तुते तंयज्ञमितिवस्त्रं· वस्त्रानंतरंआचमनीयं· दामोदरनमस्तेस्तुत्राहिमांभवसागरात् ब्रह्मसूत्रंसोत्तरीयंगृहाणपुरुषोत्तम
यज्ञोपवीतंपरमंप॰ तस्माद्यज्ञादित्युपवीतं· उपवीतानंतरंआचमनीयं· श्रीखंडंचंदनंदिव्यं॰ तस्माद्यज्ञात्सर्वहुतऋच॰ इतिचंदनं·अ
क्षताश्चसुरश्रेष्ठा॰ अलंकारार्थेअक्षतान् माल्यादीनिसुगंधीनि॰ तस्मादश्वेतिपुष्पं॰ अथग्रंथिपूजा श्रियैनमः मोहिन्यै॰पद्मि
न्यै॰महाबलायै॰अजायै॰मंगलायै॰वरदायै॰शुभायै॰जयायै॰विजयायै॰जयंत्यै॰पापनाशिन्यै॰विश्वरूपायै॰सर्वमंगलायै॰ इतिग्रं
थिपूजा अथांगपूजा मत्स्याय॰पादौपू॰कूर्माय॰गुल्फौपू॰वराहाय॰जानुनीपू॰नारसिंहाय॰ऊरूपू॰वामनाय॰कटीपू॰रामाय॰

उदरं॰ श्रीरामाय॰ हृदयंपू॰ कृष्णाय॰ मुखंपू॰ सहस्रशिरसेन॰ शिरःपू॰ श्रीमदनंताय॰ सर्वांगंपू॰ अथावरणपूजा अनंतस्यदक्षिणपार्श्वे रमायै॰ वामपार्श्वे भूम्यैनमः इतिप्रथमावरणं १ आवरणदेवतामावाह्य हस्तंप्रक्षाल्य गंधपुष्पंतर्जनीमध्यमांगुष्ठैर्धृत्वामध्येशंखोदकंगृहीत्वामंत्रांतेशंखोदकंभूमौनिक्षिप्यपुष्पंदेवोपरिनिक्षिपेत् दयाब्धेत्राहिसंसारसर्पान्मांशरणागतम् भक्त्यासमर्पयेतुभ्यंप्रथमावरणार्चनं इतिमंत्रमुच्चार्यजलंत्यक्त्वापुष्पंदेवोपरिन्यसेत् इतिपूर्वादिक्रमेण वृद्धोल्काय॰ महोल्काय॰ शतोल्काय॰ सहस्रोल्काय॰ दयाब्धेत्राहिसं॰ द्वितीयावरणं २ तथैव वासुदेवाय॰ संकर्षणाय॰ प्रद्युम्नाय॰ अनिरुद्धाय॰ दयाब्धेत्राहिसंसार॰ तृतीयावरणं ३ प्राच्यां केशवाय॰ नारायणाय॰ माधवाय॰ गोविंदाय॰ विष्णवेनं॰ मधुसूदनाय॰ त्रिविक्रमाय॰ वामनाय॰ श्रीधराय॰ हृषीकेशाय॰ पद्मनाभाय॰ दामोदराय॰ दयाब्धेत्राहि॰ चतुर्थावरणं॰ ४ पूर्वादिक्रमेण मत्स्याय॰ कूर्माय॰ वराहाय॰ नारसिंहाय॰ वामनाय॰ रामाय॰ श्रीरामाय॰ कृष्णाय॰ बौद्धाय॰ कल्किनेन॰ अनंताय॰ विश्वरूपिणेन॰ दयाब्धेत्राहि॰ पंचमावरणार्चनं ५ पूर्वादिक्रमेण अनंताय॰ दक्षिणास्यां ब्रह्मणे॰ पश्चिमायां॰ वायवे॰ उत्तरायां॰ ईशानाय॰ आग्नेय्यां॰ वारुण्यै॰ नैर्ऋत्यां॰ गायत्र्यै॰ वायव्यां भारत्यै॰ ईशान्यां॰ गिरिजायै॰ अग्रे गरुडाय॰ वामे सुपुण्याय॰ दक्षि॰ दयाब्धेत्राहि॰ षष्ठावरणं ६ पूर्वादिक्रमेण इंद्राय॰ अग्नये॰ यमाय॰ निर्ऋतये॰ वरुणाय॰ वायवे॰ सोमाय॰ ईशाना॰ दयाब्धेत्राहिसं॰ सप्तमावरणं ७ आग्नेय्यां शेषाय॰ नैर्ऋत्यां॰ विष्णवेनमः वायव्यां॰ विधये॰ ईशान्यां॰ प्रजापतये॰ दयाब्धेत्राहिसं॰ अष्टमावरणं ८ आग्नेय्यां गणपतये॰ नैर्ऋत्यां॰ सप्तमातृभ्यो॰ वायव्यां॰ दुर्गायै॰ ईशान्यां॰ क्षेत्राधिपतये॰ दयाब्धेत्राहि॰ नवमावरणं ९ मध्ये॰ ब्रह्मणेनमः भास्कराय॰ शेषाय॰ सर्वव्यापिने॰ ईश्वराय॰ विश्वरूपा॰ महाकामा॰ सृष्टिकर्त्रे॰ कृष्णाय॰ हरये॰ शिवाय॰ स्थितिकारका॰ अंतकाय॰ दयाब्धेत्राहि॰ दशमावरणं १० शौरये॰ वैकुंठाय॰ महाबलाय॰ पुरुषोत्तमाय॰ अजाय॰ पद्मनाभाय॰ मंगलाय॰ हृषीकेशाय॰ वरदाय॰ माधवाय॰ मधुसूदनाय॰ अच्युताय॰ अनंताय॰ गोविंदाय॰ विजयाय॰ अपराजिताय॰ कृष्णाय॰ दयाब्धेत्राहिसं॰ एकादशावरणं ११ अनंताय॰ कपिलाय॰ शेषाय॰ संकर्षणाय॰ हलायुधाय॰ तारकाय॰ सीरपा

पाये॰ बलभद्राय॰ दयाब्धेत्राहिसं॰ द्वादशावरणं १२ क्षीराब्धिशायिने॰ अच्युताय॰ भूम्याधाराय॰ लोकनाथाय॰ फणामणिविभूषणाय॰
सहस्त्रमूर्ध्नेन॰ सहस्त्रार्चिषेन॰ दयाब्धेत्राहि॰त्रयोदशावरणम् १३ केशवादिचतुर्विंशतिनामभिः दयाब्धेत्राहि॰ इतिचतुर्दशावरणम् १४
अथपत्रपूजा   कृष्णाय॰ पलाशपत्रंस॰ विष्णवेन॰ औदुंबरप॰ हरये॰ अश्वत्थपत्रं॰ शंभवेन॰ भृंगराजपत्रं॰ ब्रह्मणेनमः जटाधरप॰ भास्क
राय॰ अशोकप॰ शेषाय॰ कपित्थपत्रं॰ सर्वव्यापिने॰ वटपत्रं॰ ईश्वराय॰ आम्रपत्रं॰ विश्वरूपिणेन॰ कदलीपत्रं॰ महाकायाय॰ अपामार्गप॰
सृष्टिकर्त्रे॰ करवीरपत्रं॰ स्थितिकर्त्रे॰ पुन्नागप॰ अनंताय॰ नागवल्लीपत्रं॰ १४ अथपुष्पपूजा   ॐ अनंताय॰ पद्मपुष्पं॰ विष्णवेन॰ जाती
पुष्पं॰ केशवाय॰ चंपकपुष्पं॰ अव्ययाय॰ कल्हारपुष्पं॰ सहस्त्रजिते॰ केतकीपुष्पं॰ अनंतरूपिणेन॰ बकुलपुष्पं॰ इष्टाय॰ शतपुष्पं॰ विशिष्टा
य॰ पुन्नागपुष्पं॰ शिष्टेष्टाय॰ करवीरपुष्पं॰ शिखंडिने॰ धत्तूरपुष्पं॰ नहुषाय॰ कुंदपुष्पं॰ विश्वबाहवे॰ मल्लिकापुष्पं॰ महीधराय॰ मालतीपु॰
अच्युताय॰ कर्णिकापुष्पं॰ १४ अथाष्टोत्तरशतनामभिःपूजयेत् अनंताय॰ अच्युताय॰ अद्भुतकर्मणेन॰ अमितविक्रमाय॰ अपराजि
ताय॰ अखंडाय॰ अग्निनेत्राय॰ अग्निवपुषेन॰ अदृश्याय॰ अत्रिपुत्राय॰ १॰ अनुकूलाय॰ अनाशिने॰ अनघाय॰ अप्कानिलयाय॰ अह
रहाय॰ अष्टमूर्तये॰ अनिरुद्धाय॰ अनिर्विष्टाय॰ अचंचलाय॰ अब्दादिका॰ २॰ अचलरूपाय॰ अखिलधराय॰ अव्यक्ताय॰ अनुरूपाय॰
अभयंकराय॰ अक्षताय॰ अवपुषे॰ अयोनिजाय॰ अरविंदाक्षाय॰ अशनवर्जिताय॰ अधोक्षजाय॰ ३१ अदितिपुत्राय॰ अंबिकापतिपूर्व
जाय॰ अपस्मारनाशिनेन॰ अव्ययाय॰ अनादिने॰ अप्रमेयाय॰ अघशत्रवे॰ अमरारिघ्नाय॰ अनीश्वराय॰ अजाय॰ ४१ अघोराय॰ अ
नादिनिधनाय॰ अमरप्रभवे॰ अग्राह्याय॰ अक्रूराय॰ अनुत्तमाय॰ अरूपाय॰ अन्हेन॰ अमोघाधिपतये॰ अजाय॰ ५१ अक्षमाय॰ अमृ
ताय॰ अघोरवीर्याय॰ अव्यंगाय॰ अविघ्नाय॰ अतींद्रियाय॰ अमिततेजसे॰ अमितये॰ अष्टमूर्तये॰ अनिलाय॰ अवशाय॰ अणोरणीय
सेनमः अशोकाय॰ अरविंदाय॰ अधिष्ठात्रे॰ अमितनयनाय॰ अरण्यवासिने॰ अप्रमत्ताय॰ अनंतरूपाय॰ अनलाय॰ अनिमिषाय॰
अस्त्ररूपाय॰ अग्रगण्याय॰ अप्रमिताय॰ अंतकाय॰ अचिंत्याय॰ अपांनिधये॰ अतिस्कंदराय॰ अमरप्रियाय॰ अष्टसिद्धिप्रदाय॰ ८१ अर

विंदप्रियाय॰ अरविंदोद्भवाय॰ अनयाय॰ अर्थाय॰ अक्षोभ्याय॰ अर्चिष्मतेन॰ अनेकमूर्तये॰ अनंतब्रह्मांडपतये॰ अनंतशयनाय॰ अमराधि
पतये॰ अनाधाराय॰ अनंतनाम्ने॰ अनंतश्रिये॰ अक्षराय॰ अमाय॰ आश्रमस्थाय॰ आश्रमातीताय॰ अन्नादाय॰ आत्मयोनये॰ अवनीपत
ये॰ अवनीधराय॰ अनादिने॰ आदित्याय॰ अमृताय॰ अपवर्गप्रदाय॰ अनंताय॰ १०८ इत्यष्टोत्तरशतनामपूजा दशांगंगुग्गुलोद्भूतं
चंदनागरुसंयुतं सर्वेषामुत्तमंधूपंगृहाणसुरपूजित यत्पुरुषमितिधूपं॰ धूपं॰ साज्यंचवर्तिसंयुक्तंवन्हिनायोजितंमया दीपंगृहाणदेवे
शत्रैलोक्यतिमिरापहन् ब्राह्मणोस्येतिदीपं॰ अन्नंचतुर्विधंस्वादुपयोदधिघृतंतथा नानाव्यंजनशोभाढ्यंनैवेद्यंप्रतिगृह्यतां चंद्रमाम
नस॰ इतिनैवेद्यं नैवेद्यमध्येपानीयं॰ उत्तरापोशनार्थंतदद्मितोयंसुवासितं गृहाणसुमुखोभूत्वाअनंतायनमोनमः उत्तरापोशनंमु
खप्रक्षालनं॰ हस्तप्रक्षालनं॰ करोद्वर्तनकंदेवमयादत्तंहिभक्तितः चारुचंद्रप्रभंदिव्यंगृहाणजगदीश्वर करोद्वर्तनं॰ इदंफलंमयादेवस्था
पितंपुर तस्तव तेनमेसफलावाप्तिर्भवेज्जन्मनिजन्मनि नारिकेलफलं॰ पूगीफलंमहद्दिव्यंनागवल्यादलैर्युतं कर्पूरेणसमायुक्तंतांबू
लंप्रतिगृह्यताम् तांबूलं॰ हिरण्यगर्भेतिदक्षिणां॰ यानिकानीति॰ नाभ्याआसी॰ प्रद॰ नमस्तेभगवन्भूयोनमस्तेधरणीधर नमस्तेसर्व
नागेंद्रनमस्तेमधुसूदन सप्तास्येतिनमस्कारं॰ नमस्तेदेवदेवेशनमस्तेगरुडध्वज नमस्तेकमलाकांतअनंतायनमोनमः यज्ञेनयज्ञमि
मितिमंत्रपुष्पं॰ अथदोरकप्रार्थना अनंतायनमस्तुभ्यंसहस्रशिरसेनमः नमोस्तुपद्मनाभायनागानांपतयेनमः अनंतःकामदःश्रीमा
न्ननंतोमेप्रयच्छतु अनंतदोररूपेणपुत्रपौत्रान्प्रवर्द्धतु इतिदोरकं अथदोरकबंधनमंत्रः अनंतसंसारमहासमुद्रमग्नंसमभ्युद्धरवासु
देव अनंतरूपेविनियोजयस्वह्यनंतसूत्रायनमोनमस्ते इतिबध्वा अथजीर्णदोरकविसर्जनमंत्रः नमःसर्वहितार्थायजगदानंदकार
क जीर्णदोरममुंदेवविसृज्येहंत्वदाज्ञया इतिविसृजेत् अथवायनमंत्रः गृहाणेदंद्विजश्रेष्ठवायनंदक्षिणायुतं त्वत्प्रसादादहंदेवमु-
च्येयंकर्मबंधनात् प्रतिगृण्हद्विजश्रेष्ठ अनंतफलदायक पक्वान्नफलसंयुक्तंदक्षिणाघृतसंयुतं अथजीर्णदोरकदानमंत्रः अनंतःप्रति
गृण्हाति अनंतोवैददातिच अनंतस्तारकोभाभ्यामनंतायनमोनमः इतिदद्यात् ततःयथाशक्तिब्राह्मणान्भोजयेत् अनेनकृतपूजने

नश्रीमदनंतःप्रीयतां इतिपूजाविधिः अथकथा सूतउवाच पुरातुजान्हवीतीरे धर्मोधर्मपराक्रमः जरासंधवधार्थायराजसूयमुपा
क्रमत् कृष्णेनसहधर्मोसौभीमार्जुनसमन्वितः यज्ञशालांमकुर्वीतमहेंद्रालयसन्निभां यज्ञार्थान्भूपतीन्सर्वान्समानीयप्रयत्नतः गांधा
रीतनयोराजाएकदानृपनंदनः दुर्योधनइतिख्यातःसमागत्यमखालयम् दृष्ट्वादुर्योधनेनात्रप्रांगणंजलसन्निभम् ऊर्ध्वंकृत्वातुवस्त्राणित
त्रगच्छन्शनैःशनैः स्मितवक्त्राश्चताःसर्वाद्रौपद्यादिवरांगनाः दुर्योधनस्ततोगच्छन्जलमध्येपपातह पुनःसर्वेनृपाश्चैवऋषयश्चतपोधनाः
उपहासंचचक्रुस्ताद्रौपद्यादिकलोचनाः महाराजाधिराजासौमहान्क्रोधपरायणः विनिर्गत्यस्वकंराष्ट्रंमातुलेनाहृतोनृपः तस्मिन्कालेतुशा
कुनिःप्रोवाचमधुरंवचः मुंचराजन्महारोषंपुरतःकार्यगौरवात् गंतुमुत्तिष्ठराजेंद्रसत्रात्स्वसदनंप्रति तथेत्युक्त्वामहाराजःसमागत्यमखा
लयात् विनिर्गच्छन्नृपाःसर्वेत्यक्त्वायज्ञंस्वराष्ट्रकम् राजभिःससमागत्यदुर्योधनगजाव्हयम् आनीयपांडुपुत्राणांधर्मभीमार्जुनान्वरा
न् द्यूतारंभंचाकुरुतस्वंराज्यंप्राप्नुयात्ततः द्यूतेनैवजिताःसर्वेपांडवावीतकल्मषाः ततोरण्यांतरेगत्वावर्त्ततेवनचारिणः ततोवृत्तांतमापन्नो
भ्रातृभिःसहपांडवः सूतउवाच अरण्येवर्तमानास्तेपांडवादुःखकर्शिताः कृष्णंदृष्ट्वामहात्मानंप्रणिपत्ययथाक्रमम् युधिष्ठिरउवा०
अहंदुःखीहसंजातोभ्रातृभिःपरिवारितः कथंमुक्तिर्वदास्माकमनंताद्दुःखसागरात् कंदेवंपूजयिष्यामिराज्यंप्राप्स्याम्यनुत्तमम् अथ-
वाकिंव्रतंकृत्वात्वत्प्रसादाद्भवेद्धितं श्रीकृष्णउवा० अनंतव्रतमस्त्येकंतिथावस्यामनुत्तमं सर्वपापहरंनृणांस्त्रीणांचैवयुधिष्ठिर शुक्ल
पक्षेचतुर्दश्यांमासिभाद्रपदेभवेत् तस्यानुष्ठानमात्रेणसर्वपापंव्यपोहति युधिष्ठिरउवा० कृष्णकोयमनंतेतिप्रोच्यतेयस्त्वयाविभो किं
शेषनागआहोस्विदनंतस्तक्षकःस्मृतः परमात्माथवानंतउताहोब्रह्मगीयते कएषोनंतसंज्ञोवैतथ्यंमेब्रूहिकेशव कृष्णउवाच अनंतइ
त्यहंपार्थममरूपंनिबोधतत् आदित्यादिग्रहात्मासौयःकालइतिपठ्यते कलाकाष्ठामुहूर्तादिदिवारात्रिशरीरवान् पक्षमासर्तुऋक्षाणि
युगकालव्यवस्थया योयंकालोमयाख्यातोसोनंतइतिकीर्त्यते सोहंकृष्णोवतीर्णोत्रभूभारोत्तारणायच दानवानांवधार्थायवसुदेवकु
लोद्भवम् मांविद्धिसततंपार्थसाधूनांपालनायच अनादिमध्यनिधनंकृष्णंविष्णुंहरिंशिवम् वैकुंठंभास्करंसोमंसर्वव्यापिनमीश्वरं वि

श्वरूपंमहाबाहोयोगिध्येयमनुत्तमम् विश्वरूपमनंतंचयस्मिन्निंद्राश्चतुर्दश वसवोद्वादशादित्यारुद्राएकादशास्मृताः सप्तर्षयःसमुद्राश्चपर्वताःसरितोद्रुमाः नक्षत्राणिदिशोभूमिःपातालंभूर्भुवादिकं माकुरुष्वात्रसंदेहंसोहंपार्थनसंशयः युधिष्ठिरउवाच अनंतव्रतमाहात्म्येविधिंवद्विदांवर किंपुण्यंकिंफलंचास्यअनुष्ठानवतांनृणाम् केनचादौपुराचीर्णंमर्त्यैकेनप्रकाशितं एवंसविस्तरंसर्वंब्रूह्यनंतव्रतंमम कृष्णउवाच आसीत्पुराकृतयुगेसुमंतुर्नामवैद्विजः वसिष्ठगोत्रसंभूतांसुरूपांचभृगोःसुतां दीक्षानाम्नींचोपयेमेवेदोक्तविधिनानृप तस्याःकालेनसंजातादुहितानंतलक्षणा शीलानाम्नीसुशीलासावर्धतेपितृवेश्मनि माताचतस्याःकालेनज्वरदाहेनपीडिता विनष्टासानदीतोयेययौस्वर्गंपतिव्रता सुमंतुस्ततोन्यांवैधर्मपुंसःसुतांपुनः उपयेमेविधानेनदुःशीलांनामनामतः दुःशीलांकर्कशांचंडींनित्यंकलहकारिणीं सापिशीलापितुर्गेहेगृहार्चनपराबभौ कुड्यस्तंभबहिर्द्वारदेहलीतोरणादिषु वर्णकैश्चित्रमकरोन्नीलपीतसितासितैः स्वस्तिकैःशंखपद्मैश्चअर्चयंतीपुनःपुनः ततःकालेबहुगतेकौमारवशवर्तिनी एवंसावर्धतेशीलापितृवेश्मनिमंगला तांदृष्ट्वाचिंतयामासवराननुगुणान्सुवि कस्मैदेयामयाकन्याविचार्येतिसुदुःखितः एतस्मिन्नेवकालेतुमुनिर्वेदविदांवरः कन्यार्थीचागतःश्रीमान्कौंडिण्योमुनिसत्तमः उवाचरूपसंपन्नांत्वदीयांतनयांवृणे पिताददौद्विजेंद्रायकौंडिण्यायशुभेदिने गृह्योक्तविधिनापार्थविवाहमकरोत्तदा मंगलाचारनिर्घोषंतत्रकुर्वंतियोषितः ब्राह्मणाःस्वस्तिवचनंजयघोषंचबंदिनः निर्वर्त्योद्वाहिकंसर्वंप्रोक्तवान्कर्कशांद्विजः सुमंतुरुवाच किंचिद्दायादिकंदेयंजामातुःपरितोषकम् तच्छ्रुत्वाकर्कशाक्रुद्धाप्रोत्सार्यगृहमंडनम् पेटकेसुस्थिरंबध्वास्वगृहंगम्यतामिति उवाचवित्तंनैवास्तिगृहेपश्ययदिस्थितम् तच्छ्रुत्वाविमनाःपार्थसंयतात्मामुनिस्तदा भोज्याविशिष्टचूर्णेनपाथेयंचचकारसा कौंडिण्योपिविवाह्यैनांपथिगच्छन्शनैःशनैः शीलांसुमंतोरादायनवोढांगोरथेनहि ददर्शयमुनांपुण्यांतामुत्तीर्यतटेरथं संस्थाप्यावश्यकंकर्तुंगतःशिष्यान्नियुज्यवै मध्यान्हेभोज्यवेलायांसमुत्तीर्यसरित्तटे ददर्शशीलासास्त्रीणांसमूहंरक्तवाससां चतुर्दश्यामर्चयंतंभक्त्यादेवंजनार्दनम् उपगम्यजनैःशीलापप्रच्छस्त्रीकदंबकम् आर्याःकिमेतन्मेब्रूतकिंनामव्रतमीदृशम् ताऊचुर्यो

षिनस्तांतुशीलांशीलविभूषणाम् अनंतव्रतमेतद्धिव्रतेनंतस्तकपूज्यते साब्रवीदहमप्येतत्करिष्येव्रतमुत्तमम् विधानंकीदृशंतत्रकिंदानंको
त्रपूज्यते स्त्रियऊचुः शीलेसदन्नप्रस्थस्यपुन्नाम्नासंस्कृतस्यच अर्धंविप्रायदातव्यमर्धमात्मनिभोजनं शक्त्याचदक्षिणांदद्याद्वित्त
शाठ्यविवर्जितः कर्तव्यंयत्सरित्तीरे कथांश्रुत्वाहरेरिमां शेषंकुशमयंकृत्वावंशपात्रेनिधायच स्नात्वानंतंसमभ्यर्च्यमंडलेदीपगंधकैः
पुष्पैर्धूपैश्चनैवेद्यैर्नानापक्वान्नसंयुतैः तस्याग्रतोदृढंसूत्रंकुंकुमाक्तंसुदोरकम् चतुर्दशग्रंथियुतंवामेकरतलेन्यसेत् अनंतसंसारमहा
समुद्रमग्नंसमभ्युद्धरवासुदेव अनंतरूपेविनियोजयस्वह्यनंतसूत्रायनमोनमस्ते अनंतंचकरेबध्वाभोक्तव्यंस्वस्थमानसैः ध्यात्वाना
रायणंदेवमनंतंविश्वरूपिणम् भुक्त्वाचांतेव्रजेद्वेश्मभद्रेप्रोक्तंव्रतंतव कृष्णउवाच एवमाकर्ण्यराजेंद्रप्रहृष्टेनांतरात्मना सापिचक्रे
व्रतंशीलाकरेबध्वासुदोरकम् चतुर्दशग्रंथियुतंवामेबाहौयथोदितम् पाथेयमर्द्धंविप्रायदत्वाभुक्त्वास्वयंततः पुनर्जगामसंहृष्टागोरथे
नस्वकंगृहं भर्त्रासहैवशनकैःप्रत्ययस्तत्क्षणादभूत् तेनानंतव्रतेनास्य बभौगोधनसंकुलं गृहाश्रमंश्रियाजुष्टंधनधान्यसमन्वितम्-
आकुलंव्याकुलंरम्यंसर्वदातिथिपूजनैः सापिमाणिक्यकांचीभिर्मुक्ताहारैर्विभूषिता देवांगवस्त्रसंपन्नासावित्रीप्रतिमाभवत् विचचा
रगृहेभर्तुःसमीपेश्रीस्वरूपिणी कदाचिदुपविष्टायादृष्टोबद्धःसुदोरकः शीलायाहस्तमूलेतुभर्त्रातस्याद्विजन्मना किमिदंदोरकंशीलेम
मवश्यायकल्पितम् धृतंसुदोरकंत्वेतत्किमर्थंब्रूहितत्त्वतः यस्यप्रसादात्सकलाधनधान्यादिसंपदः लभ्यंतेमानवैश्चापिसोनंतोयंम-
याधृतः शीलायास्तद्वचःश्रुत्वाभर्त्रातेनद्विजन्मना श्रीमदांधेनकौरव्यसाक्षेपंत्रोटितस्तदा कोनंतइतिमूढेनजल्पतापापकारिणा क्षिप्तो-
ज्वालाकुलेवन्हौहाहाकृत्वाप्रधावती शीलागृहीत्वातत्सूत्रंक्षीरमध्येसमाक्षिपत् तेनकर्मविपाकेनसाश्रीस्तस्यक्षयंगता गोधनंतस्करै-
र्नीतंगृहंदग्धंधनंगतम् यद्यथैवागतंगेहेतत्तथैवपुनर्गतम् स्वजनैःकलहोनित्यंबंधुभिस्ताडनंतथा अनंताक्षेपदोषेणदारिद्र्यंपतितंगृहे
नकश्चिद्वदतेलोकस्तेनसार्द्धंयुधिष्ठिर शरीरेणातिसंतप्तोमनसाप्यतिदुःखितः निर्वेदंपरमंप्राप्तःकौंडिण्यःप्राहतांप्रियाम् कौंडिण्य
उवाच शीलेममेदमुत्पन्नंसहसाशोककारणं येनातिदुःखिनोस्माकंजातःसर्वधनक्षयः स्वजनैःकलहोगेहेनकश्चिन्मांप्रभाषते शरी

रैनित्यसंतापःस्वेदश्चैवातिदारुणः जानासिदुर्नयःकोत्रकिंकृत्वासुकृतंभवेत् शीलोवाच सत्यउवाचाथतंशीलासुशीलाशीलमंडना मायोनंतकृताक्षेपपापसंभवजंफलम् भविष्यतिमहाभागतदर्थंयत्नमाचर एवमुक्तःसविप्रर्षिर्जगाममनसाहरिम् निर्वेदंनिर्जगामाथकौंडिण्यःप्रगतोवनं तपसेकृतसंकल्पोवायुभक्षोद्विजोत्तमः मनसाध्यायमानस्तंकद्रक्ष्यामिचतंविभुम् यस्यप्रसादात्संजातमाक्षेपान्निधनंगतम् धनादिकंममातीवसुखदुःखप्रदायकं एवंसंचिंतयन्सोथबभ्रामगहनेवने तत्रापश्यन्महाचूतंपुष्पितंफलितंद्रुमं वर्जितंपक्षिसंघातैःकीटकोटीसमावृतम् तमपृच्छद्द्विजोनंतःक्वचिद्दृष्टोमहाद्रुम ब्रूहिसौम्यममातीवदुःखंचेतसिवर्तते सोब्रवीद्द्रुनानंतोक्वचिद्दृष्टोमयाद्विज एवंनिराकृतस्तेनसंजगामाथदुःखितः कद्रक्ष्यामीतिगच्छन्सगांददर्शसवत्सकाम् वनमध्येप्रधावंतीमितश्चेतश्चपांडव सोब्रवीद्धेनुकेब्रूहियद्यनंतस्त्वयेक्षितः गौतम्युउवाच गौरुवाचाथकौंडिण्यंनानंतंवेद्म्यहंद्विज ततोव्रजंददर्शाग्रेवृषभंशाद्वलेस्थितं दृष्ट्वाप्रपच्छ-गोस्वामिन्ननंतोवीक्षितस्त्वया वृषभस्तमुवाचेदंनानंतोवीक्षितोमया ततोव्रजन्ददर्शाग्रेरम्यंपुष्करिणीद्वयम् अन्योन्यजलकल्लोलैर्वीचीपर्यंतसंगतं छन्नंकमलकल्हारैःकुमुदोत्पलमंडितं सेवितंभ्रमरैर्हंसैश्चक्रकारंडकैर्बकैः तेअपृच्छद्द्विजोनंतोयुवाभ्यांनोपलक्षितः उचतुस्तेपुष्करिण्यौनानंतोवीक्षितोद्विज ततोव्रजन्ददर्शाग्रेगर्दभंकुंजरंतथा तावपृच्छद्द्विजोनंतोभवद्भ्यांनोपलक्षितः एवंसपृच्छन्नस्थाश्रस्तत्रैवनिषसादह कौंडिण्योविह्वलीभूतोनिराशोजीवितेनृप दीर्घमुष्णंचनिःश्वस्यपपातभुविभारत प्राप्यसंज्ञामनंतेतिजल्पन्नुत्थायसद्विजः नूनंत्यक्ष्याम्यहंप्राणानितिसंकल्प्यचेतसि यावदुद्बंधनंवृक्षेचक्रेनावद्युधिष्ठिर कृपयानंतदेवोपिप्रत्यक्षःसमजायत वृद्धब्राह्मणरूपेणइतएहीत्युवाचतम् प्रगृह्यदक्षिणेपाणौगुहायांप्रविवेशतम् स्वांपुरींदर्शयामासदिव्यनारीनरैर्युताम् यस्यांविनिष्टमात्मानंदिव्यसिंहासनेशुभे पार्श्वस्थशंखचक्राब्जगदागरुडशोभितम् दर्शयामासविप्रायविश्वरूपमनंतकम् विभूतिभेदैश्चानंतैरनंतममितौजसम् कौतुकेनविराजंतंवनमालाविभूषितम् तंदृष्ट्वातादृशंरूपमनंतमपराजितम् वंद्यमानोजगादोच्चैर्जयशब्दपुरःसरम् पापोहंपापकर्माहंपापात्मापापसंभवः त्राहिमांपुंडरीकाक्षसर्वपापहरोभव तच्छ्रुत्वानंतदेवेशःप्राहसुस्निग्धयागिरा माभैस्त्वंब्रूहिविप्रेंद्रयत्तेम

नस्निवर्तते कौंडिण्यउवाच मयाभूत्यवलिप्तेनत्रोटितोनंतदोरकः तेनपाकविपाकेनभूतिर्मेप्रलयंगता स्वजनैःकलहोगेहेनकश्चिन्मां
प्रभाषते निर्वेदाद्भ्रमतेरण्येतवदर्शनकांक्षया कृपयादेवदेवेशत्वयात्मासंप्रदर्शितः तस्यपापस्यमेशांतिंकारुण्याद्वक्तुमर्हसि श्रीकृष्ण
उवाच तच्छ्रुत्वानंतदेवेशउवाचद्विजसत्तमम् भक्त्यासंतोषितोदेवःकिंनदद्याद्युधिष्ठिर अनंतउवाच स्वगृहेगच्छकौंडिण्यमाविलं
बंकुरुद्विज चरानंतव्रतंभक्त्यानववर्षाणिपंचच सर्वपापविशुद्धात्माप्राप्स्यसेसिद्धिमुत्तमां पुत्रपौत्रान्समुत्पाद्यभुक्त्वाभोगान्यथेप्सि
तान् अंतेमत्स्मरणंप्राप्यमामुपैष्यस्यसंशयम् अन्यंचतेवरंदद्मिसर्वलोकोपकारकम् इदमाख्यानकवरंशीलानंतव्रतादिकम् करिष्य
तिनरोयस्तुकुर्वन्व्रतमिदंशुभं सोचिरात्पापनिर्मुक्तःप्राप्नोतिपरमांगतिम् गच्छविप्रगृहंशीघ्रंयथायेनागतोह्यसि कौंडिण्यउवाच
स्वामिन्पृच्छामितेब्रूहिकिंचित्कौतूहलंमया अरण्येभ्रमतादृष्टंतद्वदस्वजगद्गुरो यश्चूतवृक्षःकस्तत्रकागौःकोवृषभस्तथा कमलोत्पलक
ल्हारैःशोभितंकमनोहरम् मयादृष्टंमहारण्येकिंतत्पुष्करिणीद्वयं कःखरःकुंजरःकोसौकोसौवृद्धोद्विजोत्तमः अनंतउवाच यश्चूतवृ
क्षोविप्रोसौविद्यावेदविशारदः विद्यानदत्ताशिष्येभ्यस्तेनासौतरुतांगतः यागौर्वसुंधरादृष्टापूर्वंसाबीजहारिणी वृषोधर्मस्त्वयादृष्टःशा
द्वलंसत्यमास्थितः धर्माधर्मव्यवस्थानंतच्चपुष्करिणीद्वयं ब्राह्मण्यौकेचिदप्यास्तांभगिन्यौतेपरस्परम् धर्माधर्मादियत्किंचित्तन्निवे
दयतोमिथः विप्रायवेदविदुषेनदत्तंदुर्बलायवै भिक्षादत्तानचार्थिभ्यस्तेनपापेनकर्मणा वीचीकल्लोलमालाभिर्गच्छतस्तेपरस्परम् ख
रःक्रोधस्तथादृष्टःकुंजरोमदउच्यते ब्राह्मणोसावनंतोहंगुहासंसारगह्वरम् इत्युक्त्वादेवदेवेशस्तत्रैवांतरधीयत स्वप्नप्रायंततोदृष्ट्वा
ततःस्वगृहमागतः कृत्वानंतव्रतंसम्यक्नववर्षाणिपंचच भुक्त्वासर्वमनंतेनयथोक्तंपांडुनंदन अंतेचस्मरणंप्राप्यगतोनंतपुरेद्विजः त
थात्वमपिराजर्षेकथांशृण्वन्व्रतंकुरु प्राप्स्यसेचिंतितंसर्वमनंतस्यवचोयथा यद्वच्चतुर्दशेवर्षे फलंप्राप्तंद्विजन्मना वर्षेकेनतदाप्नोतिकृ
त्वोपाख्यानकव्रतम् एतत्तेकथितंभूपव्रतानामुत्तमंव्रतम् यच्छ्रुत्वासर्वपापेभ्योमुच्यतेनात्रसंशयः येपिशृण्वंतिसततंपठ्यमानंपठंति
ये तेपिपापविनिर्मुक्ताःप्राप्स्यंतिचहरेःपदं संसारगह्वरगुहासुसुखंविहर्तुंवांछंतियेकुरुकुलोद्भवशुद्धसत्वाः संपूज्यचत्रिभुवनेश

मनंतदेवं बध्नंतिदक्षिणकरे वरदोरकंते इतिअनंतव्रतकथासमाप्ता अथानंतव्रतोद्यापनम् युधिष्ठिरउवाच त्वत्प्र
सादाच्छ्रुतंकृष्णामयानंतव्रतंशुभम् इदानींब्रूहिमेनंतव्रतोद्यापनमुत्तमं कृष्णउवाच शृणुपांडववक्ष्यामिव्रतोद्यापनमुत्तमम् कृ
तेनसफलंपार्थव्रतंभवतिनिश्चितम् आदौमध्येतथाचांतेव्रतस्योद्यापनंभवेत् यदिवित्तस्यचित्तस्यसंपत्तिःशुभकालता तदाचो
द्यापनंकुर्याच्छुभलग्नेशुभेदिने चतुर्दशेषुवर्षेषुमुख्यमुद्यापनंव्रतम् कायशुद्धिस्त्रयोदश्यांब्रह्मचारीव्रतीततः एकभक्तेननियमं
कृत्वाभक्तिसमन्वितः ततःप्रातश्चतुर्दश्यांस्नात्वातीर्थेशुभेशुचिः संकल्पयेद्रमाकांतंदेशकालावनुस्मरन् ततोनद्यांदेवखातेतीर्थे
प्रस्रवणेतथा सर्वौषधीःसर्वगंधैस्तिलकल्कैरथामलैः वेदोक्तविधिनास्नायात्संतर्प्यपितृदेवताः ततोगृहंसमागत्यवेदींकृत्वासुशो
भनां तन्मध्येत्वुपविश्याथदेशकालौस्मरंस्ततः गणेशंपूजयित्वाथपुण्याहंवाचयेद्द्विजैः आचार्यंचसपत्नीकंवरयेद्वेदपारगम् ब्राह्म
णंचसदस्यंचऋत्विजश्चचतुर्दश सर्वान्वस्त्रैरलंकारैर्जलपात्रादिनार्चयेत् तत्रालिखेन्मंडलकंपंचवर्णैःसुशोभनैः विरच्यसर्वतोभ
द्रंमंडपांतस्तुमध्यगम् ब्रह्मादिदेवतास्तस्मिन्नावाह्यापिचपूजयेत् तन्मध्येपंकजेधान्यंयथाशक्तिक्षिपेत्ततः सौवर्णंराजतंवापिता-
म्रजंवापिमृन्मयम् तस्योपरिन्यसेत्कुंभमव्रणंसुनवंदृढम् तस्मिन्जलंगंधपुष्पफलपल्लवमृत्तिकाः क्षिप्त्वारत्नंहिरण्यंचवस्त्रयुग्मेन
वेष्टयेत् सौवर्णंराजतंताम्रंमृन्मयंवंशजंतथा पात्रंतदुपरिन्यस्यपट्टकूलादिकंशुभम् लिखेदष्टदलंतत्रचंदनेनसुगंधिना पद्मंवि
रच्यतन्मध्येनंतमूर्तिंविधायच पलेनवातदर्धेनमाषकेणापिवाकृताम् सौवर्णींरमयायुक्तांशंखचक्रगदाब्जकाम् आवाहनाद्युप-
चारैःपूजयेत्सुसमाहितः पंचामृतेनस्नपयेत्ततश्चवसनद्वयम् पट्टकूलादिकंपीतमर्चयित्वाचरेद्व्रती पुष्पधूपैस्तथादीपैर्नैवेद्यैश्चप्र
पूजयेत् पुनःपुष्पाणिसंगृह्यपूजयेन्नामभिःक्रमात् अनंतायनमःपादौगुल्फौसंकर्षणायच कालात्मनेजानुनीचजघनेविश्वविरूपिणे
कटींवैविश्वरूपायमेढ्रंवैविश्वसाक्षिणे नाभिंतुपद्मनाभायहृदयंपरमात्मने कंठंश्रीकंठनाथायबाहूसर्वास्त्रधारिणे मुखंतुवाचस्प
तयेचक्षुषीकपिलायच ललाटेकेशवायेतिशिरःसर्वात्मनेतथा नमःपादौपूजयामीत्येवमादिप्रपूजयेत् एवंसंपूज्यविधिनारात्रौजाग

रणंचरेत् गीतवादित्रनृत्यादिपुराणश्रवणान्वितम् प्रतिमांचप्रकुर्वीतपूजांगंधादिनाहरेः नानाफलानिभक्ष्याणिखाद्यानिचनिवेदयेत्
ततःप्रभातसमयेस्नात्वाचार्यादिभिःसह अनंतंपूजयेत्प्राग्वत्जुहुयात्साग्निमेततः कुंडेवास्थंडिलेकुर्यादग्निस्थापनपूर्वकम् आज्य
भागांतमाचार्यः स्वगृह्योक्तविधानतः ततोऽश्वत्थसमिद्भिस्तु दर्भावेन्याभिरेवच दुग्धमध्वाज्यदधिभिस्तिलैर्वापायसेनच आज्येनचम
तिद्रव्यमष्टोत्तरसहस्रकम् अष्टोत्तरशतंवाष्टाविंशतिंजुहुयात्क्रमात् अतोदेवेतिमंत्रेणस्त्रीणांवैनाममंत्रतः प्रणवादिचतुर्थ्यंतंनमोंता-
नंतनामतः नाममंत्रैश्चजुहुयाच्चतुर्दशभिरादरात् पुरुषसूक्तेनजुहुयादतोदेवेतिवापुनः शतमष्टोत्तरंयावत्प्रत्येकंजुहुयाच्चरुः चरु
होमस्तथाकार्योमंत्रैरेतैर्विचक्षणः एतैर्वक्ष्यमाणमंत्रैर्जुहुयाच्चरुणातथा ॐ अनंतायस्वाहा ॐकालायस्वाहा ॐअहोरात्राय॰ॐ
अर्धमासाय॰ॐ मासाय॰ॐ ऋतुभ्य॰ॐ परिवत्सराय॰ॐ कपिलाय॰ॐ शेषाय॰ॐ कालात्मने॰ ॐ उषसे॰ॐ काष्ठाय॰ॐ मुहूर्ताय॰
ॐ शेषाय॰ १४ ॐ भूरग्नयेचपृथिव्यैचमहतेचस्वाहा ॐ भुवोवायवेचांतरिक्षायचमहतेचस्वाहा ॐ सुवरादित्यायचदिवेचमहतेच
स्वाहा ॐ भूर्भुवःस्वश्चंद्रमसेचनक्षत्रेभ्यश्चदिग्भ्यश्चमहतेचस्वाहा आज्यतिलैःस्विष्टकृतंप्रजापतिभ्योजुहुयात् समिदादिभि
रेवंचप्रत्येकंजुहुयात्क्रमात् एवंस्विष्टकृतादीनिपूर्णपात्रांतमाचरेत् जपेत्पुरुषसूक्तंतुस्मृत्वानंतंस्मरेत्तमं पूर्णाहुतिंचजुहुयाद्धोमांतेवि
श्वमित्यृचा होमशेषंसमाप्याथकृत्वात्र्यायुषमेवच ततोवैलोकपालांश्चग्रहान्पूज्ययथाक्रमं गीतवादित्रनिनदैर्दत्वापूर्णाहुतिंप्रतिके
चिन्मतेसाग्निहोमः पूजयित्वाहरिंदेवमाचार्यंपूजयेत्ततः परिपूज्यसपत्नीकंवस्त्रालंकारभूषणैः वस्त्रालंकारभूषाद्यैस्ततोधेनुंसमर्च
येत् पयस्विनींसुशीलांचवस्त्रालंकारभूषिताम् स्वर्णशृंगींरौप्यखुरींताम्रपृष्ठींसुशोभनाम् कांस्यदोहांरत्नपुच्छांनिष्ककंठींसव-
त्सकाम् सुरभिर्वैष्णवीमातानित्यंविष्णुपदेस्थिता ग्रासंगृण्हमयादत्तंगोमातस्त्रातुमर्हसि गवामंगेषुतिष्ठंतिभुवनानिचतुर्दश य
स्मात्तस्माच्छुभंमेस्यादिहलोकेपरत्रच गावोमेअग्रतःसंतुगावोमेसंतुपृष्ठतः गावोमेहृदयेसंतुगवांमध्येवसाम्यहम् मंत्रेणानेन
संपूज्यआचार्यायनिवेदयेत् गोदानस्यविधानार्थंदद्यात्स्वर्णंयथाविधि अनंतंपरिवारंचब्राह्मणायनिवेदयेत् ऋत्विजःपूजयि

त्वाथतेभ्योदद्याच्चदक्षिणाम् चतुर्दशैवकुंभांश्चपक्वान्नपरिपूरितान् वस्त्रोपवीतेदद्याच्चअनंतःप्रीयतामिति आचार्यादीन्भोजयित्वा पूर्णतांवाचयेत्ततः अथानंतंविसृज्यापिगृण्हीयादाशिषस्ततः भक्तियुक्तोनमस्कृत्यब्राह्मणानांक्षमापयेत् ततोहृष्टोबंधुयुतोभुंजीयात्सुसमाहितः एवंकृतेनंतफलंदातानंतोभवेन्नृणाम् इतिश्रीभविष्योत्तरपुराणेअनंतव्रतोद्यापनंसंपूर्णम् अथनष्टदोरकविधिः युधिष्ठिरउवाच अनंतव्रतमाहात्म्यंकृत्स्नंकृष्णात्वयोदितम् भगवन्दोररूपेणभाग्यदोसिमहात्मनाम् दोरंप्रमादतोनष्टंयदिस्याद्विदितंजनैः तदाकिंकरणीयंस्याद्ब्रूतंत्रैलोक्यपावनम् कृष्णउवाच दोरेनष्टेमहादोषःप्रभवेद्व्रतिनामिह तस्मात्तद्दोषनाशार्थंप्रायश्चित्तंविधीयते गुरुंप्रदक्षिणीकृत्यनमस्कृत्यसमाहितः विज्ञाप्यदोरनाशंचकृत्वादोरंव्रतीततः हव्यवाहंप्रतिष्ठाप्य तस्मिन्ध्यात्वाहरिंपरं आज्यमग्नावधिश्रित्यदद्याद्विप्रायचासनम् अष्टोत्तरशतंहुत्वामूलमंत्रेणवैष्णवं नाममंत्रेणतत्कृत्वाद्वादशाक्षरसंयुतं केशवादिसकृन्हुत्वाप्रायश्चित्तंतुशक्तितः पूर्णाहुतिंततोहुत्वाहोमशेषंसमापयेत् व्रतछिद्रंजपछिद्रंयच्छिद्रंव्रतकर्मणि वचनाद्भूमिदेवानांसर्वंसंपूर्णतांव्रजेत् मंत्रहीनंक्रियाहीनंभक्तिहीनंजनार्दन यत्पूजितंमयादेवपरिपूर्णंतदस्तुमे आचार्यपूजनं कार्यंदक्षिणाद्यैर्नृपोत्तम एवंशांतिविधिंकृत्वापूर्ववद्व्रतमाचरेत् तस्मात्सर्वप्रयत्नेनप्रायश्चित्तंचरेत्सुधीः इतिभविष्योत्तरपुराणे नष्टदोरकविधिःसमाप्तः अथभाद्रपदशुक्लचतुर्दश्यांकार्तिक्यांवामाघ्यांवावैशाख्यांवाकदलीव्रतंहेमाद्रौभविष्योत्तरे सापूर्वाण्हव्यापिनीग्राह्या अथरंभारोपणविधिः रंभावृक्षंलापयितुंस्वहस्तेनशुभभूमिकाम् वर्षमेकंतुसंपूज्यउदकुंभेनसिंचयेत् यावत्प्रसवपर्यंतंपूजयेच्चयथाविधि पूर्वस्यांतुयथासम्यगुत्तरस्यांतथैवच दक्षिणेपश्चिमेहानीरंभाप्रसवलक्षणम् अथकदलीव्रतविधिः यदावित्तस्यचित्तस्यसंपत्तिःशुभकालता तदाचोद्यापनंकुर्याच्छुभलग्नेशुभेदिने कायशुद्धिस्त्रयोदश्यांब्रह्मचारीव्रतीकृती एकभक्तेननियमंकृत्वाभक्तिसमन्वितः ततःप्रातश्चतुर्दश्यांस्नात्वातीर्थेशुभेशुचिः उपवासंतुसंकल्प्यदेशकालावनुस्मरन् ततोगृहंसमागत्यवेदींकृत्वासुशोभनाम् तन्मध्येउपविश्याथदेशकालौस्मरेत्ततः गणेशंपूजयित्वाथपुण्याहंवाचयेद्द्विजैः आचार्यंचसपत्नीकं-

वरयेद्वेदपारगम् गोचर्ममात्रंसंलिप्यसर्वतोमंडलंशुभं लिखेत्सम्यक्तथावर्णैर्नीलपीतैःसितासितैः विरच्यलिंगतोभद्रंमंडपांतस्तुमध्यग
म् ब्रह्माद्यादेवतास्तत्रस्थापयित्वाप्रपूजयेत् अथवास्वस्तिकंकुर्यात्पद्ममष्टदलेपिवा ततःसाग्रंसुपर्णांतुसम्यग्वृत्तांसुशोभनां समूलांकदलीं
स्थाप्यपूजयेत्तांयथाविधि उत्तमोदकमानीयसेचयेत्तांसमाहितः यथारंभेविघ्नद्धिक्लेशारवादीनांसदाभवेत् तथावर्द्धयमांदेविसेचयेत्पार्वती
प्रिये इतिसेचनमंत्रः तन्मध्येपंचकंधान्यंयथाशक्तिक्षिपेत्ततः सौवर्णंराजतंवापिताम्रजंवापिमृन्मयम् कुंभंन्यसेत्तदुपरिअव्रणंसुन
वंदृढम् तस्मिन्जलंगंधपुष्पंफलपल्लवमृत्तिकाः क्षिप्त्वारत्नंहिरण्यंचवस्त्रयुग्मेनवेष्टयेत् सौवर्णंराजतंताम्रंमृन्मयंवंशजंतथा पात्रंतदुप
रिन्यस्यपट्टकूलादिकंशुभम् लिखेदष्टदलंतत्रचंदनेनसुगंधिना पलेनवातदर्धेनमाषकेणापिवाकृतौ उमामहेश्वरौतत्रमूलमंत्रेणपूज
येत् इतिकदलीव्रतविधिः अथउमामहेश्वरसहितकदलीपूजनं मासपक्षाद्युल्लिख्यममपापनिर्मुक्त्युत्तमसिद्धिपुत्रपौत्रावैधव्ये-
प्सितभोगधनधान्यप्राप्तयेउमामहेश्वरसहितकदलीपूजनंकरिष्ये तथाचकलशार्चनंचकरिष्ये कदल्यागच्छहेदेविसौभाग्यफलदा
यिनि रूपंदेहिजयंदेहियशोदेहिसुतान्निश्चितं आगच्छवरदेदेविशंकरेणमहेश्वरि करिष्यमाणांपूजांमेगृहाणानुग्रहंकुरु आवाह॰ कार्तस्वरमयं
दिव्यंनानामणिगणान्वितं अधितिष्ठमहादेविशिवेनसहपार्वति आसनं· पूर्वाक्षतादिभिर्युक्तंस्वर्णपात्रेस्थितंशुभम् पाद्यार्थंकल्पितं
भक्त्यागृहाणपरमेश्वरि पाद्यं· अर्घ्यपात्रेस्थितंतोयंफलपुष्पसमन्वितं अर्घ्यंगृहाणमेदेविभक्त्यादत्तंशिवप्रिये अर्घ्यं· कर्पूरोशीर
सुरभिशीतलंविमलंजलम् गंगायास्तुसमानीतंगृहाणाचमनीयकम् आचम॰ गंगादिसर्वतीर्थेभ्योमयाप्रार्थनयाहृतम् स्नानार्थंतु
मयादेविगृहाणेदंसुरेश्वरि स्नानं· यथारंभेविघ्नद्धिक्लेशारवादीनांसदाभवेत् तथावर्द्धयमांदेविसेचनात्पार्वतीप्रिये सेचनं· वस्त्रंशुभ
मिदंदिव्यंकुंकुमाक्तंसुशोभनम् गृहाणाच्छादनंदेवितथाच्छादयमांसदा वस्त्रं· उपवीतंकंचुकींसुसुवस्त्रंचनानारत्नैःसमन्वितं गृ
हाणत्वंमयादत्तंपार्वत्यैचनमोस्तुते कंचुकीं· उपवस्त्रं· गंगादिसर्वतीर्थेभ्योमयानीतंसुनिर्मलं तोयमेतत्सुखस्पर्शंगृहाणाचमनीयकं
आचमनं· श्रीखंडंचंदनंदिव्यंगंधाढ्यंसुमनोहरं विलेपनंगृहाणेदंरुद्राणीप्रियवल्लभे चंदनं· अक्षताश्चसुरश्रेष्ठेकुं॰ हरिद्राकुंकुमं·

सौभाग्यद्रव्याणि· मालतीचंपकादीनिशतपत्रादिकानिच सुगंधीनिगृहाणत्वंपूजार्थंसुमनांसिच पुष्पाणि· अगरुंगुग्गुलंधूपंदशांगंसुमनोहरं गृहाणेमंतृप्तिकरंघ्राणस्यदयितंपरम् धूपं· चक्षुर्दंसर्वलोकानांतिमिरस्यनिवारणम् आर्तिक्यंकल्पितंभक्त्यागृहाण परमेश्वरि दीपं· नानापक्वान्नसंयुक्तंरसैःषड्भिःसमन्वितं नैवेद्यंविविधंभक्त्याकल्पितंत्वंगृहाणमे नैवेद्यं· कर्पूरैलालवंगादिनागवल्लिदलान्वितं पूगीफलसमायुक्तंतांबूलंप्रतिगृह्यतां तांबूलं· इदंफलमितिफलं· हिरण्यगर्भेतिदक्षिणां· नीराजयामिदेवेशि भक्तानांभयनाशिनि देहिमेसर्वसौभाग्यंपार्वत्यासहितेनघे नीराजनं· यानिकानिचपापानि॰ प्रदक्षिणां॰ आश्रयेदेवपत्नीनां पूजितेचश्रियःस्वयम् सौभाग्यारोग्यमायुश्चदेहिरंभेनमोस्तुते नमस्कारं· त्वमिंद्राणीप्रियानित्यंपार्वत्याश्चातिवल्लभा सतीनांकामदापूज्याकामान्मेपरिपूरय प्रार्थनां· इतिपूजनं· अथकथा युधिष्ठिरउवाच कृष्णकृष्णमहाबाहोसर्वविद्याविशारद अनाथनाथविश्वात्मन्दीनदैन्यनिकृंतन त्वमस्माकंपरोबंधुस्त्वमस्माकंपरंसखा त्वयाभिरक्षितानित्यंविचरामोत्रनिर्भयाः किंचित्पृच्छामिदेवेशकृपांकुरुवदस्वमे यद्गुह्यंसर्वधर्मेषुकृतेयस्मिन्महत्फलम् सौभाग्यारोग्यदंपुण्यंधनधान्यविवर्धनम् अन्नाच्छादनपुत्रादिवर्धनंश्रीनिकेतनम् तन्ममाचक्ष्वभगवन्लोकानामुपकारकम् श्रीकृष्णउवाच शृणुराजन्प्रवक्ष्यामिव्रतानामुत्तमंव्रतम् यत्कृत्वासर्वदुःखेभ्योनारीमुच्येतसंकटात् वस्त्रान्नपानविछित्तिर्नभवेत्तुकदाचन पुरामामेत्यवैकांतारुक्मिणीप्राणवल्लभा प्रणिपत्याब्रवीद्दीनासर्वकामाप्तयेशुभा सौभाग्यंमेकथंदेवभवेज्जन्मनिजन्मनि सपत्नीनांश्रियंवीक्ष्यस्पृहामेजायतेप्रभो- इतिप्रियायावचनंश्रुत्वाहंतांसमब्रुवम् रंभाव्रतंकुरुष्वाद्यसौभाग्यावाप्तयेशुभम् कृतेयस्मिन्व्रतेदेविपरंसौभाग्यमाप्स्यसि इतिश्रुत्वावचोदेविरुक्मिणीमामभाषत रंभाव्रतेभवेत्किंभोकोविधिःकिंचपूजनम् केनचादौपुराचीर्णंमर्त्येकेनप्रकाशितं रुक्मिण्याभाषणंश्रुत्वापुनरेवाहमब्रुवम् रंभाव्रतविधिंवक्ष्येशृणुदेवियथोदितम् गोचर्ममात्रंसंलिप्यसर्वतोलिंगभद्रकम् लिखेत्सम्यक्पंचवर्णैनीलपीतैःसितासितैः ब्रह्माद्यादेवताःसर्वाःस्थापयित्वाप्रपूजयेत् कलशोपरिसंस्थाप्यवैणवेपटलेशुभे उमामहेश्वरौतत्रमूलमंत्रेणपू

जयेत् अथवास्वस्तिकंकृत्वापद्ममष्टदलंतुवै ततःसाम्रांसपर्णांचसम्यग्वृत्तांसुशोभनाम् समूलांकदलींस्थाप्यपूजयेत्तांयथाविधि उत्त
मोदकमानीयसेचयेत्तांसमाहितः यथारंभेविवृद्धिस्तेशाखादीनांसदाभवेत् तथावर्द्धयमांदेविसेचनात्पार्वतीप्रिये सदायथातेप्रसवो
वर्धतेकदलीशुभे तथामनोरथानांमेप्रभवोभवतुस्वयम् एवंसंपूज्यविधिवद्भक्तियुक्तेनचेतसा रात्रौजागरणंकुर्याद्गीतवादित्रनिः
स्वनैः एवंयाकुरुतेनारीव्रतानामुत्तमंव्रतम् भुक्त्वातुविविधान्भोगान्सौभाग्यंविंदतेध्रुवम् एवंयाकुरुतेदेविकदलीव्रतमुत्तमम् त
स्मात्कुरुविधानेनयथोक्तफलमाप्स्यसि इतिश्रुत्वाविधानेनचकारव्रतमुत्तमम् अवापसकलंकामंमनसायदभीप्सितम् अन्यच्च
शृणुराजेंद्रव्रतस्यफलमुत्तमम् अत्याश्चर्यकरंपुंसांशृणुष्वावहितोभवान् द्यूतेयदाजितापूर्वंकृष्णानीतासभांप्रति दुःशासनेनदु
ष्टेनद्रौपदीमुक्तमूर्धजा आकृष्यमाणेवस्त्रेतुचित्तेमामस्मरत्तदा तूर्णंतत्रगतोराजन्द्रौपद्यास्त्राणनायवै अहन्नयोहंतुकृष्णायैव्रतं
समुपदिष्टवान् तदाकर्तुमशक्येतुव्रते स्मिन्राजसत्तम रुक्मिण्याचरितंपूर्वंयदेतद्व्रतमुत्तमम् तस्यपुण्यफलंदत्तंकृष्णायैराजस
त्तम तत्कालमेववस्त्राणांसमृद्धिरभवत्पुरा दुःशासनेनदुष्टेनआक्षिप्तेष्वंशुकेषुच प्रादुर्भूतानिवस्त्राणिनानावर्णानिभारत खिन्नो
दुःशासनःपापोविररामांशुकग्रहात् तावद्बभूवुर्वस्त्राणिकदलीगर्भवन्नृप इत्थंव्रतप्रभावोयंगुह्योपिकथितोमया कारयस्वविधा
नेनपूर्णकामोभविष्यसि इतिकदलीव्रतकथासमाप्ता अथोद्यापनम् युधिष्ठिरउवाच कस्मिन्मासेतिथौकस्यामाचरेद्व्र
तमुत्तमम् कदल्यभावेकिंकार्यंतन्ममाचक्ष्वकेशव श्रीकृष्णउवाच शुक्लपक्षेचतुर्दश्यांमासिभाद्रपदेनृप कार्तिकेमाघमा
सेवावैशाखेचेतरेतथा पुण्येमासिप्रकुर्वीतपौर्णमास्यांशुभेदिने तिथिक्षयंवर्जयीतशुभायांसुसमाहितः यस्मिन्देशेनलभ्ये
तकदलीराजसत्तम सुवर्णस्यशुभांतत्रकृत्वापूजांसमाचरेत् यदिलभ्येतकदलीमारोप्यादौप्रपूजयेत् यावत्तस्यांफलंतावत्सिं
चेन्नीरेणभूपते फलेषुपक्वजातेषुपश्चाद्विप्रान्समाह्वयेत् प्रभातेविमलेस्नात्वानद्यादौविमलेजले अहतेवाससीगृह्यकृत्वासंध्या
दिकर्मच अरत्निमात्रंकृत्वातुस्थंडिलंवाग्यतःशुचिः अग्निंसंस्थाप्यविधिवत्तत्रहोमंसमाचरेत् शतमष्टोत्तरंविद्वान्तिलाज्याहुति-

भिस्तथा एकाग्रचित्तःसंहृष्टःकृतीव्याहृतिभिःपृथक् ब्रह्मादिदेवताभ्यश्चनाममंत्रैःपृथक्पृथक् उमामहेश्वरायापिमूलमंत्रेणदापयेत् आचार्यंचसपत्नीकंवस्त्राद्यैःपूजयेत्ततः धेनुंपयस्विनींवत्सवस्त्रालंकारभूषिताम् स्वर्णशृंगींरौप्यखुरींताम्रपृष्ठींसुवाससम् कांस्यदोग्धींरत्नपुच्छांनिष्ककंठींसघंटिकाम् अभ्यर्च्यवेदविदुषेआचार्यायनिवेदयेत् पादुकोपानहौछत्रमलंकारानेकशः यथाशक्तिप्रदेयानिव्रतस्य परिपूर्तये चतुर्विंशत्षोडशवायुग्मान्याहूयसंयतः वस्त्रालंकारगंधाद्यैःपूजयित्वातुभोजयेत् वायनानिचदेयानिवंशपात्रैस्वशक्तितः दद्याच्चदक्षिणांसम्यग्यथाविभवसारतः अन्येभ्योपियथाशक्तिदद्यादन्नंसुसंस्कृतम् क्षमापयित्वातांदेवींव्रतस्यपरिपूर्त्तये, कदल्यै कामदायिन्यैमेधायैतेनमोनमः रंभायैभूतिसारायैसर्वसौख्यप्रदेनमः यथायथातेप्रसवोवर्द्धतेकदलिध्रुवम् तथामनोरथानांमेप्रभवोवर्धतुस्वयम् इतिकदलीदानमंत्रः एवंनारीनरोवापियःकुर्यात्कदलीव्रतम् सर्वान्कामानवाप्नोतिस्वर्गलोकेमहीयते इतिश्रीभविष्योत्तरेकदलीव्रतोद्यापनंसंपूर्णम् अथपौर्णिमांतमासेनकार्तिककृष्णचतुर्दशीनरकचतुर्दशी तस्यांतिलतैलेनस्नानमुक्तंभविष्ये कार्तिकस्यासितेपक्षेचतुर्दश्यांनिशामुखे यमदीपंबहिर्दद्यादपमृत्युर्विनश्यति कार्तिकस्यासितेपक्षेचतुर्दश्यांविधूदये अवश्यमेवकर्तव्यंस्नानंनरकभीरुभिः दिनद्वयेविधूदयेचतुर्दशीसत्त्वे पूर्वविद्धचतुर्दश्यांकार्तिकस्यसितेतरे पक्षेप्रत्यूषसमयेस्नानंकुर्यात्प्रयत्नतः इतिनिर्णयदीपिकोक्तेःपरदिनएवेत्यन्ये दिनद्वयेचतुर्दश्याभावेतु चतुर्दश्यांचतुर्थयामेस्नानमितिदिवोदासनिबंधे स्मृतिदर्पणेपि चतुर्दशीयाश्वयुजस्यकृष्णस्वात्यर्क्षयुक्ताहिभवेत्प्रभाते स्नानंसमभ्यर्च्यनरैस्तुकार्यंसुगंधतैलेनचविप्रयुक्तैः तैलेलक्ष्मीर्जलेगंगादीपावल्याश्चतुर्दशीम् प्राप्येतिशेषः आश्विनस्यासितेपक्षेभूतायांनोदितोरविः यामिन्याःपश्चिमेयामेतैलाभ्यंगोविशिष्यते मृगांकोदयवेलायांत्रयोदश्यांयदाभवेत् दर्शोवामंगलस्नानंदुःखशोकभयप्रदम् कालादर्शेत्रयोदशीनिषेधश्च त्रयोदशीयदाप्राप्ताक्षयंचातिचतुर्दशी रात्रिशेषेत्वमावास्यातदाभ्यंगात्रयोदशी चतुर्थयामेस्नानमुक्तम् ज्योतिर्निबंधेनारदोपि इषासितेचतुर्दश्यामिंदुक्षयतिथावपि ऊर्जादौस्वातिसंयुक्तेतदादीपावलीभवेत् तैलेलक्ष्मीर्जलेगंगादीपावल्याश्चतुर्दशीं प्रातःस्नानंतुयःकुर्याद्यमलोकं

नपश्यति अपामार्गमथोतुंबीभ्रामयेच्छिरसोपरि अपामार्गस्यपत्राणिनरकस्यक्षयायवै ततश्चतर्पणंकार्यंधर्मराजस्यनामभिः अमावा
स्याच्चतुर्दश्योःप्रदोषेदीपदानतः यममार्गांधिकारेभ्योमुच्यतेकार्तिकेनरः अथकथा वालखिल्याऊचुः पूर्वविद्धचतुर्दश्यामाश्विनस्य
सितेतरे पक्षेप्रत्यूषसमयेस्नानंकुर्यात्प्रयत्नतः अरुणोदयतोन्यत्ररिक्तायांस्नातियोनरः तस्याब्दिकभवोधर्मोनश्यत्येवनसंशयः तथा
कृष्णाच्चतुर्दश्यामाश्विनेर्कोदयेस्फराः यामिन्याःपश्चिमेयामेतैलाभ्यंगोविशिष्यते यदाचतुर्दशीनस्याद्द्विदिनेचेद्विधूदये दिनद्वयंभवेच्चा
पितदापूर्वैवगृह्यते बलात्काराद्धठाद्वापिशिष्टत्वान्नकरोतिचेत् तैलाभ्यंगंचतुर्दश्यांरौरवनरकंव्रजेत् तैलेलक्ष्मीर्जलेगंगादीपावल्या
श्चतुर्दशीम् अपामार्गमथोतुंबींप्रपुंनाडमथापरम् भ्रामयेत्स्नानमध्येतुनरकस्यक्षयायवै दिनत्रयंत्रिवारंचपठित्वामंत्रमुत्तमम् सिता
लोष्टसमायुक्तंसकंटकदलान्वितम् हरपापमपामार्गभ्राम्यमाणःपुनःपुनः इष्टबंधुजनैःसार्द्धमेवंस्नानंसमाचरेत् ततोमंगलवासांसिप
रिधायात्मभूषणम् कृत्वाचतिलकंदत्वाकार्तिकस्नानमाचरेत् स्नानांगतर्पणंकृत्वायमंसंतर्पयेत्ततः यमायधर्मराजायमृत्यवेचांतकायच
वैवस्वतायकालायसर्वभूतक्षयायच औदुंबरायदध्नायनीलायपरमेष्ठिने वृकोदरायचित्रायचित्रगुप्तायतेनमः चतुर्दशैतेमंत्राःस्युःप्रत्ये
कंचनमोन्विताः एकैकेनतिलैर्मिश्रान्दद्यात्त्रीनुदकांजलीन् यज्ञोपवीतिनाकार्यंप्राचीनावीतिनानतथा देवत्वंचपितृत्वंचयमस्यास्तिद्विरू
पता जीवसितापिकुर्वीततर्पणंयमभीष्मयोः नरकायप्रदातव्योदीपःसंपूज्यदेवताः अत्रैवलक्ष्मीकामस्यविधिःस्नानेमयोच्यते इषेभू
तेच्चदर्शेचकार्तिकप्रथमेदिने यदास्नायीतदाभ्यंगस्नानंकुर्याद्दिनोदये ऊर्जशुक्लद्वितीयायांयदिस्वातीभवेत्तदा मानवोमंगलस्नायी
नैवलक्ष्म्यावियुज्यते दीपैर्नीराजनादत्रसैषादीपावलिःस्मृता इंदुक्षयेपिसंक्रांतौरवौपातेदिनक्षये अत्राभ्यंगोनदोषायप्रातःपापाप-
नुत्तये माषपत्रस्यशाकेनभुक्त्वातस्मिन्दिनेनरः प्रेताख्यायांचतुर्दश्यांसर्वपापैःप्रमुच्यते इषासितचतुर्दश्यामिंदुक्षयतिथावपि ऊर्जा
दौस्वातिसंयुक्तेतदादीपावलिर्भवेत् कुर्यात्संलग्नमेतच्चदीपोत्सवदिनत्रयम् आश्विनस्यासितेपक्षेत्रयोदश्यादिषुत्रिषु क्रमात्सादैस्त्रि १९९
भिर्विष्णुरग्रहीद्भुवनत्रयं महाराजोबलिःप्रोक्तस्तुष्टेनहरिणाततः वरंयाचस्वभद्रंतेयद्यन्मनसिवर्तते इतिविष्णुवचःश्रुत्वाबलिर्व

चनमब्रवीत् आत्मार्थेनचयाचेहंसर्वंदत्तंमयातव लोकार्थंयाचयिष्यामिशक्तश्चेद्देहिमेप्रभो मयायातेधरादत्तावामनछद्मरूपिणे त्रिभिःपादैस्त्रिदिवसैःसाचाक्रांतायतस्त्वया तस्मादेतद्बलेराज्यमस्तुअन्हत्रयंहरे मद्राज्येदीपदानंयेस्तुविकुर्वंतिमानवाः तेषांगृहेनवस्त्रीयंसदातिष्ठतुसुस्थिरा ममराज्येगृहेयेषामंधकारःपतिष्यति अलक्ष्मीसहितस्तेषामंधकारोस्तुसर्वदा चतुर्दश्यांतुयेदीपान्नरकायददातिच तेषांपितृगणःसर्वोनरकात्स्वर्गमाप्नुयात् बलिराज्यंसमासाद्ययैर्नदीपावलिःकृता तेषांगृहेकथंदीपाःप्रज्वलिष्यंतिकेशव बलिराज्येतुयेलोकाःशोकदुःखानुकारिणः तेषांगृहेसदाशोकःपतेदितिनचान्यथा चतुर्दशीदिनेराज्यंबलेरस्त्वितियाचयेत् पुरावामनरूपेणप्रार्थयित्वाधरामिमाम् ददावतिथिरिंद्रायबलिंपातालवासिनम् कृत्वादैत्यपतिंदद्यादहोरात्रत्रयंहरिः तस्मान्महोत्सवंचात्रसर्वथैवहिकारयेत् महारात्रिःसमुत्पन्नाचतुर्दश्यांमुनीश्वराः अतस्तदुत्सवःकार्यःशक्तिपूजापरायणैः बलिराज्यंसमासाद्ययक्षगंधर्वकिन्नराः औषध्यश्चपिशाचाश्चमंत्राश्चमणयस्तथा सर्वएवप्रहृष्यंतिनृत्यंतिचनिशासुते तत्तन्मंत्राश्चसिध्यंतिबलिराज्येनसंशयः बलिराज्यंसमासाद्ययथालोकाःसुहर्षिताः तथातद्दिनमध्येपिजनाःस्युर्हर्षिताभृशम् तुलासंस्थेसहस्रांशौप्रदोषे भूतदर्शयोः उल्काहस्तानराःकुर्युःपितृणांमार्गदर्शनम् नरकस्थाश्चयेप्रेतास्तेमार्गंतुप्रतात्सदा पश्यंत्येवनसंदेहःकार्योत्रमुनिपुंगवैः आश्विनस्यासितेपक्षेभूतादितिथयस्त्रयः दीपदानादिकार्येषुग्राह्यामध्यान्हकालिकाः ततःप्रदोषसमयेदीपान्दद्यान्मनोरमान् ब्रह्मविष्णुशिवादीनांमठेषुभवनेषुच प्राकारोद्यानवापीषुप्रतोलीनिकटेषुच मंदुरासुविविक्तासुहस्तिशालासुचैवहि इतिविशेषांतरेलैंगे ततःप्रेतचतुर्दश्यांभोजयित्वातपोधनान् शैवान्विप्रांस्त्वथपरान् शिवलोकेमहीयते दानंदत्वातुतेभ्यश्चयमलोकंनगच्छति नक्तंप्रेतचतुर्दश्यांयःकुर्याच्छिवतुष्टये ततोक्रतुशतेनापिप्राप्यतेपुण्यमीदृशं शिवरात्रौतथातस्यांलिंगस्यापिप्रपूजया अक्षयांल्लभतेभोगान् शिवसायुज्यमाप्नुयात् यदिस्युःसंगवादर्वागेताश्चतिथयस्त्रयः दीपदानादिकार्येषुकर्तव्याःपूर्वसंयुताः इतिनरकचतुर्दशीदीपदानंसमाप्तम् अथकार्तिकशुक्लचतुर्दश्यांवैकुंठचतुर्दशीव्रतम् तदुक्तंसनत्कुमारसंहितायाम् वर्षेवैहेमलंबाख्येमा

सिश्रीमतिकार्तिके शुक्लपक्षेचतुर्दश्यामरुणोदयसंभवे महादेवतिथौब्राह्मेमुहूर्तेमणिकर्णिके स्नात्वाविश्वेश्वरोदेव्याविश्वेश्वरमपूजयत् संक्षेपंज्योतिषस्तस्यप्रतिष्ठाख्यंतदाकरोत् स्वयमेवतदात्मानंचरन्पाशुपतव्रतम् ततःप्रभातेविमलेकृत्वापूजांमहाद्भुतां दंडपाणेर्महानाम्निवनेस्मिन्कृतपारणः श्रीमद्भवानीसदनंप्रविश्येदमनुत्तमम् इतिसनत्कुमारसंहितोक्तेः अथकथा वालखिल्याऊचुः कार्तिकस्यसितेपक्षेचतुर्दश्यांसमागमत् वैकुंठेशस्तुवैकुंठाद्वाराणस्यांकृतेयुगे रात्र्यांतुर्यांशशेषायांस्नात्वासौमणिकर्णिके गृहीत्वाहेमपद्मानांसहस्रंवैततोव्रजत् अतिभक्त्यापूजयितुंशिवयासहितंविभुं विधायपूजांवैश्वेशींततःपद्मैरपूजयत् सहस्रसंख्यांकृत्वादावेकनाम्नाततःपरम् आरब्धंपूजनंतेनशिवस्तद्भक्तिमैक्षत एकपद्मंपद्ममध्यान्निलीयात्तंहरेणतु ततःपूजितवान्विष्णुरेकोनंकमलंलभूत् इतस्ततस्तेनदृष्टंपद्मंतिष्ठतिनक्वचित् कमलेषुभ्रमोजातोऽथवानामक्रमेभ्रमः क्षणंविचार्यसहरिर्नमेनामभ्रमोभवत् पद्मेष्वेवभ्रमोजातोविचार्यैवंपुनःपुनः सहस्रपद्मसंकल्पःपूजार्थंतुकृतोमया अर्च्यःकथंमहादेवोएकोनकमलैर्मया यद्यानेतुंगमिष्यामिभंगःस्यादासनस्यतु किंविधेयमतःशंभोःपूजनेचिंतयन्हरिः एकःप्रकारउत्पन्नोहृदयेस्यमुनीश्वराः पुंडरीकाक्षइत्येवंमांवदंतिमुनीश्वराः नेत्रंमेपद्मसदृशंपद्मार्थेत्वर्पयाम्यहम् इतिनिश्चित्यमनसिदत्वातर्जनिकांसतु नेत्रमध्यात्तदुत्पाट्यमहादेवस्तुपूजितः ततोमहेश्वरस्तुष्टोवाक्यमेतदुवाचह महादेवउवाच त्वत्समोनास्तिमद्भक्तस्त्रैलोक्येसचराचरे राज्यंदत्तंत्रिलोक्यास्तेभवत्वंलोकपालकः अन्यद्वरयभद्रंतेवरंयन्मनसेप्सितम् अवश्यमेवदास्यामिनात्रकार्यविचारणा मद्भक्तिंतुसमालंब्ययेद्विषंतिजनार्दनं तेमद्द्वेष्यानराविष्णोव्रजेयुर्नरकंध्रुवम् विष्णुरुवाच त्रैलोक्यरक्षाकरणंममादिष्टंमहेश्वर दुर्मदाश्चमहासत्वादैत्यामार्याःकथंमया शिवउवाच एतत्सुदर्शनंचक्रंसर्वदैत्यनिकृंतनम् गृहाणभगवन्विष्णोमयातुभ्यंनिवेदितम् अनेनसर्वदैत्यानांभगवन्कदनंकुरु एवंचक्रंहरेर्दत्वाततोवचनमब्रवीत् शिवउवाच वर्षेचहेमलंबाख्येमासिश्रीमतिकार्तिके शुक्लपक्षेचतुर्दश्यामरुणाभ्युदयंप्रति महादेवतिथौब्राह्मेमुहूर्तेमणिकर्णिके स्नात्वावैश्वेश्वरंलिंगंवैकुंठादेत्यपूजिनं सहस्रकमलैस्तस्माद्भविष्यतिममप्रिया विख्यातासर्वलोकेषुवैकुं

गरव्यचतुर्दशी अन्यंवरंप्रदास्यामिशृणुविष्णोवचोमम पूर्वरात्रौतुतेपूजा कर्तव्यासर्वजातिभिः उपवासंदिवाकुर्यात्सायंकालेनवार्च
नं पश्चान्ममार्चनंकार्यमन्यथानिष्फलंभवेत् ग्राह्यातुहरिपूजायांरात्रिव्यापाचतुर्दशी अरुणोदयवेलायांशिवपूजांसमाचरेत् स
हस्रकमलैर्विष्णुरादौयैः पूजितोनरैः पश्चादीशःपूजितश्चेज्जीवन्मुक्तास्तएवहि सायंस्नात्वापंचनदेबिंदुमाधवमर्चयेत् सहस्रना
मभिर्विष्णोःकमलैःसुमनोहरैः मणिकर्ण्यांततःस्नात्वाविश्वेश्वरमथार्चयेत् सहस्रनामभिःपुण्यैर्जीवन्मुक्तःसएवहि स्नात्वा
योविष्णुकांच्यांवानंतसेनंसमर्चयेत् रुद्रकांच्यांततःस्नात्वाप्रणवेशंसमर्चयेत् पृथिव्यांचश्रुतौयेयेधर्माःप्रोक्तामहर्षिभिः सर्वेषां
फलमाप्नोतिनात्रकार्याविचारणा आदौस्नात्वावन्हितीर्थेयजेन्नारायणंततः रेतोदकेततःस्नात्वाकेदारेशंसमर्चयेत् इहैवार्थी
वनामर्थोभवेन्नास्त्यत्रसंशयः स्थलपद्मैस्त्वत्रपूजाकर्तव्याजलजक्षयात् आदौस्नात्वासूर्यपुत्र्यांवेणीमाधवमर्चयेत् जान्हव्यां
चततःस्नात्वासंगमेशंप्रपूजयेत् रक्तपद्मैःश्वेतपद्मैर्हरिंरुद्रंक्रमणेतु सर्वाःश्रिय स्तस्यवश्याःसत्यंविष्णोमयोदितम् मोक्षार्थेका
शिकामध्येनिष्ठतःशुभदायकौ बिंदुमाधवविश्वेशौजगदानंददायकौ नलभेत्पूजयित्वाकिंमोक्षंविश्वेश्वरंहरिम् विनायोहरिपू
जांतुकुर्याद्रुद्रस्यचार्चनम् वृथातस्यभवेत्पूजासत्यमेतद्वचोमम एवंतस्मैवरंदत्वातत्रैवांतरधीयत तस्मात्सर्वप्रयत्नेनपूज्यौहरि
हराबुभौ प्राप्तेकलियुगेघोरेशौचाचारविवर्जिते तत्संख्यैर्वर्षशतैर्गतैर्देवोमहेश्वरः वाराणसीस्थलिंगानिपातालेसन्नियुंक्षति त
तोद्विगुणवर्षैस्तुगंगावाराणसीतथा भविष्यतिअदृश्यासाततोवैस्तुमुनीश्वराः अंतर्हितायदाकाशीभविष्यतितदामुने नाशस्तु
लिंगाचिन्हानांनिःप्रभाःसकलाजनाः चतुर्दशाब्दंदुर्भिक्षंमहामारीसमुद्भवः गोवधश्चापिसर्वत्रमृत्तिकाभस्मसन्निभा गंगो
त्तर्यांतुयाधारापतेद्भगिरथाश्रमे हरिद्वाराच्चवायव्यांतस्यालोपोभविष्यति भागीरथ्यांगतायांतु मर्कटीतंतुसन्निभाः भवि-
ष्यंतिजलेकीटास्तोयंनीलीनिभंतथा चतुर्वर्षसहस्रैस्तुशैलस्याःसर्वदेवताः सत्वंत्यक्त्वागमिष्यंतिमानसंचसरोवरम् गतेषु
शैलदेवेषुराजानोधैर्यविच्युताः पापिष्ठाश्चदुराचारानानादुःखेनदुःखिताः कलेरयुतवर्षाणिभविष्यंतियदाखग श्रौतमार्गस्य

लोपोहि भविष्यतिनसंशयः तदालोकाभविष्यंतिमद्यपानपरायणाः स्वल्पायुषः स्वल्पभाग्यानानारोगैश्चपीडिताः द्विजास्तु दक्षिणेदेशेवेदज्ञाःसंभवंतिच आनीयतान्शाककर्त्ताधर्मसंस्थापयिष्यति इतिसनत्कुमारसंहितायांवैकुंठचतुर्दशीकथासमाप्ता अथशिवरात्रिव्रतम् आमांतमासेनमाघकृष्णचतुर्दश्यांशिवरात्रिव्रतम् तच्चार्धरात्रव्यापिन्यांकार्यं तदुक्तंनारदसंहितायां अर्धरात्रयुतायत्रमाघकृष्णचतुर्दशी शिवरात्रिव्रतंतत्रसोश्वमेधफलंलभेत् ईशानसंहितायामपि माघकृष्णचतुर्दश्यामादिदेवोमहानिशि शिवलिंगमभूत्तत्रकोटिसूर्यसमप्रभम् तत्कालव्यापिनीग्राह्याशिवरात्रिव्रतेतिथिः माघकृष्णत्वंचात्रामांतमासपरत्वेन अतएव चतुर्दश्यांतुकृष्णायांफाल्गुनेशिवपूजनम् तामुपोष्यप्रयत्नेनविषयान्परिवर्जयेत् इतिक्रमंतुवचनेपौर्णमांतमासोप्युक्तः महानिशाच महानिशाद्वेघटिकेरात्रेर्मध्यमयामयोरितिदेवलोक्तेर्निशीथरूपैव एवंचार्धरात्रशब्दोपितत्परएव दिनद्वयेनिशीथव्याप्तावव्याप्तौवापरैव प्रदोषव्यापिनीलाभात् दिनद्वयेचतुर्दश्यांपूर्वात्याज्यापराशुभा आदित्यास्तमयेकालेअस्तिचेद्याचतुर्दशी प्रदोषव्यापिनीग्राह्याशिवरात्रेचतुर्दशी रात्रौजागरणंयस्मात्तस्मात्तांसमुपोषयेत् अहोरात्रव्रतंयच्चएकमेकतिथौगतम् तस्यामुभययोगिन्यामाचरेत्तद्व्रतंव्रती तिकामिकाशिवरात्रिःशिवरहस्ये स्मृत्यंतरादिवचनाच्च नचपूर्वदिनेधिकव्याप्तिवशात्पूर्वैवेतिशंक्यम् एतस्यप्रभूयसास्यात् अर्धत्वमितिन्यायमात्रत्वेनवचनबाधकत्वायोगात् प्रत्युतनिरुक्तवचनैरेवतद्बाधाच्च पूर्वदिनेनिशीथेपरदिनेप्रदोषेतदापूर्वैव अर्धरात्रात्पुरस्ताच्चेज्जयायोगोयदाभवेत् पूर्वविद्धैवकर्तव्याशिवरात्रिःशिवप्रिया इतिपाद्मेजयायोगस्यविहितत्वात् महतामपिपापानांदृष्टावैनिःकृतिःपुरा नदृष्टाकुर्वतांपुंसांकुहूयुक्तांतिथिंशिवाम् इतिस्कांदे दर्शयोगस्यनिंदितत्वाच्च यत्तुकालतत्वविवेचनेनव्यैर्दिनद्वयेनिशीथव्याप्तावेवपूर्वविद्धाविधायकान्युत्तरविद्धानिषेधकानिवचनानिसावकाशानीत्युक्त्वापूर्वैवग्राह्येत्युक्तम् तन्नसमंजसं निशाद्वयेचतुर्दश्यांपूर्वात्याज्यापराशुभेतिमाधवाद्युदाहृतकामिकवचनविरोधात् नच

पूर्वविद्धाविधायकानांउत्तरविद्धानिषेधकानांविषयालाभइतिशंक्यम् प्रदोषनिशीथयोर्विरोधेनिशीथग्राह्यतायाउपोद्धानबलत्वेन विषयलाभस्यानुपदमेवोक्तत्वात् प्रदोषव्याप्तिभावात् यदादिनद्वयेनिशीथव्याप्तिस्तदापरैवमाघासितेभूतदिनंहिराजन्नुपैतियोगंयदिपंचदश्याः जयाप्रयुक्तांनतुजातुकुर्याच्छिवस्यरात्रिंप्रियकृच्छिवस्य इतिहेमाद्रिमाधवेप्युदाहृतपुराणवचनादितिपरैव अस्मिन्व्रतेउपवासजागरणपूजायांफलसंबंधात् त्रयमपिप्रधानम् तथाचनागरखंडे उपवासप्रभावेनबलादपिचजागरात् शिवरात्रेस्तथातस्यांलिंगस्यापिप्रपूजया अक्षय्यांलभतेकामान्शिवसायुज्यमाप्नुयात् इदंचव्रतंसंयोगपृथक्त्वन्यायेननित्यंकाम्यंच परात्परतरंनास्तिशिवरात्रिपरात्परा नपूजयतिभक्त्येशंरुद्रंत्रिभुवनेश्वरम् जंतुजन्मसहस्रेषुयुज्यतेनात्रसंशयः इतिस्कांदे पारणंचैतद्भूते स्कांदेतिथिमध्येतदंतेचोक्तम् उपोषणंचतुर्दश्यांचतुर्दश्यांतुपारणम् कृतैःसुकृतलक्षैश्चलभ्यतेयदिवानवा ब्रह्मांडोदरमध्येतुयानितीर्थानिसंतिवै संस्थितानिभवंतीहभूतायांपारणेकृते तिथ्यंतेपारणंकुर्याद्विनाशिवचतुर्दशीं तथा कृष्णाष्टमीस्कंदषष्ठीशिवरात्रिस्तथैवच एताःपूर्वयुताकार्यास्तिथ्यंतेपारणंभवेत् अनयोर्विरुद्धवचनयोर्व्यवस्थैवंमाधवेनोक्ता यामत्रयोर्ध्वगामिन्यांप्रातरेवहिपारणमिति वचनाद्यामत्रयमध्येचतुर्दशीसमाप्तौतिथ्यंतेतदुत्तरगामित्वेतुप्रातस्तिथिमध्येएवेति तिथिमध्यकालोमुख्यस्तदंतकालोगौणः उत्तरभावित्वादित्याहुः केचित्तुशक्तस्तिथ्यंतेअशक्तस्तिथिमध्येएवेत्यूचुः शिवरात्रिग्रहणंतुपूर्वविद्धाविधानार्थमिति वस्तुतस्तुसात्वस्तमयपर्यंतव्यापिनीचेत्परेहनि दिवैवपारणंकुर्यात्पारणंनैवदोषभाक् शिवरात्रिकरणपठितकालादर्शादिलिखितवचनाद्दिवातिथिसमाप्तौतिथ्यंतेन्यथातन्मध्यएवेति इतिनिर्णयः अथव्रतविधिः मासपक्षाद्युल्लिख्यममपापक्षयार्थमक्षय्यमोक्षभोगप्राप्त्यर्थंशिवरात्रिव्रतंकरिष्ये इतिसंकल्प्य षोडशोपचारैःशिवपूजांकुर्यात् तत्रपूजा आगच्छदेवदेवेशमर्त्यलोकहितेच्छया पूजयामिविधानेनप्रसन्नःसुमुखोभव सहस्रशीर्षेत्यावाहनम् पादासनंकुरुप्राज्ञनिर्मलंस्वर्णनिर्मितम् भूषितंविविधैरत्नैःकुरुत्वंपादुकासनम् पुरुषएवेदमित्यासनं गंगादिसर्वतीर्थेभ्यो मयाप्रार्थनयाहृतम् तोयमेतत्सुखस्पर्शंपाद्यार्थंप्रतिगृह्यताम् एतावानस्येतिपाद्यं गंधोदकेनपुष्पेणचंदनेनसुगंधिना अर्घ्यंगृ

हाणदेवेशभक्तिंमेह्यचलांकुरु त्रिपादूर्ध्वइत्यर्घ्यम् कर्पूरोशीरसुरभिशीतलंविमलंजलं गंगायास्तुसमानीतंगृहाणाचमनीयकं त
स्माद्विराळेत्याचमनीयं मंदाकिन्याःसमानीतंहेमांभोरुहवासितं स्नानायतेमयाभक्त्यानीरंस्वीक्रियतांविभो यत्पुरुषेणेतिस्नानं वस्त्रं
सूक्ष्मंदुकूलंचदेवानामपिदुर्लभम् गृहाणत्वमुमाकांतप्रसन्नोभवसर्वदा तंयज्ञमितिवस्त्रं यज्ञोपवीतंसहजंब्रह्मणानिर्मितंपुरा आयु
ष्यंभववर्चस्वउपवीतंगृहाणमे तस्माद्यज्ञात्सर्वेत्युपवीतं श्रीखंडंचंदनंदिव्यंगंधाढ्यंसुमनोहरम् विलेपनंसुरश्रेष्ठचंदनंप्रतिगृह्यतां
तस्माद्यज्ञात्सर्वहुतइतिगंधम् माल्यादीनिसुगंधीनिमालत्यादीनिवैप्रभो मयाहृतानिपुष्पाणिपूजार्थंप्रतिगृह्यताम् तस्मादश्वेतिपुष्पं
वनस्पतिरसोद्भूतोगंधाढ्यश्चमनोहरः आघ्रेयःसर्वदेवानांधूपोयंप्रतिगृह्यताम् यत्पुरुषमितिधूपं साज्यंचवर्तिसंयुक्तंवह्निनायोजितंमया
दीपंगृहाणदेवेशत्रैलोक्यतिमिरापहम् ब्राह्मणोस्येतिदीपं नैवेद्यंगृह्यतांदेवभक्तिंमेह्यचलांकुरु ईप्सितंमेवरंदेहिपरत्रचपरांगतिम् चं
द्रमामनसइतिनैवेद्यं पूगीफलंमहद्दिव्यंनागवल्यादलैर्युतम् कर्पूरैलासमायुक्तंतांबूलंप्रतिगृह्यताम् तांबूलं हिरण्यगर्भेतिदक्षि-
णां चक्षुर्दंसर्वलोकानांतिमिरस्यनिवारणम् आर्तिक्यंकल्पितंभक्त्यागृहाणपरमेश्वर नीराजनं फलेनफलितंसर्वंत्रैलोक्यंसचरा
चरम् तस्मात्फलप्रदानेनसफलाश्चमनोरथाः फलं यानिकानिचपापानिब्रह्महत्यासमानिच तानितानिविनश्यंतिप्रदक्षिणपदेपदे
नाभ्याआसीतिप्रदक्षिणां मंत्रहीनंक्रियाहीनंभक्तिहीनंसुरेश्वर यत्पूजितंमयादेवपरिपूर्णंतदस्तुमे सप्तास्यासन्नितिनमस्कारं स
द्योजातमितिवामदेवायेतिवा यज्ञेनयज्ञमितिमंत्रपुष्पांजलिं श्रूयतांधर्मसर्वस्वंशिवरात्रौशिवार्चनम् व्रतयज्ञविधानेनस्वर्गपुण्येनक
र्मणा कृत्वास्नानंशुचिर्भूत्वाधौतवस्त्रसमन्वितः स्थापयेद्देवदेवेशंमंत्रैर्वेदसमुद्भवैः ततःपूजाप्रकर्तव्यापूर्वोक्तविधिनाततः नमोयज्ञ
जगन्नाथनमस्त्रिभुवनेश्वर पूजांगृहाणमद्दत्तांमहेशप्रथमंपदे प्रथमप्रहरपूजा पूर्वेनंदीमहाकालौशृंगीभृंगीचदक्षिणे वृषस्कंधौ
पश्चिमेचदेशकालौतथोत्तरे गंगाचयमुनाचैवपार्श्वेचैवव्यवस्थिते नमोव्यक्तायसूक्ष्मायनमस्तेत्रिपुरांतक पूजांगृहाणदेवेशयथाश
क्त्योपपादितं द्वितीयप्रहरे बद्धोहंविविधैःपाशैःसंसारभयबंधने पतितंमोहजालेमांत्वंसमुद्धरशंकर तृतीये चतुर्थेप्रहरेआद्य

वतु नमःशिवायशांतायसर्वपापहरायच शिवरात्रौमयादत्तंगृह्णाणार्घ्यंप्रसीदमे द्वितीये दुःखदारिद्र्यभावैश्चदग्धोहंपार्वतीपते मां
वैत्राहिमहादेवगृह्णाणार्घ्यंनमोस्तुते तृतीये किंनजानासिदेवेशतावद्भक्तिंप्रयच्छमे स्वपादाग्रतलेदेवदास्यंदेहिजगत्पते चतुर्थे इ
तिप्रार्थना इतिशिवपूजासमाप्ता अथकथा सूतउवाच सकारणमशेषस्यजगतःसर्वदाशिवः गोब्राह्मणनृपाणांचशिवंभवतु
मेसदा कैलासशिखरासीनंदेवदेवंजगद्गुरुम् पंचवक्त्रंदशभुजंत्रिनेत्रंशूलपाणिनम् पिनाकशोभितकरंखड्गखेटकधारिणम् क
पालखट्वांगधरंनीलकंठसुशोभितम् भस्मांगव्यालशोभाढ्यमस्थिमालाविभूषितम् नीलजीमूतसंकाशंसूर्यकोटिसमप्रभम् क्रीडं
तंचशिवंतत्रगणैश्चपरिवारितम् विसृज्यदेवताःसर्वास्तिष्ठंतंपरमेश्वरम् तंदृष्ट्वादेवदेवेशंप्रहस्योत्फुल्ललोचनम् पार्वतीपरिपप्रच्छविन
यावनतास्थिता गौरीप्रोवाचभर्त्तारंविस्मयोत्फुल्ललोचना पार्वत्युवाच कथयस्वप्रसादेनयज्ञोप्यंव्रतमुत्तमम् श्रुतास्त्वयोक्तादेवे
श व्रतानांनिर्णयाःशुभाः तथावैदानधर्माश्चतीर्थधर्मास्त्वयोदिताः नास्तिमेनिश्चयोदेवभ्रांताहंचपुनःपुनः तस्माद्वदस्वमेदेवह्येकंनिःसंश
यंप्रभो व्रतानामुत्तमंदेवभुक्तिमुक्तिप्रदायकम् तदहंश्रोतुमिच्छामिकथयस्वममप्रभो ईश्वरउवाच शृणुदेविप्रवक्ष्यामिव्रतानामुत्तमं
व्रतम् यन्नकस्यचिदाख्यातंरहस्यंमुक्तिदायकम् येनैवकथ्यमानेनयमोविलयतांव्रजेत् तदहंकथयिष्यामिशृणुष्वैकमनाःप्रिये माघमा
सेकृष्णपक्षेअमायुक्ताचतुर्दशी शिवरात्रिस्तुसाज्ञेयासर्वयज्ञोत्तमोत्तमा दानैर्यज्ञैस्तपोभिश्चव्रतैश्चविविधैरपि नतीर्थैस्तद्भवेत्पुण्यंशि
वरात्रिव्रतोद्भवं शिवरात्रिसमंनास्तिव्रतानामुत्तमंव्रतं ज्ञानतोज्ञानतोवापिकृत्वामोक्षमवाप्नुयात् मृतास्तेनिरयंत्यक्त्वागतास्तेशिवसन्नि
धौ सर्वमंगलशीलाचसर्वामंगलनाशिनी भुक्तिमुक्तिप्रदाचैषासत्यंसत्यंवरानने देव्युवाच कथंयमपुरंत्यक्त्वाशिवलोकंव्रजेन्नरः
एतन्मेमहदाश्चर्यंप्रत्यक्षंकुरुशंकर शंकरउवाच शृणुदेवियथावृत्तांकथांपौराणिकींशुभाम् यमशासनहंत्रींचशिवस्थानप्रदायिनीं
कश्चिदासीत्पुरादेविनिषादोजीवघातकः प्रत्यंतदेशवासीचभूधरासन्निकेतनः सीमांतेससदानिष्ठन्कुटुंबपरिपालकः क्रूरोनित्यंधनु
र्धरीश्यामांगःकृष्णकंचुकः बद्धगोधांगुलित्राणःसदैवमृगयारतः एवंविधोनिषादोसौचतुर्दश्यांदिनेशुभे व्यवहारिकेश्चद्रव्यार्थंदेवागा

रेभ्ररोधितः तेनापिदेवतादृष्टाजनानांवचनंश्रुतम् उपवासव्रतानांचशिवःशिवशिवेतिच दिनांतेतैस्तदामुक्तःप्रातर्द्रव्यंप्रदीयतां ततोसौ
धनुरादायदक्षिणेनगतःस्वयम् आगच्छन्सवनोद्देशेजनहासंचकारसः शिवःशिवकिमेतद्धैकुर्वंतिनगरेजनाः वनेचरान्निरीक्षंस्तत्रचतुर्दि
क्षुइतस्ततः पदंचमृगमार्गंच अन्वेष्यन्सूकरान्मृगान् इतश्चेतश्चधावन्वै आमिषेलुब्धमानसः वनंचपर्वतान्सर्वान्भ्रमित्वागिरिकंदराः सं-
प्राप्तंतेननोकिंचिन्मृगसूकरचित्तलं निराशोलुब्धकस्तिष्ठन्तदाह्यस्तंगतोरविः चिंतयित्वाजलोपांतेजागरंजीवघातनम् संविधास्याम्यहो
रात्रौनिश्चितंममजीवनम् गतोसौजलसामीप्यंतीरस्थोजालिमध्यतः आश्रमंकर्तुमारेभेआत्मनोगुप्तिकारणात् जालिमध्येमहालिंगंस्थि
तंस्वायंभुवंशुभम् बिल्ववृक्षोमहान्दिव्योजालिमध्येचसंस्थितः गृहीत्वातस्यपर्णानिमार्गशुद्ध्यर्थमक्षिपत् क्षिप्त्वानिदक्षिणेभागेनिपे
तुर्लिंगमूर्ध्नि नदिवाभोजनंतस्यआमिषेलुब्धमानसः ततश्चिंतयमानस्यननिद्रासमजायत तस्यगंधंसमासाद्यलुब्धकस्यवरानने
नतिष्ठंतिमृगाःसर्वेशरघातभयात्तदा मृगान्निरीक्षतस्तस्यनिद्रानाशोप्यजायत बिल्वमध्येगतस्यास्यप्रथमःप्रहरोगतः ततोजलार्थमा
याताहरिणीगर्भसंयुता यौवनस्थासुरूपाचस्तनपीनासुशोभना निरीक्षंतीदिशःसर्वाभृशमुत्फुल्ललोचना लुब्धकेनापिसादृष्टाबाणगोच
रमागता बाणश्चसंधितस्तेनएकदृष्टेनचेतसा त्रोटयित्वाथपत्राणिप्रक्षिप्तानिशिवोपरि शिवंदेवंसदाध्यायन्शीतेनपरिपीडितः एतस्मि
न्नंतरेदृष्टोहरिण्यालुब्धकस्तदा लुब्धकस्तुस्वरूपेणकृतांतइवदृश्यते दृष्ट्वातुतस्यसंधानंयमदंष्ट्रासमप्रभम् मृगीसादिव्ययावाचालुब्ध
कंवाक्यमब्रवीत् मृग्युवाच स्थिरोभवमहाव्याधसर्वजीवनिकृंतन कथयस्वमहाबाहोकिमर्थंमांहनिष्यसि लुब्धकउवाच कुटुंबं
पीडितंमेद्यक्षुधयाचमयासह पुष्याम्यहंसदैवापिह्यामिषाहारभोजनैः धनंवैमद्गृहेनास्तितेनत्वांहन्मिशोभने सूतउवाच यामपूजा
प्रभावेनजागरोपोषणेनच चतुर्थंशेनपापानांविमुक्तोलुब्धकस्तदा लुब्धकस्तुततोदृष्ट्वामृगींमानुषभाषिणीं आश्चर्यंपरमंदृष्ट्वाकिंचि-
द्धर्मसमन्वितः लुब्धकउवाच मयाहिघातिताजीवाउत्तमाधममध्यमाः नश्रुताईदृशीवाणीश्वापदानांकथंनच कस्मिन्देशेत्वमुत्पन्ना
कस्मात्स्थानादिहागता कथयस्वप्रयत्नेनपरंकौतूहलंहिमे मृग्युवाच शृणुत्वंलुब्धकश्रेष्ठकथयामितवाखिलं आसीत्पूर्वंमहारम्या

स्वर्गेशक्रस्यचाप्सरा अनंतरूपलावण्यासौभाग्येनचगर्विता सौभाग्यमदपुष्टांगोदानवोबलगर्वितः मयैवचकृतोभर्त्ताहिरण्याक्षोमहासुरः तेनसार्द्धंमयाभुक्तंचिरकालंयथेप्सितम् एवंकालेगतोव्याधक्रीडंत्यामेस्मरेणच एकदाप्रेक्षितुंनृत्यंशंकरस्यगतातदा यावद्गच्छाम्यहंतत्रतावन्मांशंकरोब्रवीत् क्वगतात्वंवरारोहेकेनवासंगताशुभे किंवासौभाग्यगर्वेणनायाताममममंदिरं सत्यंकथयशीघ्रंत्वंनोवाशापंददामिते शापभीत्यामयातत्र इत्युक्तंशंकराग्रतः शृणुदेवप्रवक्ष्यामिशापानुग्रहकारक ममास्तिभर्त्ताविश्वेशदानवेंद्रोमहाबलः तेनसार्द्धंमयादेवक्रीडितंनिजमंदिरे तेनाहंनागताशीघ्रंसृष्टिसंहारकारक रुद्रस्तद्वचनंश्रुत्वासकोपोवाक्यमब्रवीत् मृगःकामातुरोनित्यंहिरण्याक्षोभविष्यति त्वंमृगीतस्यभार्यावैभविष्यसिनसंशयः त्यक्त्वास्वर्गंतथादेवान्दानवंभोक्तुमर्हसि द्वादशाब्दानिभोभद्रेभविताशापएवते परस्परस्यशोकेनशापांतोपिभविष्यति अनुग्रहःपुनस्त्वेषःशंकरेणकृतःस्वयम् कदाचिद्धिव्याधवरोममसान्निध्यमाश्रितः वधार्थंतस्यसंप्राप्तापूर्वजन्मस्मरिष्यसि ततऊर्ध्वंनदारुद्रंदृष्ट्वामोक्ष मवाप्स्यसि शंकरोनमयादृष्टोवसंत्यास्मिन्महावने ततोदुःखमनुप्राप्तामांसमेद विवर्जिता गर्भाक्रांताविशेषेणनवध्याचेतिनिश्चितं त्वत्कुटुंबस्यतेनूनंभोजनंनभविष्यति आयास्यतिमृगीत्वन्यामार्गेणानेनलुब्धक पीनयौवनसंपन्नाबहुमांसामदोद्धता भोजनंसकुटुंबस्यतवसद्योभविष्यति अथवान्योमृगोव्याधपानार्थंतुजलाशये आगमिष्यतिप्रत्यूषेस्तु धार्तस्यनसंशयः गर्भंत्यक्त्वापुनश्चानबालान्संदिष्यबंधुषु शपथैरागमिष्यामिसंदिश्यचसखीजनं तस्यास्तद्वचनंश्रुत्वाव्याधोविस्मयमागतः क्षणमेकंतथास्थित्वाव्याधोवचनमब्रवीत् नागमिष्यतिचेदन्योजीवस्त्वमपिगच्छसि क्षुधयापीडितोहंवैकुटुंबंचविशेषतः प्रातस्त्वयाममगृहमागंतव्यंयथायथम् शपथैश्चव्रजत्वंहियथामेप्रत्ययोभवेत् पृथिवीवायुरादित्यःसत्येतिष्ठंतिदेवताः तस्मात्सत्येनगंतव्यंभवत्यास्वगृहंप्रति तस्यतद्वचनंश्रुत्वागर्भार्तासामृगीतदा चक्रेसत्यप्रतिज्ञांवैव्याधस्याग्रेपुनःपुनः मृग्युवाच द्विजोभूत्वातुयोव्याधवेदभ्रष्टोभिजायते स्वाध्यायसंध्यारहितःसत्यशौचविवर्जितः अविक्रयाणांविक्रेताअयाज्यानांचयाजकः तस्यपापेनलिप्यामियद्यहंनागमेपुनः दुष्टबुद्धौतुयत्पापंधूर्तेवाग्रामकंटके नास्तिकेचविशीलेचपरदाररतेतथा वेदविक्रयिणांचैवशवसूतकभोजने तेन

पापेनलिप्यामियद्यहंनागमेपुनः मृतशय्याप्रतिग्राहेमातापित्रोरपालके तेनपापेनलिप्यामियदिनायामितेगृहम् दानंदातुंप्रवृत्तस्ययोंत
रायकरोनरः तेनपापेनलिप्यामियदिनायामितेगृहम् देवद्रव्यंगुरुद्रव्यंब्रह्मद्रव्यंहरेत्तुयः तेनपापेनलिप्यामियदिनायामितेगृहम् दीपंदी
पेनयःकुर्यात्पादंपादेनधावयेत् तेनपापेनलिप्यामियदिनायामितेगृहं भर्त्तारंस्वामिनंमित्रमात्मानंबालमेवच गांविप्रंचगुरुंनारींयोमा
रयतिदुर्मतिः तेनपापेनलिप्यामियदिनायामितेगृहं अवैष्णवेचयत्पापंयत्पापंदांभिकेजने अजितेंद्रियेषुयत्पापंपरदोषानुकीर्तने कृतघ्ने
चकदर्यैचपरदाररतेतथा सदाचारविहीनेनपरपीडाप्रदायके परपैशून्ययुक्तेचकन्याविक्रयकारके हैतुकेबकवृत्तौचकूटसाक्ष्यप्रदेत
था एतेषांपातकंमह्यंयदिनायामितेगृहम् यत्पापंब्रह्महत्यायांपितृमातृवधेतथा तेनपापेनलिप्यामियदिनायामितेगृहम् यत्पापंलुब्ध
कानांचयत्पापंगरदायिनां तेनपापेनलिप्यामियदिनायामितेगृहं द्विभार्यःपुरुषोयस्तुसमदृष्ट्यानपश्यति तस्यपापेनलिप्यामियदिनायामि
तेगृहं सकृद्दत्त्वातुयःकन्यांद्वितीयायप्रयच्छति तेनपापेनलिप्यामियदिनायामितेगृहम् कथायांकथ्यमानायामंतरंकुरुतेनरः तस्य-
पापेनलिप्यामियदिनायामितेगृहम् पतिनिंदापरोनित्यंवेदनिंदापरोहियः तस्यपापेनलिप्यामियदिनायामितेगृहं यस्यसंग्रहणीभार्या-
ब्राह्मणीचविशेषतः तस्यपापेनलिप्यामियदिनायामितेगृहं प्रेतश्राद्धेतुयोभुंक्तेपतितेनबहुयाचके असच्छास्त्रार्थनिपुणेपुराणार्थवि
वर्जिते मूर्खेपाखंडनिरतेक्रयविक्रयकेद्विजे एतेषांपातकंमह्यंयदिनायामितेगृहम् एकाकीमिष्टमश्नातिभार्यापुत्रविवर्जितः आत्म
जांगुणसंपन्नांसमानसदृशेवरे नप्रयच्छतियःकन्यांनरोवैज्ञानदुर्लभः तेनपापेनलिप्यामियदिनायामितेगृहम् मृगीवाक्यंततःश्रु-
त्वालुब्धकोहृष्टमानसः संहृत्यबाणसंधानान्मुमोचहरिणींतदा तस्यासुक्तिप्रभावेनलिंगस्यापिप्रपूजनात् मुक्तोसौपातकैःसर्वैस्त
त्क्षणान्नात्रसंशयः द्वितीयेप्रहरेप्राप्तेमध्यरात्रेमहानिशि तस्मिन्नेवक्षणेप्राप्तेपरामासामृगीतदा संत्रस्ताभयसंभग्नापतिमन्वेष्यती
मुहुः जालिमध्येस्थितेनाथदृष्टासालुब्धकेनतु पुनर्वृक्षस्यपत्राणित्रोटयित्वाकरेणतु क्षिप्तानिदक्षिणेभागेलिंगोपरिदिदृक्षया त
स्यावधार्थंतेनाथोबाणोधनुषिसंधितः तिष्ठंस्तत्रैकचित्तेनकुटुंबार्थंजिघांसया निरीक्ष्यलुब्धकोयावद्बाणंतस्यांविमुंचति तावन्मृग्यास

संदृष्टो दृष्ट्वातंविह्वलाभवत् अद्यैवभगिनीमेहिलुब्धकेनविनाशिता ममकिंजीवितव्येनतस्यादुःखेनपीडिता १०० वरोमृत्युर्नशोकोवैदृष्ट्वा
व्याधंविशेषतः एवंसंचिंत्यहरिणीलुब्धकंवाक्यमब्रवीत् हरिण्युवाच धनुर्धरवरव्याधसर्वजीवनिकृंतन देहिमेवचनंचैकंपश्चात्त्वं
मांनिपातय आयाताहरिणीचैकामार्गेणानेन लुब्धक समायाताथवानैवसत्यंकथयसुव्रत तच्छ्रुत्वालुब्धकस्तत्रविस्मितोक्षणमैक्षत त
स्यारूक्यादृशीवाणीअस्याश्चैवतुतादृशी साचैषाचागतानूनंप्रतिज्ञापालनायच अथवान्यासमायातायातयाकथितापुरा लुब्धकउवा
च अहोरात्रंकृतंकष्टंकुटुंबार्थेमयामृगि अधुनात्वांहनिष्यामिदेवानांस्मरणंकुरु व्याधोक्तंवचनंश्रुत्वाहरिणीदुःखिताभृशम् व्याधंप्राह
रुदित्वावैभोमांव्याधनिपातय तेजोबलंतथासर्वंनिर्दग्धंविरहाग्निना अहंप्राणान्विमोक्षामिभोजनंतेनजायते बलवांश्चमहातेजामेद
मांससमन्वितः अन्यश्चपीनगौरांगोमृगोत्यत्रागमिष्यति अहंचदुर्बलानूनंमेदमांसविवर्जिता केवलंपापभाक्त्वंहिममप्राणविमोचकः
मार्गेणानेनभोव्याधमृगआयास्यतिस्फुटम् तंहत्वातेकुटुंबस्यतृप्तिर्नूनंभविष्यति तयोक्तंलुब्धकःश्रुत्वाकिंकरोमीत्यचिंतयत् मृग्यो
क्तोहिसंयुक्तार्थएषमेनिश्चयोहृदि संचिंत्यलुब्धकःप्राहमृगींशोकातुरांकृशां सत्यंवदमहाभागेप्रत्ययोमेयथाभवेत् तस्यतद्वचनंश्रु
त्वाहरिणीदुःखकर्शिता चक्रेसत्यप्रतिज्ञांतुव्याधस्याग्रेपुनःपुनः मृग्युवाच क्षत्रियस्तुरणंश्रुत्वासंग्रामंयोनगच्छति तस्यपापे
नलिप्येहंयदिनायामितेगृहम् भेदयंतितडागानिवापीश्चाथगवामपि मार्गस्थानंचयेघ्नंतिसर्वसत्वभयंकराः तेषांवैपातकंमह्यंयदि
नायामितेगृहं एतच्छ्रुत्वातुव्याधेनसापिमुक्तामृगीतदा जलंपीत्वातुबहुशोगतासद्योयथागतम् जालिमध्येस्थितस्यास्यद्वितीयःप्र
हरोगतः त्रोटित्वाबिल्वपत्राणिपुनर्देवेनियोजयत् पीडितोतीवशीतेनक्षुधयागृहचिंतया शिवःशिवेतिजल्पन्वैननिद्रामुपलब्धवा
न् कृतंस्मरार्चनंतेनप्रहरेप्रहरेगते वीस्यंश्चैवदिशःसर्वाःसत्वमार्गान्निरीक्षयत् लुब्धकेनाथदृष्टोसौहरिणश्चंचलेक्षणः विलोकय
न्दिशःसर्वामार्गमाणमृगीपदः सौभाग्यबलदर्पाढ्योमदनोन्मत्तपीवरः तंदृष्ट्वाबाणमाकृष्यह्याकर्णंतुष्टमानसः बाणंमुंचतियावद्वै
तावद्दृष्टोमृगेणतु कालरूपंतुतंदृष्ट्वामृगश्चिंतितवान्भृशम् निश्चितंभवितामृत्युर्गोचरस्यखलोयतः भार्याप्राणसमामेद्यव्याधे

नेहनिपातिता तयाविरहितस्याद्यनूनंमृत्युर्भविष्यति हाहाकालकृतंपापंयद्भार्यादुःखमागतम् भार्ययानसमंसौख्यंगृहेपिचवनेपिच तयाविनानधर्मोस्तिनार्थकामौविशेषतः वृक्षमूलेपिदयितायत्रतिष्ठतितद्गृहम् प्रासादोपितयाहीनःकांतारादतिरिच्यते धर्मकामार्थकार्येषुभार्यापुंसःसहायिनी विदेशेचगतःस्यापिसैवविश्वासकारिणी नास्तिभार्यासमोबंधुर्नास्तिभार्यासमंसुखं नास्तिभार्यासमंलोकेनरस्यार्त्तस्यभेषजं यस्यभार्यागृहेनास्तिसापिचेत्प्रियवादिनी अरण्यंतेनगंतव्यंयथारण्यंतथागृहं एकाप्राणसमामेभूद्द्वितीयाप्राणदामम इत्येवंचिंतयित्वातुलुब्धकंवाक्यमब्रवीत् मृगउवाच शृणुव्याधनरश्रेष्ठत्यामिषाहारभोजन यत्तेपृच्छाम्यहंवीरतद्युक्तंवदमेप्रभो आगतंहरिणीयुग्मंकेनमार्गेणतद्वनम् त्वयाविनाशितंवाथसत्यंकथयमेधुना तस्यतद्वचनंश्रुत्वालुब्धकोविस्मयंगतः असावपिनसामान्योदेवताकाप्यनुत्तमा उवाचलुब्धकःसद्यस्तस्याग्रेवाक्यमुत्तमं लुब्धकउवाच तेगतेनेनमार्गेणसत्यंहत्वाममाग्रतः ताभ्यांदत्तोसिभुक्त्यर्थेममत्वमधुनानघ संप्रतित्वांहनिष्यामिनैवमोक्ष्यामिकर्हिचित् मृगउवाच तत्सत्यंकीदृशंताभ्यांवाक्यमुक्तंतवाग्रतः येनतेप्रत्ययोजातोमुक्तंतद्धरिणीद्वयम् तेगतेकेनमार्गेणयेमुक्तेव्याधतेधुना व्याधउवाच तेगतेनेनमार्गेणास्वमाश्रमपदंप्रति व्याधेनकथितास्ताभ्यांशपथायेकृतास्तदा तच्छ्रुत्वावचनंतस्यहरिणोहृष्टमानसः मृगउवाच ताभ्यांव्याधेनचोक्तंयत्तत्करोमिनचान्यथा प्रभातेत्वद्गृहंनूनमागमिष्यामिनिश्चितं भार्याऋतुमतीमेद्यकामार्त्ताप्यधुनाभृशम् गत्वागृहेथभुक्त्वातामापृच्छ्यचसुहृज्जनान् शपथैरागमिष्यामिगृहंतेनात्रसंशयः मद्गृहंस्वगृहेनाद्यनेतुंशक्तःकथंचन तद्वृथामरणंमेस्याद्ययद्यहंघातितस्त्वया लुब्धकउवाच असत्यंभाषसेधूर्तप्रतारयसिमांवृथा कृत्वामृत्कंस्थितंतत्रतदागच्छतिकोल्पधीः व्याधस्यवचनंश्रुत्वाहरिणोवाक्यमब्रवीत् शपथैरागमिष्यामियथातेप्रत्ययोभवेत् व्याधउवाच मृगत्वंशपथान्ब्रूहिविश्वासोमेभवेद्यथा यथाहिंप्रेषयामित्वांस्वगृहंप्रतिकामुक मृगउवाच भर्त्तारंवंचयेद्यास्त्रीस्वामिनंवंचतेनरः मित्रंचवंचयेद्यस्तुगुरुद्रोहंकरोतियः विरसंतुरसंदद्यात्प्रेमभेदंकरोतियः भेदयेद्यस्तडागानिप्रासादंपातयेत्तथा प्रवासशीलोयोविप्रःक्रयविक्रयकारकः संध्यास्नानविहीनश्चवेदशास्त्रविवर्जितः मद्यपास्त्रीषुरक्तायेपरनिंदारताश्चये परस्त्रीसेवकाविप्राःपरपैशून्यसूच

काः शूद्रान्नभोजिनोयेचभार्यांपुत्रांस्त्यजंतिये वेदनिंदापरायेच्चवेदशास्त्रार्थनिंदकाः तेषांवैपातकंमह्यंयदिनायामितेगृहं भार्यासंग्रहणी
यस्यव्रतशौचविवर्जिता सर्वाशीसर्वविक्रेताद्विजानामपिनिंदकः त्रिषुवर्णेषुशुश्रूषांयःशूद्रोनकरोतिवै विप्रवाक्यंपरित्यज्यपाखंडाभि
रताःसदा ब्रह्मचर्यरताःशूद्रायेचपाखंडसंश्रिताः तेषांवैपातकंमह्यंयदिनायामितेगृहम् तिलास्तैलंघृतंक्षौद्रंकंबलंलवणंगुडम् लोहं-
लाक्षादिकंसर्वरंगान्नानाविधानपि विक्रियात्तेनशूद्रश्चेत्तत्रदोषोनविद्यते मद्यंमांसंविषंदुग्धंनीलंचवृषभंतथा मीनंक्षीरंसर्पकूटं
चित्रान्नकफलानिच मद्यादिविक्रयेयस्तुशूद्रोपिमदमोहितः आदित्यंविष्णुमीशानंगणाध्यक्षंतुपार्वतीं एतान्त्यक्त्वागृहेमूढोयोन्यं
पूजयतेनरः तस्यपापेनलिप्यामियदिनायामितेगृहं योगांस्पृशतिपादेनस्फुदितेकेचकुप्यति एकाकीमिष्टमश्नातितस्यपापस्यभाग्य
हं मातापित्रोरपोष्टाचक्रियामुद्दिश्यपाचकः कन्याशुल्कोपजीवीचदेवब्राह्मणनिंदकः गोग्रासंहंतकारंचअतिथीनांचपूजनम् येन
कुर्वंतिगृहिणस्तेषांपापंभवेन्मम वृंताकंचपटोलंचकालिंगंतुंबिकाफलम् मूलकंलशुनंकंदंकुसुंभंकनशाककम् एतानिभक्षयेद्यस्तु
नरोवैज्ञानदुर्बलः तस्यवैजायतेशुद्धिश्चांद्रायणशतैरपि एतेषांपातकंमह्यंयदिनायामितेगृहम् यःपठेत्स्वरहीनंचलक्षणेनविवर्जितं इ
यास्तुःसंचरन्विप्रोवेदानुच्चारयेत्तुयः विप्रस्यपठतःकापिशृणोतिइहचांत्यजः वेदोपजीविकोविप्रोतिलोभाच्छूद्रभोजनः तस्यपा-
पेनलिप्यामियदिनायामितेगृहं शूद्रान्नेषुचयेसक्ताःशूद्रसंपर्कदूषिताः तेनपापेनलिप्यामियदिनायामितेगृहम् लेखकश्चित्रकर्ताचवै
द्योनक्षत्रसूचकः कूटकर्ताद्विजोयश्चतस्यपापस्यभाग्यहम् कूटसाक्षीमृषावादीपरद्रव्यस्यतस्करः परदाराभिगामीचयेचविश्वासघा
तकाः द्रव्येद्रव्यंविनिक्षिप्यपानकूटसमाश्रिताः वेश्यारताःसदायेचदानदातुर्निवारकाः भर्तारंद्रव्यहीनंचकुरूपंव्याधिपीडितम् यान-
पूजयतेनारीरूपयौवनगर्विता एकादशीतथामाघेयासौशिवचतुर्दशी तांपूर्वविद्धांकुर्वंतितेषांपापस्यभाग्यहम् अथकिंबहुनोक्तेनभो
लुब्धकतवाग्रतः यदिनायामितेगेहंममसत्यंभवेन्नव तेनवाक्येनसंतुष्टोव्याधोवैवीतकल्मकः संहृत्यधनुषोबाणंमृगोमुक्तोगृहंप्रति
जलंपीत्वातुहरिणःप्रविष्टोगहनंप्रति गतोसौतेनमार्गेणगतंयेनमृगीद्वयम् लुब्धकेननदातत्रजालिमध्येस्थितेनहि प्रत्यूषेबिल्वपत्राणि

त्रोटयित्वाप्रतर्प्यच शिवःशिवेतिजल्पन्वैत्व्यासुयातोनिजाश्रयम् अथोदितेसूर्यबिंबे अकामाज्जागरेकृते पापान्मुक्तोप्यसौसद्यःशिवपूजा
प्रभावतः यावद्दिशोनिरीक्षेतनिराशोभोजनंप्रति तावच्छिशुकृताचान्यामृगीतत्रसमागता दृष्ट्वामृगींतदाव्याधोबाणंधनुषियोजयत् याव
न्मुंचत्यसौबाणंतावदुक्तंतयातदा माबाणान्मुंचधर्मात्मन्धर्मंमामुंचसुव्रत अहंनवध्यासर्वेषामितिशास्त्रविनिश्चयः शयानोमैथुनासक्तः
स्तनपोव्याधिपीडितः नहंतव्योमृगोराज्ञामृगीचशिशुनावृता अथवाधर्ममुत्सृज्यमांहनिष्यसिमानद बालकंस्वगृहेमुक्त्वासखीनांचनि
वेद्यवै शपथैरागमिष्यामिशृणुव्याधवचोमम यास्वभर्त्तारमुत्सृज्यपरेपुंसिरतासदा तस्याःपापेनलिप्यामियदिनायामितेगृहम् मद्यं-
मांसंविषंदुग्धंनीलीकुंभफलानिच एतानिविक्रयेद्यस्तुनरोमोहसमन्वितः तेषांपापेनलिप्यामियदिनायामितेगृहम् तस्यास्तद्वचनंश्रु-
त्वाव्याधोविस्मयमागमत् ततोव्याधेनसामुक्तागतावैनिजमंदिरम् व्याधोपितत्स्थलंत्यक्त्वाजगामस्वगृहंप्रति सर्वेषांवचनंध्यायन्मृगा
णांसत्यवादिनाम् एतेषांघातकोनित्यमहंयास्यामिकांगतिम् क्रमाद्गृहंसमायाताबालकाःक्षुधयावृताः नान्नंमांसंगृहेतस्यभोजनंये
नजायते निरामिषंतुतंदृष्ट्वानिराशास्तेभवंस्तदा व्याधोपिचतदातत्रतेषांवाक्यानिसंस्मरन् नभोजनंननिद्रांचलभतेविस्मितस्य
वै आगमिष्यंतितेनूनंशपथैरपियंत्रिताः नतानहंवधिष्यामिसतांव्रतमनुस्मरन् लुब्धकेनतदामुक्तोहरिणःशपथैर्वृतः स्वमाश्रमंतु
संप्राप्तोयत्रतद्धरिणीद्वयम् सद्यःप्रसूतासाचैकाद्वितीयारतिलालसा तृतीयापिसमायाताबालकैर्बहुभिर्वृता सर्वाःसमेताएकत्रमर
णेकृतनिश्चयाः परस्परंप्रजल्पंत्योलुब्धकस्यविचेष्टितं आयातांहरिणींमुक्त्वारूपाढ्यांरतिलालसां कृतकृत्योभवत्ताभिस्तेभ्यो
वाक्यमथाब्रवीत् युष्माभिरिहसंस्थेयंकर्तव्यंप्राणरक्षणम् व्याघ्राद्वीपाल्लुब्धकेभ्योबालकानांप्रयत्नतः योहिसत्यानुगोभार्यांनमुं
क्तेमोहसंवृतः भ्रूणहासतुविज्ञेयस्तस्यजन्मनिरर्थकम् संतानात्स्वर्गमाप्नोतिइहकीर्तिंचशाश्वतीं संततिर्यत्नतःपाल्यास्वर्गसौख्य-
प्रदायिका अपुत्रस्यगतिर्नास्तिइहलोकेपरत्रच येनकेनाप्युपायेनपुत्रमुत्पादयेत्पुमान् मयाचतत्रगंतव्यंयत्रव्याधस्यमंदिरम् स
त्यंतुपालनीयंस्यात्सत्येधर्मःप्रतिष्ठितः एतच्छ्रुत्वातुतानार्योवाक्यमूचुःसुदुःखिताः वयमप्यागमिष्यामस्त्वयासार्द्धंमृगोत्तम तथा

तेविप्रियंकांतनस्मरामःकदाचन पुष्पितेषुवनांतेषुनदीनांसंगमेषुच कंदरेषुचशैलानांयुष्माभीरक्षितावयम् नकार्यमद्यमस्माकंक्रीडि
तेनत्वयाविना नारीणांपतिहीनानांजीवितैःकिंप्रयोजनम् मितंददातिहिपितामितंभ्रातामितंसुतः अमितस्यहिदातारंभर्तारंकानपूज
येत् अपिद्रव्ययुतानारीबहुपुत्रफलैर्वृता साशोच्याबंधुवर्गस्यपतिहीनाकुलांगना गंधमाल्यैःस्त्रियोनित्यंप्रीयतेभर्तुरग्रतः नातंत्री
वाद्यतेवीणानाचक्रोप्यत्रमतेरथः नापतिःसुखमाप्नोतिनारीपुत्रशतैर्वृता नास्तिभर्तासमोधर्मोनास्तिधर्मसमःसुहृत् नास्तिभर्तासमोना
थःस्त्रीणांभर्तापरागतिः एवंविलप्यताःसर्वामरणेकृतनिश्चयाः बालकैस्तैःसमायुक्ताभर्तृशोकेनदुःखिताः मृगस्तासांवचःश्रुत्वा
हृदितापपरोभवत् गंतव्यंकिंनगंतव्यंमयाव्याधस्यमंदिरम् एकतस्तुकृतंरक्षन्कुटुंबस्यक्षयोभवेत् तदंतिकंनचेद्यामिममसत्यं
क्षयंव्रजेत् वरंपुत्रस्यमरणंभार्यायाआत्मनस्तथा सत्येत्यक्तेनरोनित्यमाकल्पंरौरवंव्रजेत् तस्मात्सत्यंपालनीयंनरैःश्रेयोर्थिभिःस
दा एवंसंचिंत्यहरिणोधर्मान्हृदिमनोरमान् ताभिःसहैवशनकैःक्षणात्तस्याश्रमंययौ तस्मिन्सरसिसंस्नात्वाकर्मन्यासंचकारह तल्लिं
गंप्रणिपत्याशुहृदिध्यायन्सदाशिवम् स्नानंपानंपरित्यज्यमैथुनंभोगमेवच कामंक्रोधंतथालोभंमायांमोक्षविनाशिनीम् वंदयित्वातु
तंदेवंलुब्धकाभिमुखंययौ तस्यभार्याश्चपुत्राश्चमरणेकृतनिश्चयाः अनशनंव्रतंगृह्यपृष्ठलग्नाःसमाययुः भार्यापुत्रैःपरिवृतोमृगस्तं-
देशमागतम् क्षुधितैर्बालकैर्युक्तोलुब्धकोयत्रतिष्ठति मृगस्तंदेशमागत्यकुटुंबेनसमन्वितः पालयन्सर्ववाक्यानिलुब्धकंवाक्यमब्र-
वीत् मृगउवाच हनमांप्रथमंव्याधपश्चादेतान्क्रमेणतु बालकानिततःपश्चाद्धन्यतांमाविलंबय लुब्धकैस्तुमृगाभक्ष्याना-
स्तिदोषःकदाचन वयंयास्यामःस्वर्लोकंसत्यपूतानसंशयः तथातेसकुटुंबस्यप्राणपुष्टिर्भविष्यति एतच्छ्रुत्वातुवचनंमृगेणपरिभा
षितम् आत्मानंनिंदयित्वातुलुब्धकोवाक्यमब्रवीत् व्याधउवाच अहोमृगमहासत्वगच्छगच्छस्वमाश्रमम् आमिषेणनमे
कार्यंयद्भाव्यंतद्भविष्यति जीवानांघातनेचैवविमुखस्तर्जनेतथा नैवपापंकरिष्यामिकुटुंबार्थेकदाचन त्वंगुरुर्ममधर्माणामुपदेष्टामृ
गोत्तम गच्छगच्छमृगश्रेष्ठकुटुंबेनसमन्वितः मयात्यक्तानिशस्त्राणिसत्यधर्मसमाश्रितः मृगउवाच कर्मन्यासमहंकृत्वा-

त्वत्सकाशमिहागतः हन्यतांहन्यतांशीघ्रंननेपापंभविष्यति. मयादत्तापुरावाक्कनयाबद्धोनयाम्यहं एतच्छ्रुत्वातुवचनंलुब्धकोवाक्यमब्रवीत् लुब्धकउवाच त्वंबंधुस्त्वंगुरुस्त्रातात्वंमेमातापितासुहृत् मयात्यक्तानिशस्त्राणित्यक्तंमायादिकंबलम् कस्यभार्यासुताःकस्य कुटुंबंकस्यतन्मृग नैःस्वकर्मंचभोक्तव्यंमृगगच्छयथासुखम् इत्युक्त्वासतदातूर्णंबभंजसशरंधनुः मृगंप्रदक्षिणीकृत्यनमस्कृत्यक्षमापयत् एतस्मिन्नंतरेनेदुर्देवदुंदुभयोदिवि आकाशात्पुष्पवृष्टिस्तुपपातसुमनोहरा तदादूतःसमायातोविमानंगृह्यशोभनम् देवदूतउवाच अहोव्याधमहासत्वसर्वसत्वक्षयंकर विमानमिदमारुह्यसदेहःस्वर्गमाविश शिवरात्रिप्रभावेनपातकंतेक्षयंगतम् उपवासस्तुसंजातोनिशिजागरणंकृतम् यामेयामेकृतापूजाअज्ञानेनशिवस्यच सर्वपापविनिर्मुक्तोगच्छत्वंरुद्रमंदिरम् विमानंचसमारुह्यसत्याच्चित्रपदंव्रज मृगराजमहासत्वभार्यापुत्रसमन्वितः भार्यात्रितयसंयुक्तोनक्षत्रपदमाप्नुहि तवनाम्नातुतदृक्षंलोकेख्यातंभविष्यति एतच्छ्रुत्वातुवचनंलुब्धकेनसमन्वितः विमानंतुतदारुह्यनक्षत्रपदमागतः हरिणीद्वयमन्वेष्टुंपृष्ठतोमृगमेवच तारात्रितयसंयुक्तंमृगशीर्षंतदुच्यते बालकद्वितयंचाग्रेतृतीयापृष्ठतोमृगी पृष्ठतस्तत्रसंप्राप्तामृगशीर्षस्यसन्निधौ मृगराड्दृश्यतेद्यापिऋक्षंव्योमगमुत्तमम् उपवासंकरिष्यंतिजागरेणसमन्वितम् यथोक्तशास्त्रमार्गेणतेषांमोक्षोनसंशयः शिवरात्रिसमंनास्तिव्रतंपापक्षयावहं यत्कृत्वासर्वपापेभ्योमुच्यतेनात्रसंशयः अश्वमेधसहस्राणिवाजपेयशतानिच प्राप्नोतितत्फलंसर्वंनात्रकार्याविचारणा इतिश्रीलिंगपुराणेउमामहेश्वरसंवादेशिवरात्रिव्रतकथासमाप्ता

अथोद्यापनम् स्कंदउवाच व्रतस्योद्यापनंकर्मकथंकार्यंचमानवैः कोविधिःकानिकर्माणिकथयस्वममप्रभो ईश्वरउवाच शृणुषण्मुखयत्नेनलोकानांहितकाम्यया उद्यापनविधिंचैवकथयामितवाग्रतः यदासंजायतेवित्तंभक्तिश्रद्धासमन्वितं सएवव्रतकालःस्याद्यतोनित्यंहिजीवितं चतुर्दशाब्दंकर्तव्यंशिवरात्रिव्रतंशुभम् एकभक्तंत्रयोदश्यांचतुर्दश्यामुपोषणम् संपाद्यसर्वसंभारान्मंडपंतत्रकारयेत् वस्त्रैःपुष्पैःसमाच्छन्नंपट्टवस्त्रैश्चशोभितं तन्मध्येलेखयेद्दिव्यंलिंगतोभद्रमंडलं अथवासर्वतोभद्रंमंडपांतःप्रकल्पयेत् शोभोपशोभासंयुक्तंदीपैःसर्वत्रसोज्ज्वलं आचार्यंपूजयेत्तत्रऋत्विग्भिःसहितंशुचिः शिवरूपाश्चतेविप्राःपूज्याश्चंदनपुष्पकैः

अनुज्ञातश्चतैर्विप्रैःशिवपूजांसमारभेत् रुद्रनाम्नानमोंनेनब्राह्मणानपिपूजयेत् अव्रणंसजलंकुंभंतस्योपरितुविन्यसेत् सौवर्णंराज
तंताम्रंमृन्मयंवानवंदृढम् कुंभोपरिन्यसेद्देवंउमयासहितंशुभम् सौवर्णेप्यथवारौप्येवृषभेसंस्थितंशुभे रत्नालंकरणैर्हैमैरलंकृत्य
मपूजयेत् पलेनवातदर्धेनतदर्धार्धेनवापुनः वस्त्रयुग्मेनसंवेष्ट्यबिल्वपत्रैःप्रपूजयेत् उमामहेश्वरींमूर्तिंपूजयेद्वृषभेस्थिताम् सोमंच
सगणंचैवपूजयित्वामहेश्वरं पुराणस्तोत्रपाठैश्चरात्रिशेषंनयेद्बुधः ततःप्रभातसमयेकृत्वासंध्यादिकाःक्रियाः ततःपूजांप्रकुर्वीनततो
होमंसमाचरेत् तिलव्रीहियवैश्चैवपायसान्नेनभक्तितः त्र्यंबकमितिमंत्रेणह्योंनमःशंभवेचेतिच गौरीर्मिमायमंत्रेणशतमष्टोत्तरद्व
यम् होमंकुर्याच्चमतिमान्बिल्वपत्रैस्तुनामभिः अजैकपादहिर्बुध्न्योभवःशर्वउमापतिः रुद्रःपशुपतिःशंभुर्वरदःशिवईश्वरः महादे
वोहरोभीमोनामान्येवंचतुर्दश पूर्णाहुतिंचतुर्हुत्वाकर्मशेषंसमापयेत् एतैर्होमःप्रकर्तव्यःकुंभदानेपितान्स्मरेत् भोज्यंक्षमापये
द्देवमेभिर्नामपदैःपृथक् प्रतिमांकुंभसहितामाचार्यायनिवेदयेत् शंभोप्रसीददेवेशसर्वलोकेश्वरप्रभो तवरूपप्रदानेनममसंतुम
नोरथाः आचार्यंपूजयेद्भक्त्यावस्त्रालंकारभूषणैः सवस्त्रांगांततोदद्याद्व्रतसंपूर्णहेतवे अन्येभ्योपियथाशक्त्याब्राह्मणेभ्योहिदक्षि
णाम् चतुर्दशप्रदातव्याविप्रेभ्योजलपूरिताः कुंभान्यज्ञोपवीतानिवस्त्राणिचपृथक्पृथक् सुसूक्ष्माणिचवस्त्राणिशय्यांसोपस्करांत
था द्वादशैवतुगांदद्यात्परिधानादिकंतथा अथवादक्षिणामेवप्रदद्यात्तुष्टयेद्विजान् व्रतमेतत्कृतंयन्मेपूर्णंवापूर्णमेवच सर्वंसंपूर्णतां
यातुप्रसादाद्भवतांमम इतिसंप्रार्थ्यतान्विप्रान्प्रणम्यचपुनःपुनः ततश्चस्वजनैःसार्द्धंस्वयंभुंजीतसुव्रती इतिश्रीस्कंदपुराणेशिव
रात्रिव्रतोद्यापनंसंपूर्णम् इतिचतुर्दशीव्रतानिसमाप्तानि अथपौर्णिमाव्रतानिलिख्यंते चैत्रीपौर्णमासीसामान्यनिर्णया
त्परैव अत्रविशेषोनिर्णयामृतेविष्णुस्मृतौ चित्राऋक्षयुताचैत्रीपरास्नानादिकर्मणि चित्रवस्त्रप्रदानेनसिद्धिमाप्नोतिवैनरः मंदार्के
चगुरौवारेयदाभवतिपूर्णिमा तत्राश्वमेधजंपुण्यंस्नानशुद्धादिभिर्भवेत् वायवीये संवत्सरकृताचार्याःसाफल्यायाखिलान्स्करान् दम
नेनार्चयेच्चैत्र्यांविशेषेणसदाशिवम् इयंमन्वादिरपि इतिचैत्रीपौर्णिमा वैशाखपौर्णमास्यांविशेषःस्मर्यते भविष्ये वैशाखीकार्तिकी

माघीतिथयोनीवपूजिताः स्नानदानविहीनास्ताननेयाःपांडुनंदन अथज्येष्ठकृष्णपौर्णमास्यांअमायांवावटसावित्रीव्रतंलिख्यते इयंचपूर्वविद्धाग्राह्या भूतविद्धानकर्तव्याअमावास्याचपौर्णिमा वर्जियित्वामुनिश्रेष्ठसावित्रीव्रतमुत्तमम् इतिब्रह्मवैवर्तात् ज्येष्ठमासिसितेपक्षेद्वादश्यांरजनीमुखे इत्युपक्रम्य व्रतंत्रिरात्रमुद्दिश्यदिवारात्रिस्थिराभवेत् ज्येष्ठमासिसितेपक्षेपूर्णिमायांतथाव्रतम् चीर्णव्रतंमहाभक्त्याकथितंतेमयानघे धर्मराजउवाच इतिदाक्षिणात्याश्चैवमाचरंति पाश्चात्यादयस्तुअमावास्यायामाचरंति तच्चोक्तंनिर्णयामृतेभविष्ये अमायांचतथाज्येष्ठेवटमूलेमहासती त्रिरात्रोपोषितानारीविधिनानेनपूजयेत् अशक्तौतुत्रयोदश्यांनक्तंकुर्याज्जितेंद्रिया अयाचितंचतुर्दश्यांअमायांसमुपोषणमिति हेमाद्र्यादिभिस्तुभाद्रपदपौर्णमास्यामिदमुक्तं नेतुतदानींआचरंति यदात्वष्टादशघटिकाचतुर्दशीतदापरैव पूर्वविद्धैवसावित्रीव्रतेपंचदशीतिथिः नाड्योष्टादशभूतस्यतत्रकुर्यात्परेहनीतिमाधवोक्तेः वस्तुतस्तुभूतविद्धानिषेधएव भूतोष्टादशनाडीभिरितिवाक्यम् अन्यथासावित्रीव्रतेष्टादशनाडीवेधदोषकल्पनायांनिषेधांतरकल्पनागौरवंज्येष्ठेमासित्रयोदश्यांदंतधावनपूर्वकं दंतकाष्ठंशुभंशुभ्रंजातीयंचतुरंगुलं तस्यापराण्हसमयेनद्यादौविमलेजले तिलामलककल्केनकेशान्संशोध्ययत्नतः स्नात्वाचैवशुभिर्भूत्वावटंसिंचेद्बहूदकैः वृद्धिक्षयेतथारोगेऋतुमत्यांतथैवच कारयेद्विप्रहस्तेनसर्वसंपद्यतेशुभं इदंचत्रयोदशीमारभ्यपौर्णिमांतंकर्तव्यं सधवाविधवावापिसपुत्रापुत्रवर्जिता भर्तुरायुर्विवृद्ध्यर्थंकुर्याद्व्रतमिदंशुभं ज्येष्ठमासेतुसंप्राप्तेपौर्णमास्यांपतिव्रता स्नात्वाचैवशुचिर्भूत्वानियमंकारयेत्ततः अथव्रतविधिः वटसमीपेगत्वातत्रसंस्कारयुक्तवटपूजाउक्ता आचम्यमासपक्षाद्युल्लिख्यममभर्तुःपुत्राणांआयुरारोग्यप्राप्तयेजन्मजन्मन्यवैधव्यप्राप्तयेचसावित्रीव्रतमहंकरिष्ये इतिसंकल्प्य वटमूलेस्थितोब्रह्मावटमध्येजनार्दनः वटाग्रेतुशिवंविद्यात्सावित्रीवटसंयुता वटसिंचामितेमूलंसलिलैरमृतोपमैः सूत्रेणवेष्टयेद्भक्त्यागंधपुष्पाक्षतैःशुभैः नमोवटसावित्रीभ्यांभ्रामयंतींप्रदक्षिणां सावित्रींचवटंसम्यगेभिर्मंत्रैःप्रपूजयेत् एवंविधिंबहिःकृत्वासम्यग्वैगृहमागता हरिद्राचंदनेनैवगृहमध्येलिखेद्वटम् तत्रोपविश्यसंकल्प्यपूजाकार्याप्रयत्नतः तिथ्यादिसंकीर्त्यममजन्मजन्मनिअ

वैधव्यप्राप्तयेभर्त्तुःचिरायुरारोग्यसंपदादिकामनयासावित्रीव्रतमहंकरिष्ये नियममंत्रः त्रिरात्रंलंघयित्वातुचतुर्थेदिवसेन्वहम् चंद्रा
यार्घ्यंप्रदत्त्वाचपूजयित्वा कृतांसतीं मिष्टान्नानियथाशक्त्याभोजयित्वाद्विजोत्तमान् भोक्ष्येहंतुजगन्धात्रिनिर्विघ्नंकुरुमेशुभे इतिनियम
मंत्रः अथपूजा ततःभूमिंस्पृष्ट्वा महीद्यौःपृथिवीतिऋक् ओषधयःसं० आकलशेषुकलशंनिधाय पंचपल्लवसप्तमृत्तिकाहिरण्यय-
वान्कुंभेनिक्षिप्य तदुपरिवंशपात्रंनिधाय तस्योपरिसप्तधान्यानिपृथक्स्थाप्यानितदुपरिवस्त्रंवस्त्रोपरिद्वात्रिंशद्बुकपरिमितांवालुकाप्र
तिमांब्रह्मणासहसंस्थाप्यपूजयेत् पद्मपत्रासनस्थश्चब्रह्माकार्यश्चतुर्मुखः सावित्रीतस्यकर्तव्या वामोत्संगगतातथा आदित्यवर्णाधर्म
ज्ञासाक्षमालाकरातथा ध्यानं ब्रह्मणासहितांदेवींसावित्रींलोकमातरम् सत्यव्रतंचसावित्रींवटंचावाहयाम्यहम् आवाहनं ब्रह्मणास
हसावित्रिसत्यवत्सहितेप्रिये हेमासनंगृह्यतांतुधर्मराजसुरेश्वर आसनं गंगाजलंसमानीतंपाद्यार्थंब्रह्मणःप्रिये भक्त्यादत्तंधर्मराज
सावित्रीप्रतिगृह्यतां पाद्यं भक्त्यासमाहृतंतोयंफलपुष्पसमन्वितं अर्घ्यंगृहाणसावित्रीममसत्यव्रतप्रिये अर्घ्यं सुगंधिसहकर्पूरंसु
रभिस्वादुशीतलं ब्रह्मणासहसावित्रिकुरुष्वाचमनीयकं आचमनीयं पयोदधिघृतंचैवशर्करामधुसंयुतम् पंचामृतेनस्नपनंप्रीयतांप
रमेश्वरी पंचामृतस्नानं मंदाकिन्याःसमानीतंहेमांभोरुहवासितम् सावित्रिब्रह्मराजेनस्नानार्थंप्रतिगृह्यतां स्नानं सूक्ष्मतंतुयुतंवस्त्र
युग्मंकार्पाससंभवं सावित्रिसत्यवत्कांतेभक्त्यादत्तंप्रगृह्यताम् वस्त्रं सावित्रिसत्यवत्कांतेधर्मराजसुरेश्वरि सावित्रीब्रह्मणासार्ध
मुपवीतंप्रगृह्यताम् उपवीतं भूषणानिचदिव्यानिमुक्ताहारयुतानिच त्वदर्थमुपक्लृप्तानिगृहाणशुभलोचने भूषणानि कुंकुमाग
रुकर्पूरकस्तूरीरोचनायुतां चंदनंतेमयादत्तंसावित्रिप्रतिगृह्यताम् चंदनं अक्षताश्चसुरश्रेष्ठाःकुंकुमाक्ताःसुशोभनाःमयानिवेदिताभ
क्त्यागृहाणपरमेश्वरि अक्षताः हरिद्राकुंकुमंचैवसिंदूरंकज्जलान्वितम् सौभाग्यद्रव्यसंयुक्तंसावित्रीप्रतिगृह्यताम् सौभाग्यद्रव्यं
माल्यादीनिसुगंधीनिमालत्यादीनिवैप्रभो मयाहृतानिपुष्पाणिपूजार्थंप्रतिगृह्यताम् पुष्पाणि अथांगपूजा सावित्र्यैनमःपादौपूज
यामि वटप्रियायै० जंघे० कमलपत्राक्ष्यै० कटींपू० भूतधारिण्यै० उदरंपू० गायत्र्यै० कंठंपू० ब्रह्मणःप्रियायै० मुखंपू० सौभाग्यदात्र्यै० शिरःपू०

अथब्रह्मसत्यपूजा धात्रेनमः पादौपूजयामि विधात्रेन॰ जंघेपू॰ त्वष्ट्रे॰ ऊरू॰ प्रजापत॰ मेंढ्रंपू॰ परमेष्ठिने॰ कटीपू॰ अग्निरूपाय॰ नाभिं॰ प
द्मनाभाय॰ हृदयंपू॰ वेधसेन॰ बाहूपू॰ विधये॰ कंठं॰ हिरण्यगर्भाय॰ मुखं॰ ब्रह्मणेन॰ शिरःपू॰ विष्णवे॰ सर्वांगंपू॰ देवद्रुमरसोद्भूतः कालागरु
समन्वितः आघ्रेयतामयंधूपः सावित्रीप्रतिगृह्यताम् धूपं॰ चक्षुर्दंसर्वलोकानांतिमिरस्यनिवारणं आर्तिक्यंकल्पितंभक्त्यागृहाणपर
मेश्वरि दीपं॰ अन्नंचतुर्विधंस्वादुरसैःषड्भिःसमन्वितं मयानिवेदितंभक्त्यानैवेद्यंप्रतिगृह्यतां नैवेद्यं मध्येपानीयं॰उत्तरापोशनं॰ मुख
प्रक्षालनं॰ इदंफलमितिफलं॰ पूगीफलमितितांबूलं॰ हिरण्यगर्भेतिदक्षिणां नमोब्रह्मण्यदेवित्वंसततंब्रह्मणःप्रिये पूजितासिद्विजैःस
र्वैः स्त्रीभिर्मुनिगणैस्तथा त्रिसंध्यंदेविभूतानांवंदनीयासुशोभने मयादत्तांचपूजेयंत्वंगृहाणनमोस्तुते पुष्पांजलिं ततोर्घ्यत्रयंदद्या
त् ॐकारपूर्वकेदेविसर्वदुःखनिवारिणि वेदमातर्नमस्तुभ्यंसौभाग्यंचप्रयच्छमे इदमर्घ्यं॰ पतिव्रतेमहाभागेब्रह्माणिचशुचिस्मि
ते दृढव्रते दृढमतेभर्तुश्चप्रियवादिनि अर्घ्यं॰ अवैधव्यंचसौभाग्यंदेहित्वंममसुव्रते पुत्रान्पौत्रांश्चसौख्यंचगृहाणार्घ्यंनमोस्तुते
अर्घ्यं ३ सावित्रीब्रह्मगायत्रीसर्वदाप्रियभाषिणी तेनसत्येनमांपाहिदुःखसंसारसागरात् त्वंगौरीत्वंशचीलक्ष्मीस्त्वंप्रभाचंद्रमंडले
त्वमेवचजगन्माता त्वमुद्धरवरानने यन्मयादुष्कृतंसर्वंकृतंजन्मशतैरपि भस्मीभवतुतत्सर्वंअवैधव्यंचदेहिमे अवियोगोयथादेवसावि
त्र्यासहितस्यते अवियोगस्तथास्माकंभूयाज्जन्मनिजन्मनि इतिप्रार्थना सुवासिन्यस्ततःपूज्यादिवसेदिवसेगते सिंदूरंकुंकुमंचैव
तांबूलंचपवित्रकम् तथादद्याच्चशूर्पाणिभक्ष्यभोज्यादिकंसदा माहात्म्यंचैवसावित्र्याःश्रोतव्यंमुनिसत्तम पुराणश्रवणंकार्यंसती
नांचरितंशुभम् इतिपूजाविधिः ततःव्रतपूजासांगतासिद्ध्यर्थंब्राह्मणायवायनप्रदानंकरिष्ये फलंवस्त्रसमायुक्तंसौभा
ग्यद्रव्यसंयुतं वंशपात्रेनिधायादौब्राह्मणायनिवेदयेत् उपायनमिदंद्रव्यंव्रतसंपूर्णहेतवे वायनंद्विजवर्यायसहिरण्यंददाम्यहम्
इतिवायनं इतिवटसावित्रीपूजनंसमाप्तं अथकथा सनत्कुमारउवाच कुलस्त्रीणांव्रतंदेवमहाभाग्यंतथैवच अवैधव्यकरं
स्त्रीणांपुत्रपौत्रप्रदायकम् ईश्वरउवाच आसीन्मद्रेषुधर्मात्माज्ञानीपरमधार्मिकः नाम्नाचाश्वपतिर्वीरोवेदवेदांगपारगः अनप

स्योमहाबाहुःसर्वैश्वर्यसमन्वितःसपत्नीकस्तपस्तेपेसमाराधयतेनृपःसावित्रींचप्रसावित्रींजपन्नास्तेमहामनाःजुहोतिचैवसावित्रींभक्त्यापरमयायुतःततस्तुष्टातुसावित्रीसादेवीहिद्विजसत्तम सावित्र्यहवनीदेवीतस्यदर्शनमागता भूर्भुवःस्वरवत्येषासाक्षसूत्रकमंडलुः तांतुदृष्ट्वाजगद्वंद्यांसावित्रींचनृपोत्तमः प्रणिपत्यनृपोभक्त्याप्रहृष्टेनांतरात्मना तंदृष्ट्वापतितंभूमौतुष्टादेवीजगादह सावित्र्युवाच तुष्टाहंतवराजेंद्रवरंवरयसुव्रत एवमुक्तस्तयाराजाप्रसन्नांतामुवाचह अनपत्योह्यहंदेविपुत्रमिच्छामिशोभने नान्यंवृणोमिसावित्रिपुत्रमेवजगन्मये अन्यदस्तिसमग्रंमेक्षितौयच्चापिदुर्लभम् प्रसादात्तवदेवेशितत्सर्वंविद्यतेगृहे एवमुक्तातुसादेवीप्रत्युवाचनराधिपम् सावित्र्युवाच पुत्रस्तेनास्तिराजेंद्रकन्यकातेभविष्यति कुलद्वयंतुसाराजन्नुद्धरिष्यतिभामिनी मन्नाम्नाराजशार्दूलतस्यानामभविष्यति इत्युक्त्वातंमुनिश्रेष्ठराजानंब्रह्मणःप्रिया अंतर्धानंगतादेवीसंतुष्टोसौमहीपतिः ततःकतिपयाहोभिस्तस्यराज्ञीमहीभुजः ससत्वासमजायतपूर्णेकालेसुषावेह सावित्र्यातुष्टयादत्तासावित्र्याजप्तयातथा सावित्रीतेनवरदातस्यानामबभूवह राजतेदेवगर्भाभाकन्याकमललोचना तांदृष्ट्वाहेमगर्भाभांराजाचिंतामुपेयिवान् अयाच्यमानांचवरैरूपेणाप्रतिमाभुवि तस्यारूपेणतेसर्वेसन्निरुद्धामहीभुजः ततःसराजाचाहूयउवाचकमलेक्षणाम् पुत्रिप्रदानकालस्तेनचयाचंतिकेचन वरंवरयहृद्यंतेपतिंगुणसमन्वितम् मनःप्रह्लादकरणंशीलेनाभिजनेनच इत्युक्त्वातांचराजेंद्रोवृद्धामात्यैःसहैवताम् वस्त्रालंकारसहितांधनरत्नैःसमन्विताम् विसृज्यचक्षणंतत्रयावत्तिष्ठतिभूमिपः तावत्तत्रसमागच्छन्नारदोभगवानृषिः संपूज्यचततोराजाअर्घ्यपाद्येनतंमुनिम् आसनेचकृतवासीनःपूजितस्तेनभूभुजा पूजयित्वामुनिंराजाप्रोवाचेदंद्विजोत्तमं पावितोहंत्वयाविप्रदर्शनेनाद्यनारद यावदेवंवदेद्राजातावत्साकमलेक्षणा आश्रमादागतादेवीवृद्धामात्यैःसमन्विता अभिवाद्यपितुःपादौववंदेसामुनिंततः नारदेनतुतुष्टांतांदृष्ट्वाप्रोवाचभूमिपं कन्यांचदेवगर्भाभांकिमर्थंनप्रयच्छसि वरायत्वंमहाबाहोवरयोग्यांहिसुंदरीम् एवमुक्तस्तदातेनमुनिनानृपसत्तमः उवाचतंमुनिंवाक्यमनेनार्थेनप्रेषिता आगतेयंविशालाक्षीमयासंप्रेषितासती अनयाचवृतोभर्त्तापृच्छत्वंमुनिसत्तम सापृष्टातेनमुनिनातस्मैचाचष्टभामिनी सावित्र्युवाच द्यु

मत्सेनस्यराज्यंवैवैरिणारुक्मिणाहृतं दैवादंधःस्त्रीसहितःसत्यवान्ततस्तोवने आश्रमेसत्यवान्नामद्युमत्सेनसुतोमुने भर्त्तेति-
मनसाविप्रवृतोसौराजनंदनः नारदउवाच कष्टंकृतंमहाराजदुहित्रातवसुव्रत अजानंत्यावृतोभर्त्तागुणवानितिविश्रुतः स
त्यंवदत्यस्यपितासत्यंमाताप्रभाषते स्वयंसत्यंप्रभाषेतसत्यवानितितेनसः तथाचाश्वाःप्रियास्तस्यअश्वैःक्रीडतिमृन्मयैः चित्रेपिवि
लिखत्यश्वान्चित्राश्वस्तेनचोच्यते रूपवान्गुणवांश्चैवसर्वशास्त्रविशारदः नतस्यसदृशोलोकेविद्यतेचेहमानवः सर्वैर्गुणैश्चसंपन्नो
रत्नैरिवमहार्णवः एकोदोषोमहानस्यगुणानावृत्यतिष्ठति संवत्सरेणक्षीणायुर्देहत्यागंकरिष्यति अश्वपतिरुवाच अन्यंवर
यभद्रंतेवरंसावित्रिगम्यतां विवाहस्यतुकालोयंवर्ततेशुभलोचने सावित्र्युवाच नान्यमिच्छाम्यहंनानमनसापिवरंप्रभो योमया
चवृतोभर्त्तासमेनान्योभविष्यति विचिंत्यमनसापूर्ववाचापश्चात्समुच्चरेत् क्रियतेचततःपश्चाच्छुभंवायदिवाशुभम् तस्मात्तुमासंम
नसाकथंचान्यंवृणोम्यहम् सकृज्जल्पंतिराजानःसकृज्जल्पंतिपंडिताः सकृत्कन्याप्रदीयंतेत्रीण्येतानिसकृत्सकृत् पतिंमत्वानमे
बुद्धिर्विचलेच्चकथंचन सगुणोनिर्गुणोवापिमूर्खःपंडितएवच दीर्घायुरथचाल्पायुःसवैभर्ताममप्रभो नान्यंवृणोमिभर्त्तारंयदिवास्या
च्छचीपतिः इतिमत्वात्वयातातयत्कर्तव्यंकुरुवेन्नच नारदउवाच स्थिराबुद्धिश्चराजेंद्रसावित्र्याःसत्यवान्प्रति त्वरयस्ववि
वाहायभर्त्रासहकुरुत्विमाम् ईश्वरउवाच निश्चितांतुसुनिंज्ञात्वास्थिताबुद्धिश्चनिश्चला सावित्र्याचमहाराज्ञःप्रतस्थेसौवनंप्रति
गृहीत्वातुधनंराजाद्युमत्सेनस्यसन्निधौ स्वल्पानुगोमहाराजोवृद्धामात्यैःसमन्वितः नारदस्तुततोखेवैतत्रैवांतरधीयत सगत्वाराजशा
र्दूलोद्युमत्सेनेनसंगतः वृद्धश्चांधश्चराजासौवृक्षमूलमुपाश्रितः सावित्र्यश्वपतीराजापादौजग्राहवीर्यवान् स्वनामचसमुच्चार्यतस्थौतस्य
समीपतः उवाचराजातंभूपंकिमागमनकारणम् पूजयित्वार्घ्यदानेनवन्यमूलफलैश्चसः ततःप्रपच्छकुशलंसराजामुनिसत्तम अ
श्वपतिरुवाच कुशलंदर्शनेनाद्यतवराजन्ममाद्यवै दुहिताममसावित्रीतवपुत्रमभीप्सति भर्त्तारंराजशार्दूलप्राप्नोत्वियमनिंदिता ममेदं
कांक्षितंपूर्वंभर्त्तारमनयाविभो आवयोश्चैवसंबंधोभवत्वद्यममेप्सितः द्युमत्सेनउवाच वृद्धश्चांधश्चराजेंद्रफलमूलाशनोनृप राज्या-

स्यकृतश्चमेपुत्रोवन्येनाद्यचजीवति साकथंसहतेदुःखंदुहितातवकानने अनभिज्ञाचदुःखानामित्यहंनाभिकांक्षये अश्वपतिरुवाच
अनयाचवृतोभर्त्ताजानंस्त्वयाराजसत्तम अनेनसहवासस्तेनवपुत्रेणमानद स्वर्गतुल्योमहाराजभविष्यतिनसंशयः एवमुक्तस्तदातेनराजारा
जर्षिसत्तमः तथेतिसप्रतिज्ञायचकारोद्वाहमुत्तमम् कृत्वाविवाहंराजेंद्रंसंपूज्यविविधैर्धनैः अभिवाद्यद्युमत्सेनंजगामनगरंप्रति सावित्री
तुपतिंलब्ध्वाइंद्रंप्राप्यशचीयथा सत्यवानपिब्रह्मर्षेतयापत्न्याभिनंदितः क्रीडतेनहृनोद्देशेपौलोम्यामघवानिव नारदस्यचतद्वाक्यंहृदये
वुमनस्विनी वहंतीनियमंचक्रेव्रतस्यास्यचभामिनी गणयंतीदिनान्येवनलेभेहर्षमुत्तमम् ज्ञात्वातद्दिवसंविप्रभर्त्तुर्मरणकारणम् व्रतंत्रि
रात्रमुद्दिश्यदिवारात्रौस्थिराभवत् ततस्त्रिरात्रंनिर्वर्त्यसंतर्प्यपितृदेवताः अस्यांतेनियमंकृत्वात्रिदिनस्यमनस्विनी अस्मिन्दिनेचमर्त
व्यमितिसत्यवतासुने कुठारंसंपरिगृह्यपिठकंचैवदारुकं प्रस्थितंचवनायैवसावित्रीवाक्यमब्रवीत् नगंतव्यंवनंत्वद्यममवाक्येनमानद
अथवागम्यतेसाधोमयासहवनंव्रज संवत्सरंभवेत्पूर्णमाश्रमेस्मिन्ममप्रभो तद्वनंद्रष्टुमिच्छामिप्रसादंकुरुमेप्रभो सत्यवानुवाच
नाहंस्वतंत्रःसुश्रोणिपृच्छस्वपितरौमम ताभ्यांप्रस्थापितागच्छमयासहशुचिस्मिते एवमुक्तातदातेनभर्त्रासाकमलेक्षणा श्वश्रूःश्वसुरयोः
पादौअभिवाद्येदमब्रवीत् वनंद्रष्टुंगमिष्यामिआज्ञामह्यंप्रदीयताम् उवाचवचनंसाध्वीवरमेकंप्रयच्छमे भर्त्रासहवनंगंतुमेतत्त्वरयतेमनः
तस्यास्तद्वचनंश्रुत्वाद्युमत्सेनोब्रवीदिदम् व्रतंकृतंत्वयाभद्रेपारणंकुरुसुव्रते पारणांतेततोभीरुवनंगंतुंत्वमर्हसि सावित्र्युवाच
नियमश्चकृतोस्माभीरात्रौचंद्रोदयेसति जातेमयाप्रकर्तव्यंभोजनंतातमेशृणु वनदर्शनकामोस्तिभर्त्रासहममाद्यवै नमेतत्रभवेत्ग्ला
निर्भर्त्रासहनराधिप इत्युक्तस्तुतयाराजाद्युमत्सेनोमहीपतिः यत्तेभिलषितंपुत्रितत्कुरुष्वसुमध्यमे नमस्कृत्वातुसावित्रीश्वश्रूश्वशुर
योरपि सहिताराजशार्दूलतेनसत्यवताविभो विलोकयंतीभर्त्तारंमासकालंमनस्विनी वनंचफलितंदृष्ट्वासुपुष्पितद्रुमसंकुलम् द्रुमाणां
चैवनामानिमृगाणांचैवभामिनी पश्यंतीमृगयूथानिहृदयेनप्रवेपती तत्रगत्वासत्यवान्वैफलान्यादायसत्वरम् काष्ठानिचसमादाय
बबंधभारकंतदा काष्ठभारंक्षणात्कृत्वावटशाखावलंबनम् वटवृक्षस्यसासाध्वीउपविष्टामहासती काष्ठंपातयतस्तस्यजाताशिरसिवे

दना ग्लानिश्चमहतीजातागात्राणांवेपथुस्तदा आगत्यवृक्षसामीप्यंसावित्रीमिदमब्रवीत् ममगात्रेतिकंपश्चजाताशिरसिवेदना कंटकैर्भिद्यनेभद्रेशिरोमेशूलसंमितैः उत्संगेतवसुश्रोणिस्वप्तुमिच्छामिसुव्रते अभिज्ञातुंविशालाक्षीतस्यमृत्योर्मनस्विनी प्राप्तकालंमन्यमानातस्यतत्रैवभामिनी सत्यवानपिसुप्तस्तस्याःकृत्वोत्संगेशिरस्तदा तावत्तत्रसमागच्छत्पुरुषःकृष्णपिंगलः जाज्वल्यमानोवपुषाददर्शाथमनस्विनी उवाचवाक्यंवाक्यज्ञाकस्त्वंलोकभयंकरः नाहंधर्षयितुंशक्यापुरुषेणापिकेनचित् इत्युक्तःप्रत्युवाचेदंयमोलोकभयंकरः यमउवाच क्षीणायुस्तवरारोहेभर्तातवमनस्विनि नेष्याम्येनमहंबध्वाह्येतन्मेचचिकीर्षितम् इत्युक्त्वापितृराजेनतांतदास्वंचिकीर्षितम् यथावत्सर्वमाख्यातंसत्क्रियार्थंप्रचक्रमे अयंहिधर्मसंयुक्तोरूपवान्गुणसागरः नार्होमत्पुरुषैर्नेतुमतोस्मिस्वयमागतः ततःसत्यवतःकायात्पाशबद्धंचसत्वरम् अंगुष्ठमात्रंपुरुषंनिश्चकर्षयमोबलात् ततःसमुद्धृतप्राणंगतश्वासंहतप्रभं निर्विचेष्टंशरीरंतद्बभूवाप्रियदर्शनम् यमस्तुतंतथाबध्वाप्रययौदक्षिणामुखः सावित्रींचापिदुःखार्तायममेवान्वगच्छत नियमंव्रतसंपन्नामहाभागायतव्रता यमउवाच निवर्तगच्छसावित्रिकुरुष्वास्यौर्ध्वदैहिकम् कृतंभर्तुस्त्वयानृण्यंयावद्दृश्यगतंत्वया सावित्र्युवाच यत्रमेनीयतेभर्तास्वयंवायत्रगच्छति मयापितत्रगंतव्यंएषधर्मःसनातनः तपसागुरुवृत्त्याचभर्तृस्नेहाद्व्रतेनच तवचैवप्रसादेननमेप्रतिहतागतिः प्राहुःसप्तपदंमैत्रंबुधास्तत्वार्थदर्शिनः मित्रतांतुपुरस्कृत्यकिंचिद्वक्ष्यामितच्छृणु नानात्मवंतोहिवनेचरंतिधर्मंचसत्यंचपरिश्रमंच विज्ञानतोधर्ममुदाहरंतितस्मात्संतोधर्ममाहुःप्रधानम् यमउवाच निवर्ततुष्टोस्मितवानयागिरास्वराक्षरव्यंजनहेतुयुक्तया वरंवृणीष्वेहविनास्यजीवितंददामितेसर्वमनिंदितेवरं सावित्र्युवाच च्युतस्वराज्याद्वनवासमाश्रितोअलब्धचक्षुःश्वशुरोममाश्रमे सलब्धचक्षुर्बलवान्भवेन्नृपस्तवप्रसादाज्ज्वलनार्कसन्निभः यमउवाच ददामितेसर्वमनिंदितेवरंयथात्वयोक्तंभविताचतत्तथा तवाध्वनोग्लानिमिवोपलब्धयेनिवर्तगच्छस्वनतेश्रमोभवेत् सावित्र्युवाच कुतःश्रमोभर्तृसमीपतोह्यमेयतोहिभर्ताममसागतिर्ध्रुवा यतःपतिंनेष्यसितत्रमेगतिःसुरेशभूयश्चवचोनिबोधमे सतांसकृत्संगतमीप्सितंपरैस्ततःपरं मित्रमितिप्रचक्षते नचाफलंसत्पुरुषेणसंगतंततःसतांसन्निवसेत्समागमे यमउवाच मनोनुकूलंबुधबुद्धि

वर्धनंत्वयायदुक्तंवचनंहिनाश्रयम् विनापुनःसत्यवतोहिजीवितंवरंद्वितीयंवरयस्व भामिनि सावित्र्युवाच हृतंपुरामेश्वसुरस्यधीमतःस्वमेवराज्यंसलभेतपार्थिवः नचस्वधर्मंप्रजहीतमेगुरुर्द्वितीयमेवंवरयामितेवरम् यमउवाच स्वमेवराज्यंप्रतिपत्स्यतेचिरान्नचस्वधर्मात्परिहास्यतेनृपः कृतेनकामेनमयानृपात्मजेनिवर्तगच्छस्वनतेश्रमोभवेत् सावित्र्युवाच प्रजास्त्वयैनानियमेनसंयतानियम्यचैतानयसेनकाम्यया अतोयमत्वंतवदेवविश्रुतंनिबोधयेमांगिरमीरितांमया अद्रोहःसर्वभूतेषुकर्मणामनसागिरा अनुग्रहश्चदानंचसतांधर्मःसनातनः एवंप्रायश्चलोकोयंमनुष्याःशक्तिपेशलाः संतःस्वेष्वप्यमित्रेषुदयांप्राप्तेषुकुर्वते यमउवाच पिपासितस्येवयथाभवेत्पयस्तथात्वयावाक्यमिदंसमीरितं विनापुनःसत्यवतोस्यजीवितंवरंवृणीष्वेहशुभेयदीच्छसि सावित्र्युवाच ममानपत्यःपृथिवीपतिःपिताभवेत्पितुःपुत्रशतंचऔरसम् कुलस्यसंतानकरंचतद्भवेत्तृतीयमेवंवरयामितेवरम् यमउवाच कुलस्यसंतानकरंसुवर्चसंशतंसुतानांपितुरस्तुतेशुभे कृतेनकामेननराधिपात्मजेअतीवदूरंहिपथस्त्वमागता सावित्र्युवाच नदूरमेतन्ममभर्तृसन्निधौमनोहिमेदूरतरंप्रधावति अथव्रजन्नेवगिरासमुन्नतंमयोच्यमानंशृणुधर्मसेवचः विवस्वतस्त्वंतनयःप्रतापवान्ततोहिवैवस्वतउच्यतेबुधैः समेनधर्मेणचरंतिताःप्रजास्ततस्तवेहेश्वरधर्मराजता आत्मन्यपिनविश्वासस्तावद्भवतिसत्सुयः तस्मात्सत्सुविशेषेणसर्वःप्रणयमृच्छति सौहृदात्प्रणयाच्चापिविश्वासोनामजायते तस्मात्सत्सुविशेषेणविश्वासंकुरुतेजनः यमउवाच उदाहृतंतेवचनंयदंगनेशुभंनतादृक्त्वदृतेमयाश्रुतं अनेनतुष्टोस्मिविनास्यजीवितंवरंचतुर्थंवरयस्वगच्छच सावित्र्युवाच ममात्मजंसत्यवतस्तथौरसंभवेदुभाभ्यामिहयत्कुलोद्भवम् शतंसुतानांबलिनांमहात्मनामिमंचतुर्थंवरयामितेवरम् यमउवाच शतंसुतानांबलवीर्यशालिनांभविष्यतिप्रीतिकरंतवाबले परिश्रमस्तेनभवेन्नृपात्मजेनिवर्तदूरंहिपथस्त्वमागता सावित्र्युवाच सतांहियाशाश्वतधर्मवृत्तिःसंतोनसीदंतिनचव्यथंतिते सतांसद्भिर्नाभिफलंसंप्रयास्यतिसद्भ्योभवंनानुभवंतिसंतः संतोहिसत्येननयंतिसूर्यंसंतोभूमिंतपसाधारयंति संतोगतिर्भूतभव्यस्यराजन्सतांमध्येनावसीदंतिसंतः आयुर्जुष्टमिदंवृत्तमितिविज्ञायशाश्वतं संतःपरार्थंकुर्वाणानावेक्षंते

प्रतिक्रियाम् नचप्रसादःसत्पुरुषेषुमोघोनचव्यर्थस्तपस्यतिचाभिमानः यस्मादेतन्नियतंसत्सुनित्यंतस्मात्संतोरक्षितारोभवंति य
मउवाच यथायथाभाषसिधर्मसंहितंमनोनुकूलंसुपदंमहार्थवत् तथातथामेत्वयिभक्तिरुत्तमावरंवृणीष्वाप्रतिमंपतिव्रते सा
वित्र्युवाच नतेपवर्गःसुकृताद्विनाकृतस्तथान्यथान्येषुवरेषुमानद वरंवृणेजीवतुसत्यवानयंयथामृताह्येवमहंविनापतिं नकामये
भर्तृविनाकृतंसुखंनकामयेभर्तृविनाकृतानांदिवम् नकामयेभर्तृविनागतांश्रियंनभर्तृहीनाव्यवसामिजीवितुं वरोपिवैवस्वतत्वयौरसा
त्मजशतेचदत्तोभवताकृपालुना वरंवृणेजीवतुसत्यवानयंतवैवसत्यंवचनंभविष्यति तथेत्युक्त्वातुतान्पाशान्मुक्त्वावैवस्वतोयमः
धर्मराजःप्रहृष्टात्मासावित्रीमिदमब्रवीत् एषभद्रेमयामुक्तोभर्तातेकुलनंदिनि आरोग्यवयसीप्राप्यसिद्धार्थश्चभविष्यति चतुर्वर्षश
तंचायुस्त्वयासार्द्धमुपेष्यति सागतावटसामीप्यंकृत्वोत्संगेशिरस्ततः प्रबुद्धस्तुततोब्रह्मन्सत्यवानिदमब्रवीत् मयास्वप्नेवरारोहेदृ
ष्टोदेवैवभामिनि तत्सर्वंकथितंतस्याययद्वृत्तंसर्वमेवतत् तथाचकथितःसर्वःसंवादश्चयमेनहि अस्तंगतेततःसूर्येद्युमत्सेनोमहीपतिः
पुत्रस्यागमनेकांक्षीइतश्चेतश्चधावति आश्रमादाश्रमंगच्छन्पुत्रदर्शनकांक्षया आवयोरंधयोर्यष्टिःक्वगतासिविनावयोः एवंसवि-
विधंक्रोशन्सपत्नीकोमहीपतिः चकारदुःखसंतप्तःपुत्रपौत्रेतिचासकृत् अकस्मादेवराजेंद्रोलब्धचक्षुर्महीश्वरः तद्दृष्ट्वापरमाश्चर्यंचक्षुः
प्राप्तिंद्विजोत्तमाः सांत्वपूर्वंतदावाक्यमूचुस्तेतापसाभृशम् चक्षुःप्राप्स्यामहाराजसूचितंतेमहीपते पुत्रेणचसमंयोगंप्राप्स्यसेनृपसत्तम

ईश्वरउवाच यावदेवंवदंत्येतेतापसाद्विजसत्तम सावित्रीसहितःप्राप्तःसत्यवान्द्विजसत्तम नमस्कृत्यद्विजान्सर्वान्मातरंपितरंतथा
सावित्रीचततोब्रह्मन्ववंदेचरणाविति श्वश्रूश्वशुरयोर्ब्रह्मन्सावित्रीकमलेक्षणा मुनयऊचुः वरंसावित्रिजानासिकारणंवरवर्णि-
नि वृद्धयोश्चक्षुषःप्राप्तेःश्वश्रूश्वशुरयोःशुभे सावित्र्युवाच नजानामिमुनिश्रेष्ठाश्चक्षुषःप्राप्तिकारणं चिरंसुप्तस्तुमेभर्तातेनकाल
व्यतिक्रमः सत्यवानुवाच अस्याःप्रभावात्संजातंदृश्यतेकारणंनच तत्सर्वंविद्यतेविप्राःसावित्र्यास्तपसःफलम् व्रतस्यैवतुमाहात्म्यं
दृष्टमेतन्मयाधुना ईश्वरउवाच एवंतुवदतस्तस्यतदासत्यवतःप्रभो पौराःसमागतास्तस्यआचरन्नृपतेर्हितम् येनराज्यंबलाद्राज

नूहतंमंत्रेणमंत्रिणा अमात्येनहतःसोपिइतिपौराःसमागताः पौराऊचुः उत्तिष्ठराजशार्दूलस्वराज्यंपालयप्रभो अभिषिंस्वराजें
द्रपुरेमंत्रिपुरोहितैः ईश्वरउवाच सगत्वाराजशार्दूलःस्वपुरंजनसंवृतः पितृपितामहंराज्यंसंप्राप्तंच महात्मना सावित्रीसत्यवांश्चैवपरां
मुदमवापतुः जनयामाससपुत्राणांशतंवैबाहुशालिनाम् व्रतस्यैवतुमाहात्म्यात्तस्याःपितुरजायत पुत्राणांचशतंब्रह्मन्प्रसन्नाच्चयमात्तथा ए
तत्तेकथितंसर्वंव्रतमाहात्म्यमुत्तमम् क्षीणायुर्जीवितोभर्त्ताव्रतस्यास्यप्रभावतः कर्तव्यंसर्वनारीणामवैधव्यफलप्रदम् सनत्कुमारउवा०
विधानंब्रूहिदेवेशव्रतस्यास्यचत्र्यंबक क्रियतेविधिनाकेनस्त्रीभिस्त्रिपुरसूदन ईश्वरउवाच वर्षैकंनियमंकृत्वाएकभक्तेनमानद
नक्ताहारेणवाविप्रभुंक्तेप्राप्यद्विजर्षभ त्रिदिनंलंघयित्वाचचतुर्थेदिवसेशुभे चंद्रायार्घ्यंप्रदद्याच्चपूजयित्वासुवासिनीं सावित्रींचप्र
सावित्रींगंधपुष्पैश्चपूजयेत् मिथुनानियथाशक्त्याभोजयित्वायथासुखं भोक्ष्येहंतुजगद्धात्रिनिर्विघ्नंकुरुमेशुभे दिनंप्रतिदिनंश्रेष्ठं
कुर्यान्न्यग्रोधसेचनम् कृत्वावंशमयेपात्रेवालुकाप्रस्थमेवच सप्तधान्यभृतंपात्रंप्रस्थैकेनद्विजोत्तम प्रस्थंद्वात्रिंशद्बुकप्रमाणंपरिसंमितं
कारयेन्मुनिशार्दूलवस्त्रयुग्मेनवेष्टयेत्तस्योपरिन्यसेद्देवींसावित्रींब्रह्मणासह सावित्रीसत्यवांश्चैवकार्यौरौप्यमयौशुभौ पिठकंचकु
ठारंचकृत्वारौप्यमयौशुभौ फलैःकालोद्भवैर्देवींपूजयेद्ब्रह्मणःप्रियाम् हरिद्रारंजितैश्चैवकंठसूत्रैःसमर्चयेत् सतीनांकंठसूत्राणित्रिदि
नंप्रतिदापयेत् पक्वान्नानिचदेयानिनित्यमेवद्विजोत्तमान् माहात्म्यंचैवसावित्र्याःश्रोतव्यंमुनिसत्तम पुराणश्रवणंकार्यंसतीनांचरितं
शुभम् पूजयेच्चतथानित्यंमंत्रेणानेनसुव्रत सावित्रीचप्रसावित्रीसततंब्रह्मणःप्रिया पूज्यसेहूयसेदेविद्विजैर्मुनिगणैःसदा त्रिसंध्यं
देविभूतानांवंदितात्वंजगन्मये सावित्रीत्वंप्रसावित्रीद्विधाभूतासिशोभने जगत्त्रयस्थितादेवित्रिसंध्यंचतथानघे श्रेष्ठदेवित्रिलोकेच-
त्रेताग्नौत्वंसुनेश्वरी व्यापितःसकलोलोकअतोमांपाहिसर्वदा रूपंदेहियशोदेहिसौभाग्यंदेहिमेशुभे पुत्रान्देहिधनंदेहिसर्वदाजन्म-
जन्मसु यथानेनावियोगोस्तिभर्त्रासहसुरेश्वरि तथामममहाभागेकुरुत्वंजन्मजन्मनि एवंसंपूजयेद्देवींकमलासनसंस्थिताम् एवंदिन
त्रयंनीत्वाचतुर्थेहनिसत्तम मिथुनानिचसंभोज्यषोडशानिद्विजोत्तम अर्चयित्वातथाचार्यंसपत्नीकंसुसंमतं तस्मैसंकल्पितंसर्वंहेम

सावित्रिसंस्तुतम् मंत्रेणानेनदातव्यंद्विजमुख्यायरुक्मंव्रत सावित्रींकल्पविदुषींप्रणिपत्यतथास्तुने सावित्रीजगतांमातासावित्रीजगतःपिता मयादत्तांचसावित्रींब्रह्मणःप्रतिगृह्यताम् अवैधव्यंचमेनित्यंभूयाज्जन्मनिजन्मनि मृताचवसतेलोकेब्रह्मणापतिनासह तत्रैवचचिरंकालंभुक्त्वाभोगाननुत्तमान् धर्मराजवरदानानंतरम् सावित्र्युवाच यामदीयंव्रतंदेवभक्त्यानारीकरिष्यति भर्तुःसासहिता साध्वीसमस्तसुखभाग्भवेत् धर्मराजउवाच गौरीप्रमुग्धावृद्धावाअपुत्रापतिवर्जिता सभर्तृकासपुत्रावाकुर्याद्व्रतमिदंशुभम् ज्येष्ठेमासेतुसंप्राप्तेपौर्णमास्यांपतिव्रता स्नात्वाचैवशुचिर्भूत्वावटंसिंच्यबहूदकैः सूत्रेणवेष्टयेद्भक्त्यागंधपुष्पाक्षतैःशुभैः नमोवैवस्वतायेतिभ्रामयंतीप्रदक्षिणां रात्रौकुर्वीतनक्तंचत्र्यब्दमेकंसमाहिता तथैववटवृक्षंचपक्षेपक्षेप्रपूजयेत् अनेनैवविधानेनकर्तव्यंव्रतमुत्तमं सर्वान्मनोरथान्प्राप्यह्यंतेरुद्रोपिजायते इतिश्रीस्कंदपुराणेवटसावित्रीकथासमाप्ता अथोद्यापनम् संप्राप्तेतुपुनर्ज्येष्ठेनक्षशुक्लद्वादशींनयेत् दंतधावनपूर्वादिस्नात्वानियममाचरेत् त्रिरात्रंलंघयित्वातुचतुर्थेदिवसेत्वहम् चंद्रायार्घ्यंप्रदत्वाचपूजयित्वातुतांसतीम् मिष्टान्नानियथाशक्त्याभोजयित्वाद्विजोत्तमान् भोक्ष्येहंतुजगद्धात्रिनिर्विघ्नंकुरुमेशुभे नियममंत्रः कृत्वावंशमये-पात्रेवालुकाप्रथमेवच सप्तधान्ययुतंपात्रंप्रस्थैकेनद्विजोत्तम वस्त्रद्वयोपरिस्थाप्यसावित्रींब्रह्मणासह हैमींकृत्वातयोर्मूर्तिंत्रिरात्रव्रतमाचरेत् न्यग्रोधस्यतलेतिष्ठेद्यावच्चैवदिनत्रयम् सौवर्णींचैवसावित्रींसत्येनसहकारयेत् रौप्यपर्यंकमारोप्यरथस्योपरिविन्यसेत् पलादूर्ध्वंयथाशक्त्यारथंरौप्यमयंशुभम् काष्ठभारंकुठारंचवटंचैवसुविस्तृतम् धर्मराजंनारदंचतत्रैवपरिकल्पयेत् वटमूलेप्रकुर्वीतमंडलंगोमयेनहि संस्थाप्यतत्रसावित्रींचतुष्कोपरिशोभनाम् एवंचमिथुनंकृत्वापूजयेद्गतमत्सरा पंचामृतेनस्नपनंगंधपुष्पोदकेनच चंदनागरुकर्पूरमाल्यवस्त्रविभूषणैः पीतपिष्टेनपद्मंचचंदनेनाथवालिखेत् देवींसंपूजयेत्तत्रमंत्रैरेभिर्विधानतः नमःसावित्र्यैपादौतुप्रसावित्र्यैतुजानुनी कटिंकमलपत्राक्ष्यैउदरंभूतधारिणि गायत्र्यैचनमःकंठेशिरसिब्रह्मणःप्रिये अथब्रह्मसत्यवतोः पादौधात्रेनमःपूज्यावूरूज्येष्ठायवैनमः परमेष्ठिनेतुवैमेढ्रमग्निरूपायवैकटी वेधसेचोदरंपूज्यंपद्मनाभायवैहृदि कंठंविधात्रेपूज्यंहिहेमगर्भायवैमुखं ब्रह्मणेवैशिरः

पूज्यंसर्वांगंविष्णवेनमः॥अभ्यर्च्यैवंक्रमेणैवशास्त्रोक्तविधिनाशुभम् ततोरंजनपात्रेणअर्घ्यंदद्याद्द्वयोरपि अथार्घ्यमंत्रः ॐकारपूर्वके देविवीणापुस्तकधारिणी देवमातर्नमस्तुभ्यंअवैधव्यंप्रयच्छमे पतिव्रतेमहाभागेवन्हिजातेशुचिस्मिते दृढव्रतेदृढमतेभर्तुश्चप्रियवादिनि अवैधव्यंचसौभाग्यंदेहित्वंममसुव्रते पुत्रान्पौत्रांश्चसख्यत्वंगृहाणार्घ्यंनमोनमः अथब्रह्मसत्यवतोरर्घ्यमंत्रः त्वयासृष्टंजगत्सर्वंसदेवासुरमानुषं सत्यव्रतधरोदेवब्रह्मरूपनमोस्तुते अथयमस्यार्घ्यमंत्रः त्वंकर्मसाक्षीलोकानांशुभाशुभविवेककृत् वैवस्वतगृहाणार्घ्यंधर्मराजनमोस्तुते धर्मराजःपितृपतिःसाक्षीभूतोसिजंतुषु कालरूपगृहाणार्घ्यमवैधव्यंच देहिमे गंधपुष्पैश्चनैवेद्यैःफलैःकर्पूरदीपकैः रक्तवस्त्रैरलंकारैःपूजयेद्गतमत्सरा सावित्रीप्रार्थना सावित्रीब्रह्मगायत्रीसर्वदाप्रियभाषिणी तेनसत्येनमांपाहिदुःखसंसारसागरात् त्वंगौरीत्वंशचीलक्ष्मीस्त्वंप्रभाचंद्रमंडले त्वमेवचजगन्मातामामुद्धरवरानने सौभाग्यंकुलवृद्धिंचदेहित्वंममसुव्रते यन्मयादुष्कृतंसर्वंकृतंजन्मशतैरपि भस्मीभवतुतत्सर्वमवैधव्यंचदेहिमे अथसावित्रीसत्यव्रतोःप्रार्थना अवियोगोयथादेवसावित्र्यासहितस्यते अवियोगस्तथास्माकंभूयाज्जन्मनिजन्मनि यमप्रार्थना कर्मसाक्षिजगत्पूज्यसर्ववंद्यप्रसीदमे संवत्सरंव्रतंसर्वंपरिपूर्णंतदस्तुमे सावित्रीप्रार्थना सावित्रीत्वंयथादेविचतुर्वर्षशतायुषम् पतिंप्राप्तासिसद्गुणिनंममदेवितथाकुरु सावित्रीचप्रसावित्रीसततंब्रह्मणःप्रिये पूजितासिद्विजैःसर्वैःस्त्रीभिर्मुनिगणैस्तथा त्रिसंध्यंदेविभूतानांवंदनीयासिसुव्रते मयादत्ताचपूजेयंत्वंगृहाणनमोस्तुते जागरंतत्रकुर्वीतगीतवादित्रमंगलैः सुवासिन्यस्ततःपूज्यादिवसेदिवसेशुभाः सिंदूरंकुंकुमंचैवतांबूलंचसुपूगकम् तथादद्याच्चापूपाणिभक्ष्यंसौभाग्यमष्टकं संतिष्ठेच्चदिवारात्रौकामक्रोधविवर्जिता दिनत्रयेपिकर्तव्यमेवमर्घ्यादिपूजनं ततश्चतुर्थदिवसेयत्कार्यंतच्छृणुष्वमे मिथुनानिचतुर्विंशत्षोडशद्वादशाष्टवा पूजयेद्वस्त्रगोदानैर्भूषणाच्छादनासनैः अथवागुरुमेकंवाव्रतस्यविधिकारकम् सर्वलक्षणसंपन्नंसर्वशास्त्रार्थपारगम् वेदविद्याव्रतस्नातंशांतंतुविजितेंद्रियम् सपत्नीकंसमभ्यर्च्यवस्त्रालंकारमंडलैः शय्यांसोपस्करांदद्याद्गृहंचैवातिशोभनम् अशक्तस्तुयथाशक्त्यास्तोकंस्तोकंचकल्पयेत् सावित्रीत्वंयथादेविचतुर्वर्षशतायुषा सत्यवत्पतिनासार्द्धंमयादत्तातथाकुरु मयादत्ताचसावित्रीब्रह्मणाप्रतिगृह्यतां मयागृहीतासावित्रीत्वयादत्तास्तु

शोभने यावच्चंद्रश्चसूर्यश्चसहभर्त्रासुखीभव न्यग्रोधस्यसमीपेतुगृहेवास्थंडिलेपिवा सावित्र्याश्चैवमंत्रेणघृतहोमंतुकारयेत् पायसंजुहुया
द्भक्त्याघृतेनसहभामिनी व्याहृत्याचैवमंत्रेणतिलव्रीहियवांस्तथा गुरुंचगुरुपत्नींचततोभक्त्याक्षमापयेत् धर्मराजोयमोधातानीलःकालोंत
कोव्ययः वैवस्वतश्चित्रगुप्तोदग्रोमृत्युःक्षयोवटः मासिमासितथाह्येतैर्नामभिःसेचयेद्वटम् न्यग्रोधेहंवसाम्येवतस्माद्यत्नेनसेचयेत् होमांतेद
क्षिणांदद्यादृत्विजश्चक्षमापयेत् भुंजीतवासरांतेतुनक्तेशांतानपस्विनी अर्घ्यंदद्यादरुंधत्यैदत्वाचैवप्रणम्यच अरुंधतिनमस्तेस्तुवसिष्ठ-
स्यप्रियेशुभे अर्घ्यमेतन्मयादत्तंफलपुष्पसमन्वितम् पुत्रान्देहिसुखंदेहिगृहाणार्घ्यंनमोस्तुते सखीभिर्ब्राह्मणैःसार्द्धंभुंजीतविजितेंद्रि-
या एवंकरोतियानारीव्रतमेतदनुत्तमम् भ्रातरःपितरौपुत्राःश्वशुरौस्वजनास्तथा चिरायुषस्तथारोगाभवंतिचनसंशयः भर्त्राचसहितासा
ध्वीब्रह्मलोकेमहीयते इतिश्रीस्कंदपुराणेसावित्रीव्रतोद्यापनंसंपूर्णम् अथआषाढपौर्णमास्यांगोपद्मव्रतंतत्रपूजा चतुर्भुजं
महाकायंजांबूनदसमप्रभम् शंखचक्रगदापद्मरमागरुडशोभितम् सेवितंमुनिभिर्देवैर्यक्षगंधर्वकिन्नरैः एवंविधंहरिंध्यात्वाततोयजनमा
रभेत् ध्यानं आवाहयामिदेवेशंभक्तानामभयप्रदम् स्निग्धकोमलकेशंचमनसावाहयेद्धरिं सहस्रशीर्षेत्यावाहनं सुवर्णमणिभिर्दिव्यैर
चितेदेवनिर्मिते दिव्यसिंहासनेकृष्णउपविश्यप्रसीदमे पुरुषएवेदमित्यासनं पादोदकंसुरश्रेष्ठसुवर्णकलशेस्थितम् गंधपुष्पाक्षतैर्युक्तं
पाद्यंमेप्रतिगृह्यताम् एतावानस्येतिपाद्यं अष्टद्रव्यसमायुक्तंस्वर्णपात्रोदकंशुभं भोऽभयंकरभक्तानांगृहाणार्घ्यंजगत्पते त्रिपादूर्ध्वइत्य
र्घ्यं कर्पूरेणसमायुक्तमुशीरेणसुवासितम् दत्तमाचमनीयार्थंनीरंस्वीकुरुतांविभो तस्माद्विराळित्याचमनीयं गंगागोदावरीचैवयमुनाचस
रस्वती नर्मदासिंधुकावेरीनाम्न्यःस्नानार्थमाहृतं यत्पुरुषेणेतिस्नानं वस्त्रयुग्मंसमानीतंपट्टसूत्रेणनिर्मितम् सुवर्णखचितंदिव्यंगृहाण
त्वंसुरेश्वर तंयज्ञमितिवस्त्रं कार्पासतंतुभिर्युक्तंब्रह्मणानिर्मितंपुरा अनेकरत्नखचितमुपवीतंगृहाणभो तस्माद्यज्ञादितियज्ञोपवीतं
चंदनंमलयोद्भूतंकस्तूरीचारुचंदनं कर्पूरेणचसंयुक्तंस्वीकुरुष्वानुलेपनम् तस्माद्यज्ञात्सर्वहुतमितिगंधं शतपत्रैःकर्णिकारैश्चंपकैर्मल्लि-
कादिभिः तुलसीयुक्तपुष्पाणिगृहाणपुरुषोत्तम तस्मादश्वेतिपुष्पं दशांगंगुग्गुलोद्भूतंसुगंधिंचमनोहरं कृष्णागरुसमायुक्तंधूपंदेवगृहा

णमे यत्पुरुषंव्यदधुरितिधूपं साज्यंचवर्तिसंयुक्तंवन्हिनायोजितंमया दीपंगृहाणदेवेशत्रैलोक्यतिमिरापहन् ब्राह्मणोस्येतिदीपं अ
न्नंचतुर्विधंस्वादुरसैःषड्भिःसमन्वितम् भक्ष्यभोज्यसमायुक्तंनैवेद्यंप्रतिगृह्यतां चंद्रमामनसेतिनैवेद्यंसम० आचमनीयं करोद्वर्तनं इ
दंफलमितिफलं पूगीफलमितितांबूलं हिरण्यगर्भेतिदक्षिणां· यानिकानि० नाभ्याआसीतिप्रदक्षिणां नमोस्त्वनंताय० सप्तास्यासन्निति
नमस्कारः देवदेवजगन्नाथगोपालप्रतिपालक गोपदेकृतसंत्राणगृहाणकुसुमांजलिं यज्ञेनयज्ञमितिपुष्पांजलिं तद्वर्षोक्तंवायनं पर
मान्नमिदंविप्रकांस्यपात्रेणसंयुतं त्वत्प्रसादादहंविप्रव्रतस्यफलमाप्नुयात् मंत्रहीनंक्रियाहीनमितिप्रार्थना इतिगोपद्मपूजा अथक
था सूतउवाच नाथैकंत्वांहिपृच्छामिचतुर्वर्गफलप्रदम् सर्वरोगप्रशमनंविष्णुसारूप्यमुक्तिदं नारीणामथवापुंसांभुक्तिमुक्तिफल
प्रदम् ब्रूहिचेदस्तिदेवर्षेकृपांकृत्वाममोपरि नारदउवाच भगवन्सर्वमाख्यास्येयत्पृष्टंविदुषात्वया गोपद्मकंव्रतंह्येतद्व्रतानांव्रतमुत्तम
म् कर्त्तुःसिद्धिकरंदिव्यंविख्यातंभुवनत्रये सनत्कुमारउवाच भगवन्भूतभव्येशसर्वशास्त्रविशारद तद्व्रतंब्रूहिमेब्रह्मन्कथमुद्या
पनंभवेत् पुरेदंकेनवाचीर्णंदेवर्षेकथयव्रतं नारदउवाच आषाढपौर्णमास्यांवातथाष्टम्यांहरेर्दिने प्रारभेद्व्रतमेतत्त्वकार्तिकावधितत्ति
थौ तिलामलककल्केनस्नानंनित्यंविधायच नदीतीरेथवागोष्ठेशिवागारेहरेर्गृहे वृंदावनेवापिलिखेद्गोपद्मकपदंशुभं त्रयस्त्रिंशत्तुपद्मा
निकुर्याद्भक्त्यादिनेदिने तत्संख्ययाप्रकर्तव्याअर्घ्यप्रदक्षिणानतीः बालकृष्णंसमुद्दिश्यलक्ष्म्यासहजगद्गुरुम् गंधाद्यैरुपचारैस्तुयथाश
क्त्याप्रपूजयेत् ब्राह्मणांस्तुततःपूज्यपद्मसंख्याकमुत्सृजेत् प्रथमाब्देथवटकैर्द्वितीयेपूपकैर्व्रती तृतीयेशालिपिष्टान्नैश्चतुर्थेपूरिका
दिभिः पंचमेपरमान्नैस्तुसम्यग्वैपूजयेद्व्रती अत्रैवोदाहरंतीममितिहासंपुरातनम् ऋषीणांपृच्छमानानांसूतेनोक्तंपुरातनम् सूतउ
वाच पुराशक्रोमरावत्यांदेवदानवकिन्नरैः रुद्रैरादित्ययक्षाद्यैर्गंधर्वैर्वसुभिःसह रंभानृत्यंसमारेभेक्रीडालोभेनविह्वला एवंनृत्ये
क्रियमाणेत्रुटितंवाद्यमंडलं क्षणमात्रंविचार्याथधर्मराजस्तुउक्तवान् यमउवाच जन्ममध्येव्रतंयैश्चनकृतंप्राणिभिःक्वचित् तच्च
र्मस्नायुभिःशक्रकर्तव्यंछादनंढके नारदेनश्रुतंतच्चजगादयदुनंदनं स्वर्चयित्वातुतंकृष्णोवचनंचेदमब्रवीत् कृष्णउवाच सर्वलोकज्ञ

देवर्षेभुवनेषुचरन्सदा आश्चर्यंवदद्देवर्षेयद्यस्तिशुभदायकं नारदउवाच गतंमयामरावत्यामाश्चर्यंधर्मसंसदि तत्रसर्वेसमायाताःसुराइंद्राश्चतुर्दश रुद्राएकादशाविधिरादित्याद्वादशापिच वसवोष्टौतथानागायक्षराक्षसपन्नगाः रंभयाचसमारब्धंनृत्यंशक्रस्यपश्यतः त्रुटितंचर्मवाद्यानामश्रुवंरूस्यसाधनं यमःप्राहतयादूतान्सुभद्राख्यव्रतास्तिभो नामानयध्वंतच्चर्मवाद्ययोग्यंसदास्त्विति तच्छ्रुत्वातुमयाभीत्यासर्वंत्वयिनिवेदितं सूतउवाच इतिनारदवाक्यंतुश्रुत्वाकृष्णस्त्वरान्वितः सुभद्रायागृहंगत्वापूजितस्तामुवाचह श्रीकृष्णउवाच किंचिद्व्रतंत्वयाभद्रेकृतंवानेतिसंशयः सुभद्रोवाच सर्वव्रतानिभोकृष्णकृतान्येवनसंशयः नोचेत्त्वद्भगिनीचाहंनस्यामर्जुनवल्लभा पुत्रोभिमन्युश्चकथंकथयस्वजगत्पते कृष्णउवाच तथापित्वंमहाभागव्रतमेकंसमाचर गोपद्मेतिचविख्यातंत्रिषुलोकेषुविश्रुतम् इतिकृष्णवचःश्रुत्वासुभद्रातत्तदाकरोत् कृष्णोपदिष्टविधिनासत्वरंचसमापितम् सोद्यापनेव्रतेचीर्णेकालेयमभटाययुः दूताऊचुः सुभद्रेतवदेहस्यचर्मार्थेह्यागतावयम् त्वच्चर्मसुरवाद्यार्थंयमेनचप्रकल्पितं इतिदूतवचःश्रुत्वासव्रतास्मीतिसाब्रवीत् ततोभट्टाःसर्वएवददृशुःसादरास्तदा पद्मानांनिचयंतस्यगृहेगांचसवत्सकां स्थंडिलेहस्तमात्रेतुसुसमिद्धंहुताशनम् कृष्णोपदिष्टंवीक्ष्यैवंदूताजग्मुर्यमांतिकम् प्रतिपेदेप्रभावेनसुभद्रापदमच्युतं नारदउवाच इतिसूतवचःश्रुत्वाऋषयश्चक्रिरेव्रतम् सूतउवा॰ भोभोनारददेवर्षेसर्वशास्त्रविशारद शीघ्रंब्रूहिसखेपद्मव्रतस्योद्यापनेविधिः नारदउवाच पूर्णेतुपंचमेवर्षेव्रतस्योद्यापनंभवेत् श्रीकृष्णप्रतिमाकार्यासुवर्णस्यपलेनवै पुष्पमंडपिकाकार्याचतुर्द्वारसुशोभना तन्मध्येपूजयेद्भक्त्यारमयासहितंहरिं त्रयस्त्रिंशत्ततोविप्रान्कृत्वाहोमंसमाचरेत् अतोदेवेतिमंत्रेणजुहुयात्तिलपायसं ब्राह्मणान्भोजयेत्पश्चाद्गोभिःसंपूजयेद्व्रती यंयंचिंतयतेकामंतंतंप्राप्नोत्यसंशयं इतिभ॰गोपद्मव्रतोद्या॰संपूर्णं अथआषाढशुक्लपौर्णमास्यांकोकिलाव्रतम् यदाआषाढाधिकमासस्तदाकोकिलानुष्ठानंकार्यम् तद्विधिः आचम्यप्राणानायम्यमासपक्षाद्युल्लिख्यममेहजन्मनिजन्मांतरस्थसर्वपापक्षयार्थंपुत्रपौत्रलक्ष्मीवृद्ध्येसौभाग्यवृद्धिद्वाराअवैधव्यसपत्ननाशायकोकिलारूपगौरीप्रीत्यर्थंकोकिलाव्रतंकरिष्ये इतिसंकल्प्य आषाढपौर्णमास्यांतुसंध्याका

लेह्युपस्थिते संकल्पयेन्मासमेकंश्रावणेप्रत्यहंह्यहं स्नानंकरिष्येनियमाद्ब्रह्मचर्यस्थितासती भोक्ष्यामिनक्तंभूशय्यांकरिष्येप्राणिनां
दयामित्युक्त्वा स्नानंकरोमिदेवेशिकोकिलेप्रीतयेतव जलेस्मिन्पावनेपुण्येसर्वदेवजलाशये इतिमंत्रेण तिलामलककल्केनसर्वौषधि
जलेनच वचापिष्टेनवाष्टौदिनानिप्रत्येकंवचौषधियुक्तेनचषड्दिनान्येवंमासावधिस्नानेक्रमः एवंस्नात्वारविंध्यात्वाततस्माअर्घ्यंचदाप
येत् आदित्यभास्कररवेअर्कसूर्यदिवाकर प्रभाकरनमस्तुभ्यंगृहाणार्घ्यंनमोस्तुते इतिसूर्यार्घ्यमंत्रः ततःस्वर्णपक्षांरौप्यपादांमौ
क्तिकनेत्रांप्रवालमुखींरत्नपृष्ठांचूतचंपकवृक्षस्थांपक्षिरूपिणींकोकिलांलिखित्वापूजयेदित्युक्तं स्वर्णपक्षांरक्तनेत्रांप्रवालमुखपंकजांक
स्तूरीवर्णसंयुक्तासुसन्नांनंदनेवने चूतचंपकवृक्षस्थांसुपुष्टस्वरसमन्विताम् चिंतयेत्पार्वतींदेवींकोकिलारूपधारिणीम् ध्यानं आगच्छ
कोकिलेदेविदेहिमेवांछितंफलं चंपकद्रुममारूढाक्रीडंतीनंदनेवने आवाहनं आसनंक्षौमवस्त्रेणनिर्मितंह्यनघंतव गृहाणेदंमयादे
विकोकिलेप्रियवर्द्धिनि आसनं तिलस्नेहेतिलसुखेतिलसौख्येतिलप्रिये सौभाग्यंधनपुत्रांश्चदेहिमेकोकिलेनमः तिलपुष्पफलै
र्युक्तंपाद्यंमेप्रतिगृह्यताम् पाद्यं रत्नचंपकपुष्पैश्चपीतचंदनसयुतं हेमपात्रेस्थितंतोयंगृहाणार्घ्यंनमोस्तुते अर्घ्यं निर्मलंसलिलं
गांगंकोकिलेपक्षिरूपिणि वासंतेनसुगंधेनगृहाणाचमनीयकम् आचमनीयं पंचामृतेनस्नपनंकोकिलेकलकंठके मयादत्तेनप्रीता
त्वंभवमेपरमेश्वरि पयोदधिघृतंचैवशर्करामधुसंयुतम् पंचामृतेनस्नपनंदत्तंस्वीकुरुकोकिले पंचामृतस्नानं मंदाकिनीजलंपुण्यंसर्व
तीर्थसमन्वितम् स्नानार्थंतेमयादत्तंकोकिलेगृह्यतांनमः स्नानं॰ यस्मात्कार्पाससूत्रेणवासांसिविविधानिच पीतवस्त्रप्रसादेनप्रीता
भवममांबिके वस्त्रं कंचुकंचमयादत्तंनानावर्णविचित्रितं कोकिलेगृह्यतांदेविप्रसीदपरमेश्वरि कंचुकीं हरिद्रारंजितेदेविकं
ठसूत्रंसमर्पितम् कोकिलेसुभगेदेविवरदाशुभवचांबिके कंठसूत्रं यानिरत्नानिसर्वाणिगंधर्वेषूरगेषुच तैर्युक्तंभूषणंहैमंकोकिलेप्र
तिगृह्यतां भूषणानि श्रीखंडंचंदनंदिव्यंगंधाढ्यंसुमनोहरम् विलेपनंसुरश्रेष्ठचंदनंप्रतिगृह्यतां चंदनं॰ अक्षताश्चसु॰ अक्षता
न् कुंकुमालक्तकंदिव्यंकामिनीभूषणास्पदं सौभाग्यदंगृहाणेदंप्रसीदहरवल्लभे हरिद्राकुंकुमंचैवसिंदूरंकज्जलान्वितम् सौभाग्य

द्रव्यसंयुक्तंगृहाणपरमेश्वरि सौभाग्यद्रव्यं करवीरैर्जातिकुसुमैश्चंपकैर्बकुलैःशुभैः शतपत्रैश्चकल्हारैरर्चयेत्परमेश्वरीं पुष्पाणि वनस्पतिरसोद्भूतो॰ धूपं॰ साज्यंचेतिदीपं॰ शर्कराखंडखाद्यानिदधिक्षीरघृतानिच आहारार्थंमयादत्तंनैवेद्यंप्रतिगृह्यतां नैवेद्यं पाटलोशीरकर्पूरसुरभिस्वादुशीतलं तोयमेतत्सुखस्पर्शंकोकिलेप्रतिगृह्यताम् आचमनीयं॰ चंदनागरुकर्पूरकस्तूरीकेसरान्वितम् करोद्वर्तनकंदेविगृह्यतांहरवल्लभे करोद्वर्तनं कूष्मांडंनारिकेरंचपनसंकदलीफलं जंबीरंमातुलिंगंचफलंगृह्णनमोस्तुते फलं पूगीफलमितितांबूलं हिरण्यगर्भेतिदक्षिणां कोकिलेकृष्णवर्णेत्वंसदावससिकानने भवानीहरकांतासिकोकिलायै नमोनमः नीराजनं पूजितापरयाभक्त्याकोकिलागिरिशप्रिया पुष्पैर्नानाविधैःश्रेष्ठैर्वरदास्तुसदामम पुष्पांजलिं॰ यानिकानिचेतिप्रदक्षिणां॰ नमोदेव्यैनमस्कारं कोकिलारूपधारिण्यैजगन्मात्रेनमोस्तुते शरणागतदीनानांत्राहिदेविसदांबिके गंधपुष्पाक्षतैर्युक्तंतोयंहेमफलान्वितम् अर्घ्यंगृहाणदेवेशिवांछितार्थंप्रयच्छमे आषाढस्यसितेपक्षेमेघवर्णेहरिप्रिये कोकिलेत्वंजगन्मातर्गृहाणार्घ्यंनमोस्तुते पुनरर्घ्यं॰तिलस्नेहे॰ रूपंदेहिजयंदेहि॰प्रार्थना॰ व्रतांतेहैमींतिलपिष्टजांकोकिलांकृत्वाविप्रायदद्यात् देविचैत्ररथोत्पन्नेविंध्यपर्वतवासिनि अर्चितापूजितासित्वंकोकिलेहरवल्लभे कोकिलेकलकंठासिमाधवेमधुरस्वरे वसंतेदेविगच्छत्वंदेवानांनंदनेवने इतिविसर्जनं इतिकोकिलापूजा अथकथा युधिष्ठिरउवाच स्वभर्त्रासहसंयोगःस्नेहःसौभाग्यमेवच भवेद्यथाकुलस्त्रीणांतद्व्रतंब्रूहिकेशव श्रीकृष्णउवा॰ यमुनायास्तटेरम्येमथुरानगरीशुभा तस्यांशत्रुघ्ननामाभूद्राजाराघववंशजः तस्यभार्याकीर्तिमालानाम्नासीत्प्रथिताभुवि प्रणम्यभगवान्पृष्टोवसिष्ठोमुनिसत्तमः कीर्तिमालोवाच वदमेत्वंमुनिश्रेष्ठसौभाग्यप्राप्तिदंव्रतम् पूज्यःकथंचभगवान्शिवःकेनव्रतेनच वसिष्ठउवाच यदिपृच्छसिमेत्वंहिव्रतानामुत्तमंव्रतम् तारणंसर्वपापानांकथयामिनिबोधतत् दक्षप्रजापतेर्यज्ञेपुरादेवाःसमागताः ऋषयश्चतथासर्वेविद्याधरगणास्तथा ब्रह्माविष्णुश्चवायुश्चदेवराजस्तथैवच वरुणोग्निर्ग्रहाश्चैवयेचान्येचदिवौकसः वसिष्ठोवाल्मिकिर्गार्ग्योविश्वामित्रोमहानृषिः एतेचान्येचऋषयःसर्वेयज्ञार्थमागताः

अपश्यन्नारदस्तत्रसंतिकेत्वागताइति ईश्वरेणविनासम्यक् दृष्ट्वासर्वान्समागतान् शिखांसंस्पृश्यपाणिभ्यांननर्तकलहप्रियः ज्ञात्वासकलमूलंचततःकैलासमाययौ सर्वाघनाशनंपुण्यंकैलासशिखरंशुभं तत्रदृष्ट्वासमासीनंगौरीसहितशंकरम् कृतांजलिपुटोभूत्वाप्रणिपत्यमुनिःस्थितः ईश्वरस्तमुवाचाथनिःश्वसंतमनेकधा किमागमनकृत्यंतेमदीयंसदनंप्रति श्वासोश्वासेनसंयुक्तस्तन्मेब्रूहिद्विजोत्तम ईश्वरस्यवचःश्रुत्वाशिखांसंस्पृश्यपाणिना दुःखयुक्तइवोवाचनारदःकलहप्रियः नारदउवाच यन्निमित्तंमहादेवमर्त्यलोकात्समागतः वदामिदुःखसंयुक्तस्तच्छृणुष्वजगत्पते दक्षयज्ञमहंद्रष्टुमघदैवात्समागतः तत्रयज्ञेस्थिताःसर्वेदक्षजामातरःप्रभो दृष्ट्वातांश्चनतन्मध्येदृष्टस्त्रिभुवनेश्वरः तवावज्ञाकृतातेनदक्षेणापुण्यकर्मणा तेनवैश्वाससंयुक्तआगतोस्मितवांतिकं ईश्वरेणविनाकिंचिद्धर्मकार्यंनसिद्ध्यति अतोस्यविफलःसर्वःप्रयासस्त्वमखंप्रति तस्यतद्भाषितंश्रुत्वानतन्मिथ्येत्यचिंतयत् सक्रोधस्तत्तदाजानोहीश्वरोजगदीश्वरः गौर्याचप्रार्थितोदेवःश्रुत्वातंनारदेरितम् तस्ययज्ञस्यघातार्थंदेवतत्रव्रजाम्यहम् इत्युक्त्वाचलितारोषादीश्वरेणनिवारिता जगदीशनमस्तुभ्यंव्रजामिपितृवेश्मनि नारदेनाथसहितागणेशेनचसंयुता यज्ञार्थमागताचैवदक्षद्वारेशिवप्रिया वन्हौदृष्ट्वावसोर्धारांलज्जिताचशिवप्रिया तिष्ठंतींद्वारितांदक्षोनददर्शमहासतीम् क्षणमेकंचतिष्ठंतींयदादक्षोनपश्यति तदैवंचिंतितंगौर्याजीवितव्यंमयाकथम् धाविताकुंडनिकटेहाहाकृत्वाचसाततःक्षिप्तंवन्हौतदागौर्याशापंदत्वाचदारुणम् दृष्ट्वातच्चगणेशेनपाशःपरशुरुद्यतः क्रुद्धोह्यसौतदात्यर्थंगौर्यर्थेचगणाधिपः पाशेनबध्वाकतिचित्कोपान्निहतवान्सुरान् दक्षेणनोदितादेवास्सर्वेयुद्धायनिर्ययुः महद्युद्धमभूद्भूयःसहदेवैर्गणेशितुः तंदृष्ट्वानारदःशीघ्रंपुनःकैलासमाययौ निवेदयामासतदायुद्धंगौर्याविसर्जनं तच्छ्रुत्वास्फालयामासजटांकोपादुमापतिः ततोजातोतिविकटःपुरुषोरक्तलोचनः सबभाषेमहादेवंस्वामिन्नाज्ञांचदेहिमे वीरभद्रेतिनामास्यकृत्वाचाज्ञांसमर्पयत् दक्षयज्ञविघातार्थंगच्छवीरानिसत्वरम् श्रुत्वातदीश्वरवचःसर्वप्रमथसंवृतः आययौयज्ञसदनमसृग्वन्हिषुनिक्षिपत् ततइंद्रादयोदेवास्तद्धायविनिर्ययुः क्षणात्पराजितास्तेनविद्रुताश्चदिशोदश अनुद्रुतश्चतान्सोपिपूष्णोदंतानपातयत् भगस्यनेत्रेनासांचसरस्वत्यान्यकृंतत एवंविद्राव्यतान्सर्वान्शिरोदक्षस्यचिच्छिदे कृत्वैवंयज्ञघातंस आजगामशिवांतिक

म् नमस्कृत्यपुरस्तस्थौकृतंकार्यमितिब्रुवन् तथाप्यशांतःकोपोस्यज्ञात्वेनिज्ञानचक्षुषा प्रसादयितुमासीनंब्रह्मविष्णूसमीयतुः नमस्कृत
स्ततस्ताभ्यांप्रसन्नोभूत्सदाशिवः नारदस्तुंबरश्चैवगीतैःशिवमतोषयत् प्रसन्नंवीक्ष्यतंविप्रशिरवांसंस्पृश्यपाणिना ननर्दनारदस्तत्रतो
षयन्नधिकंशिवम् एतस्मिन्नंतरेब्रह्माविष्णुश्चप्रमथाधिपम् व्यजिज्ञपत्तिंदक्षादीन्कृपादृष्ट्याविलोकय कृतांगान्कुरुपूर्णांगान्मृतान्संजी
वयप्रभो विलोकितास्तेदेवेनकृपादृष्ट्याविलोकिनाः पूषादयश्चसांगावैअभूवंस्तत्प्रसादतः उत्थितःपादयोर्मूलंययोदक्षःपिनाकिनः अपराधं
क्षमस्वेतिपुनःपुनरुवाचह उत्थापितःकरेणासौततोदक्षःपिनाकिना उक्तश्चमापुनकार्षीरेवमीशावमानकम् विचरस्वसुखेनेतिभूयस्तंकोप-
आविशत् शशापचतदागौरींयज्ञविघ्नकरींशिवः सुखेविघ्नंकृतवती दक्षस्यैषाततोचिरात् तिर्यग्योनिसमापन्नाविचरिष्यसिभूतले ततोगौरी
बभाषेतंप्रणिपत्यसदाशिवं कथंयास्यामितिर्यक्त्वंभूतलेचस्थितिःकथम् अन्यथानैवभविनाशापएषत्वयोदितः कोकिलामधुरालापाभवे
यंनंदनेवने कोकिलानांस्वरोरूपंरूपंस्त्रीणांपतिव्रतम् विद्यारूपंकुरूपाणांक्षमारूपंतपस्विनाम् अचिरादेवचपुनःकुलेमहतिजन्मने भूयास्त्व
मेवभर्त्राचनवियोगश्चमेमतः वरयेत्कुलजांप्राज्ञःकुरूपामपिकन्यकां दुष्टेकुलेसमुत्पन्नाभर्त्तुःपातयतेकुलं नदीपातयतेकूलंनारीपातयते
कुलं नदीनांचैवनारीणांस्वच्छंदंललितागतिः ततस्तुष्टोमहादेवश्चक्रेशापविमोचनम् दशवर्षसहस्राणिकोकिलारूपधारिणी नंदनेदेववि
पिनेचरिष्यसिततःपरं हिमाचलसुताभूत्वामत्प्रियत्वमुपेष्यसि देवानांतुयथाविष्णुःसहकारोमहीरुहां गंगाचसर्वतीर्थानांतथातिर्यक्षुको
किला आषाढेद्वौयदास्यातांकोकिलायास्तदार्चनम् तथायाकुरुतेनारीनसावैधव्यमाप्नुयात् वसिष्ठउवाच एतद्वाक्यावसानेतुगौरी
साकोकिलाभवत् तदारभ्यशुचिर्ज्ञेतत्प्रथितंकोकिलाव्रतं यानारीनैवकुरुतेमोहात्साविधवाभवेत् कुरुत्वमेतत्कल्याणिकीर्तिमालेव्रतोत्तम
म् कीर्तिमालोवाच कथमाराध्यतेदेवीकोकिलारूपधारिणी विधानंब्रूहितद्विप्रत्वत्प्रसादात्करोम्यहम् वसिष्ठउवाच कोकिला
व्रतमाहात्म्यंविधानंचवदामिते शृणुदेविप्रयत्नेनमंत्रैःपौराणिकैर्युतम् मलमासेत्वतिक्रांतेशुद्धाषाढेसमागते आषाढ्यांपौर्णमास्यांतुसंध्या २१७
कालेह्युपस्थिते संकल्पयेन्मासमेकंश्रावणप्रभृतिह्यहम् स्नानंकरिष्येनित्यंचब्रह्मचर्यस्थितासती भोक्ष्येनक्तंचभूशय्यांकरिष्येप्राणि-

नांदयां सौभाग्यधनधान्यादिप्राप्तये शिवतुष्टये इतिसंकल्प्यविप्राग्रेनारीविप्रेभ्यएवच प्राप्यानुज्ञांतुसंपाद्यसामग्रींसकलामपि प्रत्यू
षेचप्रतिदिनंदंतधावनपूर्वकम् नद्यांगत्वाथवावाप्यांतडागेगिरिनिर्झरे स्नानंकरोमिदेवेशिकोकिलेप्रीतयेतव जलेस्मिन्पावनेपुण्येसर्वदेव
जलाश्रये स्नानंकृत्वाव्रतीदेविसुगंधामलकैस्तिलैः दिनाष्टकंततःपश्चात्सर्वौषध्यापुनःपृथक् वचापिष्टेनचस्नानंदिनान्यष्टौसमाचरेत् तिला
मलकपिष्टेनवचौषधियुतेनच षड्दिनानिततःस्नानंसंपूर्णफललिप्सया स्नात्वाध्यात्वारविंतस्मैदद्यादर्घ्यंप्रयत्नतः आदित्यभास्कररवे
अर्कसूर्यदिवाकर प्रभाकरनमस्तुभ्यंगृहाणार्घ्यंनमोस्तुते सूर्यार्घ्यमंत्रः कारयेत्कोकिलांदेवींसौवर्णींसर्वकामदां रौप्यंचरणयोश्चै
वनेत्रयोश्चापिमौक्तिके रत्नानिपंचपृष्ठेतुचूतवृक्षसमाश्रितां अथवातिलपिष्टेनकोकिलांपक्षिरूपिणीं निधायताम्रपात्रेतांपूजयेत्सुसमा
हितः उपचारैःषोडशभिर्यथावित्तंनिबोधमे आवाहयामितांदेवींकोकिलारूपधारिणीं अवतारंकुरुष्वात्रप्रसादंकुरुसुव्रते आगच्छको
किलेदेविदेहिमेवांछितंफलम् चूतवृक्षंसमारुह्यरमसेनंदनेवने तिर्यग्योनिसमुद्भूतेकोकिलेकलकंठके तिलपुष्पाक्षतैर्युक्तंगृहाणार्घ्यं
नमोस्तुते आषाढस्यासितपक्षेमेघवर्णस्वरूपिणि कोकिलानामदेवित्वंस्नानार्थंप्रतिगृह्यताम् कुर्यादेवंविधांपूजांश्रावण्यंतंचपूजयेत् वि
सर्जयेच्चपश्चात्तांसौवर्णींकोकिलांयदि यदाचतिलपिष्टस्यकोकिलाक्रियतेतदा कुर्यात्प्रत्यहमाह्वानंभिन्नायास्तुविसर्जनम् रम्यंवनंस
मागत्यश्रुत्वाकोकिलकूजितं यदानश्रूयतेशब्दस्तूपवासंतुतद्दिने कोकिलेकृष्णवर्णेत्वंसदावासोवनेषुते सौभाग्यमतुलंदेहिगृहाणार्घ्यं-
नमोस्तुते वसंतेचसमुत्पन्नेविंध्यपर्वतवासिनि गच्छगच्छमहादुर्गेस्वस्थानेनंदनेवने विसर्जनं रूपंदेहिधनंदेहिसर्वसौभाग्यदे
हिमे पुत्रान्देहियशोदेहिसौभाग्यंदेहिसंपदः इत्युक्त्वाचततःपश्चाद्धविष्यान्नेनसुव्रती नक्तभोजीभवेद्राज्ञियावन्मासःसमाप्यते मा
सांतेताम्रपात्रेतुकोकिलांस्वर्णनिर्मितां वस्त्रधान्यगुडैर्युक्तांश्रावण्यांकुंडलंतथा दद्याच्चदक्षिणांचापिदैवज्ञेवापुरोहिते एवमाषाढमा
सस्यद्वैविध्येसमुपस्थिते सधवाविधवावापियानारीकोकिलाव्रतं करोतिसप्तजन्मानिसौभाग्यंलभतेतुसा मृतागौरीपुरंयातिविमा
नेनार्कतेजसा श्रीभगवानुवाच एतद्व्रतंवसिष्ठेनमुनिनाकथितंपुरा तथाकृतंतुतत्पार्थसमस्तंकीर्तिमालया तस्याश्चसर्वंनिष्पन्नं

वसिष्ठवचनंतथा एवमन्यापिकौंतेयकोकिलाव्रतमुत्तमं नकरोतियदानारीव्यालीभवतिकानने एकतःसर्वदानानिकोकिलाव्रतमेकतः कृतंपुराप्सरोभिश्चऋषिपत्नीभिरादरात् अहिल्ययाचसापूर्वमर्चिताशापमुक्तये अरुंधत्यासहस्नात्वापूजिताकोकिलानृप सीतयापूजिता सापिसर्वकामार्थसिद्धये गौतम्यांदंडकारण्येस्नानंकृत्वायथाविधि नलान्वेषणकामेनदमयंत्याचपूजिता रुक्मिण्याचततःस्नात्वापूजिताकोकिलाशिवा विष्णोःपत्युरवाप्त्यर्थंतच्चजातंनसंशयः कुचैलामलिनादीनापरकर्मरतातथा एवंवंध्याकाकवंध्याविवत्सामृतवत्सका सर्वास्ताःफलभाजःस्युर्व्रतस्यास्यप्रभावतः आयुरारोग्यमैश्वर्यंसुखंवृद्धिंयशःप्रजाम् सौभाग्यंसुंदरंरूपंनारीप्राप्नोतिनान्यथा एतद्व्रतंमयाख्यातंकार्यंवारत्रयंनृप तृतीयांतेचविधिवत्कार्यमुद्यापनंशुभं एकस्माज्जायतेद्रव्यंद्वितीयाल्लभतेसुतान् तृतीयाच्चापिसौभाग्यंप्राप्नुयान्नात्रसंशयः इतिवराहपुराणेकोकिलाव्रतम् अथोद्यापनं उद्यापनविधिंब्रूहिव्रतस्यास्यममप्रभो येनविज्ञानमात्रेणसौभाग्यंचभविष्यति श्रावणेपौर्णमास्यांतुशुक्लपक्षेतथैवच द्वितीयायामेकभुक्तंदंतधावनपूर्वकम् उपवासस्यनियमंकर्तुंव्रतपरायणं तृतीयापुण्यफलदामध्यान्हेसमुपोषिता उपलिप्यशुचौदेशेमंडलंतत्रकारयेत् अष्टदलंलिखेत्पद्मंचतुष्कोणंचभद्रकम् कलशंवारिपूर्णंचपंचरत्नसमन्वितम् तस्योपरिन्यसेत्पात्रंप्रस्थेनैकेनपूरयेत् तदभावेतदर्धंवाकुडवेनाथनारद ऊर्णापट्टंकृष्णावर्णंयुग्मंदद्याच्चशक्तितः तस्योपरिन्यसेद्देवींकोकिलाप्रतिमांतथा अत्रगंधप्रदानेनधूपदीपप्रदानकं नैवेद्यंमोदकान्दद्यात्सक्वान्नंघृतसंयुतम् अर्घ्यंचैवप्रदातव्यंतांबूलंफलमुत्तमम् रात्रौजागरणंकार्यंवाद्यनृत्यप्रभूषितम् पूजिताएकचित्तेनफलंप्राप्नोतिचाक्षयम् प्रभातेविमलेस्नात्वासंध्यांकृत्वाविधानतः पूजयेद्विधिवद्देवींहोमंचविधिवद्द्विज तिलचंपकपुष्पैश्चतंडुलैर्घृतपायसैः अष्टोत्तरशतंहुत्वादुर्गामंत्रैश्चवैदिकैः कोकिलाप्रीतयेब्रह्मन्व्याहृतीनांशतत्रयम् ब्राह्मणान्भोजयेत्पश्चात्सपत्नीकांश्चपंचच अशक्तोप्येकयुग्मंचभोजयेच्चतथागुरुं त्रिस्त्रिभ्यश्चप्रदातव्यंघारिकापंचकंतथा मोदकांश्चससूत्रांश्चवंशपात्रसमन्वितान् कृष्णवर्णसमायुक्तान्पक्वान्नेनप्रपूरितान् सर्वोपस्करसंयुक्तांस्त्रिस्त्रिभ्यश्चप्रदापयेत् आचार्यंपूजयेद्भक्त्यागांकृष्णांचसवत्सकाम् उपानहौतथाशय्यांचामरंछत्रमेवच मुद्रिकांकर्णवेष्टेचचंदनंकुसुमानिच

सर्वंदद्याद्द्विजेंद्रायसपत्नीकायनारद दापयेद्विधिवत्सर्वंब्राह्मणायकुटुंबिने व्रतोपदिष्टदानंचभोजनंचसदक्षिणं एवंयाकुरुतेराजन्को
किलाव्रतमुत्तमम् सर्वंप्राप्नोतिसौभाग्यंपुत्रधान्यधनानिच ततोभुंजीतनैवेद्यंपुत्रपौत्रैःसमन्विता कोकिलेपूजितेगच्छविधिवत्सर्वकाम
दे कारयेत्कोकिलांदेवींसौवर्णींसर्वकामदां रौप्यचरणचंचूभिरचितांनेत्रमौक्तिकाम् पंचरत्नानिपृष्ठेचचूतवृक्षसमाश्रिताम् एवंत्वंच
यथापूज्यायथोक्ताचशनैःशनैः विप्रकरार्चितालक्ष्मीःस्वस्वभावमिदंशृणु महाफलमवाप्नोतिमहामायाप्रसादतः इतिवराहपुराणेको
किलाव्रतोद्यापनंसंपूर्णम् अथश्रावणपौर्णमास्यांरक्षाबंधनम् उक्तंहेमाद्रौभविष्ये युधिष्ठिरउवाच सर्वरोगोपशमनंसर्वाशु
भविनाशनं सकृत्कृतेनाब्दमेकंयेनरक्षाकृतोभवेत् श्रीकृष्णउवाच शृणुपांडवशार्दूलइतिहासंपुरातनं इंद्राण्यायत्कृतंपूर्वंश
क्रस्यजयवृद्धये देवासुरमभूद्युद्धंपुराद्वादशवार्षिकं तत्रासुरैर्जितःशक्रःसहसर्वैःसुरोत्तमैः बृहस्पतिमुपामंत्र्यइदंवचनमब्रवीत् न
स्थातुंचैवशक्रोमिनगंतुंतैरभिद्रुतः सर्वथायोद्धुमिच्छामिगुरुस्त्वंचन्यवारय ततः संवदतोरेवंशचीमाहसुरेश्वरं अद्यभूतदिनंदेवभा
तःसर्वंभविष्यति अहंरक्षांविधास्यामियेनाजेयोभविष्यसि इत्युक्त्वापौर्णमास्यांसापौलोमीकृतमंगला बबंधदक्षिणेपाणौरक्षापो
टलिकांततः बद्धारक्षस्ततःशक्रःकृतस्वस्त्ययनोद्विजैः दुद्रावदानवानीकंक्षणात्कालइवप्रजाः शक्रस्तुविजयीभूत्वापुनरेवजगत्त्रये
एषप्रभावोरक्षायाःकथितस्तेयुधिष्ठिर जयदःसुखदश्चैवपुत्रारोग्यधनप्रदः युधिष्ठिरउवाच क्रियतेकेनविधिनारक्षाबंधःसुरोत्तमैः
कस्मिन्तिथौकदादेवह्येतन्मेवक्तुमर्हसि यथाहिभगवन्देवविचित्राणिप्रभाषसे तथातथानमेतृप्तिर्बह्वर्थाःशृण्वतःकथाः कृष्णउवाच
संप्राप्तेश्रावणेमासिपौर्णमास्यांदिनोदये स्नानंकुर्वीतमतिमान्श्रुतिस्मृतिविधानतः ततोदेवान्पितॄंश्चैवतर्पयेत्परमांभसा उपाकर्मणिचै
वोक्तमृषीणांचैवतर्पणं कुर्वीतब्राह्मणैःसार्द्धंवेदानुद्दिश्यशक्तितः शूद्राणांमंत्ररहितंस्नानंदानंचशस्यते ततोपराह्णसमयेरक्षापोटलि
कांशुभां कारयेच्चाक्षतैस्तद्वत्सिद्धार्थैर्हेमचर्चितैः कार्पासैःक्षौमवस्त्रैर्वाविचित्रैर्मलवर्जितैः विचित्रतंतुग्रथितांस्थापयेद्भाजनोपरि
कार्यागृहस्यरक्षावैगोमयैःशुक्लतंडुलैः दूर्वावर्णैःसितैश्चित्रैःसर्वपापविनाशिनी उपलिप्तेगृहमध्येसान्नंकुंभंचविन्यसेत् पीठोपरिविशे

द्राजासचिवैःसुमुहूर्त्तके वेश्याजनेनसहितोमंगलैःसहितस्थितैः रक्षाबंधःकार्यसिद्धिःसर्वविघ्नोपशांतिदः पुरोधानृपतेरक्षांसम्यग्बध्नी
तमानवः येनबद्धोबलीराजा दानवेंद्रोमहाबलः तेनत्वामपिबध्नामिरक्षेमाचलमाचल ब्राह्मणैःक्षत्रियैर्वैश्यैःशूद्रैरन्यैश्चमानवैः कर्तव्यो
रक्षिकाबंधोद्विजान्संपूज्यभक्तितः अनेनविधिनायस्तुरक्षाबंधंसमाचरेत् ससर्वदोषरहितःसुखीसंवत्सरंभवेत् रक्षाबंधोभद्रायांनका
र्यः भद्रायांद्वेनकर्तव्येश्रावणीफाल्गुनीतथा श्रावणीनृपतिंहंतिग्रामंदहतिफाल्गुनी इतिवचनात् इतिभविष्योक्तंरक्षाबंधनंसंपूर्णम्
अथभाद्रपदपौर्णमास्यांउमामहेश्वरव्रतंशिवरहस्ये राजोवाच भगवन्मुनिशार्दूलव्रतमेकंवदस्वमे सांगेयस्मिन्व्रतेचीर्णेसर्वान्कामान
वाप्नुयात् गौतमउवाच उमामहेश्वरंनामव्रतमस्तिव्रतोत्तमम् सांगेयस्मिन्व्रतेचीर्णेसर्वान्कामानवाप्नुयात् मासिभाद्रपदेशुक्लेपौर्ण
मास्यांप्रयत्नतः तद्व्रतंकार्यमनघैर्ब्राह्मणाद्यैर्विधानतः भाद्रशुक्लचतुर्दश्यांप्रातःस्नात्वाविधानतः शिवंसंपूज्यविधिवन्शैवानप्यतियत्नतः
शिवंध्यात्वाजगद्वंद्यंसोमंसोमार्द्धशेखरम् कृतांजलिपुटोभूत्वामंत्रमेतत्पठेन्नरः श्वःकरिष्येव्रतंयत्नादुमामहेश्वराभिधम् आज्ञांदेहिमहादे
वसोमसोमार्द्धशेखर इतिविज्ञाप्यवैदेवंपुनःसंपूज्ययत्नतः मध्यान्हेपिमहादेवमर्चयेन्नियतोव्रती ततोदेवानृषीन्सर्वानभ्यर्च्यविधिवन्नृ
प हविष्याशीशिवंसायंपूजयेद्विधिपूर्वकम् निद्राकार्यातथायोगंमहादेवस्यसन्निधौ उत्थायपश्चिमेयामेमहादेवंततःस्मरेत् ततःशौचादिकं
सर्वंनिर्वर्त्यप्री तमानसः स्नानंकुर्याद्यथाभोगंयथाशास्त्रंयथाक्रमम् परिधायततोवस्त्रंक्षालितंशुभमक्षतं उद्धूलनंततःकार्यंत्रिपुंड्रंचय
थाक्रमम् रुद्राक्षधारणंकार्यंसंध्याकार्याततःपरं ततःशिवार्चनंकार्यंबिल्वपत्रादिभिर्नरैः ततोहोमोपिकर्तव्यःशिवप्रीत्यर्थमादरात् त
तःपरंनियमनंप्रणमेत्सोममव्ययम् सग्रंथिकुशपिंजूलंततःसंपाद्यमादरात् गव्यंपंचदशग्रंथिंतन्मूजितंशिवात्मकं एवंपंचदशग्रंथिंदो
रकंकुंकुमान्वितं संपादनीयंयत्नेनव्रतनिष्ठैरनाकुलैः उमामहेश्वरंचैवसौवर्णप्रतिमाद्वयम् संपादनीयंयत्नेनव्रतनिष्ठैरनाकुलैः उमा
महेश्वरंचैवसौवर्णप्रतिमाद्वयम् संपादनीयंयत्नेनराजतंवामनोहरं पलादूनंनकर्तव्यंप्रतिमाद्वयमुत्तमम् अधिकंचेद्यथाशक्तिकर्तव्य
मतियत्नतः सौवर्णंराजतंवापिताम्रंवामृन्मयंनवं संपादनीयंयत्नेनप्रयतैर्व्रततत्परैः ततःसदर्भमूर्तिंचवस्त्रयुग्मेनवेष्टयेत् पृथक्पृथ

कुस्थापनीयंकलशोप्रतिमाद्वयं आपोहिष्ठादिभिर्मंत्रैस्तथात्र्यंबकमंत्रकैः अभिषिच्यप्रयत्नेनपूजयेत्प्रतिमाद्वयं ततःप्रयत्नतोगच्छेदलंकृतशिवालयम् शिवस्थानंततोगच्छेत्तोरणाद्यैरलंकृतम् ततःशोडशकेपत्रेबहिरंतश्चतुर्गुणे अलंकृतैःस्वस्तिकाद्यैःस्थापयेत्कलशंनवं ध्यायेत्ततोमहादेवमुमादेहार्धधारिणं मुक्तामालापरीतांगंदुकूलपरिवेष्टितं पंचाननमुमाक्रांतमनलेंदुरविप्रभं चंद्रार्धशेखरंनित्यंजटामुकुटमंडितं त्रिपुंड्रलेखाविलसद्भालनेत्रोपरिस्थितम् भस्मोद्धूलितसर्वांगंरुद्राक्षाभरणान्वितम् मंदस्मितमनाधारमाधारंजगतांप्रभुं देवैरनंतैरनिशंस्तूयमानमनेकधा देवात्मकंदेववंद्यंविष्णुब्रह्मादिवंदितं विष्णुनेत्रान्वितारक्तपादपंकजमुत्तमम् अप्रतिद्वंद्वमद्वंद्वंसर्ववृंदारकार्चितं सर्वोत्तममनाद्यंतंसर्वदेवनिवेदितम् सत्यंऋतंपरंब्रह्मपुरुषंकृष्णपिंगलं ऊर्ध्वकेशंविरूपाक्षंविश्वरूपंचिदात्मकं निष्फलंनिर्गुणंशांतंनिरवद्यंनिरंजनम् अप्रमेयंजगन्मध्येस्थितिसंहारकारणं विश्वबाहुंविश्वपादंविश्वाक्षंविश्वसंभवं विश्वंनारायणंराध्यमक्षरंपरमंपदं विश्वतःपरमंनित्यंविश्वस्येशामनामयं एवंध्यात्वामहादेवंसर्वदेवोत्तमोत्तमम् ध्यायेत्ततःपरंगौरीमादिविद्यामनामयीं लक्ष्मीसेवितपादाब्जांशचीसेवितपादुकां सरस्वत्यादिभिर्नित्यंस्तूयमानपदांबुजां अधरोष्ठंधरीभूतपक्वबिंबफलासमां मुखकांतिकलोपेतांपूर्णचंद्रामनायाम् तिरस्कृतालिमालांतामलकावलिभिःसदा पीनवक्षोजनिर्धूतचक्रवाकवरांगना नित्यंतिरस्कृतांभोजांनयनाभ्यामनिंदितां सीमंतधिक्कृताशेषकामभल्लामहर्निशम् भ्रूकुटीह्रीकृताशेषशमभल्लामनाकुलां बाहुनालकलोद्भूतहेममालांविलासिनीं रोमावलीतिरोभूतस्वमद्भ्रमरनालिकां नाभिरंध्रतिरोभूतघनावर्त्तामवर्तुलां उत्तमोरुतिरोभूतरंभास्तंभांशुभावहां पादयुग्मप्रभाकांतिनिर्जितारुणपंकजां उपेंद्रोपेंद्रजननींमहेशार्द्धांगभागिनीं महेशाश्लिष्टवामांगांवरदाभयदांसदा प्रसन्नवदनांशांतांस्मितपूर्वाभिभाषिणीं पूर्णचंद्रदुकूलाढ्यांनानाभरणभूषितां स्तूयमानांसदादेवैर्यज्ञैर्दानैश्चकोटिशः एवंध्यात्वाततःसम्यगुपचारान्प्रकल्पयेत् ततःपुष्पाणिसंगृह्यशिवमावाहयेच्छिवाम् महादेवदयासिंधोविष्णुब्रह्मादिवंदित आवाहयामिदेवत्वांप्रसीदपरमेश्वर इत्यावाहनं आसनं पाद्यं अर्घ्यं आचमनं मधुपर्कं पंचामृतस्नानं· स्नानं· वस्त्रं· उपवीतं· गंधं· आभरणानि बिल्वपत्रं·पुष्पाणि· धूपंदीपं·नैवेद्यं·आचमनीयं·फलं·तांबूलं·दक्षिणां·छत्रंचाम

रंव्यंजनानि· नीराजनं· पुष्पांजलिं· प्रदक्षिणां· नमस्कारान् अथांगपूजा कपर्दिनेनमः शिरःपूजयामि भाललोचनाय॰ भालं॰ सोमसूर्याग्निलोचनाय॰ नेत्रत्रयंपू॰ सुश्रोत्राय॰ श्रोत्रे॰ घ्राणगंधाय॰ घ्राणंपू॰ स्मृतिदंताय॰ दंतान्पू॰ श्रुतिजिव्हाय॰ जिव्हांपू॰ सुकपोलाय॰ कपोलौ॰ ज्ञानोष्ठाय॰ ओष्ठौ॰ विश्वजंघाय॰ जंघे॰ विश्वपादाय॰ पादौ॰ विश्वनखाय॰ नखान्पू॰ सर्वात्मकाय॰ सर्वांगं॰ अथशक्त्यंगपूजा शिवायै॰ शिरःपू॰ पृथग्वेण्यै॰ वेणींपू॰ सीमंतराजिताय॰ सीमंतंपू॰ कुंकुमभालायै॰ भालं॰ चक्षुष्मत्यै॰ नेत्रेपू॰ सूक्तिश्रोत्रायै॰ श्रोत्रेपू॰ गंधप्रियायै॰ घ्राणंपू॰ सुभगकपोलायै॰ कपोलौपू॰ कुड्मलदंताय॰ दंतान्पू॰ विद्याजिव्हायै॰ जिव्हांपू॰ बिंबोष्ठायै॰ ओष्ठौपू॰ वृत्तकंठायं॰ कंठंपू॰ पृथुलकुचायै॰ कुचौपू॰ विश्वगर्भाय॰ उदरंपू॰ शुभकट्यै॰ कटींपू॰ दिव्यरुद्देशायै॰ ऊरूपू॰ क्नतजंघायै॰ जंघेपू॰ लक्ष्मीसेवितपादुकायै॰ पादौपू॰ महेश्वरप्रियायै॰ नखान्पूज॰ शोभनविग्रहायै॰ सर्वांगंपू॰ अंगपूजांसमाप्येवंदोरकंचविसर्जयेत् प्रत्येकंग्रंथिषुस्वच्छैस्वच्छैर्बिल्वदलादिभिः प्रथमग्रंथिमारभ्यनमःसोमेतिमंत्रतः यथाक्रमेणसंपूज्यततोधार्योहिदोरकम् तत्रोपचाराःसर्वेपितेनमंत्रेणसादरं व्रतिभिर्यत्नतःकार्यंकुंकुमांकितदोरकं ततःपंचदशप्रस्थागोधूमास्तंडुलाश्चवा उपायनार्थमानेयाः शुद्धागोघृतपाचिताः यद्वापंचदशाज्याक्तागोधूमापूपमंडकाः ततःशिवैकशरणाःशैवाशिवव्रतप्रियाः पूजनीयाःप्रयत्नेनगंधपुष्पादिभिः क्रमात् ततःसवस्त्रकलशांशिवयोःप्रतिमाद्वयम् शैवायदेवंयत्नेनसुवर्णफलसंयुतम् आदावुपायनंदत्वादेयंह्येनदतःपरं उपायनस्यमंत्रोपिवक्ष्यतेत्रविशेषतः उमेशःप्रतिगृण्हातिह्युमेशोवैददातिच उमेशस्तारकोभाभ्यामुमेशायनमोनमः अमुंमंत्रंसमुच्चार्यदत्वादानंनिवेदयेत् अतःशैवाःप्रयत्नेनभोजनीयाविशेषतः सुवासिन्योपियत्नेन भोजनीयाःप्रयत्नतः शैवानेवंभोजयित्वास्वयंभुंजीतवाग्यतः अतिथीनपिसंतर्प्यद्वारदेशस्थितान्नृप एवंप्रयत्नतःकार्यंप्रतिवत्सरमादरात् नियमेनैवविधिवदुक्तरीत्यायथाक्रमं ब्राह्मणाद्यैरिदंकार्यं व्रतमाहितमानसैः सर्वाभीष्टप्रदंपुण्यंव्रतमेतच्छिवात्मकं प्राप्तेतुषोडशेवर्षेकार्यमुद्यापनंनृप उद्यापनविधानंचवक्ष्येशृणुयथाक्रमं पौर्णमास्यांभाद्रपद्यांव्रतोद्यापनमादरात् कर्तव्यमितियत्नेनद्रव्यंसंपाद्यसादरम् हैमीकार्यासार्द्धषड्भिः प्रतिमाचपलैःशुभा तदर्धेनाथवाकार्यातदर्धेनाथवानृप रजतेनाथवाकार्यायथोक्तपलमानसः संपादनीयाःकुंभाश्च

हैमाःपंचदशोत्तमाः अथवाराजताःकार्यायद्वाताम्रमयान्नृप भाद्रशुक्लचतुर्दश्यांशैवाब्राह्मणपुंगवाः निमंत्रणीयायत्नेनप्रातःसप्तदशोत्तमाः ततोगृहंवितानाद्यैरलंकृत्यप्रयत्नतः स्वस्तिकाद्यैरलंकुर्याच्छिवस्थानंशुभावहं ततःसायंप्रयत्नेनतस्मिंच्छंकरमंदिरे पूजनीयाःप्रयत्नेनशिवयोःप्रतिमेशुभे पूर्वोक्तेनविधानेनमंत्रैस्तैर्वरसाधनैः रात्रौजागरणंकार्यंसोपवासंप्रयत्नतः ऋत्विग्भिःसहसोत्साहंपयोमात्राशनेनवा रात्रौशिवकथाश्राव्याःश्रोतव्यायत्नतोनृप कर्तव्यायत्नतोरात्रौपूजायामचतुष्टये ततःस्थेयंप्रयत्नेनस्नात्वाशंकरसन्निधौ पूजनीयःप्रयत्नेनशिवोदेवशिखामणिः चतुरस्रंततःकार्यंकुंडमष्टदलान्वितं तत्रवन्हिंप्रतिष्ठाप्यविधिवद्गृह्यमार्गतः साज्येनपरमान्नेनहोमःकार्यस्ततःपरं पंचविंशतिसाहस्रंहोमःसोमेतिमंत्रतः कार्यःप्रयत्नतोराजन्नमःपूर्वात्सदारतः ततःपूर्णाहुतिंहुत्वाशैवान्संपूजयेत्ततः बिल्वपत्रैःपुष्पमाल्यैर्भस्मनाचयथाक्रमम् एकैकस्मैप्रदातव्यंशिवयोःप्रतिमाद्वयं कलशोपिप्रदातव्यस्ततोवस्त्रद्वयान्वितः आचार्यायप्रदातव्यंसुवर्णशतमादरात् ततोयत्नेनशैवेंद्राःपूजनीयाःकृतव्रतैः सुवासन्योपिशैवानांभोजनीयाःप्रयत्नतः ततोदेवाःस्वशक्त्याचभोजितेभ्यश्चदक्षिणाः ततश्चस्वकृतंकर्मशिवायचनिवेदयेत् उद्यापनंकृतंशंभोमयैतदधुनाप्रभो इदंसंपूर्णतांयातुत्वत्प्रसादान्महेश्वर मंत्रहीनंभक्तिहीनंशक्तिहीनसुमापते कृतंकर्मभवत्वद्यत्वत्प्रसादात्फलप्रदं प्रायश्चित्तंवैदिकानांव्यंगानामपिकर्मणां शिवस्मरणमेवेतिश्रुतिरप्यस्तिशांकरी अतःकृतमिदंश्रौतंकर्मव्यंगमपिप्रभो सांगंभवतुविश्वेशतवैवस्मरणात्प्रभो इतिसंप्रार्थ्यदेवेशंसांबंसर्वसुरोत्तमं भुंजीयाद्बंधुभिःसार्द्धंसमौनंतैलवर्जितम् एवंयःकुरुतेसम्यक्शुभामहेश्वरव्रतं ससर्वभोगान्भुक्त्वांतेमोक्षमाप्नोतिसर्वदा राजोवाच गौतमेदंव्रतंचीर्णंपुराकेनवदस्वमे कस्यकामसमभूत्सिद्धिर्तस्यास्यप्रभावतः गौतमउवाच पुराशैववरोराजन्दुर्वासाख्योमुनीश्वरः कदाचित्संचरँल्लोकान्ददर्शकमलापतिम् ततःसमागतंदृष्ट्वादुर्वासामुनिसत्तमः बिल्वमालांददौतस्मैशंकरेणसमर्पितां गृहीत्वाबिल्वमालांतांहरिर्गमनसंभ्रमात् शिरसापूजनीयांतांगरुडेसविनिक्षिपत् ततस्तांतादृशींदृष्ट्वादुर्वासाःक्रोधमूर्च्छितः हरिंशशापबहुधाधिग्जन्मेतिचसंवदन् मयाशिवार्पितादत्तामालातुभ्यमघापहा साकथंगरुडस्कंधेविनिक्षिप्तात्वयाहरे गर्वस्यमूलभूतेयंलक्ष्मीस्तवविनश्यतु वैकुंठस्याधिकारोपितवमास्तुममाज्ञया निस्तेजस्कोवनीपृष्ठेसंचरा-

द्यावधिध्रुवम् इत्युक्त्वासतुदुर्वासाययौल्लोकांतरंनृप ततःपपातदुग्धाब्धौलक्ष्मीर्विष्णुमनोहरा उवासविपिनेघोरेस्वकृतंकर्मसंस्मरन् ततः कदाचिद्भूपालमयातत्रगतंपुरा तदामामागतंदृष्ट्वापूजयामासमांहरिः ततोश्रुपूर्णनयनः कृतांजलिपुटोहरिः जगादपूर्ववृत्तांतंस्वलक्ष्मीनाशकारणं ततोनिक्लांतचित्तायविष्णवेव्रतमुत्तमम् तत्पृष्टेनमयाभूपकथितंसादरंशिवम् ततोविलंबंविधिवच्चकारश्रद्धयान्वितः ततःप्रसन्नोभगवान्हरयेपार्वतीपतिः ददौलक्ष्मींसगरुडांकरुणानिधिरव्ययः इदमेवव्रतंचीर्णमिंद्रेणापिहतौजसा तेनप्राप्तस्ततःस्वर्गःस्वर्गभोगश्चशाश्वतः ब्रह्मणापिपुराचीर्णइदमेवव्रतंनृप नष्टावागीश्वरीतेनसंप्राप्तादुर्लभापिसा मुनिभिश्चपुराचीर्णंव्रतमेतन्मुमुक्षुभिः अस्यव्रतस्याचरणान्मुक्तिःप्राप्तामुनीश्वरैः इदंव्रतंप्रयत्नेनयःकरिष्यतिभक्तितः तस्यसौभाग्यसंपत्तिर्भविष्यत्येवसर्वथा यस्यास्त्यैश्वर्यभोगेच्छामोक्षेच्छाप्यनपायिनी यस्यसर्वाधिपत्येच्छातेनकार्यमिदंव्रतं वैद्युतेनापिविप्रेणमोक्षार्थमतियत्नतः कृतमेतद्व्रतंपूर्वंसर्वाभीष्टफलप्रदं मुक्तिःप्राप्ताचतेनापिव्रतस्यास्यप्रभावतः यंयंकामंसमुद्दिश्यव्रतमेतदनुत्तमं यःकरिष्यतितंतंकामंससमाप्नोतिनिर्मलं इदंव्रतंमहेशेनसमाख्यातमुमांप्रति कुमारायसमाख्यातमुमयैतद्व्रतंशुभं नंदिकेशायकथितंमयाचैतद्व्रतंशुभं नंदिकेशेनकथितंदुर्वाससामुनयेततः दुर्वाससापिकथितमगस्त्यायव्रतोत्तमम् व्रतंचसागरेमत्स्यमगस्त्येनमहात्मना मयानिक्लिन्नचित्तायविष्णवेकथितंपुरा तेनचीर्णंव्रतमिदंसर्वसौभाग्यदायकम् ब्रह्मणेकथितंपूर्वमिदमेवव्रतंमया तेनचीर्णंव्रतंसांगंवाणीप्राप्त्यर्थमादरात् सूर्यायेंद्रायचंद्रायमयैतत्कथितंव्रतं तेनचीर्णंव्रतमिदंसर्वसौभाग्यदायकं कश्यपादिमुनिभ्यश्चकथितंव्रतमुत्तमम् तैश्चचीर्णंव्रतंसम्यग्भुक्तिमुक्तिफलप्रदं भूपव्रतानिसंत्येवबहूनिविविधानिच तथाप्येतादृशंदेवव्रतंनास्त्येवसर्वथा भवानपिकुरुप्रीत्याभूपालव्रतमुत्तमम् इदंव्रतंशिवक्षेत्रेयःकरिष्यतिभक्तितः तस्यसर्वार्थसंपत्तिर्भवत्येवनसंशयः शिवउवाच इत्येतद्वचनंश्रुत्वासराजाप्रीतमानसः सपुत्रःपूजयामासगौतमंशैवपुंगवं ततोधर्मव्रतंचैवमुपदिश्यसगौतमः पुनःसंपूजितोराज्ञास्वाश्रमंप्रतिसंययौ जगामपुत्रस्तद्वाक्यमिदंमाहेश्वराभिधं व्रतंचकारविधिवद्यथाक्रममतंद्रितः इतिशिवरहस्येउमामहेश्वरव्रतोद्यापनंसंपूर्णं इदंकर्नाटकेप्रसिद्धं अथाश्विनपौर्ण

मास्यांकोजागरव्रतम् आश्विनपौर्णमासीपराग्राह्या अश्वयुजीकर्मणिपूर्वाण्हव्यापिनीदेवकर्मत्वात्ग्राह्या अत्रकोजागरव्रतेबहुव्यापिनीरात्रौलक्ष्मीपूजनाक्षक्रीडाप्रधानत्वाद्रात्रिव्यापिन्येवकार्या स्कांदे अस्तिकोजागरंनामव्रतानामुत्तमंव्रतं यत्कृत्वासमवाप्नोतिजंतुर्लोकाननुत्तमम् ऋषयऊचुः कार्तिकस्यउपांगानिव्रतानिकथयंतुनः कृतेषुयेषुभवतिसंपूर्णंकार्तिकव्रतं वालखिल्याऊचुः आश्विनेशुक्लपक्षेतुभवेद्याचैवपूर्णिमा तद्रात्रौपूजनंकुर्याच्छ्रियोजागृतिपूर्वकं नारिकेरोदकंपीत्वाअक्षक्रीडांसमारभेत् निशीथेवरदालक्ष्मीःकोजागर्तीतिभाषिणी जगत्प्रभ्रमतीतस्यांलोकचेष्टावलोकिनी तस्मैवित्तंप्रयच्छामियोजागर्तिमहीतले सर्वथैवप्रकर्तव्यंव्रतंदारिद्र्यभीरुभिः एतद्व्रतप्रभावेनवलितोपिधनीभवत् ऋषयऊचुः वलितःप्रोच्यतेकोसौलब्धवान्सकुतोव्रतं एतद्विस्तरतोब्रूतवालखिल्यास्तपोधनाः वालखिल्याऊचुः ब्राह्मणोवलितोनाममागधःकुशसंभवः नानाविद्याप्रवीणोसौसंध्यास्नानपरायणः याचनंमरणंतुल्यंमन्यतेसद्विजोत्तमः गृहागतंसगृण्हातिनान्यंयाचयतेक्वचित् तस्यभार्यामहाचंडीनित्यंकलहकारिणी मद्भगिन्यःस्वर्णरौप्यालंकारादिविभूषिताः नानामाल्यांबरधरादृश्यादेवांगनाइव अहंदरिद्रस्यगृहेपतितास्मिदुरात्मनः लज्जामांबाधतेत्यंतंज्ञातीनांसुखदर्शनेधिगस्तुचैवविद्यायानिर्धनस्यकुलस्यच एवंवदतिलोकेषुनकरोतिपतीरितं संकल्पंकृतवानेकंयद्यद्भर्त्तावदिष्यति विपरीतंकरिष्यामियावल्लक्ष्मीःप्रसीदति भर्तःपाषाणबुद्धेत्वंचौर्यंकुरुनृपालये आनीयतांधनंभूरिनोचेत्संताडयाम्यहं क्षणंरोदतिनाश्नातिकदाचिद्बहुखादति साकपालंताडयतीत्येवंक्लेशयतेपतिं क्षंत्वातस्यास्तच्चरितंयाचनादुःखभीतितः नोवाचवचनंकिंचिद्यथालाभेनतोषितः एकस्मिन्नश्वाद्रपक्षेतुह्युद्विग्नोभूद्विजोत्तमः एकस्मिन्वत्सरेसर्वंश्राद्धसामग्रिकंगृहे वर्ततेगृहिणीचेयंनकरिष्यतिकिंचन दुःखोद्विग्नमनाविप्रोनभाषयतिकिंचन चिंतयाविष्टमेवंतमाययौमित्रमुत्तमम् नाम्नागणपतिख्यातंतस्मिन्नभ्यागतेसति नोवाचपूर्ववद्वार्त्तांमित्रंवचनमब्रवीत् भोभो वलितचित्तंतेकिमर्थंचिंतयान्वितं अवश्यंस्वधियाकृत्वाचिंतांतेनिर्हराम्यहं वलितउवाच अधुनापितृपक्षेतुपितुःश्राद्धंसमागतंसामग्रिकंचास्तिगृहेविपरीतकरीप्रिया कथंसंपाद्यतेश्राद्धमितिचिंतायुतोस्म्यहं गणपतिरुवाच धन्योसिकृतकृत्योसिभार्या

यस्येदृशीगृहे ब्रूहित्वंवैपरीत्येनभार्याकार्यंकरिष्यति वलिनस्ततथेत्युक्त्वासायंभार्यामभाषत अनर्थकारकेचंडीपरश्वःश्राद्धकंपितुः न
स्थापितंधनंयस्मान्मदर्थंनैस्तपापकैः तस्मान्नशीघ्रंपाकंत्वंकुरुदुष्टेकरोतिच्चेत् ब्राह्मणायेद्यूतकाराःशौचाचारविवर्जिताः निमंत्र्यास्तेत्वया
भद्रेनोत्तमास्तकदाचन इतिभर्तृवचःश्रुत्वासंभारस्तमहान्कृतः निमंत्रितास्तकसद्विप्राःकालेपाकःकृतस्तथा विपरीतैरेववाक्यैःश्राद्धंसं
पादितंतया पिंडदानंततःकृत्वाभार्यावचनमब्रवीत् विसर्ज्यपिंडान्नीत्वात्वंक्षिपगंगाजलेशुभे पिंडान्नीतांस्तथेत्युक्त्वाशौचकूपेव्यचिक्षि
पत् तच्छ्रुत्वावलिनोदुःखीबभूवाकुलिताननः क्रोधाद्धिनिर्ययौगेहात्संकल्पंकृतवानिति लक्ष्मीर्यदिप्रसन्नास्यात्तदान्नंभक्षयाम्यहं इ
तिसंकल्प्यसोविप्रोगहनेनिर्जनेवने एकोधर्मनदीतीरेवृक्षवल्कलधारकः त्रिंशद्दिनानिचतदाआगताश्विषपूर्णिमा कालीवंशसमुद्भूता
नागकन्याःसुलोचनाः निवसंतिवनेतस्मिन्व्रतंचक्रूरमाप्तये श्वेतीकृतंतुसुधयागृहंचंद्रगृहोपमं मंडलानिविचित्राणिनानापिष्टैःकृतानि
च पंचामृतानिरत्नानिदर्पणाच्छादनानिच स्थापयित्वेंदिरापूजाकृताताभिःप्रयत्नतः एवंतुप्रथमोयामोबालाभिर्नीतएवहि प्रारब्धंच
ततोद्यूतंतुर्यतास्तनलेभिरे चतुर्भिस्तविनाक्षाणांक्रीडनंनैवजायते तस्मान्मृगयस्तविचरन्विचार्यैवंपुनर्गताः कन्यकातुनदीतीरेद
दर्शवलिनंद्विजं ज्ञात्वातंसाधुचरितंसचिंतंचसुखाकृतेः उवाचवचनंचारुद्विजकोसिसमागतः याह्यद्यक्रीडितुंद्यूतंलक्ष्म्याःप्रीतिकरंप
रं इत्थंतद्वचनंश्रुत्वावलिनोवाक्यमब्रवीत् वलितउवाच द्यूतेनक्षीयतेलक्ष्मीर्द्यूतान्धर्मोविनश्यति सुधैतद्वदसेकिंत्वंकथंलक्ष्मीः
प्रसीदति कन्योवाच भाषसेत्वंपंडितवत्कर्मतेस्तितुमूर्खवत् इषस्यशुक्लपूर्णायांद्यूताल्लक्ष्मीःप्रसीदति द्यूतक्रीडांतुकृत्वैवंकौ
तुकंपश्यचेंदिरं इत्युक्त्वासौतयानीतोक्रीडार्थंस्वस्यमंदिरे दत्वातस्मैनारिकेरंजलंभक्ष्यादिकंतथा आरब्धंचतथाद्यूतंश्रीलक्ष्मीःप्री
यतामिति लापितानिचरत्नानिकन्याभिर्ब्राह्मणेनतु कौपीनंलापितंस्वीयंताभिर्निर्जितमेवतत् ब्राह्मणःक्रोधसंयुक्तोकिंकर्तव्यंमया
धुना उपवीतंलापयित्वाततःस्वीयंकलेवरम् लापयिष्येविनिश्चित्यह्युपवीतंललापसः ताभिर्जितंचतदपिशरीरंलापितंस्वकं ततोधरा
त्रेसंजातेलक्ष्मीनारायणावुभौ आगतालोकचरितंद्रष्टुंविप्रंददर्शतुः हीनोपवीतकौपीनंचिंतयातिकृशीकृतम् उवाचवचनंविष्णुःशृणुत्वं

पद्मलोचने तवव्रतकरोविप्रःकथंजातःसचिंतकः तस्मादेनंकुरुक्षिप्रंलक्ष्मीवंतंसुखान्वितं इतिविष्णुवचःश्रुत्वापद्मयासौकटाक्षितः बालश्चित्तहरोजातस्तत्कालेमदनोपमः ततःकामेनसंक्रिडास्तास्तुयानागकन्यकाः विप्रायवचनंप्रोचुःशृणुविप्रतपोधन यद्यस्माभिर्जितस्त्वंचभर्त्तास्माकंवचोनुगः वयंत्वयानिर्जिताश्चेद्ययेच्छसितथाकुरु इतितद्वचनंश्रुत्वातथामेनेसचद्विजः क्रीडनान्नाजिताःकन्यागांधर्वेणविवाहिताः तासांरत्नानिनाश्चापिगृहीत्वास्वगृहंययौ प्राप्तंचंडीतिरस्कारान्मयेदंभाग्यमुत्तमं तस्मात्संमानितात्चंडीसापिप्रीताबभूवह चकारस्वामिनश्चाज्ञामित्थंलक्ष्मीव्रतंत्विदं बहुरात्रिव्यापिनीयासात्रपूर्णाविशिष्यते तत्राराध्यमहालक्ष्मीमिंद्रमैरावतस्थितं उपवासंप्रकुर्वीतदीपान्दद्याच्चभक्तितः लक्षंतदर्धमयुतंसहस्रंशतमेववा घृतेनदीयतेदीपान् तिलतैलेनवाव्रती रात्रौजागरणंकुर्यान्नृत्यगीतपुरःसरम् यथाविभवतोदेयाःपुरवीथिषुदीपकाः देवतायतनेचैव आरामेषुगृहेषुच ततःप्रभातेसुस्नातःसंपूज्यचशतक्रतुं ब्राह्मणान्भोजयेत्क्षीरघृतशर्करपायसैः वासोभिर्दक्षिणाभिश्चसवस्त्रान्पूजयेत्द्विजान् यथाशक्तिचदातव्यादीपाःस्वर्णविनिर्मिताः एवंविधिंविनिर्वर्त्यततःपारणमाचरेत् व्रतस्यास्यप्रभावेनकल्पसंख्यावसेत्ध्रुवं अप्सरोभिःपरिवृतःस्वर्गलोकेमहीयते इहचायुष्यमारोग्यंपुत्रपौत्रादिसंपदः एवंलक्ष्मीव्रतंकुर्वानदरिद्रोनदुःखभाक् कथांश्रुत्वाविधानेनव्रतस्यापिफलंलभेत् इतिसनत्कुमारसंहितायांकोजागरव्रतंसंपूर्णम् अथ कार्तिकपौर्णमास्यांत्रिपुरोत्सवः सचप्रदोषव्यापिन्यांकार्यः वालखिल्याऊचुः कार्तिकेपौर्णिमायांतुकुर्यात्त्रैपुरमुत्सवम्- दीपोदेयोवश्यमेवसायंकालेशिवालये त्रिपुरोनामदैत्येंद्रःप्रयागेतपआस्थितः लक्षवर्षंतपस्तप्तंत्रैलोक्यंसचराचरं तत्तपस्तेजसादग्धुमारब्धंभुवनत्रयं नानादेवांगनादेवैःप्रेषितास्तद्विमोहितुं नतासांवशगःसोभूद्दर्पणैश्चापिधर्षितः नक्रोधलोभमोहास्तंवशेदैत्योनजायते वरंदातुंययौब्रह्मानारदादिभिरन्वितः ब्रह्मोवाच वरंवरयभद्रंतेसंतुष्टोहंपितामहः तपसस्तेफलेसिद्धेकःक्लेशंकुरुतेजनः त्रिपुरउवाच अमरंकुरुमांब्रह्मन्करोमित्यन्यथातपः दातुंशक्तोसिचेद्द्रुहिनान्यथागच्छ

सत्वरं ब्रह्मोवाच मयापिबालमर्तव्यंइतरेषांतुकाकथा अवश्यंदेहिनांमृत्युः संभाव्यंयाचयस्त्वमे त्रिपुरउवाच नमेमृ-
त्युर्देवताभ्योमनुष्येभ्योनिशाचरात् नस्त्रीभ्योनचरोगेणदैत्येनंवरमुत्तमं ब्रह्मणापितथेत्युक्त्वासत्यलोकंजगामसः एनंल
ब्ध्वावरंज्ञात्वानानादैत्याःसमाययुः तान्दैत्यानागतान्दृष्ट्वाआज्ञापयतदानवान् अस्मद्विरोधिनोदेवाहंतव्याःसर्वएवहि नो
चेद्यानिचरत्नानिदेवतानांसमीपतः गृहीत्वानानिसर्वाणिकुर्वंतूपायनंमम इत्याज्ञांतस्यशिरशिकृत्वातेसर्वराक्षसाः देवां
न्नागांश्चयक्षांश्चधृत्वास्याग्रेनिवेदिताः प्रणम्यसर्वदेवास्तेत्रिपुरंचव्यजिज्ञपुः गृह्यतांदैत्यराजेंद्र यदस्माकंभविष्यति वयंकृ
त्वातुतेसेवांजीविष्यामोयथातथा इतिश्रुत्वावचस्तेषामधिकारान्प्रचक्रिरे तेषांस्त्रियःसमानीतादेववेश्याःसहस्रशः एवंभास्करमुत्सृ
ज्यसर्वेदेवास्तदाज्ञया चक्रुर्यथोक्तंदैत्यस्यद्वारस्थाःसर्वएवहि सूर्यस्यनिकटेप्युक्तंमद्वारेस्थीयतांसदा तेनापिचतथेत्युक्त्वातद्वारेसंस्थि
तःक्षणं ददाहभुवनंसर्वंस्वकरैःक्षणमात्रतः आदिष्टश्चततस्तेनस्वेच्छयागम्यतामिति ततोगतोसौभगवान्भुवनानिविभावयन् तदा
ज्ञांचक्रतुर्देवाद्वारेतिष्ठंतिवारिताः कदाचित्तस्यगेहेतुनारदःसमुपाययौ तेनापिपूजितोभक्त्यापप्रच्छस्वंपराक्रमं नारदउवाच ईदृशो
जयघोषस्तुकेनापिनकृताभुवि अस्मिन्देशेतुदैत्येंद्रःकिमिदानींनिगद्यताम् त्रिपुरउवाच सर्वस्थानेषुमेकीर्तिर्नगताकिंनुनारद मया
प्रस्थापितादैत्यासर्वएवइतस्ततः नारदउवाच योयत्रचगतोदैत्योजातस्तत्रविभुःसहि तवनामनगृण्हातिवक्तिचस्वपराक्रमं इतिश्रुत्वा
मुनर्वाक्यंसद्यएवहिदारुणं क्रोधस्तस्यमहान्जातःकिंकर्तव्यंमयाधुना विश्वकर्माणमाहूयवाक्यमेतदुवाचह शीघ्रंकुरुत्रिधातूनांविश्व
कर्मन्पुरत्रयं विमानतुल्यंयत्रेच्छातत्रतत्रगमिष्यति इतितस्यवचःश्रुत्वात्वष्टापिचतथाकरोत् रूपत्रयंसमास्थायत्रिपुरेषुसमाश्रितः
नारदस्यतुवाक्येनदैत्यावंदिकृतास्तदा पुरेणैकेनपातालेभ्रमतेत्रिपुरासुरः स्वर्गेचापिपुरेकेणधरण्यांरसतेपुरा कांश्चित्संताडयत्येवंसं
मारयतिकानपि ददातिकेषांस्वामित्वंस्वेच्छाचारीमहाबलः तनेत्थंपंचलक्षाणिसर्वलोकाउपद्रुताः तदादेवान्समागम्यनारदोवाक्यमब्रवीत्
नारदउवाच पराक्रमायास्तुधिक्तेदेवेंद्रधिक्कृतास्तुधीः विचारंतुचमोदेवावधायत्रिपुरस्यच इत्थंमुनिवचःश्रुत्वासलज्जोभूदधोमु-

स्वः पुनस्तंनारदःप्राहब्रह्माणंशरणंव्रज ततउत्थायदेवेंद्रोगुदोदेवगणैःसह नारदेनसमायुक्तःसत्यलोकंजगामसः तत्रापश्यत्सधातारंसुवा
चकरुणंवचः इंद्रउवाच धातारस्मान्त्रातिर्नास्तिहन्तनीयास्त्वयावयम् नासाग्रसंस्थिताःप्राणास्त्रिपुरस्यस्यतुशासनात् इतींद्रस्यवचःश्रु
त्वाब्रह्मासेंद्रमुनीश्वरैः युक्तोवैकुंठमगमद्यत्रास्तेमधुसूदनः तत्रगत्वामहाविष्णुंप्रणिपत्यास्थिताःसुराः अनुगृहीता इत्याततंब्रह्मावाक्यम
ब्रवीत् ब्रह्मोवाच भगवन्देवदेवेशदेवायातनाविनाशकं त्रिपुरासुरनिर्दग्धान्किंदेवांस्त्वमुपेक्षसे विष्णुरुवाच त्वयैवनाशितंब्रह्मन्द
त्तानानाविधावराः देवादिभ्यःकथंतस्यमृत्युःसंभाव्यतेधुना नभासतेविचारोमेतस्यमृत्योःसुरेश्वराः अस्तिकश्चिद्वधोपायोविचार्यंकर
वाण्यहं इतिश्रुत्वावचोविष्णोःसर्वेबुध्वातुकुंठिताः यदानोचुर्वचःकिंचिन्नारदोवाक्यमब्रवीत् नारदउवाच देवाःकुरुतमारवे द्वाउपा
यःकथ्यतेमया एकोदृष्टःसृष्टिमध्येनदेवोनचमानुषः नराक्षसोनैवदैत्योनभूतोनपिशाचकः नासौपुमान्नचस्त्रीसनजडोनचपंडितः
नास्यतातोनवामातानभ्राताभगिनीनच तथैवतस्यसंतानंसएनंमारयिष्यति ब्रह्मोवाच एतादृशःक्वदृष्टोसौसत्यंवालीकमेववा इ
तिब्रह्मवचःश्रुत्वाप्रोवाचजगदीश्वरः विष्णुरुवाच अहोत्रैलोक्यकर्त्तायोमहादेवोवृषध्वजः ब्रह्मन्कथंविस्मृतोसौसनःकार्यंकरिष्यति·
इत्युक्त्वासर्वएवैतेशंकरंशरणंययुः देवदेवमहादेवदुष्टदैत्यनिबर्हण त्वामेवशरणंप्राप्तास्त्रिपुरेणप्रतापिताः शिवउवाच ब्रह्मंस्त्वया
वरोदत्तोत्यन्मत्तोसौभवत्ततः प्रददासिवरंकस्मात्पुनर्मारयसेकुतः मदीयंनाशितंनैवकस्माद्वध्योमयासुरः इतिरुद्रवचःश्रुत्वाहताशास्तेसुरा
स्तदा विषण्णांस्तान्सुरान्दृष्ट्वाविष्णुर्वचनमब्रवीत् विष्णुरुवाच त्वयाप्रतिज्ञालोकानांपालनायसदाशिव कृताततःसमायाताःशरणं
सर्वदेवताः मयानानाविधंदुःखीन्हीयतेतुसदाशिव एतद्दुःखंमयाशक्यमपनेतुंयतोनहि अतस्त्वांयाचयाम्यद्यदेवान्बंधाद्विमोचय शिव
उवाच तववाक्यंकरिष्यामिसामग्रीनास्तिमेहरे ममापराधसहितंहनिष्यामिहिदानवम् विष्णुरुवाच सामग्रींहिकरिष्यामिसंग्रा-
मार्थंसदाशिव करिष्यतिकथंदैत्यःशंभोरन्यायमेवसः इतिविष्णुवचःश्रुत्वाहाहाकष्टमितिचाब्रुवन् अत्रागतांश्चसोस्मान्हिद्रणुयात्त्रि
पुरासुरः नविलंबंमृतोकुर्यात्किमिदानींविधीयतां सुरान्म्लानमुखान्दृष्ट्वानारदोवाक्यमब्रवीत् नारदउवाच सामग्रींक्रियतांशीघ्रमा

यातित्रिपुरासुरः विष्णुंपप्रच्छयितंज्ञात्वाचरुद्रोस्तीतिलोकयन् शिवउवाच मयाननाशितंतस्ययदिस्थास्यनिमत्स्थले योहंतुतदावश्यमेवमयामार्यःसदुर्मदः इतिरुद्रवचःश्रुत्वासमाश्वस्तास्तदेवताः सामग्रींविष्णुरकरोद्युद्धार्थंसतुधूर्जटेः बाणःस्वयंबभूवास्यवन्हिःशल्यंबभूवह वायुस्तुपुंखरूपोभून्मैनाकंचधनुर्धरः स्यंदनंधरणीजातावेदाजाताहयोत्तमाः विधातासारथिर्जातःपताकाचदिवाकरः आतपत्रंचचंद्रोभूद्गणेशाद्याःपदातयः ततोवेगात्समुत्पत्यनारदस्त्रिपुरंययौ दृष्ट्वानारदमायातंसत्कारैरर्चयच्चतं मुनेपुराणिमेपश्यसंत्यक्तानिसुरासुरैः त्रैलोक्येचाधुनाजातंत्वत्कृपातोयशोमम इतितस्यवचःश्रुत्वाललाटंकुट्टयन्मुनिः तूष्णीमासीद्धसितैतदवलोक्यासुरोब्रवीत् त्रिपुरउवाच किमर्थमीदृशीचेष्टामुनेचाद्यकृतात्वया मद्भाग्यसमभाग्यश्चेदस्तिकश्चिन्निगद्यतां नारदउवाच कैलासेतुगतश्चाहंदैत्येंद्रशृणुवैभवं महेश्वरस्यकिंवाच्यंतत्षोडशांशोपिनत्वयि इतितद्वचनंश्रुत्वानारदस्तुविदायितः गृहीत्वादैत्यसंघांस्तान्कैलासंत्रिपुरोययौ तत्रदेवैर्महद्युद्धंजातंतत्रदिनत्रयं पश्चाद्रुद्रेणनिहतस्त्रिपुरश्चैकबाणतः कार्तिक्यांपौर्णिमास्यांतुसर्वेदेवाःप्रतुष्टुवुः तस्मिन्दिनेसर्वदेवैर्दीपोदत्तोहरायच सर्वथैवप्रदेयोस्यांदीपस्तुहरतुष्टये विंशतिसप्तशतकसहितादीपवर्तयः ददन्दीपंपौर्णमास्यांसर्वपापैःप्रमुच्यते पौर्णमास्यांतुसंध्यायांकर्तव्यस्त्रैपुरोत्सवः दद्यादनेनमंत्रेणप्रदीपांश्चसुरालये कीटाःपतंगामशकाश्चवृक्षाजलेस्थलेयेविचरंतिजीवाः दृष्ट्वाप्रदीपंनचजन्मभागिनोभवंतिनित्यंश्वपचाहिविप्राः कार्यस्तस्मात्पूर्णिमायांत्रिपुरस्यमहोत्सवः कार्तिक्यांकृत्तिकायोगेयःकुर्यात्स्वामिदर्शनं सप्तजन्मभवेद्विप्रोधनाढ्योवेदपारगः कार्तिक्यांतुवृषोत्सर्गंकृत्वानक्तंसमाचरेत् शैवंपदमवाप्नोतिशिवव्रतमिदंस्मृतम् इतिसनत्कुमारसंहितायांकार्तिकपौर्णमास्यांत्रिपुरोत्सवदीपदानंसंपूर्णम् अथकार्तिकमासोद्यापनं वालखिल्याऊ

अथोर्जव्रतिनःसम्यगुद्यापनमथोच्यते कृतेउद्यापनेसांगंव्रतंभवतिनिश्चितं ऊर्जशुक्लत्रयोदश्यांकुर्यादुद्यापनंव्रती तुलस्याउपरिष्टात्तुकुर्यान्मंडपिकांशुभां तुलसीमूलदेशेतुसर्वतोभद्रमेवच तस्योपरिष्टात्कलशंपंचरत्नसमन्वितं पूजयेत्तत्रदेवेशंसौवर्णंगुर्वनुज्ञया रात्रौजागरणंकुर्याद्गीतवाद्यादिमंगलैः ततस्तुपौर्णमास्यांवैसपत्नीकान्द्विजोत्तमान् त्रिंशन्मितानथैकंवास्वशक्त्याविनिमंत्रयेत् अतोदेवाइति

द्वाभ्यांहोमयेत्तिलपायसं ततोगांकपिलांदद्यात्पूजयेद्विधिवद्गुरुं एवमुद्यापनंकृत्वासम्यग्व्रतफलंलभेत् परातुपौर्णमास्यत्रयात्रायांपुष्करस्य च वरान्दत्वायतोविष्णुर्मत्स्यरूपीभवत्ततः तस्यांदत्तंहुतंजप्तंतदक्षय्यफलंस्मृतं कार्तिक्यांपौर्णिमायांतुविष्णुंनीराजयेत्सदा प्रदोषसमये राजन्नसदारिद्र्यमाप्नुयात् कार्तिक्यांकृत्तिकायोगेयःकुर्यात्स्वामिदर्शनं सप्तजन्मभवेद्विप्रोधनाढ्योवेदपारगः एतानिकार्तिकेमासिनरःकुर्याद्व्रतानिच इहलोकेशरीरंस्वंकृशयित्वाफलंलभेत् नकार्तिकसमोमासोविष्णुसंतुष्टिकारकः स्वल्पक्लेशैर्विष्णुलोकप्राप्तिकृत्वापरोभवेत् सनत्कुमारउवाच इत्थंतेनैमिषारण्येवालखिल्यैरुदाहृतं भास्करस्यमुखाच्छ्रुत्वाततस्तानभिवाद्यच ययुःसूर्यस्यनिकटेगायंतोभास्करस्कीर्तिं इत्येतत्सर्वमाख्यातंकार्तिकस्यव्रतोत्तमम् इतिकार्तिकमासोद्यापनंसंपूर्णम् अथबत्तिशीपौर्णिमालिख्यते तच्च मार्गशीर्षसितपक्षेपौर्णमास्यांशुचिव्रता प्रातःशुक्लतिलैःस्नात्वापरिधायांबरंसती पूजासंभारमासाद्यपिष्टदीपंविधायच पुत्रसौभाग्यप्राप्त्यर्थंमध्यान्हेपूजयेच्छिवम् साचमार्गशीर्षपौर्णिमामध्यान्हव्यापिनीग्राह्या तिथ्यादिसंकीर्त्यममेहजन्मनिजन्मांतरेचअखंडसौभाग्यपुत्रपौत्रप्राप्त्यर्थंबत्तिशीपौर्णिमाव्रतंकरिष्ये तत्रनिर्विघ्नतासिद्ध्यर्थंगणपतिपूजनंकलशाराधनंकरिष्ये पंचवक्त्रंत्रिनेत्रंचजटाखंडेंदुमंडितं व्यालयज्ञोपवीतंचभक्तानांवरदंशिवम् ध्यायामि आगच्छभगवन्शंभोसर्वालंकारभूषित यावद्व्रतंसमाप्येततावत्त्वंसन्निधोभव आवाहनं सिंहासनंस्वर्णपीठंनानारत्नोपशोभितं अनेकशक्तिसंयुक्तंमासनंप्रतिगृह्यतां आसनं त्रिपुरांतकदेवेशसृष्टिसंहारकारक पाद्यंगृहाणदेवेशमयादत्तंहिभक्तितः पाद्यं चंदनाक्षतसंयुक्तंनानापुष्पसमन्वितं गृहाणार्घ्यंमयादत्तंईश्वरप्रतिगृह्यताम् अर्घ्यं तोयमेतत्सुखस्पर्शंकर्पूरेणसमन्वितं शंभोशंकरसर्वेशगृहाणाचमनीयकं आचमनं पयोदधिघृतंचैवमधुशर्करयायुतं पंचामृतेनस्नपनंकरिष्येभक्तवत्सल पंचामृतस्नानं मयानीतानितोयानिगंगादीनांचहेमजैः स्नानंतैःकुरुदेवेशममशांतिर्विधीयतां स्नानं श्वेतांबरयुगंदेवसर्वकामार्थसिद्धये अंबिकाकांतदेवेशमयादत्तंप्रगृह्यतां वस्त्रं कुंकुमाक्तंस्फुरच्छ्रेष्ठक्षौमसूत्रविनिर्मितं उपवीतंमयादेवभक्त्यादत्तंप्रगृह्यतां उपवीतं काश्मीरजेनसंयुक्तंकर्पूरागरुमिश्रितं कस्तूरीकासमायुक्तंचंदनंप्रतिगृह्यतां चंदनं प्रक्षालिताश्चधौताश्चतंडुलाश्च

शिवप्रियाःमयानिवेदिताभक्त्यागृहाणजगदीश्वर अक्षता० कमलैर्मालतीपुष्पैश्चंपकैर्जातिसंभवैः बिल्वपत्रैर्महादेवकरिष्येतवपूज
नं पुष्पाणि दशांगोगुग्गुलाद्भूतःसुगंधिश्चमनोहरः आघ्रेयतामयंधूपोदेवदेवदयानिधे धूपं कार्पासवर्त्तिनिर्मितंघृताक्तंतिमिरापहं
भक्त्यासमाहृतंदीपंमयादत्तंप्रगृह्यतां दीपं नैवेद्यंगृह्यतांदेवभक्तिंमेह्यचलांकुरु ईप्सितंचवरंदेहिपरत्रचपरांगतिम् नैवेद्यं नैवेद्यम
ध्येपानियं० उत्तरापोशनं हस्तप्रक्षालनं पूगीफलंमहद्दिव्यंनागवल्यादलैर्युतं कर्पूरैलासमायुक्तंतांबूलंप्रतिगृह्यतां तांबूलं इदंफलंम
यादेव० फलं० वक्ष्यमाणषोडशनामभिःपूजयेत् शंकरायत्रिनेत्रायकालरूपायशंभवे महादेवायरुद्रायशर्वायचमृडायच ईश्वरायशि-
वायेतिभूतेशायकपर्दिने मृत्युंजयायचोग्रायशितिकंठायशूलिने दुर्वा० तेजोमयंसलक्ष्मीकंदेवानामपिदुर्लभं हिरण्यंपार्वतीनाथम-
यादत्तंप्रगृह्यतां दक्षिणां० प्रसीददेवदेवेशचराचरजगद्गुरो वृषध्वजमहादेवत्रिनेत्रायनमोनमः नीराजनं यानिकानिचपापानीति० प्र
दक्षिणाः इमानिबिल्वपत्राणिपुष्पाणिविविधानिच मयादत्तानिविश्वेशगृहाणवरदोभव पुष्पांजलिं नमोस्त्वनंतायसहस्रमूर्तयेइतिन
मस्कारं भवायभवनाशायमहादेवायधीमते रुद्रायनीलकंठायशर्वायचनमोनमः ईशानायनमस्तुभ्यंपशूनांपतयेनमः गुणत्रयात्मने-
तुभ्यंगुणातीतायतेनमः नमःप्रसीददेवेशसर्वकामांश्चदेहिमे त्वमेवशरणंनाथक्षमस्वमयिशंकर प्रार्थनां वायनं उपायनमिदंतुभ्यं-
व्रतसंपूर्णहेतवे वाणकंद्विजवर्यायसहिरण्यंददाम्यहं वायनं अस्यव्रतस्यसिध्यर्थंहिरण्यंपापनाशनं ददामितुभ्यंविप्रेंद्रप्रणतोस्मि
प्रगृह्यतां दक्षिणां महात्मनाच्छकैलासंवृषारूढोगणैर्युतः आहूतस्त्वंक्षमस्वत्वंप्रसीदसुमुखोभव विसर्जनं इतिपूजाविधिः अथ
कथा यशोदोवाच कृष्णत्वंसर्वदेवानांस्थितिसंहारकारकः अवैधव्यकरंस्त्रीणांयथार्थंवदतद्व्रतं श्रीकृष्णउवाच यशोदेसाधुपृष्टोहं
सौभाग्यप्राप्तयेस्त्रियः बतिशीनामविख्यातंपौर्णमास्यांव्रतंभवेत् तद्व्रतस्यप्रभावेनस्त्रीणांसौभाग्यदंभवेत् अवैधव्यकरंनामशिवप्री
तिकरंमहत् यशोदोवाच केनचीर्णंव्रतमिदंमृत्युलोकेकदावद विधानंकीदृशंदेवयेनशंभुःप्रसीदति श्रीकृष्णउवाच कांतिकाना-
मनगरीप्रसिद्धाभुविमंडले अनेकरत्नसंपूर्णाचंद्रहासेनपालिता तत्रैवासीद्द्विजःकश्चिद्धनेश्वरेतिनामतः तस्यभार्याशुभाचारानाम्ना

रूपवतीसती अनपत्यौमहाभागावुभौतौदुःखितौसदा तन्नगर्यांद्विजःकश्चिद्योगारूढोद्विजोजटी भिक्षांचकारसर्वज्ञस्तद्गृहंचाप्य वर्जयत् तद्गृहेनैवभिक्षांसरूपवत्यासमर्पितां ययौतदाकर्तारंसभिक्षांप्रक्षालयत्पुनः धनेश्वरेणतद्दृष्टंयोगिनायत्कृतंप्रभुं भिक्षांगृण्हासिसर्वेषांगृहस्थानांद्विजोत्तम कदापिमद्गृहेविप्रनायासिवदकारणं योग्युवाच अपुत्रस्यगृहस्थस्ययदन्नमुपभुज्यते पतितान्नसमंतत्तुनभोक्तव्यंकदाचन धनेश्वरेणश्रुत्वैतदात्मानंगर्हयन्बहु धनधान्यसमृद्धिश्चपुत्रहीनस्त्वहंप्रभो इत्युक्तोसौजटीप्राहगच्छाराधयचंडिकां तस्यतद्वचनंगेहेभार्यायांविनिवेद्यच तपसेनिर्जगामासौचंड्याराधनमाचरत् उपवासैःषोडशभिःस्वप्नेचैवाहचंडिका भोधनेश्वरगच्छत्वंतवपुत्रोभविष्यति स्वसामर्थ्यवशाद्देयादीपावैपिष्टसंभवाः एकैकवृद्ध्यादातव्याःषोडशद्वयपूर्णिमाः इदंव्रतंस्वपत्न्यैत्वं कथयस्वयथास्थितं आरुरोहाशुचाम्रंत्वंफलमादायसत्वरं स्वगृहंगच्छभार्यायैदेहिगर्भोभविष्यति ततःप्रभातसमयेसहकारमपश्यत आरोढुंनैवशक्तःसचिंताव्याकुलमानसः स्तुतिंचक्रेगणेशस्यकृपांकुरुदयानिधे मनोरथोममैवास्तुत्वत्प्रसादाद्दयानिधे इत्युक्त्वाचततःशीघ्रंफलमादायवेगतः त्रिवारमावृत्तिंकृत्वाफलमेकंददर्शसः वराल्लब्धंतदेवासीन्नान्यस्यादर्थनिश्चयः आगत्यकथितंतच्चभार्यायैदत्तवान्फलं यदातदारूपवत्याभक्षितंगर्भमादधे तदादेव्याःप्रसादेनरूपौदार्यगुणान्वितः तस्यास्तदाभवत्पुत्रोदेविदासेतिनामतः व्रतबंधंततश्चक्रेविवाहंनकरोतिसः मात्राचाग्रहतःपृष्टःसोवदत्सर्वचेष्टितं ततस्तद्दैवयोगेनकाश्यांनेयोमयाशिशुः इतिबुद्धिस्तदाजातातदाचक्रेधनेश्वरः तंप्रेषयत्सहाश्वेनमातुलेनसहैवच कियंतिसमतीतानिदिनानिपथिगच्छता गच्छन्काशीपुरींप्राप्तोभागिनेयेनसंयुतः कस्यचित्त्वथविप्रस्यमंडलेप्राप्तवान्निशि तस्मिन्दिनेगृहस्वामीकन्यामुद्वाहयन्कृती तैलादिरोपणंचक्रेकृत्वावरनिवेशनं लग्नस्यसमयेप्राप्तेधनुर्वातस्तुनोनरः वरपित्रादिभिर्येनविचार्यचपुनःपुनः असौकार्पटिकोबालःसुंदरोमेसुतोयथा साईत्वनेनलग्नंवैकरिष्यामःक्रमेणतु इतिनिर्धार्यमनसाप्रार्थयामासमातुलं घटिकाद्वयपर्यंतंदेहित्वंभगिनीसुतं मातुलउवाच मधुपर्केतथाकन्यादानेयद्यत्प्रदीयते तदस्माकंयदिभवेत्तर्ह्यसौभवतांवरः तथाभवत्तुतेनोक्ताविधिर्वैवाहिकोभवत् पाणिंजग्राहयामासवरेणचयथाविधि वध्वासार्द्धंतथाभोक्तुंसचनो

सहितःशिशुः उत्तिष्ठामीतिसंचिंत्यकस्यभार्याभवेदियं ततस्त्वेकांतसमयेविश्वासात्सुसुचेबहून् साब्रवीत्कथमेतस्मादन्यथाब्रह्मसूत्रता
त्वंमेपतिरहंपत्नीदेवाग्निद्विजसन्निधौ सोब्रवीन्माकुरुष्वेदंममायुःस्वल्पमेवच तथानेपिगतिर्भूयात्सेयंमह्यंभवेदिति उत्तिष्ठभोनमोनाथ-
क्षुधितोसिनसंशयः प्रीत्याप्रीतिंतयासार्द्धंभुक्तवान्सद्विजस्तथा अंगुलीयंददौतस्याःस्पष्टरत्नगतंनवं अंशुकंचददौतस्याःस्थानत्रयवि
भूषितं नवरत्नमयींमुद्रांगृहीत्वाप्यंशुकंचसा इतिसंकेतकंकृत्वामद्वचःकुरुमेप्रिये ममसंजीवनार्थायकुरुजात्यादिवाटिकां मनोरमाःपुष्प
जातिस्रग्गंधिनवमल्लिकाः सिंचसिंचप्रतिदिनंक्रीडांकुरुयथासुखं यस्मिन्दिनेतुमत्प्राणवियोगःसमजायते तदापुष्पाणांजातीनांप्राण-
त्यागोभविष्यति पुनःसंजीवितास्ताश्चेत्त्वहंजीवितोदृढम् ततोब्राह्मेमुहूर्तेतुनिर्जगामवरःपथि अथप्रभातसमयेवाद्यनादोबभूवह
आकारिताचसाकन्याब्रूतेनायंपतिर्मम यदिचायंपतिस्तातब्रूयादेवमयार्पितं मधुपर्केतथाकन्यादानेयद्भूषणादिकं कथयिष्यतिचेत्तर्हि
वृत्तांतंरात्रिभाषितं इतिकन्यावचःश्रुत्वाउवाचसवरस्तदा नैवजानामितद्वृत्तंव्रीडितोनिर्जगामह कृष्णउवाच ततस्सबालकःका
शींप्राप्तवान्अध्ययनेरतः दिनानिकतिचिज्जग्मुःकालस्यवशमागतः ततःकृष्णोमहानागोरात्रौभक्षितुमागतः परितःशयनात्तस्यदीपा-
ज्वालाभिरावृतः नैवशक्तस्तमत्तुंवैव्रतराजप्रभावतः तन्मात्राबत्तिशीनामपूर्णिमायांव्रतंकृतं ततोमध्यान्हसमयेकालएवागमत्स्वयं ततस्तु
कालसंक्लिष्टस्त्वर्धोदकनियुंजितः शंकरोप्यगमत्तत्रभवान्यासहएवच भवानीप्रार्थयामासदृष्ट्वावस्थांतुतस्यतां अस्यमात्राकृतंपूर्वंबत्ति-
शीव्रतमुत्तमं तस्यप्रभावतःसोयंबालोयंजीव्यतांप्रभो तथैवकृतवांस्तत्रभवानीप्रेमवत्सलः तद्व्रतस्यप्रभावेनमृत्युनापिनिराकृतः जात्या
दिपुष्पवटिकांपत्रपुष्पविवर्जितां पुनःसंजीवितांदृष्ट्वापितरंकन्यकाब्रवीत् अन्नसत्रंकुरुष्वत्वंजीवितस्यगवेषणे पत्यर्थंकुरुभोतातकाशी
तोनिरगात्पुरः पुनस्तत्रैवसंजातोयत्रोद्वाहोभवत्पुरा ज्ञात्वाचपरमप्रीत्यादेवदत्तोनयद्गृहं ततोजनपदाःसर्वेइतिब्रूयुःपरस्परं जामातादेवद
त्तस्यअयमेवनसंशयः बालयाचतथाज्ञातःसोपिसंकेतमागतः प्रीत्यावूचुस्ततःसर्वेसाधुसाधुसमन्वितं उत्साहोद्यभवत्तत्रनिर्जगामाथत
त्पुरात् श्वशुरेणतथावध्वामातुलेनसमन्वितः सपितुःप्रेषयामासभवत्पुत्रःसमागतः तावूचतुःकुतोस्माकंदुर्भगानांतुपुत्रकः कथितोन्यैरपि

जनैस्ततःसंहृष्टमानसः सुहृद्भिर्बांधवैःसर्वैरानयामासबालकम् ततोमहोत्सवंकृत्वादत्वाचबहुदक्षिणां एवंसपुत्रवान्जातोबत्तिशीव्रतसेवया याःकुर्वंतिव्रतमिदंविधवानभवंतिताः जन्मजन्मनिसौभाग्यंप्राप्स्यंतिचवचोमम एतत्तेकथितंसर्वंपुत्रपौत्रप्रवर्द्धनं यत्वंचिंतयतेकामंतंतंप्राप्नोतिनिश्चितं यशोदोवाच उद्यापनविधिंब्रूहिपूर्णिमायाःसुरेश्वर भक्तितःश्रोतुमिच्छामिव्रतसंपूर्णहेतवे कृष्णउवाच पौर्णिमामार्गशीर्षस्यमाघवैशाखयोस्तथा व्रतंप्रारंभयेत्तस्यांपौषभाद्रंतुवर्जयेत् उमयासहितोदेवःपूजनीयोवृषध्वजः उपचारैःषोडशभीरागमोक्तविधानतः एकैकंदीपकंकृत्वामासिमासिचदापयेत् एवंसार्द्धद्वयंवर्षंद्विमासावधिआचरेत् ज्येष्ठस्यपूर्णिमायांचकुर्यादुद्यापनंततः अथवाशुभमासस्यपूर्णिमायांसमाचरेत् चतुर्दश्यामुपवसेद्रात्रौपूजनमाचरेत् अष्टहस्तप्रमाणेनमंडपंकारयेत्ततः तन्मध्येस्थापयेत्कुंभमव्रणंमृन्मयंनवं तस्योपरिन्यसेत्पात्रंवैणवंवस्त्रवेष्टितम् माषमात्रसुवर्णेनप्रतिमांकारयेत्सुधीः तदर्धार्धेनवाकुर्याद्वित्तशाठ्यविवर्जितः कृत्वारूपंप्रयत्नेनपार्वत्याश्चहरस्यच तत्पात्रेप्रतिमेस्थाप्यवृषभेणसमन्विते पूर्वोक्तेनविधानेनसुपुष्पैश्चैवपूजयेत् धूपैर्दीपैश्चनैवेद्यैःफलैश्चविविधैःशुभैः एवंपूजाप्रकर्तव्यारात्रौजागरणंचरेत् गीतनृत्यादिसंयुक्तंकथापुस्तकसंयुतम् ततःप्रभातसमयेकृत्वादानादिकाःक्रियाः पूर्ववदर्चयेद्देवंपश्चाद्धोमंप्रकल्पयेत् स्वगृह्योक्तविधानेनकृत्वाग्निस्थापनंबुधः प्रारभेच्चततोहोमंपंचाक्षरमनुस्मृतः तिलैर्यवैश्चस्तथाज्येनपृथगष्टोत्तरंशतं नमःशिवायमंत्रेणउमायाइतिनामतः एवंसमाप्यहोमंतुआचार्यादीन्प्रपूजयेत् द्वात्रिंशद्धनैर्युक्तंवंशपात्रंमनोरमं द्वात्रिंशच्चमहादीपैर्द्वात्रिंशच्चमहाफलैः मातुलिंगंनारिकेलंजंबीरंखर्जुरीफलं अक्रोडंडाडिमंनिंबंनारंगादिशुभानिच कर्कट्यादिशुभैःसर्वैर्ऋतुकालोद्भवैःशुभैः द्वात्रिंशद्भिःफलैर्युक्तंसदीपंवस्त्रवेष्टितम् व्रीहीणामुपरिस्थाप्यआचार्यायनिवेदयेत् वाणकंतवतुष्ट्यर्थंददामिगिरिजापते तत्रमंत्रः महेशःप्रतिगृण्हातिमहेशोवैददातिच महेशस्तारकोभाभ्यांमहेशायनमोनमः द्वात्रिंशद्ब्राह्मणांश्चैवद्वात्रिंशद्योषितस्तथा अन्येभ्योब्राह्मणेभ्यश्चभोजनंषड्रसैःसह उमान्वत्सयुतांधेनुमाचार्यायनिवेदयेत् पश्चात्पूर्णाहुतिंकृत्वाहोमशेषंसमापयेत् पश्चाद्भुंजीतयेच्छेषंयद्देवब्राह्मणार्पितं इत्येवंपूर्णिमायास्तुउद्यापनविधिःस्मृतः इत्येतत्कथितंसर्वंव्रतस्योद्यापनंमया याःकुर्वंतिव्रतमिदंवि

धवानभवंनिताः इहभुक्त्वातुविपुलान्कामान्सर्वान्मनोगनान् स्वर्गमंतेगमिष्यंतिकुलकोटिशतैरपि इतिभविष्यपुराणेकृष्णायशोदासंवा
देबत्तिशीपूर्णिमाव्रतकथासंपूर्णा उद्यापनसंकल्पः तिथ्यादिसंकीर्त्यममआत्मनःइहजन्मनिजन्मांतरेचसकलसौभाग्यपुत्रपौत्रादिप्राप्त्य
र्थंद्वात्रिंशत्पौर्णमास्याचरितव्रतस्यघृताक्तव्रीहियमदीपप्रज्वलनस्यसंपूर्णफलावाप्त्यर्थंतदुद्यापनंकरिष्ये तदंगगणपतिपूजनंस्वस्तिवाचनं-
आचार्यवरणंचकरिष्ये इतिसंकल्पः अथफाल्गुनपौर्णमास्यांहोलिकोत्सवः नृपंप्रतिनारदवचोभविष्ये नारदउवाच अथ
पंचदशीशुक्लाफाल्गुनस्यनराधिप अभयंचैवलोकानांदीयतांपरमेश्वर यथाह्यशंकिनोलोकारमंतिचहसंतिच दारुजानिचखंडानिगृहीत्वा
तुससुत्सुकाः योधाइवविनिर्यांतुशिशवःसंप्रहर्षिताः संचयंशुष्ककाष्ठानामुपलानांचसंचयम् तत्राग्निंविधिवद्धुत्वामहामंत्रैश्चवित्तमैः ततः
किलकिलाशब्दैस्तालशब्दैर्मनोहरैः तत्तेशब्देनसापापाहोमेनचसमाक्रान्ताः स्नादोदारव्याराक्षसी तत्रैव सर्वदुष्टापहोहोमसर्वरोगोप
शांतये क्रियतेस्यांद्विजैःपार्थतेनसाहोलिकास्मृता तमग्निंत्रिःपरिक्रम्यगायंतिचहसंतिच जल्पंतिस्वेच्छयालोकानिःशंकायस्ययन्मनः
तत्रपौर्णिमाप्रदोषव्यापिनीग्राह्या तपस्यपौर्णमास्यांतुरजन्यांहोलिकोत्सवः प्रतिपद्भूतभद्रासुयार्चिताहोलिकादिवा संवत्सरंचतद्रा
ष्ट्रंसुरंदहतिसाद्भुतं प्रदोषव्यापिनीग्राह्यापौर्णिमाफाल्गुनीसदा तस्यांभद्रामुखंत्यक्त्वापूज्याहोलीनिशामुखे निशागमेनपूज्येनहोलिकासर्व
तोमुखैः दिनद्वयेप्रदोषेतुव्याप्तासातुपरैवहि भद्रायांदीपिकाहोलि राष्ट्रभंगंकरोतिवै नगरस्यचनैवेष्टातस्मात्तांपरिवर्जयेत् दिनार्धात्परतो
यास्यात्फाल्गुनीपौर्णिमायदि रात्रौभद्रावसानेतुहोलिकांतत्रदीपयेत् राकायामर्द्धयादूर्ध्वंचतुर्दश्यांयदाभवेत् होलाभद्रावसानेतुनिशी-
थांतेपिदीपयेत् इतिपुराणसमुच्चयाच्च यत्तु भद्रायांविहितंकार्यंहोलिकायाःप्रपूजनम् गंधपुष्पैर्धूपदीपैर्नैवेद्यैर्दक्षिणाफलैः होलां
तुनाममंत्रेणपूजयेच्चयथाविधि योनिनाम्नाचमंत्रेणमहाशब्दंतुकारयेत् तत्रकिलकिलाशब्दैरन्योन्यमुच्चरेत्ततः योषितानांभ्रमंकुर्याद्योनिमं
त्रेणपूर्वकम् योनिनाम्नैवमंत्रंतुयोनरःपठ्यतेसदा नभवेच्चतदापीडा आवर्षंतुसुखंभवेत् मध्यरात्रिमतिक्रम्यविष्टेःपुच्छंयदाभवेत् प्रदोषेज्वा
लयेद्वह्निंसुखसौभाग्यदायिनम् प्रदोषमध्यरात्र्यंतंहोलिकापूजनंशुभम् यदातुपूर्वरात्रौप्रदोषव्याप्त्यभावेनतत्सत्त्वेवाभद्रारहितकालेन

प्राप्यतेउत्तरदिनेचप्रदोषेपौर्णिमाभावस्तदापुच्छेकार्यम् तथाल्लः पृथिव्यांयानिकार्याणिशुभानिह्यशुभानिच तानिसर्वाणिसिद्ध्यंति विष्टिपुच्छेनसंशयः अस्मिन्नेवविषयेउत्तरदिनेपौर्णिमासार्द्धयामत्रयमितानततोधिकावाप्रतिपद्श्चवृद्धिस्तदापौर्णिमोत्तरंप्रतिपदिहोलिकाकार्या नतुपूर्वेद्युर्विष्टिपुच्छे सार्द्धयामत्रयंपूर्णाद्वितीयदिवसेयदा प्रतिपद्वर्द्धमानातुतदासाहोलिकास्मृता इतिभविष्योक्तेः साउत्तरदिनेप्रदोषएकदेशव्यापिन्यस्तिपूर्वरात्रौचभद्रारहितानैवलभ्यते तदोत्तरैव यदापूर्वरात्रिर्भद्राव्याप्ताउत्तरेप्रदोषेचचंद्रग्रहणंतदातत्रस्नात्वाकार्या सर्वेषामेववर्णानांसूतकंराहुदर्शने स्नात्वाकर्माणिकुर्वीतसूतकान्नंविवर्जयेत् फाल्गुनोमलमासश्चेच्छुद्धेमासिचहोलिका पूजामंत्रस्तु असृक्पाभयसंत्रस्तैःकृतात्वंहोलिबालिशैः अतस्त्वांपूजयिष्यामिभूतेभूतिप्रदाभव इतिहोलिकानिर्णयः इतिपौर्णिमाव्रतानिसमाप्तानि अथामावास्याव्रतानिलिख्यंते अथभाद्रपदअमावास्यायांकुशग्रहणम् हेमाद्रौउक्तंहारीतेन मासेनभस्यमावास्यातस्यांदर्भोच्चयोमतः अयातयामास्तेदर्भानियोज्याश्चपुनःपुनः नभश्रावणदर्शेनपक्षेणेदम् मदनरत्नेतु मासेनभस्यऽमतः इतिकुशग्रहणीअमा अत्रैवअमावास्यायांपिठोराव्रतम् मध्यदेशेतुपोलाइतिप्रसिद्धम् साप्रदोषव्यापिनीग्राह्या यदापूर्वरात्रौप्रदोषव्याप्त्यभावस्तदापराकार्या अथव्रतविधिः मासपक्षाद्युल्लिख्यममइहजन्मनिजन्मांतरेवापुत्रपौत्रफलावाप्त्यर्थंपिठोराव्रतंकरिष्ये इति संकल्प्य देवीपूजांकृत्वा संध्याकालेस्नात्वाप्रदोषसमयेदेवींसंपूज्यषोडशोपचारैः ब्राह्मणंसुवासिनींसंभोज्यपश्चात्स्वयंभुंजीत इतिविधिः नमोदेव्यैइतिमंत्रेणषोडशोपचारैःपूजनंकुर्यात् अथकथा इंद्राण्युवाच अपुत्रालभतेकामंपरत्रचमहत्फलं व्रतानांपरमंश्रेष्ठंकथयत्वंहिपार्वति पार्वत्युवाच प्राचीनःश्रीधरोविप्रअष्टपुत्रोधनेश्वरः तस्यभार्यासुमित्राचगृहधर्मेणवर्तते श्रीधरस्यसुतोज्येष्ठः शंकरोनामनामतः तस्यभार्याविदेहाचमृतापत्याभवत्तदा श्रीधरस्यपितुःश्राद्धेविदेहाचप्रसूयते दुःखयुक्तासुमित्राचविदेहांपरिवर्जयेत् दुःखयुक्तावनंप्राप्तामठमेकंददर्शसा सरिच्चप्रबलायत्रविदेहातत्रसागता मठमध्येस्थितानारीपश्यंतीचपुनःपुनः कुत्रेयमधुनाप्राप्तालक्षणान्वितसुंदरी मठाधिपाविचार्यैवंविदेहामाहसत्वरं झोटिंगैर्यक्षवेतालैरनेकैःस्थीयतेशुभे त्वांग्रसिष्यंतिसकलागच्छशीघ्रंयथागतम्

विदेहोवाच   दुःखयुक्तांचमाचात्रक्षमंनींचवनांतरम् मात्यसेच्चतुपिंगाक्षिक्षेमंममभवेत्कथम्   मठनार्युवाच   अत्रागत्यचतुःषष्टिदि
व्ययोग्या दयस्त्विमाः पूजनार्थसमायानानिशामध्येशुभास्थिताः तवकामंप्रकुर्वंतिजीविष्यंतिचबालकाः बिल्वपत्रेषुगुप्तात्वमधुनाभवभा
मिनि लुप्तानत्रविदेहाचबिल्वपत्रेषुसंस्थिता क्षणेनैकेनझोटिंगामठमध्येसमागताः ज्ञात्वामनुष्यगंधंचमठनारीमपृच्छत कुतोमनुष्यगंध
श्चमठगेहंसमाश्रितः निशामध्येचतुःषष्टिर्दिव्यस्त्वत्रसमागताः अनेकैश्चमहारत्नैःफलैर्नानाविधैरपि निविष्टांमठदेवींतामाह्वानंकुर्वतेस्म
हि श्रावणस्यतुमासस्यकृष्णपक्षेकुहूतिथौ पूजांकृत्वाचतुःषष्टिरतिथीन्प्रब्रुवंतेस्महि वदतेस्ममनुष्यासालुप्ताथप्रकटाभवत् ममास्तु-
चित्वमापन्नमानमेंबालकंमृतम् तवाग्रेमृतमादायस्थितास्मीतिचबालकम् ममगर्भाश्चतुःषष्ठीसजीवाश्चभवंत्विनः तत्रस्थितंचनैवेद्यं
नारित्वंप्रतिगृह्यतां चतुःषष्टिस्तनस्तुष्टाददौतस्यैशुभंवरं श्रीधरस्यस्नुषात्वंहिशंकरस्यचवल्लभा पुत्रपौत्रयुताराज्यंभुक्त्वापूज्यासुरा
लये अष्टपुत्राभवंत्वाशुविदेहेगम्यतांपुरम् आगतायेनमार्गेणतेनैवपुनरेवहि पुरांतरंस्थितागत्वाप्रविवेशस्वमंदिरं श्रीधरश्चशुभमित्रा
चशंकरोबांधवैःसह विदेहाचाष्टपुत्रैश्चयुक्तासामंगलोत्सवैः प्रापुर्मुदंमहाभागादेवीनांचप्रसादतः द्विजमंत्रादिनिर्घोषैर्दुंदुभिपटहध्व
नैः मृगाक्षिमंगलाचारैर्मृदंगैर्नृत्यघोषकैः तयासंपूजितादेव्यश्चतुःषष्टिःप्रकीर्तिताः तद्वृत्तंशृणुचेंद्राणिपिठोरारव्यंकुहूतिथौ तासांस्मरण
मात्रेणपुत्रपौत्रधनान्विता नारीभवतिचेंद्राणिशृणुत्वंनामपूजनं दिव्ययोगीमहायोगीसिद्धयोगीगणेश्वरी प्रेताक्षीडाकिनीकालिकालरा
त्रिर्निशाचरी झंकारीरौद्रवेतालीभूतलीभूतडांबरी ऊर्ध्वकेशीविरूपाक्षीशुष्कांगीनरभोजनी भट्टारीवीरभद्राचधूम्राक्षीकलहप्रिया राक्ष
सीघोररक्ताक्षीविश्वरूपाभयंकरी चंडिकावीरकौमारीवाराहीमुंडधारिणी भास्करीरौद्रझंकारीभाषिणीत्रिपुरांतका भैरवीध्वंसिनीक्रोधीदु
र्मुखीप्रेतवाहिनी खट्वांगीदीर्घलंबोष्ठीमालिनीमंत्रयोगिनी कालाग्निग्रहणीचक्रीकंकालीभुवनेश्वरी कटकीकाटिनीरौद्रीयमदूतीकरालिनी
घोराक्षीकामुकीचैवकाकदृष्टीअधोमुखी मुंडाग्रधारिणीव्याघ्रीकिंकिणीनेप्रभाषिणी कालरूपाचकामाख्याउष्ट्राणीयोगिपीठिका महाल
क्ष्मी एकवीराकालरात्रीचपीठिका नमोस्तुवश्चतुषष्टिदेवीभ्यःशरणंव्रजे पुत्रश्रीर्वृद्धिकामोहंभक्त्यासंपूजिताशुभाः एवमिंद्राणिकथितंपि-

ठोराख्यंमहाव्रतं भक्त्याकुर्वंतियानार्योक्तेनकृत्याभवंतिताः सुखसौभाग्यसंयुक्ताश्चतुःषष्ट्याःप्रसादतः इतिभविष्योत्तरपुराणेपि
ठोराव्रतंसंपूर्णम् अथआश्विनकृष्णाऽमावास्यायांगजच्छायापर्व अपरार्केयमः हंसेकरस्थितेयातुअमावास्याकरान्विताया
ज्ञेयाकुंजरच्छायाइतिबौधायनोब्रवीत् हंसेसूर्येकरेहस्तेस्थितेसूर्ये तत्रस्नानंहुतंजप्तंदानंदद्यात्प्रयत्नतः पितृभिःसंप्रदास्यामिअ-
क्षय्यमुपतिष्ठतु इतिगजछाया अथकार्तिकअमावास्यायांलक्ष्मीव्रतं वालखिल्याऊचुः स्नात्वाप्रभातसमयेअमायांचमुनी-
श्वराः नत्वादेवान्पितॄन्भक्त्यासंपूज्याथप्रणम्यच कृत्वातुपार्वणश्राद्धंदधिक्षीरघृतादिभिः भोज्यैर्नानाविधैर्विप्रान्भोजयित्वाक्षमा
पयेत् दिवातत्रनभोक्तव्यमृतेबालातुराज्जनात् ततःप्रदोषसमयेपूजयेदिंदिरांशुभां कुर्यान्नानाविधैर्वस्त्रैःस्वच्छंलक्ष्म्याश्चमंडपं
नानापुष्पैःपल्लवैश्चचित्रैश्चापिविचित्रितं तत्रसंपूजयेल्लक्ष्मींदेवांश्चापिप्रपूजयेत् संपूज्यादेवनार्योपिबहुभिश्चोपकारकैः पादसंवाहनं
कुर्याल्लक्ष्म्यादीनांतुभक्तितः अस्मिन्नहनिसर्वेपिविष्णुनामोचिताःपुरा बलिकारागृहाद्देवालक्ष्मीश्चापिविमोचिता लक्ष्म्यासार्द्धंनतोदे
वाजग्मुःक्षीरोदधौपुनः प्रसुप्ताबहुकालंतेसुखंतस्मान्मुनीश्वराः रचनीयाःसूत्रगर्भाःपर्यंकाश्चसतूलकाः दुग्धफेनोपमैर्वस्त्रैरास्तृ-
ताश्चयथादिशं स्वापयेत्तान्सुरान्लक्ष्मींवेदघोषसमन्वितः लक्ष्मीर्दैत्यभयान्मुक्तासुखंसुप्तांबुजोदरे अतश्चविधिवत्कार्यातुष्ट्येतुसु
खसुप्तिका तदन्हिपद्मशय्यायांयःपद्मासौख्यविवृद्धये कुर्यात्तस्यगृहंमुक्त्वानतत्पद्माक्वापिनव्रजेत् नकुर्वंतिनराइत्थंलक्ष्म्यायेसुखसुप्ति
कां धनचिंताविहीनास्तेकथंरात्रौस्वपंतिहि तस्मात्सर्वप्रयत्नेनलक्ष्मींसुस्वापयेन्नरः दुःखदारिद्र्यनिर्मुक्तःस्वजातौस्यात्सुनिश्चितः जा
तीपत्रंलवंगैलाफलकर्पूरसंयुतं पाययित्वागव्यदुग्धंसितांदत्वाययोचितां लड्डुकांतस्यकुर्वीततांश्चलक्ष्म्यैसमर्पयेत् अन्यच्चतुर्विधंभ
क्ष्यंदेशकालादिसंभवम् सर्वंनिवेदयेल्लक्ष्म्यैनमःश्रीःप्रीयतामिति दीपदानं ततःकुर्यात्प्रदोषेचततोल्मुकं भ्रामयन्स्वस्यशिरसिस
र्वारिष्टनिवारणं दीपवृक्षास्तथाकार्याःशक्त्यादेवगृहादिषु चतुष्पथेश्मशानेचनदीपर्वतवेश्मसु वृक्षमूलेषुगोष्ठेषुचत्वरेषुगृहेषुच व
स्त्रैःपुष्पैःशोभितव्याराजमार्गस्यभूमयः गृहेषुस्थापयेन्नानापक्वान्नानिफलानिच नागवल्लीदलादीनिरचयित्वाचनिक्षिपेत् शोभांकु

थीद्राजमार्गेकमलैश्चविशेषतः तदभावेंबरादीनांकृत्वानानिचशोभयेत् एवंपुरमलंकृत्यप्रदोषेतदनंतरं ब्राह्मणान्भोजयित्वादौसंभोज्यचबुभुक्षितान् लड्डुकापूपमंडाद्यैःशष्कुलीपूरिकादिकैः अलंकृतेनभोक्तव्यंनववस्त्रोपशोभिना ततोपराण्हसमयेघोषयेन्नगरंनृप आद्यराज्यंबलेर्लोकाः यथेच्छंक्रीड्यतामिति यथेच्छंक्रीड्यतांबालाइत्यादेश्यंनृपेणतु विलोक्यबालकक्रीडानानासामभिसंस्तुताःतेभ्योदद्यात्क्रीडनकंततःपश्येच्छुभाशुभं तैश्चसंदीपितोवन्हिर्नज्वालांमुच्यतेयदा महामारीभयंघोरंदुर्भिक्षंवाथजायते बालशोकेराजशोकस्तेषांहृष्टेनृपेसुखं बालयुद्धेराजयुद्धंरोदनेबालकैःकृते अवश्यमेवभवतिवर्षाद्राष्ट्रविनाशनं यष्टिकादिकृतानश्वान्यदारोहंतिबालकाः तदाराज्ञोजयोवाच्यःपरराष्ट्रंविमर्दयेत् यदाक्रीडंतिबालाश्चेल्लिंगंधृत्वाकरादिषु तदाप्रसिद्धनारीणांव्यभिचारःप्रजायते अन्नंयदागोपयंतिक्रीडनेबालकाजलं दुर्भिक्षंवृष्ट्यभावश्चशीघ्रमेवप्रजायते एवंबालकृतांचेष्टांबुध्वाचास्यफलंवदेत् लोकैश्चापिपुरेरम्येसुधाधवलिताजिरे गीतवादित्रसंजुष्टेप्रज्वालितसुदीपके अन्योन्यप्रीतिसंयुक्तेदत्ततालनकेजने तांबूलहृष्टहृदयेकुंकुमोक्षदचर्चिते दुकूलपट्टवसनैर्नेपथ्यैःस्वर्गही रत्नैः मित्रस्वजनसंबंधिस्वगोत्रजांश्चपूजयेत् बलिराज्येप्रकर्तव्यंनरैर्वारांगनादिकं अक्षक्रीडनकंचैतद्बलिराज्येनदोषभाक् आत्मनोयस्यसौख्यार्थेपरदुःखाकरंकृतं वारांगनादिगमनंस्पृष्टास्पृष्टादिभक्षणं अन्यांबरधृतिश्चापिद्यूताद्यंचनदुष्यति एवंतुसर्वथाकार्योबलिराज्येमहोत्सवः जीवहिंसासुरापानमगम्यागमनंतथा चौर्यंविश्वासघातश्चपंचैतानिमुनीश्वराः बलिराज्येतुनरकद्वाराण्युक्तान्यतस्त्यजेत् ततोर्धरात्रसमयेस्वयंराजाव्रजेत्पुरं अवलोकयितुंरम्यांपद्भ्यामेवशनैःशनैः महतातूर्यघोषेणज्वलद्भिर्हस्तदीपकैः हर्म्यशोभासुखंयावत्कृतकैरश्वकैर्नरैः बलिराज्यप्रमोदंचहृष्ट्वास्वपुरमाव्रजेत् एवंगतनिशीथेचजनेनिद्रार्धलोचने तावन्नगरनारीभिःशूर्पदिंडिमवादनैः निष्काश्यतेप्रहृष्टाभिरलक्ष्मीःस्वगृहांगणात् दंडैःकरजनीयोगेदर्शस्स्यात्तुपरेहनि तदाविहायपूर्वेद्युःपरेन्हिसुखरात्रिका येवैष्णवावैष्णवावाबलिराज्योत्सवंनराः नकुर्वंतिवृथातेषांधर्माःस्युर्नात्रसंशयः इतिलक्ष्मीव्रतंसंपूर्णं अथमार्गशीर्षअमावास्यायांगौरीतपोव्रतं सूतउवाच

इंद्राणीप्रांजलिर्भूत्वास्वपतिंवाक्यमब्रवीत् एकव्रतंसमाचक्ष्वपुत्रपौत्रसुखप्रदं इतिवाक्यंतदाश्रुत्वाह्युवाचवचनंशचीं शृणुचार्वंगि सकलंयन्मयासुकृतंकृतम् बृहस्पतेस्सुजनकःपृष्टमाहांगिराःसुधीः तद्व्रतंकथयाम्यद्यसद्यःसुखकरंपरं पतिपुत्रसुखावाप्तिर्जायतेजगतिस्थिरा गौरीप्रीत्यर्थमेवादौस्त्रीभिर्यत्क्रियतेतपः गौरीतपइतिख्यातंतस्मात्तद्व्रतमुत्तमम् तस्मात्स्त्रियातपोभिश्चतोषणीयाशिवप्रिया आदौमार्गशिरेमासिह्यमावास्यादिनेशुभे गृण्हीयान्नियमंमंत्रंदंतधावनपूर्वकम् उपवासस्यनक्तस्यगौरीशप्रीतयेमुदा ईशार्धांगस्थितेदेविकरिष्येहंव्रतंनव पतिपुत्रसुखावाप्तिंदेहिदेविनमोस्तुते नियममंत्रः ततोमध्यान्हसमयेस्नात्वानद्यादिषुव्रती सूर्यायार्घ्यंततोदत्वाध्यात्वागौरीश्वरंहरम् अहंदेवव्रतमिदंकर्तुमिच्छामिशाश्वतम् तवाज्ञयामहादेवतत्रनिर्वहणंकुरु उक्त्वैवंनियमंगृण्हन्वर्षाण्येवतुषोडश गृहमागत्यपूजार्थमुपचारान्प्रकल्पयेत् शिवालयंततोगत्वाशिवंसंपूजयेत्सुधीः गौरीमभ्यर्चयेत्पश्चाद्विधिनायेनतंशृणु पार्वतीतुततःपादौजान्वोर्हैमवतीतिच जंघयोरंबिकेत्येवंगुह्यंगिरिशवल्लभा नाभिंगंभीरनाभीतिअपर्णेत्युदरंपुनः महादेवीतिहृदयेकंठेश्रीकंठकामिनी मुखेषण्मुखमातेतिललाटेलोकमोहिनी मेनकाकुक्षौरक्षेतिशिरस्यभ्यर्चयेत्ततः दक्षिणेगणपःपूज्योवामेस्कंदःसवाहनः धूपदीपादिनैवेद्यंकृत्वानत्वाप्रदक्षिणाम् फलेनार्घ्यंततोदत्वाध्यात्वादेवींमहेश्वरीं कृत्वाताम्रमयंपात्रंमृन्मयंवैणवंतथा अष्टतंतुमयांवर्तींतस्मिन्पात्रेनिवेशयेत् घृतेनापूर्यगव्येनतत्पात्रंविमलेनच दीपमुज्ज्वालयेत्पश्चाद्यावत्सूर्योदयोभवेत् एवंसंक्षिप्यतांरात्रींजागरेणसमन्विताम् ब्राह्मेमुहूर्तेचोत्थायपूजयेद्द्विजदंपती कुर्याद्दौर्भाग्यदलिनींपापाग्निशमनींतदा पक्वान्नेनगुडान्नाद्यैःपूर्णांपूर्णफलप्रदम् ऋतूद्भवैःफलैश्चैवपूरिकातिलतंडुलैः सौभाग्याष्टकसंयुक्तंपात्रंकुर्याच्चधातुकं तस्योपरिस्थितंदीपंपूजयेत्तिथिनामतः सुवासिनीवचोग्राह्यंदीपंसूर्यायदर्शयेत् यावत्कलकलाशब्दंकुर्वंतिबककाककाः तावत्पुरस्तात्कर्तव्यंकीर्तनंचतदग्रतः उत्तिष्ठंतेयदिनगाद्विहंगाश्चारुलोचने तदाकर्णनमात्रेणसौभाग्यंव्रजतिस्त्रियाः अतएवव्रतेनारीपश्चादुत्थापयेच्चतान् तिथिमेकांसमाप्यैवंदंपतीभोज्यशक्तितः परिधायस्वलंकृत्यवासोभिर्भूषणांजनैः माल्यैःसुगंधैर्विविधैःफलसिंदूरकुंकुमैः संतोष्यसमनुज्ञाप्यस्वयंभुंजीतबंधुभिः

एवंद्वितीयेवर्षेचनंदाद्याश्चाचरेत्तिथीः वर्षेवर्षेक्रमादेवंद्वितीयादिषुचाचरेत् एवंषोडशवर्षाणिकृत्वैतद्व्रतमुत्तमं पश्चादुद्यापनंकुर्याद्व्रतसंपूर्णहेतवे मार्गशीर्षेथसंप्राप्तेमासेगौरीश्वरप्रिये पौर्णमास्यांदिनेरम्यनिमंत्र्यद्व्यष्टदंपतीन् मध्यान्हेष्टदलेपद्मेगौरींनारींसमर्च्ययेत् यथोक्तेनविधानेनपुष्पधूपादिभिस्तथा सोहालीभिश्चकासारैःपूपापूपैश्चभामिनि पायसेनघृतेनापिशर्करामोदकैस्तथा पूरयित्वाद्व्यष्टसंख्यान्धातुमृन्मयसंकटान् दंपतीन्भोजयित्वातुतेभ्योदद्याद्यथाविधि अलंकृत्यययथाशक्त्यागौरीप्रमीयतामिति गुरवेदक्षिणोपेतांगौरींकनकनिर्मितां दद्याद्धेनुंसवत्सांचदक्षिणावस्त्रसंयुतां अन्यान्यपियथाशक्त्यादद्याद्दानानिभामिनि यद्यदिष्टतमंलोकेनदेयंद्विजन्मने चापल्यमायुषोज्ञात्वासंपत्त्वपिचसुंदर षोडशाब्दव्रतमिदंकुर्याद्वर्षेनिभक्तितः गौरीतपोव्रतमिदंयाकरोतीहभामिनि बाल्येयौवनकालेवावार्धकेवाहरिप्रिये तस्यांसौभाग्यमतुलंधनधान्यसुतान्वितं भवेदव्याहतैश्वर्यंभर्तृसौख्यंनसंशयः दुर्लभंमानुषंजन्मतत्रापिद्विजजन्मता सदाचारपरत्वंचतत्रापितुविशिष्यते एवंवारत्रयंयास्त्रीकुरुतेव्रतमुत्तमं मातापित्रोःप्रियंचापिप्राप्नुयाच्छुद्धवंशताम् निर्मलंजन्मनोवापिमनसश्चापिसंपदः लभतेशुभतेजश्चपतिपुत्रसमन्विता इहभोगान्यथाकामंभुक्त्वास्वर्गमवाप्नुयात् इत्यंगिरोवचनमाप्यपुरासुराणंगौरीतपोव्रतमिदंविदधेययेछं तस्यप्रभाववशतःसुफलभंस्वराज्यंसौख्यंहिसर्वमतुलंपतिपुत्रयुक्तं

निलादउवाच उद्यापनविधिंवक्ष्येव्रतंसांगंभवेद्यथा सुरासुरमुनीनांचदुर्लभंतद्विधिंशृणु पर्वण्याश्वयुजस्यांतेपायसंचघृतप्लुतम् नक्तंभुंजीतशुद्धात्माओदनंचैक्षवान्वितम् आश्वयुजस्यांतेकार्तिकेपर्वणि अमावास्यायांकार्तिकांतेदर्शेइत्यर्थः ऐक्षवंइक्षुरसः शर्वर्यंतेमुचिर्भूत्वाबिल्वजंदंतधावनं भुक्त्वाचैतन्महादेवंनत्वाभक्तियुतोव्रती अहंदेवव्रतमिदंकर्तुमिच्छामिशाश्वतं तवाज्ञयामहादेवतन्निर्वहयंकुरु उक्तेनैनंनियमंगृण्हन्वर्षाण्येवतुषोडश तिथीःप्रतिपदाद्यास्तुपारयिष्याम्यनुत्तमाः ततोमार्गशिरेमासिप्रतिपद्यपरेहनि उपवासेकुरुंपृष्ट्वामहादेवंस्मरन्मुहुः महादेवंस्मरन्विप्रान्नमस्येच्छन्नविग्रहान् षोडशाष्टौतदर्धंवादंपतीश्चनिमंत्रयेत् देवंचनक्तमासाद्यदीपान्प्रज्वाल्यषोडश पशुनाथंमहादेवंभक्त्यानत्वानिवेदयेत् आचम्यचगृहंगत्वामहादेवंस्मरन्स्थितो शुचिवस्त्रास्तृतायांतुनिराहारो

निशिस्वपेत् अथोदयेसहस्रांशोः स्नात्वाचादायदीपकान् नैवेद्यंस्नपनाद्यंचगृह्यगच्छेच्छिवालयम् स्नापयेत्पंचगव्येनघृतेनतदनंतरं मधुनाचतथादध्नाभूयश्चपयसातथा रसेनचाथखंडेनफलैश्चस्नापयेत्पुनः तिलांबुनाततस्नाप्यपश्चादुष्णेनवारिणा लेपयेत्कजघंपश्चात्कर्पूरागरुचंदनैः एवंसंपूज्यतंभक्त्याहेमन्यस्व्यंव्रजेद्गृहम् हेमस्रुवर्णपुष्पं नानाफलैश्चसंपूज्यदद्यान्नैवेद्यमेवहि गृहंगत्वायथान्यायंहिरण्यंरेतसंविभु जातवेदसमाधायतर्पयेत्तिलसर्पिषा व्रतिनश्चतथाचार्यंमिथुनानिचभोजयेत् हेमवस्त्रादिदानानियथाशक्त्यातुदापयेत् एवंविसृज्यतान्सर्वान्सार्द्धंबंधुजनैःसह पीत्वादौपंचगव्यंच हृष्टोभुंजीतवाग्यतः यत्किंचिदेतदुद्दिष्टंमहादेवमुदीरयेत् प्रारंभेचविधिंकुर्याद्दरिद्रोवाधनेश्वरः वित्तसामर्थ्यतश्चैवप्रतिमासंततश्चरेत् स्वल्पवित्तोथवाकश्चित्पुष्यादौकार्तिकावधि नक्तंकृत्वात मावस्यांप्रागुक्तविधिनाततः प्रतिपद्यामुपोष्यैवंपंचगव्यंपिबेच्छुचिः महादेवंस्मरन्सार्द्धंभक्त्याभुंजीतलिंगिभिः मासस्यकार्तिकस्यांतेकृत्स्नंप्राग्विधिनाचरेत् नंदायांचद्वितीयायांशुभतिथ्यामुपोषयेत् एवंपौषेतुसंप्राप्तेप्रतिपन्नक्तमाचरेत् द्वितीयाब्देद्वितीयायामुपवासंसमाचरेत् आददीततिथिंचैकांमासेमासेतथापरां पूर्ववत्संत्यजेत्पौषंप्रत्यब्दंचैवमाचरेत् एवंषोडशवर्षेतुक्रमेणैवमुपोषयेत् पूर्ववद्देवमभ्यर्च्यकृशानुंधाम्नितर्पयेत् उमामहेश्वरप्रीत्यैदद्याद्गांचद्विजायच संपूज्यहेमवस्त्राद्यैर्यथाशक्त्यातुदक्षिणाम् छत्रोपानहकुंभांश्चदद्यात्तेभ्यःपृथक्पृथक् भोजयेत्तान्विसृज्यैवंमिथुनानिचषोडश ब्राह्मणांश्चयथाशक्त्याभोजयेद्वेदपारगान् एवंमहाव्रतंचैवब्रह्मघ्नस्याघमर्षणम् वाचकाश्रावकाश्चैवश्रोतारोव्रतिनश्चये भवंतिपुण्यसंयुक्तास्तद्व्रताभिमुखाश्चये इतिश्रीहेमाद्रौकालिकापुराणेगौरीतपोव्रतंसोद्यापनंसंपूर्णम्

अथसोमवत्यमावास्यायांव्रतम् शंखः अमासोमसमायोगेश्राद्धंयद्यत्रलभ्यते तीर्थेकपिलधारेस्मिन्गंगायांपुष्करेतथा दिव्यांतरिक्षभौमानियानितीर्थानिसर्वशः तान्यत्रनिवसिष्यंतिदर्शेसोमदिनान्विते अमावास्यातुसोमेनसप्तमी-भानुनासह चतुर्थीभूमिपुत्रेणसोमपुत्रेणचाष्टमी चतस्रस्तिथयःकृष्णाःसूर्यग्रहणसन्निभाः स्नानंदानंतथाश्राद्धंसर्वंतत्राक्षयंभवेत् तिथिवासरयोर्योगोयथाकालेभवेद्यदि भान्वंतेवायमध्यान्हेपुण्यकालःसनान्यथा अथसंकल्पः तिथ्यादिसंकीर्त्य ममेहअस्यांसोम

वत्यमायांसकलपापक्षयार्थंपुत्रपौत्राद्यभिवृद्ध्यर्थंजन्मजन्मन्य वैधव्यसंततिचिरजीवितपरमसौभाग्यप्राप्तिकामाअश्वत्थमूलेल-
क्ष्म्यासहितब्रह्मशिवसहिताअश्वत्थनारायणप्रीत्यर्थंविष्णुपूजांतदंगतयाकलशपूजनंचकरिष्ये अथपूजा शांताकारमितिध्यात्वा
विश्वव्यापकविश्वेशकृपयादीनवत्सल मयोपपादितांपूजांगृहाणेमांहरिमाधव सहस्रशीर्षेत्यावाहनम् मूलानिब्रह्मणोयस्यऋग्वेदांगानि
पल्लवाः फलानियज्ञशाखाचनारायणदयांकुरु सूर्यकोटिप्रभानाथसर्वव्यापिन्रमापते आसनंकल्पितंभक्त्यागृहाणपुरुषोत्तम पुरुषएवे
दमित्यासनम् नारायणजगद्व्यापिन्जगदानंदकारक विष्णुकांतादिसंयुक्तंगृण्हपाद्यंमयार्पितम् एतावानस्येतिपाद्यं फलगंधाक्षतैर्यु
क्तंपुष्पपूगसमन्वितं अर्घ्यंगृहाणभगवन्विष्णोसर्वफलप्रद त्रिपादूर्ध्वमित्यर्घ्यं कर्पूरैलालवंगादिशीतलंसलिलंप्रभो रमारमणकृ-
ष्णत्वंआचम्यंप्रतिगृह्यताम् तस्माद्विराळेत्याचमनीयम् पंचामृतंमयानीतंपयोदधिघृतंमधु शर्करागुडसंयुक्तंस्नानार्थंप्रतिगृह्यताम्
पंचामृतस्नानं गंगाकृष्णागौतमीचकावेरीचशतन्हदा ताभ्यआनीतंसुखदंस्नानार्थंप्रतिगृह्यताम् यत्पुरुषेणेतिस्नानं पीतवासस्त्वयि
विभोमयायत्समुदाहृतम् वासःप्रीत्यागृहाणेदंपुरुषोत्तमकेशव तंयज्ञमितिवस्त्रं उपवीतंसोत्तरीयंमयादत्तंसुशोभनं विश्वमूर्तेगृहा
णेदंनारायणजगत्पते तस्माद्यज्ञेत्युपवीतं अश्वत्थहुतभुग्वासगोविंदस्यसदाश्रय अशेषंहरमेपापंवृक्षराजनमोस्तुते अलंकाराःसूत्रवे
ष्टनं मलयाचलसंभूतंघनसारंमनोहरं विलेपनंसुरश्रेष्ठचंदनंप्रतिगृह्यतां तस्माद्यज्ञात्सर्वहुतइतिगंधं अक्षताश्चसुरश्रेष्ठकुंकुमाक्ताः
सुशोभिताः मयानिवेदिताभक्त्यागृहाणपरमेश्वर अक्षतान् तुलसीजातिकमलमल्लिकाचंपकानिच पुष्पाणिहरगोविंदगृहाणपरमे-
श्वर तस्मादश्वेतिपुष्पं· वनस्पतिरसोद्भूतोगंधाढ्यश्चमनोहरः आघ्रेयःसर्वदेवानांधूपोयंप्रतिगृह्यताम् यत्पुरुषंव्यदधुरितिधूपं· चक्षुर्दं
सर्वलोकानांतिमिरस्यनिवारणंआर्तिक्यंकल्पितंभक्त्यागृहाणजगदीश्वर ब्राह्मणोस्येतिदीपं भक्ष्यभोज्यलेह्यपेयचोष्यखाद्यंमयाहृ
तं प्रीतयेपरमेशस्यदत्तंमेस्वीकुरुप्रभो चंद्रमामनसइतिनैवेद्यं· मध्येपानीयं·उत्तरापोशनं· इदंफलंमयादेवेतिफलं· पूगीफलमितितांबू
लं हिरण्यगर्भेतिदक्षिणां त्वद्भासाभासतेलोकःकोटिसूर्यसमप्रभ नीराजयिष्येत्वांविष्णोकृपांकुरुममप्रभो नीराजनं मयाकायेन-

मनसावाचाजन्मशतार्जितं पापंप्रशमयश्रीशप्रदक्षिणपदेपदे नाम्याआसीतिप्रदक्षिणां व्यक्ताव्यक्तस्वरूपायसृष्टिस्थित्यंतकारिणे
आदिमध्यांतरहितविष्टरश्रवसेनमः समास्येतिनमस्कारं मूलतोब्रह्मरूपायमध्यतोविष्णुरूपिणे अग्रतःशिवरूपायअश्वत्थायनमो
नमः यज्ञेनयज्ञमितिपुष्पांजलिं अमासोमपूजा अमायैचनमस्तुभ्यंसोमायैचनमोस्तुते उभयोःसंगमेविष्णुपूजाफलमवाप्नुयात्
अनेनषोडशोपचारैःपूजयेत् ततःमूलतोब्रह्मरूपेतिमंत्रेणअष्टोत्तरशतप्रदक्षिणाकार्याः वायनं अमासोमाव्रतस्यास्यसंपूर्णफलहेत
वे वायनंद्विजवर्यायसहिरण्यंददाम्यहं इतिवायनमंत्रः यन्मयामनसावाचानियमात्पूजनंकृतम् सर्वसंपूर्णतांयातुतद्विष्णोश्चप्रसाद
तः इतिप्रार्थना इदंविष्णुरितिमंत्रेणपुरुषसूक्तेनवातथा षोडशैरुपचारैश्चअश्वत्थेविष्णुपूजयेत् पौराणमंत्रः व्यक्ताव्यक्तस्वरूपा
यसृष्टिस्थित्यंतकारिणे आदिमध्यांतहीनायविष्टरश्रवसेनमः मूलतोब्रह्मरूपाय॰नमोनमः इतिमंत्राभ्यांपूजाकार्या ततःप्रदक्षि
णाकार्याः१०८ अथकथा सूतउवाच शरतल्पगतंभीष्ममुपगम्ययुधिष्ठिरः कृतप्रणामोधर्मात्माहितंवचनमब्रवीत् युधि
ष्ठिरउवाच हतेषुकुरुमुख्येषुभीमसेनेनकोपिना तथापरेषुभूपेषुहतेषुयुधिजिष्णुना दुर्योधनकुमंत्रेणजातोऽस्माकंकुलक्षयः नसं
तिभुविभूपालाबालवृद्धातुरादृते अवशिष्टावयंपंचवंशेभारतसंज्ञके एकातपत्रमपिचराज्यंमह्यंनरोचते जीवितेमयिजुगुप्सास्यान्मृ
तेनस्कगतिःक्वचित् दृष्ट्वासंततिविच्छेदंसंतापोहृदयेनिशम् अश्वत्थामास्त्रनिर्दग्धोह्युत्तरागर्भसंभवः अतोमेद्विगुणंदुःखंपिंडविच्छे
ददर्शनात् किंकरोमिक्वगच्छामिपितामहवदाधुना येनसंपद्यतेसद्यःसंततिश्चिरजीविनी भीष्मउवाच शृणुराजन्प्रवक्ष्यामिव्रता
नांव्रतमुत्तमं यस्यस्मरणमात्रेणसंततिश्चिरजीविनी अमावास्यायदापार्थसोमवारयुताभवेत् तस्यामश्वत्थमागत्यपूजयेच्चजनार्दनम्
अष्टोत्तरशतंकुर्यात्तस्मिन्वृक्षेप्रदक्षिणाः तावत्संख्यान्युपादायरत्नधातुफलानिच व्रतराजमिदंराजन्विष्णोःप्रीतिकरंशुभ उत्तरांकारय
माज्ञगर्भोजीवमवाप्स्यति भविष्यतिगुणीपुत्रस्त्रिषुलोकेषुविश्रुतः श्रुत्वापितामहवचःप्रत्युवाचयुधिष्ठिरः युधिष्ठिरउवाच तद्व
तंव्रतराजाख्यंविस्तरेणप्रकाशय केनप्रकाशितंमर्त्येकेनेदंविहितंविभो भीष्मउवा॰ आस्तेयांसर्वविख्याताकांतिसंज्ञामहापुरी रजताचल

संकाशसौधसंघैर्विराजिना सुवेषैर्नागरजनैर्नारीभिरुपशोभिना सुवेषैर्नागरजनैर्नारीभिरुपशोभिना ब्रह्मक्षत्रियविट्शूद्रैः स्वस्वकर्मरतैर्वृता रूपचातुर्यवर्याभिर्वेश्याभिःसमलंकृता अलकेवकुबेरस्यशक्रस्येवामरावती तेजोवतीवरत्नाढ्यापावकस्यमहापुरी तत्रराजारत्नसेनोबभूवामितविक्रमः तस्मिन्वसतिभूपालेजनानंदकरेशुभे तस्यराज्येवसद्विप्रोदेवस्वामीतिविश्रुतः तस्यस्त्रीरूपसंपन्नानाम्ना धनवतीशुभा यथार्थनामधेयासालक्ष्मीरिवसविग्रहा तस्यांसजनयामाससप्तपुत्रान्गुणान्वितान् एकांदुहितरंरम्यांनाम्नागुणवतींनृप कृतदाराश्चतेपुत्राविरहंतियथासुखं कन्याकुमारिकाचासीदनुरूपप्रियार्थिनी अत्रांतरेद्विजःकश्चिद्भिक्षार्थंसमुपागतः दीप्यमानःस्वतेजोभिर्मूर्तिमानिवपावकः द्वारदेशमुपागत्यप्रत्युयोजाशिषंतदा देवस्वामिस्नुषाःसप्तसमुत्थायससंभ्रमम् भिक्षांप्रत्येकमानिन्युर्ददुस्तस्मैद्विजन्मने अवैधव्याशिषंप्रादात्ताभ्यःसौभाग्यसंपदम् ततोगुणवतीमात्राप्रहितासहभिक्षया विप्रायभिक्षांप्रददौकृत्वापादाभिवंदनं आशिषंचददौविप्रःशुभेधर्मवतीभव सावैलक्ष्यंगुणवतीश्रुत्वाप्रत्याययौगृहं मात्रेनिवेदयामासआशिषंतेनयोजितां श्रुत्वाधनवतीपुत्रींकरेधृत्वासमाययौ प्रणतिंकारयामासपुनस्तस्मैद्विजन्मने तथैवाशिषमुच्चार्यविप्रस्तामभ्यनंदयत् श्रुत्वाशिषंधनवतीसचिंताप्रत्युवाचह धनवत्युवाच प्रसीदभगवन्विप्रवचनंमेवधारय स्नुषाभ्यःप्रणताभ्योमेत्वयादत्तावराशिषः अवैधव्यकराःपुत्रसुखसौभाग्यसाधकाः सुतायांप्रणतायांमेविपरीतंत्वयोदितं भद्रेधर्मवतीभूयइत्युदीर्यपुनःपुनः आशीःप्रयुक्ताविप्रर्षेकारणंवदसत्वरं द्विजउवाच धन्यासित्वंधनवतीप्रख्यातचरिताभुवि यथायोग्यंप्रयुक्तेयंमयाशीर्दुहितुस्तव इयंसप्तपदीमध्येवैधव्यत्वमवाप्स्यति धर्माचरणमत्यर्थंकर्त्तव्यमनयाशुभे अतोमयाशीर्दत्तेयंशुभेधर्मवतीभव श्रुत्वाधनवतीवाक्यंचिंताकुलितचेतसा उवाचवचनंदीनंप्रणिपत्यपुनःपुनः धनवत्युवाच उपायंवेत्सिविप्रेंद्रवदशीघ्रंदयांकुरु उपायंवेत्सिचेद्विप्रकिंकरोमिदयानिधे द्विजउवाच यदागता भवेत्सोमागृहेवैतवसुंदरि तस्याःपूजनमात्रेणभवेद्वैधव्यनाशनम् धनवत्युवा॰ कासासोमात्वयाप्रोक्ताकाजातिःकुत्रसंस्थितिः यस्यागमनमात्रेणभवेद्वैधव्यभंजनम् एतद्वदमहाभागनकालोविस्तरस्यमे द्विजउवाच सोमासारजकीजातिःस्थितिस्तस्याश्चसिंहले॥

साचेदायातिचेद्वेश्मनदावैधव्यभंजनं इत्युक्त्वाब्राह्मणोन्यत्रगतोभिक्षाप्रतीक्षया धनवत्यपिपुत्रेभ्यःप्रोवाचवचनंतदा धनवत्युवा
च इयंदुर्ललिताःपुत्राःस्वसागुणवतीशुभा सोमागमनमात्रेणभवेद्वैधव्यभंजनम् अस्तियस्यापितुर्भक्तिर्मातुर्वचनगौरवम् समयातु
सहस्वस्रासोमामानयितुंद्रुतम् पुत्राऊचुः ज्ञातंमातस्तवस्वांतंपुत्रीस्नेहवशंगतं यातदेशांतरंपुत्राःप्रख्यापयसिदुर्गमम् अंतरेदुस्तरः
सिंधुःशतयोजनविस्तरः अशक्यंगमनंतत्रनक्षमागमनेवयम् देवस्वाम्युवाच अपुत्रःसप्तभिःपुत्रैरहंयास्यामिसिंहलं आनयिष्यामि
तांसोमांपुत्रीवैधव्यनाशिनीं एवंवादिनिसक्रोधेदेवस्वामिनितत्क्षणे शिवस्वामीकनिष्ठस्तुपुत्रःप्रोवाचसंमतः तातमावदचैवंत्वंरोषावेशव
शंगतः मयितिष्ठतिकःशक्तोगंतुंद्वीपंहिसिंहलं इत्युक्त्वासहसोत्थायप्रणम्यशिरसामुदा प्रतस्थेसहितःस्वस्राद्वीपंसिंहलसंज्ञितं सकि
यद्भिर्दिनैर्गत्वातीरंप्रापसरित्पतेः तर्तुंतमंबुधिंतत्रप्रयत्नमकरोद्द्विजः सददर्शैकविस्तीर्णंन्यग्रोधद्रुममंतिके तत्कोटरेकृतवासौनागृध्रराज
स्यबालकाः तत्पादपतलेस्थित्वाताभ्यांनीतंतुतद्दिनम् शावकानांकृतेगृध्रोगृहीत्वाशिशुभोजनम् शावकास्तत्रनैवगृध्राद्भोजनंजगृधिरेभृशं
मप्रच्छबालकान्गृध्रोचिंताकुलितमानसान् गृध्रराजउवाच कथंनभुंजतेपुत्राभवंतःक्षुधिताअपि आनीतंकोमलंमांसंभवद्योग्यमि
दंमया शावकाऊचुः एतद्वृक्षतलेतातमानवावत्रतिष्ठतः अस्वीकृत्योस्तयोस्तातकथंभुंजामहेवयम् एतच्छ्रुत्वासगृध्रस्तुकरुणार्द्र
तचेतसः तयोरंतिकमागत्यवचनंससंभाषत गृध्रराजउवा॰ जातस्तुयुवयोःकामोवक्तव्योत्रममद्विज क्रियतेसर्वथाविप्रभोजनंकर्तुमर्ह
सि द्विजउवाच सिंहलेगंतुकामोहंजलधेःपारमद्यवै सोमागमनमिच्छामिस्वसृवैधव्यनाशनम् गृध्रराजउ॰ पारमुत्तारयिष्यामि
जलधेःप्रातरेवहि सोमागृहमपितवदर्शयिष्यामिसिंहले ततोरात्र्यांव्यतीतायामुदितेतुदिवाकरे पारमुत्तारितौतौतुगृध्रराजेनवेगिना सिं
हलद्वीपमागत्यस्थितौसोमागृहांतिके ततःप्रत्यूषसमयेसमृज्यांगणमंडलं लेपनंचक्रतुस्तस्यादिवसेदिवसेशुभं एवंविदधतोस्तत्रपू-
र्णःसंवत्सरोगतः स्नुषाःपुत्रान्समाहूयसोमापप्रच्छविस्मिता मार्जनंलेपनंकोत्रकरोतिममकथ्यतां एकदैवाथजगदुःसर्वाःकृतमिदंहिन
ततःकदाचिद्रजनीनिभृतासंस्थितानिशि ददर्शब्राह्मणींकन्यांमार्जयंतींगृहांगणम् लिंपंतमंगणंभ्रातस्नानरंचसुविग्रहं सोमापप्रच्छ

तौगत्वाकौसुवांकथ्यतांमम उचतुस्तौनदासोमामावांब्राह्मणपुत्रकौ सोमोवाच दग्धास्मिबतनष्टास्मिब्राह्मणौगृहमार्जकौ कांगतिंबत
यास्यामिपापादस्मादसंशयं पापजातिरहंख्यातारजकीसर्वथाद्विज कथंत्वंब्राह्मणोभूत्वाविरुद्धंमेचिकीर्षसि शिवस्वाम्युवा॰ एषागु
णवतीनामस्वसाममसुमध्यमा अस्याःसप्तपदीमध्येवैधव्यंसंप्रपत्स्यते तवसान्निध्यमात्रेणभवेद्वैधव्यभंजनं अतोहेतोःसहस्वस्रादा
सकर्मकरोमिते सोमोवाच अतःपरंनकर्तव्यंयास्यामितवशासनात् इत्युक्त्वागृहमागत्यस्नुषाभ्यःप्रत्युवाचह यःकश्चिन्ममराज्येस्मि
न्म्रियतेमानवःकश्चित् तथैवरक्षणीयोसौयावदागम्यतेमया कस्यचिद्वचनात्कोपिनदग्धव्यःकथंचन तथेत्युक्त्वास्नुषाभिःसासोमा
यातामहांबुधिम् पारमुत्तारयामासक्षणेनद्विजपुत्रकौ स्वयमाकाशमार्गेणसोत्ततारमहार्णवं प्राप्ताःकांचींपुरींसर्वेनिमेषात्तत्प्रसादतः
सोमांदृष्ट्वाधनवतीहृष्टापूजामहाकरोत् अत्रांतरेशिवस्वामीतदादेशांतरात्स्वसुः सदृशंवरमानेतुंजगामोज्जयिनींप्रति आनिनायवरंत
त्रदेवशर्मसुतंसुधीः ब्राह्मणंरुद्रशर्माणंगुणिनंसदृशंस्वसुः ततःसारजकीसोमावैवाहिकमथाकरोत् सुलग्नेचसुनक्षत्रेदेवस्वामीति
कन्यकां ददौतस्मैगुणवतींगुणिनेरुद्रशर्मणे ततोवैवाहिकेमंत्रैर्हूयमानेहुताशने ततःसप्तपदीमध्येरुद्रशर्मामृतस्तदा रुरुदुर्बांधवाःस
र्वेस्थितासोमानिराकुला आक्रंदश्चमहानासील्लोकानांतत्रपश्यताम् गुणवत्यैचसातूर्णंव्रतराजप्रभावजम् पुण्यंसंकल्प्यविधिवद्ददौ
मृत्युविनाशनं रुद्रशर्मापितस्माच्चव्रतराजप्रभावतः आससादतदाजीवंसुप्तवत्सहसोत्थितः एवंविवाहंनिर्वर्त्यव्रतराजंनिवेद्यच आमं
त्र्यतांधनवतींसोमामायाद्गृहंप्रति एवंसारजकीसोमाजीवयित्वामृतंद्विजं चचालहर्षसंपूर्णापूर्णकामास्वमंदिरं अत्रांतरेगृहेतस्याःप्र
थमंतनयामृताः पुनःस्वामीमृतस्तस्याजामाताचततोमृतः आगच्छंत्यास्तदातस्याःसोमवारान्विनातिथिः अमावास्याबभूवाथमृत
संजीविनीतिथिः साददर्शजलोपांतेवृद्धांकांचित्स्त्रियंतदा तूलभारभराक्रांतांक्रंदमानांसुदुःखिताम् वृद्धोवाच अवतारयमे
पुत्रितूलभारंशिरस्थितं एतद्भारभराक्रांतांक्रंदमानांसुदुःखितां सोमोवाच अमावास्याद्यहेवृद्धेसोमवारयुतातिथिः तूलकं
नस्पृशाम्यद्यनियमोयंमयाकृतः पुनर्ददर्शयांतींसामूलभारवतींस्त्रियम् साउवाचततःपुत्रीमूलभारोमहानिति अवतीर्यक्षणंतिष्ठसं

गेयास्याम्यहंतव सोमोवाच अद्यमूलंतथातूलंनस्पृशामिकदाचन ततोश्वत्थतरुंप्राप्यनदीतीरभवंशुभं स्नात्वाविष्णुंसमभ्यर्च्यश
र्कराभिःप्रदक्षिणाम् साचकारमहाभागानदैवाष्टोत्तरंशतं भीष्मउवाच यदाप्रदक्षिणांकर्त्तुंकृतंशर्करहस्तया तदाजीवितवंतस्तज्जामा
तृपतिपुत्रकाः नगरंश्रीसमाकीर्णतद्गृहंचविशेषतः अथयातामहाभागासोमास्वभवनंप्रति जीवितंवीक्ष्यभर्त्तारंपुत्रान्जीवतरंतथा अभि-
ज्ञातान्समासाद्यजगामकृतकृत्यतां प्रणिपत्यस्नुषाःसर्वाःपप्रच्छुस्तांतपस्विनीं स्नुषाऊचुः मृतास्तेतनयादेविपतिजामातृबांधवाः
जीवितास्तेकथंदेविमृतास्तेचकथंवद सोमोवाच गुणवत्यैमयादत्तंव्रतराजस्यपुण्यकं मृतास्तेतद्विपाकेनपतिजामातृपुत्रकाः तूल
कंनमयास्पृष्टंमूलकंचतथास्नुषाः अश्वत्थेविष्णुमभ्यर्च्यकृतास्तत्रप्रदक्षिणाः शर्कराहस्तयातत्रकृतमष्टोत्तरंशतम् जीवितास्तत्प्रभावे
नअद्यजामातृपुत्रकाः सर्वाभिःक्रियतामद्यव्रतराजोविधानतः भविष्यतिनवैधव्यंसौभाग्यंसंभविष्यति स्नुषाःस्ताःकारयामासुस्तथा
सोमव्रतेश्वरं भुक्त्वाभोगान्बहूंस्तत्रपुत्रपौत्रादिभिःसह तैश्चसर्वैःपरिवृताविष्णुलोकमवापसा इत्येतत्कथितंपार्थविस्तरेणमयानघ
युधिष्ठिरउवाच माहात्म्यंव्रतराजस्यकोविधिर्वदविस्तरात् कर्तव्यंकेनभीष्मेदंनारीभिःपुरुषेणवा भीष्मउवाच अमावास्यायदा
पार्थसोमवारान्विताभवेत् तदापुण्यतमःकालोदेवानामपिदुर्लभः प्रातरुत्थायव्रतिनास्नानंकार्यंजलाशये स्नात्वामौनेनकौशेयंपरिधा
यव्रतीततः गत्वाअश्वत्थवृक्षस्यसमीपंकुरुनंदन अश्वत्थमूलेकर्तव्याविष्णुपूजासमंत्रका व्यक्ताव्यक्तस्वरूपायसृष्टिस्थित्यंतकारिणे
आदिमध्यांतहीनायविष्टरश्रवसेनमः इतिपूजामंत्रः मूलतोब्रह्मरूपायमध्यतोविष्णुरूपिणे अग्रतःशिवरूपायअश्वत्थायनमोनमः
एवंसंपूज्यगोविंदंपीतवस्त्राक्षतैःफलैः कुसुमैर्विविधैश्चैवभक्ष्यभोज्यैस्तथाविधैः अश्वत्थपूजनंकार्यंप्रोक्तमंत्रेणपांडव अश्वत्थहुत
भुग्वासगोविंदस्यसदाश्रय अशेषंहरमेपापंवृक्षराजनमोस्तुते एवंपूजाविधिंकृत्वाततःकुर्यात्प्रदक्षिणाः मौक्तिकैःकांचनैरौप्यैर्हीरकैर्म
णिभिस्तथा कांस्यपात्रैस्ताम्रपात्रैर्भक्ष्यपूर्णैःपृथक्पृथक् गृहीत्वाप्रक्रमणंकार्यंयावत्संक्रमणंभवेत् तावत्प्रदक्षिणंकार्यंयावदष्टोत्तरं
शतं समर्पितंचयद्द्रव्यमर्पयेद्गुरवेशुभं सुवासिन्यश्चसंपूज्याःसोमासंतुष्टिहेतवे दत्वाचान्नंतुविप्रेभ्योस्वयंभुंजीतवाग्यता एषतेकथि

तोभूपव्रतराजविधिर्मया द्रौपदींचसुभद्रांचकारयस्वतथोत्तराम् उत्तरागर्भस्त्वस्थस्तुजीवितंलभतेचिरात् युधिष्ठिरउवा॰ यास्व
ल्पविभवानारीकांचनाद्यैर्विनाकृता साकथंलभतेपूर्णंव्रतराजफलंवद भीष्मउवाच फलैःपुष्पैस्तथाभक्ष्यैर्वस्त्राद्यैरपिपांडव कु
र्यात्प्रदक्षिणावर्त्तेसापिपूर्णंलभेत्फलं व्रतमिदमखिलंनरेंद्रविष्णोःश्रुतमनयाहिपराक्रमंत्वयापि पतिसुतधनमिच्छतीपुरंध्रीसपदि
करोतुनचात्रचित्रमस्ति शृणुपार्थप्रवक्ष्यामिह्युद्यापनविधिंशुभं यंविनापूर्णतानस्याद्व्रतराजस्यवैनृप कारयेत्सर्वतोभद्रंतन्मध्येकुंभ
मुत्तमं वृक्षराजःसुवर्णस्यपंचरत्नस्यवेदिकां तन्मूलेप्रतिमांविष्णोःसौवर्णींचचतुर्भुजां लक्ष्मीवाहनसंयुक्तांमाषद्वयपलावधि उ
पचारैरनेकैश्चयथाविभवविस्तरैः नैवेद्यैःपुष्पधूपैश्चदीपैश्चपरितस्थितैः रात्रौजागरणंकुर्यात्प्रभातेहोममाचरेत् समिद्भिःपैप्पला
भिश्चपायसेनतिलैस्तथा इदंविष्णुर्वेतिमंत्रेणहुत्वापूर्णाहुतिंचरेत् आचार्यंपूजयेत्सम्यग्गांचदद्यात्पयस्विनीं ब्राह्मणंवस्त्रभूषाद्यैःसद
स्यंचप्रपूजयेत् ऋत्विजोद्वादशाःपूज्याघृतपायसभोजनं उपवीतानिवस्त्राणितेभ्योदद्याच्चदक्षिणां प्रणम्यदंडवद्भूमौप्रार्थयित्वावि
सर्जयेत् एवंद्वादशवर्षैर्वामध्येचादौसमाचरेत् कृत्वाह्युद्यापनंसम्यग्व्रतराजफलंलभेत् सर्वंनिवेदयेत्पीठमाचार्यायसदक्षिणं अच्छि
द्रंवाचयेत्पश्चात्स्वयंभुंजीतवाग्यतः इतिभविष्योत्तरपुराणेसोमवत्यमावास्याव्रतोद्यापनंसंपूर्णम् अथमाघअमावास्याअर्धो
दयव्रतम् . अमार्कपातश्रवणैर्युक्ताचेत्पौषमाघयोः अर्धोदयःसविज्ञेयःकोटिसूर्यग्रहैःसमः दिवैवयोगःशस्तोयंनतुरात्रौकदाचन
इतिहेमाद्रौ अगस्त्यउवाच भगवन्त्वत्प्रसादेनश्रुतोयंव्रतविस्तरः अर्धोदयंतुमेब्रूहिदुर्लभःसचराचरैः जीवितंप्राणिनांपु
ण्यंयदिचेद्वदसिप्रभो कथंकार्यःकृतेकिंस्यात्फलंकथयषण्मुख स्कंदउवाच श्रूयतांपुण्ययोगोयंदुर्लभोर्धोदयाह्वयः तिर्य-
ङ्मनुष्यदेवानांदुःप्राप्यःसर्वकामदः माघामायांव्यतीपातेआदित्येविष्णुदैवते अर्धोदयंतदित्याहुःसहस्रार्कग्रहैःसमं पुराकृतंवसि
ष्ठेनजामदग्न्येनसुव्रत सनकाद्यैर्मनुष्यैश्चबहुभिर्बहुविश्रुतैः अन्यैःसहस्रैश्चकृतंभुविश्रेष्ठंतुकुंभज दानानांयज्ञतीर्थानांफलं
येनकृतंभवेत् सप्तसागराधरातेनसप्तद्वीपसमन्विता दत्तास्यात्सर्वभावेनयेनत्वर्धोदयःकृतः गंगागयाप्रयागेचपुष्कराणांजलेतथा

मानसादिषुयत्पुण्यंतीर्थेषुस्नानदानतः तत्सर्वंप्राप्यतेविप्रव्रतेनानेनकुंभज अश्वमेधयुतंपुण्यंइष्टापूर्तेनयद्भवेत् अर्धोदयेकृतोयैस्तु
विधिदृष्टेनकर्मणा यातिसत्यंगृहेलक्ष्मीःसंततिश्चानपायिनी आयुर्यशोतिविपुलंव्रतकर्ताफलंलभेत् इंद्राग्नीयमलोकेषुनिर्ऋतीनाम
पांपतेः वायोःकुबेरस्येशस्यलोकेषुचरतोव्रती वासश्चंद्रार्कलोकेच लोकपालैश्चसेवितः गोकोटिदानजंपुण्यंसर्वतीर्थनिवासनम् अ
र्धोदयस्यसाम्यंतुकलांनार्हतिषोडशीं भूलोकाधिपतिश्चैवभुवर्लोकाधिपस्तथः स्वर्लोकेशोजनानांचतपोलोकजनेश्वरः महर्लोकेवसे
न्नित्यंयावदिंद्राश्चतुर्दश ततोहिरण्यगर्भस्यपुरुषोव्रतकारकः सत्यलोकाधिपःसाक्षीलोकानांपुरुषोव्ययः अर्धोदयप्रसादेन ब्रह्मलो
केवसेत्तुसः तथामानेनविष्णुत्वंब्रह्मरुद्रस्ततोभवेत् शिवलोकेगणैःपूज्योदेवराजसमन्वितः वसेच्छक्रस्यलोकेषुव्रतस्यास्यप्रभावतः
ततोविष्णुस्वरूपेणत्रैलोक्याधिपतिर्भवेत् शंखचक्रगदाधारीवनमालीहरिःस्वयं व्रतप्रभावाल्लक्ष्मीशोदेवोनारायणोभवेत् अग
स्त्यउवाच स्कंदकेनविधानेनकर्तव्यंव्रतमुत्तमम् अर्धोदयंमनुष्याणांजीवितंदुर्लभंभुवि स्कंदउवाच कृतेकृतंवसिष्ठेनत्रेता
यांरघुणाकृतं द्वापरेधर्मराजेनकलौपूर्णोदरेणच अन्यैर्देवमनुष्यैश्चदैत्यैश्चमुनिसत्तम कृतमर्धोदयंसम्यक्सर्वकामफलप्रदं मा
घमासेकृष्णपक्षेपंचदश्यांरवेर्दिने वैष्णवेणतुऋक्षेणव्यतीपातेसुदुर्लभे पूर्वाण्हेसंगमेस्नात्वाशुचिर्भूत्वासमाहितः सर्वपापविशुध्य
र्थंनियमस्थोभवेन्नरः त्रिदैवत्यंव्रतंदेवाःकरिष्येमुक्तिदंपरं भवंतिसन्निधौमेचयत्र योदवास्त्रयोग्नयः इतिनियममंत्रः ब्रह्मविष्णुम
हेशानांसौवर्णफलसंख्यया शय्यात्रयंततःकुर्यादुपस्करसमन्वितं देवतात्रयमुद्दिश्यकर्तव्यंभक्तिशक्तितः ब्रह्मविष्णुशिवप्रीत्यैदातव्यं
तुगवांत्रयं हिरण्यभूमिधान्यादिदानंविभवसारतः दातव्यमाश्रयोपेतंब्राह्मणेभ्यस्तुयत्नतः मध्यान्हेतुनरःस्नात्वाशुचिर्भूत्वासमाहि
तः तिलपर्वतमध्यस्थंपूजयेद्देवतात्रयम् तत्रादौब्रह्मपूजा नमोविश्वसृजेतुभ्यंसत्यायपरमात्मने देवायदेवपतयेयज्ञानांपतयेन
मः ॐनमोब्रह्मणेनमः पादौपूजयामि ॐहिरण्यगर्भाय॰ उरूपू॰ ॐ परमेष्ठिनेन॰ जंघे॰ ॐवेधसेन॰ गुह्यंपू॰ ॐ पद्मोद्भवाय॰ नाभिं
पू॰ ॐहंसाय॰ कटीपू॰ ॐ शतानंदाय॰ वक्षस्थलं॰ ॐ सावित्रीपतये॰ बाहूपू॰ ॐ ऋग्वेदाय॰ नासिकांपू॰ ॐ यजुर्वेदाय॰ नेत्रेपू॰ ॐ

सामवेदाय॰ श्रोत्रेपू॰ ॐ अथर्ववेदाय॰ ललाटंपू॰ ॐ कपिलाय॰ शिरःपू॰ ततोलोकपालान्पूजयेत् नाममंत्रैः हिरण्यगर्भपुरुषप्रधानव्यक्तरूपक प्रसीदसुमुखोभूत्वापूजांगृण्हनमोस्तुते इतिप्रार्थना नारायणजगन्नाथनमस्तेगरुडध्वज पीतांबरनमस्तुभ्यंजनार्दननमोस्तुते ॐ अनंताय॰ पादौपू॰ विश्वरूपाय॰ ऊरूपूजयामि मुकुंदाय॰ जानुनीपू॰ गोविंदाय॰ जंघेपू॰ प्रद्युम्नाय॰ बाहूपू॰ विश्वतोमुखाय॰ मुखंपू॰ शतसहस्रशिरसेनमः शिरःपूज॰ आदित्यचंद्रनयनदिग्बाहोदैत्यसूदन पूजादत्तामयाभक्त्यागृहाणकरुणाकर इतिविष्णुंप्रार्च्य महेश्वरमहेशाननमस्तेत्रिपुरांतक जीमूतकेशायनमोनमस्तेवृषभध्वज ईशानाय॰ पादौपू॰ चंद्रशेखराय॰ जंघेपू॰ पशुपतयेनमः जानुनीपू॰ शंकराय॰ ऊरूपू॰ उमाकांताय॰ गुह्यंपू॰ नीललोहिताय॰ नाभिंपू॰ कृत्तिवाससे॰ उदरंपू॰ नागयज्ञोपवीतिने॰ हृदयंपू॰ भुजंगभूषणाय॰ बाहूपू॰ नीलकंठाय॰ कंठंपू॰ पंचवक्त्राय॰ मुखंपू॰ कपर्दिनेन॰ शिरःपूज॰ महादेवमहाबाहोनमोलोकांतकायच पूजामयाकृताभक्त्यागृहाणवृषभध्वज इतिमहेश्वरंप्रार्च्य इतिपूजाक्रमःप्रोक्तोमंत्रैरेतैःप्रयत्नतः आचार्यंपूजयेद्भक्त्यावस्त्रालंकारभूषणैः हस्तमात्राकर्णमात्रापीठंछत्रंकमंडलुम् श्वेतवस्त्रयुगंदेयंब्रह्मणेसर्वमूर्तये उपवीतंवस्त्रयुगंविष्णुलोकहितंकरं पंचामृतेनस्नपनंपूजनंकुसुमैस्ततः कमलैस्तुलसीपत्रैर्बिल्वपत्रैरखंडितैः तत्कालसंभवैर्दिव्यैःपूज्यादेवाययाक्रमं यथाशक्त्याप्रकर्तव्यंव्रतमेतत्सुदुर्लभं जीवितंप्राणिनांराजन्ननित्यंनिश्चितंयतः व्रतस्योद्यापनंराजन्विधानंशृणुयत्नतः देवतात्रयमुद्दिश्यशास्त्रदृष्टेनकर्मणा ब्रह्मणेविष्णुरूपायशिवरूपायतेनमः अनेनैवचमंत्रेणवह्निंसंस्थाप्यभक्तितः ततोहोमंप्रकुर्वीतसहस्रत्रयसंमितं तिलाज्यशर्कराश्चैवहोमद्रव्याणिभिन्नतः ब्रह्मजज्ञानमंत्रेणब्रह्मणेचतिलान्हुनेत् आज्यंचैवइदंविष्णुस्त्र्यंबकंशर्करांहुनेत् अग्निंसंपूज्यविधिवद्गांचदद्यात्पयस्विनीं आचार्यायततःपीठंदक्षिणासहितंशुभं तेनदत्तंहुतंजप्तंइष्टंयज्ञैःसहस्रधा कृतकृत्योभवेन्मर्त्योव्रतस्यास्यप्रभावतः एवंतवमयाख्यातंदुर्लभंव्रतमुत्तमं अर्धोदयंमयाख्यातंकिमन्यत्परिपृच्छसि इतिश्रीस्कंदपुराणेअर्धोदयव्रतंसंपूर्णम् इतिअमावास्याव्रतानिसमाप्तानि अथमलमासव्रतंलिख्यते युधिष्ठिरउवाच॰ देवदेवजगन्नाथभुक्तिमुक्तिप्रदायक कथयस्वप्रसादेनलोकानांहितकाम्यया कथयंतिमुनिश्रेष्ठाः

कृष्णद्वैपायनादयः अदत्तंनैवलभ्येतदत्तमेवोपतिष्ठते यथावंध्यागृहस्थस्यपत्निवंशविनाशिनी तथादानविहीनस्यजन्मसर्वंनिरर्थकं तथापिकथयंतीहदैवज्ञाःशास्त्रकोविदाः मलिम्लुचेयदाप्राप्तेक्रियाकार्याकथंविभो क्षौरंमौंजीविवाहश्चव्रतंकाम्योपवासकं मलिम्लुचेसदात्याज्यंगृहस्थेनविशेषतः लक्ष्मीरुवा॰ अधिमासेचसंप्राप्तेकिंकार्यंव्रतमुत्तमं कस्योद्देशेनदातव्यंकिंपरत्रप्रदायकं श्रीकृष्णउवा॰ शृणुदेविमहाभागेसर्वलोकस्यहेतवे स्वयंदातास्वयंभोक्तायोददातिद्विजातये नान्योदातानभोक्ताचइहलोकेपरत्रच असंक्रांतेचमासेवैमामुद्दिश्यव्रतंचरेत् अधिमासस्यदेवोहंपुरुषोत्तमसंज्ञकः स्नानंदानंजपंहोमंस्वाध्यायंपितृतर्पणं देवार्चनमथान्यच्चयेकुर्वंतिमनुष्यजाः अक्षयंतद्भवेत्सर्वंममोद्देशेनयत्कृतम् मलमासःगतःशून्योयेषांदेविप्रमादतः दारिद्र्यंपुत्रशोकंचपापपंकविगर्हितं मर्त्यलोकेभवेजन्मतेषांदेविनसंशयः सुखप्रदासिदेवित्वंयेर्चयंतिद्विजोत्तमान् यदामलिम्लुचोमासोप्राप्यतेमानवैःप्रिये महोत्सवस्तदाकार्य आत्मनोहितकांक्षिभि कृष्णपक्षेचतुर्दश्यांनवम्यांवासुरेश्वरि अष्टम्यांवाथकर्तव्यंव्रतंशोकविनाशनं यथालाभोपहारेणमासेचास्मिन्मलिम्लुचे पुण्येन्हिमानरुत्थायकृत्वापूर्वाण्हिकींक्रियां गृण्हीयान्नियमंपश्चाद्वासुदेवंहृदिस्मरन् उपवासस्यनक्तस्यएकभक्तस्यभामिनि एकस्यनिश्चयंकृत्वाततोविप्रान्निमंत्रयेत् सपत्नीकान्सदाचारान्सुरूपान्सुरवेषकान् श्रुताध्ययनसंपन्नान्कुलीनान्ज्ञानिसंभवान् युधिष्ठिरउवा॰

अधिमासस्यमाहात्म्यंमार्कंडेयमुनेवद जपयज्ञादिकंपुण्यंवक्तव्यंऋषिसत्तम किंकर्तव्यंचविप्रेंद्रगंगास्नानंचदुर्लभम् कथयस्वमह्यप्राज्ञकृपयाद्विजपुंगव मार्कंडेयउवाच मलमासस्तुमासानांमलिनःपापसंभवः तस्यपापविशुद्ध्यर्थंमलमासव्रतंकुरु प्रतिपत्तिथिमारभ्यअमावास्यावधिर्भवेत् उपवासेननक्तेनह्येकभक्तेनवानृप एकस्यनियमंकृत्वादानंदद्याद्दिनेदिने दानंकुर्यादपूपानांदक्षिणाघृतसंयुतं अंतेचोद्यापनंकुर्यात्संपूज्यमधुसूदनं उपोष्यचचतुर्दश्यांसर्वपापैःप्रमुच्यते दरिद्रेणव्यतीपातेप्यथवाद्वादशीदिने पौर्णमास्यांचतुर्दश्यांनवम्यांवानृपोत्तम अष्टम्यांवाथकर्तव्यंव्रतंशोकविनाशनं यथालाभोपचारेणमासेचास्मिन्मलिम्लुचे त्रयत्रिंशादपूपांश्चप्रदद्याद्घृतसंयुतान् श्रीसूर्यप्रीतयेराजन्सर्वपापविमुक्तये पात्रेजनार्दनेप्रीत्यादानंतत्सफलंभवेत् मलमासेतुसंप्राप्तेकार्ति-

केश्रावणेपिवा युधिष्ठिरउवा॰ मलमासःकथंज्ञेयःसर्वज्ञमुनिसत्तम तंब्रूहिसकलंविप्रविस्तरेणायथातथं मार्कंडेयउवा॰ यस्मिन्मासेनसंक्रांतिःसंक्रांतिद्वयमेववा मलमासक्षयौमासौसर्वधर्मविवर्जितौ एवंसंज्ञौयदामासौयस्मिन्संवत्सरेकचित् उत्तरेदेवकार्याणिपितृकार्याणिदक्षिणे मलमासेतुसंप्राप्तेसंध्योपासनतर्पणं नित्यंहिसफलंश्राद्धदानादिनियमव्रतं मार्कंडेयउवा॰ शृणुधर्मभृतांश्रेष्ठकौशिकोनामवैद्विजः महातपाध्यानरतःसत्यसंधोजितेंद्रियः विष्णुभक्तःसदाविप्रोवेदधर्मपरायणः तस्यसूनुर्महाक्रूरोद्विजोमैत्रेयनामकः कामांधःस्वजनत्रासीसाधुद्वेषकरोधमः अधर्मिष्ठःपापरतिःशिवश्रीविष्णुनिंदकः गोत्रपीडाकरःपापोराहुरिवदिवाकरे दारुणोदारुणाचारःसर्वभूतविहिंसकः मद्यपानरतोमूढोदस्युभिःसहसंगतः गतेबहुतरेकालेशृणुराजन्यसत्तम एकदाहयमारुह्यप्रयातोनगरंप्रति व्यवसायस्वरूपेणसौराष्ट्रंनगरोत्तमं भृत्यैश्चसहितोविप्रवधंकृत्वास्वहस्ततः शस्त्रास्त्रकर्मभिर्घोरैर्धनंहृत्वानृपोत्तम हाहाकारोमहान्जातःसौराष्ट्रनगरेततः सर्वैर्नागरिकैःपापोलोकैर्विनिहतोनृप इत्थंकृत्वासतन्मूढोविप्रवंशेकुलाधमः प्रतिषिद्धंचयत्कर्मकृतंपातकसंचयात् भस्मीभूतंचतद्राष्ट्रं ब्राह्मणस्यविघाततः मैत्रेयःस्वजनैःसार्द्धंब्रह्महत्यादिदोषकृत् तत्पापंचमहच्छ्रुत्वानिर्गत्ययमकिंकराः छिंधिभिंधिवचोघोराउद्धृत्यदंडमुद्गरान् घातयित्वाचतंमूढंतालवृक्षशिलातले इत्थंचानेकदंडांश्चकृत्वापश्चाद्यमालयं आनीतोसौपापरूपीयदाकौशिकनंदनः घोरेवैकृमिकुंडेचमैत्रेयःसनिपातितः यमाज्ञयाततःपापंपंचद्वयसहस्रकं भुंजन्वैविप्रहत्यांतांतथाप्रेताग्निवन्हिना इत्थंचानेकशःसर्वयातनासुपभुंजते एतन्नारदवाक्याच्चकौशिकेनततःश्रुतम् लांछनंब्रह्महत्यानांस्वकुलेमुनिसत्तम तत्पापपरिहारार्थंव्रतंचेदंमहोत्तमं श्रुतिशास्त्रेषुसंशोध्यऋषिभिःकथितंपुरा तच्छ्रुत्वाकौशिकेंद्रेणपुत्रोद्धरणहेतुना कौशिकउवा॰ तद्व्रतंब्रूहिमेप्राज्ञब्रह्महत्याप्रणाशनं मद्वंशलांछनंतानशीघ्रंब्रूहिमहामने नारदउवाच शृणुकौशिकसर्वज्ञव्रतानामुत्तमंव्रतम् प्रवक्ष्यामीहतेसर्वलोकानुग्रहकाम्यया ब्रह्महत्यासुरापानंस्तेयंगुर्वंगनागमं कोटिजन्मार्जितंपापंतत्क्षणाद्व्रतयोगतः प्रणश्यतिनसंदेहोयथाकृष्णपदार्चनात् तस्मात्कौशिकविप्रेंद्रब्रह्महत्यांतरिष्यसि मार्कंडेयउवा॰ तच्छ्रुत्वाकौशिकोवाक्यंनारदस्यमहात्म-

नः सतदामलमासस्यव्रतंचक्रेथकौशिकः शतधातत्कृतंपुण्यंमलमासव्रतादिकं दत्तंत्रिवार्षिकंतत्रकौशिकेनसुतायतत् दिव्यदेहस्तदाजातोब्रह्मादीनामगोचरः मैत्रेयश्चमहाराजव्रतस्यास्यप्रसादतः निःपापश्चसुतोदृष्टःकौशिकेनद्विजन्मना प्रसादाच्चहरेःसाक्षाच्छृणुधर्मभृतांवर युधिष्ठिरउवा० कथंवाचरितंब्रह्मन्मलमासव्रतादिकं तत्सर्वंब्रूहिमेविप्रसर्वलोकहितायच मार्कंडेयउवा० विस्तरेणार्चनफलंकविभिर्नैवशक्यते वक्तुंजनार्दनस्येदंकिंपुनःप्राकृतैर्जनैः प्रतिपत्तिथिमारभ्यमासमेकंजनार्दनम् अर्चयेद्गंधपुष्पाद्यैःपायसेनससर्पिषा विप्रांस्तुभोजयेत्पश्चाद्दक्षिणाभिश्चतोषयेत् एवंव्रतंमासमेकंकुर्याद्दानैर्विचित्रकैः अंतेभूतदिनेप्राप्तेउपोष्यसुसमाहितः पुण्येन्हिस्नानकृत्यायकुर्यात्पूर्वाण्हिकींक्रियां गृहीत्वानियमंपश्चाद्वासुदेवंहृदिस्मरन् त्रित्रिंशद्धर्मनिरतान्ततोविप्रान्निमंत्रयेत् सपत्नीकान्सदाचारान्सुरूपांश्चसुविद्यकान् वेदाध्ययनसंपन्नान्कुलीनान्ज्ञानिसंभवान् ततोमध्यान्हवेलायांकृत्वामाध्यान्हिकीःक्रियाः पुष्पमंडपिकांकृत्वाविचित्रैस्तोरणादिभिः तस्मिन्सुशोभितेसर्वमंडलेतूर्यनादिते सुलक्षणंलिखेत्तत्रसर्वतोभद्रमंडलं स्थापयेदव्रणंकुंभंपंचरत्नसमन्वितं तस्योपरिन्यसेत्पात्रंदेवंतत्रप्रपूजयेत् आदौस्वस्त्ययनंकृत्वापूजांतत्रसमारभेत् प्राणानायम्यविधिवन्मनःसंकल्पपूर्वकम् उपचारैःषोडशभिःपूजयेच्चजनार्दनम् गंधतोयेनसंस्नाप्यशुभैःपंचामृतैस्तथा स्थापयेदव्रणंकुंभंवस्त्रयुग्मेनवेष्टितं ततस्त्रिंशच्चनामानिपूजयेच्चयथाविधि जिष्णुंविष्णुंमहाविष्णुंहरिंकृष्णमधोक्षजं केशवंमाधवंराममच्युतंपुरुषोत्तमं गोविंदंवामनंश्रीशंश्रीकंठंविश्वसाक्षिणं नारायणंमधुरिपुमनिरुद्धंत्रिविक्रमं वासुदेवंजगद्योनिंशेषतल्पगतंतथा संकर्षणंचप्रद्युम्नंदैत्यारिंविश्वतोमुखं जनार्दनंधराधारंश्रीधरंचसमर्चयेत् कुंभस्थितेकांस्यपात्रेपूजयेच्चजनार्दनं आच्छाद्यवस्त्रयुग्मेनपीतेनचयथाविधि विष्णावेचततोदद्यादुपवीतेचशोभने चंदनेनसुगंधेनपुष्पैर्नानाविधैर्नृप धूपैर्नानाविधैर्दीपैःपूजयेच्चयथाविधि मिष्टान्नैश्चैवनैवेद्यै र्नागवल्लीदलान्वितैः घंटामृदंगनिर्घोषैःशंखध्वनिसमन्वितैः आरार्तिकंप्रकुर्वीतकर्पूरागरुचंदनैः प्रदक्षिणानमस्कारान्मंत्रपुष्पंयथाविधि ताम्रपात्रस्थितंतोयंचंदनाक्षतपुष्पकैः अर्घ्यंदद्यात्सपत्नीकःप्रहृष्टेनांतरात्मना नारिंगैर्नारिकेरैश्चफलैर्नानाविधैःशुभैः पंचरत्नसमा

युक्तंजानुनीस्थाप्यभूतले आरोप्यजालेहस्तौच श्रद्धाभक्तिसमन्वितः अधिमासेतुसंप्राप्तेशुभेसूर्याधिदैवते देवदेवमहादेवप्रलयोत्पत्ति
कारक गृहाणार्घ्यंमयादत्तंकृपांकृत्वाममोपरि स्वयंभुवेनमस्तुभ्यंब्रह्मणेमिततेजसे नमोस्तुतेश्रियानंतब्राह्मणानांदयांकुरु एवंस्तु-
त्वाजगन्नाथंगंधपुष्पोपहारकैः पूजयित्वाजगन्नाथंचतुर्षुप्रहरेषुच तथाजागरणंकुर्यात्कीर्तनश्रवणादिभिः ततःप्रभातसमयेअमावा
स्यादिनेनृप विष्णुंचपूजयेद्भक्त्यापश्चाद्धोमंसमाचरेत् समित्तिलाज्यचरुणापायसेनहुनेन्नृप अतोदेवेतिषडृचेन अयुतंवासहस्रकम्
पूर्णाहुतिंततःकृत्वाहोमशेषंसमापयेत् गुरोःपूजांततःकुर्याद्वस्त्रधान्यादिसप्तकैः प्रदद्याद्धेनुनासार्द्धंप्रतिमांचतयानृप त्रयस्त्रिंशदपू
पांश्चकांस्यपात्रसमन्वितान् प्रदद्याद्गुरवेराजन् घृतशर्करयासह अधिमासेतुसंप्राप्तेपापमुक्त्यैजनार्दनम् उद्दिश्यापूपदानेनघृतेन
सहरुक्मकं विष्णुप्रीत्यैप्रदद्याच्चपृथ्वीदानफलंलभेत् त्रयस्त्रिंशदपूपांश्चदानार्हांश्चदिनेदिने सुवर्णगुडसंयुक्तान् कांस्यपात्रेनि
धायच अधिमासेतुसंप्राप्तेशुभेसूर्याधिदैवते नरकोत्तारणायैवमयादानंप्रदीयते त्रयस्त्रिंशदपूपांश्चघृतशर्करयासह सदक्षिणा
मयातुभ्यंकांस्यपात्रेणदापिताः दानादिवाकरोदेवोगृहीताचदिवाकरः दानेनानेनविप्रेंद्रसूर्योमेप्रीयतामिति प्रीयतांदेवदेवेशाब्र-
ह्मशंभुजनार्दनाः तेषांप्रसादात्सकलाममसंतुमनोरथाः गृहाणपरमान्नेनकांस्यपात्रंप्रपूरितं सघृतंगुडसंयुक्तंप्रीतोभवदिवाक
र त्वयादत्तमिदंप्राप्तंपरमान्नेनपूरितम् सघृतंप्रतिगृह्णामिप्रीयतांमेदिवाकरः ब्राह्मणान्पूजयेत्पश्चाद्वस्त्रालंकारचंदनैः अपूप
दानंदद्याच्चकांस्यपात्रसमन्वितम् धेनुंसवत्सांदद्याच्चवस्त्रालंकारभूषितां कांस्यदोग्ध्रींरौप्यखुरींदक्षिणासहितांनृप नत्वातु
वाचयेद्विप्रान्सफलंचास्तुमेव्रतं ऋत्विग्भ्योवाससीदद्यात्त्रयस्त्रिंशच्चकुंभकान् कांस्यपात्रसमायुक्तानपूपान्घृतसंयुतान् व
टकैःसहराजेंद्रयथाशक्त्याचदक्षिणाम् ब्राह्मणान्भोजयेत्पश्चाच्छर्कराघृतपायसैः द्वादश्यांमलमासस्यक्षयेपातेशुभेन्हिवा दु
र्दिने नापिकर्तव्यंत्रयस्त्रिंशदपूपकं मलमासेतुसंप्राप्तेएकस्मिंश्चशुभेदिने निष्किंचनेनदातव्यंघृतशर्करयासह मासानांमलमासोयंमलि
नःपापसंभवः तस्यपापस्यशांत्यर्थमन्नदानंकरोतियः यावंतिचैवछिद्राणिअपूपादिषुपांडव तावद्वर्षसहस्राणिस्वर्गलोकेमहीयते म

लमासव्रतंनारीयाकरोतीहभारत दारिद्र्यपुत्रशोकंतुनवैधव्यंलभेतसा यइदंधर्मसर्वस्वंकुर्याल्लोकैःपुराकृतम् ब्रह्महत्यादिपापघ्नंप्राप्नुयाद्वैष्णवंपदम् एवंभार्य्याचगोविंदंपूजयेद्ब्राह्मणानघ सपत्नीकान्सुचिस्नातान्लक्ष्मीनारायणौस्मरन् पूजयित्वाविधानेनभोजयेद्घृतपायसैः भोजयित्वाविधानेन सपत्नीकंस्मरन्विभुं स्मर्तव्योद्विजरूपेणपत्नीरूपेणवैनृप परिधाययथाशक्त्यावस्त्रालंकारकुंकुमैः द्राक्षाम्रैश्चकपित्थैश्चपनसैःकदलीफलैः नारिकेरैश्चनारिंगैःकूष्मांडैर्दाडिमीफलैः उर्वारुकैःकर्कटैश्चश्रृंगवेरैःसमूलकैः अन्यैश्चविविधैःशाकैरर्चयेच्चपृथक्पृथक् घृतपक्वान्नगोधूमैःशष्पैःसोहालिकैर्वटैः शर्कराघृतपूरैश्चफाणितैःषडमंडकैः भक्ष्यभोज्यैश्चलेह्यादिकंदुकानिविशेषतः गोरसानांविचित्राणिवासितानिइत्यादिभिः अन्यान्यपिचदानानिदेयानिविविधानिच वित्तशाठ्यंनकर्तव्यमात्मनःश्रेयइच्छता यथावत्सरसंप्राप्यपरिवेष्यमृदुब्रुवन् इदंस्वादुइदंभोज्यंभवदर्थेविचिंतये याच्यतांरोचतेयच्चयन्मयापाचितंप्रभो धन्योस्म्यनुगृहीतोस्मिपावितंमममंदिरम् विसर्जयेत्ततोविप्रान्दत्वातांबूलदक्षिणे आसीमांतमनुव्रज्यभुंजीतबंधुभिःसह असंक्रांतव्रतंनारीयाकरोतिहरिप्रियं दारिद्र्यंपुत्रशोकंचवैधव्यंनभवेत्कदा एवंविधोऽपिपुरुषोयदिकुर्यान्मलिम्लुचे मलिम्लुचंप्राप्यनपूजितोयैःश्रीनाथदेवःपरएवभक्त्या कथंभवेच्छ्रेयस्करवंचसंपत्पुत्रःकलत्रस्वजनाश्चापिभार्या कदाचिन्नकृतंपापैर्मलमासव्रतंनरैः तेषांपापिष्ठतानित्यंब्रह्महत्यापदेपदे मार्कंडेयउवाच एतत्तेकथितंपार्थगुह्याद्गुह्यतरंपरं वाजपेयात्पुनफलंश्रोतावक्तालभेद्ध्रुवं इतिश्रीभविष्योत्तरपुराणेमलमासव्रतोद्यापनंसंपूर्णम्

अथस्वस्तिकव्रतंआषाढपौर्णिमामारभ्यकार्तिकपौर्णिमावधि युधिष्ठिरउवा० सर्वासांचतिथीनांचकथितानिव्रतानिभो तथाचस्वस्तिकंनामयत्त्वयाकथितंप्रभो नैवतस्यविधानंतुकथितंचसुरेश्वर कोविधिर्दैवताकाचकिंदानंपूजनंकथम् केनेदंहिपुराचीर्णंकिंफलंस्वस्तिकेव्रते श्रीकृष्णउवा० साधुपृष्टंमहाभागलोकानांहितकाम्यया येनचीर्णेनराजेंद्रभूमिभुक्जायतेनरः स्वस्तिकस्यविधिंराजन्श्रृणुष्वैकाग्रमानसः स्वस्तिकानिलिखित्वादौपूजाकर्मसमारभेत् रमयासहितंदेवंपूजयेत्प्रत्यहंपुनः इतिसं क ल्प्य मेधावीस्वस्तिकंक

मेकारयेत् अष्टोत्तरस्वस्तिकानिप्रत्यहंविष्णवेपुनः रंगवल्यालंकृतानियदिभक्त्यासमर्पयेत् शतजन्मार्जितंपापंतस्यनश्यतितत्क्षणात् गोमूत्रंगोमयंराजन्स्थंडिलेसंविलेपयेत् रंगवल्यादिकंकार्यंसर्वंभक्त्यासमर्पयेत् नीलपीतसितैरक्तैरंगैःस्वस्तिकधारणं यत्रकुर्याद्विशुद्धात्माविष्णुलोकेमहीयते पंचवर्णैस्तुनीलाद्यैःकुर्यात्स्वस्तिकमुत्तमम् नारीवापुरुषोवापिप्रसुप्तेचजनार्दने विष्णवालयेशिवद्वारेगवांगोष्ठेशुचिस्थले विष्णुप्रीतिकरंकुर्यात्तस्यपुण्यमनंतकं पंचरंगकवर्णैस्तुकोटियज्ञफलंलभेत् रंगवल्यादिकंकृत्वाविष्णोस्तुपुरतोन्यसेत् स्वस्तिकैःशोभयित्वाचविष्णोःस्थानंशिवस्यच अशुभंतत्कुलेनैवस्याद्विष्णुप्रसादतः सहस्रंस्वस्तिकानांतुयेनभक्त्यासमर्पितं पुत्रपौत्रसमायुक्तोमोदमानःपुनःपुनः चिरवासीभवेत्स्वर्गेधनवान्भूमिपोभवेत् तत्कुलेपिदरिद्रत्वंनैवजायेतकर्हिचित् प्रयुतंस्वस्तिकानांतुविष्णोर्वेह्यर्पयेद्यदि पुत्रपौत्रादिकंतस्यस्वस्तिमज्जायतेध्रुवं नरोगार्तिर्भवत्येवगोपालस्यप्रसादतः नारीचेद्विधवानैवपुरुषोवापिकर्हिचित् जायापत्यसमायुक्तोनात्रकार्याविचारणा नारीणांतुभवत्येवस्वस्तिकैःपूजनंपरं अथस्वस्तिकलक्षंतुयदिकुर्याद्विचक्षणा तस्याःपुण्यफलंवक्तुंकःशक्तोदिविवाभुवि आषाढेमासिराजेंद्रप्रथमंचरणंभवेत् आश्विनेतुसमाप्तिर्वैकर्तव्यास्वस्तिकारणा धनिनातुकृतंविप्रगोदानादिपुरःसरं कर्तव्यंफलसिद्ध्यर्थंनात्रकार्याविचारणा कृतंयदिदरिद्रेणशुभंस्वस्तिकलक्षकम् कंबलाद्यासनंदद्यात्तत्साद्गुण्यसिद्धये विभवेसतिराजेंद्रहेम्नारौप्येणवाकृतं स्वस्तिकंत्वासनंदद्यात्तत्संपूर्तिसिद्धये आहिताग्नेस्तुहोमार्थंतदभावेद्विजार्चनं द्विजसंतर्पणादेतत्संपूर्णंजायतेनृप शुभकार्याणिराजेंद्रस्वस्तिकानिविधापयेत् ब्राह्मणेभ्यःप्रदेयानिव्रतसंपूर्तिहेतवे यथावत्तुविधानेनगदितंपुण्यमुत्तमं तथैवस्वस्तिपुण्यानामित्याहुर्वेदवादिनः अथहोमंप्रवक्ष्यामिलक्षस्वस्तिकसिद्धये पायसेनहुनेद्विद्वान्स्वसूत्रोक्तविधानतः घृतपायसहोमःस्यात्तद्दशांशेनतर्पणं स्वस्त्ययनंतार्क्ष्यमरिष्टनेमीतिचमंत्रतः होमंमंत्रार्थविधिवत्कुर्वाणःसाधुसाधकः आहिताग्नेर्वैदिकास्तुमंत्राःस्युर्होमसिद्धये मंत्राअनाहिताग्नेर्वैप्रोक्तास्तंत्रेविचक्षणैः तन्मंत्रंकथयिष्यामिफलानांतस्यसिद्धये स्वस्तिनामपरंदैवंस्वस्तिकारणकारणं स्वस्तयेपायसंचाज्यंस्वाहाग्नयेचतत्पठेत् हुतंतुभ्यंमहादेवतृप्तोभवमहामते स्वस्तिकुरुमहादेवस्वाहयासंयुतःशिखिन्

एवंदशांशतोहोमंकुर्याद्विष्णोश्चतुष्टये ब्राह्मणान्भोजयेत्पश्चात्तद्दशांशेनवैबुधः अथासनानिदेयानिपंचरंगयुतानिच ब्राह्मणेभ्योविशि
ष्टेभ्यस्तस्यवैफलसिद्धये और्णानिचापिदेयानिदर्भजान्यथवापुनः तत्पूजाविधिसिद्ध्यर्थमाचार्यंवरयेत्सुधीः त्वंविष्णोइतिमंत्रेण तमेव
पूजयेत्सुधीः पंचामृतैःस्नापयित्वापूजयेद्भक्तिसंयुतः धूपदीपैस्तथाभोज्यैर्नैवेद्यंपरिकल्पयेत् तांबूलैर्धूपदीपैश्चकुसुमैश्चऋतूद्भ
वैः शतपत्रैश्चकल्हारैरर्चयेत्परमेश्वरं नमस्कारैस्तथादिव्यैःस्तोत्रपाठैर्विशेषतः प्रदक्षिणांततःकृत्वावाग्यतःसंयतेंद्रियः ततोगोमि
थुनंदद्याद्व्रतसंपूर्तिहेतवे तदभावेत्वाढकानांद्रोणमात्रंप्रदीयते अथवात्वाढकांतुपाठकेपरिकीर्तितं पूरिकामोदकाद्यैश्चभोजये
द्विजसत्तमान् आचार्यायतुतांशुद्धांप्रतिमांदापयेत्सुधीः हस्तमात्राकर्णमात्राकटिसूत्रादिभिःपुनः पीतांबरैश्चसंपूज्यकोटियज्ञ
फलंलभेत् तस्मादादौप्रकर्त्तव्यंधर्मकामार्थसिद्धये राजानोमित्रतांयांतिशत्रवोयांतिदासतां यएवंकुरुतेभक्त्याविष्णुभक्तिपुरःस
रः तस्यानंतफलंराजन्गदितंवेदपारगैः स्वस्तिकव्रतमेतत्तुगंगास्नानफलप्रदम् रोगानाभिभवंत्येवस्वस्तिकव्रतचारिणां स्त्रीभि
रेवंचकर्तव्यंसर्वसौभाग्यसिद्धये मासत्रयेसमाप्तिःस्याच्चतुर्भिर्वातथैवच एकस्मिन्नपिमासेतुसमाप्तिःकोटिपुण्यदा यइदं
शृणुयाद्भक्त्यातस्यापिफलदंभवेत् नेदंकस्यापिव्याख्येयंयदीच्छेद्विपुलंधनं नदेयंयस्यकस्यापिविकल्पोपहतात्मने भक्तिः-
श्रद्धाविहीनाययज्ञघातकरायच विकल्पहतचित्तायनास्तिकायशठायच नदेयंव्रतमेतत्तुस्वस्तिकारणमुत्तमम् देयंपुत्रायशिष्या
यफलानांतस्यसिद्धये एवंज्ञात्वातुतत्सर्वंचकारैवयुधिष्ठिरः इतिभविष्योत्तरपुराणेस्वस्तिकव्रतंसंपूर्णं अथवारव्रतानिलि
ख्यंते तत्रादौरविवारव्रतंमदनरत्नेसौरधर्मे अथपूजा मासपक्षाद्युल्लिख्य ममसमस्तरोगनिरासार्थंआयुष्यादिसक
लकामनासिद्ध्यर्थंश्रीसूर्यनारायणप्रीत्यर्थंरविवारव्रतांगत्वेनपूजनमहंकरिष्ये गणपतिस्मरणपूर्वकंकलशादिपूजनमहंकरिष्ये
ताम्रपात्रेरक्तचंदनेनअष्टदलंकृत्वा तत्रदेवंपूजयेत् तेजोरूपंसहस्रांशुंसप्ताश्वरथवाहनं द्विभुजंवरदंपद्मलांछनंसर्वकामदं
ध्यानं आगच्छभगवन्सूर्यमंडलेचस्थिरोभव यावत्पूजासमाप्येततावत्त्वंसन्निधौभव आवाहनं हेमासनंमहादिव्यंनानारत्न

विभूषितं दत्तंमेगृह्यतांदेवदिवाकरनमोस्तुते आसनंस॰ गंगाजलसमानीतंपरमंपावनंमहत् पाद्यंगृहाणदेवेशधामरूपनमोस्तुते
पाद्यंसम॰ भोभोसूर्यमहद्रूपब्रह्मविष्णुस्वरूपिणे अर्घ्यमंजलिनादत्तंगृहाणपरमेश्वर अर्घ्यंस॰ गंगादितीर्थजंतोयंजातिपुष्पै-
श्ववासितं ताम्रपात्रेस्थितंदिव्यंगृहाणाचमनीयकं आचमनं॰ जान्हवीजलमत्यंतंपवित्रकरणंपरं स्नानार्थंचमयानीतंस्नानंकुरु
जगत्पते मलापकर्षस्नां॰ पयोदधिघृतैश्चैवशर्करामधुसंयुतैः कृतंमयाचस्नपनंप्रीयतांपरमेश्वरः पंचामृतस्नानं॰ गंगागोदावरीचैवय
मुनाचसरस्वती नर्मदासिंधुकावेरीताभ्यःस्नानार्थमाहृतं स्नानं आचमनं॰ रक्तपट्टयुगंदेवसूक्ष्मतंतुविनिर्मितं मृदुंचैवमयादत्तंगृह्य
णकमलाकर वस्त्रं॰ नमःकमलहस्तायविश्वरूपायतेनमः उपवीतंमयादत्तंगृहाणदिवाकर उपवीतं॰ कुंकुमागरुकस्तूरिरक्तगंधैश्चं
दनादिभिः रक्तचंदनसंयुक्तंतुगंधंगृण्हप्रभाकर गंधं जपाकदंबकुसुमरक्तोत्पलयुतानिच पुष्पाणिगृह्यतांदेवसर्वकामप्रदोभव पुष्पा
णि रक्तचंदनसंमिश्राअक्षताश्चसुशोभनाः मयादत्तागृहाणत्वंवरदोभवभास्कर अक्षतान् आर्द्राक्षतान्प्रगृह्य अंगपूजा॰
ॐमित्रायनमः पादौपू॰ रवयेनमः जंघेपू॰ सूर्याय॰ जानुनीपू॰ खगाय॰ ऊरूपू॰ पूष्णेन॰ गुह्यंपू॰ हिरण्यगर्भाय॰ कटीपू॰ मरीचये॰ना
भिंपू॰ आदित्याय॰ जठरंपू॰ सवित्रे॰ हृदयंपू॰ अर्काय॰ स्तनौपू॰ भास्कराय॰ कंठं॰ अर्यम्णेन॰ स्कंधौपू॰ भास्कराय॰ हस्तौपू॰ अहस्कराय॰
मुखंपू॰ ब्रध्नेनमः नासिकांपू॰ जगदेकचक्षुषे॰ नेत्रेपू॰ सवित्रेन॰ कर्णौपू॰ त्रिगुणात्मधारिणेन॰ ललाटंपू॰ विरिंचिनाराय॰शिरःपू॰ तिमिर
नाशिने॰ सर्वांगंपू॰ दशांगगुग्गुलोद्भूतः कालागरुसमन्वितः आघ्रेयःसर्वदेवानांधूपोयंप्रतिगृह्यताम् धूपं॰ कार्पासवर्त्तिकायुक्तंगोघृ
तेनसमन्वितं दीपंगृहाणदेवेशत्रैलोक्यतिमिरापहम् दीपं॰ पायसंघृतसंयुक्तंनानापक्वान्नसंयुतं नैवेद्यंचमयादत्तंशांतिंकुरुजगत्प
ते नैवेद्यंस॰ कर्पूरवासितंतोयंमंदाकिन्याःसमाहृतम् आचम्यतांजगन्नाथमयादत्तंहिभक्तितः आचमनं॰ मलयाचलसंभूतंकर्पू
रेणसमन्वितं करोद्वर्तनकंचारुगृह्यतांजगतःपते करोद्वर्तनं॰ इदंफलंमयादेवस्थापितंपुरतस्तव तेनमेसफलावाप्तिर्भवेज्जन्मनिजन्म
नि फलं॰ एलालवंगकर्पूरखदिरैश्चसपूगकैः नागवल्लीदलैर्युक्तंतांबूलंप्रतिगृह्यतां तांबूलं दक्षिणाकांचनीदेवस्थापितातव

तवाग्रतः गृहाणत्वंसुखोभूत्वाप्रभाकरनमोस्तुते दक्षिणां० पंचवर्त्तिसमायुक्तंसर्वमंगलदायकं नीराजनंगृहाणेदंसर्वसौख्यक
रोभव नीराजनं यानिकानिचपापानिजन्मांतरकृतानिच विलयंयांतितानीह प्रदक्षिणपदेपदे प्रदक्षिणाः नमःपंकजहस्तायन-
मःपंकजमालिने नमःपंकजनेत्रायभास्करायनमोनमः नमस्कारः तंदुलैःपूरितंपात्रंहिरण्येनसमन्वितं रक्तवस्त्रयुगंचैवब्राह्मणा
यनिवेदयेत् वायनं यस्योदयेस्याज्जगतःप्रबोधोयःकर्मसाक्षीभुवनस्यगोप्ता कुष्ठादिकव्याधिविनाशकोयःसभास्करोमेदुरितंनि
हन्यात् इतिप्रार्थयेत् अथकथा मांधातोवाच भगवन्ज्ञानिनांश्रेष्ठकथयस्वप्रसादतः त्वद्वक्त्राच्छ्रोतुमिच्छामिव्रतंपापप्र
णाशनं सर्वकामप्रदंचैवसर्वामंगलनाशनम् पूजार्घ्यदानसहितंनैवेद्यप्राशनान्वितम् एतत्कथयसर्वस्वंप्रसन्नोसियदिद्विज
वसिष्ठउवा० शृणुराजन्प्रवक्ष्यामियद्व्रतंव्रतमुत्तमम् सर्वकामप्रदंपुंसांकुष्ठादिव्याधिनाशनम् मानोत्कृष्टिकरंराजन्भुक्ति
मुक्तिप्रदायकं यस्योदयेसुरगणामुनिसंघाःसचारणाः दैत्यादानवयक्षाश्चकुर्वंतिसततार्चनम् यस्योदयेनुसर्वेषांप्रबोधोनृ
पसत्तम तस्यदेवस्यवक्ष्यामिव्रतराजंसविस्तरं पूजार्घ्यप्राशनंदानंनैवेद्यंशृणुतत्त्वतः सर्वतीर्थेषुयत्पुण्यंसर्वयज्ञेषुतत्फलं स
र्वदानेनतपसायत्पुण्यंसमवाप्यते प्रातःस्नानेनयत्पुण्यंतत्पुण्यंरविवासरे मार्गशीर्षादिमासेषुद्वादशस्वपिभूपते सूर्यव्र
तंकरिष्यामियावद्वर्षंदिवाकर व्रतंसंपूर्णतांयातुत्वत्प्रसादात्प्रभाकर नियममंत्रः ततःप्रातःसमुत्थायनद्यादौविमले
जले स्नात्वासंतर्पयेद्देवान्पितॄंश्चवसुधाधिप उपलिप्यशुचौदेशेसूर्यंतत्रसमर्चयेत् विलिखेत्तत्रपद्मंतुरंगैर्द्वादशवर्ण
कैः ताम्रपात्रेतथापद्मंरक्तचंदनवारिणा विलिखेत्सरयाभक्त्यासर्वसंतुष्टिकारकं ततःसंपूजयेद्देवंदिननाथंसुरेश्वरम्
मांधातोवाच द्वादशेष्वपिमासेषुकेकेदेवाःप्रकीर्तिताः कथंपूज्याश्चनेतेपितद्वदस्वममप्रभो वसिष्ठउवाच मासेमासे
चयेराजन्विशेषास्तान्शृणुष्ववै मार्गशीर्षेयजेन्मित्रंनारीकेरार्घ्यमुत्तमम् नैवेद्येतंडुलादयाःसाज्याश्चगुडसंयुताः पत्र
त्रयंतुलस्यास्तुप्राश्यतिष्ठेज्जितेंद्रियः दद्याद्विप्रायभोज्यंतुदक्षिणासहितंनृप पौषेविष्णुंसमभ्यर्च्यनैवेद्येकृसरंतथा

बीजपूरेणचैवार्घ्यंघृतंप्राश्य पलत्रयम् दद्याद्घृतंतुविप्राय भोजनेनसमन्वितम् माघेत्यरुणनामानंसंपूज्याज्यंतिलान्गुडं नैवे
द्येत्वर्घ्यमध्येतुदद्याद्बृहतीफलम् द्विजातयेचदद्याद्वैभोजनंचसदक्षिणं मुष्टित्रयंतिलानांचप्राशयेन्नियतोव्रती फाल्गुनेसूर्यम
भ्यर्च्यनैवेद्येसघृतंदधि अर्घ्यंजंबीरसहितंदधिप्राश्यपलत्रयं दधितंडुलदानंचभोजनेससमुदाहृतं चैत्रेभानुंचसंपूज्यनैवेद्येघृतपू
रिकाः दाडिमीफलमर्घ्येचप्राश्यदुग्धंपलत्रयं विप्रायभोजनंदद्यात्मिष्टान्नंतुसदक्षिणं वैशाखेपतनःप्रोक्तोमाषान्नंसघृतंस्मृतं
अर्घ्यंदद्यात्तुद्राक्षाभिःप्राशनेगोमयंस्मृतम् कुर्यान्माषान्नदानंचसघृतंवैसदक्षिणम् ज्येष्ठेइंद्रंयजेद्राजन्नैवेद्येतुकरंभकम् अर्घ्यं
चसहकारेणप्राश्यांबुत्वंजलित्रयम् दध्योदनसमायुक्तंभोजनंब्राह्मणायच आषाढेरविमभ्यर्च्यनैवेद्येमध्वनुत्तमम् विप्रायभो
जनंदद्यान्प्राशयेन्मरिचत्रयं गभस्तिश्श्रावणेभ्यर्च्यनैवेद्येसकुपूरिकाः अर्घ्यंदानेचहिप्रोक्तंत्रपुसीफलमेवच मुष्टित्रयंचसक्तूनांप्रा
शनेसमुदाहृतम् विप्रायभोजनंदद्याद्दक्षिणासहितंनृप यमोभाद्रपदेपूज्योनैवेद्येसाज्यमोदनं गोमूत्रप्राशनंह्युक्तंब्राह्मणान्भोज
येत्तथा हिरण्यरेताआश्विनेचनैवेद्येशर्करास्मृता दाडिमेनार्घ्यदानंतुप्राश्यखंडपलत्रयं विप्रायपरयाभक्त्याभोजनंखंडपायसं
दिवाकरःकार्तिकेचनैवेद्येपायसंस्मृतम् रंभाफलेनार्घ्यदानंपायसंप्राशनेस्मृतं पायसैर्भोजयेद्विप्रान्दद्यात्तांबूलदक्षिणे एवंव्रतंसमा
प्यैतत्तनउद्यापनंचरेत् ततोगुरुगृहंगत्वागृण्हीयाच्चरणांबुजे उद्यापनंकरिष्येहमागच्छममवेश्मनि माषकेणसुवर्णेनप्रतिमांकारये
द्रवेः पीठंरौप्यमयंकार्यंसर्वोपस्करसंयुतम् कृत्वाद्वादशपत्रंतुकमलंरक्ततंडुलैः स्थापयेदव्रणंकुंभंपंचरत्नसमन्वितं तस्योपरिन्यसे
त्पात्रंताम्रंतंडुलपूरितं रक्तवस्त्रसमाच्छन्नंपुष्पमालादिवेष्टितं पंचामृतेनस्नपनमग्न्युत्तारणपूर्वकम् प्रतिष्ठांचततःकृत्वापूजांदे
वस्यकारयेत् चंदनैःकुंकुमैरन्यैर्विविधैःकालसंभवैः अखंडपट्टवस्त्रैश्चकमंडलुसुपानहौ वर्द्धनीत्रितयंतत्रस्थापयेद्देवसन्निधौ
संज्ञायावस्त्रयुग्मंचकौसुंभंतुमहीपते प्रतिपात्रेषुसंपूज्यःसूर्योद्वादशनामभिः मित्रोविष्णवरुणोसूर्योभानुर्वैतपनस्तथा इंद्रोरवि
र्गभस्तिश्चशमनश्चतथास्मृतः हिरण्यरेतादिनकृत्पूज्याएतेप्रयत्नतः मध्येसहस्रकिरणःसंपूज्यःसंज्ञयासह पूगीफलैर्धूपदीपैर्नै

वेद्यैर्वस्त्रसंयुतैः नारिकेरेणचैवार्घ्यंदद्याद्देवायभक्तितः मंत्रेणानेनराजेंद्रव्रतस्यपरिपूर्तये नमःसहस्रकिरणसर्वव्याधिविनाशन
गृहाणार्घ्यंमयादत्तंसंज्ञयासहितोरवे आरार्तिकंततःकुर्यान्नमस्कारप्रदक्षिणाः पुष्पांजलिंततोदद्यात्संकल्पंकारयेत्ततः ब्राह्मणा
न्भोजयेद्भक्त्याभिष्टान्नैर्द्वादशप्रभो दंपत्योर्भोजनंदेयंपरमान्नसमन्वितम् ततस्तुदक्षिणादेयासमभ्यर्च्यस्रगादिभिः उपहारादित
त्सर्वंगुरवेप्रतिपादयेत् गुरुंतत्रैवसंतोष्यब्राह्मणांश्चविसर्जयेत् मंत्रहीनंक्रियाहीनंभक्तिहीनंतुयत्कृतं तत्सर्वंपूर्णतांयातुभूमिदेव
प्रसादतः अनुव्रज्यगुरून्विप्रान्भोजनंतुसमाचरेत् वृद्धैश्चबंधुभिःसार्द्धंनत्वादेवंदिवाकरं एवंयःकुरुतेमर्त्योवित्तशाठ्यविवर्जितः
सूर्यव्रतंमहाराजतस्यपुण्यफलंशृणु ब्राह्मणोलभतेविद्यांक्षत्रियोराज्यमाप्नुयात् वैश्यःसमृद्धिंविपुलांशूद्रःसुखमवाप्नुयात् अपुत्रो
लभतेपुत्रंकुमारीलभतेपतिं रोगार्त्तोमुच्यतेरोगाद्बद्धोमुच्येतबंधनात् यंयंचिंतयतेकामंतंतंप्राप्नोतिवैध्रुवम् यइदंशृणुयाद्भक्त्या-
ह्येकचित्तेनवैनृप सर्वकामानवाप्नोतिप्रसादाद्भास्करस्यवै इतिभविष्यो०रविवारकथासमाप्ता अथआश्विनादिरविवारेषुआ
शादित्यव्रतम् मासपक्षाद्युल्लिख्यममसमस्तरोगनिरासार्थंआयुष्यादिसकलकामनासिद्ध्यर्थंद्वादशवर्षपर्यंतंएकवर्षपर्यंतंवाश्री
सूर्यनारायणप्रीत्यर्थंआशादित्यव्रतंकरिष्ये इतिसंकल्प्य कलशाराधनंआसनबंधादिकृत्वासूर्यंपूजयेत् ताम्रेणकारयेत्पीठं
रथंरौप्यमयंतथा भास्करंपूजयेत्तत्रसुवर्णेनतुकारितम् नारदउवाच भगवन्श्रोतुमिच्छामिव्रतानामुत्तमंव्रतम् सर्वरोगप्रश
मनमाशादित्यस्यव्रतंशुभम् स्कंदउवाच शृणुनारदगुह्यंतदादित्याराधनंपरं यत्कृत्वासर्वकामानांसकलंफलमाप्नुयात् समु
द्रतीरेविप्रेंद्रपुरीद्वारवतीशुभा वासुदेवेयदुश्रेष्ठेपुण्येराज्यंप्रशासति दुर्वासाआगमत्तत्रकृष्णादर्शनलालसः कृष्णेनपूजितःसोपि
ह्यर्घ्यपाद्यासनादिभिः भोजनंतस्यवैदत्तंयथाविभवसारतः संपूजितःसकृष्णेनयावद्गच्छत्यसौमुनिः सांबेनहसितस्तत्रसुतेनस
हसाकिल क्रुद्धोपिमुनिशार्दूलःकोपंसंहृतवान्स्वयम् पूजितेनमयेदानीमन्यत्कर्तुंकथंक्षमं सगत्वानारदंप्राहसांबेनहसितोस्मि
प्रभो सभांसंचरतःकार्यंतस्यशिक्षापनंत्वया इत्युक्तोनारदःप्रायाद्द्वारकांकृष्णासंन्निधौ स्वकंसैन्यंदर्शयस्वममदेवकिनंदन देवया-

ऽभिषेकंकृत्वाहस्त्यश्वरथसंकुलं नारदेनैवमुक्तस्तु तथैवकृतवान्विभुः दर्शितेतुबलेप्राहनात्रसांबःप्रदृश्यते मयैवानीयतेशीघ्रं द्वारवत्यास्तवांकितं गत्वैवमुक्तोमुनिनाश्रेष्ठोजांबवतीसुतः सशृंगारस्तथानीतोमकरध्वजदर्शनः गत्वालिंग्यचुचुंबुस्तंगोप्यःकृष्णपरिग्रहाः नारदःप्राहभगवन्दुश्चरित्रंतथानघ क्रुद्धेनशौरिणाप्रोक्तःकुष्ठीभवनराधम एवमुक्तस्तथापुत्रःकुष्ठरोगातुरोभवत् सांबःप्रणाम्याहपितःकिमर्थंशापितस्त्वया स्वशक्तिज्ञानदृष्ट्यातुविचार्यतुविनिश्चितं ध्यानाद्दुर्वाससोज्ञात्वाविक्रियाह्यत्रकारणं अनुग्रहोमयापुत्रकार्यस्तेस्वस्तयेशुचौ आदित्यस्यव्रतंचैवकुरुकुष्ठविनाशनं सांबउवाच कथंतातमयाकार्यंव्रतंसर्वफलप्रदं किंविधानंतुकेविप्राःकिंदानंकस्यपूजनं कृष्णउवाच मासमाश्वयुजंप्राप्ययदारविदिनंभवेत् तदाव्रतमिदंग्राह्यंनरैस्त्रीभिर्विशेषतः यावत्संवत्सरंतावद्विधिनानेनपुत्रक गोमयेनक्षितौकुर्यान्मंडलंवर्तुलंपुनः रक्तचंदनपुष्पैश्चयुक्तंतत्रसहाक्षतं मंत्रेणानेनसांबत्वमर्घ्यंदेहिरविंप्रति यथाशाविमलाःसर्वाःसूर्यभास्करभानुभिः तथाशासफलामर्घ्यंकुरुनित्यंममार्घ्यतः अर्घ्यमंत्रः एवंतमर्चयेत्तावद्यावद्वर्षंसमाप्यते समाप्तेतुव्रतेवत्सकुर्यादुद्यापनंशुभं गोमयेनानुलिप्तायांभूमौमंडलमालिखेत् रक्तचंदनरेखाभिःकुंकुमेनविशेषतः तन्मध्येकारयेत्पद्मंद्वादशारंसकर्णिकं सिंदूरपूरितदलंजपाकुसुमशोभितम् तन्मध्येस्थापयेत्कुंभंप्रवालांकुरसंयुतम् शालीतंडुलसंपूर्णंशर्कराचंदनान्वितं तस्योपरिन्यसेत्पात्रंताम्रंशक्त्याविनिर्मितं सौवर्णंभास्करंकृत्वापद्महस्तंस्वशक्तितः रक्तवस्त्रयुगोपेतंपात्रोपरिनिवेशयेत् पंचामृतेनस्नपनंरक्तपुष्पैश्चपूजयेत् धूपदीपैश्चनैवेद्यैःफलैःकालोद्भवैस्तथा पूजयेज्जगतामीशंयथाविभवसारतः अथांगपूजा ॐ सूर्यायनमःपादौपूजयामि अरुणाय॰जंघेपू॰माधवाय॰जानुनीपू॰धात्रेन॰ऊरूपू॰हरये॰कटीपू॰भर्गाय॰गुह्यंपू॰स्वर्णरेतसे॰नाभिंपू॰अन्नये॰जठरंपू॰दिवाकराय॰हृदयंपू॰तपनाय॰कंठंपू॰भानवे॰स्कंधौपू॰हंसाय॰हस्तौपू॰मित्राय॰मुखंपू॰रवये॰नासिकांपू॰खगाय॰नेत्रेपू॰पूष्णेन॰कर्णौपू॰हिरण्यगर्भाय॰ललाटंपू॰आदित्याय॰शिरःपू॰भास्कराय॰सर्वांगंपू॰ नमोनमः पापविनाशनायविश्वात्मनेसप्ततुरंगमाय सामर्ग्यजुर्धामनिधेविधानभवाब्धिपोतायनमःसवित्रे इतिप्रार्थना एवंसंपूजयेद्भानुंन

क्तंभुंजीतवाग्यतः आचार्यंपूजयित्वातुवस्त्रैराभरणैःशुभैः तस्मैतांप्रतिमांकुंभंसहिरण्यंचदापयेत् प्रीयतांभगवान्देवोममसंसार
तारकः ब्राह्मणान्भोजयेत्स्वादपूपैःपायसैःसह तेभ्यस्तुकलशान्दद्याद्यथाशक्त्यातुदक्षिणां एवंयःकुरुतेसम्यक्व्रतमेतदनुत्तमम्
आशादित्यमितिख्यातंतस्यपुण्यफलंमहत् निर्व्याधिश्चसतेजस्वीपुत्रपौत्रसमन्वितः भुक्त्वाचभोगान्विपुलानमरैरपिदुर्लभान् दे
हांतेरविसायुज्यंप्राप्नुयादुत्तमोत्तमं प्राप्स्यसेपरमामृद्धिंविमुक्तःकुष्ठरोगतः आशाभंगोनतस्यस्यात्कदाचिदपिजन्मनि एतस्मात्का
रणाद्वत्सकुरुष्वव्रतमुत्तमं एतच्छ्रुत्वावचःसांबःपित्राकृष्णेनभाषितं व्रतंचरित्वासंप्राप्तःसर्वसिद्धिंसुदुर्लभां यइदंशृणुयाद्भक्त्याश्रा
वयेद्वापिमानवः तावुभौपुण्यकर्माणौरविलोकमवाप्नुतः इतिश्रीस्कंदपुराणेआशादित्यव्रतंसंपूर्णम् अथआश्विनशुक्लांत्यभानु
वासरमारभ्यमाघशुक्लसप्तम्यावधिदानफलव्रतम् तत्रपूजा ध्येयःसदासवितृमंडलमध्यवर्तीनारायणःसरसिजासनसन्निवि
ष्टः केयूरवान्मकरकुंडवान्किरीटीहारीहिरण्मयवपुर्धृतशंखचक्रः इतिध्यानं जगन्नाथाय॰आवाह॰पद्मासनाय॰आसनं॰ग्र
हपतये॰पाद्यं॰तमोहर्त्रे॰अर्घ्यं॰मित्राय॰आचमनीयं॰विश्वतेजसे॰पंचामृतं॰सवित्रे॰शुद्धोदकं॰जगसतये॰वस्त्रं॰त्रिमूर्तये॰यज्ञो
पवीतं॰हरये॰गंधं॰सूर्याय॰अक्षता॰भास्कराय॰पुष्पं॰अहस्पतये॰धूपं॰अज्ञाननाशिने॰दीपं॰लोकेशाय॰नैवेद्यं॰रवये॰तांबूलं॰
भानवे॰दक्षिणां॰पूष्णोन॰फलं॰खगाय॰नीराजनं॰भास्कराय॰पुष्पांजलिं॰सर्वात्मने॰प्रदक्षिणां॰ नमस्तेपद्महस्तायनमस्तेवेदमूर्त
ये नमस्तेदेवदेवेशनमस्तेसर्वकामद नमस्कारः दिवाकरनमस्तुभ्यंपापंनाशयभास्कर त्रयीमयायविश्वात्मन्गृहाणार्घ्यंनमोस्तु
ते अनेनद्वादशार्घ्याणिदद्यात् ततःब्राह्मणपूजनं इतिपूजा अथकथा पितृगृहेवर्तमानाकुंतीव्यासंददर्शह नमस्कृत्वातुतंभक्त्या
पाद्यार्घ्याचमनीयकं दत्वासंप्रार्थ्यतंव्यासंकुंतीसुकुलितांजलिः पतिपुत्रान्नमोक्षार्थंव्रतंब्रूहिमहामुने व्यासउवाच शृणुदानफ
लंनामवच्मिसर्वव्रतोत्तमम् कैलासशिखरेरम्येपार्वतीपरमेश्वरं व्रतानांसर्वदानानामुत्तमंब्रूहितत्वतः शंकरउवाच साधुपृष्टंत्व
यादेवित्वक्ष्यतेसर्वतःशुभं भूमौतुभारतेवर्षेपुण्येचयमुनातटे ऋषिपत्नीसमूहश्चव्रतंकर्तुंसमागतः तत्रगत्वादेविशृणुप्रवदिष्यंति

ताःशुभं शंभोरनुज्ञयादेवीकैलासादागताभुवि यमुनांगंतुकामासाददर्शकुसुमावतीं कांचिन्मार्गेतिदुःखेनक्लिश्यंतीं चविपुत्रकां विदेह
वासिनींदीनांपतिभ्रष्टांसुदुःखितां कुसुमावतींतदादेवीसुवाचमधुरंवचः आगच्छत्वंमयासार्द्धंकरिष्यावःशुभव्रतं पत्याचसहसंयो
गःपुत्रप्राप्तिर्भविष्यति धनप्राप्तिश्चबहुलाछूतेदानफलव्रते तयासहव्रतंह्येतत्कर्तुंप्राप्ताशुचिस्मिता तथैवचपतिभ्रष्टापुत्रहीनास्मि
दुःखिता इत्यन्याह्यवदद्देवींमयासहव्रतंकुरु तच्छ्रुत्वातांगृहीत्वातुताभ्यांसार्द्धंजगामह पुण्यांचयमुनांगत्वापूर्वाण्हेभानुवासरे त
त्रदृष्ट्वातुसादेवीपप्रच्छस्त्रीकदंबकं इदंव्रतंकिमेतन्मेवक्तव्यंतुऋषिस्त्रियः स्त्रियऊचुः पुण्यंव्रतमिदंदेविसौरंपापप्रणाशनम् स
र्वसंपत्करंस्त्रीणांपतिपुत्रान्नमोक्षदम् धर्मार्थकाममोक्षादीन्ददातीदंव्रतंनृणां कन्यादानसहस्राणांगोदानानांत्रिलक्षणं भूहिर-
ण्यतिलादीनांसर्वेषामधिकंशिवम् सर्वदानस्यफलदंतस्माद्दानफलव्रतं तच्छ्रुत्वापार्वतीप्राहकरिष्यामोवयंव्रतम् स्त्रियऊचुः
पद्मासनःपद्मकरःपद्मगर्भःसमद्युतिः सप्ताश्वरथसंयुक्तोद्विभुजश्चसदारविः ध्येयःसदासवितृमंडल० चक्रः एवंध्यात्वाद्विजःस
म्यक्भास्करंदेवरूपिणं आवाहयेज्जगन्नाथंभास्करंवेदरूपिणं नमःपद्मासनायेतिदद्यादासनमुत्तमम् पाद्यंगृहपतेतुभ्यंमित्राया
चमनंतथा त्रैलोक्यांधतमोहर्त्रेअर्घ्यंदद्यात्प्रयत्नतः पंचामृतविधानेनस्नापयेद्विश्वतेजसं शुद्धोदकंचदद्याद्वैसवित्रेचहिपार्वति जग
त्पतिंतुवस्त्रंचह्युपवीतंत्रिमूर्तये रक्तगंधंतुहरये दद्यात्सूर्यायचाक्षतान् दद्यात्पुष्पंभास्करायकरवीरादिकंशुभं अहस्पतिंतुवेधूपं
दीपमज्ञाननाशिने लोकेशायचनैवेद्यंतांबूलंरवयेतथा दक्षिणांभानवेदद्यात्संचार्तिक्यंखगायच फलंचपूष्णेदद्याद्वैसर्वकामा
र्थसिद्धये पुष्पांजलिंभास्करायदद्याद्वैपरयामुदा सर्वात्मनेचदद्याद्वैप्रदक्षिणाःपुनःपुनः नमस्तेदेवदेवेशनमस्तेवेदमूर्तये नमःकमलह
स्तायआदित्यायनमोनमः नमस्कुर्यादनेनैवप्रार्थयेद्विश्वतेजसं रक्तगंधाक्षतैस्ताम्रपात्रेणार्घ्यंसमंत्रकं दद्यादनेनमंत्रेणव्रतसंपूर्तिहेत
वे दिवाकरनमस्तुभ्यंपापंनाशयभास्कर त्रयीमयार्कविश्वात्मन्गृहाणार्घ्यंनमोस्तुते एवंद्वादशवारंचव्रतीदद्यात्समंत्रकं तैलाम्लल
वणक्षारंवर्जयित्वातुभोजने बहुबीजफलंवर्ज्यंशेषंचैवतुभोजयेत् कंदमूलफलाहारोविशेषेणफलप्रदः नीवारधान्यदध्यादिविशे

षःसद्रसःस्मृतः एवंकुर्याद्व्रतंसम्यक्प्रत्येकेभानुवासरे माघमासेशुक्लपक्षेसप्तम्यायावदंतिकं षष्ठ्यासुपोष्यविधिवत्सप्तम्यामुदयेरवेः
रवेरभ्यर्च्यविधिवत्प्रतिमांवस्त्रसंयुतां आचार्येणाग्निमादायगोमयेनोपलिप्यच सघृतंपरमान्नंचहोमयेत्सौरमंत्रतः पायसंप्रतिमांवस्त्रं
ब्राह्मणायनिवेदयेत् एवंकुर्यात्पंचवर्षपंचधान्यंसमर्पयेत् पंचप्रस्थप्रमाणंचप्रथमेव्रीहिमेवच गोधूमांश्चद्वितीयेब्देतृतीयेचणकांस्तथा
चतुर्थेतिलदानंचपंचमेमाषमेवच सफलांदक्षिणांदद्याद्विप्रान्द्वादशभोजयेत् एवंकुर्याद्व्रतंसम्यक्संपूर्णफलमाप्नुयात् तच्छ्रुत्वातागृही
त्वाथचक्रिरेव्रतमुत्तमम् पद्मावतीपतिंप्राप्यदमयंतीयथानलम् सुमित्राप्राप्यपुत्रंचमानयंतीह्युमांबहु सर्वभाग्ययुतागौरीस्वर्णमाधू
फलंतथा तद्गृहीत्वागतामार्गेददर्शब्राह्मणोत्तमं विप्रायतत्फलंदत्वाततःशिवपुरंययौ ततःसफलविप्रश्चगृहंगत्वासविस्मयः धनधान्य
समृद्धंरम्यबहुगोधनसंकुलः सर्वरत्नमयोभूत्वाभार्यांवचनमब्रवीत् सर्वसंपत्प्रदंचाद्यकिंकृतंहित्वयाशुभम् साब्रवीद्भगवन्स्वामिन्-
भवद्भिःफलमाहृतं स्वर्णमाधूफलंतच्चकेनदत्तंवदप्रभो महादेव्याफलंदत्तंपार्वत्याकृपयामम इतितस्यवचःश्रुत्वाभार्यावचनमब्रवीत्
गंतव्यमाशुकैलासंमयासार्द्धंत्वयाप्रभो ततःशिवपुरंप्राप्तोभार्ययासंयुतोद्विजः नमस्कृत्ययथाभक्त्या[illegible]च्छेवंशिवांद्विजः तत्फलंक-
थ्यतांदेविकथंप्राप्यंत्वयाशुभं ततोदेव्याचतत्सर्वंकथितंफलदायकं तदागत्यकृतंसर्वंतूर्णंदानफलव्र[illegible] कुतित्वयापिकर्तव्यमिदंदान
फलव्रतम् यःपठेदिदमाख्यानंशृणोतिश्रद्धयान्वितः तेसर्वेपापनिर्मुक्तायास्यंतिपरमांगतिं इतिश्रीस्कंदपुराणे॰दानफलव्रतंसंपू
र्णम् अथसोमवारपूजाविधिः येभ्योमातेतिजपित्वा आगमार्थंतु॰ घंटानादंकृत्वा अपसर्पंत्विति छोटिकामुद्रां तीक्ष्णदंष्ट्रेतिक्षेत्र
पालंसंप्रार्थ्य आचम्यप्राणानायम्यतिथ्यादिसंकीर्त्य ममसकुटुंबस्यक्षेमस्थैर्यविजयायुरारोग्यैश्वर्याभिवृद्ध्येउमामहेश्वर-
प्रीत्यर्थंचतुर्दशवर्षपर्यंतंसोमवारव्रतंकरिष्ये तदंगत्वेन षोडशोपचारैःउमामहेश्वरपूजनंकरिष्ये ध्यायेन्नित्यंमहेशंरजतगिरिनिभं
चारुचंद्रावतंसंरत्नाकल्पोज्ज्वलांगंपरशुमृगवराभीतिहस्तंप्रसन्नं पद्मासीनंसमंतात्स्तुतममरगणैर्व्याघ्रकृत्तिंवसानंविश्वाद्यंविश्ववं
द्यंनिखिलभयहरंपंचवक्त्रंत्रिनेत्रम् ध्यानं ॐनमःशिवायेति षोडशोपचारैःपूजयेत् अथकथा सूतउवाच नित्यानंदमयंशांतंनि

र्विकल्पंनिरामयं शिवतत्त्वमनाद्यंतंयेविदुस्तेपरंगताः विरक्ताःकामभोगेभ्योयेचकुर्वंत्यहैतुकीं भक्तिंपरांशिवेधीरास्तेषांमुक्तिर्नसंश
यः विषयानभिसंधाययेकुर्वंतिशिवेरतिं विषयैर्नाभिभूयंतेभुंजानास्तत्फलान्यपि येनकेनापिभावेनशिवभक्तियुतोनरः नविनश्यति
यात्येवकालेनापिपरांगतिं आरुरुक्षुःपरंस्थानंविषयांस्त्यक्तुमक्षमः पूजयेत्कर्मणाशंभुंभोगांतेशिवमाप्नुयात् अशक्ताःकेचिदुत्स्रष्टुं
भायोविषयवासनां अतःकर्ममयानूक्ताकामधेनुःशरीरिणा मायामयेपिसंसारेयेविहृत्यचिरंसुखं मुक्तिमिच्छंतिदेहांतेतेषांधर्मोयं
मीरितः शिवपूजासदालोकेहेतुःस्वर्गापवर्गयोः सोमवारेविशेषेणप्रदोषादिगुणान्विते श्रावणेचैत्रवैशाखेऊर्जेवामार्गशीर्षके प्रथमे
सोमवारेतद्गृह्णीयाद्व्रतमुत्तमं केवलंचापियेकुर्युःसोमवारेशिवार्चनं नतेषांविद्यतेकिंचिदिहामुत्रचदुर्लभं उपोषितःशुचिर्भूत्वासोमवा
रेजितेंद्रियः वैदिकैर्लौकिकैर्मंत्रैर्विधिवत्पूजयेच्छिवं ब्रह्मचारीगृहस्थोवाकन्यावापिसभर्तृका विधवावापिसंपूज्यलभतेवरमीप्सितं
अत्रापिकथयिष्यामिकथांश्रोतृमनोहरां श्रुत्वामुक्तिंप्रयात्येवभक्तिर्भवतिशांभवी श्रुत्वाहृतधियःशंभोर्भक्तिंकुर्वंतिसर्वदा आर्या
वर्त्तेनृपःकश्चिदासीद्धर्मभृतांवरः चित्रधर्मेतिविख्यातोधर्मराजोदुरात्मनां सगोप्ताधर्मसेतूनांशास्तादुष्पथगामिनां यष्टासमस्त
यज्ञानांत्राताशरणमिच्छतां कर्तासकलपुण्यानांदातासकलसंपदां जेतासपत्नवृंदानांभक्तःशिवमुकुंदयोः सोनुकूलासुपत्नीषु
पुत्रमेकंनलब्धवान् चिरेणप्रार्थितोलेभेकन्यामेकांवराननां सलब्ध्वातनयांदिष्ट्याहिमवानिवपार्वतीं आत्मानंदेवसदृशंसंपूर्णंच
मनोरथम् सएकदाजातकलक्षणज्ञानाहूयसर्वान्द्विजवृंदमुख्यान् कौतूहलेनाभिविनिष्टचेताःपप्रच्छकन्याजननेफलानि अथत-
त्राब्रवीदेकोबहुज्ञोद्विजसत्तमः एषासीमंतिनीनाम्नाकन्यातवमहीपते उमेवमांगल्यवतीदमयंतीवरूपिणी भारतीकपिलाभिज्ञा
लक्ष्मीरिवमहागुणा स्वप्रजादेवमातेवजानकीवधृतव्रता रविप्रभेवसत्कांतिश्चंद्रिकेवमनोरमा दशवर्षसहस्राणिसहभर्त्राप्रमो
दते प्रसूयतनयानष्टौपरंसुखमवाप्स्यति इत्युक्तवंतंनृपतिर्धनैःसंपूज्यतंद्विजं अवापपरमांप्रीतिंतद्वागमृतसेवया अथान्योपि
द्विजःप्राहधैर्यवानविशंकितः एषाचतुर्दशेवर्षेवैधव्यंप्रतिपत्स्यति इत्याकर्ण्यवचस्तस्यवज्रनिर्घातविधुरं मुहूर्तमभवद्राजाचिं

ताव्याकुलमानसः अथसर्वान्समुत्सृज्यब्राह्मणान्ब्रह्मवत्सलः सर्वंदैवकृतंमत्वानिश्चितःप्रार्थितोभवेत् सापिसीमंतिनीबालाक्रमेणागतशैशवा वैधव्यमात्मनोभाविसुश्रावात्मसखीमुखात् परंनिर्वेदमापन्नाचिंतयामासबालिका याज्ञवल्क्यमुनेःपत्नींमैत्रेयींपर्यपृच्छत मानसत्वच्चरणांभोजंप्रपन्नास्मिभयाकुला सौभाग्यवर्धनकरंममशंसितुमर्हसि इतिप्रपन्नांनृपतेःकन्यांप्राहमुनेःसती शरणंव्रजतन्वंगिपार्वतींशिवसंयुतां सोमवारेशिवंगौरींपूजयस्वसमाहिता उपोषिताचसुस्नाताविरजांबरधारिणी मितवाक्निश्चलमतिःपूजांकृत्वायथोचितां अब्दमेकंव्रतंकुर्याद्व्रतोद्यापनमाचरेत् उमयासहितंरुद्रंसुवर्णेनचकारयेत् रौप्येणवृषभंकृत्वाकलशोपरिविन्यसेत् तस्याग्रेलिंगतोभद्रंब्रह्माद्यास्थापनंतथा स्वशाखोक्तेनविधिनाहुनेद्घृततिलोदनं पृथक्शिवशिवामंत्रैरष्टोत्तरशतद्वयम् कुर्यादुद्यापनंतस्यसमासोयदुदीरितं उद्यापनंविनायत्तुनद्व्रतंनिष्फलंभवेत् ब्राह्मणान्भोजयित्वाथशिवंसम्यक्प्रसादय पापक्षयोभिषेकेणसाम्राज्यंपीठपूजनात् गंधदानाच्चसौभाग्यमायुरक्षतदानतः धूपदानेनसौगंध्यंकांतिर्दीपप्रदानतः नैवेद्येनमहाभोगोलक्ष्मीस्ताम्बूलदानतः धर्मार्थकाममोक्षाश्चनमस्कारप्रसादतः अष्टैश्वर्यादिसिद्धीनांजपएवहिकारणं होमेनसर्वसौख्यानांसमृद्धिरुपजायते सर्वेषामेवदेवानांतुष्टिःसंयमिभोजनात् इत्थमाराधयशिवंसोमवारेशिवामपि अत्यापदमपिप्राप्तांनिस्तीर्यसुभगाभव घोरात्घोरंविपन्नापिमहाक्लेशभयानकं शिवपूजाप्रभावेनतरिष्यसिमहद्भयात् इत्थंसीमंतिनींसम्यक्अनुशास्यमुनेःसती ययौसापिवरारोहाराजपुत्रीतथाकरोत् दमयंत्यानलस्यासीदिंद्रसेनाह्वयःसुतः तस्यचंद्रांगदोनामपुत्रोभूच्चंद्रसंनिभः चित्रवर्मानृपःश्रेष्ठःसमाहूयनृपात्मजं कन्यांसीमंतिनींतस्मैप्रायच्छद्गुर्वनुज्ञया अभून्महोत्सवस्तत्रतस्यास्तूद्वाहकर्मणि यत्रसर्वमहीशानांसमुदायोमहानभूत् तस्याःपाणिग्रहंकालेकृत्वाचंद्रांगदःकृती उवासकतिचिन्मासान्तत्रैवश्वशुरालये एकदायमुनांतर्तुंसराजतनयोबली ममज्जसहकैवर्तैरावर्ताभिहतातरी हाहेतिशब्दःसुमहानासीत्तस्यास्तटद्वये पश्यतांसर्वसैन्यानांप्रलापोदिवमस्पृशत् तच्चसीमंतिनीश्रुत्वापपातभुविमूर्च्छिता इंद्रसेनोपिराजेंद्रःपुत्रवार्तांसुदुःसहां आबालवृद्धवनिताश्चुक्रुशुःशोकविह्वलाः साचसीमंतिनीसाध्वीभर्तृलोकमियासती पित्रानिषिद्धास्नेहेनवैधव्यंप्रतिपद्यत मुनिपत्न्योपदिष्टंयत्सोमवारव्रतंशुभम्

ततस्याजन्मशुभाचारावैधव्यंप्राप्तवत्यपि एवंचतुर्दशेवर्षेदुःखंप्राप्यसुदारुणम् ध्यायंत्याःशिवपादाब्जंवत्सरत्रयमत्यगात् ५० चंद्रांगदोपितद्भर्ता निमग्नोयमुनाजले अधोधोमज्जमानोसौददर्शोरगकामिनीः जलक्रीडानुसक्तास्ता दृष्ट्वाराजकुमारकं विस्मितास्तमधोनिन्युःपातालंपन्नगालयं सनीयमानस्तरसापन्नगीभिर्नृपात्मजः तक्षकस्यपुरंरम्यंविवेशपरमाद्भुतं सोपश्यद्राजतनयोमहेंद्रभवनोपमं नागकन्यासहस्रेणसमंतात्परिवारितं दृष्ट्वाराजसुतोधीरःप्रणिपत्यसभास्थले उत्थितःप्रांजलिस्तस्थौतेजसाक्षिप्तलोचनः नागराजोपितंदृष्ट्वाराजपुत्रंमनोरमं अथ पृष्टोराजपुत्रस्तक्षकेनमहात्मना कस्यासीत्तनयःकस्त्वंकोदेशःकथमागतः राजपुत्रउवाच अस्तिभूमंडलेकश्चिद्देशोनिषधसंज्ञकः तस्याधिपोभवद्राजानलोनाममहायशाः सपुण्यकीर्तिःक्षितिपोदमयंत्याःपतिःप्रभुः तस्यासीदिंद्रसेनाख्योपुत्रस्तस्यमहात्मनः चंद्रांगदोस्मिनाम्नाहंनवोढःश्वशुरालये विहरन्यमुनातोयेनिमग्नोदैवचोदितः एताभिःपन्नगस्त्रीभिरानीतोस्मितवांतिकं दृष्ट्वाहंतवपादाब्जंपुण्यैर्जन्मांतरार्जितैः अथधन्योस्मिधन्योस्मिकृतार्थौपितरौमम तक्षकउवाच भोभोनरेंद्रदायादमाभैषीर्धीरतांव्रज सर्वदेवेषुकोदेवोयुष्माभिःपूज्यतेसदा राजपुत्रउवाच योदेवःसर्वदेवेषुमहादेवइतिस्मृतः पूज्यतेसहिविश्वात्माशिवोस्माभिरुमापतिः इत्याकर्ण्यवचस्तस्यतक्षकःप्रीतमानसः जातभक्तिर्महादेवेराजपुत्रमभाषत तक्षकउवाच परितुष्टोस्मिभद्रंतेतवराजेंद्रनंदन दत्तवान्बहुरत्नानिदिव्यान्याभरणानिच वाहनायददावेकंराक्षसंपन्नगेश्वरः तत्साहय्यार्थमेकंचपन्नगेंद्रःकुमारकं नियुज्यतक्षकःप्रीत्यागच्छेतिविससर्जतं इति चंद्रांगदःसर्वंसंगृह्यविविधंधनं अश्वंकामगमारुह्यताभ्यांसहविनिर्ययौ ततोमुहूर्तेनोन्मज्यतस्मादेवनदीजलात् विजहारतटेरम्येदिव्यमारुह्यवाजिनं अथास्मिन्समयेतन्वीसाचसीमंतिनीसती स्नातुंसमाययौतत्रसखीभिःपरिवारिता साददर्शनदीतीरेविहरंतंनृपात्मजं रक्षसानररूपेणनागरूपेणचान्वितं दृष्ट्वावरुह्यतुरगादुपविष्टःसरित्तटे चंद्रांगदोवरारोहामुपवेश्येदमब्रवीत् कात्वंकस्यकलत्रंवा कस्यासीत्तनयासति किमीदृशंगताबाल्येदुःसहंशोकलक्षणं इतिस्नेहेनसंपृष्टासावधूरश्रुलोचना लज्जितास्वयमाख्यातुंतत्सखीसर्वमब्रवीत् इयंसीमंतिनीनाम्नास्नुषामगधभूपतेः चंद्रांगदस्यमहिषीतनयाचित्रवर्मणः अस्याःपतिर्दैवयोगान्निमग्नोस्मिन्महाजले

तेनेयंप्राप्तवैधव्याबालाद्दुःखेनपीडिता   एवंवर्षत्रयंनीतंशोकेनापिबलीयसा अद्येंदुवासरेप्राप्तेस्नातुमत्रसमागता श्रुत्वाचंद्रांगदःसर्वंप्रिया
याःशोककारणं अथाश्वास्यप्रियांतन्वींविविधैर्वचनैर्नृपः क्वापिलोकेमयादृष्टस्तवभर्तावराननेत्वद्भर्ताचरणाच्छ्रांतःसद्यएवागमिष्यति नाश
यिष्यतितेशोकंद्वित्रिरेवश्वंदिनैः एतच्छंसितुमायातस्तवभर्तुःसखास्म्यहं अत्रकार्योनसंदेहःशपामिशिवपादयोः तावत्त्वयाहृदिस्था
प्यंप्रकाश्यंनचकुत्रचित् लज्जानम्रमुखीकर्णेशशंसान्यत्प्रयोजनं इमंवृत्तांतमाख्यातंत्वत्पित्रोःशोकतप्तयोः इत्युक्त्वाश्वंसमारुह्यजगा
मचतलंप्रति सापितद्वचनंश्रुत्वाश्रुधाराशताधिकं एषएवपतिर्मेस्याद्ध्रुवंनान्योभविष्यति परलोकादिहायातःकथमेषःस्वरूपधृक्
मुनिपत्न्यायदुक्तंमेपरमापद्गतापिच व्रतमेतत्कुरुष्वेतितस्यवाफलमद्यमे नूनंतस्यावचःसत्यंकोविंद्यादीश्वरेहितं निमित्तानिचदृश्यंते
मंगलानिदिनेदिने प्रसन्नेपार्वतीनाथेकिमसाध्यंशरीरिणां इत्थंविमृश्यबहुधासापुनर्मुक्तसंशया एवंचंद्रांगदःपत्नीमवापसमयेशुभे य
यौस्वनगरींभूयःश्वशुरेणानुमोदितः चंद्रसेनोपिनृपतीराज्येस्थाप्यस्वमात्मजं तपसाशिवमाराध्यलेभेसंयमिनांगतिं दशवर्षसहस्रा-
णिसीमंतिन्यास्वभार्यया सार्द्धंचंद्रांगदोराजाबुभुजेविषयान्बहून् प्रसूयतनयानष्टौकन्यामेकांवरानना पतिंसीमंतिनीलेभेपूजयंती
महेश्वरं शिवलोकंततोगत्वाशिवेनसहमोदते विचित्रमिदमाख्यानंमयासमनुवर्णितं यःपठेच्छृणुयाद्भक्त्याप्राप्नोतिपरमांगतिम्   इ
तिश्रीस्कं॰सोमवारकथासमाप्ता   अथोद्यापनं   स्कंदउवाच   व्रतस्योद्यापनंकर्मकथंकार्यंचमानवैः कोविधिःकानिद्रव्याणिकथय
त्वममप्रभो   ईश्वरउवाच   शृणुषण्मुखयत्नेनलोकानांहितकाम्यया उद्यापनविधिंचैवकथयामितवाग्रतः यदासंजायतेवित्तंभक्तिः
श्रद्धासमन्विता सएवव्रतकालश्चयतोनित्यंहिजीवितं चतुर्दशाब्दंकर्तव्यंसोमवारव्रतंशुभम् श्रावणेकार्तिकेज्येष्ठेवैशाखेमार्गशीर्षके
सुस्नातश्चशुचिर्भूत्वाशुक्लांबरधरोनरः कामक्रोधाद्यहंकारद्वेषपैशून्यवर्जितः संपाद्यसर्वसंभारान्मंडलंतत्रकारयेत् वस्त्रैःपुष्पैःस
माच्छन्नंपट्टवस्त्रैश्चशोभितं तन्मध्येलेखयेद्दिव्यंलिंगतोभद्रमंडलं अथवासर्वतोभद्रंमंडपांतःप्रकल्पयेत् शोभोपशोभासंयुक्तंदीपैःस
र्वत्रसोज्ज्वलं अव्रणंसजलंकुंभंतस्योपरितुविन्यसेत् सौवर्णंराजतंताम्रंमृन्मयंवापिकारयेत् आचार्यंवरयेत्तत्रऋत्विग्भिःसहितंशुचिः

शिवरूपाश्चतेविप्रापूज्याश्चंदनपुष्पकैः अनुज्ञातश्चतैर्विप्रैःशिवपूजांसमारभेत् रुद्रनाम्नानमोंतेन ब्राह्मणानपिपूजयेत् कुंभोपरिन्यसेद्देवमुमयासहितंशुभम् उमामहेश्वरींमूर्तिंपूजयेद्वृषभेस्थितां वस्त्रयुग्मेनसंवेष्ट्यबिल्वपत्रैःप्रपूजयेत् स्वगृह्योक्तेनविधिनाकृत्वाग्निस्थापनंततः ततोहोमंचमंत्रेणत्र्यंबकेणचकारयेत् गौरीर्मिमायेतिमंत्रेणशतमष्टोत्तरद्वयम् पलाशानांसमिद्भिश्चयवव्रीहितिलाज्यकैः पूर्णाहुतिंततोदद्यात्कृत्वास्विष्टकृदादिकं होमांतेचगुरुंपूज्यसपत्नीकंसमाहितः प्रतिमांकुंभसहितामाचार्यायनिवेदयेत् शंभोप्रसीददेवेशसर्वलोकेश्वरप्रभो तवरूपप्रदानेनममसंतुमनोरथाः प्रतिमादानमंत्रः यद्गतत्त्वयादेवदेवेशमयाव्रतमिदंकृतं न्यूनंवाथक्रियाहीनंपरिपूर्णंतदस्तुमे भुंजीतसहधर्मात्माशिष्टैरिष्टै स्वबंधुभिः अनेनैवविधानेनयइदंव्रतमाचरेत् यंयंचिंतयतेकामंतंतंप्राप्नोतिमानवः हरलोकेसुखीभूयाद्भुक्त्वाभोगान्यथेप्सितान् इतिश्रीसोमवार०संपूर्णम् अथप्रकारांतरेणसोमवारव्रतंलिख्यते गंधर्वउवाच कथंसोमव्रतंकार्यंविधानंतस्यकीदृशम् कस्मिन्कालेतुकर्तव्यंसर्वंविस्तरतोवद गोशृंगउवाच साधुसाधुमहाप्राज्ञसर्वभूतोपकारक यत्नकस्यचिदाख्यातंतदद्यकथयामिते सर्वरोगहरंदिव्यंसर्वसिद्धिप्रदायकम् सोमवारव्रतंनामसर्वभूतोपकारकं सोमवारव्रतंनामसर्वकामफलप्रदं सार्वकामिकविज्ञेयंवर्णानांशुभकारकम् नारीनरैःसदाकार्यंदृष्टादृष्टफलोदये ब्रह्मविष्ण्वादिभिर्देवैःकृतमेतन्महाव्रतं पुनस्तत्सोमराजेनदक्षशापहतेनच अभिमानयुतेनाथशंभुनैवपरेणतु ततस्तुष्टोमहादेवःसोमराजस्यभक्तितः तेनोक्तंयदितुष्टोसितिष्ठात्रस्थोनिरंतरं यावच्चंद्रश्चसूर्यश्चयावत्तिष्ठंतिभूधराः तावन्मेस्थापितंलिंगमुमयासहतिष्ठतु रोहिण्याःपतिरेवंतुप्रार्थयित्वामहेश्वरं ततःशुद्धशरीरोसौगगनस्थोविराजते ततःप्रभृतियेकेचित्कुर्वंतिभुविमानवाः तेपितत्पदमायांतिविमलांगाश्चसोमवत् अत्रकिंबहुनोक्तेनविधानंतस्यकीर्तये यस्मिन्कस्मिंश्चिन्मासेचशुक्लेसोमोभवेद्यदा दंतशुद्धिंपुराब्राह्मेकृत्वास्नानंसमाचरेत् स्वधर्मविहितंकर्मकृत्वास्थानेमनोरमे अव्रणाभिनवंशुद्धंन्यसेत्कुंभंसुशोभनम् चूतपल्लवविन्यासेचंदनेनविचर्चिते श्वेतवस्त्रपरीधानेसर्वाभरणभूषिते कुंभेपात्रंचविन्यस्यह्याधारसहितंशिवं अष्टौविघ्नेश्वरान्देवान्सोमनाथंसशक्तिकं वाससासहितंतत्रश्वेतपुष्पैःप्रपूजयेत् विविधंप्र

स्यभोज्यंचफलंवैबीजपूरकं अनेनैवतुमंत्रेणपूजांहोमंसमाचरेत् कृत्वैवंवंदनंरात्रौप्राप्यचाज्ञांस्वपेन्नरः दर्भशय्यांसमारूढोध्यायेत्सोमेश्व
रंहरं एवंकृतेतुप्रथमेकुष्ठानांनाशनंभवेत् द्वितीयेसोमवारेतुकरंजंदंतधावनं देवंसंपूजयेत्सूक्ष्मंज्येष्ठाशक्तिसमन्वितं शतपत्रैःपूजयित्वाम
धुप्राश्ययथाविधि नारिंगंतत्रदत्वातुशेषंपूर्ववदाचरेत् एवंकृतेद्वितीयेथगोलक्षफलमाप्नुयात् सोमवारेतृतीयेथवटजंदंतधावनं शिवोत्तमं
यजेद्देवंरौद्रीशक्तिसमन्वितं पूजयेज्जातिपुष्पैश्चगोमूत्रंप्राशयेन्निशि नैवेद्यंदापयेच्छुद्धंभक्ष्यभोज्यसमन्वितं एवंकृतेतृतीयेतुकोटियज्ञ
फलंलभेत् चतुर्थेसोमवारेतुअपामार्गसमुद्भवैः कृत्वाकाष्ठैर्दंतशुद्धिंतथानक्तेभपूजयेत् दाडिमीफलसंयुक्तंनैवेद्येक्षीरशर्करा दभक्तमा
शनंकृत्वादर्भस्थोजागृयान्निशि एवंकृतेचतुर्थेतुयज्ञायुतफलंलभेत् पंचमेसोमवारेतुवृक्षाश्वत्थसमुद्भव दंतकाष्ठंततःकृत्वाह्येकरुद्रंप्र
पूजयेत् नैवेद्येदधिभक्तंचकूष्मांडीफलसंयुतं घृतंतुप्राशयेत्तत्रआचार्यंपूजयेत्ततः एवंकृतेपंचमेपिसप्तजन्मसमुद्भवैः ब्रह्महत्यादिभिः
सर्वैर्मुच्यतेपापराशिभिः सोमवारेपुनःषष्ठेनिर्गुंडीदंतधावनं त्रिमूर्तिंपूजयेद्देवंरक्तपुष्पैर्विधानतः देवींकलाविकरिणींफलपुष्पसमंडकैः
कुशोदकंतुसंप्राश्यगीतैर्नृत्यैश्चजागृयात् एवंकृतेततःषष्ठेषडब्दंचफलंलभेत् सप्तमेसोमवारेचप्लक्षजंदंतधावनं श्रीकंठंपूजयेद्देवंत
तःश्रीवृक्षपल्लवैः बलप्रमथिनींदेवींपूजयेच्चविधानतः विविधंभक्ष्यभोज्यंचनारिकेरसमन्वितम् दुग्धंवैप्राशयेत्तत्रशेषंपूर्ववदाचरेत्
सप्तसागरदानस्यसम्यगाप्तस्ययत्फलं सोमवारेसप्तमेतुकृतेतत्फलमाप्नुयात् अष्टमेसोमवारेथखादिरंदंतधावनम् सर्वभूतदमंना
यंपूजयेद्दैशिखंडिनम् सुगंधवृक्षकुसुमैर्यक्षकर्दमलेपनैः कदलीफलसंयुक्तंभक्ष्यंभोज्यंप्रदापयेत् गोमयंप्राशयेद्रात्रौजागरंतत्रका
रयेत् एवंकृतेष्टमेसोमेसंपूर्णफलमाप्नुयात् गंगास्नानेकृतेसोमेकोटिस्नानफलंस्मृतम् शतभारसहस्राणिकुरुक्षेत्रेरविग्रहे विप्रायवे
दविदुषेयद्दत्वाफलमाप्नुयात् तत्पुण्यंकोटिगुणितंसोमवारव्रतेकृते गजानांचशतेदत्तेलक्षेचरथवाजिनां तत्फलंकोटिगुणितंसोमवा
रकृतेव्रते गुग्गुलैर्धूपितंकृत्वाकोटिशोयत्फलंभवेत् तत्फलंतुभवेत्तस्यसोमवारव्रतेकृते सर्वैश्वर्यसमायुक्तःशिवतुल्यपराक्रमः रुद्रलोके
वसेद्दीर्घंब्रह्मणासहमोदते संप्राप्तेनवमेवारेकुर्यादुद्यापनंशुभम् यथाभवतिगंधर्वतथावक्ष्यामितेधुना मंडपेमंडनंकृत्वापताकाभिश्च

तोरणैः द्वाराणिच्चापिचत्वारिकुंडंकृत्वाविधानतः मध्येवेदीप्रकर्तव्याचतुरस्रासुशोभना निष्पाद्यमंडपंसम्यक्मध्येपद्मंचकल्पयेत् कलशानष्टदिग्भागेसहिरण्यान्पृथक्पृथक् स्थापयित्वाशक्तयस्तुवामाद्याःपूर्वतःक्रमात् कर्णिकायांतुविन्यस्यश्रीसोमेशंमहाप्रभुं प्रतिरूपंप्रसन्नायाजपाशक्तिसमन्वितः होमपात्रादिकेद्रव्येमधुनापरिपूरिते रुक्मशय्यास्थितंदेवंयत्रस्थंपूजयेत्क्रमात् गंधपुष्पैश्चनैवेद्यैर्भक्ष्यभोज्यैःपृथक्पृथक् वस्त्रालंकारतांबूलैश्छत्रच्चामरदर्पणैः दीपिकांचवितानंचपर्यंकंचसतूलकं सोमेश्वरंसमुद्दिश्यदेयंपौराणिकेगुरौ पूजयित्वातथाचार्यंहोमं तत्रैवकारयेत् देवस्यसंनिधौसम्यक्रात्रौजागरणंचरेत् पंचगव्यंततःपीत्वाध्यायेत्सोमेश्वरंहृदि प्रभातेथततःस्नात्वादेयागौश्चविधानतः ततोभक्त्यादिगंधर्वक्षीरखंडादिनिर्मितैः भक्ष्यभोज्यैरनेकैश्चभोजयेद्ब्राह्मणान्यतीन् अष्टौविघ्नेश्वरायेचतैश्चहोमंसमाचरेत्वस्त्रयुग्मंततोदत्वागांचदत्वाविसर्जयेत् एवंकृतेव्रतेसम्यक्लभतेपुण्यमक्षयम् धनधान्यसमायुक्तोपुत्रदारैःसमन्वितः नकुलेजायतेतस्यदरिद्रोदुःखितोपिवा अपुत्रोलभतेपुत्रंवंध्यापुत्रवतीभवेत् काकवंध्याचयानारीमृतपुत्राचदुर्भगा कन्याप्रसूतयाकार्यंरोगिभिश्चविशेषतः एवंकृतेविधानेतुदेहपातेशिवंव्रजेत् कल्पकोटिसहस्राणिकल्पकोटिशतानिच भुंक्तेसौविपुलान्भोगान्यावदाभूतसंप्लवं इत्येतत्कथितंसर्वंसोमवारव्रतंक्रमात् इतिश्रीस्कंदपुराणेसोमवारव्रतंसंपूर्णं अथएकभुक्तसोमवारव्रतंलिख्यते श्रावणेचैत्रवैशाखज्येष्ठेमार्गशिरेतथा प्रथमेसोमवारेचगृण्हीयाद्व्रतमुत्तमम् यदाश्रद्धाभवेत्कर्तुःसोमवारव्रतंप्रति तदाचार्यंपुरस्कृत्यश्रद्धाभक्तिसमन्वितः सुस्नातश्चशुचिर्भूत्वाशुक्लांबरधरोनरः कामक्रोधाद्यहंकारद्वेषपैशून्यवर्जितः आहरेच्छ्वेतपुष्पाणिमालतीकुसुमानिच श्वेतपद्मानिदिव्यानिचंपकानितथैवच कुंदमंदारजैःपुष्पैःपुन्नागशतपत्रकैः अर्चयेदुमयासार्द्धंशंकरंलोकशंकरं मलयाद्रिजधूपेनधूपयेत्पार्वतीपतिं कामिकेनापिमंत्रेणव्यापकेनमहेश्वरं पूजयेन्मूलमंत्रेणत्र्यंबकेणाथवापुनः भवायभवनाशायमहादेवायधीमते उग्रायउग्रनाशायशर्वायशशिमौलिने रुद्रायनीलकंठायशिवायभवहारिणे ईशानायनमस्तुभ्यंसर्वकामप्रदायच नमोदेवाधिदेवायसर्वांगेपूजयेद्विभुं एवंसंपूज्यदेवेशमुपचारैःपृथक्पृथक् यथावित्तानुसारेणभक्त्यापादौप्रपूजयेत् शंकरा

यनमोजंघेशिवायेतिचजानुनी शूलपाणेनमोगुल्फेकल्यांशंभुंप्रपूजयेत् गुह्यंस्वयंभुनामानंपूजयेत्पार्वतीपतिं ततोनमोमहादेवंपूजयेन्नाभिमंडले उदरेविश्वकर्तारंपार्श्वयोःसर्वतोमुखं स्थाणुंस्तनौचसंपूज्यनीलकंठंतुकंठके मुखंसंपूजयेन्नित्यंशिवनाम्नेमहात्मने त्रिनेत्रायचनेत्रायशिरस्सेनागभूषणे नमोदेवाधिदेवायसर्वांगेपूजयेद्विभुं एवंसंपूज्यदेवेशमुपहारैर्मनोरमैः यथावित्तानुसारेणतस्यपुण्यफलंशृणु सोमवारेर्च्चयंतोयेपार्वत्यासहशंकरं तेलभंत्यक्षयांल्लोकान्पुनरावृत्तिदुर्लभान् एकभक्तस्ययत्पुण्यंकथयामिसमासतः सप्तजमार्जितंपापमभेद्यंदेवदानवैः विनश्यत्येकभक्तेननात्रकार्याविचारणा एवंसंवत्सरंयावद्भक्त्याव्रतमिदंचरेत् यस्मिन्मासेप्रारभतेतस्मिन्मासिसमापयेत् उपवासेननैवायंसमाचरतिमानवः चिरंव्रतंप्रकुर्वीतछिन्नंसंपूर्णतांनयेत् खंडव्रतप्रभावेनतत्सर्वंनिष्फलंभवेत् उमामहेश्वरंहैमंवृषभेणसमन्वितं यथाशक्त्याप्रकर्त्तव्यंवित्तशाठ्यंनकारयेत् मंडलंकारयेद्दिव्यंतंतुलिंगोद्भवंशुभं कलशंपयसापूर्णंश्वेतवस्त्रसमन्वितं पात्रंशर्करयायुक्तंकुंभस्योपरिस्थापयेत् स्थापयेन्मंडलेदिव्यंकलशंकनकोज्ज्वलं तस्योपरिन्यसेद्देवंतत्वमंत्रविधानतः श्वेतवस्त्रयुगेनैवपूजयेत्परमेश्वरं उपवीतंसोत्तरीयंभक्ष्याणिविविधानिच धान्यानियान्यभीष्टानितानितानिप्रकल्पयेत् शय्यांसतूलामादर्शंदेवस्याग्रेप्रकल्पयेत् अथश्वेतानिपुष्पाणिदेवस्योपरिविन्यसेत् ततोहोमंप्रकुर्वीतशिवमंत्रेणवैव्रती पालाशाभिःसमिद्भिश्चजुहुयाच्छतमष्टकम् आप्यायस्वेतिमंत्रेणपृषदाज्याहुतीःशुभाः यवव्रीहितिलाज्येनऋत्विजश्चपृथक्पृथक् होमांतेचगुरुंपूज्यसपत्नीकंसमाहितः वस्त्रैराभरणैश्चापिगृहोपकरणादिभिः श्वेतागौःकपिलावापिसुशीलाचपयस्विनीसुवस्त्रवरपुच्छाचघंटाभरणभूषिता दक्षिणासहितोदेयाशिवःसंप्रीयतामिति ब्राह्मणान्भोजयेत्पश्चात्त्रयोदशसुशोभनान् घंटास्त्रयोदशादेयावंशपात्रंसमाहितः इदंपीठंगृहाणत्वंसर्वोपस्करसंयुतं सर्वंमेपरिपूर्णंस्याच्छिवोमेप्रीयतामिति इतिश्रीस्कं॰सोमवार॰संपूर्ण

अथोद्यापनं कैलासस्थंमहादेवमपर्णासहितंशिवं पप्रच्छप्रणतोभूत्वाकिंचिद्गुह्यतमंगुहः देवताखिलदेवेशसर्वभूतात्मकप्रभो त्वत्प्रसादान्मयापूर्वंविज्ञानंधर्मसाधनं किंचिज्ज्ञातव्यमस्त्यन्यत्त्वत्तएवमयाप्रभो यन्नदृष्टंश्रुतंवापितन्मेव्याख्यातुम

हेंसि किंदानंकिंतपस्तीर्थंकिंव्रतंवामहाफलं यस्मिन्कृतेमहाप्रीतिर्युवयोःस्यादुमेशयोः तन्मेत्वंपुत्रवात्सल्यात्सर्वलोकहितायच विशेषंब्रूहिदेवेशयज्ज्ञात्वास्यान्महत्सुखं इत्याकर्ण्यवचस्तस्यप्रसन्नवदनोहरः परिष्वज्यसुतंप्रीत्याप्रोवाचेदंवचस्तदा शंकरउवाच सम्यक्पृष्टंत्वयावत्सप्रीतोस्मिवचसानव अस्तिकिंचिद्व्रतंपुण्यंतन्मेकथयतःशृणु वेदशास्त्रपुराणानांयद्रहस्यव्रतंमहत् यदद्यकथनीयंतेत्वनःकोममवैप्रियः सोमवारव्रतंनामसर्वव्रतफलाधिकं यस्मिन्कृतेपराप्रीतिरावयोःस्यादुमेशयोः निशम्येतद्व्रतंस्कंदःप्रोवाचवदतांवरं कीदृशंतद्व्रतंदेवविधानंतस्यकीदृशं कदाग्राह्यंकथंकार्यंकिंदानंकस्यपूजनम् उद्यापनविधानंचविस्तरेणवदस्वमे शिवउवाच मधौमास्यष्टमीशुक्लाशिवेंदुदिनसंयुता तदाग्राह्यंव्रतंचैतदनेनविधिनाशुभं प्रातःकृष्णतिलैःस्नात्वाआचार्यसहितोव्रती पूर्वाण्हेविधिवत्कार्यसुमाशंकरपूजनं ततःपुष्पांजलिंदत्वाप्रणम्यदंडवद्भुवि विधिनानेनगृण्हीयाद्व्रतंसंकल्पपूर्वकम् गृण्हामिभवरोगार्त्तःसोमवारव्रतौषधं व्रतेनानेनमेप्रीतौभवेतांपार्वतीश्वरौ विसर्जनंततःकुर्यादाचार्यंपूजयेत्ततः शिष्टैरिष्टैःपरिवृतोभोजनंकारयेत्ततः अहःशेषंततोनीत्वासत्कथाश्रवणादिभिः शयीताधस्ततोरात्रावभुक्तोब्रह्मचर्यवान् अनेनविधिनावत्समदीयेवासरेयदा कुर्वन्व्रतमवाप्नोतिमद्भावंनात्रसंशयः यस्मिन्दिनेकृतंकिंचिद्दानंहोमोजपस्तथा व्रतंवाप्रीतिदंस्कंदंऽह्युमयासहितस्यमे अतःसोमाव्हयोवारःप्रशस्तोयंममप्रियः एवंसोमाष्टकंकृत्वाव्रतस्योद्यापनंशुभं माघाद्येपंचकेकार्यंशुक्लपक्षेविशेषतः शिवर्क्षतिथियोगानामेकैकेनापिसंयुते सोमवारेविधातव्यंतथाचंद्रबलान्विते विधायरदनोल्लेखंप्रातःस्नात्वाविधानतः आचार्यंवरयेदेकंविधिज्ञंश्रुतिपारगम् पुराणस्मृतिधर्मज्ञंनिगमागमवेदिनं उपोष्यसोमवारंचसायंसंध्यामुपास्यच शिवालयेहरेर्वापिशुचौदेशेथवागृहे अष्टांगुलोच्छ्रितांवेदींवितस्तिद्वयसंमिताम् तस्यांषोडशपत्राणितंडुलैःपरिपूरयेत् विचित्ररचनोपेतांपताकाद्युपशोभितां चित्रांविचित्रैर्विविधैःफलराजिविराजितम् एवंप्रकल्पयेद्वेदींचतुरस्रांसमंततः ध्यात्वाशुभनियमंकृत्वासर्वाभ्युदयिकंतथा आचार्येणसमंकुर्यान्मदाराधनमादरात् पद्ममध्येनवीनंचधवलंस्थापयेद्घटं वाससावेष्टितंपूर्णमक्षतैःपरिपूरितं समंतादंतिकेचापिनामभिस्त्वीश्व

रादिभिः गणेशंमातृकाश्चापिदुर्गांक्षेत्राधिपंतथा समाहितमनाःकोणेष्वाग्नेय्यादिषुविन्यसेत् ततःकनकसंभूतमद्रूपसुपयान्वितं पंचामृतोदकैःस्नाप्यगंधपुष्पाक्षतैर्जलैः गृहीत्वावाहयेत्कुंभेध्यायेन्मद्रूपमीदृशं त्र्यंबकंचतथागौरीर्मिमायेतिजपन्सुधीः पंचाक्षरंतथामंत्रंपूर्वादिषुदलेष्वपि मूर्तयोष्टौमदीयाश्चपूजनीयाःप्रयत्नतः अनंतसूक्ष्मौचशिवस्ततश्चत्रिनेत्ररुद्रौचतथैवपूज्यौ त्रिमूर्तिश्रीकंठशिखंडिनौच भागादिपत्रेषुसमर्चनीयाः तद्बहिर्लोकपालाश्चपूजनीयाःप्रयत्नतः विष्टराद्युपचाराश्चदातव्यामूलमंत्रतः बिल्वपत्राक्षतैःपुष्पैर्धूपदीपैःसमर्चयेत् मनोरमाविधातव्यापूजावित्तानुसारतः ततोवेदेरधोभूमौसर्वतोभद्रमंडले ब्रह्माद्यादेवताःसर्वाःपूजनीयाःप्रयत्नतः नैवेद्यादिविचित्राणितांबूलानिप्रकल्पयेत् ततोजागरणंकुर्याद्गीतवादित्रनिःस्वनैः पुराणैरितिहासैश्चरात्रिशेषंनयेद्व्रती अपरेद्युःकृतस्नानःप्रातःसंध्यामुपास्यच पुनर्यागगृहंगत्वात्सूपचारान्प्रकल्पयेत् हवनार्थैविधातव्यमुपलेपादिकंततः प्रतिष्ठाप्यानलंसर्वमन्वाधानादिपूर्ववत् स्वगृह्यविधिनाकार्यमाज्यभागांतमेवच अनादेशादिभिर्हुत्वामहाव्याहृतिसंज्ञकाः होतव्याःसर्पिषाश्चैवपायसंसघृतंसुधीः त्वंसोमासीतिमंत्रेणहुनेदष्टोत्तरंशतं ततःस्विष्टकृतंहुत्वाहोमशेषंसमापयेत् ततोहोमावसानेचगामरोगांपयस्विनीं सवत्सांधवलांसाध्वींसवस्त्रांकांस्यदोहनीं दद्याद्व्रतसमृध्यर्थमाचार्यायसदक्षिणां वस्त्रैराभरणैरन्यैराचार्यंपरितोषयेत् ततःषोडशसंख्याकानन्नभोज्यैर्नानाविधैस्तथा ब्राह्मणान्भोजयेत्पश्चादर्चयेन्नामभिःक्रमात् सोमेश्वरस्तथैशानःशंकरोगिरिजाधवः महेशःसर्वभूतेशःस्मरारिस्त्रिपुरांतकः शिवःपशुपतिःशंभुस्त्र्यंबकःशशिशेखरः गंगाधरोदेवामहादेवोवामदेवइतिक्रमात् वस्त्राणिकुंडलादीनिचंदनैरुपलेपयेत् उपवीतानितेभ्योपिदद्यात्कुंभान्फलान्वितान् शक्त्याचदक्षिणादेयादंपतीपूजयेत्ततः अन्यानपियथाशक्तिब्राह्मणानपितोषयेत् व्रतंममास्तुसंपूर्णमित्युक्त्वातान्प्रपूजयेत् अस्तुसंपूर्णमित्युक्तेततोयागमुवंव्रजेत् उपचारादिकंकृत्वाश्रुत्वानत्वापुनःपुनः विसर्जनंविधायाथशिष्टैरिष्टैःसमन्वितः भुंजीयाद्यज्ञशेषंतद्वाग्यतोनियतःशुचिः एवंकृतेमहापुण्येव्रतस्योद्यापनेशुभे नारीवापुरुषोवापिमहेशस्यपरंपदं अपुत्रोलभतेपुत्रान्निर्धनोधनवान्भवेत् अविद्योलभतेविद्यामितिधर्मविदोविदुः पृथिव्यांयानितीर्थानिव्रतान्यन्यानि

यानितु सोमवारव्रतस्यास्यकलांनार्हंतिषोडशीं इतिश्रीभविष्योत्तरेसोमवारव्रतोद्यापनंसंपूर्णम् अथमंगलव्रतंकरिष्ये
भौमवारेअरुणोदयवेलायांअपामार्गेणदंतधावनंविधाय तिलामलकचूर्णेननद्यादौगृहेवास्नात्वाधौतमारक्तवस्त्रंपरिधायरक्तोत्त
रीयंचस्त्रीवाप्येवंपरिदध्यात् ततस्ताम्रपात्रेरक्ताक्षतारक्तपुष्परक्तचंदनानिनिक्षिप्य अग्निर्मूर्धेतिमंत्रेणअष्टोत्तरशतार्घ्याणिदद्या
त् ततोगृहमागत्य रक्तगोमयेनभूमिंविलिप्यशुद्धदेशेपुत्रार्थीधनार्थीचपत्न्यासहमंगलपूजामारभेत् तत्रविधिः मासपक्षाद्युल्लि
ख्य ऋणव्याधिनाशनार्थंपुत्रधनप्राप्तयेचभौमव्रतंकरिष्ये इतिसंकल्प्य तदंगत्वेनभौमपूजनमहंकरिष्ये ततःप्रार्थयेत् अद्यदे
वेशतेभक्त्याकरिष्येव्रतमुत्तमं ऋणव्याधिविनाशायधनसंतानहेतवे यंत्रोपरिस्थंभौमंपूजयेत् तत्रयंत्रप्रकारउक्तःसंग्रहे त्रिकोणंपू
र्वमुद्धृत्यपंचधाविभजेत्ततः तृतीयरेखाचिन्हाभ्यांलांछयेत्समभागतः आद्यरेखाग्रयुगुलंतृतीयाचिन्हयोर्न्यसेत् द्वितीयायंसमा-
कृष्यतृतीयाचिन्हयोर्न्यसेत् पुनारेखांतृतीयांतु समांभज्यात्समांशकं तुर्याचिन्हद्वयेनाथस्त्रिभिश्चिन्हैस्तुपंचभिः तृतीयायेप्रकु
र्वीतपंचम्यामथचिन्हिते तुर्याग्रेयोजयेत्सम्यक्पंचम्यचिन्हयोर्द्वयोः चिन्हैस्तुपंचभिर्दद्यात्सूत्रयुग्मंविचक्षणः एवमेकाधिकंसम्यक्
कोणानांविंशतिर्भवेत् तृतीयातुर्ययोर्मध्येस्थितचिन्हगृहेर्चयेत् देवंतदग्रतोमंत्रीत्रिकोणेदक्षिणक्रमात् मंगलाद्यांतरेपूर्वान्नमो
तानेकविंशतिः एकविंशतिकोष्ठेषुनाममंत्रान्समालिखेत् ततःपूजाप्रकर्तव्यापुत्रसंपत्तिहेतवे पूजाप्रकारमाह रक्तमाल्यांबर
धरःशक्तिशूलगदाधरः चतुर्भुजोमेषगमो वरदःस्याद्धरासुतः एह्येहिभगवन्भौमअंगारकमहाप्रभो त्वयिसर्वंसमायातंत्रैलोक्यं
सचराचरं भौममावाहयिष्यामितेजोमूर्तिंदुरासदं रूद्ररूपमनिर्देश्यंचक्रंचअरुणप्रभम् अग्निर्मूर्धाविरूपांगारकोगायत्री मं
गलावाहनेविनियोगः ॐ अग्निर्मूर्धेतिऋक् ॐ नमोभगवतेधनसमृद्धिदायमंगलायनमः मंगलंआवाहयामि अथन्यासः ॐ
ह्रांहृदयायनमः ह्रींशिरसे॰ ह्रूंशिखायै॰ ह्रैंकवचाय॰ ह्रौंनेत्रत्रया॰ ह्रःअस्त्रायफट् स्वंस्वः इतिदिग्बंधः ॐ ह्रांअंगुष्ठाभ्यां॰ ॐ
ह्रींतर्जनीभ्यां॰ ॐ ह्रूंमध्यमाभ्यां॰ ॐ ह्रंअनामिकाभ्यां॰ ॐ ह्रांकनिष्ठिकाभ्यां॰ ॐ ह्रःकरतलकरपृ॰ हंसःआत्मनेन॰ स्वंस्वःपर

मात्मनेन॰ ततःअग्निर्मूर्धेतिमंत्रेणवामंगलगायत्र्यावाआसनादिषुपुष्पांतांपूजयित्वा यंत्रस्यएकविंशतिकोष्ठेषुनाममंत्रेणपूजयेत् अ
र्घ्याणिचदद्यात् शिखायांमंगलःपातुभूमिपुत्रश्चमूर्धनि ललाटेऋणहर्ताचचक्षुषोश्चधनप्रदः स्थिरासनःश्रोत्रयोश्चमहाकायश्च
नासिके आस्यदंतोष्ठजिह्वासुसर्वकामवरोधकः हनौमेलोहितःपातुलोहिताक्षश्चकंठके स्कंधयोरुभयोरक्षेत्सामगानांकृपाकरः
धरात्मजोभुजौपातुकुजोरक्षेत्करद्वयम् भौमोमेहृदयंपातुभूतिदस्तनथोदरे भूमिनंदननाभौतुगुह्येत्वंगारकंन्यसेत् ऊरूममयमो
रक्षेज्जान्वोरोगापहारकः जंघयोर्वृष्टिकर्ताचअपहर्ताचगुल्फयोः पादांगुष्ठौचपादौचसर्वकामफलप्रदः शक्तिर्मेपूर्वतोरक्षेच्छूलंरक्षे
च्चदक्षिणे पश्चिमेचधनुःपातुउत्तरेचशरस्तथा ऊर्ध्वंषडाननःपातुअधस्तात्पृथिवीमम एवंन्यस्तशरीरोसौचिंतयेद्भूमिनंदनम् अ
थध्यानं असृगरुणवर्णरक्तमाल्यांगरागंकनककमलमालामालिनंविश्ववंद्यं अतिललितकराभ्यांबिभ्रतंशक्तिशूलेभजतधरणि
सूनुंमंगलंमंगलानाम् इतिध्यात्वा अग्निर्मूर्धाइतिऋक् अष्टोत्तरशतंजपेत् अंगारकायविद्महेशक्तिहस्तायधीमहि तन्नो
भौमःप्रचोदयात् ततःस्तोत्रंपठेत् मंगलोभूमिपुत्रश्चऋणहर्ताधनप्रदः स्थिरासनोमहाकायःसर्वकर्मावरोधकः लोहितोलोहि
ताक्षश्चसामगानांकृपाकरः धरात्मजःकुजोभौमोभूतिदोभूमिनंदनः अंगारकोयमश्चैवसर्वरोगापहारकः सृष्टिकर्तापहर्ताचसर्वका
मफलप्रदः एतानिकुजनामानिनित्यंयःप्रयतःपठेत् ऋणंनजायतेतस्यसंतानंवर्धतेसदा एकविंशतिनामानिपठित्वातुदिनांतके
रूपवान्धनवांश्चैवजायतेनात्रसंशयः एककालंद्विकालंवायःपठेत्सुसमाहितः एवंकृतेनसंदेहोऋणंहित्वासुखीभवेत् इति
स्तोत्रंपठेत् धरणीगर्भसंभूतंविद्युत्कांतिसमप्रभं कुमारंशक्तिहस्तंचमंगलंप्रणमाम्यहं इतिनमस्कारः खदिरांगारेणरेखा
त्रयंकृत्वा अंगारकमहीपुत्रभगवन्भक्तवत्सल त्वांनमस्यामिमेशेषंऋणमाशुविनाशय ऋणरोगादिदारिद्र्यंपापक्षुदपमृत्यवः
भयक्लेशमनस्तापानश्यंतुममसर्वदा ऋणदुःखविनाशायपुत्रसंतानहेतवे मार्जयाम्यसितारेखास्तिस्रोजन्मसमुद्भवाः दुःखदौर्भा
ग्यनाशायसुखसंतानहेतवे कृतरेखात्रयंवामपादेनमार्जयाम्यहं इतिमंत्रैर्मार्जयेत् ततःप्रार्थना ऋणहर्त्रेनमस्तेस्तुदुःखदा

विघ्ननाशक सुखसौभाग्यधनदोभवमेधरणीसुत ग्रहराजनमस्तेस्तुसर्वकल्याणकारक प्रसादात्तवदेवेशसदाकल्याणभाजन
देवदानवगंधर्वयक्षराक्षसपन्नगाः प्राप्नुवंतिशिवंसर्वेसदापूर्णमनोरथाः प्रसादंकुरुमेभौमसौभाग्यंमंगलप्रद बालःकुमारकोयस्तु
सभौमःप्रार्थितोमया उज्जयिन्यांसमुत्पन्नोभौमोनामचतुर्भुजः भरद्वाजकुलेजातःशूलशक्तिगदाधरः इतिप्रार्थयेत् पुनःस्तोत्रं
पठेत् ततःवायनदानं तिलगुडमिश्रितेनएकविंशतिलड्डुकान् गोधूमेनवाफलदक्षिणासहितान्वेदविदेदद्यात् दानमंत्रः मंगलाय
नमस्तुभ्यंसर्वमंगलदायक वायनेनचसंतुष्टःकुरुमेत्वंमनोरथान् देवस्यत्वेतिमंत्रेणमंगलःप्रीयतामितिदद्यात् आवाहनंनजा॰
इतिपूजनम् अथकथा सूतउवाच पूजितोदेवदैत्यैस्तुमंगलोमंगलप्रदः गौतमेनपुरापृष्टोलोहितांगोमहाग्रहः गौतमउ
वाच कथयस्वमहाभागगुह्यंपूजनमुत्तमं मंत्रमाराधनंदानंसर्वपापप्रणाशनं रूपंसुवर्णसंकाशंवाहनायुधसंयुतं येनपूजित-
मात्रेणजायतेसुखमुत्तम धर्मार्थकाममोक्षाणांकालेनैवफलप्रदं सर्वपापप्रशमनंसर्वव्याधिविनाशनम् सर्वसौभाग्यदंदेवत्वयापा
तकनाशनम् सर्वयज्ञफलंप्रोक्तंसर्वकामफलप्रदम् तपसांजपदानानांफलंचैवतुलभ्यते तद्व्रतंब्रूहिमेदेवलोहितांगमहाग्रह यस्मि-
न्नाराधितेमर्त्यःसर्वसौभाग्यवान्भवेत् मंगलउवाच शृणुविप्रमहाभागसर्वज्ञऋषिसत्तम व्रतंचपूजनंदानंप्रख्यातंभुवन
त्रये आसीत्पूर्वंहिसर्वज्ञोब्राह्मणोवेदपारगः तस्यभार्यासुनंदाचनाम्नाख्यातासुलोचना तस्यापत्यंचसंजातंदृष्टत्वान्नकदाचन
तेनान्यस्यसुतांपुण्यांगृहीत्वापोषिताध्रुवं ब्राह्मणस्यकुलेजातासुरूपागुणसंयुता सर्वलक्षणसंपन्नाप्रयत्नेनैवगौतम पुराज
नौतयाचाहमेकभावेनपूजितः तांपुत्रींस्वगृहेनीत्वाब्राह्मणेनैवपालिता नित्यंहिस्रवतेतस्याअष्टांगंकनकंबहु तत्सुवर्णेनविप्रो
सौधनाढ्योमदगर्वितः कोटिकोटीश्वरोजातोराजतेभूमिमंडले दृष्ट्वानंदकविप्रेणदशवर्षावरार्थिनी विवाहार्थंचविप्रायदत्तासो
मेश्वरायच वेदोक्तविधिनानेनविवाहमकरोत्तदा वर्षैःकतिपयैर्विप्रःस्वांपत्नींप्रौढयौवनां लब्ध्वास्वदेशमार्गेणव्रजन्विप्रोप्यह
र्निशं निशांतेगह्वरेघोरेअरण्येपर्वतोत्तमे सर्वशून्येवनेतस्मिन्महालुब्धेनलोभितः मार्गेचलतिविप्रेस्मिंश्चोरैश्चविनिपातिते॥

तंपतिंमृतमालोक्यसानारीशोकपीडिता पतिनासहविप्रेंद्रमरणेकृतनिश्चया स्वपतिंतन्मयंविश्वंश्चिंतयंतीपदेपदे पतिंप्रदक्षिणीकृत्यचितायाश्चसमीपतः तस्मिन्क्षणेचतुष्टोहंवरार्थंचप्रचोदिता वरंब्रूहिमहाभागेयत्तेमनसिवर्तते इतिश्रुत्वाततोवप्रेसानारीपतिमानसा ब्राह्मण्युवाच यदितुष्टोसिमेदेवतर्हिजीवतुमेपतिः मंगलउवाच अजरामरवत्साध्वीतवभर्त्ताभविष्यतिअन्यंयाचमहासाध्विवरंत्रिभुवनोत्तमम् ब्राह्मण्युवाच यदितुष्टोसिमेदेवग्रहाणामधिपेश्वरः येत्वांस्मरंतिदेवेशंरक्तचंदनचर्चितं रक्तपुष्पैश्चसंपूज्यप्रत्यूषेभौमवासरे बंधनव्याधिरोगाश्चकदाचिन्नोपजायतां नचसर्पाग्निशत्रुभ्योभयंचस्वजनैःसह नवियोगो महीपुत्रभक्तानांसौख्यदोभव मंगलउवाच एकविंशतिभौमांश्चएकभुक्तोजितेंद्रियः एकान्नेनासितान्नेनचतुर्दीपान्वितेगृहे अर्घ्यंचमंगलैर्मंत्रैर्वेदपौराणिकोद्भवैः युवंरक्तमनड्वाहंसर्वोपस्करसंयुतम् स्वशक्त्याभोजयेद्विप्रान्दातव्यंचहिरण्यकं तेषांवैग्रहपीडाचनभवेत्तुकदाचन भूतवेतालशाकिन्योनभवंतिचहिंसकाः दारिद्र्यंनश्यतेतेषांपुत्रपौत्रैश्चवर्द्धते एवमुक्त्वाचतत्रैवमंगलोपिदिवंगतः एवंव्रतंसमाख्यातंसर्वसौख्यप्रदायकं इदंव्रतंकरिष्यंतितेषांपीडानजायते स्त्रीभिर्व्रतंप्रकर्त्तव्यंपुरुषैश्चविशेषतः तेषांमुक्तिर्भवत्येवस्वर्गवासोनसंशयः इतिश्रीपद्मपुराणेभौमवारव्रतकथासंपूर्णम् अथोद्यापनं गौतमउवाच उद्यापनविधिंब्रूहि ममसंम्यग्महेश्वर येनजातेनजगतोह्युपकारोमहान्भवेत् मंगलउवाच विधेयोमंडपःसम्यगष्टहस्तप्रमाणतः स्थंडिलंमध्यनःकार्यंहस्तैकेनप्रमाणतः मंडलंतुप्रकर्तव्यंमामकंरक्ततंडुलैः पूर्वोक्तानिचनामानिमंडलेपूजयेत्ततः एकविंशतिकोष्ठेषुचतुर्दीपान्वितेषुच एकविंशतिकुंभांश्चस्थापयित्वामदग्रतः सौवर्णीप्रतिमांतत्रस्थापयेत्कलशोपरि रक्तवस्त्रेणसंवेष्ट्यपूजयेत्कुसुमैःशुभैः अग्निर्मूर्धेतिमंत्रेणहोमंखादिरसंभवैः अष्टोत्तरशतंहुत्वादिक्पालांश्चहुनेत्ततः अंगपूजाप्रकर्तव्यानामभिर्ममसर्वदा मंगलायचपादौतुभूमिपुत्रेतिगुह्यके ऋणहर्त्रेतुनाभौचमहाकालायवक्षसि सर्वकामप्रदात्रेचममबाहूप्रपूजयेत् लोहितोहस्तयोश्चैवलोहिताक्षश्चकंठके आस्येसंपूजयेन्मांचसामगानांकृपाकरः धरात्मजंनासिकायांकुजंचनयनद्वये भौमंललाटेपादौचभूमिजायभ्रुवोस्तथा भूमिनंदननामानं

मूर्ध्निसंपूजयेत्तथा अंगारकंशिखायांतुयमंतुकवचेसदा सर्वरोगापहारंचअस्त्रदेशेप्रपूजयेत् आकाशेवृष्टिकर्तारंमपहर्तारंधस्तथा सर्वांगंचप्रभूतोस्मिसर्वकामफलप्रदः एवंपूज्यततोहामंपश्चाद्गंधादिनार्चयेत् भोज्यैकविंशतिंविप्रान्दद्यात्कुंभान् सवस्त्रकान् आचार्यंपूजयेत्पश्चाद्दत्वाधेनुंसवत्सकां सर्वंनिवेदयेत्पीठंगुरवेचशक्तिविस्मितः अच्छिद्रंयाचयेत्तेभ्योसर्वेब्रूयुर्व्रतंशुभम् दत्वादीनांधकृपणान्स्वयंभुंजीतवाग्यतः इदंव्रतंकरिष्यंतिदारिद्र्यंनश्यतिध्रुवम् कर्तव्यंतुप्रयत्नेनउद्यापनसमन्वितं इतिपद्मपुराणे मंगलव्रतोद्यापनंसंपूर्णम् अथश्रावणेशुक्रवारेवरदलक्ष्मीव्रतम् तत्रपूजाविधिः क्षीरसागरसंभूतांक्षीरवर्णसमप्रभाम् क्षीरवर्णसमंवस्त्रंदधानांहरिवल्लभां ध्यानं· ब्राह्मीहंससमारूढा धारिण्यक्षकमंडलू विष्णुतेजोधिकादेवीसामांपातुवरप्रदा आवाहनं· महेश्वरिमहादेविआसनंतेददाम्यहं महैश्वर्यसमायुक्तेब्रह्माणिब्रह्मणःप्रिये आसनं· तीर्थोदकैर्महादिव्यैःपापसंहारकारकैः अर्घ्यंगृहाणभोलक्ष्मीर्देवानामुपकारिणि अर्घ्यं· कुमारशक्तिसंपन्नेकौमारिशिखिवाहने पाद्यंददाम्यहंदेविवरदेवरलक्षणे पाद्यं· वैष्णवीविष्णुसंयुक्ताअसंख्यायुधधारिणि आचम्यतांदेवपूज्येवरदेसुरमर्दिनि आचमनं पद्मेपंचामृतैःशुद्धैःस्नपयिष्येहरिप्रिये वरदेशक्तिसंभूतेवरदेविवरप्रिये पयोदधिघृतंचैवमधुशर्करयातथा पंचामृतेनस्नपनंप्रीयतांपरमेश्वरि पंचामृतस्नानं· गंगाजलसमानीतंसुगंधिद्रव्यसंयुतं स्नानार्थंतेमयादत्तंगृहाणपरमेश्वरि स्नानं· रजताद्रिसमंदिव्यंक्षीरसागरसन्निभं चंद्रप्रभासमंदेविवस्त्रंतेप्रददाम्यहं वस्त्रं· मांगल्यमणिसंयुक्तंमुक्ताफलसमन्वितं दत्तंमंगलसूत्रंतेगृहाणसुरवल्लभे कंठसूत्रं· सुवर्णभूषितंदिव्यंनानारत्नसुशोभितम् त्रैलोक्यभूषितेदेविगृहाणाभरणंशुभं आभरणानि· रक्तगंधंसुगंधाढ्यंअष्टगंधसमन्वितं दास्यामिदेविवरदेलक्ष्मीर्देविप्रसीदमे गंधं· हरिद्राकुंकुमंचैवसिंदूरंकज्जलान्वितम् सौभाग्यद्रव्यसंयुक्तंगृहाणपरमेश्वरि सौभाग्यद्रव्यं· नानाविधानिपुष्पाणिनानावर्णयुतानिच पुष्पाणितेप्रयच्छामिभक्त्यादेविवरप्रदे पुष्पाणि अथांगपूजा वरदलक्ष्म्यैनमःपादौपू॰ कमलवासिन्यै॰ गुल्फौपू॰ पद्मालयायै॰जंघेपू॰ श्रियै॰जानुनीपू॰ इंदिरायै॰ ऊरूपू॰ हरिप्रियायै॰नाभिंपू॰

लोकधात्र्यैनमः स्तनौपू॰ विधात्र्यै॰ कंठंपू॰ धात्र्यै॰ नासांपू॰ सरस्वत्यै॰ सुखंपू॰ पद्मनिधये॰ नेत्रेपू॰ मांगल्यै॰ कर्णौपू॰ क्षीरसागरजायै॰
ललाटंपू॰ श्रीवरदलक्ष्म्यै॰ शिरःपू॰ श्रीमहाकाल्यै॰ सर्वांगंपू॰ ३० धूपंदास्यामितेदेविगोघृतेनसमन्वितं प्रतिगृण्हमहादेविभक्तानांवर
दप्रिये धूपं॰ साज्यंचवर्त्ति॰ दीपं॰ नैवेद्यंपरमंदिव्यंदृष्टिप्रीतिकरंशुभम् भक्ष्यभोज्यादिसंयुक्तंपरमान्नादिसंयुतं नैवेद्यं· नागवल्लीद
लैर्युक्तंचूर्णक्रमुकसंयुतम् वरलक्ष्मीर्गृहाणत्वंतांबूलंप्रतिगृह्यतां तांबूलं· सुवर्णसर्वधातूनांश्रेष्ठंदेविपरंसदा भक्त्याददामिवरदेस्व
र्णदृष्टिंचदेहिमे दक्षिणां· नीराजनंसमांगल्यंकर्पूरेणसमन्वितम् चंद्रार्कवन्हिसदृशंगृण्हदेविनमोस्तुते नीराजनं· सर्वमंगलमांग
ल्येसर्वपापप्रणाशिनि दोरकंप्रतिगृण्हामिसुप्रीताहरिवल्लभे दोरकग्रहणम् करिष्यामिव्रतंदेवि त्वद्भक्तस्त्वत्परायणः श्रियंदेहि
यशोदेहिसौभाग्यंदेहिमेशुभे दोरकबंधनम् क्षीरार्णवसुतेलक्ष्मीश्चंद्रस्यचसहोदरि गृहाणार्घ्यंमहालक्ष्मीर्देवितुभ्यंनमोस्तु
ते पुनरर्घ्यं· श्रीवृक्षस्यदलंदेविमहादेविप्रियंसदा बिल्वपत्रंप्रयच्छामिपवित्रंतसुनिर्मलं बिल्वपत्रम् इहजन्मनियत्पापंममज
न्मांतरेषुच निवारयमहादेविलक्ष्मीर्नारायणप्रिये प्रदक्षिणाः दामोदरिनमस्तेस्तुनमस्त्रैलोक्यनायके हरिकांतेनमस्तेस्तुत्राहिमां
दुःखसागरात् नमस्कारः क्षीरार्णवसमुद्भूतेकमलेकमलालये प्रयच्छसर्वकामांश्चविष्णुवक्षस्थलालये व्रतसमर्पणम् छत्रचामरमां
दोलंदत्वाव्यजनदर्पणे गीतवादित्रनृत्यैश्चराजसन्माननैस्तथा सूपचारैःसमभ्यर्च्यक्षमाप्यचमहेश्वरीम् वरलक्ष्मीमहादेविसर्वकाम
प्रदायिनी यन्मयाचकृतंदेविपरिपूर्णंकुरुष्वतत् प्रार्थनां एकविंशतिपक्वान्नैर्घृतशर्करसंयुतैः इंदिराप्रीयतांदेविपद्मेशांतिंप्रयच्छमेइं
दिराप्रतिगृण्हातिइंदिरावैददातिच इंदिरातारकोभाभ्यामिंदिरायैनमोनमः इतिवायनमंत्रः पंचवायनकंदत्वापक्वान्नैश्चसदक्षिणैः
विप्रायचाथयनयेदेव्यैतुब्रह्मचारिणे सुवासिन्यैततस्त्वेकंदापयेच्चयथाविधि इतिपूजा अथकथा सूतउवाच कैलासशिखरेरम्ये
सर्वदेवनिषेविते गौर्यासहमहादेवोदीव्यन्नक्षैर्विनोदनः जितोसित्वंमयाचाहपार्वतीपरमेश्वरं सोपित्वंचजितेत्याहसुविवादस्तयोरभू
त् चित्रनेमिस्तदापृष्टोमृषावादमभाषत तदाकोपसमाविष्टागौरीशापंददौततः कुष्ठीभवमृषावादिन्चित्रनेमिर्हतप्रभः नानृतंहिसमं

पापंकापिहष्टंश्रुतंमया चित्रनेमिर्महाप्राज्ञःसत्यंवदतिनोमृषा प्रसादःक्रियतांदेविदेवीमाहवृषध्वजः प्रसादस्तुसुखीतस्मैविशापंच-
जगादसा यदासरोवरेरम्येकरिष्यंतिशुचिव्रतम् ततःस्वर्गणिकाःसर्वावक्ष्यंतित्वांसमाहिताः तदातवविशापःस्यादित्युक्तःसपपा
तह ततःकतिपयाहोभिश्चित्रनेमिःसरोवरे कुष्ठीभूत्वावसंस्तत्रददर्शस्वर्विलासिनीः देवतापूजनासक्ताःप्रपच्छप्रणिपत्यताः किमेतद्भोमहा
भागाःकिंपूजाकिंचवांछितं किंमयाचत्व्यत्तुष्टेयमिहामुत्रफलप्रदं इतिव्रतंचित्रनेमिःपप्रच्छस्वविलासिनीः येनाहंगिरिजाशापान्मोक्ष्यामिचि
रदुःखतः अप्सरसऊचुः ताऊचुःक्रियतामद्यव्रतमेतदनुत्तमम् वरदलक्ष्मीव्रतंदिव्यंसर्वकामसमृद्धिदम् यदारवौकुलीरस्थेमासेच
श्रावणेतथा गंगायमुनयोर्योगेतुंगभद्रासरित्तटे तस्मिन्वैश्रावणेमासिशुक्लपक्षेभृगोर्दिने प्रारब्धव्यंव्रतंतच्चमहालक्ष्म्याप्रयतात्मभिःसु
वर्णप्रतिमांकुर्याच्चतुर्भुजसमन्विताम् पूर्वंगृहमलंकृत्यतोरणैरंगवल्लिभिः गृहस्यपूर्वदिग्भागेईशान्यांचविशेषतः प्रस्थमितांस्तंडुलांश्च
भूमौनिक्षिप्यपूजयेत् संस्थाप्यकलशंतत्रतीर्थतोयैःप्रपूजयेत् फलानिचविनिक्षिप्यसुवर्णप्रक्षिपेत्ततः पल्लवांश्चविनिक्षिप्यवस्त्रेणा
च्छाद्ययत्नतः प्रतिमांस्थापयेत्तत्रपूजयेच्चयथाविधि अग्न्युत्तारणपूर्वंतुशुद्धस्नानंयथाक्रमम् पंचामृतेनस्नपनंकारयेन्मंत्रतःसुधीः
शुद्धस्नानंततःकृत्वादेवीसूक्तेनवैततः अष्टगंधैःसमभ्यर्च्यपल्लवैश्चसमर्चयेत् अश्वत्थवटबिल्वाम्रमालतीदाडिमास्तथा एतेषांपत्रमा
दायएकविंशतिसंख्यया नानाविधानिपुष्पाणिमालत्यादीनिवैततः धूपदीपैर्महालक्ष्मींपूजयेत्सर्वकामदां पायसंभक्ष्यभोज्यंचना
नाव्यंजनसंयुतं एकविंशतिसंख्याकैरपूपैःपूजयेच्छिवां निवेद्यसर्वंदेव्यैतुवरंसंवृणुयात्ततः एवंसंपूजयित्वाचतांबूलाद्यैश्चषोडशैः
उपचारैःषोडशभिर्धूपदीपैरनेकधा नृत्यगीतादिसहितोदेवींसंप्रार्थयेच्छ्रियम् रमांसरस्वतींध्यायन्शचींचप्रियवादिनीं अप्सरोभिः
कृतंसम्यक्व्रतंसर्वसमृद्धिदम् पूजावसानपर्यंतंचित्रनेमिरलोकयत् होममधूम्रंसमाघ्रायघृतदीपप्रभावतः गतकुष्ठःस्वर्णतेजाःशुचि
स्नङ्गतमानसः तत्रैवंचिंतयन्सम्यक्मनःसंधायतद्व्रतं पंचवायनकंदत्वाकथांशृण्वीतयत्नतः यथामोनंगृहीत्वातुपंचार्तिक्येनपूजयेत्
व्रतंचकुर्वतांगृह्यएकंपूगफलंतथा पर्णैकंचूर्णरहितंचर्वणीयंप्रयत्नतः आरक्तंयदिजायेतकुर्याद्व्रतमनुत्तमं नोचेन्नतद्व्रतंकार्यंसर्व-

थाभूतिमिच्छता अनेनैवविधानेनव्रतंगृणहीतयत्नतः अहंयत्नात्करिष्यामिव्रतंसर्वसमृद्धिदम् इत्युक्त्वासर्वदेवीस्तत्कारयामासतत्क्षणात् सुवर्णनिर्मितांदेवींवस्त्रालंकारसंयुतां पूर्वोक्तेनविधानेनपूजांकृत्वाप्रयत्नतः पंच वायनकंदत्वाकृत्वातेभ्योयथाक्रमम् ततोवैणवपात्राणिफलान्नैश्चसदक्षिणैः विप्रायचाध्ययनयेदेव्यैतुब्रह्मचारिणे सुवासिन्यैततस्त्वेकमर्पितंचित्रनेमिना एवंसम्यक्क्रमेणैतद्दत्वावायनपंचकं ततोगृहंगतंतेनदेवींनत्वायथाक्रमं ततोनुज्ञांचसंप्रार्थ्यभक्षणार्थंततोव्रती नागवल्लीदलंत्वेकंक्रमुकंचूर्णवर्जितं भक्षयित्वातुचैलांतेदंतांतेनचनिरीक्ष्यच आरक्तेचततोजातेव्रतस्यास्यप्रभावतः अथाहंगतपापोस्मिदेव्यादर्शनयोगतः एतत्सम्यग्व्रतंचीर्णंभक्तिभावेनयन्मया चित्रनेमिर्व्रतंकृत्वाकैलासंशंकरालयं गत्वाप्रणम्यदेवेशंदेवींसादरपूर्वकं पार्वतीचतदाप्राह चित्रनेमेस्त्वपुत्रवत् पालनीयोमयात्वंचेत्सत्यमित्यवधार्यताम् चित्रनेमिस्तदाप्राहपार्वतींहरवल्लभे तवपादांबुजंदृष्टंवरलक्ष्मीप्रसादतः महादेवस्ततःप्राहचित्रनेमिंशुचिव्रतम् अद्यप्रभृतिकैलासेभुंक्ष्वभोगान्यथेप्सितान् पश्चाद्गंतासिवैकुंठंव्रतस्यास्यप्रसादतः पार्वत्यापितत्कृतंपूर्वंपुत्रलाभार्थमेवच लब्धश्चषण्मुखोदेव्याव्रतराजप्रसादतः नंदश्चविक्रमादित्योराज्यंप्राप्तोमहाव्रती नंदश्चकांतयाहीनोकांतांलब्ध्वासुलक्षणां तयाचतद्व्रतंकृत्स्नंकृतंवैपुत्रहेतवे पुत्रंप्रसुषुवेसाचत्रैलोक्यभरणक्षमं इहभुक्त्वातुविपुलान्भोगान्वैसुमनोहरान् तदाप्रभृतिलोकेस्मिन्वरलक्ष्मीव्रतंशुभम् व्रतंकरोतियानारीनरोवापिशुचिव्रतः भुक्त्वाभोगांश्चविपुलानंतेशिवपुरंव्रजेत् ख्यातंपुण्यंमयाविप्रावरलक्ष्मीव्रतंशुभम् यइदंशृणुयान्नित्यंश्रावयेद्वासमाहितः धनधान्यमवाप्नोतिवरलक्ष्मीप्रसादतः॥ इतिश्रीभविष्योत्तरपुराणेश्रावणशुक्लशुक्रवारेवरदलक्ष्मीव्रतंसंपूर्णम्॥

अथश्रावणमंदवारेशनैश्चरव्रतं॥ अद्येत्यादिममसमस्तरोगपरिहारार्थंदुष्टुदरस्थानगतशनैश्चरपीडानिरासार्थंशनैश्चरव्रतंकरिष्ये निर्विघ्नतासिद्ध्यर्थंगणपतिपूजनंकलशाराधनंचकरिष्ये कृष्णांगायनमः आवाहयामि नीलाय॰ आसनं॰ श्वेतकंठाय॰ पाद्यं॰ नीलमयूरवाय॰ अर्घ्यं॰ नीलोत्पलदलाय॰ आचमनं॰ नीलदेहाय॰ स्नानं॰ कुब्जाय॰ पंचामृतस्नानं॰ शनैश्चराय॰ शुद्धोदकस्नानं॰ दीप्यमानजटाधराय॰ वस्त्रं॰ पुरुषगात्राय॰ यज्ञोपवीतं॰ स्थूलरोमाय॰ अलंकारान् नित्याय॰ गंधं॰

धूर्ताय॰ अक्षतान्॰ सदातृप्ताय॰ पुष्पं॰ मंदाय॰ धूपं॰ निस्पृहाय॰ दीपं॰ तामसायै॰ नैवेद्यं॰ नीलोत्पलाय॰ आचमनं॰ कृष्णावपुषे॰ करोद्वर्तनं॰ दीर्घदेहाय॰ तांबूलं॰ मंदगतये॰ दक्षिणां॰ ज्ञाननेत्राय॰ प्रदक्षिणां॰ सूर्यपुत्राय॰ नमस्कारं॰ कोणस्थःपिंगलोबभ्रुःकृष्णारौद्रोंतकोयमः सौरिः शनैश्चरोमंदःपिप्पलादेनसंस्तुतः एतानिशनिनामानिजपेदश्वत्थसंनिधौ शनैश्चरकृतापीडानकदाचिद्भविष्यति इतिप्रार्थना मूलतोब्रह्म॰ अश्वत्थायनमोनमः सप्तप्रदक्षिणाःसप्तनमस्कारान्कुर्यात् इतिपूजा अथकथा दशरथउवाच नमःकृष्णांगनीलायश्वेतकंठनिभायच नमःपुरुषगात्रायस्थूलरोमायतेनमः नमोमंदगतेतुभ्यंनिस्पृहायनमोनमः नित्यानित्यक्षुधार्तायसदातृप्तायतेनमः तपसादग्धदेहायनित्ययोगधरायच नमस्तेज्ञाननेत्रायकाश्यपायार्कसूनवे इतिश्रुत्वानृपश्रेष्ठंप्रसन्नश्चशनिस्तदा शनिरुवाच तुष्टोहंतवराजेंद्रतपसापौरुषेणच दास्यामितेवरंभद्रंनिश्चयाद्रघुवंशज दशरथउ॰ अद्यप्रभृतिपिंगाक्षपीडाकार्यानतेमम जगत्त्रयेत्वयानाथपीडितोदुःखितोजनः तस्माज्जगत्त्रयंदेवरक्षणीयंत्वयानघ शनिरुवाच ग्रहाणामहमेकोहिमदधीनाग्रहाःसदा तपसातवतुष्टोहंपीडांनचकरोम्यहं जगत्त्रयंमहाराजदुःखितंमेसदैवहि दशरथउ॰ भगवन्केनविधिनात्वदीयाराधनंभवेत् येनतुष्टोसिपिंगाक्षतत्सर्वंवक्तुमर्हसि शनैश्चरउवाच श्रावणेमंदवारेषुदंतधावनपूर्वकं स्नानंसुगंधतैलेननित्यकर्मसमाचरेत् कर्तव्यंसर्ववारेषुतेनतुष्टोस्म्यहंनृप शुचिर्भूत्वाशमीवृक्षंगत्वातत्रैवपूजयेत् तदभावेयराजेंद्रगत्वाश्वत्थंप्रपूजयेत् तत्रसंपूज्यमांराजन्गंधपुष्पाक्षतादिभिः धूपदीपैश्चनैवेद्यैस्तांबूलप्रार्थनादिभिः वेष्टयेत्सप्तसूत्रैश्चनमस्कारांस्तथैवच सप्तप्रदक्षिणाःकृत्वाश्रुत्वापुण्यकथामिमां एवंविधांस्त्रयस्त्रिंशन्मंदवारान्कुरुष्वमे ततःशांतिंचमेवारेकुर्यादुद्यापनंशुभं आचार्यंवरयेत्तत्रश्रोत्रियंवेदपारगम् सुवर्णस्यशमीवृक्षंतदभावेतुपिप्पलं मदीयांप्रतिमांकुर्याल्लोहप्रचुरसंयुताम् द्विभुजंदीर्घदेहंचदंडपाशधरंतथा पिंगाक्षंस्थूलदेहंचश्वेतग्रीवंतथार्चयेत् रुक्मपत्रंतथासप्तकृष्णवस्त्राणिवेष्टयेत् उपवीतादिभिर्द्रव्यैःपूर्ववद्देवमर्चयेत् शमग्निरितिमंत्रेणहुनेदष्टाधिकंशतम् कृसरान्नंहोमयेत्तुतेनैवबलिमुद्धरेत् कृष्णाधेनुंसवत्सांचदद्यादयपयस्विनीं सप्तविप्रान्समभ्यर्च्यगंधपुष्पफलादिभिः वस्त्राणिदक्षिणांचैवयथाशक्त्याप्रदापयेत् तिलमाषविमिश्रान्नै-

भोजयेद्द्विजसत्तमान् तेषांगृह्याशिषंपश्चाद्भुंजीयाद्बंधुभिःसह सवस्त्रप्रतिमांचैवआचार्यायनिवेदयेत् एवंकृतेथराजेंद्रसर्वाभीष्टंददा
म्यहं जपेदिदंपठेत्स्तोत्रंभक्त्याचैवकृतांजलिः सप्तजन्मसुराजेंद्रतस्यैश्वर्यंभविष्यति पुत्रपौत्रयुतोनित्यंततोमोक्षमवाप्स्यति तुष्टोहंतव
राजेंद्रपीडांनचकरोम्यहं गोचरेवाथवर्गेपिविषमस्थोयदाशनिः तुष्टोराज्यप्रदःसद्यःक्रुद्धोराज्यापहारकः जन्मस्थोद्वादशस्थोवाअष्ट
मोवापिकुत्रचित् श्रावणेमंदवारेषुपूजितोहंसुखप्रदः ब्रह्माशिवोहरिश्चैवमनुयःसनकादयः लक्ष्मीरुमाचसावित्रीमुनिपत्न्यश्चवैशुभाः
नृपाअन्येमयासर्वेराज्यभ्रष्टाश्चपीडिताः देशाश्चनगरग्रामागजोष्ट्रावथवाजिनः रौद्रदृष्ट्यामयादृष्टानाशमायांतितत्क्षणात् अतोमया
पीडितानांमनुष्याणांनराधिप परिहर्तुंनशक्ताश्चब्रह्मविष्णुमहेश्वराः एतच्छ्रुत्वाशनेर्वाक्यंराजापरमहर्षितः प्रदक्षिणांनमस्कृत्य
वरंप्राप्यपुरंययौ गत्वास्वनगरंराज्ञापूजितोवैशनैश्चरः श्रावणादिषुवारेषुप्रसन्नोभूच्छनैश्चरः पृथ्वीपतिरभूद्राजाग्रहराजप्र
सादतः यइमंप्रातरुत्थायसौरिवारेसदार्चयेत् तस्याभीष्टप्रदोमंदोभविष्यतिनसंशयः स्त्रियावापुरुषेणापिशनैश्चरव्रतंकृतम्
मुच्यतेसर्वपापेभ्योसर्वाभीष्टंलभेत्क्षणात् ब्राह्मणोवेदसंपूर्णःक्षत्रियोराज्यमाप्नुयात् वैश्यस्तुलभतेवित्तंशूद्रःसुखमवाप्नुयात् कन्या
र्थीलभतेकन्यांपुत्रार्थीलभतेसुतं कामार्थीलभतेकामान्मोक्षार्थीलभतेगतिम् मुच्यतेसर्वपापेभ्योग्रहलोकंसगच्छति इतिश्रीस्कंद
पुराणेशनिवारव्रतोद्यापनंसंपूर्णम् अथव्यतीपातव्रतंलिख्यते युधिष्ठिरउवाच श्रुतानित्वन्मुखाद्देवव्रतानिसकलान्यपिव्य
तीपातव्रतंब्रूहिसोद्यापनफलान्वितं कृष्णउवाच पुराव्यासेनकथितंशुकायवंशवृद्धये तद्व्रतंकथयिष्यामिशृणुराजन्यसत्तम
शुकउवाच कथंयोगस्ततःपूज्योव्यतीपातमहामुने पूजितेकिंफलंतातविधिंमेब्रूहिविस्तरात् व्यासउवाच इममर्थंपुरापृष्टो
धरण्याचजगद्गुरुः व्यतीपातव्रतंसर्वंयत्समाख्यातवान्प्रभुः तद्व्रतंकथयिष्यामिपरलोकहितायच धरण्युवाच यस्त्वयोक्तोव्यती
पातस्तस्यकर्मवदस्वतत् कदाजातःकथंपूज्यःपूजितेचात्रकिंफलं श्रीवराहउवा० यदाबृहस्पतेर्भार्यांतारांजग्राहशीतगुः मित्रला
त्वाहतंसूर्यस्त्यजदारान्बृहस्पतेः तदासोमेनिरुष्टश्चरविंक्रूरंविलोकयत् आदित्योपितदारुष्टःक्रुधासोमंविलोकयत् उभयोर्दृष्टिसंपा

तान्क्रुद्धयोःसोमसूर्ययोः उद्यतास्योभवद्घोरःपुरुषःपिंगलेक्षणः दष्टोष्ठदीर्घदशनोभ्रुकुटीकुटिलाननः पिंगलश्मश्रुकेशांतोलंबभ्रूश्चकृ
शोदरः शिरालोदीर्घजिव्हश्चसूर्याग्नियमसन्निभः त्रैलोक्यंभक्षितुंप्राप्तोरवींदुभ्यांनिवारितः सोपृच्छदथसूर्येंदूक्षुधितोभक्षयामिकिम्
त्रैलोक्यंभोक्तुकामोहंभवद्भ्यांविनिवारितः क्रोधक्षुधौमाबाधेतेपात्येतेकुत्रतेमया सोमसूर्याववूचतुः कोपदृष्टेर्नौविविधादनिपाताद्भवान
भूत् व्यतीपातस्ततोनामभवान्भुविभविष्यति सर्वेषामपियोगानांपतिस्त्वंभवितासदा तेषांमध्येपुण्यतमोभविष्यतिनसंशयः यस्मिन्कालेत्व
दुत्पत्तिःकल्याणंनैवकारयेत् स्नानदानादिकंकिंचित्कृतंचैवाक्षयंभवेत् इतिताभ्यांवरोदत्तस्ततःप्रभृतियोगराट् त्रिषुलोकेषुविख्यातोबहुपु
ण्यफलप्रदः व्यतीपातमहावीरत्रैलोक्यव्यापकप्रभो त्वयिप्राप्तेनरैःकिंचिद्दानव्यंशुभकांक्षिभिः तद्दत्तंक्षुधितोभुंक्ष्वनोचेत्कोपोनिपात्यता
म् व्यतीपातउवाच नमोवांपितरामेस्तुक्रोधपातस्यभाजनः दत्तोभवद्भ्यामधुनाप्रसादःक्रियतांमम रवींदावूचतुः स्नानदानजप
होमपूर्वकंयस्त्वदीयसमयेसमाचरेत् तस्यपुण्यमिहतेप्रसादतोनंतमस्तुकृतवैभवार्णवे तत्कालेतवविदधातिपूजनंयस्तस्येष्टंभवतुभवे
त्सप्रभद्ररूपः पुत्रायुर्धनस्फारवकीर्तिपुष्टिरूपारोगाद्यंगुणिजनवल्लभेत्वपूर्वम् धरण्युवाच अस्यार्चनविधिंब्रूहिविस्तरेणजगद्गुरो कृ
तेतस्मिन्व्रतेदेवकिंफलंप्राप्यतेनरैः वराहउवा० एतस्मात्कारणाद्भूमेव्यतीपातःसउच्यते अर्चितेचफलंयत्स्यात्तदुक्तंचसमासतः वि
स्तरेणार्चनविधिंकथितुंकेनशक्यते यथार्चितेव्यतीपातःसविधिःश्रूयतामिह शुभेव्यतीपातदिनेवगाहयेत्संसेव्यमानेनमहानदीजलम्
आवाहेहैपूर्वमानजापकोजपेच्चमंत्रंव्यतीपाततेनमः छादितेताम्रवस्त्रेणशर्करापूरितेघटे कांचनाद्येप्रतिष्ठाप्यहैममष्टभुजंनरम् अष्टभुजमहा
दशभुजेउत्पत्तिवाक्येव्यतीपातमूर्तेः अष्टदशभुजश्रवणादुत्पत्तिवाक्यानुसारित्वाच्चविनियोगवाक्यस्य० तथाभगवद्गीतासुचचत्वारो
मनवस्तथेतिचत्वारश्चतुर्दशेत्यर्थः गंधपुष्पाक्षतैर्धूपैर्दीपवस्त्रनिवेदनैः भक्ष्यैर्भोज्यैःफलैश्चित्रैर्मासिमार्गशिरेर्चयेत् नमस्तेस्तुव्यती
पातसोमसूर्यकृतप्रभो यद्दानादिकृतंकिंचित्तदनंतमिहास्तुमे इत्युक्त्वापंचरत्नाढ्यंसपुष्पाक्षतमंजलिं प्रक्षिप्यतत्क्षणादेवसर्वपापक्ष
योभवेत् यदिद्वितीयेचदिनेव्यतीपातोभवेन्नहि तदापूर्वोपवासस्तुप्रदद्यात्सकलंगुणैः पारणंचव्यतीपातेकुर्यात्संप्राश्यगोमयं अथैक

स्मिन्दिनेधात्रिव्यतीपातोभवेद्यदि तत्रैवान्हितदादत्वाउपवासंसमाचरेत् कुर्यादेवंमासिमासिव्यतीपातांस्त्रयोदश चतुर्दशेतुसंप्राप्तेकुर्या
दुद्यापनंबुधः व्यतीपातायस्वाहेतिक्षीरवृक्षसमच्छतम् आज्यक्षीरफलानांचहोतव्यंवैशतम्शतम् शर्करापूर्णकुंभेतिसहसोपस्करंन
रम् शय्यांचोपस्करैर्युक्तांप्रदद्याद्भूतदेशिने वंदेव्यतीपातमहंमहांतंरवींदुसूनुंसकलेष्टलब्ध्यै समस्तपापस्यममक्षयोस्तुपुण्यस्यचानं
तफलंममास्तु इतिसमीर्यगुरुंपरिपूज्यतंकटककुंडलकंठविभूषणैः सकलमेवसमर्प्ययथोचितंतदुपलभ्यमिहश्रृणुतन्महि गांचपयस्वि
नींदद्यात्स्वर्णवरदक्षिणां तस्मैशय्यांसमादायसारदारुमयींदृढाम् दंतपत्रसितांरम्यांहेमपट्टैरलंकृताम् हेमतूलीप्रतिच्छन्नांशुभगेंदूपधा
नकाम् प्रच्छादनपटीयुक्तांधूपगंधादिवासिताम् तांबूलंकुंकुमंमोदंकर्पूरागरुचंदनम् दीपकोपानहौच्छत्रंप्रदद्याच्चामरासने देहांतेसूर्यलोकाय
विमानैरत्नसन्निभैः अप्सरोगणसंभोगैर्गीतनृत्यविलासिभिः गत्वाकल्याऊदशतंसादरंत्रिदशार्चितः तदंतेराजराजःस्याद्रूपसौ
भाग्यभाग्भवेत् कीर्त्याढ्योगुणपुत्रायुरारोग्यधनधान्यवान् प्रतापादिमहैश्वर्ययुक्तोभोगीबहुश्रुतः जनसौभाग्यसंपन्नोयावज्जन्माष्ट
कायुतम् दर्शेदशगुणंदानंतच्छतघ्नंदिनक्षये शतघ्नंतच्चसंक्रांतौशतघ्नंविषुवेततः युगादौतद्दशगुणमयनेतच्छतंभवेत् सोमग्रहेतच्छ
तघ्नंतच्छतघ्नंरविग्रहे असंख्येयंव्यतीपाते दानंवेदविदोविदुः उत्सत्तौलक्षगुणंकोटिगुणंभ्रमणनाडिकायांतु अर्बुदगुणितंपतनेजपदाना
द्यक्षयंपतिते जन्मद्वाविंशतिंनाडीभ्रमणंत्वेकविंशतिं व्यतीपातस्यपतनेदशसमस्थितंविदुः संप्रार्थितंयद्व्यतिपातकालेपुनःपुनस्तद्रवि
शीतरश्मी प्रयच्छतःकल्पशतार्बुदानिविवर्धमानंनहिहीयतेतत् तस्मान्महित्वंव्यतीपातपूजांकुरुष्वचेत्पुण्यमनंतमिष्टम् यदिस्थिर
त्वंशततंतुवेष्टंसमस्तवरिष्टंयदभीप्सितंतत् गणयित्वाव्यतीपातकार्याभूतिव्यतीनरः सर्वपापहरौतस्यलभतेफलमीप्सितं पठतिलि
खतियःश्रृणोतिवैतत्कथयतिपश्यतिकारयत्यवश्यम् इतिशशिदिवसयास्यसोपिदेवैश्चिरमयंपरिपूज्यमानवास्ते इतिवराहेनोक्तंव्यती
पातव्रतं अथतत्रैवनारदीयेव्यतीपातव्रतम् युधिष्ठिरउवा० केनव्रतेनचीर्णेननपश्येद्यमशासनम् परिपृच्छाम्यहंविप्रव्रतानामुत्त
मंव्रतम् तद्व्रतंब्रूहिविप्रर्षेकृत्वाभवतिस्वप्रियं मार्कंडेयउवा० श्रृणुराजन्व्रतमिदंहर्यश्वेनपुराकृतम् तेनराज्ञातुवैदत्तंसूकरायचद्रुः

खिने कदाचिन्मृगयांकर्त्तुंहर्य्यश्वोराजसत्तमः वनमध्येचरन्राजा दृष्ट्वातत्रैवसूकरम् दग्धपादकटिंचैवदग्धकंठमुखोदरम् दृष्ट्वातथाविधं तंतुकृपांचक्रेनृपोत्तमः केनकर्मविपाकेन त्ववस्थांप्राप्तवानयम् अहोकष्टमहोकष्टंसूकरेणोपभुज्यते अवश्यमपिभोक्तव्यंकृतंकर्मशुभाशुभम् इत्युक्त्वातत्सरूपेण राजातंप्राहसूकरम् ईदृशीकिमवस्थातेतन्मेब्रूहिचसूकर तच्छ्रुत्वानृपतेर्वाक्यंनिश्वसन्सूकरोमुहुः स्मृत्वापुराकृतंकर्मप्रत्युवाचनृपंप्रति शृणुराजन्नहंपूर्वं वैश्योधनबलान्वितः आशाकृद्भ्योनदत्तंहिआश्रितेभ्यश्चकिंचन श्रुताश्चबहवोधर्माःपुराणश्रुतिचोदिताः तथापिपापबुद्ध्यामेनकृतंचात्मनोहितं आशापाशमनुप्राप्तश्शुभशास्त्रविवर्जितः कृतवान्पापमेवाहंनकिंचित्सुकृतंकृतम् एकदातुद्विजःकश्चिद्व्यतीपातेगृहंमम आगतोयाचयन्मांचनकिंचिद्दत्तवानहं मयानिराकृतोत्यंतंवचोभिर्निष्ठुरैस्तथा व्यतीपातोघरेवैश्यकिंचिद्देह्यर्थिनेखल तन्मेरुरूपंभवतिप्राप्स्यसेत्वन्यजन्मनि कुपितेनमयातस्मैनिष्ठुरावाक्समीरिता ततश्चकुपितोविप्रोममशापमथाददत् आशाग्निर्दहतेयद्वन्ममांगानिपृथक्पृथक् तथैवतुतवांगानिदावाग्निःपुरुषाधम अरण्येनिर्जलेदेशेनिर्जनेद्रुमविस्तृते तत्रसूकरयोनौत्वमुत्पन्नोदुःखमाप्नुहि प्रसादितोमयापश्चात्पुनरप्युक्तवांस्तदा उद्धरिष्यतिराजात्वांसूकरत्वेदयापरः इत्युक्त्वाचजगामाथअन्यवैश्यगृहंप्रति तेनशापेनवैराजन्सूकरत्वमवाप्तवान् अहंदुःखीचसंजातोविजनेनिर्जलेवने राजोवाच केनत्वंमुच्यसेपापान्ममाचक्ष्वेहसूकर येनशक्योप्यहंकर्तुंतवशापस्यसंक्षयं वराहउवाच श्रूयतांममराजेंद्रमुक्तिःस्याद्येनकर्मणाव्यतीपातव्रतंनामकृतंराजंस्त्वयापुरा यथामाताकृतस्येहसर्वत्रसुखकारिणी तथाव्रतमिदंराजन्निहलोकेपरत्रच यथैवाभ्युदितःसूर्योत्यशेषंचतमोदहेत् व्यतीपातस्तथैवेहसर्वपापंव्यपोहति यथाविष्णुर्ददातीहनृणांपरमनिर्वृतिं ददात्येवंनसंदेहस्तस्याव्रतमिदंशुभं शतमिंदुक्षयेदानंसहस्रंतुदिनक्षये विषुवेशतसाहस्रंव्यतीपातेत्वनंतकम् विधानंव्यतिपातस्यशृणुराजन्प्रयत्नतः द्वाविंशतिसमुत्पत्तौ२२ भ्रमणेचैकविंशतिः२१ पतनेदशनाड्यस्तु१० पतितेसप्तनाडिकाः७ यत्फलंलक्षमुत्पत्तौभ्रमणेकोटिरुच्यते पतनेदशकोट्यस्तुपतितेदत्तमक्षयं आकृतिर्मूर्च्छनाकाष्ठाशैलतुल्याश्चनाडिकाः लक्षकोट्यर्बुदगुणमनंतंस्याद्यथाक्रमम् व्यतीपातविभा

गेषुदानमुक्तंनृपोत्तम शंखकर्णंप्रलंबोष्ठंलंबभ्रूदीर्घनासिकम् अष्टनेत्रंचतुर्वक्त्रंभुजैरष्टादशैर्युतम् शतयोजनविस्तीर्णंसोमसूर्यसुतंध्रुवं माघेवाफाल्गुनेमार्गेवैशाखेश्रावणेथवा व्यतीपातोदिनेयस्मिन् आरभेद्व्रतमुत्तमम् व्यतीपातव्रतेतिष्ठन् शुचिर्भूत्वासमाहितः पंचगव्यतिलैर्धात्र्या शुचिःस्नायात्समाहितः ततःसंकल्पयेदेतद्व्रतंसर्वार्थसाधकम् व्यतीपातव्रतेतिष्ठन् स्वर्णदानंकरोम्यहं नवारोनचनक्षत्रंनतिथिर्नचचंद्रमाः यदावैजायतेभक्तिस्तदाग्राह्यमिदंव्रतम् किंव्रतैर्बहुभिश्चीर्णैःकिंदानैर्बहुभिःकृतैः सर्वेषांफलमाप्नोतिव्यतीपातव्रतेनवै इतिसंकल्प्यमनसाव्यतीपातव्रतंचर सर्वपापविमुक्त्यर्थंयावत्संवत्सरोभवेत् आमंत्र्यतद्दिनेविप्रंवेदवेदांगपारगम् तिलैःपूर्णशरावंचसगुडंगुरवेर्पयेत् शंखचक्रगदापाणिंपद्महस्तंहिरण्मयं वस्त्रयुग्मेनसंवेष्ट्यपूजयेद्गरुडध्वजम् उपचारैःषोडशभिःपूजयित्वासमाहितः हेमदानंततःकुर्याद्घाद्विभवसारतः मंत्रेणानेनविधिवत्करेधृत्वासुवर्णकम् नमस्तेस्तुव्यतीपातसोमसूर्यसुतप्रभो दास्यामिदानंयत्किंचित्तदक्षय्यमिहास्तुमे गुंजामात्रमपिस्वल्पंहेमविप्रकरार्पितम् गृह्यतांव्रतसिद्ध्यर्थंपूरयस्वमनोरथान् हेमाद्रिशिखरंभूत्वासुवर्णकोटिरुच्यते इदंक्षेत्रंकुरुक्षेत्रंसाक्षान्नारायणोद्विजः सुवर्णस्यचदानेनप्रीतोभवजनार्दन नवहस्तोव्यतीपातोवैधृतिश्चरणौस्मृतौ संक्रांतिर्हृदयंस्थानंममावैनाभिरुच्यते पूर्णिमापृष्ठतोज्ञेयापंचागंपंचपर्वणि एवंविष्णुशरीरस्यमुखंवैद्वादशीस्मृता अमाचपितरोज्ञेयामातामन्वादयस्तथा भगिनीद्वादशीज्ञेयाव्यतीपातस्तुसोदरः पितुःशतगुणंप्रोक्तंसहस्रंमातुरेवच भगिन्यांदशसाहस्रंसोदरेदत्तमक्षयम् व्यतीपातदिनेदेवकिंचिद्विप्रेसमर्पितम् भवंत्वनंतफलदंममजन्मनिजन्मनि एवंप्रार्थ्यहृषीकेशंनत्वाचैवपुनःपुनः तत्सर्वंगुरवेदद्याच्छ्रोत्रियायकुटुंबिने व्रतोपदेष्ट्रेविप्रायपुराणज्ञायभक्तितः ब्राह्मणान्भोजयित्वातुव्रतमेतत्समापयेत् इदंव्रतंमयादेवगृहीतंपूर्वजन्मनि स्वर्गापवर्गदंनृणांसूकरायददाम्यहं एवमुक्त्वानृपश्रेष्ठःसूकरायफलंददौ तत्क्षणात्तेनपुण्येनसूकरोमुक्तकिल्बिषः मुक्तःसूकरदेहाच्चसर्वाभरणभूषितः दिव्यंविमानंसंप्राप्यगतोस्वर्गंचसूकरः नजानंतिद्विजाःसर्वेव्यतीपातव्रतोत्तमं इहलोकेचसुखदंस्वर्गमोक्षप्रदायकम् अतस्त्वंकुरुराजेंद्रव्यतीपातव्रतोत्तमम् सर्वपापक्षयकरंनृणांभवतिसर्वदा कुर्यादेवंमासिमासिव्यतीपातांस्त्रयोदश

चतुर्दशेतुसंप्राप्तेकुर्यादुद्यापनंबुधः आदौमध्येतथाचांतेयथाशक्तिस्तथाचरेत् निष्कत्रयेणचार्धेनतदर्धार्धेनवापुनः व्यतीपातस्वरूपंहि
कुर्यादुद्यापनंबुधः आदौमध्येतथाचांतेयथाशक्तिस्तथाचरेत् निष्कत्रयेणचार्धेनतदर्धार्धेनवापुनः व्यतीपातस्वरूपंहिकुर्यादुष्टभुजंनरः
गणेशपूजनंकार्यंस्वस्तिवाचनमाचरेत् नांदीमुखांस्ततोभ्यर्च्यआचार्यंवरयेत्सुधीः वरयेच्चततोविप्रान्ऋत्विजश्चत्रयोदश देवागारेत
थागोष्ठेशुद्धेचस्वीयमंदिरे पुष्पमंडपिकांकृत्वापट्टकूलादिवेष्टितां तन्मध्येसर्वतोभद्रंरचयेल्लक्षणान्वितं तत्पूर्वेस्थापयेत्कुंभंशर्करापू
रितंशुभं तस्योपरिन्यसेत्पात्रंताम्रंवैणवमृन्मयं निष्कत्रयेणप्रतिमांसुवर्णपरिनिर्मितां स्वशक्त्याकारयेन्मूर्तिंलक्ष्मीनारायणस्यच ल
क्ष्मीनारायणींमूर्तिंव्यतीपातसमन्विताम् स्थापयेत्प्रतिमांतत्रब्रह्माद्यावाहनंततः ततःपूजांविनिर्वर्त्यमहासंभारविस्तरैः अर्घ्यंचापि
ततोदेयंस्रग्गंधैःकुंकुमैर्जलैः गृहाणार्घ्यंव्यतीपातसोमसूर्यकृतप्रभो सप्तजन्मकृतंपापंत्वत्प्रसादात्प्रणश्यतु मंत्रेणानेनदेवायदद्याद
र्घ्यंसमाहितः होमंसमारभेत्पश्चात्सोमोधेनुमितिस्मृतः आकृष्णेनेतिमंत्रेणसूर्यायविधिवन्नरः अश्वत्थाऽर्कसमिद्भिश्चशतमष्टोत्तरंतथा
इदंविष्णुरितिमंत्रेणहोमःस्यात्पायसेनच व्याहृतीनांफलैर्होमंकुर्यादष्टोत्तरंशतम् त्रयोदशब्राह्मणांश्चभोजयेल्लड्डुपायसैः एवमाराधिता
न्विप्रान्दक्षिणाभिश्चतोषयेत् आचार्यंपूजयेत्पश्चाद्गांचदद्यात्पयस्विनीं इत्थंव्रतंतुयःकुर्यान्नरोभक्तिसमन्वितः कोटिजन्मकृतैःपापै
र्मुच्यतेनात्रसंशयः अस्मिन्कृतेव्रतेराजन्वैधव्यंस्त्रीनचाप्नुयात् अकालमृत्युर्दारिद्र्यंशोकोदुःखंनजायते सर्वसौख्यमवाप्नोतिव्यती
पातप्रसादतः इतिश्रीवराहपुराणेव्यतीपातव्रतंसोद्यापनंसंपूर्णं अथआश्विनशुक्लैकादशीमारभ्य कार्तिकशुक्लैकादशीपर्यंतंमा
सोपवासव्रतंलिख्यते हेमाद्रौविष्णुरहस्ये नारदउवाच भगवन्श्रोतुमिच्छामिव्रतानामुत्तमंव्रतं विधिंमासोपवासस्यफलंचा
स्ययथोदितम् यथाविधानरैःकार्याव्रतचर्यायथाभवेत् आरभ्यते कथंपूर्वंसमाप्तंचयथाविधि यावत्संख्यंचकर्तव्यंतद्ब्रवीहिपि
तामह व्रतमेतत्सुरश्रेष्ठविस्तरेणमयानघ ब्रह्मोवाच साधुनारदपृष्टंहिसर्वेषांहितकारकम् यादृक्मतिमतांश्रेष्ठतच्छृणुष्वब्रवीमिते
सुराणांचयथाविष्णुस्तपतांचयथारविः मेरुःशिखरिणांयद्वद्वैनतेयस्तुपक्षिणाम् तीर्थानांतुयथागंगाप्रजानांतुयथाद्विजः श्रेष्ठं

सर्वव्रतानांहितकृन्मासोपवासकम् सर्वव्रतेषुयत्पुण्यंसर्वतीर्थेषुयद्भवेत् सर्वदानोद्भवंवापिलभेन्मासोपवासकृत् अग्निष्टोमादिभिर्यज्ञैर्विधिवद्भूरिदक्षिणैः नतत्पुण्यमवाप्नोतियन्मासपरिलंघनात् तेनदत्तंहुतंजप्तंतपस्तप्तंस्वधाकृतम् यःकरोतिविधानेननरोमासमुपोषणम् प्रविश्यवैष्णवंयज्ञंपूजयेच्चजनार्दनम् गुरोराज्ञांततोलब्ध्वाकुर्यान्मासोपवासकम् वैष्णवानियथोक्तानिकृत्वाचैवव्रतानितु द्वादश्यादीनिपुण्यानिततोमासमुपावसेत् अतिकृच्छ्रंपराकंचकृष्णंचांद्रायणंतथा मासोपवासंकुर्वीतज्ञात्वादेहबलाबलम् वानप्रस्थोयतिर्वापिनारीवाविधवामुने मासोपवासंकुर्वीतगुरुविप्राज्ञयाततः आश्विनस्यामलेपक्षेएकादश्यामुपोषितः व्रतमेतत्तुगृण्हीयाद्यावत्त्रिंशद्दिनावधि वासुदेवंसमुद्दिश्यकार्तिकंसकलंनरः मासंचोपवसेद्यस्तुसमुक्तिफलभाग्भवेत् अच्युतस्यालयेभक्त्यात्रिकालंकुसुमैःशुभैः मालतींदीवरैःपद्मैःकमलैस्तुसुगंधिभिः कुंकुमागरुकर्पूरैर्विलिप्यचसुगंधकैः नैवेद्यैर्धूपदीपाद्यैरर्चयेत्तुजनार्दनम् मनसाकर्मणावाचापूजयेद्गरुडध्वजम् कुर्यान्नरस्त्रिषवणंमहद्भक्त्याजितेंद्रियः नाम्नामेवतथालापंविष्णोःकुर्यादहर्निशम् मुखेनचस्तुतिर्वाच्यामृषावादंविवर्जयेत् सर्वसत्वेदयायुक्तःशांतवृत्तिरहिंसकः स्थितोवाआसनस्थोवावासुदेवंप्रकीर्तयेत् स्पृष्ट्वालोकेनगंधादिस्वाद्वन्नंनचकीर्तयेत् अन्यस्यवर्जयेत्सर्वंआत्मनःशुभकांक्षिभिः गात्राभ्यंगंशिरोभ्यंगंतांबूलंचविलेपनम् व्रतस्थोवर्जयेत्सर्वंयच्चान्यत्रनिराकृतं व्रतस्थोनसदाकिंचिद्दुष्कर्मह्यत्रकारयेत् देवतायतनेतिष्ठेन्नगृहस्थश्चरेद्व्रतम् कृत्वामासोपवासंतुसंयतात्माजितेंद्रियः ततोर्चयेन्महाभक्त्याद्वादश्यांगरुडध्वजम् पूजयेत्पुष्पमालाभिर्गंधधूपविलेपनैः वस्त्रालंकारवाद्यैश्चतोषयेदच्युतंनरः स्नापयेत्तुहरिंभक्त्यातीर्थचंदनवारिभिः चंदनेनानुलिप्तांगंपुष्पधूपैरनेकशः वस्त्रदानादिभिश्चैवभोजयेच्चद्विजोत्तमान् दद्याच्चदक्षिणांतेभ्योतांबूलादिचदापयेत् क्षमापयित्वाविप्रांश्चविसृजेन्नियतोव्रती एवंवित्तानुसारेणभक्तियुक्तेनचेतसा एवंमासोपवासंतुकृत्वाभ्यर्च्यजनार्दनम् भोजयित्वाद्विजांश्चैवविष्णुलोकेमहीयते एवंमासोपवासस्यत्रिंशदन्हिद्विजोत्तमः निर्वापयेत्ततश्चोच्चैर्विधिनायेनतच्छृणु कारयेद्वैष्णवंयज्ञमेकादश्यामुपोषितः पूजयित्वाचदेवेशमाचार्यानुज्ञयाहरिं अर्चयित्वाहरिंभक्त्याअभिवाद्यगुरुंतथा ततोनुभोजयेद्द्वि

मान्यथाशक्तिपथाविधि विशुद्धकुलचारित्रान्विष्णुपूजनतत्परान् पूजयित्वाद्विजान्सम्यक्त्रिंशद्द्वैभोजयेत्सुधीः नावंनिवस्त्रयुग्मानिआसनादिकमंडलून् योगपट्टादिशस्त्राणिब्रह्मसूत्राणिचैवहि दद्याच्चैवद्विजाग्र्येभ्यः पूतयित्वाप्रणम्यच ततोनुकल्पयेच्छय्यांशस्तास्तरणसंस्थिताम् वितानसंयुतांश्रेष्ठांसोपधानामलंकृतां विष्णोस्तुकारयेन्मूर्तिंकांचनींतुस्वशक्तितः न्यसेत्तस्यांतुशय्यायांअर्चयित्वास्रगादिभिः आसनंपादुकेच्छत्रंवस्त्रयुग्मसुपानहौ पवित्राणिचपुष्पाणिशय्यायामुपकल्पयेत् एवंशय्यांतुसंकल्प्यप्रणिपत्यचतान्द्विजान् प्रार्थयेज्ज्ञानुमोदार्थंविष्णुलोकंव्रजाम्यहम् एवमभ्यर्चिताविप्रावदेयुर्व्रतिनंतदा व्रजव्रजनरश्रेष्ठविष्णोःस्थानमनामयम् विमानंवैष्णवंदिव्यंसशय्यापरिकल्पितं तेनविष्णुपदंयाहिसदानंदमनामयम् ततोविसर्जयेद्विप्रान्प्रणिपत्यानुगम्यच ततस्तुपूजयेद्भक्त्यागुरुंज्ञानप्रदायकं तांशय्यांकल्पितांसम्यक्गुरुंव्रतसमापकम् प्रणम्यशिरसाशांतोगुरवेप्रतिपादयेत् एवंपूज्यहरिंविप्रंगुरुंज्ञानप्रकाशकं कृत्वामासोपवासंचनिर्वाप्यविधिवन्मुने कुलानांशतमुद्धृत्यविष्णुलोकंव्रजेन्नरः यस्मिन्वरेमहापुण्येकुलेमासोपवासकृत् सर्वपापविनिर्मुक्तोविष्णुलोकेमहीयते नरोमासोपवासानांकर्तापुण्यकृतांवरः पितृमातृकुलाभ्यांचसमंविष्णुपुरंव्रजेत् नारीवाविधवाजातायथोक्तव्रतचारिणी कृत्वामासोपवासंचव्रजेद्विष्णुंसनातनम् नारदउवा० सुदुष्करमिदंदेवमूर्च्छाग्लानिकरंपरम् व्रतंमासोपवासाख्यंभक्तिंजनयतेच्युते पीडितस्यभृशंदेवमुमूर्षोर्व्रतिनस्तदा त्यागोवानुग्रहोवाथकिंतुकार्यंपितामह ब्रह्मोवाच व्रतस्थंकर्षितंदृष्ट्वामुमूर्षुंवातपोधनम् दृष्ट्वानुब्राह्मणास्तस्यकुर्युःसम्यगनुग्रहम् अमृतंपायसंक्षीरमिच्छमानंसकृन्निशि यथेहनवियुज्येत प्राणैःक्षुत्पीडितोव्रती अतिमूर्च्छान्वितंक्षीणंमुमूर्षुंक्षुत्प्रपीडितं पाययित्वामृतंक्षीरंरक्षेद्दत्वाफलानिच अहोरात्रंचयोनित्यंव्रतस्थःपरिपालयेत् पयोमूलंफलंदत्वारक्षेच्चव्रतिनंसदा एवंमासोपवासस्यआरूढःप्राणसंशये अव्रतघ्नगुणैर्दिव्यैःपरीप्सेद्ब्राह्मणाज्ञया नैतेव्रतंविनिघ्नंतिहविर्विप्रानुमोदनम् क्षीरौषधंगुरोराज्ञातथापोमूलंफलानिच एवंकृत्वापिरसेनसगुडंपायसंतथा पायसेक्षीरतोयंचव्रतंपश्चात्समापयेत् अथविष्ण्वर्चनंविष्णुदानाविष्णुर्व्रतीतथा सर्वंविष्णुमयंज्ञात्वाव्रतस्थंक्षीणमुद्धरेत् यदामुमूर्षुर्निश्चेष्टःपरिग्लानोतिमूर्च्छितः तदासमुद्धरेत्क्षीणमिच्छंतंविमुखं-

स्थितम् परिपाल्यव्रतीदेहं व्रतशेषंसमापयेत् यथोक्तंहि गुणंतस्यफलंविप्रसुखोदितम् इंद्रियार्थेष्वसक्तोयःसदैवविमलामतिः परि
तोषयतेविष्णुंनोपवासोयतात्मनां किंतस्यबहुभिस्तीर्थैःस्नानहोमजपव्रतैः अजितोपींद्रियगणोजितोयेनस्वचेतसा जितेंद्रियःसदा-
शांतः सर्वभूतहितेरतः वासुदेवपरोनित्यंनक्लेशंकर्तुमर्हति कृत्वानूनंयथोक्तंतुवैष्णवंपदमव्यं प्राप्नोतिपुरुषोनित्यंपुनरावृत्तिदुर्लभम्
येस्मरंतिसदाविष्णुंविशुद्धेनांतरात्मना तेप्रयांतिभयंत्यक्त्वाविष्णुलोकमनामयं ततोविष्ण्वर्चनंसम्यक्प्रातःसायान्हमेवच कीर्तयंत्यच्यु
तंयेवैतेतरंतिभवार्णवं आनंदितोतिदुःखार्तःक्रुद्धःशांतोथवाहरिम् एवंयःकीर्तयेद्भक्त्यासगच्छेद्वैष्णवींपुरीम् गर्भजन्मजरारोगदुःख
संसारबंधनैः नबाध्यतेनरोनित्यंवासुदेवंमनःस्मरन् स्थावरेजंगमेसलिलेस्थूलेसूक्ष्मेशुभाशुभे विष्णुंपश्यतिसर्वत्रयःसविष्णुःस्वयंनरःस
र्वेविष्णुमयंज्ञात्वात्रैलोक्यंसचराचरम् यस्यशांतामतिस्तेनपूजितोगरुडध्वजः इदंकल्पानुकल्पाभ्यांव्रतानामुत्तमंव्रतम् विष्णुलोकम
वाप्नोतिचक्रपाणेःप्रसादतः विधिर्मासोपवासस्ययथावत्परिकीर्तितः कृतस्नेहान्मुनिश्रेष्ठसर्वलोकहितायच कृत्वाविष्ण्वर्चनंभक्त्या
नरोविष्णुपुरींव्रजेत् नाभक्तायप्रदातव्यंनदेयंदुष्टचेतसे इतिश्रीविष्णुरहस्योक्तंमासोपवासःव्रतंसंपूर्णम् अथआषाढशुक्लैका
दशीमारभ्यकार्तिकशुक्लैकादशीपर्यंतंधारणापारणाव्रतंलिख्यते कृष्णउवाच शृणुकौंतेयवक्ष्यामिधारणापारणाव्रतम् बांधवा
दिवधोत्पन्नदोषघ्नंचसुखप्रदम् कुलवृद्धिकरंचैवसर्वेंद्रियनियामकम् चातुर्मास्येतथाचादौमासिकौंतेयसुव्रतः पुण्याहंकारयेत्पू
र्वमेकादश्यांशुभेदिने पश्चात्संकल्प्यराजेंद्रतदारभ्यव्रतंचरेत् आदौमासितथाचांतेचातुर्मास्यमथापिवा एकस्मिन्धारणंकार्यंपारणं
चतथापरम् उपावासोधारणंस्यात्पारणंभोजनंभवेत् पारणेतुदिनेप्राप्तेअर्घ्यंपूर्वंनिवेदयेत् पारणंतुततःकार्यंमंत्रमष्टाक्षरंजपेत् अष्टो-
त्तरशतंदद्यादर्घ्यंदेवायतन्मनाः समाप्तेमासिराजेंद्रकुर्यादुद्यापनंबुधः चातुर्मास्यव्रतंचाथमासेमासेतुकारयेत् उपवासदिनेप्राप्तेपु
ण्याहंकारयेत्पुरा आचार्यंवरयेत्पश्चाद्ब्राह्मणंतुततःपरम् कुर्यात्तुप्रतिमांशुद्धांलक्ष्मीनारायणस्यवै पंचामृतैस्तथापुष्पैस्तुलसीदलपंच
कैः मालतीकेतकीमिश्रमल्लिकाकुसुमैस्तथा रात्रौजागरणंकुर्यात्पुराणपठनादिभिः प्रातःकालेसमायातेब्राह्मणांस्तुनिमंत्रयेत् मा

सेविप्राःपंचदशाद्विमासेद्विगुणंभवेत् चातुर्मास्येतथाराजन्ब्राह्मणांस्त्वश्शुचिव्रतान् पश्चात्स्नानादिकंकृत्वादेवपूजांसमाचरेत् पश्चादग्निंसमाधायहोमंकुर्याद्यथाविधि निषुसीदेतिमंत्रेणजुहुयाच्चतिलोदनम् अरायिकाणेमंत्रेणजुहुयाच्चघृतोदनं अष्टाक्षरेणमंत्रेणपायसंजुहुयात्ततः लक्ष्मीनारायणंदेवंस्थापयेत्तत्रदेवताः पूर्णाहुतिंततोहुत्वाहोमशेषंसमापयेत् ब्राह्मणान्भोजयेत्पश्चादाचार्यंपूजयेत्ततः एवंकृत्वामहाभागब्रह्महत्यादिपातकैः मुच्यतेनात्रसंदेहस्तस्मात्कुरुमहाव्रतं सुग्रीवस्तुपुराराजन्हत्वावालिनमाहवे रामादिष्टस्ततःकृत्वाधारणापारणाव्रतं विमुक्तस्तदादोषान्नानापातकसंचयात् नारदेनतथाराजन्पूर्वजन्मनिशूद्रतः द्विजानामुपदेशाच्चधारणापारणाकृता होमादिकंविधायाथतस्यपुण्यप्रभावतः जितेंद्रियस्ततोजातोब्रह्मलोकादिकांश्चरन् तस्मात्सर्वप्रयत्नेनकुर्याद्धारणपारणं इंद्रियाणांवशार्थायसर्वपापापनुत्तये तस्मात्त्वमपिराजेंद्रकुरुष्वव्रतमुत्तमं किंदानैस्तपसाकिंवानियमैश्चव्रतैर्यमैः धारणापारणाकुर्याद्व्रतानामुत्तमंव्रतं सर्वयज्ञेषुतीर्थेषुसर्वदानेषुयत्फलं तत्फलंसमवाप्नोतिकृत्वाधारणपारणं इदंव्रतंमहापुण्यंतपसामुत्तमंतपः तस्मात्त्वमपिराजेंद्रकुर्विदंविधिपूर्वकं बांधवादिवधाद्दोषान्मुच्यसेनात्रसंशयः इतितंसंभविष्याथविष्णुःस्वांचपुरींययौ वंद्यमानःपौरजनैःसमस्तैःपांडुनंदनैः युधिष्ठिरोपिराजर्षिश्चकारेदंमहाव्रतं विमुक्तःसर्वपापेभ्योवंशवृद्धिस्ततोभवत् इतिश्रीभविष्योत्तरपुराणेधारणापारणव्रतंसंपूर्णम्

अथसंक्रांतिव्रतानिलिख्यंते तत्रादौधान्यसंक्रांतिव्रतं हेमाद्रौस्कांदे नंदिकेश्वरउ० अथाहंसंप्रवक्ष्यामिधान्यव्रतमनुत्तमं यत्कृत्वेहनरोराजन्सर्वान्कामानवाप्नुयात् अयनेविषुवेचैवस्नानंकृत्वायथाविधि व्रतस्यनियमंकुर्याद्ध्यात्वादेवंदिवाकरं करिष्यामिव्रतंदेवत्वद्भक्तस्त्वत्परायणः तत्रविघ्नोनमेभूयात्तवदेवप्रसादतः इत्युच्चार्यलिखेत्पद्मंकुंकुमेनाष्टपत्रकं भास्करंपूर्वपत्रेतुआग्नेयेचतथारविं विवस्वंतंतथायाम्येनैर्ऋत्येपूषणंतथा आदित्यंवारुणेपत्रेवायव्येतपनंतथा मार्तंडमितिकौबेरऐशान्येभानुमेवच एवंचक्रमशोभ्यर्च्यविश्वात्मामध्यदेवता कृतांजलिपुटोभूत्वाअर्घ्यंदद्यात्समंत्रकं कालात्मासर्वदेवात्मावेदात्माविश्वतोमुखः व्याधिमृत्युजराशोकसंसारभयनाशनः इत्यर्घ्यमंत्रः पुष्पैर्धूपैःसमभ्यर्च्यशिरसाप्रणिपत्यच रविंध्यात्वाततोदद्याद्धान्यप्रस्थंद्विजातये प्रतिमासंपुनस्तद्वत्पूज्योदेवःसहस्र

पात् एवंसदाप्रदातव्यंधान्यप्रस्थंद्विजातये एवंसंवत्सरेपूर्णेकुर्यादुद्यापनक्रियां अर्घ्यपात्रंहिसौवर्णंकारयेन्मंडलंशुभं द्विभुजंपूजयेद्भानुंरक्तवस्त्रयुगान्वितं धान्यद्रोणेनसहितंतदर्धेनस्वशक्तितः स्वर्णशृंगींरौप्यखुरींकांस्यदोहांपयस्विनीं रविरूपंद्विजंध्यात्वातत्सर्वंविनिवेदयेत् अग्निष्टोमसहस्राणांफलंप्राप्नोतिमानवः सप्तजन्मसहस्राणिधनधान्यसमन्वितः निर्व्याधिर्नीरुजोधीमान्रूपवानभिजायते इतिश्रीस्कंदपुराणेधान्यसंक्रांतिव्रतम् अथलवणसंक्रांतिव्रतं अथातःसंप्रवक्ष्यामिलवणसंक्रांतिमुत्तमं संक्रांतिवासरंप्राप्यस्नानंकृत्वाशुभेजले वस्त्रालंकारसंवीतोभक्तिभावसमन्वितः कुंकुमेनलिखेत्पद्ममष्टपत्रंसकर्णिकं भास्करंपूजयेद्भक्त्याधान्यप्रस्थसमन्वितः तदग्रेलवणंपात्रंसगुडंस्थापयेत्ततः पूजितस्त्वंयथाशक्त्याप्रसीदममभास्कर लवणंसगुडंपात्रंब्राह्मणायनिवेदयेत् एवंसंवत्सरेपूर्णेभानुंकुर्याद्धिरण्मयं रक्तवस्त्रयुगच्छन्नंरक्तचंदनचर्चितं कंबलंलवणंपात्रंधेन्वासार्द्धंद्विजातये प्रदद्याद्भानुमुद्दिश्यविश्वात्माप्रीयतामिति

एवंकृत्वातुयत्पुण्यंप्राप्यतेभुविमानवैः तत्केनगदितुंशक्यंवर्षकोटिशतैरपि लवणाचलदानस्यफलंप्राप्नोतिमानवः सर्वकामसमृद्धात्माविमानवरमध्यगः सूर्यलोकेवसेत्कल्पंपूज्यमानःसुरासुरैः इतिलवणसंक्रांतिव्रतं

अथभोगसंक्रांतिव्रतं तत्रैव संक्रांतिदिवसंप्राप्यस्नात्वाचैवशुचिव्रतः सुवासिन्यैप्रदातव्यंनानासौभाग्यकंचुकम् कुंकुमंकज्जलंचैव सिंदूरंकुसुमानिच सुगंधीनिचद्रव्याणितांबूलंचशनाधिकम् तंडुलान्गुडसंयुक्तान्ताभ्योदद्याद्विचक्षणः दद्यात्सहृष्टमनसामिथुनेभ्योयथाविधि भोजयित्वायथाशक्त्यावस्त्रयुग्मंसदापयेत् एवंसंवत्सरस्यांतेरविंसंपूज्यपूर्ववत् धेनुंसदक्षिणांदद्यात्सपत्नीकद्विजायच स्यात्सुखीसर्वमर्त्येषुभोगीजन्मनिजन्मनि इतिभोगसंक्रांतिव्रतं अथरूपसंक्रांतिव्रतं तत्रैव संक्रांतिवासरेस्नानंकुर्यात्तैलेनवैसुधीः हेमपात्रंघृतयुतंहिरण्येनसमन्वितं स्वरूपंवीक्ष्यतत्पात्रंब्राह्मणायनिवेदयेत् एकभक्तंततःकृत्वापूजयित्वारविंव्रतीव्रतांतेकांचनंदद्याद्घृतधेनुसमन्वितम् इतिरूपसंक्रांतिः अथतेजःसंक्रांतिव्रतं शालितंडुलसंयुक्तंकरकंकारयेच्छुभम् दीपंसंस्थाप्यतन्मध्येज्वलितंतुस्वतेजसा सन्मुखेमोदकंस्थाप्यब्राह्मणायनिवेदयेत् रविंसंपूज्ययत्नेनअर्घ्यंदद्याद्विचक्षणः एकभक्तंचकर्तव्यं

यावत्संवत्सरंभवेत् संवत्सरेतुसंपूर्णेकुर्यादुद्यापनंबुधः शोभनंदीपकंकार्यंसुवर्णेनतुनारद ताम्रस्यकलशंकुर्याद्दीपंन्यस्यततोपरि कपिलासहदातव्याकरकेणद्विजातये इतितैजःसंक्रांतिः अथसौभाग्यसंक्रांतिव्रतं संक्रांतिवासरेप्राप्तेस्नात्वाचैवसुचिव्रतः पूर्ववद्भानुमभ्यर्च्यतथाचैवसुवासिनीं सौभाग्याष्टकसंयुक्तंवस्त्रयुग्मंतुयोषिते विप्रायवेदविदुषेभक्त्यातत्प्रतिपादयेत् एवंसंवत्सरेपूर्णेकुर्याद्ब्राह्मणपूजनं पर्वतंलवणंकृत्वायथाविभवसारतः कांचनंकमलंकृत्वाभास्करंचैवकारयेत् गंधपुष्पादिनापूज्यविप्रायप्रतिपादयेत् ऐक्षणंनृणराजंचनिष्पावाश्चसुशोभनाः धान्यकंजीरकंचैवकौसुंभंकुंकुमंतथा लवणंचाष्टमंतत्रविप्रायविनिवेदयेत् इतिसौभाग्यसंक्रांतिः अथतांबूलसंक्रांतिव्रतं संक्रांतौप्रातरुत्थायस्नात्वाचैवयथाविधि रविमभ्यर्च्ययत्नेनचंदनेनसुगंधिना तांबूलंचंदनाद्यैश्चपूजयेच्चद्विजोत्तमान् एवंसंवत्सरंकार्यंसंक्रांतौरविपूजनं तांबूलंभक्षयेद्विप्रैःकारयेत्तत्सुरःसरम् वत्सरांतेतुकमलंकृत्वाचैवतुकांचनं पर्णकोशंप्रकुर्वीततथापूगफलालयं चूर्णभांडंप्रकुर्वीतपूगप्रस्फोटनंतथा मुखवासादिचूर्णानांभांडानिविविधानिच द्विजदांपत्यमावाह्यसर्वोपस्करसंयुतैः द्रव्यैस्तत्पूजयेद्भक्त्याषड्रसैर्भोजयेद्द्विजान् उपकल्पितंतुयत्किंचिद्ब्राह्मणायनिवेदयेत् एवंकरोतियानारीतांबूलाख्यंव्रतोत्तमम् भर्त्रापुत्रैश्चपौत्रैश्चमोदतेस्वगृहेसदा इतितांबूलसंक्रांतिः अथमनोरथसंक्रांतिव्रतं गुडेनपूर्णकुंभेनवत्सरंतुस्वशक्तितः संक्रांतिवासरेदद्याद्ब्राह्मणायकुटुंबिने एवंसंवत्सरेपूर्णेप्रतिसंक्रमणेर्जिते रविमभ्यर्च्ययत्नेनकुर्यादुद्यापनंशुभं गुडस्यपर्वतंकृत्वावस्त्ररत्नैश्चभूषितम् अयनेचोत्तरेदद्याद्वित्तशाठ्यंनकारयेत् यंयंकामयतेकामंतंतंप्राप्नोतिपुष्कलं शेषंधान्यसंक्रांतिवत् इतिमनोरथसंक्रांतिव्रतंसंपूर्णम् अथआशोकसंक्रांतिव्रतम् अयनेविषुवेचैवव्यतीपातोभवेद्यदि एकभक्तंततःकुर्यात्तिलदानप्रपूर्वकम् कांचनंभास्करंकृत्वायथाविभवशक्तितः स्नापयेत्पंचगव्येनगंधपुष्पैस्तुपूजयेत् संच्छाद्यरक्तवस्त्राभ्यांताम्रपात्रेनिधायच भास्करायनमःपादौपूजयामि रवये॰ जंघेपू॰ आदित्याय॰ जानुनी॰ दिवाकराय॰ ऊरूपू॰ अर्यम्णेन॰ कटीपू॰ भानवेन॰ उदरंपू॰ पूष्णेन॰ बाहूपू॰ मित्राय॰ स्तनौपू॰ विवस्वते॰ कंठंपू॰ सहस्रांशवेन॰ मुखंपू॰ तमोहंत्रे॰ नेत्रे॰ तेजोराशये॰ शिरःपू॰ अरुणसारथिने॰ सर्वांगंपू॰ अर्घ्यंचपूर्ववत्कार्यंब्राह्मणा

यनिवेदयेत् एवंसंवत्सरेपूर्णेकांचनेनदिवाकरं संपूज्यपद्मकुसुमैर्यथाविभवसारतः धूपैर्दीपैश्चनैवेद्यैरक्तवर्णेनवेष्टितम् ततोहोमंप्रकु
र्वीतरविमंत्रेणनारद द्वादशाःकपिलादेयावस्त्रालंकारसंयुताः अशक्तःकपिलामेकांवित्तशाठ्यविवर्जितः आयुरारोग्यमैश्वर्यंभार्यापुत्रस
मन्वितः इतिअशोकसंक्रांतिः अथआयुःसंक्रांतिः अथान्यांचप्रवक्ष्यामिआयुःसंक्रांतिमुत्तमाम् संक्रांतिदिवसेस्नात्वापूजयेच्चदि
वाकरं कांस्येक्षीरंघृतंदद्यात्सहिरण्यंस्वशक्तितः मंत्राःपृथक्त्ववक्तव्याःपूजासैवप्रकीर्तिता तत्क्षीरंसुरभीजातंपीयूषंसमसर्पियुक् आ
युरारोग्यमैश्वर्यमतोदेहिद्विजातये अनेनविधिनावर्षंसर्वंदद्यादतंद्रितः उद्यापनादिकंसर्वंधान्यसंक्रांतिवद्भवेत् निर्व्याधिश्चैवदीर्घायु
स्तेजस्वीकीर्तिमांस्तथा अपमृत्युभयंनास्तिजीवेच्चशरदांशतं इतिआयुःसंक्रांतिः अथधनसंक्रांतिव्रतं संक्रांतिदिवसेपूज्यो-
भास्कररक्तविधानतः कलशंनिर्व्रणंगृह्यवारिपूर्णंनिधापयेत् सुवर्णप्रतिमांकृत्वाप्रतिमासंतुदापयेत् विधिनानेनवर्षांतेप्रीयतांमेदि
वाकरः भानोरुदयवेलायांस्नात्वासूर्यंप्रपूजयेत् कृसरान्नेनपक्वान्नघृतयुक्तेनभूषिणा ब्राह्मणान्भोजयेद्यत्नाच्चापेमासेदिवाकरे पू
जाविधानंतद्वत्तुधान्यसंक्रांतिवद्भवेत् सौवर्णकलशंकृत्वासूर्यंचोपरिविन्यसेत् सुवर्णघटितंपद्मंसूर्यायविनिवेदयेत् गोदानंतत्प्रदात
व्यमेवंसंपूर्णतांव्रजेत् जन्मनांशतसाहस्रंधनयुक्तोभवेन्नरः आयुरारोग्यसंपन्नःसूर्यलोकेमहीयते इतिधनसंक्रांतिः अथसर्वसं-
क्रांत्युद्यापनंलिख्यते हेमाद्रौमात्स्ये नंदिकेश्वरउवा॰ अथान्यदपिवक्ष्यामिसंक्रांत्युद्यापनंफलं विषुवेचायनेचैवसंक्रांतिव्रतमाच
रेत् पूर्वेद्युरेकभक्तेनदंतधावनपूर्वकं संक्रांतिवासरेप्रातस्तिलैःस्नानंसमाचरेत् रविसंक्रमणेभूमौचंदनेनाष्टपत्रकं पद्मंसकर्णिकंकु-
र्यात्तस्मिन्नावाहयेद्रविं कर्णिकायांन्यसेद्देवमादित्यंपूर्ववत्तथा नमःसोमार्चिषेचाग्नेयाम्येऋग्मंडलायच नमःसवित्रेनैर्ऋत्येवारुणेत
पनंबुधः वायवेमित्रमावाह्यपूजयेच्चयथाक्रमं मार्त्तंडमुत्तरेविष्णुमीशान्येविन्यसेत्सदा द्विजायसोदकंकुंभंतिलपात्रंहिरण्मयम् कमलं
तुयथाशक्त्याकारयित्वानिवेदयेत् चंदनोदकपुष्पैश्चदेवायार्घ्यंन्यसेद्भुवि विश्वायविश्वरूपायविश्वधाम्नेस्वयंभुवे नमोनंतनमोधात्रेऋ
क्सामयजुषांपते अनेनविधिनासर्वमासिमासिसमाचरेत् वत्सरांतेतथाकुर्यात्सूर्यंद्वादशधानरः संवत्सरांतेघृतपायसेनसंतर्प्यवन्हिंद्वि

जपुंगवान्वै कुंभान्पुनर्द्वादशधेनुयुक्तान्समर्प्यहैरण्मयपद्मगर्भान् पयस्विनीःशीलवतीश्चदद्यात्ताश्चास्वरूपेणसुवर्णयुक्ताः गावोथवासत्वकांस्यदोहामाल्यांबरावाचतुरोप्यशक्तः द्वेवाप्यशक्तःकपिलामथैकांनिवेदयेद्ब्राह्मणपुंगवाय हैमींचदद्यात्पृथिवीमशेषांकृत्वाथरौप्यामथवासुनाम्नीं पैष्टीमशक्तोयतिलैर्विधायसौवर्णसूर्येणसमंप्रदद्यात् नवित्तशाठ्यंपुरुषोत्रकुर्यात्कुर्वन्नधोयातिनसंशयोत्र यावन्महेंद्रप्रमुखानगेंद्राःपृथ्वीचससप्ताब्धियुतेहतिष्ठेत् तावत्सगंधर्वगणैरशेषैःसंपूज्यतेनारदनाकपृष्ठे ततस्तुभूमौद्विजवर्यजोवाक्षत्राधिपःस्यात्कुलशीलयुक्तः सृष्टेर्मुखेपुंगवपुःसभार्यःप्रभूतपुत्रोरिपुवंदितांघ्रिः इतिसंक्रांत्युद्यापनं अथधनसंक्रमणेविशेषः रवौधनुषिसंप्राप्तेस्नायादर्णोदयेसदा सर्वंनैत्यंचसंपाद्यमुहूर्त्तेनगतोरविः कृसरान्नेनविप्रान्वैभोजयेद्घृतपायसैः दक्षिणाभिश्चसंतोष्यस्वयंभुंजीतवाग्यतः एवंनिरंतरंकुर्यादशक्तोभानुवासरे इहभुक्त्वातुभोगान्वैसूर्यलोकंसगच्छति इतिधनुर्मासमहिमा अथरवेर्घृतस्नपनंहेमाद्रौभविष्ये उत्तरेखयनेप्राप्तेघृतप्रस्थेनयोहरिं स्नापयित्वाब्राह्मणेभ्योयःप्रयच्छतिमानवः घृतधेनुंतथादद्याद्ब्राह्मणायकुटुंबिने सर्वपापविनिर्मुक्तःसूर्यलोकेचिरंवसेत् ततोभवतिभूपालःप्रजानंदविवर्धनः इतिउदगयनेघृतस्नपनं अथमकरसंक्रांतौशिवरहस्येघृतकंबलदानमहिमा माघेमासिमहादेवंयःकुर्याद्घृतकंबलं सभुक्त्वासकलान्भोगानंतेमोक्षंचविंदति नराभूपतयोजाताघृतकंबलदानतः जातिस्मराश्चतेजातामुक्ताश्चांतेशिवार्चकाः पुराकृतनागसंविप्रंजाबालिंश्रुतिपारगं प्रपच्छशूलकर्णाख्योधर्मंदारिद्र्यनाशकं कृतनागाउवाच असितायाःसितायावाधेनोर्घृतमनुत्तमम् संपादनीयंयत्नेनघनीभूतंचशोभनं तद्घृतंतुलयोत्तीर्णंप्रस्थसार्द्धशतत्रयम् महाकंबलमेतद्धिघृतस्यपरिकीर्तितं तदर्धंवातदर्धंवासायंनेयंशिवालये घृतेनान्येनदेवेशमभिषिच्यमहेश्वरं ततोघृतंघनीभूतमर्पयेच्छिवमस्तके ततस्तिलैःसर्षपैश्चबिल्वपत्रैश्चकोमलैः हेमपद्मैश्चदेवेशःपूजनीयोमहेश्वरः धूपदीपादिकंदेयंमहानैवेद्यमादरात् ततोनीराजनंदत्वादेयःपुष्पांजलिस्ततः प्रदक्षिणांनमस्कारान्कृत्वाचतदनंतरं शैवंपंचाक्षरंजप्त्वाशिवायैतन्निवेदयेत् ततोजागरणंकुर्याच्छिवस्मरणपूर्वकम् ततःप्रातःसमुत्थायकृत्वास्नानादिकंपुनः पूजनीयोमहादेवोघृतसेचनपूर्वकम् भोजनीयास्तथाशैवाभक्ष्यैर्भोज्यैश्चयत्नतः

ततःस्वयंचभोक्तव्यंबंधुभिःसहसादरं अनेननवदारिद्र्यंनाशमेष्यतिसर्वथा भोगांश्चविपुलान्भुक्त्वाशिवलोकंगमिष्यसि इतिमकरसंक्रांतौघृतकंबलदानंसमाप्तम् अथमकरसंक्रमणेदधिमंथनदानं तद्विधिः मासपक्षाद्युल्लिख्य ममेहजन्मनिजन्मांतरेचअखंडितसौभाग्यपुत्रपौत्रधनधान्याभिवृद्ध्यर्थंश्रीसवितृसूर्यनारायणस्वरूपिणेब्राह्मणायदधिमंथनदानंकरिष्ये इतिसंकल्प्य तिलोद्वर्त्तनपूर्वकंस्नात्वाशुचिवस्त्रंपरिधाययशोदाकृष्णसुवर्णप्रतिमांसंपूज्यप्रार्थयेत् यशोदेत्वंमहाभागेसुतंदेहिमनोरमं पूजितासिमयादेवि दधिमंथनभाजने श्रीकृष्णपरमानंदसंसारार्णवतारक पुत्रंदेहिमनोज्ञंचऋणत्रयविमोक्षणं इतिप्रार्थ्य दानमंत्रः गृहाणत्वंद्विजश्रेष्ठदधिमंथनभाजनं नवनीतेनसहितंदेवक्यासहितंहरिं प्रसादःक्रीयतांमह्यंसूर्यरूपनमोस्तुते ब्रह्मांडपुराणेरंगदानमाहात्म्येकृपांप्रतिदुर्वाससोपदिष्टं अथकथा सूतउवाच पीडिताहंदरिद्रेणअपुत्राचतपोधन तपसोभंगभीत्याच्चयत्नंनाचरतेपतिः ममसर्वस्वमेकागौस्वल्पदोहावयोमहत् जीवनंममतक्रेणधर्मवार्तागरीयसी केनोपायेनभोब्रह्मन्तन्मेब्रूहिसुखंमम दुर्वासाउवाच दानंदेहिचसुभगेयेनपूर्णमनोरथा नंदजायासुतंलेभेब्रह्माद्यैःपूजितंमहत् श्रीकृष्णाख्यंपरंतत्वंयोगिभिश्चदुरासदम् दधिमंथनदानंचपुत्रप्राप्तिकरंपरं नान्यदस्तिदरिद्राणांदानादस्मात्कथंचन तस्मात्त्वमपिदेयंमेक्षुधितायतपस्विने भविष्यतितवसुतोचिरंजीवीशुचिव्रतः विरच्यस्वस्तिकंपूर्वमनुलिप्यमहीतलं द्रोणमानंधान्यपुंजंगोधूमैश्चविशेषतः दध्यमत्रकमासाद्यकृष्णलीलाहृदिस्मरन् संसिद्धमथनेतस्मिन्सौवर्णींप्रतिमांतथा संकल्पादिविधायाशुपूज्यभाजनमंथकं हरिद्राकुंकुमाद्यैश्चदधिभांडंविलेपयेत् रक्तसूत्रेणसंवीतंरक्तवस्त्रेणवेष्टयेत् माल्यैरक्तैश्चसंयुक्तैर्देवीमावाहयेत्तथा सूर्यंचावाहयेद्दंडेदीपानष्टौप्रदीपयेत् लड्डुकान्पृथुकान्लाजानिक्षुखंडानिवैतथा नानाविधानिखाद्यानिसमंतात्स्थापयेत्ततः कृष्णप्रीतिकरंह्येतद्धनधान्यसमृद्धिदम् क्षौमंवासःपृथुकटितटेबिभ्रतीसूत्रनद्धंपुत्रस्नेहस्नुतकुचयुगंजातकंपंचसुभ्रूः रज्वाकर्षश्रमभुजलसत्कंकणौकुंडलेचस्विन्नंवक्त्रंकबरविगलन्मालतीनिर्ममंथ परिधीवस्त्रमासाद्ययाचेजननींहरिः गृहीत्वादधिमंथानंन्यषेधत्प्रीतिमावहन् नानाखाद्यैर्वारितोपिनचमुंचतिमाधवः अंकमारुह्यस्तन्यं

सपिबन्मुखंविलोकयन् विचित्रैःपट्टकूलैश्चगंधमाल्यैर्विशेषतः पूजयित्वाप्रसाद्यैवंयशोदांपुत्रवत्सलां यशोदेत्वंमहाभागेसुतंदेहिम
नोरमं पूजितासिमयादेविदधिमंथनभाजने श्रीकृष्णपरमानंदसंसारार्णवतारक पुत्रंदेहिमनोज्ञंमेऋणत्रयविमोक्षणं ब्राह्मणंवेदवेत्ता
रमुपवेश्यसुखासने गंधमाल्यैश्चसंपूज्यदानंदद्याद्विजातये गृहाणत्वंद्विजश्रेष्ठदधिमंथनभाजनं नवनीतेनसहितंदेवक्यासहितंहरिं
प्रसादःक्रीयतांमह्यंसूर्यरूपनमोस्तुते दुर्वाससोपदिष्टासाद्रोणभार्यासुलोचना मकरस्थेयदासूर्येतिलोद्वर्त्तनपूर्वकं स्नात्वाचजान्ह
वीतोयेसंप्रार्थ्यमुनिपुंगवं पूजयित्वामुनिंसापिअददद्धिमंथनं अश्वत्थामानंचसुतंदधिमंथनदानतः कृपीलेभेसुयशसंऋणत्रयवि
मोक्षणं मुक्तादारिद्र्यदुःखात्साबुभुजेभोगमुत्तमं एवंपूर्वंकृपीकृत्वाआनंदंसमपद्यत एवंयाकुरुतेनारीवित्तशाठ्यविवर्जिता सर्वान्का
मानवाप्नोतिसूर्यलोकेमहीयते इतिश्रीब्रह्मांडपुराणेमकरसंक्रांतौदधिमंथनदानंसंपूर्णं अथतांबूलोद्यापनं युधिष्ठिरउवाच
तांबूलदानमाहात्म्यंकथयस्वममप्रभो उद्यापनविधिंतस्यसर्वकामार्थसिद्धये श्रीकृष्णउवाच सर्वेषामेवदानानांतांबूलंचोत्तमंस्मृ
तं आनंदोदीर्घमायुष्यंसौमनस्यंचपुष्टिदं सौभाग्यंचंदनादिभ्योविद्यालाभस्तथैवच एतच्चतुष्टयंराजन्तांबूलाल्लभतेनरः सुसिता
साहरंस्वादुसौभाग्यंनिर्मलंस्मृतं द्वात्रिंशत्पत्रकैर्युक्तंपूगीफलसमन्वितं एलालवंगकर्पूरैर्युक्तंतांबूलमुच्यते यथालाभंभवेद्वापिदेयंद्वि
जवरायच द्विजाभावेसुवासिन्यैतदभावेकुमारिकां उद्यापनंप्रकर्तव्यंयथाविभवसारतः शुभेन्हिमासेकर्तव्यंकृत्वैवैवाहिकेततः
पंचसप्तचसद्विप्रान्सपत्नीकान्प्रपूजयेत् पूर्वरात्रौचसंपूज्यलक्ष्मीनारायणावुभौ उमामहेश्वरौपूज्यौब्रह्माणंसावित्र्यासह रतिंच
पंचबाणंचपूजयेच्चयथाविधि ऋद्धिंसिद्धिंविघ्नराजंलोकपालांश्चपूजयेत् रात्रौपूजाप्रकर्तव्याषोडशैरुपचारकैः तांबूलोपस्करांत
त्रसंस्थाप्योत्तरदेवताः पुरुषोत्तमाय॰ शार्ङ्गपाणये॰ गरुडध्वजाय॰ यज्ञपुरुषाय॰ पुंडरीकाक्षाय॰ नित्याय॰ वेदगर्भाय॰ गोवर्द्धनाय॰ सु
ब्रह्मण्याय॰ शौरिणेन॰ ईश्वराय॰ एतानिद्वादशनामानिपूजनेहवनेतथा घृतंवापायसंवापिपंचामृततिलोदनं तत्तन्मंत्रैश्चहोतव्यंअ
ष्टाविंशतिसंख्यया पर्णस्थापनपात्रंचचूर्णपात्रंतथैवच स्वर्णरौप्यमयंवापिपित्तलंसीससंभवं सर्वशोभासमायुक्तांलोहजांपूगभाजिकां

तेषांपूजाप्रकर्तव्यागंधपुष्पादिभिस्तथा पूर्णाहुतिंततःकुर्याद्ब्राह्मणान्भोजयेत्ततः तांबूलंसुष्ठुयोदद्याद्ब्राह्मणेभ्योतिभक्तितः मेधावी-
सुभगःप्राज्ञोदर्शनीयश्चजायते फलेनतृप्यतेब्रह्मापत्रेणभगवान्हरिः चूर्णमीश्वरतृप्त्यर्थंखदिरःकामतृप्तये कर्पूरैलालवंगादिजातिपत्र-
फलैस्तथा इंद्राद्यालोकपालाश्चसंतुष्टाश्चभवंतिहि वारिदःसुखमाप्नोतिराज्यंप्राप्नोतिचान्नदः दीपदश्चक्षुराप्नोतित्रयंतांबूलदानतः ए
वंकृतेविधानेनसर्वान्कामानवाप्नुयात् इतिवायुपुराणेतांबूलव्रतोद्यापनंसंपूर्णम् अथमौनव्रतोद्यापनं नारदउवाच ब्रह्मन्ब्रूहिम
मत्वंवैमौनव्रतफलंशुभं फलंकिमस्यदानंवाकथमुद्यापनंभवेत् ब्रह्मोवाच शृणुनारदयत्नेनसावधानेनचेतसा चातुर्मास्येव्रतंकु
र्यान्मौनाख्यंव्रतमुत्तमं यस्याचरणमात्रेणगम्यतेविष्णुमंदिरम् विधिंतस्यप्रवक्ष्यामिशृणुनारदमन्मुखात् व्रतमध्येव्रतस्यांतेव्रता
दौवायथाविधि उद्यापनंप्रकुर्वीतव्रतसंपूर्णहेतवे स्नात्वानित्यविधिंकृत्वाकुर्यात्संकल्पमादृतः सर्वतोभद्रमालिख्यतत्रविष्णुंप्रपूज
येत् लक्ष्म्यायुतंतुदेवेशंब्रह्माद्यादेवतास्तथा द्वारदेशेतुसंपूज्यौपुण्यशीलसुशीलकौ जयंचविजयंचैवगदादीन्यायुधानिच मंडपंतो
रणैर्युक्तंपट्टवस्त्रेणभूषितं सुवर्णप्रतिमांतत्रघंटांगरुडलांछितं उपचारैःषोडशभिरर्चयित्वारमापतिं रात्रौजागरणंकुर्याद्गीतवाद्यादि
मंगलैः घृतेनाष्टोत्तरशतंपावकेहवनंचरेत् अतोदेवेतिमंत्रेणब्राह्मणान्भोजयेत्ततः पीठदानंततःकुर्याद्घंटादानंतथैवच घंटादानस्यमा
हात्म्यंवक्तुंकेनसुशक्यते दीपदानंततःकुर्याद्व्रतसंपूर्णहेतवे इदंव्रतंमयापूर्वंकृतमुत्पत्तिहेतवे तेनव्रतप्रभावेनसृष्ट्युत्पत्तिर्मयाकृता कर्त
व्यंतुप्रयत्नेनसर्वकामार्थसिद्धये यइदंकुरुतेवत्सससाक्षान्मामकीतनुः इतिश्रीब्रह्मांडपुराणेब्रह्मनारदसंवादेमौनव्रतोद्यापनंसंपूर्णम्

अथप्रपादानविधानं युधिष्ठिरउवा० कथंकृष्णतरंत्यत्रसंसारगह्वरान्नराः स्वल्पेनैवतुकालेनतथादानेनमेवद कृष्णउवाच
विधानमेकमतुलंसामान्यंनरसेवितं विधिंप्रपाख्यंराजेंद्रकथ्यमानंशृणुष्वतत् यस्मिन्पथिजलंनास्तिनास्तिग्रामःसमीपगः प्रपातत्र
प्रकर्तव्यास्वर्गकामैःशुभैर्नरैः माघमासेसितेपक्षेशिवरात्रौविशेषतः कृत्वातुमंडपंरम्यंचतुर्द्वारंसुशोभितं छायाशीतमयीकार्यादृढैः
स्तंभैर्विशेषतः एकवक्त्राद्विवक्त्रावापूर्वोत्तरमुखाशुभा मार्गाणांयत्रबाहुल्यंतत्रकार्याविचक्षणैः दृढांस्ताम्रमयान्रम्यान्मृन्मयान्वास

माहितः पूजांचैवसमादिश्यसर्वकामःप्रयत्नतः प्राह्डायानियावद्भैर्जलैःकुंभान्प्रपूजयेत् यवागूंतक्रसंयुक्तांव्यंजनैस्तुसमन्वितां अन्यैश्च
बहुभिर्द्रव्यैःशर्करापानकैर्युतां तक्रंलवणसंयुक्तंतांबूलंचयथाविधि प्रपायांभोजयेच्छक्त्याजलंवाकेवलंशुभं ब्राह्मणार्थंपृथक्पात्रंब्रह्मचि
ह्नेनलक्षितं स्वस्तिवाचनपूर्वंतुसर्वमेतत्प्रकल्पयेत् एवंविधाप्रपाप्रोक्ताविद्वद्भिर्धर्मकोविदैः शिशूनांजननीयद्वत्स्तनृडाहरणेक्षमा सर्वेषा
मपिवर्णानांप्रपावैपोषणेक्षमा नदंतिपितरस्तस्यतुष्यंतिकुलदेवताः स्तुवंतिमनुजास्तंतुयेनाध्वनिकृताप्रपा क्रतुकोटिशतैर्यच्चपुण्यंतल
भतेनरः उद्यापनविधिंकृत्वाप्रपादानमनुत्तमम् तस्याःसर्वाणिपात्राणिब्राह्मणायनिवेदयेत् भोजयेच्चयथाशक्त्याब्राह्मणांस्तोषयेत्त
तः प्रपामंदिरदानेनकृतकृत्योभवेन्नरः दुर्भिक्षेग्रासमात्रान्नंग्रीष्मेबिंदुसमंजलं तत्तुल्यंक्रतुलक्षेणद्वयमेतत्ततोधिकं एवंविधाप्रपाप्रो
क्तामुनिभिस्तत्त्वदर्शिभिः वरावालघुवाराजन्सर्वकामविवर्धिनी कावडिस्थेनयत्नेनमार्गेतत्प्रापयेज्जलं इतिश्रीभविष्योत्तरपुराणे
प्रपादानंसोद्यापनंसंपूर्णम् अथलक्षपद्मविधिः ब्रूहिकृष्णव्रतंश्रेष्ठंमुक्तिदंदुःखनाशनं पुत्रपौत्रादिकंचैवकृपयामधुसूदन श्री
कृष्णउवाच शृणुराजन्प्रवक्ष्यामिव्रतानामधिकंव्रतं सर्वदुःखहरंस्त्रीणांसर्वकामफलप्रदं लक्षपद्मंरंगवल्याशुभेमासिसमारभेत्
गुरुशुक्रास्तरहितेशुक्लवर्णेनयत्नतः तंडुलैःपूजयेच्छ्वेतैःसूर्यस्थंजगदीश्वरं उद्यापनंसमाप्तौचकुर्याद्यत्नेनसिद्धये संपूर्णंजायतेयेन
तच्छृणुष्वप्रयत्नतः सूर्यस्यप्रतिमांकुर्यात्स्वर्णस्यचशक्तितः वेदिकायांप्रकर्तव्यंस्वस्तिकंपद्मसंयुतं तन्मध्येकलशंस्थाप्यरक्तवर्णेन
वेष्टितं पंचामृतेनसंस्नाप्यदेवंतत्रप्रपूजयेत् गंधपुष्पाक्षतैर्दिव्यैर्धूपदीपादिभिःशुभैः स्वर्णनिर्मितंपद्मंदेवायविनिवेदयेत् आचार्यं
वरयेत्तत्रवेदवेदांगपारगम् ततोहोमःप्रकर्तव्यस्तिलाज्यैःपायसैस्तथा अष्टोत्तरंसहस्रंवाशतत्रयमथापिवा गायत्रीमंत्रतःकुर्यान्मूल
मंत्रेणहोमयेत् गोदानंचप्रकर्तव्यंसूर्यस्यहरितुष्टये ब्राह्मणान्भोजयेच्छक्त्याशर्कराघृतपायसैः तेभ्योपिदक्षिणांदद्याद्वित्तशाठ्य
विवर्जितः प्रतिमांकलशंचैवदद्यात्पूजादिकंतथा अतोदेवेतिमंत्रेणआचार्यायनिवेदयेत् प्रदक्षिणांनमस्कारंकुर्यान्मूर्ध्निकृतांजलिः
श्रीकृष्णउवाच एतत्तेव्रतमाख्यातंस्त्रीणांकामफलाप्तये पुत्रपौत्रादिसंतानवृद्ध्यर्थंकुरुनंदन यानारीकुरुतेभक्त्याहरिस्तस्याः

प्रसीदति इतिश्रीसौरपुराणेलक्षपद्मप्रकरणोद्यापनंसंपूर्णम् अथलक्षदीपदानविधिः स्कंदउवाच रुद्रसंख्याशिवायाथप्र
र्पयेद्दीपमुत्तमं वर्षमेकंतदर्धंवावर्षद्वयमथापिवा लक्षसंख्यानदर्धंवाद्विलक्षंवास्वशक्तितः लक्षदीपंप्रकुर्वंतिनराःपरमधार्मिकाः घृ
तेनयेप्रकुर्वंतितेषांपुण्यंवदामिते दीपमालांयथाशक्त्याकार्तिकेश्रद्धयान्विताः यावत्कालंप्रज्वलंतिदीपायस्यशिवाग्रतः तावद्युगसह
स्राणिस्वर्गलोकेमहीयते कौसुंभेनचतैलेनदीपान्दद्याच्छिवालये तेनपुण्येनकैलासेवसतेशिवसन्निधौ अतसीतैलसंयुक्तान्दी
पान्दद्याच्छिवालये दशपूर्वान्दशपरान्युक्तोगच्छेच्छिवालये ज्ञानिनोहिभविष्यंतिदीपदानफलेनहि तिलतैलेनयोदीपान्ददतेच
शिवालये तेजस्विनोमहाभागाःकुलेनचशतेनवै तैलयुक्ताःकृतादीपादापिताश्चशिवालये आर्तिक्यंचसकर्पूरंयेकुर्वंतिदिनेदिने तेप्रा
प्नुवंतिसायुज्यंनात्रकार्याविचारणा लक्षदीपस्यसंपूर्त्यैकार्यमुद्यापनंबुधैः उपवासंप्रकुर्वीतपूर्वस्मिन्दिवसेतदा कर्षमात्रसुवर्णेनतद
र्धार्धेनवापुनः प्रतिमांशंकरस्याथउमयासहितस्यच आचार्यंवरयेत्तत्रअभिज्ञंवेदपारगं कलशंस्थापयेद्व्रीहौस्वस्तिवाचनपूर्वकं उमा
महेश्वरंरम्यंस्थापयेत्कलशोपरि उपचारैःषोडशभिःपूजयेच्चपृथक्पृथक् रात्रौजागरणंकुर्यात्पुराणश्रवणादिभिः प्रातःस्नानंविधा
याथहोमकर्मसमारभेत् तिलसर्पिर्यवैश्चापिचरुणाबिल्वपत्रकैः आज्यप्लुतैश्चप्रत्येकंसद्योजातादिमंत्रतः शतमष्टोत्तरंहुत्वाहोमशे
षंसमापयेत् उमामहेश्वरंदेवंपूजयेत्तुपुनर्व्रती प्रतिमांवस्त्रसहितामाचार्यायनिवेदयेत् सहिरण्यांसवत्सांचधेनुंदद्यात्प्रयत्नतः अने
नविधिनायस्तुव्रतमेतत्समाचरेत् सभुक्त्वाविपुलान्भोगान्शिवसायुज्यमाप्नुयात् ब्राह्मणान्भोजयेत्पश्चाद्वस्त्रालंकारभूषणैः गुरो
राज्ञांगृहीत्वातुभुंजीयाद्बंधुभिःसह एवंयःकुरुतेमर्त्योलक्षदीपप्रदीपनं नरोवाप्यथवानारीसोश्नुतेपदमव्ययं ज्ञानमुत्पद्यतेतस्यसंसा
रभयनाशनम् सर्वपापक्षयकरंजन्मजन्मार्जितंचयत् बाल्येवयसियत्पापंयौवनेवापियत्कृतं वार्धकेपिकृतंपापंतत्सर्वंनश्यतिध्रुव
म् सर्वपापविनिर्मुक्तोभुक्त्वाभोगान्महीतले सर्वान्कामानवाप्याथसोश्नुतेपदमव्ययम् इतिश्रीस्कंदपुराणेलक्षदीपोद्यापनंसं०
अथलक्षदूर्वापूजनविधिः शूरसेनउवाच लक्षपूजाविधिंसम्यक्कथयस्वममाग्रतः यंकृत्वाप्राणिनःसर्वेभवंतिसुखभागिनः

श्रावणेचचतुर्थ्यांतुभौमवारोयदाभवेत् शुभेन्हिवासरेवापिपूजाकर्मसमारभेत् दंपत्यूचतुः चक्रवर्तीनृपोजातोनेनतृप्तिंनवै
गमःआवाभ्यांतुदरिद्राभ्यांकिंदेयंतृप्तिकारकं नदीनदजलैर्योब्धिरसंख्यैर्नापिपूर्यते बिंदुमात्रेणसहसासकथंपूर्यतेवद कौंडि
ण्यउवाच भक्त्यादत्तंस्वल्पमपिबहुतृप्तिकरंमम अभक्त्यायच्चदंभेनबहुदत्तंवृथाभवेत् दंपत्यूचतुः आवयोर्नगृहेकिंचिच्छु
भंवस्तुद्विजोत्तम पूजायैगणनाथस्यप्रातर्दूर्वांकुराहृताः पूजितोगणनाथस्तैःसएकोत्यवशिष्यते भक्त्यादत्तःसएकोपितृप्तये
स्यात्तदीयतां कौंडिण्यउवाच विरोचनाददौतस्मैश्रुत्वावाक्यंतदीरितं एकंदूर्वांकुरंभक्त्यातेनतृप्तोभवद्विजः शाल्यन्नंपा
यसान्नंचनानापक्वान्नमेवच व्यंजनान्यपिसर्वाणिलेह्यचोष्यान्यनेकधा भक्त्याविरोचनादत्तेजातंदूर्वांकुरेखिलं गृहीत्वाब्रा
ह्मणस्तत्तुबुभुक्षुःपरयामुदा तस्मिन्दूर्वांकुरेभक्त्यादत्तेतेनाथभक्षिते प्रथमस्याद्विजस्यास्यतत्क्षणाज्जठरानलः तृप्तिश्चपर
मातेनप्रासातत्क्षणमात्रतः आलिलिंगत्रिशिरसंतृप्तोहंहर्षयन्द्विजः तत्याजकुत्सितंरूपंप्रकटोभूद्गजाननः चतुर्भुजोरविंदाक्षः
शुंडादंडोविराजितः कमलंपरशुंमालांदंतंकरतलेदधत् महार्हमुकुटोराजत्कर्णेकुंडलमंडितः दिव्यवस्त्रपरीधानोदिव्यगं
धानुलेपनः उवाचतौप्रसन्नात्मादंपतीसगजाननः वृणीतंवरंशीघ्रंमनसायोयइच्छितः तावूचतुः जन्मजन्मांतरेवापिभक्ति
रस्तुदृढावयोः मुक्तिर्वादीयतांदेव अस्मात्संसारसागरात् नायाचेकिंचिदन्यंहिपादपद्मादिभानन कौंडिन्यउवा॰ इतित-
द्वाक्यमाकर्ण्यतथेत्युक्त्वागजाननः पुनरालिंग्यप्रददेभक्तिंत्रिपुरसूदनः एतस्मात्पूर्वभारोस्मैदीयतांदीयतेमया असंख्यभक्ष
णाद्देवोनतृप्तिंचसमाययौ दूर्वांकुरेणचैकेनतृप्तिंचपरमांययौ इतिसम्यक्समाश्राव्यमहिमानंपरंशुभं दूर्वासमर्पणेनैवसभवे
त्सर्वकामदः इतिहासमिमंभक्त्याशृणुतेश्रावयेच्चयः सपुत्रधनमाप्नोतिस्वर्गलोकेचमोदते गजाननेचयोभक्तिंनिष्कामोमुक्तिमा
प्नुयात् श्रुत्वापीत्थमितीहासंआश्रयात्संशयंपुनः प्रपेदेहृदितंज्ञात्वाकौंडिन्योमुनिरब्रवीत् आश्रयेशृणुमेवाक्यंसंशयास्यापनुत्त
ये यद्ददामिहृदिस्थस्यमयाज्ञातस्यतेनघे एकंदूर्वांकुरंगृह्यगच्छशीघ्रंबिडौजसं वदाशीर्वचनंपूर्वपश्चाद्याचस्वकांचनं दूर्वांकुरेण

तुलितंगृहीत्वातुइहानय नन्यूनंनाधिकंग्राह्यंतस्यभाराच्छुभानने आज्ञांप्राप्यमुनेःसातुप्रस्थितासार्थसिद्धये एकंदूर्वांकुरंगृह्यशक्रसंनिधिमाययौ तंप्रुवाचाश्रयाशक्रदेहिमेकांचनंशुभं याचितुंत्वांसमायाताभर्तृवाक्यात्सुरेश्वर इंद्रउवाच किमर्थंत्वमिहायाताममाज्ञाप्रेषिताभवत् मयातुप्रेषितंतस्यस्वशक्त्यातुस्वर्णकं आश्रयोवाच दूर्वांकुरस्यतुलयायद्भवेत्कांचनंशुभं गृहीष्येशचिभर्तस्त्वंन्यूनंनचयतोधिकं इंद्रउवा० दूर्वांकुरप्रमाणंमेनास्तिद्रव्यंशुभानने कुबेरभवनंगच्छजातरूपंप्रदास्यति इंद्रेणप्रेषितासाध्वीमुनिपत्नीमयासह प्रापितंभुवनंतेद्यदेहिदूर्वामितंधनम् कुबेरउवाच अत्याश्चर्यमहंमन्येमुनेःशक्रस्यचाश्रये मोहाविष्टोनजानातिदूर्वांकुरमितंकियत् कांचनेननकिमेतेनबहुलंनेच्छतेकुतः आज्ञाप्ययक्षधनाध्यक्षोकोशकारंधनस्यच देहिअस्याधनंस्वेच्छंमुनिपत्न्याममाज्ञया एवंश्रुत्वा ददौतस्यैबहुलंकांचनंतुसः नजग्राहभयाद्भर्तुर्दूर्वाधिकविशंकया स्वर्णकारतुलायांतंदूर्वांकुरमधारयत् नाभवत्तुलयातस्यपर्याप्तंतत्तुहाटकं वणिक्तुलासमानीतानत्रापिनाभवत्समं तैलकारसमानीतानजानापूरणेक्षमा धटेमहत्यतोक्षिप्तंहाटकंदत्तमेकतः दूर्वांकुरेपिनत्रापिअधस्ताद्यातिभारतः अन्यदन्यद्ददौतस्य कुबेरःकांचनंबहु तदपिनाभवत्तेनसमंदूर्वांकुरेणच सर्वकोशगतंद्रव्यंदत्तंगुरुतरंभवत् तथापिनाभवत्तुल्यंतेनदूर्वांकुरेणच पत्नीमाहूयतांप्राहकुबेरःकौतुकान्वितः कुरुमद्वाक्यतःसुभ्रूर्धटारोहणमग्रतः नसमंचेत्तनारोक्ष्येनिजसत्त्वरिरक्षया पतिव्रताज्ञयातस्यधटमारुरुहेतदा ततोपिनसमाजाताततःसर्वांपुरींददौ धटमध्येकुबेरोपिनोर्ध्वंजातोंकुरस्ततः श्रुत्वादूतमुखादिंद्रोगजारूढःसमाययौ स्वकीयद्रव्यसहितोधटमारुरुहेस्वयं समंनयातिदूर्वावैघटभारेणचानघ अधोमुखोगतश्चिंतांकिमेतदितिचिंतयन् विष्णुंहरंचसंस्मारतत्रारोहणकाम्यया शिवोविष्णुःसमागत्यधटमारुरुहेतदा तथापिनोर्ध्वगमनंतदादूर्वांकुरस्यहि शिवोविष्णुःकुबेरोपिआश्चर्यंसमपद्यत वरुणेंद्राग्निमरुतोकौंडिन्यंचसमाययुः देवादेवर्षयश्चापिसिद्धविद्याधरोरगाः दिनांतेसमनुप्राप्तेयथागच्छंतिपक्षिणः नमस्कृत्यमुनिंसर्वेप्रोचुर्विद्याधरोरगाः सर्वऊचुः अज्ञानंविलयंयातंदर्शनान्नोमुनेतव पूर्वपुण्यप्रभवादद्येकल्याणंनोभविष्यति तवपत्न्याहृतंसर्वंसर्वेषामनघस्फुटम् महिमानंनजानीमोदूर्वांकुरसमुद्भवं एवंदूर्वांकुरतुलांत्रै-

ल्लोक्यमपिनाभवत् गजाननशिरस्थस्यत्वयाभक्त्यार्पितस्यच जानीयान्महिमानंकः सम्यक्दूर्वांकुरस्यच गजाननैकभक्तस्यतपस्वि
नस्तपतोभृशं नवापिमहिमानंकोजानातित्रिभुवनत्रये एवमुक्त्वामुनिंसर्वेपूज्यमानंगजाननं सर्वेसभार्याययजुस्तुष्टुवुर्ननृतुर्जगुः नब्रह्मा
नहरिःशिवेंद्रमरुतोनाग्निर्विवस्वान्मरुच्छेषोशेषकलानिधिश्चवरुणोनोचंद्रमानाश्विनौ नोवाचामधिपोनचैवगरुडोयक्षाधिपोनागि
रामाहात्म्यंपरिवेदवेदनिगमैरज्ञातरूपस्यते एवंसंतोष्यसर्वैर्नेदेवदेवंगजाननं मुनिंचसमनुप्राप्ययुः स्वंस्वंनिकेतनं आश्रयापितनो
ज्ञात्वादूर्वामाहात्म्यमुत्तमं विश्वस्ताभर्तृवाक्येनसा दूर्वांपर्यपूजयत् विघ्नेश्वरंसर्वदेवंसर्वदूर्वाभिरर्चितं प्रणनामचकौंडिन्यंभर्त्तारंसत्य
वादिनं उवाचतंप्रसन्नात्मास्वात्मानंनिंदतींभृशं मादृशीनैवदुष्टास्तिपतिवाक्येनशासिना विशेषविदुषास्वामिन्विशेषविदुषात्वया स
म्यक्कृतंममविभोसर्वभूतदयावता तत्क्षमस्वापराधंमेत्वामहंशरणागता ततःप्रातःसमुत्थायदूर्वामादायसत्वरै स्नात्वादेवंसमभ्य
र्च्यदूर्वार्पणमकुर्वतां अनन्यभक्त्याज्ञात्वातौदूर्वामाहात्म्यमुत्तमं सायंप्रातर्देवदेवंपूजयंतौनिरंतरं त्यक्त्वायज्ञंव्रतंदानंज्ञात्वादेवोगजाननः
कृपयापरयाविष्टोस्वधामप्रत्यनोदयत् गणाऊचुः अगाधंवर्णितंदूर्वामहात्म्यमिदमुत्तमं अशेषवर्णनेशेषोनशक्तिंसमपद्यत त्रैलोक्यं
तुलयाअस्यानसंजातंमहामुने दूर्वेतिस्मरणात्तापंत्रिविधंविलयंव्रजेत् तत्स्मृतंस्मर्यतेदेवोयतःसोपिगजाननः इतिचिंतामणेःक्षेत्रमहिमा
वर्णितःस्फुटं श्रवणात्कीर्तनाद्भूया ।नाद्भुक्तिमुक्तिफलप्रदः एतस्मात्कारणाद्दानंत्रयाणांप्रेषितंशुभं रासभस्यमुखाद्दूर्वागता देवोपरिप्र-
भो चांडालशीतनाशाय आनीतातृणभारतः वायुनाप्रेषितासापिगतादूर्वागजानने यतश्चास्यप्रियादूर्वासंतुष्टोसौविनायकः निःपापत्वा
त्रयाणांचसान्निध्यंदत्तवान्निजं गंधमात्रेणदूर्वायाःसंतुष्टोजायतेविभुः प्रसन्नोवतिभक्त्यावैकिंपुनर्मस्तकार्पणात् ब्राह्मणाऊचुः इ
तिदूतमुखाद्राजन्संश्रुतोमहिमातदा दूर्वायामुनिभिःसर्वैःसंतुष्टोनचसंश्रुतः स्नात्वादूर्वांकुरान्गृह्यपुपूजुस्तेविनायकं सेवकाश्चापिदू
र्वाभिरानर्चुःश्रीगजाननं आसन्सर्वेदिव्यदेहास्तेजसासूर्यवर्चसः शृण्वंतोदिव्यविद्यानांनानारावान्समंततः विमानवरमारूढादिव्यव
स्त्रानुलेपनाः यातावैनायकंधामकेचिद्रूपंचधारिणः नरानागरिकाःकेचिदागतास्तंमहोत्सवं द्रष्टुंदूर्वाभिरानर्चुरेकविंशत्पृथक्पृथक्॥

भुक्त्वाभोगांश्चतेसर्वेगणेशस्थानमागमन् विमानमपिचलितमूर्ध्वंतत्पुण्यतेजसः तस्माद्गणेशभक्तेनकार्यंदूर्वाभिरर्चनं नकरोतिनरोयस्तुप्रमादात्ताभिरर्चनं चांडालःसतुविज्ञेयोनरकान्प्राप्नुयाद्बहून् नतन्मुखंनिरीक्षेतकदाचिदपिमानवः यस्तुदूर्वाभिःपूज्येतदेवदेवंगजाननं तस्यदर्शनतोन्योपिपापीशुद्धत्वमाप्नुयात् लक्षसंख्याकदूर्वाभिःपूजयेद्योगजाननं तेनापिकोटिगुणिताकृतापूजानसंशयः ब्रह्मोवाच उद्यापनंचकुर्यात्तुदेशकालानुसारतः माघेवाकार्तिकेभाद्रेआषाढेश्रावणेपिवा अन्येषुपुण्यमासेषुव्रतमेनत्समाचरेत् प्रातःस्नानंविधायाथदंतधावनपूर्वकं धौतवस्त्रधरोभूत्वानित्यकर्मसमाचरेत् देवपूजागृहंवापिदेवालयमथापिवा गोमयेनानुलिप्याथसुधानुनामृन्मयेनवा पंचभिर्ब्राह्मणैःसार्द्धंकृत्वाचस्वस्तिवाचनं नांदीश्राद्धंप्रकुर्वीतलक्षपूजाविधौद्विजः प्राणायामत्रयंकृत्वादेशकालौस्मरेत्सुधीः गजाननंचतुर्बाहुंएकदंतंविपाटितं विधायहेम्नाविघ्नेशंहेमपीठासनस्थितं तथाहेममयींदूर्वांतदाधारेव्यवस्थितां संस्थाप्यविघ्नहर्तारंकलशेताम्रभाजने वेष्टितंरक्तवस्त्रेणसर्वतोभद्रमंडले पूजयेद्रक्तकुसुमैःशमीदूर्वाभिरर्चयेत् गंधपुष्पैश्चधूपैश्चदीपैर्नैवेद्यतोषकैः पश्चाद्गंधादिदूर्वाभिरर्चयेद्गणनायकं गणाधीशंसहस्रेणअथवाशतनामभिः रुक्तसंख्यासफलापूजा संख्याहीनातुनिष्फला एवंसंपूज्यविधिवत्पूजांतेहोममारभेत् आचार्यंवरयेत्पूर्वंऋत्विग्भिश्चैकविंशतिः गणानांत्वेकमंत्रेणआयुतंहोममाचरेत् अथवादूर्वामंत्रेणअयुतंतुसमाचरेत् दूर्वामंत्रः त्वंदूर्वेमृतजन्मासिवंदितासिसुरासुरैः सौभाग्यंसंततिंदेहिसर्वकार्यकरीभव यथाशाखाप्रशाखाभिर्विस्तृतासिमहीतले तथाममापिसंतानंदेहित्वमजरामरं सहस्रनामभिर्होमंस्वाहाकारसमन्वितं मधुमिश्रैस्तिलैर्लाजैःपृथुकैरिक्षुखंडकैः लड्डुकैःपायसान्नेनसघृतेनहुनेत्ततः पूर्णाहुतिंततःकृत्वाबलिदानंततश्चरेत् होमशेषंसमाप्यैनब्राह्मणान्भोजयेत्ततः आचार्यंपूजयेत्पश्चाद्वस्त्रालंकारभूषणैः एवंमेब्रह्मणादिष्टंव्रतंलोकोपकारकं तदेवकथितंतेद्यकुरुपुत्रार्थमादरात् इतिनानाविधोराजन्महिमाकथितस्तव सेतिहासस्तुदूर्वाणांश्रवणात्पापनाशनः नाख्येयोदुष्टबुद्धेस्तुप्रियपुत्रेनिवेदयेत् यइदंशृणुयाद्भक्त्यावाजपेयफलंलभेत् इतिगणेशपुराणेउपासनाकांडेदूर्वामाहात्म्येलक्षदूर्वापूजोद्यापनंसंपूर्णम् अथशिवलक्षप्रदक्षिणा

विधिः युधिष्ठिरउ॰ पुरातुऋषयःसर्वेनैमिषारण्यवासिनः शौनकाद्यामहात्मानःसर्वशास्त्रविशारदाः तीर्थयात्राप्रसंगेनगंगाद्वार
मुपागमन् तत्रस्नाताकृतजपाविधिवद्दत्तदक्षिणाः यावत्सुखापावष्टास्तेहर्षनिर्भरमानसाः तावत्तेददृशुस्तत्रसूतंशास्त्रार्थकोविदं ददर्श
सोपितांस्तत्रऋषीन्विगतकल्मषान् ननामदंडवद्भक्त्यातैश्चापिप्रतिपूजितः तेचक्रुःपरमातिथ्यंकुशलंप्रश्नमेवच सुखोपविष्टंतंसूतंपप्रच्छु
रिदमादरात् ऋषयऊ॰ सूतसूतमहाप्राज्ञचिरंदृष्टोसिसुव्रत कस्मिन्तीर्थेथवादेशेकालोहिनिहतस्त्वया त्वद्दर्शनेनसौख्यंतुजातं
नःपरमाद्भुतं किंविधिंज्ञातुमिच्छामस्तच्छृणुष्वमहामते त्वयोक्ताविविधाधर्मास्तथानानाविधाःकथाः व्रतानिचविचित्राणिमनोरथकराणि
च इदानींवददेवस्यव्रतंपरमपावनम् यत्कृत्वासर्वसिद्धिःस्यान्नराणांवांछितप्रदं सूतउवाच सम्यक्पृष्टंऋषिगणाव्रतंदेवस्यचा
द्भुतं ममापिकथितुंहर्षोजायतेनात्रसंशयः युधिष्ठिरउवा॰ धर्माबहुविधाःप्रोक्तास्त्वयानंतफलप्रदाः इदानींश्रोतुमिच्छामिव्रतंसंपत्करं
शुभम् श्रीकृष्णउवा॰ शृणुराजन्प्रवक्ष्यामिशिवस्यव्रतमुत्तमम् लक्षप्रदक्षिणानामव्रतमस्तिसुदुर्लभम् ब्रह्मघ्नस्यसुरापस्यगुरु
दारावमर्शिनः संकीर्णकानिपापानिसंकलीकरणानिच मकीर्णकानिपापानिमलिनीकरणानिच भ्रातृपत्नीसुतादीनांगामिनःकाममोहिताः
गुरोर्विश्वासहीनस्यव्रतभ्रष्टस्यपापिनः संध्याकर्मविहीनस्यजमद्भुग्मार्गवर्तिनः दासीवेश्यासंगिनश्चचांडालीगामिनस्तथा परस्वहारि
णश्चापिदेवद्रव्यापहारिणः ब्राह्मणद्वेषिणश्चापिवृत्तिच्छेदकरस्यच रहस्यभेदकस्यापिरहसिकृतपापिनः ब्रह्मयज्ञविहीनस्यदुःशास्त्र
निरतस्य गुरुनिंदादिश्रोतुश्चगुरुद्रव्यापहारिणः ब्रह्महत्यादिपापानांप्रायश्चित्तंयदीच्छसि संकलीकरणानांचमलिनीकरणस्यच
अपात्रीकरणानांचप्रायश्चित्तंयदीच्छसि भ्रातृपत्नीसुतानांचगामिनःशमनंतथा श्वश्रूभ्रातृवधूनांच इच्छयागामिनांतथा लक्षप्रदक्षि
णानामव्रतंकुर्यान्महीपते संध्याकर्मादित्यागस्यचांडालीगामिनस्यवै दासीवेश्यासंगिनश्चक्षयंयांतिनसंशयः वर्धनंसर्वभूतीनांस
दाविजयकारणं किमेभिर्बहुभिर्वाक्यैःकथितैश्चपुनःपुनः दारिद्र्यनाशनंपुण्यंसर्वैश्वर्यप्रदंशिवं दुर्लभंसर्वमर्त्यानांपुत्रपौत्रप्रवर्द्धनम्
योयान्प्रार्थयतेकामान्स्तानाप्नोतिमानवः ऋषयऊचुः सूतसूतमहाभागवेदविद्याविशारद यथाप्रदक्षिणाकार्यामनुजैर्विधिपूर्वकं

सूतउवाच एवमेवपुरापृष्टोभगवान्शिवयाशिवः तद्ब्रवीमिमुनिश्रेष्ठाःशृण्वंतुविधिमुत्तमम् देव्युवाच भगवन्देवदेवेशप्रदक्षिणावि
धिंवद शिवलक्षेप्यनेनास्मुनिःपापःपुण्यवान्भवेत् श्रीमहादेवउवाच श्रावणेमाधवेऊर्जेमाघमासेव्रतंचरेत् लिंगप्रदक्षिणाःकुर्यात्स्कंद
रीविधिपूर्वकाः श्रीदेव्युवाच लिंगप्रदक्षिणेदेवनियमाःकेभवंतितान् वदस्वेतितदाशेषविश्वनाथकृपानिधे शिवउवाच प्रतिग्रहंपरान्नं
चपरदाराभिभाषणं परस्वग्रहणंस्नेहादसद्वार्तांचविवर्जयेत् असतांपापिनांसंगंनकुर्यात्सव्रतोनरः असत्संमागमात्सर्वंनिःफलंजायतेनृणां मम
द्रोहपरैःसाकंनव्रजेद्विष्णुनिंदकैः परापवादंनोकुर्यात्परद्रोहंनकारयेत् निंदांचगुरुशास्त्राणांशिवधर्मरतात्मनां तीर्थलिंगतपोनिंदांनकुर्यात्तुक
दाचन ब्रह्महत्यादिपापानांप्रायश्चित्तंनचापरं शिवलिंगेमहादेवियेकुर्वंतिप्रदक्षिणाः अनंतकोटिगुणितंभवेत्सर्वंनसंशयः शिवापतेःप्रत्यहं
चपूजाकार्याप्रयत्नतः उमापतेःपूजनेनसिद्धिर्भवतिनान्यथा एवंयःकुरुतेमर्त्योव्रतमेतत्सुदुर्लभं यंयंचिंतयतेकामंतंतंप्राप्नोत्यसंशयः शिवउ
वाच लक्षंसमाप्यपश्चात्तुकुर्यादुद्यापनंव्रती एवंसंपाद्यविधिवच्छुभेमासेशुभेदिने देव्युवाच व्रतस्योद्यापनंकर्मकथंकार्यंचमानवैः
कोविधिःकानिद्रव्याणिकथयस्वममप्रभो ईश्वरउवाच शृणुभद्रेप्रयत्नेनलोकानांहितकाम्यया उद्यापनविधिंचैवकथयामितवाग्रतः
यथासंजायतेवित्तंभक्तिःश्रद्धासमन्विता सएवव्रतकालश्चयतोनित्यंहिजीवितं कामक्रोधाद्यहंकारद्वेषपैशून्यवर्जितः संपाद्यसर्वसंभारान्
मंडपंतत्रकारयेत् प्रातःस्नात्वाशुचिर्भूत्वाकुर्यादुद्यापनंबुधः मासतिथ्यादिसंकल्प्यकुर्यात्स्वस्त्ययनंततः पुण्याहवाचनंकार्यमाचार्यवरणंत
तः ततोब्राह्मणमाहूयवेदवेदांगपारगं आचार्यंवरयेत्पूर्वंऋत्विगेकादशैःसह देवागारेतथागोष्ठेशस्तेवास्वीयमंदिरे पुष्पमंडपिकांकृत्वापट्ट
कूलादिवेष्टिताम् तन्मध्येलिंगतोभद्रंरचयेल्लक्षणान्वितम् अव्रणंसजलंकुंभंतस्योपरितुविन्यसेत् सौवर्णंराजतंताम्रंमृन्मयंवापिकारयेत् त
स्योपरिन्यसेत्पात्रंताम्रंवैणवमृन्मयं कुंभोपरिन्यसेद्देवमुमयासहितंशिवं उमामहेश्वरींमूर्तिंपूजयेद्वृषभेस्थिताम् ब्राह्मणंदक्षिणेभागेसा
वित्र्यासहस्कप्रभम् कौबेर्यांस्थापयेद्विष्णुंलक्ष्म्यासहगरुत्मता महेशंस्थापयेन्मध्येशिवावृषसमन्वितम् ततःपूजांविनिर्वर्त्यमहासंभारवि
स्तरैः परमान्नंचनैवेद्यंभक्त्यादेवायदापयेत् उपोष्यजागरंकुर्याद्रात्रौसत्कथयामुदा ततःप्रभातसमयेस्नात्वाशुद्धजलेशुचिः मृदाचस्थंडि

लंकार्यंकुर्यादग्निमुखंततः प्रदक्षिणादशांशेनहवनंकारयेद्धुती हवनस्यदशांशेनतर्पणंकारयेत्ततः तर्पणस्यदशांशेनमार्जनंकारयेत्ततः
प्रदक्षिणाशतांशेनब्राह्मणान्भोजयेत्सुधीः स्वशाखोक्तेनविधिनाहोमयेद्रुद्रमन्त्रकैः मूलमंत्रेणगायत्र्याशंभोर्नामसहस्रकम् पलाशस्य
समिद्भिश्चयवव्रीहितिलाज्यकैः पूर्णाहुतिंततोदद्यात्कृत्वास्विष्टकृतादिकम् होमांतेचगुरुंपूज्यसपत्नीकंसमाहितः प्रतिमांकुंभसहितामा
चार्यायनिवेदयेत् शंभोःप्रसीददेवेशसर्वलोकेश्वरप्रभो तवरूपप्रदानेनममसंतुमनोरथाः यद्भक्त्यादेवदेवेशमयाव्रतमिदंकृतम् न्यू
नंवाथक्रियाहीनंपरिपूर्णंतदस्तुमे अनेनैवविधानेनयइदंव्रतमाचरेत् यंयंचिंतयतेकामंतंतंप्राप्नोतिमानवः इहलोकेसुखीभूत्वाभु
क्त्वाभोगान्यथेप्सितान् अंतेविमानमारुह्यशिवलोकंसगच्छति इतिस्कंदपुराणेशिवप्रदक्षिणाव्रतोद्यापनंसंपूर्णम् अथाश्वत्थप्र
दक्षिणाविधिः ऋषिरुवाच भगवन्सर्वधर्मज्ञसर्वशास्त्रविशारद स्त्रीणांपुत्रविहीनानांनराणांसुखसंपदां उपायंचैवमेब्रूहिसु
तसिद्धिःकथंभवेत् अथर्वणउवाच पुराब्रह्मादयोदेवासर्वैविष्णुंसमाश्रिताः अपृच्छद्देवदेवेशंराक्षसैःपीडितावयम् कथंभवेच्च
तच्छांतिरस्माकंवदनिश्चितं ऋषयऊचुः पलाशस्त्वंकथंप्रासंब्रह्मणावैमहात्मना वटस्त्वंचशिवोवापिविष्णुर्वैपिप्पलोभवेत् वाल-
खिल्याऊचुः ब्रह्मणानुपुरासृष्टाःसर्वेदेवाःसवासवाः मिलित्वासर्वएवैतेब्रह्माणंवाक्यमब्रुवन् ब्रह्मन्सर्वाधिकोरुद्रःसर्वदेवेषुप-
ठ्यते कर्तुंतद्दर्शनंदेवगच्छामोभवतासह इतींद्रादिवचःश्रुत्वासर्वदेवपुरोगमः ब्रह्माकैलासमगमत्सर्वदेवगणैर्वृतः शिवद्वारंसमासा
द्यदेवाःसर्वेपिसंस्थिताः नदृश्यतेद्वारपालःशिवश्चाभ्यंतरेस्थितः गंतव्यंवानगंतव्यमस्माभिःशिवसन्निधौ परावृत्त्याथवास्वस्मि
न्स्थानेगंतव्यमेववा एवंचिंतयमानैस्तैर्नारदोमुनिसत्तमः पुरादृष्टोदेववृंदैस्तमूचुःप्रणताश्चते देवाऊचुः मुनेवेदविदांश्रेष्ठब्रूहि
प्रश्नंसुशोभनं किंकरोतिमहादेवोगंतव्यंवावनांतरे नारदउवाच चंद्रनाशदशायांतुदेवाःसंप्रस्थितंगृहात् तस्मात्कश्चिन्महावि
घ्नोभवतांसंभविष्यति किंकरोतिशिवश्चेतिप्रश्नोह्यंतेतथाविधोः तस्मात्संभोगकार्येयंवर्ततेत्रिपुरांतकः इंद्रउवाच सर्वेषामेव
दुःखानांनाशकर्तादिवस्पतिः मय्यागतेकथंनाशोदेवतानांभविष्यति विभीषणायदेवानांवल्गनांचाकरोन्मुनिः इतींद्रस्यवचः

श्रुत्वाव्याकुलोभून्मुनिस्तदा कथंमद्वचनंसत्यंभविष्यत्यघवज्रिणि अद्यमद्वचनंसत्यंयदिशीघ्रंभविष्यति लक्ष्मीनारायणस्तुदेकरिष्येव्रतमुत्तमम् एवंसंचिंत्यमनसातूष्णींभूत्वामुनीश्वरः इंद्रोविचारयन्देवाःकिमिदानींविधीयताम् ततोवज्रीह्युवाचेदंवन्हेमद्वचनंशृणु गृहीत्वाविप्ररूपंत्वंशिवस्याभ्यंतरंविश यदिप्रसंगोस्त्यस्माकंतदावार्तांनिवेदय यदिनास्तिप्रसंगश्चेद्याचकत्वेनयाहिच अवध्यत्वादताडयत्वाद्भिक्षुकत्वेनतद्भज इतिदेवेंद्रवचनंश्रुत्वावन्हिस्तथाकरोत् अभ्यंतरेददर्शेशंशिवयासहसंगतम् शिवयापिचसोदृष्टोलज्जिताभोगमत्यजत् कोसिकोसीतिसंपृष्टोभिक्षुकोहंक्षुधायुतः दग्धोस्म्यंधोस्मिदीनोस्मिभोजनंममदीयताम् तेनादृष्टमितिज्ञात्वापार्वतीतमभोजयत् सोपिभुक्त्वासमाचारंवक्तुंसंप्रस्थितोबहिः तस्मिन्नेवक्षणेगुप्तोनारदःपार्वतींययौ शिरोनिधायपार्वत्याःपादयोःसरुरोदह अहोबालककिंजातंतच्छीघ्रमभिधीयतां करोमिनिष्कृतिंतस्यसाध्यासाध्यस्यनान्यथा मातर्वक्तुंनशक्नोमिस्वोपहासस्यकारणम् कृतंयथेंद्रादिदेवैस्तथाकोन्यःकरिष्यति इतितस्यवचःश्रुत्वापुनःपुनरपृच्छत मुद्रयित्वा ततोनेत्रेकराभ्यांसमुनीश्वरः उवाचवचनंनीचस्वरोसौगद्गदाक्षरम्

नारदउवाच इंद्रोयंयुवयोर्भोगंदेवताभ्योह्यदर्शयत् युवयोश्चकृतानिंदानांश्रुत्वादुःखितोभृशं भोगविच्छित्तयेवन्हिःप्रेषितोद्विजरूपकः अथवाकिमनेनापिकथनेनममांबिके जगन्मातासिदेवित्वंकातेस्यादुपहासता इतितस्यवचःश्रुत्वापार्वतीक्रुद्धमानसा स्फुरदोष्ठारक्तनेत्रा दृष्ट्वातांनारदोययौ देवान्प्रतिह्युवाचेदंसंभोगाद्विरतोहरः आगम्यतांदर्शनार्थंदूरतोसौविलोकितः वन्हेरेवंवचःश्रुत्वादेवेंद्रःसगणोययौ प्रणिपत्यमहादेवंकृतांजलिपुटोभवत् दृष्ट्वातथाविधंशक्रंपार्वतीवाक्यमब्रवीत् अहल्याजारदुष्टात्मन्सहस्रभगवासव उपहासःकृतोमेद्यफलंतत्समवाप्नुहि यावत्यःसंतिदेवानांनार्योवैसर्वएवते अजाननस्त्रीस्वरवानिशाखिनःसंतुसस्त्रियः इतिदेवीवचःश्रुत्वाकंपिताःसर्वदेवताः ब्रह्मविष्णुमहेशाद्यास्तुष्टुवुर्जगदंबिकाम् ततोदेवीप्रसन्नाभूद्देवेंद्रंवाक्यमब्रवीत् देवामद्वचनंमिथ्यात्रिकालेपिनजायते तस्मादेकांशतोवृक्षायूयंसर्वेभवंतुवै इतिदेव्यावचःश्रुत्वाजातादेवास्तुपादपाः अश्वत्थरूपीभगवान्वटरूपीसदाशिवः पलाशोभूद्विधाताचवज्रःशक्रोबभूवह इंद्राणीसालताजातादेवनार्योलतास्तथा मालत्याद्याःपुष्पवृक्षाउर्वश्याद्याप्सरोभवन् तस्मात्सर्वप्रयत्ने

नसर्वदाश्वत्थमर्चयेत् नारीवापुरुषोवापिलक्षंकुर्यात्प्रदक्षिणाः लक्ष्मीनारायणंपूज्यमंदवारेचतत्तले दंपतीभोजयेल्लक्ष्मीनारायणस्वरूपिणौ भावयित्वासपत्नीकान्पश्चाद्भुंजीतवाग्यता वंध्यादिर्लभतेपुत्रमितरासांतुकाकथा मूलतोब्रह्मरूपायपिप्पलायनमोस्तुते विष्णोश्चप्रतिमाभावेकीर्तनंजागरादिकं अश्वत्थमूलेकर्तव्यंविष्णोराराधनंपरं सदासन्निहितोविष्णुर्दृषत्सुब्राह्मणेतथा विष्णुरुवाच अहमश्वत्थरूपेणशालग्रामशिलासुच तस्मात्सर्वप्रयत्नेनकुरुष्वतरुसेवनं तेनसर्वाणिभद्राणिभविष्यंतिनसंशयः अश्वत्थपूजास्पर्शेनकर्तव्याशनिवासरे अन्यवारेश्वत्थसंगाद्दरिद्रोजायतेनरः विष्णुर्यदुक्तवांस्तेभ्योनद्भुतंतेवदाम्यहं नदानैश्चतपोभिश्चनाध्वरैर्भूरिदक्षिणैः अश्वत्थसेवनादन्यत्कलौनास्त्यपराक्रिया नद्विधानंनिमित्तानिसख्याक्लृप्तिश्चपूजनं हवनंतर्पणंविप्रभोजनंनियमंतथा व्रताधिकारिणस्तत्रविधानंच विशेषतः एतत्सर्वंपिप्पलादीन्वक्ष्यामितवसुव्रत दारुणोविविधोत्पातोदिव्यभौमांतरिक्षजः परचक्रभयंदेशविप्लवोदेशविग्रहः दुःस्वप्नंदुर्निमित्तंसंग्रामोद्भुतदर्शनः मारीभयंराजभयंतथाचोराग्निजंभयं क्षयापस्मारकुष्ठाद्याःप्रमेहोविषमज्वरः उदरंमूत्रकृच्छ्रंचग्रहग्रस्तस्तथैवच अन्येचरक्तरोगायेव्रणरोगास्तथैवच एतेषांचविनाशायकुर्यादश्वत्थसेवनं प्रातरुत्थायनद्यादौस्नात्वासम्यक्कृतक्रियः अश्वत्थदेशमाश्रित्यगोमयेनोपलेपयेत् तमश्वत्थमलंकृत्यसूत्रेणगैरिकादिना पूजाद्रव्याणिसंपाद्यपुण्याहंवाचयेत्तथा आचार्यमृत्विजैःसाकंकृत्वापूजांसमाचरेत् ध्यानमावाहनंचैवपाद्यमाचमनंतथा तथैवपिप्पलतरुंतथानारायणंप्रभुं श्वेतगंधाक्षतैःपुष्पैर्धूपदीपैर्निवेदनैः अर्चयेत्पुरुषसूक्तेनतथैवध्यानपूर्वकं तेनैवहवनंकुर्यात्तर्पणंवानमस्क्रियाम् श्वेतवर्णंसलक्ष्मीकंचिंतयेत्पुरुषोत्तमम् इतिध्यात्वावाहनाद्यैरुपचारैश्चषोडशैः तत्रअश्वत्थंअभिमंत्र्य आरात्तइत्यस्याग्निकांडांतःपातित्वादग्निर्ऋषिः वनस्पतिर्देवता अनुष्टुप्छंदः वनस्पत्यभिमंत्रणेवि॰ आरात्तेअग्निरस्त्वाचआरात्परशुरस्तुते निवातेत्वाभिवर्षतुस्वस्तितेस्तुवनस्पते अक्षय्यंदंभुजस्यंदंदुःस्वप्नंदुर्विचिंतितं शत्रूणांचसमुत्पन्नंअश्वत्थंशमयस्वमे ततःप्रदक्षिणाःकुर्यात्तत्सर्वंसफलंभवेत् लक्षमेकंद्विलक्षंवात्रिचतुःपंचलक्षकं कार्यस्यगौरवंज्ञात्वाद्वादशांतंसमाचरेत् ब्रह्मचारीहविष्याशीह्यधःशायीजितेंद्रियः मौनीध्यानपरोभूत्वापिप्पलस्यस्तुतिंपठेत् विष्णोर्नामसहस्रंचपौ

रुषंवैष्णवंतथा एवंसंपाद्यविधिवच्छुभेमासेशुभेदिने प्रातःस्नात्वाशुचिर्भूत्वाकुर्यादुद्यापनंबुधः गणेशपूजनंस्वस्तिवाच्यनांदिच कारयेत्
आचार्यंवरयेत्पश्चात्सर्वलक्षणसंयुतं देवागारेतथागोष्ठेअश्वत्थेस्वीयमंदिरे पुष्पमंडपिकांकृत्वापट्टकूलादिवेष्टितां तन्मध्येसर्वतोभद्रंर
चयेल्लक्षणान्वितं तन्मध्येस्थापयेत्कुंभंसजलंवस्त्रसंयुतं तस्योपरिन्यसेत्पात्रंताम्रंमृन्मयवैणवे अष्टपत्रान्वितंपद्मंकर्णिकाभिःसमन्वि
तं पंचकृष्णलकादूर्ध्वंस्वर्णपरिनिर्मितं लक्ष्मीनारायणंमूर्तिअश्वत्थेनसमन्वितां स्थापयेत्पद्ममध्येतुब्रह्माद्यावाहनंततः ततःपूजांविनि
वर्त्यमहासंसारविस्तरैः परमान्नंचनैवेद्यंभक्त्यादेवायदापयेत् उपोष्यजागरंकुर्याद्रात्रौसत्कथयामुदा ततःप्रभातसमयेस्नात्वाशुद्धेजले
शुचिः मृदाचस्थंडिलंकार्यंकुर्यादग्निमुखंततः कृतलक्षदशांशेनहवनंकारयेद्व्रती हवनस्यदशांशेनतर्पणंकारयेत्ततः पुरुषसूक्तेनशुद्ध
यात्तिलाज्यंपायससंमिन् स्वशाखोक्तेनविधिनाजुहुयाद्विष्णुमंत्रकैः उक्तैःषोडशभिर्मंत्रैःकुर्याद्धोमंयथाविधि हवनस्यदशांशेनमिष्टा
न्नंभोजयेद्द्विजान् ब्राह्मणानांस्वयंकुर्याद्यथोक्तनियमंतथा असामर्थ्येस्वयंकर्तुंसर्वमन्येनकारयेत् उक्तप्रमाणादधिकंफलंदशगुणंभ
वेत् ततश्चतुर्गुणंपीठंरजतंचतुरस्रकं उपरिद्रोणमर्धंवातिलोपरिविनिक्षिपेत् श्वेतवस्त्रेणसंछाद्यपूर्ववत्पूजयेत्तरुं दरिद्रायसुशीला
यश्रोत्रियायकुटुंबिने उदङ्मुखायविप्रायस्वयंपूर्वमुखःस्थितः स्वर्णवृक्षराजंचमंत्रेणप्रतिपादयेत् इहजन्मनिवान्यस्मिन्बाल्ययौव
नवार्धके मनोवाक्कायजैर्दोषैर्मुच्यतेनात्रसंशयः आचार्येणार्थविप्रेणसर्वंयत्नेनकारयेत् एवंकृत्वाव्रतीसम्यक्व्रतस्यपरिपूर्तये हेमाश्व
त्थतरुंदद्याच्छुक्लांगांचपयस्विनीं पिप्पलोवृक्षराजेंद्रह्यग्निगर्भस्त्वमेवहि प्रभुर्वनस्पतीनांचसर्वजन्मनियत्कृतं अघौघंनाशयक्षिप्रं
नवरूपप्रदानतः अमुंतरुंगृहाणत्वंविष्णुरूपद्विजोत्तम स्वीकृत्यदुष्करंघोरंक्षिप्रंशांतिंप्रयच्छमे एवंव्रतंयःकुरुतेपुत्रपौत्रप्रवर्द्धकं भुक्त्वा
भोगान्सुविपुलान्विष्णुसायुज्यमाप्नुयात् इतिश्रीभविष्योत्तरपुराणेअश्वत्थप्रदक्षिणोद्यापनंसंपूर्णम् अथविष्णुलक्षप्रदक्षिणावि
धिः युधिष्ठिरउवा॰ भगवन्देवदेवेशसर्वविद्याविशारद किंचिद्विज्ञातुमिच्छामिवक्तुमर्हस्यशेषतः अज्ञानादथवाज्ञानात्प्रमादाद्वा
कृतानिप्रभो दायादवधपूर्वाणिकथंयांतिक्षयंविभो पापानिकृबहून्यत्रवदस्वमुनिसत्तम व्यासउवाच लक्षप्रदक्षिणावर्तनार-

दोक्तंविधिंशृणु नारदउवाच येलोकाःपापसंयुक्ताधर्माधर्मविवर्जिताः व्रतहीनाव्रतभ्रष्टादुराचाराश्चकुत्सिताः अग्निकार्येणर
हिताःशास्त्रधर्मविवर्जिताः नास्तिकाभिन्नमर्यादाहेतुकाःकितवाःशठाः मातापित्रोर्विरुद्धाश्चगुरुश्वशुरद्रोहकाः एतेषांनिष्कृतिंतातकृ
पयावदमेऽधुना अज्ञानांतुहिजीवानांसाधूनांत्वंसुहृत्स्मृतः अनाथनाथदेवेशतद्रूपास्तादृशाजनाः एतच्छ्रुत्वाततोब्रह्माहर्षादुत्फुल्ललो
चनः साधुसाध्वितिदेवेशोवचनंचेदमब्रवीत् ब्रह्मोवाच किंवर्णयामिसाधूनांमाहात्म्यंचभवादृशां हरेर्लोकैकनाथस्यकरुणामु
क्तिदायिनी ब्रह्महत्यादिपापेषुसंकलीकरणेषुच जातिभ्रंशकलेष्वेकंअभक्ष्यभक्षणेषुच हरिणानिर्मितंपूर्वंव्रतंलक्षप्रदक्षिणम् सर्वेषा
मपिपापानांमूलादुत्कृंतनंपरं पापांधकारनाशायपापेंधनदवानलं नारायणेजगन्नाथेयोगनिद्रामुपेयुषि प्रारभेत्तद्व्रतमिदंकुर्याद्यावत्प्र
बोधिनी द्वादश्यांवाचतुर्दश्यांपौर्णमास्यामथापिवा स्नानंकृत्वानदीतोयेनित्यकर्मसमाप्यच पश्चात्प्रदक्षिणावर्तःकर्तव्योहरिरीश्व
रः अनंतमव्ययंविष्णुंलक्ष्मीनारायणंहरिं जगदीशनमस्तुभ्यंप्रदक्षिणपदेपदे इतिमंत्रंसमुच्चार्यकुर्यादावर्तमादरात् प्रदक्षिणाः
प्रकर्तव्यादिवसेदिवसेविभोः यावत्प्रदक्षिणावर्तास्तावन्मणिविनिक्षिपेत् आवाहनादितःसम्यक्धूपदीपादिभिस्तथा नैवेद्यंपायसंप्रो
क्तंतांबूलंदक्षिणान्वितं भोजयेच्चयथाशक्त्याविप्रान्सर्वफलप्रदान् सर्वपापविनाशार्थंनारीभिःपुरुषैरपि प्रदक्षिणाःप्रकर्तव्यायावद्बुद्धो
धिनीभवेत् लक्षप्रदक्षिणाःकार्याअंतेउद्यापनंचरेत् उपवासःप्रकर्तव्याअधिवासनवासरे सौवर्णींप्रतिमांकृत्वाविष्णोरमिततेजसःग
रुडेनसमायुक्तांस्थापयेत्कलशोपरि आचार्यंवरयित्वातुऋत्विजश्चनिमंत्रयेत् होमंचविष्णुगायत्र्यातद्दशांशेनवाग्यतः पायसंजुहुया
तत्रअयुतंतिलसर्पिषा हुत्वास्विष्टकृदाज्यंचदद्याद्दानानिसर्वशः कार्पासंलवणंचैवगामेकांचपयस्विनीं आचार्यायसपीठांतांप्रतिमां
चनिवेदयेत् ब्राह्मणान्भोजयेत्पश्चात्पंचविंशतिसंख्यकान् इतितस्यवचःश्रुत्वानारदस्ततथाकरोत् धर्मेणचकृतंसर्वंमुनेश्चवदना
द्व्रतम् इतिश्रीभविष्येविष्णुलक्षप्रदक्षिणोद्यापनंसंपूर्णम् अथतुलसीलक्षप्रदक्षिणाविधिः नारदउवा॰ रोप्यतेयेनवि
धिनातुलसीपूज्यतेसदा तदाचक्ष्वमहादेवममानुग्रहकारणात् महादेवउवा॰ शुभेपक्षेशुभेवारेशुभेऋक्षेशुभोदये सर्वथा

केशवार्थंतुरोपयेत्तुलसींसुने गृहस्थांगणमध्येवागृहस्योपवनेपिवा शुचौदेशेचतुलसीमर्चयेद्बुधिमान्नरः मूलेचवेदिकांकुर्यादालवालस
मन्वितां प्रातःसंध्याविधिंकृत्वास्नानपूर्वंदिनेदिने गायत्र्याष्टशतंजप्त्वातुलसींपूजयेत्ततः प्राङ्मुखोदङ्मुखोवापिस्थित्वाप्र यतमानसः ध्या
येच्चतुलसींदेवींश्यामांकमललोचनाम् प्रसन्नांपद्मवदनांवराभयचतुर्भुजां किरीटहारकेयूरकुंडलादिविभूषणां धवलांशुकसंयुक्तांप
द्मासननिषेविताम् ध्यानं देवित्रैलोक्यजननिसर्वलोकैकपावनि आगच्छभगवंत्यत्रप्रसीदतुलसिप्रिये आवाहनं सर्वदेवमयादेविसर्वदा
विष्णुवल्लभे देविस्वर्णमयंदिव्यंगृहाणासनमव्यये आसनं॰ सर्वदेवमयादेविसर्वदेवनमस्कृते दत्तंपाद्यंगृहाणेदंतुलसीत्वंप्रसीदमे पाद्यं॰
सर्वतीर्थमयाकारेसर्वागमनिषेविते इदमर्घ्यंगृहाणत्वंदेविदैत्यांतकप्रिये अर्घ्यं सर्वलोकस्यरक्षार्थंसदासन्निधिकारिणी गृहाणतुलसि
प्रीत्याइदमाचमनीयकं आचमनीयं॰ गंगादिसर्वतीर्थेभ्योमयानीतंजलंशुभं स्नानार्थंतुलसीस्वच्छंप्रीत्यातत्प्रतिगृह्यतां स्नानं॰ क्षीरोदमथ
नोद्भूतचंद्रलक्ष्मीसहोदरे गृह्यतांपरिधानार्थंइदंक्षौमांबरंशुभे वस्त्रं॰ कंचुकीं आचनीयं॰ गंधपुष्पंतथाधूपंदीपंनैवेद्यमेवच तांबूलंदक्षि
णांचैवमंत्रपुष्पंततश्चरेत् प्रसीदममदेवेशिकृपयापरयामुदा अभीष्टफलसिद्धिंचकुरुमेमाधवप्रिये देवैस्त्वंनिर्मितापूर्वंअर्चितासिमुनीश्वरैः
नमोनमस्तेतुलसिपापंहरहरिप्रिये तुलस्यमृतजन्मासिसदात्वंकेशवप्रिये केशवार्थंविचिन्वामिवरदाभवशोभने इतिप्रार्थना इत्येवमर्चये-
न्नित्यंप्रातरेवशुचिर्नरः मध्यान्हेवाथसायान्हेपूजयेत्प्रयतोनरः वैशाखेकार्तिकेमाघेचातुर्मास्येविशेषतः पूजयेत्तुलसींदेवी मधूपफलपाय
सैः अन्यद्गुह्यतमंकिंचित्कथयामितवाग्रतः प्रदक्षिणाफलंचैवनमस्कारांस्तथैवच एवंकुर्याद्बुधिकामःसर्वकामःसदैवतु पंचाशद्भिर्भवेल्ल
क्ष्मीःशतैश्चविजयःस्मृतः विद्यार्थीतुसहस्रंचेत्त्वयुतेसर्वसंपदा लक्षेतुसर्वसिद्धिःस्यान्नात्रकार्याविचारणा यंयंचिंतयतेकामंतंतंप्राप्नोति-
सर्वशः भुक्त्वायथेप्सितान्भोगानंतेमोक्षमवाप्नुयात् इदंफलंकोटियुतंभवेदत्रनसंशयः लक्षसंख्याश्चकर्तव्यास्तत्फलस्याश्चप्रदक्षिणाः त
दाउद्यापनंकुर्यात्तेनसम्यक्फलंभवेत् उद्यापनंविनाविप्रफलंनैवभवेत्क्वचित् तस्मात्सर्वप्रयत्नेनउद्यापनविधिंशृणु सौवर्णीप्रतिमांविष्णोः
शंखचक्रगदान्विताम् तुलस्यायतनंचैवकुर्यात्सौवर्णनिर्मितं हेमादिनिर्मितेकुंभेपूर्णपात्रसमन्विते पुण्योदकैःपंचरत्नैःकुशदूर्वाप्रपूरिते

तस्योपरिन्यसेद्विष्णुंलक्ष्म्याचतुलसीसमं पूजांपुरुषसूक्तेनकुर्यात्सर्वंप्रयत्नतः उपचारैःशोडशभिर्भक्तिभावसमन्वितः रात्रौजागरणंकुर्यात्पौराणैर्वेदपाठकैः वैष्णवैश्चप्रबंधैश्चनृत्यैर्वाद्यैस्तथैवच ततःप्रातःसमुत्थायहोमंकुर्याद्विधानतः वैष्णवेनतुमंत्रेणतिलाज्येनविशेषतःपायसेनघृताक्तेनअष्टोत्तरसहस्रकं आचार्यायसवत्सांगांदक्षिणावस्त्रसंयुतां ब्राह्मणान्भोजयेत्पश्चात्सहस्त्रंवाथशक्तितः शतंवाभोजयेद्धीमानष्टाविंशतिवापुनः तेभ्योपिदक्षिणांदद्याद्वित्तशाठ्यंनकारयेत् एवंयःकुरुतेमर्त्यस्तस्यपुण्यफलंशृणु अश्वमेधसहस्त्रस्यवाजपेयशतस्यच तत्पुण्यंलभतेमर्त्यो नात्रकार्याविचारणा इदंरहस्यंपरमंनवाच्यंयस्यकस्यचित् विष्णुप्रीतिकरंयस्मात्तस्मात्सर्वंशताधिकम् प्रदक्षिणातुलस्यास्तुमाहात्म्यंशृणुयान्नरः सकृद्वापठतेयोवैसगच्छेद्वैष्णवंपदम् इतिश्रीभविष्येलक्षतुलसीप्रदक्षिणोद्यापनंसंपूर्णम्

अथगोब्राह्मणाग्निहनुमल्लक्षप्रदक्षिणाविधिः युधिष्ठिरउवा० भगवन्ज्ञानिनांश्रेष्ठ सर्वविद्याविशारद किंचिद्विज्ञप्तुमिच्छामिवक्तुमर्हस्यशेषतः अज्ञानादथवाज्ञानात्प्रमादाद्वाकृतंहियत् पापानिचबहून्यत्रविलयंयांतितद्वद व्यासउवा० लक्षप्रदक्षिणाःकार्याब्राह्मणेग्नौगवेतथा नारदउवा० येचपापरतानित्यंधर्माधर्मविवर्जिताः व्रतहीनादुराचाराज्ञानहीनाश्चसंवृताः तेषांपापविनाशार्थंप्रायश्चित्तंकथंभवेत् ब्रह्मोवाच किंवर्णयामिसाधूनांमाहात्म्यंचभवादृशां साधुसाधुचविप्रेंद्रपृच्छितेव्रतमुत्तमं ब्रह्महत्यादिपापेषुसंकलीकरणेषुचजातिभ्रंशकरेचापिअभक्ष्यभक्षणेतथा विष्णुनानिर्मितंपूर्वंव्रतंलक्षप्रदक्षिणं सर्वेषामपिपापानांनाशकंपरमंशुभं आषाढेशुक्लपक्षेतुएकादश्यांविशेषतः द्वादश्यांपौर्णमास्यांवाप्रारभेद्व्रतमुत्तमम् देशकालौतुसंकीर्त्यनत्वागुरुविनायकौ लक्षप्रदक्षिणाःकार्यास्त्रीरत्नैश्चशुचिव्रतः जितेंद्रियोजितप्राणोमुखेमंत्रंसमुच्चरेत् नमस्तेगार्हपत्यायनमस्तेदक्षिणाग्नये नमआहवनीयायमहावेद्यैनमोनमः गवांप्रदक्षिणाःकार्यालक्षसंख्यायथाविधि पूर्वंपूज्यचगामेकांदत्वानैवेद्यमुत्तमम् पश्चात्प्रदक्षिणाःकार्यानत्वातांचपुनःपुनः गवामंगेषुतिष्ठंतिभुवनानिचतुर्दश यस्मात्तस्माच्छिवंमेस्यादिहलोकेपरत्रच एवंप्रदक्षिणांकृत्वासर्वपापैःप्रमुच्यते कर्मनिष्ठंशुचिंविप्रंपूजयेद्विधिवद्बुधः ततःप्रदक्षिणाःकार्यायावल्लक्षंभवेद्व्रतं भूमिदेवनमस्तुभ्यंनमस्तेब्रह्मरूपिणे पूजितोदेवदैत्यैस्त्वमतःशांतिंप्रयच्छमे एवंहनुमतःकार्याभूतप्रेतवि-

नाशकृत् षोडशैरुपचारैश्च पूजयेद्वायुनंदनं ततःप्रदक्षिणाःकार्याआत्मकार्यार्थसिद्धये मंत्रः मनोजवंमारुततुल्यवेगंजितेंद्रियंबुद्धिम
तांवरिष्ठं वातात्मजंवानरयूथमुख्यंश्रीरामदूतंशरणंप्रपद्ये एवंप्रदक्षिणावर्त्तंकुर्याद्देवंप्रयत्नतः भूतप्रेतपिशाचाद्याविनश्यंतिनसंशयः आ
दित्यादिग्रहाःसर्वेशांतिंयांतिशिवाज्ञया उद्यापनंचसर्वासांकुर्यात्पूर्णफलाप्तये उद्यापनविधानादौपुण्याहंवाचयेत्ततः आचार्यंवरयित्वाच
प्रतिमाःस्वर्णसंभवाः अव्रणंकलशंपूर्णंस्थापयेन्मंडलेशुभे विरच्यलिंगतोभद्रंपूजयेद्देवमंजसा पायसंजुहुयात्तत्रतत्तन्मंत्रैर्विचक्षणः अष्टो
त्तरसहस्रंतुप्रायश्चित्तंचरेच्छुभं मंडलंदक्षिणायुक्तमाचार्यायनिवेदयेत् ब्राह्मणान्भोजयेच्छक्त्यावित्तशाठ्यविवर्जितः येकुर्वंतिव्रतमिदं
पापमुक्ताभवंतिते भुक्त्वायथेप्सितान्भोगानंतेसायुज्यमाप्नुयात् इतिश्रीभविष्येविप्राग्निगोहनुमल्लक्षप्रदक्षिणोद्यापनंसंपूर्णम् अथल
क्षबिल्वपत्रपूजालिख्यते व्यासउवा॰ पूर्वजन्मनिव्याधोसौकश्चासीद्राक्षसोपिसः किमर्थंकर्मकृतवान्कथंपत्रंसमर्पितं किंशीलंकःसमा
चारस्तन्ममाचक्ष्वनाभिज किंनामसकथंप्राप्तःसालोक्यंतद्वदस्वमे ब्रह्मोवाच विदर्भदेशेनगरंमोदोशाख्यंबभूवह विख्यातंत्रिषुलो
केषुकुबेरनगरोपमं भीमोनामाभवेद्व्याधोनगरेमांसविक्रयी परेषांदोषकथनेदोषोयद्यापिवर्त्तते प्रश्नेकृतेप्रवक्तव्यंयथातथ्यंनमत्सरात्
ब्रह्मोवाच सराज्यकार्यंकुरुतेस्वयंभुंक्तेवरस्त्रियः राष्ट्रेशृणोतिरामांसयातांवासपतिंयथा बलादानीयतेभोक्तुंक्रंदतींरुदतीमपि गवां
गनायतेज्ञातिभेदंविषयलंपटः वाचोक्तंकुरुतेनारीतस्यदृष्टिपथंगता तामालिंग्यत्वसौकामीचुंबत्येतांभजत्यपि परद्रव्याणिगृण्हातिध-
नानिसबलात्पुनः सोपितादृग्गुणोमंत्रीदुष्टबुद्धिरघेरतः एवंदुराचाररतोनकन्यांनचमातरं नवर्जयतिसंभोगेभगिनीमपिनिर्घृणः नब्रह्म
हत्यांमनुतेनस्त्रीबालवधंतथा एवंपापसमाचारौपापस्यपर्वताविव आस्तांप्रभौदुष्टबुद्धीराजामात्यौसुदुःसहौ नब्राह्मणोनसन्यासीन
गृहेयातिभिक्षितुम् नराष्ट्रेनामतस्यासद्भ्रूणहानिप्राकृतोपिच एकदामृगयार्थंतौयातौचगहनंवनं हतानिमृगयूथानिपक्षिरूपाण्यनेकशः ता
निप्राप्यच्यनगरेअश्वारूढद्वयपुनः शिवस्यचमहास्थानंपथितौपश्यतःस्मह यस्मिन्विराजतेमूर्तिःशक्त्यासहशिवस्यच स्थापितानाममित्रा
सापुत्रार्थंकुर्वतातपः भक्त्यासाक्षात्कृतोयत्रदेवदेवोह्युमापतिः पंचाक्षरेणमंत्रेणध्यायताबहुवासरम् तत्रातस्मैवरान्देवोप्रददेवांछितान्यपि

ततोवसिष्ठहस्तेनतेनेयंस्थापिताहृदा उमामहेश्वरीमूर्तिर्वसिष्ठेनपुराकृता यस्यादर्शनतोनृणांपुरुषार्थाश्चतुर्विधाः स्मरणात्पूजनाच्चापिसेव्यं तेनात्रसंशयः एवंवसिष्ठवाक्येनसापतद्भुविपप्रथे शिवस्यभोजनेनास्यस्मरणेनार्चनेनेनच रामलक्ष्मणशत्रुघ्नभरताःसादृशाःकृताः जातालोकेषुविख्याताःसर्वज्ञाःशूरसंमताः एवंदृष्ट्वामहारम्यंप्रासादंराजनिर्मितं उमामहेश्वरींमूर्तिंराजामात्यौप्रपूजतुः बिल्वपत्रैश्चसंपूज्यअच्छिद्रैःकोमलैःशुभैः प्रदक्षिणीकृत्यगृहमीयतुःक्षणमात्रतः एतदेवपुरेपुण्यंदैवाज्जातंतयोस्तदा एवंपापसमाचारौराज्यंकृत्वाथममृतुः बध्वापाशैर्याम्यहस्तैर्नीतौतौशमनांतिकं चित्रगुप्तंसमाहूयपप्रच्छसशुभाशुभं तेनोक्तंनैनयोरस्तिपुण्यलेशोरवेःसुत पापानांगणनानास्तिततोदूतान्ब्रवीद्यमः बध्यतांबध्यतामेतौक्षिप्यतांनरकेषुच मृत्युलोकेततोह्येतौनीचयोनिंगतावुभौ कुंडेवीचिमयेपंकेसहस्रंपरिवत्सरान् एकैकस्मिन्क्रमेणैतौकुंडेभुक्त्वाघसंचयौ अनयोःपुण्यलेशोस्तिदूताःशृणुतसत्कृतिं प्रसंगादर्चितोदृष्टोदेवश्चाभ्यासुमापतिः तेनपुण्येननह्येतौपापंव्यतितरिष्यतः एवमाकर्ण्यतद्वाक्यंदूतैर्बध्वाहृतंदृढं कुंभीपाकेशोणितोदेनिरयेगौरवेपितौ निक्षिप्तौकालकूटेचक्रमशःशतवत्सरान् तामिस्रेचांधतामिस्रेपूयशोणितकर्दमे कंटकेषुक्षतांगौतौसंतप्तौतप्तवालुके भक्षितौक्रिमिभिस्तत्रभृशंशुनिमुखेह्युभौ असीपत्रवनेघोरेततोवीताबुभावपि यत्रशस्त्राभिघातेनवर्माभिद्येतपापिनां ततस्तप्तशिलायांतौनिष्पिष्टौघनघाततः भुक्त्वातुनरकानेकविंशतिंबहुवासरं तद्दुःखंशक्यतेवक्तुंशेषेणापिकदाचन एवंबहुसहस्राणिभुक्त्वाभोगाननेकशः निस्तीर्णभोगौतौपापशेषेणभुवमागतौ एकोजातःकाकयोनावुलूकोभूत्सरोपिच ततोएकोदर्दुरोभूदपरःसरटोभवत् ततएकोविषधरोपरोभूद्वृश्चिकोपिच तत्रापिकुरुतःपापंनानालोकविदंशतः शुनीमार्जारयोनौतौजातौनकुलसूकरौ वृकजंबूकयोनौतौजाताघोटकगर्दभौ ततउष्ट्रगजौजातौततोनक्रमहाझषौ ततोव्याघ्रमृगौजातौततोवृषभकासरौ एवंनानायोनिगतौजातौचांडालअंत्यजौ राक्षसींभिल्लयोनिंचततश्चांतेसमीपतुः पिंगाक्षदुर्बुद्धिरितिनाम्नाजातौचभूतले आजन्मकृतपापस्यकथनेबहुदोषता यदातौराज्यप्रभृतिभास्तांपापरतौसदा एकंपुण्यंतयोरासीन्मृगयांसर्पतोःक्वचित् शंकरस्यचनमनंदर्शनंचप्रदक्षिणा अर्चनंबिल्वपत्राद्यैस्तुष्टआसीदुमापतिः अगाधंततयोःपुण्यंपूर्वजन्मनिसंचितं यदापुनाराक्षसोसौभूमिपंभक्षितुंगतः सआरूढोबिल्ववृक्षंत

सभाणिचमस्तके पतितानिउमेशस्यतुष्टो भूत्सद्वयोरपि दिव्यदेहंतयोर्दत्वास्वर्लोकंप्रापयद्विभुः एतत्तेकथितंपूर्वजन्मकर्मचचैनयोः बिल्वपत्रार्चनादेवतुष्टोभूत्सउमापतिः लक्षपूजांप्रकुर्याच्च प्रसन्नोहिशिवोभवेत् एवंहिबिल्वपत्रैश्चसर्वकामार्थसिद्धये श्रीकामोबिल्वपत्रैश्च पूजयेच्चतथाशिवं लक्षेणसर्वसिद्धिश्चनात्रकार्याविचारणा यंयंचिंतयतेकामंतंतंप्राप्नोतिसर्वशः अथविप्रप्रवक्ष्यामिबिल्वपत्रैश्चपूजनं शंभुप्रीतिकरंनृणांशिवभक्तिविवर्धनं वैशाखेश्रावणेऊर्जेबिल्वपत्रार्चनंस्मृतं दिनेदिनेसहस्रेणअर्चयेद्बिल्वपत्रकैः एवंमासत्रयंकुर्यात्ततउद्यापनंचरेत् उद्यापनंप्रवक्ष्यामिव्रतस्यपरिपूर्तये आहूयब्राह्मणान्सर्वान्कृत्वंद्वेचशुभेदिने यत्रचोद्यापनंकार्यंमंडलंतत्रकारयेत् कर्तव्यंस्वगृहेविप्रैस्तत्सर्वंसुकृतंभवेत् वेदिकातत्रकर्तव्यामंडपेचसुशोभने गीतवादित्रघोषेणब्रह्मघोषेणभूयसा प्रविश्यमंडपेतस्मिन्नाचार्येण द्विजैःसह मासतिथ्यादिसंकीर्त्यकुर्यात्स्वस्त्ययनंततः पुण्याहवाचनंकार्यमाचार्यवरणंतथा ततोब्राह्मणमाहूयवेददांगपारगं आचार्यंवरयेत्पूर्वंमृत्विगेकादशैःसह देवागारेतथागोष्ठेशुद्धेवास्वीयमंदिरे पुष्पमंडपिकांकृत्वापट्टकूलादिवेष्टितां तन्मध्येलिंगतोभद्रंरचयेल्लक्षणान्वितं कुंभस्यरुद्रकोणेतुरचयेद्वेदिकांव्रती वस्त्रेणाच्छादितांवेदींरचयेत्तत्रतंडुलैः कुर्यात्तंडुलकैलासंत्रिकूटंतस्यचोपरि न्यसेद्देविकयासार्द्धंशंकरंलोकशंकरं सौवर्णींप्रतिमांकृत्वास्थापयेत्तंडुलोपरि ब्रह्माणंदक्षिणेभागेसावित्र्यासहसुप्रभं कौबेर्यांस्थापयेद्विष्णुंलक्ष्म्यासहगरुत्मता महेशंस्थापयेन्मध्येपार्वत्यासहसुप्रभं कलशंस्थापयेत्तत्रताम्रंवामृन्मयंशुभं गंगोदकसमायुक्तंपंचरत्नसमन्वितं पंचपल्लवसंयुक्तंस्थापयेच्चततोग्रतः वस्त्रयुग्मेनसंवेष्ट्यकैलासंकलशंशुभं यदुक्तंतत्रकल्पोक्तंपूजनंतत्रकारयेत् वेदशास्त्रप्रमाणेनरात्रिंतांगमयेद्व्रती ततःप्रभातसमयेसुस्नायचशुचिर्भवेत् स्थंडिलंकारयेत्तत्रस्वशाखोक्तविधानतः हवनंचप्रकुर्वीतसतिलाज्येनपायसैः मूलमंत्रेणगायत्र्याशंभोर्नामसहस्रकैः येनमंत्रेणपूजातुकृत्वातेनैवकारयेत् हवनंतद्दशांशेनतद्दशांशेनतर्पणं वंदनंतद्दशांशेनकुर्यात्तिलयवैःसह एवंहोमःप्रकुर्वीतअष्टोत्तरसहस्रकं बिल्वपत्रंसुवर्णस्यअर्पयेच्चउमापतिं आचार्यंपूजयेद्विप्रांस्तोषयेद्दक्षिणादिभिः पयस्विनींचगांदद्याद्धिरण्येनसहैवतु प्रतिमांचसवस्त्रांचकलशंपर्वतंतथा नत्वाक्षमापयेत्पश्चाद्देवदेवंजगद्गुरुं अनेनैवविधानेनलक्षपूजांकरोतियः पुत्रपौ

त्रप्रपौत्रैश्च राज्यंप्राप्नोनिशाश्वतं यइदंपठतेनित्यं श्रद्धाभक्तिसमन्वितः देवदेवोमहादेवोददातिविपुलांगतिम् इतिश्रीस्कंदपराणेउत्तर
खंडेबिल्वदललक्षपूजनोद्यापनंसंपूर्णम् अथशिवस्यनानालक्षपूजाविधिः ऋषयऊचुः यानिकानिचतीर्थानिपुण्यान्यायतनानि
च किमुद्दिश्यचकार्याणितत्सर्वंकथयप्रभो शिवाख्यानपरोलोकेत्वत्तोन्योनहिविद्यते कृपयाव्यासदेवस्यसर्वज्ञोसिमहामते लोमश
उवाच पृथिव्यांयानितीर्थानिसागरांतानिभोद्विज माहात्म्यानिचशास्त्राणिकथितानिमयापुरा इदानींवक्तुमिच्छामिलक्षपूजांशिवस्य
च स्कंदेनचसमाख्याताअगस्त्यायमहामते तेनैवकथितापूजाममाग्रेलक्षपुष्पिका यद्यदृतौभवेत्पुष्पंशंकरेतुसमर्पयेत् श्रावणेमाधवेऊर्जे
विदध्याल्लक्षपुष्पिकां एकैकंमूलमंत्रेणरुद्रमंत्रेणवापुनः अथवारुद्रसूक्तेनसहस्त्रेणाथवाव्रती अर्चयेत्पार्वतीनाथंनमोरुद्रायवाजपेत् अनेनै
वप्रकारेणलक्षपूजांसमर्पयेत् ऋषयऊचुः यानिकानिचपुष्पाणिविशिष्टानिशिवार्चने तानिसर्वाणिभोब्रह्मन्कथयस्वयथामम लोम-
शउवा॰ बार्हतंकर्णिकारंचकरवीरंतिलस्यच बिल्वपुष्पंचकल्हारंअर्कंमंदारमेवच नीलोत्पलंचकमलंकुमुदंचकुशेशयं मालतीचंपकं
चैवतथामोगरकंशुभं तगरंशतपत्रंचसौवीरंमुनिसंज्ञिकं जातिपटलकंचैवपुन्नागंचविशिष्यते कदंबंचकुसुंभंचअशोकंबकुलंतथा पाला
शंकोरटंचैवकबिलंधत्तुरंतथा एतान्यन्यानिपुष्पाणिविशिष्टानिशिवार्चने एतेषांलक्षपूजांवैयःकरोतिनरोत्तमः भुक्त्वाभोगान्सविपुलान्
शिवेनसहमोदते आयुःकामेनकर्तव्यंचंपकैःपूजनंमहत् विद्याकामेनकर्तव्यमर्कपुष्पैर्विशेषतः पुत्रकामेनकर्तव्यंबार्हतैःपूजनंमहत् करवी
रैर्जातिकुसुमैश्चंपकैर्नागकेसरैः बकुलैस्तिलपुन्नागैर्धनकामेनपूजयेत् दुःस्वप्ननाशनार्थायद्रोणपुष्पैस्तुपूजनं कल्हारैःकर्णिकारैश्चमं
दारैःकुसुमैःशुभैः श्रीकामेनचकर्तव्यंबिल्वपुष्पैस्तुपूजनं विद्याकामेनकर्तव्यंशंकरस्यप्रपूजनं पालाशैःपाटलैश्चैवकदंबकुसुमैस्तथा
महाव्याधिनिरासार्थंपारिजातैस्तुपूजनं वशीकरणकामेनसौवीरैस्तोषयेत्तुयः तस्यविश्वंभवेद्वश्यंनात्रकार्याविचारणा देवदानवगंधर्वाव
शीभवतिनान्यथा पुत्रकामेनकर्तव्यंधत्तूरकुसुमैःशुभैः उत्तमांश्रियमाप्नोतिप्रसादाच्छंकरस्यच एवंसर्वैश्चपुष्पैश्चसर्वकामार्थसिद्धये पू
जयेत्पार्वतीनाथंभक्तियुक्तेनचेतसा यंयंचिंतयतेकामंतंतंप्राप्नोतिमानवः लक्षपुष्पैःपूजनेनप्रसन्नःशंकरोयथा उद्यापनंप्रवक्ष्यामिव्रतस्य

परिपूर्तये आहूयब्राह्मणान्सर्वान्शुभेचतिथिवासरे यत्रउद्यापनंकार्यंमंडपंतत्रकारयेत् स्वशाखोक्तेनकर्तव्यंतत्सर्वंसफलंभवेत् वेदिकाचप्रकर्तव्यामंडपेतत्रशोभने गीतवादित्रघोषेणब्रह्मघोषेणभूयसा प्रविश्यमंडपेतस्मि न्नाचार्येणाद्विजैःसह तिथिऋक्षंचसंकल्प्य कुर्यात्स्वस्त्ययनंततः पुण्याहवाचनंकार्यमाचार्यवरणंततः वेदिकायांतुकर्तव्यंस्वस्तिकंपरमंशुभं तन्मध्येविधिवद्विप्रमंत्रैर्वेदोक्तस्वस्तिकैःकुर्यात्तंडुलकैलासंत्रिकूटंतस्यचोपरि तस्योपरिन्यसेत्कुंभंताम्रंमृन्मयमेववा ब्रह्माणंदक्षिणेभागेउदीच्यांविष्णुमेवच सौवर्णीप्रतिमांकुर्यात्स्थापयेत्तंडुलोपरि महेशंस्थापयेन्मध्येपार्वत्यासहसुप्रभं पंचपल्लवसंयुक्तंस्थापयेत्तस्यचाग्रतः वस्त्रयुग्मेनसंवेष्ट्यकैलासंकलशंशुभं यदुक्तंरुद्रकल्पेतुपूजनंतत्रकारयेत् वेदशास्त्रपुराणेनरात्रौजागरणंचरेत् ततःप्रभातसमयेनद्यांस्नात्वाशुभेजले स्थंडिलंकारयेत्तत्रस्वशाखोक्तविधानतः हवनंरुद्रमंत्रेणतिलाज्येनचपायसैः नानाविधैर्भक्ष्यभोज्यैर्गंधधूपादिभिस्तथा प्रार्थयेच्छंकरंदेवंविरिंचिंविष्णुनासह सावित्रींपार्वतींचैवलक्ष्मींगणपतिंतथा स्कंधभैरवचामुंडापरिवारांस्ततोर्चयेत् नैवेद्यैर्विविधैश्चैवतोषयेद्गिरिजापतिं शर्कराघृतचूर्णेनचरुणाजुहुयात्सह श्रेयःसंपादनंकार्यमाचार्यपूजनंतथा ऋत्विजःपूजयेत्सम्यग्वस्त्रालंकरणैःशुभैः गोभूहिरण्यवस्त्राद्यैस्तोषयेद्ब्राह्मणांस्ततः अभिषेकंततःकुर्यात्पुराणश्रुतिचोदितं ततःशिवालयेगत्वासभार्येणद्विजैःसह स्नानंपंचामृतेनैवरुद्रसूक्तविधानतः पूजांसुवर्णपुष्पैश्चऋतुकालोद्भवैस्तथा कारयेत्तस्यलिंगस्ययथाशक्त्यातुपूजनं वस्त्रयुग्मंसमभ्यर्च्यदंपतीन्भोजयेत्ततः प्रदक्षिणानमस्कारान्कृत्वामूर्ध्निकृतांजलिः क्षमापयेन्महादेवंमुहुर्मुहुरतंद्रितः महादेवजगन्नाथभक्तानांकार्यकारक त्वत्प्रसादादहंयाचेशीघ्रंकार्यप्रदोभव अनेनैवविधानेनलक्षपूजांकरोतियः पुत्रपौत्रप्रपौत्रैश्चराज्यंप्राप्नोतिशाश्वतं यइदंपठतेनित्यंश्रद्धाभक्तिसमन्वितः देवदेवोमहादेवोददातिविपुलांमतिं इतिश्रीस्कंदपुराणेउत्तरखंडेलक्षपुष्पपूजोद्यापनंसंपूर्णं अथतुलसीलक्षपूजाविधिः मासपक्षाद्युल्लिख्य ममसमस्तपापक्षयार्थंश्रीमहाविष्णुप्रीत्यर्थंतुलसीलक्षपूजांकरिष्ये इतिसंकल्प्य तुलसीप्रार्थना देवैस्त्वंनिर्मितापूर्वमर्चितासिमुनीश्वरैः नमोनमस्तेतुलसिपापंहरहरिप्रिये प्रार्थना तुलस्यमृतजन्मासिसदात्वंकेशवप्रिये केशवार्थेविचिन्वामि

वरदाभवशोभवे तुलसीपत्राणिसंगृह्यविष्णोर्भक्त्यासमर्पयेत् कृष्णउवाच अथराजन्प्रवक्ष्यामिलक्षश्रीतुलसीव्रतं विष्णुप्रीतिकरंनृणांविष्णुभक्तिविवर्धनं तुलसीप्रभवैःपत्रैर्योनरःपूजयेद्धरिं नसलिप्यतेपापौघैःपद्मपत्रमिवांभसा सुवर्णभारमेकंतुरजतंचचतुर्गुणं तत्फलंसमवाप्नोतितुलसीदलपूजनात् रत्नवैडूर्यमुक्ताभिःप्रवालादिभिरर्चितः नतुष्यतितथाविष्णुस्तुलसीपूजनाद्यथा तुलसीमंजरीभिस्तुपूजितोयेनकेशवः आजन्मकृतपापस्यतेनसंमार्जितालिपिः यद्दृष्टानिखिलाघसंघशमनीस्पृष्टावपुःपावनीरोगाणामभिवंदितानिरसनीसिक्तांतकत्रासिनी प्रत्यासत्तिविधायिनीभगवतःकृष्णस्यसंरोपितायस्यार्चाकरणेविमुक्तिफलदातस्यैतुलस्यैनमः कार्तिकेमासिकुर्वंतिमाघेवामधुसूदने दिनेदिनेसहस्रंतुह्यर्पयेत्तुलसीच्छदान् एवंमासत्रयंकुर्यात्ततउद्यापनंचरेत् वैशाखेमाघऊर्जेवाकुर्यादुद्यापनंक्रमात् यस्मिन्मासेप्रकर्तव्यंगुरुशुक्रोदयेसति हरेर्दिनेशुभेमासिकुर्यादुद्यापनंव्रती आचार्यंवरयेदादौवेदवदांगपारगं दांतंशांतंतथासौम्यंनित्यंब्राह्मणवर्चसं विधिज्ञंतत्त्ववेत्तारंशुचिष्मंतंतपस्विनं स्वगृह्योक्तेनमार्गेणपरेद्युःस्वस्तिवाचनं सौवर्णींप्रतिमांविष्णोःशंखचक्रगदान्वितां तुलस्यायतनंचैवकुर्याद्धेमविनिर्मितं हेमाद्रिनिर्मितंकुंभंपूर्णपात्रसमन्वितम् पुण्योदकैःपंचरत्नैःकुशदूर्वाप्रपूरितं तस्योपरिन्यसेद्विष्णुंलक्ष्म्याचतुलसीसमम् पूजांपुरुषसूक्तेनकुर्याद्ब्रह्मादिदेवताः उपचारैःषोडशभिःपूजयेच्चतथाहरिं रात्रौजागरणंकुर्यात्पुराणैर्वेदपाठकैः ततःप्रातःसमुत्थायहोमंकुर्याद्विधानतः वैष्णवेनतुमन्त्रेणतिलाज्येनविशेषतः पायसेनघृताक्तेनह्यष्टोत्तरसहस्रकं आचार्यायसवत्सांगांदक्षिणावस्त्रसंयुतां ब्राह्मणान्भोजयेत्पश्चात्सहस्रंवाथशक्तितः शतंवाष्टाविंशतिंचभोजयेद्ब्राह्मणान्बुधः तेभ्योपिदक्षिणांदद्याद्वित्तशाठ्यंनकारयेत् एवंयःकुरुतेमर्त्योविष्णुसायुज्यतांव्रजेत् विष्णुप्रीतिकरंयस्मात्तस्मात्सर्वव्रताधिकम् तुलसीलक्षपूजोक्तंमाहात्म्यंशृणुयान्नरः सकृद्वापिपठेन्नित्यंसगच्छेद्वैष्णवंपदं होमभस्मसमादायरक्षांकृत्वातथात्मनः ब्रह्मराक्षसभूतानांशांतयेकारयेदिदं सर्पादिबाधकेप्राप्तेगर्भिण्याश्चाविर्निगमात् भस्मप्रोक्षणमात्रेणसर्वंनश्येद्भयंनृणां इतिश्रीभविष्योत्तरपुराणेलक्षतुलसीव्रतोद्यापनंसंपूर्णम् अथविष्णोर्लक्षपुष्पपूजाविधिः ऋषयऊचुः यानिकानिचतीर्थानिपुण्यान्यायतनानिच किमुद्दिश्य

चकार्याणितत्सर्वंकथयप्रभो लोमशउवाच पृथिव्यांयानितीर्थानिसागरांतानिभोद्विजाः माहात्म्यानिचसर्वाणिकथितानिमयापुरा इदानींवक्तुमिच्छामिपुष्पाणांपूजनंनव लक्षपूजांप्रवक्ष्यामिविष्णोरमिततेजसः पुष्पाणांलक्षपूजांतुकार्तिक्यांचसमाचरेत् माघेवाबहुलेवापिविदध्याल्लक्षपुष्पिकां यद्यदृतौभवेत्पुष्पंविष्णवेचसमर्पयेत् एकैकंमूलमंत्रेणविष्णुसूक्तेनवापुनः अथवाविष्णुगायत्र्यानाम्नाचैवप्रपूजयेत् विष्णोःसहस्रनाम्नावैलक्षपूजांतुकारयेत् अतसीकर्णिकारंचकरवीरंतिलस्यच बार्हतंकेतकीचैवतथामंदारमेवच नीलोत्पलंसकुमुदंमालतीचंपकंतथा जातीपाटलकंचैवपुन्नागंचकदंबकं कल्हारंमोगरंचैवह्यशोकंबकुलंतथा मुनिपुष्पाणिशस्तानिविष्णोरमिततेजसः पालाशंकंटकीपुष्पंकमलंकोरटंतथा नीलपुष्पंधात्रिपुष्पंहरेःशस्तानिवैसदा एवंकुर्वंतियेभक्त्यातेयांतिहरिमंदिरं आयुःकामेनकर्तव्यमतसीधात्रिजैस्तथा पुत्रकामेनकर्तव्यंबार्हतीपूजनंहरेः करवीरैर्जातिकुसुमैश्चंपकैर्नागकेसरैः बकुलीतिलपुन्नागैर्धनकामेनपूजयेत् कल्हारैःकर्णिकारैश्चमांदारैःकुसुमैःशुभैः विद्याकामेनकर्तव्यंविष्णोर्भक्त्याचपूजनं पालाशैःपाटलैश्चैवकदंबैःपूजनंमहत् महाव्याधिविनाशार्थंपारिजातैश्चपूजनं वशीकरणकामेनसौवीरैस्तोषयेद्धरिं तस्यविश्वंभवेद्वश्यंनात्रकार्याविचारणा देवदानवगंधर्वावशीभवंतिनान्यथा श्रीकामेनतुकर्तव्यंकेतकीपूजनंमहत् एवंहिसर्वपुष्पैश्चसर्वकार्यार्थसिद्धये लक्षपूजांप्रकुर्याच्चप्रसन्नोहिहरिर्भवेत् उद्यापनंतथाकार्यंमंडपंतत्रकारयेत् आहूयब्राह्मणान्सर्वान्शुभनक्षत्रेशुभेदिने वेदिकाचप्रकर्तव्यामंडपेतुशुभेदिने गीतवादित्रघोषेणब्रह्मघोषेणभूयसा प्रविश्यमंडपंतत्रआचार्येणद्विजैःसह पुण्याहवाचनंकृत्वाआचार्यादीन्वरेत्ततः उपोष्यदिवसेतस्मिन्रात्रौजागरणंचरेत् वेदिकायांतुकर्तव्यंस्वस्तिकंपरमाद्भुतं तन्मध्येतंडुलैःकुर्याद्घृतदीपंशुभशोभनम् पंचपल्लवसंयुक्तंन्यसेत्कुंभंशुभशोभनं तस्योपरिन्यसेत्कुंभंपूर्णपात्रेणसंयुतं सौवर्णींप्रतिमांतत्रस्थापयेच्चहरेर्विभोः पूजांतत्रप्रकुर्वीतपंचामृतपुरःसरैः धूपदीपैश्चनैवेद्यैर्गीतवादित्रनृत्यकैः वेदशास्त्रपुराणैश्चतांरात्रिंगमयेद्व्रती ततःप्रभातसमयेसुस्नातश्चशुचिर्भवेत् स्थंडिलंकारयेत्तत्रस्वशाखोक्तविधानतः हवनंचप्रकुर्वीतसतिलाज्येनपायसैः मूलमंत्रेणगायत्र्याविष्णोर्नामसहस्रकैः येनमंत्रेणपूजावाकृतातेनैवहोमयेत् शर्कराघृतपूर्णेनचरुणाजुहुया

ततः एवंहोमःप्रकर्तव्य अष्टोत्तरसहस्रकैः ततःस्विष्टकृतंहुत्वा पूर्णाहुतिमतःपरं श्रेयःसंपादनंपश्चादाचार्यंपूजयेत्ततः ब्राह्मणान्भोजयेत्पश्चात्तेभ्योदद्याच्चदक्षिणां आचार्यंपूजयेत्सम्यक्वस्त्रालंकरणैःशुभैः पयस्विनींचगांदद्याद्धिरण्यादितथैवच प्रतिमांचसवस्त्रांच कुंभेनाचार्यमर्चयेत् दत्वाक्षमापयेत्पश्चाद्देवदेवंजनार्दनं येनयेनप्रकुर्याच्चलक्षपूजांचविष्णवे सौवर्णंचैवतत्पुष्पमर्चयेच्चहरिंततः ब्राह्मणांश्चसपत्नीकान्भूषणैस्तोषयेत्ततः प्रदक्षिणानमस्कारान्कृत्वामूर्ध्निकृतांजलिः एवंयःकुरुतेपूजांतस्यविष्णुःप्रसीदति इतिविष्णु॰विष्णोर्ल॰द्यापनंसंपूर्णम् अथबिल्ववर्त्युद्यापनविधिः द्रौपद्युवाच बिल्ववर्तिविधिंब्रूहि दुर्वासःसर्वदर्शन कस्मिन्कालेसमारंभःकस्मिंश्चैवसमापनं दुर्वासाउवा॰ राजपुत्रिप्रवक्ष्यामिविधानंसर्वकामदं श्रद्धावित्तंयदास्याद्वातदैवप्रारभेद्व्रतं कार्पासस्यस्वहस्तेनतंतुंनिष्काश्ययत्नतः स्वकीयैर्वाचविप्राद्यैरंगुलीत्रयसंमिता त्रिवृत्ताशोभनाचैवबिल्ववर्तिरुदाहृता ततःसंवर्तयेद्वर्तिस्त्वप्रदेशिनिसंमतां एवंलक्षमिताःकार्याःशक्तौकोटिमिताअपि सर्वशक्तौतुकार्पासस्त्वांगुलेनैववर्निर्मिताः घृतेनिमज्यवातैलेस्थापयेत्ताम्रपात्रके स्थापयेन्मृन्मयेपात्रे प्रत्यहंसंख्ययान्विताः श्रावणेमाधवेमाघेकार्तिकेतुविशेषतः दिनेदिनेसहस्रंतुअर्पयेद्बिल्ववर्तिकाः त्र्यंबकेश्वरमुद्दिश्यदेवागारेविशेषतः गंगातीरेथवागोष्ठेयद्वाब्राह्मणसन्निधौ प्रज्वालयेत्तुपूजांतेब्रह्मलोकजिगीषया नारीवापुरुषोवापिभक्तियुक्तेनचेतसा एकस्मिन्नेवदिवसेज्वालयेद्यदिसंभृतिं नमःशंभवइत्येवंमंत्रोरुद्राक्षरैर्मितः पूजनस्यदशांशेनशिवमंत्रेणकारयेत्

तर्पणंतद्दशांशेनतद्दशांशेनवंदनं तद्दशांशेनवैहोमंकुर्याच्चरुतिलाज्यकैः अष्टोत्तरसहस्रंवामंत्रैःपौराणिकैः स्ततः दद्याद्वर्तियमुद्दिश्यतद्देवस्यप्रतुर्मतः एवंसंपाद्यवैशाख्यांकार्तिक्यांवाविशेषतः माघ्यांवाप्यथवायस्यांकस्यांचित्पूर्णिमातिथौ प्रातःस्नात्वाशुचिर्भूत्वाकुर्यादुद्यापनंबुधः गणेशपूजनंस्वस्तिवाच्यनांदींचकारयेत् आचार्यंवरयेत्पश्चात्सर्वलक्षणसंयुतं देवागारेथवागोष्ठेशुद्धेवास्वीयमंदिरे पुष्पमंडपिकांकृत्वापट्टकूलादिवेष्टितां तन्मध्येलिंगतोभद्रंरचयेल्लक्षणान्वितं ततोवैरुद्रकोणेतुरचयेद्वेदिकांव्रती वस्त्रेणाच्छादितांवेदींरचयेत्तत्रतंदुलैः अष्टपत्रान्वितंपद्मंकर्णिकाभिःसमन्वितं कलशंस्थापयेत्तत्रअव्रणंसजलंतथा ताम्रमृन्मयपात्रंवातस्योपरि

न्यसेत्सुधीः तस्योपरिन्यसेद्देवमुमयासहितंशिवं सुवर्णनिर्मितंदेवंवृषभेणसमन्वितं रजतस्यदीपपात्रंकृत्वाशक्त्यायथाविधि सुवर्णवर्तिकांकृत्वातन्मध्येस्थापयेत्सुधीः स्थापनंलिंगतोभद्रेब्रह्माद्यावाहनंततः ततःपूजांविनिर्वर्त्यमहासंभारविस्तरैः परमान्नंचनैवेद्यंभक्त्यादेवायदापयेत् उपोष्यजागरंकुर्याद्रात्रौसत्कथयामुदा ततःप्रभातेविमलेजलेस्नात्वाप्रसन्नधीः वर्तिसंख्यादशांशेनतर्पणंकारयेद्व्रती तर्पणस्यदशांशेन होमयेद्रुद्रमंत्रतः तिलाज्यचरुभिर्बिल्वैरुद्रमंत्रेणहोमयेत् आचार्यायप्रदातव्यागौःसवत्सापयस्विनी ब्रह्मादिमंडलंमूर्तिंदद्यात्सोपस्करांतथा यजमानमथाचार्यस्त्वभिषिंचेद्गृहान्वितं विसर्जयेत्ततोदेवंब्रह्मादिसहितंपुनः दद्याच्चभूयसींकर्मसमाप्याचविचक्षणः होमस्यतुदशांशेनब्राह्मणान्भोजयेत्ततः दत्वाचदक्षिणांतेभ्योगृण्हीयादाशिषःशुभाः वर्द्धमानंरौप्यमयंहेमवर्तिसमन्वितं अथवाकांस्यपात्रंचघृतेनापूरितंशुभं ब्राह्मणायप्रदातव्यंदक्षिणासहितंशुभं ततोभुंजीततच्छेषंशिष्टैरिष्टैश्चबंधुभिः एवंद्रुपदराजेंद्रपुत्रिसत्यव्रतेनघे लक्षवर्तिव्रतविधिस्तवाग्रेकथितोमया यंकृत्वाभक्तिभावेननारीवापुरुषोपिवा दारिद्र्यतमसःसद्योमुच्यतेनात्रसंशयः पुत्रपौत्रप्रपौत्रैश्चसुखंसंप्राप्यभूतले अंते दिव्यविमानेनलभतेज्वलितंपदं नैषधाधिपतेर्भार्याभर्तृदर्शनलालसा कृत्वाव्रतमिदंप्रापराज्यंभर्तृसुतान्वितं अन्याभिऋषिपत्नीभिऋषिभिश्चापितत्वगैः कृतमेतद्व्रतंदेविस्वस्वकामार्थसिद्धये राजपुत्रिमहाभागेवनव्यसनदुःखिते कुरुष्वैतद्व्रतंसम्यक्माकृथाःकालबंधनं॥ अयंकार्तिकमासश्चमासानामुत्तमोत्तमः आगामिन्यांपौर्णमास्यामुद्यापनविधिंचर इदंदुर्वाससाख्यातंद्रौपद्यैव्रतमुत्तमं येकरिष्यंतिमनुजास्ते लभेयुःसमीहितं इतिजैमिनीयेआरण्यकेबिल्ववर्त्युद्यापनंसंपूर्णम्

अथरुद्रवर्त्युद्यापनविधिः नारदउवाच देवदेवजगन्नाथजगदानंदकारक कौतुकेनेप्सितंकिंचिद्धर्मप्रश्नंकरोम्यहं श्रुतानिदेवदेवेशव्रतानिनियमास्तथा तीर्थानिचमहंतीशयज्ञदानान्यनेकशः नास्तिमे निश्चयोदेवभ्रामितोहंत्वयापुनः कथयस्वमहादेवयद्गोप्यंव्रतमुत्तमं शिवउवाच शृणुनारदयत्नेनव्रतानांव्रतमुत्तमं रुद्रवर्त्यभिधंपुण्यं सर्वोपद्रवनाशनं सुखसंपत्करंचैवपुत्रराज्यसमृद्धिदम् शंकरप्रीतिजनकंशिवस्थानप्रदायकं सभर्त्रासहनारीणांमहास्नेहकरंपरं शृणुनारदयत्नेनगिरिशोयत्रतुष्यति दीपानांलक्षदानंयत्कुर्यात्परमधार्मिकः यावत्कालंप्रज्वलंतिदीपास्तुशिवसन्निधौ ब्रह्मणोयुगसाहस्रंदाता

स्वर्गेमहीयते कार्पासवर्त्तिकायुक्तादीपादत्ताःशिवालये सुचिरंतेपिकैलासेनिवसंतिशिवमूर्त्तयः एवंहिबहवःसंतिदीपाश्चद्विजसत्तम अधुना
संप्रवक्ष्यामियत्पूर्वैःकथितंतव यत्कृत्वाकृतकृत्यास्तुदेवाःसुरमुनीश्वराः एवंज्ञात्वानकुर्वंतितेज्ञेयादुःखभागिनः रुद्रवर्तिसमंनास्तित्रिषुलोकेषु
सुव्रतं अतएवसदाकार्यंव्रतमेतत्सुदुर्लभं मयाख्यातंव्रतमिदंकिमन्यच्छ्रोतुमिच्छसि नारदउवाच केनचीर्णंव्रतमिदंकथयस्वप्रसादतः
पूजाविधिंचमेब्रूहिउद्यापनसमन्वितं शिवउवाच शृणुनारददेवर्षेयत्त्वंश्रोतुमिहेच्छसि तदहंसंप्रवक्ष्यामिविस्तरेणमहामते नर्मदासुत्तरे
देशेपुरीचोज्जयिनीशुभा तस्यामासीत्सुगंधाचवारस्त्रीअतिसुंदरी तयाशुक्लंकृतंविप्रयुवभिश्चसुदुःसहं सुवर्णानांशतंसायंप्रतिज्ञातंचतैः
कृतम् युवानश्चतथाविप्राक्षंशिनाश्चसुगंधया राजानोराजपुत्राश्चनग्नीकृत्यपुनःपुनः येषांद्रव्यंगृहीतंचधिकृतास्तेसुगंधया एवंहिबहवो
लोकाल्लुंठिताश्चसदातया कदाचित्सागताक्षिप्रांकौतुकाविष्टमानसा ददर्शचमनोरम्यांपक्षिभिःपरिसेवितां केचिद्ध्यानपराविप्राःकेचिज्जपपरा
यणाः केचिच्छिवार्चकाविप्राःकेचिच्छक्तिप्रपूजकाः तेषांमध्येवसिष्ठोहितथादृष्टोमहामुनिः उपविष्टःकर्मसुवैकुशलोनीतिमार्गवित् तस्याथ
मैभवद्बुद्धिर्भाविपुण्यबलात्तदा विगताशाजीवनेप्साविषयेषुविशेषतः विनम्रकंधराभूत्वाप्रणिपत्यपुनःपुनः स्वकर्मपरिहारायप्रपच्छमुनिपुं
गवम् सुगंधोवाच अनाथनाथविप्रेंद्रसर्ववेदविशारद प्रसीदपाहिमांदेवशरणागतवत्सल मयाकृतानिविप्रेंद्रपापानिसुबहूनिचता
स्यपापस्यनाशायकारणंब्रूहिमेप्रभो शिवउवाच एवमुक्तस्तयाविप्रोवसिष्ठोमुनिरादरात् तेनज्ञानंचतत्सर्वंतस्याःकर्मपुरातनम् ततोब्र
वीत्सचमुनिर्वचस्तांसत्यसागरः वसिष्ठउवाच शृणुसुश्रोणिसुभगेतवपापस्यसंक्षयः येनयज्जायतेपुण्यंतत्सर्वंकथयामिते यच्चतीर्थे
महत्पुण्यंत्रिषुलोकेषुविश्रुतं प्रयागमितिविख्यातंसर्वदेवेश्वरक्षितं गत्वातत्रप्रयागेवैव्रतंत्रैलोक्यदुर्लभं रुद्रवर्त्यभिधंपुण्यंशिवप्रीतिकरं
परं कर्पासतंतुभिःकार्यारुद्रवर्त्तीशिवप्रिया हस्तेनैवप्रकर्तव्यायुग्मकंसुदृढंशुभं एकादशैस्तंतुभिश्चकारयेद्रुद्रवर्तिकां लक्षसंख्याचक
र्तव्यागव्याज्येनपरिप्लुता सौवर्णराजतंताम्रंमृन्मयंवातदृढं तत्पात्रेस्थापयेद्वर्तिंघृततैलेनपूरयेत् देयाशिवालयेनित्यंभक्तियुक्तेनचेत
सा अथवातिलतैलेनकर्तव्यालक्षवर्तिका कृत्वाव्रतमिदंभद्रेप्राप्स्यसित्वंपरांगतिं शिवउवाच ततःसाकोशमादायभृत्यंचैवसु-

मित्रकं आयातातीर्थराजंवैदत्वादानानिसर्वशः व्रतंकृत्वाययौकाश्यांसुमित्रेणसमन्विता कृत्वासर्वाणितीर्थानिविश्वेशंप्रणिपत्यच
उपोष्यरजनीमेकांजागरश्चतथाकृतः स्नात्वाचोत्तरवाहिन्यांदत्वादानानिभूरिशः ततश्चक्रेव्रतंविप्रवासिष्ठेनोदितंचयत् यथो
क्तविधिनासर्वंतथाचानुष्ठितंव्रतं ततःसास्वशरीरेणतस्मिन्लिंगेलयंययौ एवंयाकुरुतेनारीव्रतमेतत्सुदुर्लभं यंयंचिंतयतेका
मंव्रतस्यास्यप्रभावतः पुत्रपौत्रान्धनंधान्यंलभतेनात्रसंशयः शिवउवाच अथचोद्यापनंवक्ष्येव्रतसंपूर्णहेतवे प्रारभेत्का
र्तिकेमाघेवैशाखेश्रावणेतथा तेषुचोद्यापनंकार्यंयथोक्तविधिनाततः अष्टकर्णिकयायुक्तंमंडलंकारयेच्छुभं कलशंस्थापयेत्तत्र
पिधानेनसमन्वितम् रौप्यंताम्रंमृन्मयंवावस्त्रयुग्मेनवेष्टितम् तस्योपरिन्यसेद्देवमुमयासहितंशिवम् रजतस्यदीपपात्रंकृत्वाशु:
भ्यायथाविधि सुवर्णवर्तिकांकृत्वातन्मध्येस्थापयेत्सुधीः सुवर्णनिर्मितंदेवंवृषभेणसमन्वितम् पूर्वोक्तेनविधानेनपूजांकृत्वासमा
हितः आचार्यंवरयेत्पूर्वंद्विजैरेकादशैःसह होमंचैवसुसंपाद्यतिलपायसबिल्वकैः अष्टोत्तरसहस्रंवाअथवाष्टोत्तरंशतम् रुद्रसूक्ते
नवाविप्रमूलमंत्रेणवापुनः दीपलक्षंप्रकुर्वीतनरःपरमधार्मिकः दीपान्घृतेनसंयुक्तान्नरोदद्याच्छिवालये स्वर्णवर्त्तियुतंदीपमाचा
र्यायनिवेदयेत् ततःपूर्णाहुतिंकृत्वाब्राह्मणैःस्वस्तिवाचनं आचार्यंपूजयेद्भक्त्यावस्त्रालंकारभूषणैः तस्मैदेयासवत्साचगौरेकासुपय
स्विनी ऋत्विजःपूजयेत्पश्चाद्वस्त्रालंकरणैःशुभैः वस्त्रोपानद्युगंचैवभोज्यैश्चविविधैरपि तेचैवभोजनीयाश्चसपत्नीकाःप्रयत्नतः
सुवर्णवर्तिकांकृत्वारौप्यपात्रेतथैवच दद्याच्छिवप्रीतयेचसर्वकामार्थसिद्धये घृतपूर्णंरौप्यपात्रंकांस्यपात्रंतथैवच सुवर्णवर्त्ति
सहितंआचार्यायनिवेदयेत् रुद्रपीठंसप्रतिमंआचार्यायसमर्पयेत् कांस्यंविष्णुमयंरौप्यंगोघृतेनसमन्वितम् सुवर्णवर्तिसंयुक्त
मतःशांतिंप्रयच्छमे महादेवजगन्नाथभक्तानुग्रहकारक त्वत्प्रसादादहंयान्वेशीघ्रंकार्यप्रदोभव अनेनैवविधानेनरुद्रवर्तिंकरो
तियः पुत्रपौत्रैःपरिवृत्तोराज्यंप्राप्नोतिशाश्वतं एवंयाकुरुतेनारीसर्वपापैःप्रमुच्यते श्रुत्वाकथांविधानेनस्थाप्यंसर्वंनिवेदयेत् अश्वमेध
सहस्राणिवाजपेयशतानिच कथाश्रवणमात्रेणतत्फलंलभतेनरः इतिभविष्योत्तरेशिवनारदसंवादेरुद्रवर्तीव्रतोद्यापनंसंपू

र्णम् अथमाणिक्यवर्त्युद्यापनं अद्येत्यादिमासपक्षाद्युल्लिख्यममइहजन्मनिजन्मांतरेवारजोदोषनिमित्तपापपरिहारार्थंपुत्रपौ
त्रावैधव्यप्राप्तयेकृतंयल्लक्षवर्तीदीपदानंतत्सांगतासिद्ध्यर्थंतदुद्यापनंकरिष्ये तदंगगणपतिपूजनंस्वस्तिवाचनं आचार्यवरणंचरिष्ये
इतिसंकल्प्य शिवउवाच प्रसंगेनापिवक्ष्यामिवर्तिमाणिक्यसंज्ञिकां तस्यादानेनदेवित्वंममार्धासनभागिनी जातासिमत्प्रियाहि
त्वंयावदाभूतसंप्लवं सूतउवाच आर्यावर्तेपुराकाचिद्वैश्याभूल्लक्षणाह्वया तस्याभुजंगोमित्रोभूद्दासोनाममहाबली सालक्षणा
ऋतुस्नातास्थितागोदावरीतटे बालवैधव्यदुःखेनरुदंतींचकुमारिकां मृतपतिंपुरस्थाप्यबंधुभिःपरिवारितां विलपंतींततोवीक्ष्य
शनैस्तांप्रत्यपद्यत लुंठंतींभुविकायेनमुहुर्घ्नंतीमुरोबहु जडानामपिकारुण्यंजायतेतांप्रपश्यन्च तदातांलक्षणांवाक्यंभुजंगोवा
चसत्तमः भुजंगउवाच कुलजानांचनारीणांदशेयंचसुदारुणा अवस्थात्रयमेतासांतत्रेयंचसुदारुणा कन्यात्वंजीवपत्नीत्वं
विधवात्वमितित्रिधा पारवश्यंचनारीणांदुःखमामरणांतिकं मृतापत्यंचवैधव्यंतथैवापुत्रतास्त्रियः असह्यमेतत्त्रितयंवैधव्यं
तत्रचोत्तरं बालेयंशोच्यतेतीवकस्येदंकर्मणःफलं निवर्त्ततेवाकेनेयंकोवावेत्तितथाविधं उवाचदासनामासौभुजंगःसूनृतंव
चः भुजंगउवाच शृणुभद्रेप्रवक्ष्यामिधात्रासृष्टाःपुराद्विजाः देवानांचैवलोकानांहितार्थेमंत्रकोविदाः शास्त्राज्ञानात्स्वभावा
त्वजीवानांयत्पुराकृतम् जानंतिकर्मचफलंभ्रष्टव्याश्चधृतव्रताः भुजंगवचनंश्रुत्वातथैवेमितिसापुनः ततोगत्वामहाहृदंया
चकंनामवैद्विजं पप्रच्छतंदयालुंचभग्नकातरमानसा लक्षणोवाच मुनेत्वहंदुराचाराकुलटालक्षणाह्वयातथात्वांपिदयापात्रंपृ
च्छतेमांनिबोधय साधूनांसमचित्तानांजनाःसर्वेसमाभुवि दुर्गंधोवासुगंधोवायथावायोःसमोभुवि मुनेदशेयंनारीणांतृतीया
तीवदुःसहा कर्मणाजायतेयेनकेनचाथनिवर्त्तते एतद्विचार्यमेब्रह्मन्कृपयावदसुव्रत शांडिल्यउवाच इतितस्यावचः
श्रुत्वायाजकोवाक्यमब्रवीत् दैवेकर्मणिपित्र्येचनार्यःपाकेषुसंस्थिताः अकस्माच्चरजोदृष्ट्वास्पृष्टभांडाद्युपस्कराः अज्ञाना-
दाश्रयाद्वापिकामाल्लोभात्क्वचित्स्त्रियः अवेदयित्वातिष्ठंतितेनदुष्यंतिसत्क्रियाः क्रियालोपकरास्त्वेताःपापादस्माद्दुरत्ययात्

दशामिमांप्राप्नुवंतिसर्वा अपिनसंशयः बाल्येवायौवनेवापिवार्धक्येवाकदाचन तत्रयातुदुराचारांपरानेवाभिकांक्षति श्वश्रोश्व
पतिबंधूनांनित्यंवाचाकृदुःखता एतत्सहायतोनारीयादूषयतिसत्क्रियाः बाल्येवैधव्यमाप्नोतिसानारीनात्रसंशयः ऋतुस्नाता
तुयानारीबालकानवलोकयेत् लुब्धभर्त्तांततोगर्भबालानामपिघातिनी एतत्कर्मसहायेनरजसादूषितातुया मृतापत्यातथा
भूत्वावैधव्यंयौवनेव्रजेत् यानारीरजसादुष्टासर्वभांडादिसंकरं कुरुतेयदिसानारीवैधव्यंवार्धकेव्रजेत् वाचानुकूलरहिता
पतिधर्मेषुसर्वदा बाल्येवैधव्यमापन्नागतिहीनाभवत्यलं सर्वासामपिवैधव्यंनिदानंपापसंभवम् शांतिंतत्रप्रवक्ष्यामिकर्म
णोस्यापिलक्षणे कृतेपिमुनिपंचम्यांव्रतेपापंविशोषितं हस्तेनकारयेद्वर्त्तिंकार्पासंशोध्यसुप्रभम् अनेनैवविधानेनविष्णुवर्त्तिं
करोतिया पापंगच्छतिनारीणांइतिवेदविदोविदुः सपूपंवायनंकृत्वाकृतेलक्षव्रतादिके समूलशेषंव्रजतिरजोदोषोनसं
शयः निर्मूलंचभवत्याशुलक्षवर्त्तिव्रतेशुभे रजसोत्थमहापापंनारीणांनात्रसंशयः इतितस्यवचःश्रुत्वापुनःपप्रच्छलक्ष्म
णा मनसाशंकिताभूत्वासादरंमुनिपुंगवं साधुसाधुमहाभागचित्तंमेभयविह्वलं लक्षवर्त्तिव्रतस्यास्यविधानंकीदृशंवद कस्मिन्मा
सेप्रकर्तव्यंकस्मिंश्चैवसमर्पणं उद्यापनंकथंकार्यंकिंफलंतस्यवामुने तयापृष्टोयाजकोपिलोकानांहितकाम्यया फलंविधानंत
त्सर्वंतदावोचन्महामुनिः शांडिल्यउवाच कालोहिकार्तिकोमासोमाघवैशाखमेवच सहस्रगुणितंतत्तुव्रतमेतद्धिकार्तिके त
स्मात्कोटिगुणंदत्तेमाघेमासिव्रतोत्तमम् तस्मादनंतगुणितंफलंवैशाखमासिवै तस्मान्मासत्रयेकार्यंयस्मिन्मासेसमाप्यते तस्मा
न्मासद्वयात्पूर्वंप्रारब्धव्यंव्रतंत्विदं अंतेमासिप्रकुर्वीतसमाप्तिंचविचक्षणः सहस्रवर्त्तिभिःकुर्यादारार्त्तिंविष्णवेन्वहं घृतेनाप्यथ
तैलेनसम्यगन्यैर्मनोरमैः यस्मिन्मासेसमाप्तिःस्यात्पूर्णिमायांचकारयेत् उद्यापनंविधानेनव्रतसंपूर्त्तिकारणं प्रातःस्नात्वाशुचि
र्भूत्वापंचगव्यंतुप्राशयेत् पुण्याहवाचनंकृत्वावरेदाचार्यमुत्तमम् ब्रह्माणंऋत्विजश्चैवकुर्यात्तर्पणमंजसा सतिलैश्चयवैःकु-
र्यादन्नेनयऋचाद्विजः वर्क्षादशांशतःकुर्यात्तर्पणंतुविचक्षणः तर्पणस्यदशांशेनहोमंकुर्याद्विधानतः तर्पणोक्तेनमंत्रेणपायसं

चघृतान्वितम् पालाशसमिधान्वैवमंत्रैर्होमश्चवैष्णवैः घृतंतुविष्णुगायत्र्याहोमस्याथविधिस्मृतः अष्टकर्णिकयायुक्तंसर्वतोमंडलं
लिखेत् कलशस्तुतयास्थाप्यःसपिधानःसवस्त्रकः रौप्यस्ताम्रोमृन्मयोवावस्त्रयुग्मेनवेष्टितः तस्योपरिन्यसेद्देवंलक्ष्म्यासहसु
वर्णकम् राजतंदीपपात्रंच स्वर्णवर्त्तिसमन्वितम् ततोमासाधिदेवांश्चस्थापयेद्देवसंनिधौ कालोविष्णुस्तथाबन्हीरविर्दामो
दरोहरिः रुद्रःशेषोजगद्व्यापीतेजोरूपीनिशाकरः निरंजनःफलाध्यक्षोविश्वरूपीजगत्प्रभुः स्वप्रकाशःस्वयंज्योतिश्चतुर्व्यू
होजनाश्रयः परंब्रह्मविंशतिभिःपूजयेज्जगदीश्वरम् शिरोललाटंनेत्रेच कर्णौनासांमुखंतथा कंठंस्कंधौतथाबाहूस्तनौव
क्षस्तथोदरम् नाभिंकटींचजघनेऊरूजानुनिगुल्फके पादौतद्वयक्रमशोयुगान्येतैश्चपूजयेत् धूपदीपौतथादत्वानैवेद्यं
चनिवेदयेत् आचार्यंपूजयेत्पश्चाद्ब्राह्मणानृत्विजंस्तथा गांप्रदद्यात्सवत्सांचसालंकारांगुणान्वितां त्रिंशत्फलंकांस्यपा
त्रंघृतेनपरिपूरितम् सुवर्णवर्त्तिसंयुक्तमाचार्यायनिवेदयेत् कांस्यंविष्णुमयंरौप्यंगोघृतेनसमन्वितम् सुवर्णवर्त्तिसं
युक्तमतःशांतिंप्रयच्छमे इतिमंत्रेणदद्यात् तथादशफलंकांस्यंतथाघृतसमन्वितम् अथवातुयथाशक्त्यादद्यादाव
श्यकंत्विति व्रताभावेचयोदद्यात्कांस्यंचघृतपूरितम् यावज्जीवंसुखप्राप्तिर्भवत्येवनसंशयः रजोदोषाद्विमुक्तास्यात्सौ
र्णमास्यांददातियाः ब्राह्मणान्भोजयेत्पश्चाद्वित्तशाठ्यंनकारयेत् याचैवंकुरुतेनारीतस्याःपुण्यफलंशृणु यानिचान्यानिपापानि
रहस्येवकृतानिच नश्यंतितानिसर्वाणिव्रतस्यास्यप्रभावतः चांडालगामिनीवापितथाशूद्राभिमर्शिनी कारुकरजकादी
नांगामिनीदुष्टचारिणी ब्रह्मक्षत्रियवैश्येषुप्रतिलोमेषुगामिनी मातुलेयपितृव्यादिभ्रातृपुत्राभिगामिनी बालघ्नीवापि
तृघ्नीवाभ्रातृमातृवधेरता गोघ्नीवातस्करीवापिरजःसंकरकारिणी वन्हिदागरदाचैवनित्यंचाप्रियवादिनी पत्यौजीवति
यानारीमृतेवाव्यभिचारिणी एवमादिमहापापैरावृतापिकुलांगना कृत्वाचैतद्व्रतंपुण्यंमुच्यतेनात्रसंशयः व्रतानामुत्त
मंचैवस्त्रीणामावश्यकंत्विदं एकार्त्तिकंप्रयत्नेनविष्णोरमिततेजसः कोटयोब्रह्महत्यानामगम्यागम्यकोटयः तथैवा

स्तुग्रपापानांकोटयोथसहस्रशः नश्यंतिनात्रसंदेहोनारीणांवानरस्यच विलक्षवर्त्तिभिर्विष्णोः कृतेचारार्त्तिकार्पणे किमत्रबहुनो
क्तेननानेनसदृशंव्रतं पुरुषोपिव्रतंकृत्वापूर्वोक्तैःपापसंचयैः मुच्यतेनात्रसंदेहोमधुसूदनशासनात् एतत्सर्वंमयाख्यातंपृच्छं
त्यास्तवमानदे व्रतंकुरुसुखंतिष्ठयथातेरोचतेमनः इतितद्वचनंश्रुत्वापुनःपप्रच्छलक्षणा अज्ञानाद्दुष्टभावाद्वानविश्वासोम
मेहवै प्रत्ययार्थंततोब्रह्मन्प्रत्यक्षंकुरुमेधुना इतितद्वचनंश्रुत्वायाजकोवाक्यमब्रवीत् ६७ शांडिल्यउवाच कथंतेप्रत्ययोभू
यादितितांकरुणानिधिः साचोवाचपुनर्विप्रंविस्मयोत्फुल्ललोचना नववैधव्यमापन्नारुदत्येषाकुमारिका अस्याःपतिःकथं
जीवेद्वैधव्यंचैवनश्यति तथाकुरुमुनिश्रेष्ठदयादानवतांधनं इतितद्वचनंश्रुत्वाविस्मितोवाक्यमब्रवीत् शांडिल्यउवाच
अधुनामकरंप्राप्तोभास्करोलोकभास्करः माघोयंचवरोमासःसर्वक्रतुफलाधिकः प्रातःस्नात्वाचमासेस्मिन्प्राप्नुवत्यतुलं
फलं स्नानंकृष्णार्पणंकृत्वादेहिभर्त्रेमृतायच तेनजीवेदयंनूनंब्रह्मघ्नोपिसुरापिच यस्मादयंराजयक्ष्मरोगेणचमृतिं
गतः तथापिमाघमासस्यपुण्यादुज्जीवयिष्यति दापयित्वाहरेरार्त्तिंकांस्यपात्रेघृतेनच जीवपत्नीभवत्वंहियावदामरणं
ध्रुवम् लक्षणावचनंश्रुत्वाजलंस्पृष्ट्वाचवाग्यता स्नानंविष्णवर्पणंकृत्वाददौतस्मैफलंतदा तदापुण्यप्रभावेनतत्क्षणा
देवसोत्थितः भुजंगंसंप्रेषयित्वानीत्वापात्रंचरकांस्यकं कुमार्यादापयामासवैधव्यस्यापनुत्तये एतत्पुण्यप्रभावेनकुमारीसा
पिशोभना यावज्जीवंजीवपत्नीबभूवबहुपुत्रिका कुमारीशोभनानामपतिंप्राप्यसुशोभनं तद्बांधवास्तथासर्वेतुष्टुवु
स्तांचलक्षणां याजकंचबहुस्तुत्वाजग्मुस्तेस्वनिकेतनं लक्षणासापिदानेनभुजंगेनचसंयुता माघस्नानंतथाकृत्वाव्रतमेत
च्चकारसा ततस्तुमरणंप्राप्तोदासस्तस्याःसहायकृत् गयोनाममहाराजाचक्रवर्तीबभूवसः सालक्षणाचतत्पत्नीसर्वलक्ष
णसंयुता बभूवलोकविख्याताजीवत्पत्नीसुपुत्रिका अनेनैवविधानेनविष्णुवर्त्तिंकरोतियः पुत्रपौत्रैःपरिवृत्तोराज्यं
प्राप्नोतिशाश्वतम् एवंयाकुरुतेनारीसर्वपापैःप्रमुच्यते लक्षवर्तिकथामेतांप्रीत्याश्रोष्यतिमानवः सोपितत्फलमाप्नो

तिनात्रकार्याविचारणा इतिश्रीवायुपुराणेमाणिक्यवर्तिव्रतोद्यापनंसंपूर्णं अथविष्णुवर्तिव्रतंलिख्यते युधिष्ठिरउवा
च देवदेवजगन्नाथसंसारार्णवतारक वदमेसर्वपापघ्नंव्रतंसर्वव्रतोत्तमम् यस्याचरणमात्रेणजनानांसर्वकामदं अस्तिकिं-
चित्तदाब्रूहिममदेवदयानिधे श्रीकृष्णउवाच लक्षवर्तिव्रतंवच्मिसर्वकामफलप्रदम् विष्णुवर्तीतिविख्यातंशृणुराजन्समास
तः शुभेतिथौशुभेलग्नेताराचंद्रेचशोभने सम्यक्विशोध्यकार्पासंतृणधूलिविवर्जितं यस्यसूत्रंविधायाशुचतुरंगुलिकंत
या पंचसूत्रयुतावर्तिविष्णुवर्तीतिकथ्यते एवंकुर्याल्लक्षसंख्यागोघृतेनपरिप्लुताः उद्दीपयेच्चविष्णवग्रेपात्रेराजतमृन्मये अ
थवाप्रत्यहंदेयाःसहस्रद्वयसंमिताः एवंदिनानिपंचाशदतउद्यापनंचरेत् कुरुराजन्प्रयत्नेनसर्वपापप्रणाशनं भुक्त्वायथेप्सि
तान्भोगानंतेसायुज्यमाप्नुयात् पार्वत्याचपुरापृष्टंशंकरायमहात्मने तेनेदंकथितंदेव्याविष्णुवर्तिव्रतंशुभम् तयाकृताविष्णु
वर्तीलक्षसंख्याशुभप्रदा उद्दीपितातयाभक्त्यासंतुष्टेहंव्रतेनच दत्तंकैलासभवनंशंकरेणचधारिता कर्तव्यंतुप्रयत्नेनज
नेनशुभमिच्छता येनउद्दीपितोविष्णुःसर्वसौभाग्यदायकः सभवेत्पापनिर्मुक्तोविष्णुलोकेमहीयते उद्यापनंयथार्थंत्वंशृणु
राजन्माप्ततः यत्कृत्वाचसकलंफलंप्राप्नोतिमानवः कार्तिक्यामथवामाघ्यांवैशाख्यांवाशुभेदिने प्रतिमांकारयेद्विष्णोः
सौवर्णीमाषमात्रतः कलशंकारयेत्ताम्रंपूर्णपात्रेणसंयुतम् आचार्यंवरयेत्पूर्वंपंचऋत्विग्युतंव्रती पुण्याहवाचनंकृत्वाग
णेशंपूजयेत्ततः विधायसर्वतोभद्रंपंचवर्णंयथाविधि स्थापयेत्प्रतिमांविष्णोःकलशेचनवेशुभे वस्त्रद्वयेनसंवेष्ट्यपूजयेत्कल
शोपरि पूजयेच्चयथाशक्त्याब्रह्माद्यादेवताःशुभाः रात्रौजागरणंकुर्याच्छृणुयाद्वैष्णवींकथाम् प्रभातेविमलेस्नात्वापुनस्सं
पूज्यवैविभुं प्रतिष्ठाप्यततोवह्निंपायसंहवनेस्मृतम् जुहुयाद्विष्णुगायत्र्यासहस्रंपायसंशुभम् तर्पणंदशसाहस्रंमार्जनंच
तमाचरेत् सौवर्णींवर्तिकांकृत्वापात्रेराजतसंभवे कार्पासवर्तिसंयुक्तैर्नीराज्योहरिरीश्वरः आचार्यंपूजयित्वातुमंडलंतुनिवे
दयेत् ब्राह्मणान्भोजयेत्सम्यक्स्वयंभुंजीतवाग्यतः इतिविष्णुरहस्येविष्णुवर्त्युद्यापनंसंपूर्णं अथदेहवर्तिव्रतंलिख्य

ते सूतउवाच कैलासशिखरासीनंदेवदेवंजगद्गुरुं पंचवक्त्रंदशभुजंशूलपाणिंत्रिनेत्रकं कपालखट्वांगधरं
खड्गखेटकधारिणम् पिनाकपाणिंदेवेशंवरदाभयपाणिनं भस्मांगव्यालशोभाढ्यंशशांककृतशेखरं कैलासशिख
रेवासंसूर्यकोटिसमप्रभं क्रीडतेभगवांस्तत्र गणेशादीन्विसृज्यच विसृज्यदेवताःसर्वा एकाकीउमयासह तंदृष्ट्वा
देवदेवेशंप्रहृष्टंचारुलोचनं अथापृच्छत्तदादेवीयद्गोप्यंव्रतमुत्तमम् देव्युवाच तदहंश्रोतुमिच्छामिकथयस्वममप्र
भो दानधर्मान्यनेकानितपस्तीर्थान्यनेकशः नास्तिमेनिश्चयोदेव भ्रामिताहंत्वयापुनः व्रतानामुत्तमंदेव भुक्तिमुक्ति
प्रदायकम् येनचीर्णेनदेवेशमानुषैःप्राप्यतेभुवि स्वर्गापवर्गदंसौख्यंनरकार्णवतारकं इहदंश्रोतुमिच्छामिमनुष्याणां-
हितायच येनश्रुतेनलोकोयंशिवसायुज्यमाप्नुयात् शिवउवाच यन्नकस्यचिदाख्यातंनराणांमुक्तिदायकं शृणुदेविप्र
यत्नेनकथयामितवाखिलं कार्त्तिकेमार्गशीर्षेवामाघेमासिप्रयत्नतः पक्षयोरुभयोर्मध्येशुभेयोगेशुभेदिने एकादश्यां
त्रयोदश्यांचतुर्दश्यामुपोषितः कार्पासंनिस्तृणंकृत्वावर्त्तिंकृत्वाप्रयत्नतः पादांगुष्ठशिखांतंच स्वशरीरप्रमाणतः सूत्रंनि
र्मायप्रयत्नेनतंतुत्रितयसंयुतम् तस्यवर्त्तिंविधायाथसम्यग्गोऽज्यघृतेनवै दीपदानंप्रकुर्वीतप्रीतयेममचानघे प्रत्यहंदापयेद्दी
पंयावत्संवत्सरोभवेत् अथवाएकमासेवाषष्ठ्युत्तरशतत्रयम् दीपान्प्रज्वालयेद्भक्त्याममसंतोषहेतवे उद्यापनंवत्सरांतेकु
र्याद्विभवसारतः देहदीपसमंदानंनकिंचिदिहविद्यते महापापप्रशमनंस्वर्गद्वारविवर्धनं अत्रेदंकथयिष्यामिइतिहासं
पुरातनं शृणुदेवप्रयत्नेनकथांपौराणिकींशुभां ईश्वरउवाच अरण्येवर्तमानास्तेपांडवाभार्ययासह आत्मनोदुःख
नाशार्थंपप्रच्छुःकेशवंप्रति युधिष्ठिरउवाच केनोपायेनदेवेशसंकटादुद्धराम्यहं भुक्त्वाराज्यंचदेहांतेकेनमुक्तिर्भवेन्म
म श्रीकृष्णः अस्तिगुह्यंमहाराजव्रतंसर्वार्थदायकम् नारीणांचविशेषेणपुत्रपौत्रप्रवर्धनं देहवर्त्तिःसमाख्याता प्रा
णिनांसौख्यदायका आत्मदेहसमंसूत्रंतंतुत्रितयसंयुतं तस्यवर्त्तिंविधायाशुआज्येयोज्यप्रदीपयेत् एवंसंवत्सरं

पूर्णंदद्याच्छंकरतुष्टये अथवामासमध्येवादिनमध्येयथाविधि नीराजयेन्महादेवंतेनतुष्यतिशंकरः ददातिविपुलान्भोगानंतेसायुज्यमाप्नुयात् इतिश्रुत्वाचकारासौधर्मराजोनृपोत्तमः उद्यापनंतथाकुर्यान्मंडपंकारयेच्छुभं पुण्याहवाचनंकार्यमाचार्यंवरयेत्ततः ऋत्विजश्चरुद्रसंख्यान्वृणुयाच्छिवतुष्टये विरच्यसर्वतोभद्रंकलशंचनवंदृढं सौवर्णींप्रतिमांतत्रभवानीशंकरस्यच उपचारैःषोडशभिःपूजयेत्कलशोपरि दीपपात्रंराजतंहिवर्तिंकृत्वासुवर्णकम् त्र्यंबकेणचमंत्रेणहुनेदष्टोत्तरंशतम् आचार्यायचतत्पीठंदद्याद्दक्षिणयायुतं ब्राह्मणान्भोजयेत्पश्चात्स्वयंभुंजीतवाग्यतः इदंव्रतमहादेविसर्वकामसमृद्धिदं कुरुत्वंचप्रयत्नेनसर्वान्कामानवाप्स्यसि इतिश्रीस्कंदपुराणेपार्वतीशंकरसंवादेदेहवर्तिव्रतोद्यापनंसंपूर्णम्

अथविष्णुसूर्यलक्षनमस्कारविधिः अंबरीषउवाच इक्ष्वाकूणांकुलगुरोब्रह्मन्धर्मज्ञसुव्रत ब्रूहिपापक्षयकरंव्रतंसर्वोत्तमंमुने ब्रह्मघ्नस्यसुरापस्यगुरुदारावमर्शिनः संध्याकर्मविहीनस्यतथादुर्मार्गवर्तिनः दासीवेश्यासंगिनश्चचांडालीगामिनस्तथा परस्वहारिणश्चापिदेवद्रव्यापहारिणः देवब्राह्मणवृत्तीनांछेदकस्यनरस्यच रहस्यभेदकस्यापिरहसिकृतपापिनः ब्रह्मयज्ञविहीनस्यदुःशास्त्रनिरतस्यच गुरुनिंदादिश्रोतुश्चगुरुद्रव्यापहारिणः नराणांचविशेषेणप्रायश्चित्तंव्रतंवद वसिष्ठउवाच शृणुगोप्यातिगौप्यंचव्रता नामुत्तमंव्रतम् चतुर्वेदैःपुराणैश्चस्मृतिभिश्चैवनिश्चितम् ब्रह्महत्यादिपापानांप्रायश्चित्तंयदीच्छसि संकलीकरणानांचमलिनीकरणस्यच अपात्रीकरणानांचप्रायश्चित्तंयदीच्छसि भ्रातृपत्नीसुतानांचगामिनःकामिनस्तथा श्वश्रूमातृवधूनांचइच्छयागामिनस्तथा तदालक्षनमस्कारंव्रतंकुरुमहीपते संध्याकर्मादित्यागस्यचांडालीगामिनस्तुवै दासीवेश्यासंगिनश्चक्षयंचयदिवांछसि शृणुनृपविधिंवक्ष्येस्मरणात्पापनाशनं चातुर्मास्येतुसंप्राप्तेकेशवेशयनंगते आषाढस्यसितेपक्षेएकादश्यांसमाहितः संकल्पंतुविधायादौपुरतश्चक्रपाणिनः अहंलक्षनमस्कारव्रतंकर्तुंसमुद्यतः निर्विघ्नंत्वत्प्रसादेनकुरुत्वंकृपयाहरे पापपंकेनिमग्नंमांपापरूपंदुरासदम् व्रतेनानेनसुप्रीतःसमुद्धरजगत्पते

12661

इतिसंकल्प्यमनसाप्रारभेद्व्रतमुत्तमं विष्णोर्वाथसवित्रेवानमस्कारान्प्रयत्नतः प्रातःस्नात्वासदाकुर्यान्मध्यान्हावधिवाग्यतः यथासंख्यांप्रकुर्वीतकार्तिकेतुसमापयेत् दुष्टशाकमथान्नंवानभुंजीतकदाचन अनृतंनवदेत्कापिनध्यायेत्पापपूरुषम् देवार्चनंजपंहोमंनत्यजेत्तुकथंचन अतिथीन्पूजयेन्नित्यंयथाशक्त्यातुकारयेत् कार्तिकेमासिसंप्राप्तेपौर्णमास्यांततःपरं संस्थाप्यकलशंपूर्णंसवस्त्रंसपिधानकं विष्णोश्चप्रतिमांकुर्यात्सूर्यस्यापिस्वर्णजां नामभिःकेशवाद्यैश्चमित्राद्यैश्चप्रपूजयेत् परमान्नंचनैवेद्यंकुर्यात्पश्चाच्चतर्पणं पौरुषेणचसूक्तेनतिलगोधूमतंडुलैः देवदेवजगन्नाथसर्वक्रतुफलप्रद व्रतेनानेनसुप्रीतोगृहाणार्घ्यंमयार्पितं एवमर्घ्यत्रयंदद्यात्पश्चाद्धोमंसमाचरेत् पौरुषेणचसूक्तेनशतमष्टोत्तरंचरुं आकृष्णेनेतिसूर्यार्थंशतमष्टोत्तरंहुनेत् होमशेषंसमाप्याथपूर्णाहुतिमतःपरं आचार्यंपूजयेत्पश्चाद्दद्याद्गोमिथुनंततः ब्राह्मणान्भोजयेत्पश्चाच्छतंविंशतिपंचच दक्षिणांचयथाशक्त्यामंडलंचैवदापयेत् अनुज्ञानस्तुतत्रैवस्वयंभुंजीतबंधुभिः इदंपुण्यव्रतंराजन्पापारण्यदवानलं सर्वकामप्रदंनृणांसद्योविष्णुप्रियंकरं मोक्षप्रदंचकर्तॄणांज्ञानमार्गप्रदंशुभं नानेनसदृशंकिंचित्रिषुलोकेषुविद्यते सर्वेषामाश्रमाणांचविहितंश्रुतिचोदितं नारीणांसधवानांचविधवानांविशेषतः

इतिश्रीभविष्योत्तरपुराणेसूर्यविष्णुलक्षनमस्कारोद्यापनंसंपूर्णं

अथमंगलागौरीव्रतोद्यापनपूजनविधिः

युधिष्ठिरउवाच उद्यापनविधिंब्रूहिव्रतराजस्यकेशव यतोनिरुद्यापनकंव्रतंनिष्फलमुच्यते कृष्णउवाच वदामिव्रतराजस्यस्त्रीणांकर्तव्यमुत्तमं श्रावणेमासिभौमेषुचतुर्षुव्रतमाचरेत् प्रातरुत्थायसुस्नातासंकल्प्यव्रतमुत्तमं दीपंमहांतंप्रज्वाल्यमंगलांपूजयेच्छुचिः अथपूजाविधिः अद्येत्यादिदेशकालौसंकीर्त्यममपुत्रपौत्रादिवृद्धयेअवैधव्यायुरादिसकलसिद्धिद्वाराश्रीशिवमंगलागौरीप्रीत्यर्थंपंचवर्षपर्यंतंश्रीमंगलागौरीव्रतंकरिष्ये प्रथमेवत्सरेमातुर्गेहेकर्त्तव्यमेवच ततोभर्तृगृहेकार्यमवश्यंस्त्रीभिरादरात् पंचमेवत्सरेप्राप्तेकुर्यादुद्यापनंशुभं आचार्यंवरयेत्तत्रवेदवेदांगपारगं श्रावणेमासिभौमेषुह्युद्यापनविधिंचरेत् प्रातरु

स्नायस्कृत्वाततासंकल्प्यव्रतमुत्तमं चतुस्तंभंचतुर्द्वारंकदलीस्तंभमंडितं घंटिकाचामरयुतंकमलैरुपशोभितं मध्येवितानंबध्नी
यात्पंचवर्णैरलंकृतं तन्मध्येस्थापयेत्पीठंदृषदंउपलंतथा रौप्येणकारयेत्पीठंदंडःकांचननिर्मितः रौप्यहेम्नोरभावेपिपाषाणस्यवि
धीयते पीठोपरिन्यसेद्दूर्वांततोग्रेदृषदंतथा तस्याग्रेलिंगततोभद्रंलिखेद्रंगैश्चपंचभिः हरिद्रापिष्टकंकृत्वातन्मध्येऽष्टदलंलिखे
त् तस्योपरिन्यसेद्व्रीहीन्द्रोणेनपरिसंमितान् सौवर्णंराजतंताम्रंकलशंविन्यसेद्बुधः पंचरत्नानिनिक्षिप्यसर्वौषधिसमन्वितं त
स्योपरिन्यसेत्पात्रंताम्रंवैणवसंभवं उमामहेश्वरीमूर्त्तिंकांचनेनचनिर्मितां तस्योपरिन्यसेद्राजन्पूजयेच्छिवमंगलां गृहावै
इतिमंत्रेणइतिमूर्त्तिंपीठोपरिस्थापयेत् तदस्तुमित्रावरुणेत्यृचावाहनमाचरेत् गोधूमोद्भवपिष्टेनकारयेद्दीपमुत्तमं कृत्वा
प्रज्वालितोदीपोघृतवर्त्तिसमन्वितः उपचारैःषोडशभिर्गंधपुष्पादिभिस्तथा पत्रैःपुष्पैःषोडशैश्चनानाजातिसमन्वितैः तंडुलैर्धा
न्यकैश्चैवस्वच्छैःषोडशसंज्ञकैः अपामार्गस्यपत्रैश्चदूर्वाधत्तूरसंज्ञकैः षोडशैर्दूर्वसंख्याकैर्बिल्वपत्रैश्चपंचभिः नीराजनंततः
कुर्याद्दीपैःषोडशसंख्यकैः अथपूजा कुंकुमागरुलिप्तांगांसर्वाभरणभूषितां नीलकंठप्रियांगौरींवंदेहंमंगलाह्वयां ध्यानं
अत्रागच्छमहादेविसर्वलोकसुखप्रदे यावद्व्रतमहंकुर्वेपुत्रपौत्रादिवृद्धये आवाहनं रौप्येणचासनंदिव्यंरत्नमाणिक्यशोभितं म
यानीतंगृहाणत्वंगौरीकामारिवल्लभे आसनं गंधपुष्पाक्षतैर्युक्तं पाद्यंसंपादितंमया गृहाणमंगलेगौरीसर्वान्कामांश्चपूरय पाद्यं॰
गंधपुष्पाक्षतैर्युक्तमर्घ्यंसंपादितंमया गृहाणपुत्रपौत्रादीन्प्रसन्नाभवसर्वदा अर्घ्यं कामारिवल्लभेदेविकुर्वाचमनमंबिके निरंत
रमहंवंदेचरणौतवपार्वति आचमनं पयोदधिघृतंचैवमधुशर्करयासमं पंचामृतेनस्नपनात्प्रीयतांपरमेश्वरि पंचामृतस्ना॰
जाह्नवीतोमयानीतंशुभंकर्पूरसंयुतं स्नपयामिसुरश्रेष्ठेत्वांपुत्रादिफलप्रदां स्नानं आचमनं वस्त्रंचसोमदैवत्यंलज्जायास्तुनि
वारणं मयानिवेदितंभक्त्यागृहाणपरमेश्वरि वस्त्रं कंचुकीमुपवस्त्रंचनानारत्नैःसमन्वितं गृहाणत्वंमयादत्तंपार्वतीजगदीश्वरि
कंचुकीवस्त्रं कुंकुमागरुकर्पूरंचंदनंकस्तुरींतथा विलेपनंमहादेविगंधंदास्यामिभक्तितः गंधं रंजिताकुंकुमौघेन अक्षतांश्चा

तिशोभनाः ममैषांदेविदानेनप्रसन्नाभवपार्वति अक्षताःसमर्पयामि हरिद्रांकुंकुमंचैवसिंदूरंकज्जलान्वितम् सौ
भाग्यद्रव्यसंयुक्तंगृहाणपरमेश्वरि सौभाग्यद्रव्याणिसमर्पयामि सेवंतिकाबकुलचंपकपाटलाब्जपुन्नागजातिक
रवीररसालपुष्पैः बिल्वप्रवालतुलसीदलमालतीभिस्त्वांपूजयामिजगदीश्वरमेप्रसीद पुष्पाणि अपामार्गस्यपत्रैश्च
दूर्वाधत्तूरसंज्ञकैः षोडशैर्दूर्वसंख्याकैर्बिल्वपत्रादिपंचच पत्रपूजा अथांगपूजा उमायैनमः पादौपूजयामि गौर्यै
नमः जंघेपू० पार्वत्यै० जानुनीपू० जगन्धात्र्यै० ऊरूपू० जगत्प्रतिष्ठायै० कटीपू० शांतिरूपिण्यै० नाभिंपू० देव्यैन० उदरंपू० लोक
वंद्यै० स्तनौपू० काल्यैन० कंठंपू० शिवायै० मुखंपू० भवान्यै० नेत्रेपू० रुद्राण्यै० कर्णौपू० महादेव्यै० ललाटं० मंगलदात्र्यै० शिरः
पू० पुत्रदायिन्यैनमः सर्वांगंपूजयामि देवद्रुमरसोद्भूतोकृष्णागरुसमन्वितः आघ्रेयःसर्वदेवानांधूपोयंप्रतिगृह्यतां धूपं०
त्वंज्योतिःसर्वदेवानांतेजसांतेजसुत्तमम् आत्मज्योतिःपरंधामदीपोयंप्रतिगृह्यतां दीपं० अन्नंचतुर्विधंस्वादुरसैःषड्भिःस
मन्वितं भक्ष्यभोज्यसमायुक्तंनैवेद्यंप्रतिगृह्यतां नैवेद्यं० आचमनीयं० करोद्वर्तनं· फलं· तांबूलं· दक्षिणां· वज्र
माणिक्यवैडूर्यमुक्ताविद्रुममंडितं पुष्परागसमायुक्तंभूषणंप्रतिगृह्यताम् भूषणानि· नीराजनं· नमोदेव्यै० पुष्पांज
लिं० प्रदक्षिणा· नमस्कारः पुत्रान्देहिधनंदेहिसौभाग्यंदेहिमंगले अन्यांश्चसर्वकामांश्चदेहिदेविनमोस्तुते इ
तिप्रार्थना ततोवैणवपात्रेतुसौभाग्यद्रव्यमाक्षिपेत् अन्नंकंचुकिसंयुक्तंसवस्त्रंफलदक्षिणं वायनंगौरिविप्रायददामि
प्रीतयेतव सौभाग्यारोग्यकामानांसर्वसंपत्समृद्धये गौरीगिरीशतुष्ट्यर्थंवायनंतेददाम्यहं इतिमंत्राभ्यांवाय
नम् ताम्रेवावैणवेपात्रेसौभाग्यद्रव्यमाक्षिपेत् लड्डुकंचुकिसंयुक्तंसवस्त्रफलदक्षिणम् मात्रेसुवासिनीभ्यश्च
देयंवायनमुत्तमं जननींमातृसंबंधिस्त्रियःषोडशभोजयेत् नीराजनंततःकुर्याद्दीपैःषोडशसंख्यकैः मोक्तव्यादीपका
श्चायस्त्रीभिःसहस्वयंततः अन्नंलवणवर्जंतुमौनेनभोजयेत्स्वयम् सुवासिनीश्चापितथावस्त्रालंकारभूषणैः पूजयेच्चततःपश्चात्कु

यांद्गौरीविसर्जनं विप्रायप्रतिमांदद्याद्रत्नवस्त्राणिभूरिशः एवंकृतेविधानेस्मिन्नार्यवैधव्यमाप्नुयात् इतिमंगलागौरीपूजोद्या
पनविधिः अथकथा युधिष्ठिरउवाच नंदनंदनगोविंद शृण्वतोबहुलाःकथाः श्रुताउत्कृष्टपुत्रायुःकरंश्रोतुंममव्रतं
श्रीकृष्णउवाच अवैधव्यकरंवक्ष्येव्रतंचारिनिषूदन शृणुत्वंसावधानःसन्कथांवक्ष्येपुरातनीं कुंडिनंनामनगरंख्यातंतत्र
द्विजाप्रियः आसीद्वणिग्धर्मपालोनाम्नाबहुधनोपिसः सपत्नीकोप्यपुत्रोसौनास्तीतिव्याकुलोहृदि तस्यगेहेभस्मलिप्तांदे
हेरुद्राक्षधारकः जटिलोभिक्षुकोनित्यमागच्छन्प्रियदर्शनः नस्वीकुर्वंस्तदन्नंसइतिदृष्ट्वाबलावदत् स्वामिन्नयंसदायातिभि
क्षुकोजटिलोगृहे नस्वीकरोत्यस्मदन्नमितिदृष्ट्वाममाधिकं दुःखंप्रजायतेनित्यंश्रुत्वाभार्यावचोब्रवीत् धर्मपालउवा० प्रियेकदा-
चिद्भुसात्वंससुवर्णांगणेभव यदाभिक्षार्थमायातिभिक्षोर्वस्त्रांतरेत्वया तदातस्यप्रदेयानिसुवर्णानिप्रियेनघे अनंतरंतस्यभार्या
चीकरत्स्वामिनोदितम् जटिलेनतुसाशासापत्यंतेनभविष्यति श्रुत्वाभिक्षोरिदंवाक्यंदुःखितातमुवाचह स्वामिन्नुशसात्वयापापाच्छापादु
द्धरसंप्रति इत्युक्त्वातस्यचरणौववंदेदीनभाषिणी जटिलउवाच भर्तुःसमीपेवक्तव्यंत्वयापुत्रिममाज्ञया नीलवस्त्रःसमारु
ह्यनीलाश्वंगच्छकाननं खननंतत्रकर्तव्यंयत्राश्वस्तेस्खलिष्यति रम्यंपक्षिभिरायुक्तंमृगसंघद्रुमाकुलं सुवर्णरचितंरत्नमाणि-
क्यादिविभूषितं नानापुष्पैःसमायुक्तंदृश्यंदेवालयंततः वर्ततेतत्रभवतीभवानीभक्तवत्सला आराधयत्वंमनसायथावित्स्युत्स्यरि
ष्यति त्वांभवानीतिवचनंश्रुत्वाभिक्षोःसुखप्रदं ववंदेतस्यचरणौपुनःपुनरुवाचह तदैवकालेजटिलोत्वंतर्भूतोबभूवसः साव
दत्सतिमत्रैहिशृणुभिक्षूक्तमादरात् यथोक्तमवदद्भर्तातच्छ्रुत्वावाक्यमब्रवीत् नीलवस्त्रःसमारुह्यनीलाश्वंप्रस्थितोवनम् गच्छ
न्नानाविधान्वृक्षाम्पथिपश्यन्भयाकुलः मृगान्सिंहान्दंदशूकान्पथिपश्यन्भयाकुलः ददर्शासौतडागंचबाहुल्येनविराजितम्
रक्तनीलोत्पलैश्चक्रवाकद्वंद्वैश्चराजितं स्नानंचकारतत्रासौतर्पणाद्यपिभूरिशः पुनरश्वंसमारुह्यजगामबाहूनंवनं स्खलितंवा
जिनंपश्यन्अश्वादुत्तीर्यएवच चखानपृथिवींतत्रयावद्देवालयंगतः ददर्शचमहास्थूलंदेवालयमसौततः रत्नैर्मुक्ताफलैश्चैवमा

णिक्यैरन्यापिसर्वतः पूजयामासजटिलवाक्यंस्मृत्वातिविस्मितः सुवर्णयुक्तवस्त्राणिचंदनान्यक्षतान्शुभान् चंपकादीनिपुष्पा
णिधूपदीपंविशेषतः नानापक्वान्नसंयुक्तंरसैःषड्भिःसमन्वितम् नानाशाकैःसमाक्रांतंसदुग्धघृतशर्करं नैवेद्यंकरशुद्ध्यर्थंचंदनंमल-
याद्रिजम् संपाद्यतुष्टहृदयःफलतांबूलदक्षिणाः जजापमंत्रान्गुप्तोसौसगुणध्यानपूर्वकं देवीभक्तगृहादेव्यलोभयामाससा
दरं प्रसन्नावददत्रेयंपूजासंपादिताकथं येनसंपादितातस्मैददामिवरमद्भुतं इतिश्रुत्वाधर्मपालोदेव्यग्रेप्रांजलिःस्थितः भगवत्यु
वाच धर्मपालत्वयासम्यक्पूजासंपादितानघ वरंयाचयमद्भक्तददामिबहुलंधनं धर्मपालउवाच बहुलाधनसंपत्ति
र्वर्ततेत्वत्प्रसादतः अपत्यंप्राप्तुमिच्छामिपितॄणांतारकंशुभं आयातिभिक्षुकोगेहेगृण्हातिनमदन्नकं तेनमेबहुलंदुःखंसंप्रा
र्यस्योपजायते इतिदीनवचःश्रुत्वादेवीवचनमब्रवीत् देव्युवाच धर्मपालकतेदृष्टेपत्यंनास्तिसुखप्रदम् तथापिकिंयाचय
सिकन्यांविगतभर्तृकाम् पुत्रमल्पायुषंवाथाप्यंधंदीर्घायुषंसुतम् धर्मपालउवा॰ पुत्रमल्पायुषंदेहितावताकृतकृत्यताम्
प्राप्तोमिचोद्धरिष्यामिपितरोममघोरगाः देव्युवाच मत्पार्श्वेवर्तमानस्यनाभावारुह्यसुंडिनः तत्पार्श्ववर्तिचूतस्यगृहीत्वा
फलमद्भुतं पत्न्यैदेयंततःपुत्रोभविष्यतिनसंशयः इतिदेवीवचःश्रुत्वागत्वातत्पार्श्वएवच नाभिंगजमुखस्याथारुह्यजग्राह
मोहतः फलान्युत्तीर्यचततःफलमेकंददर्शसः एवंपुनःपुनःकुर्वन्फलमेकंददर्शसः क्षुब्धोगणपतिश्चाथधर्मपालायशप्तवान्
षोडशेवत्सरेमासेअहिःपुत्रंदशिष्यति धर्मपालोफलंसम्यक्वस्त्रेबध्वागमद्गृहं फलंपत्न्यैददौसापिभक्षयित्वापतिव्रता ग
र्भंसाधारयामासपत्न्यासहसंगता संपूर्णेनवमेमासेप्रासूतसुतमुत्तमं जातकर्मचकारास्यपितासंतुष्टमानसः षष्ठीपूजां
चकारास्यषष्ठेतुदिवसेततः द्वादशह्निसंप्राप्तेशिवनाम्नाजुहावतम् षष्ठेमासिचकारासावन्नप्राशनमद्भुतं तृतीयेवत्सरेचू
डामष्टमेब्देत्वनुत्तमम् कृत्वोपनयनंपार्थविप्रोभूत्तुष्टमानसः दशमेवत्सरेप्राप्तेब्रवीद्भार्यापतिव्रता भार्योवाच बालकस्य
विवाहोपिकर्तव्यःसुमुहूर्तके धर्मपालउवा॰ मयासंकल्पितंकाश्यांगमनंबालकस्यतत् कृत्वासमायात्तुततोविवाहोस्य

भविष्यति पुत्रोसौप्रेषितस्तेनशालकेनसमन्वितः वाराणस्यांप्रस्थितोसौगृहीत्वाबहुलंधनं कुर्वंनौपथिसद्धर्मंप्रतिष्ठापुरमाय
तुः क्रीडंतःकन्यकादृष्टास्तत्रप्रदेशेमनोरमे तासांसमाजेगौरांगीसुशीलानामकन्यका तयासहसखीकाचिच्चकारकलहंभृशं
गालनंचददौतस्यैरंडेभाग्येमुहुर्मुहुः सुशीलोवाच सखित्वयागालनंमेव्यर्थंदत्तंशुभानने जनन्यामेमानवत्याश्चास्तिगौरी
व्रतंशुभम् तस्यप्रसादात्सकलाःसंबंधिन्यःप्रियाःस्त्रियः आजन्माविधवाजाताःकिंपुनःकन्यकाध्रुवम् वक्ष्येतस्यप्रभावंकिंव्रत
राजस्यभामिनि पूजनेधूपदीपोयंयत्रतत्रसुखंभवेत् इतिश्रुत्वाततोवाक्यंविस्मयोत्फुल्ललोचनः मातुलश्चिंतयामासबालकस्य-
प्रियंततः शतंजीवोभवेदेषोएतद्धस्ताक्षतायदि पतंत्यमुष्यशिरसिइतिभाव्यपुनःपुनः सुशीलामेवपश्यन्सविस्मयोत्फुल्ललोचनःसु
शीलाप्रस्थितागेहेतदनुप्रस्थितावुभौ स्वगृहंपापगौरांगीनिकटेतद्गृहस्यतौ सत्तडागेरम्यदेशेवासंचक्रतुरादरात् विवाहकालेसंप्रा
प्तेसुशीलाजनकोहरिः विवाहोद्योगवान्जातोविचचाररहंवरम् असमर्थंहरंदृष्ट्वातन्मातापितरावुभौ ययाचतुःशिवंबध्वांजलीवि
नयमुक्तकौ वरपितरावूचतुः उपस्थितोविवाहोनौपुत्रस्यशुभयाहरेः सुशीलयाकन्ययायमसमर्थश्चदृश्यते अतोदेयोशिवः
श्रीमान्लग्नकालेत्वयाविभो लग्नंभविष्यतिततोदेयोस्माभिःशिवस्तव मातुलउवाच अवश्यंलग्नकालेसौशिवोग्राह्यःप्रियं
वदः ततोमुहूर्तेसंप्राप्तेविवाहमकरोच्छिवः तत्रैवशयनंचक्रेससुशीलःप्रियंवदः स्वप्नेसामंगलागौरीमातृरूपेणभास्वता सुशी
लामवदत्साध्वीहितंवचनमेवच गौर्युवाच सुशीलेतवगौरांगिभर्तुर्दंशार्थमागतः महान्भुजंगउत्तिष्ठदुग्धंस्थापयतत्पुरः घटंच
स्थापयाशुत्वंतन्मध्येसगमिष्यति कूर्पासमंगान्निष्कास्यबंधनीयस्त्वयाघटः प्रातरुत्थायदेहित्वंमात्रेवायनकंशुभं इतिगौरीवचःश्रुत्वा
सुशीलाक्षणमुत्थिता ददर्शाग्रेनिःश्वसंतंकृष्णसर्पंमहाभयम् ततश्चकारगौर्युक्तंप्रवृत्तानिद्रितुंततः उवाचवरआसंनोक्षुल्लग्नामह
तीमम भक्षणायाशुदेहित्वंलड्डुकादिकमुत्तमं श्रुत्वेतिवाक्यंपात्रेसाददौलड्डुकमुत्तमम् भक्षयित्वाशिवंहैमेतस्मिन्पात्रेंगुलीयकं
दत्वातत्स्थापयामासस्थलेगुप्तेशुभाननः सुखेनशयनंचक्रेपृथिव्यांसर्वकोविदः ततःप्रभातसमयेशिवआगाद्गृहंस्वकं स्नानसु

न्हात्सुशीलासामात्रेवायनकंददौ माताददर्शतन्मध्येमुक्ताहारमनुत्तमं ददौप्रियायैकन्यायैसहसातुष्टमानसा क्रीडाकालेसुसंप्राप्तेहरआगात्सुमंडपे आदेशयत्सुशीलांतांक्रीडार्थंजननींततः सुशीलोवाच नायंवरोमेजननियेनपाणिग्रहःकृतः अनेनसहमनसाक्रीडनेच्छातथानमे इतिश्रुत्वासमाक्रांतौचिंतयापितरौततः अन्नदानमुपायंचविरचेतुइतिद्रुतम् तदारभ्यचक्रतुस्तौपुराणोक्तविधानतः सुशीलापादयोश्चक्रेक्षालनंमुद्रिकान्विता जलधारांददौमाताचंदनंपुत्रकोहरेः हरिर्ददौचतांबूलंबुभुजुस्तत्रमानवाः इतिरीत्यान्नदानंतत्प्रवृत्तंभिक्षुसौख्यदं तावुभौप्रस्थितौकाश्यांप्राप्तौकाशींसुखप्रदां निर्मलांभासिगंगायाःस्नानंचक्रतुरादरात् स्वर्गद्वारंप्रस्थितौतौकुर्वंतौधर्ममुत्तमम् पीतांबराणिददतुर्भिक्षुकाणांगृहेगृहे आशिषश्चददुस्तस्मैचिरंजीवोभवेदिति विश्वेश्वरंसमायातौनत्वास्तुत्वापुनःपुनः स्वयंगृहंप्रस्थितौतौशिवोमार्गेद्रुतंवदन् शिवउवाच कायेमेकिंचिदस्वास्थ्यंमातुलप्रतिभातिहि ततःप्राणोक्रमेन स्वयमदूताउपस्थिताः मंगलागौरिकाचापितेषांयुद्धमभून्महत् जित्वातान्मंगलाप्राणान्ददौतस्मैशिवायच शिवोकस्मादुत्थितोसौमातुलंप्रत्युवाचह स्वप्नेयुद्धंमयादृष्टंमंगलायमभृत्ययोः जितास्तेमंगलागौर्याततोहंशयनच्युतः मातुलउवाच यज्जातंशिवतज्जातंनस्मर्तव्यंत्वयापुनः गच्छावआवांनगरेपितरौद्रष्टुमुत्सुकौ प्रस्थितौतौततस्तस्मात्प्रतिष्ठापुरमापतुः रम्येतडागेतत्रैतौपाकरंभंविचक्रतुः दृष्टौतौहरिदासीभिर्धैर्यौदार्यधरौशुभौ दास्यऊचुः अन्नदानंहरेर्गेहेप्रवृत्तंतत्रगम्यतां उभावूचतुः भोदास्योयात्रिकावावांगच्छावोनकचिद्गृहे इतिश्रुत्वातयोर्वाक्यंदास्योजग्मुःस्वकंगृहं स्वस्वामिनिकटेवाक्यमवदन्सादरंतदा सर्वदासीवचःश्रुत्वातदर्थंप्रभुरादरात् प्रेषयामासहस्त्यादिरत्नवस्त्राणिभूरिशः तंदृष्ट्वाविस्मितौतावागच्छावश्चहरेर्गृहं हरिर्मातुलमभ्यर्च्यशिवंपूजितुमागतः क्षालयंतीचसाकन्याचरणौतस्यसत्रपा अभूद्वरोमेयमितिजननींप्रत्युवाचह हरिःपप्रच्छसाश्चर्यंशिवंमंगलदर्शनम् हरिरुवाच किंचिच्चिन्हंतवास्त्यत्रब्रूहिमेवरदर्शन शिवउवा॰ ममेदंचिन्हमस्तीह इत्युक्त्वागृहमागतः ततआनीयतत्पात्रंदर्शयामाससादरं तत्पात्रंचहरिर्दृष्ट्वाकन्यादानंचकारसः ददौरत्नानिवस्त्राणिसुवर्णानिबहून्यपि तामादायप्रस्थितौतौददतौ

बहुलंधनं श्रावणेमासिसंप्राप्तेव्रतंभौमेचकारसा भुक्त्वासर्वेप्रस्थितास्तेयोजनंजग्मुरुत्तमाः सुशीलोवाच गौरीविसर्जनंचा
पिदीपमानंकरिष्यति ततोगंतव्यमस्माभिःपितरौद्रष्टुमादरात् १०० इत्युक्त्वाआगतास्तत्रगौर्याआवाहनंकृतम् ददृशुस्तत्रसौवर्णदेवा
लयमनुत्तमम् गौरीविसर्जनंदीपमानंसाचव्यर्चीकरत् ततःसर्वेप्रस्थितास्तेपितरौद्रष्टुमुत्सुकाः कुंडिनासन्नदेशेतान्दृष्ट्वाविस्मयिनो
जनाः अब्रुवंस्तेधर्मपालंसोत्कंठंप्रियदर्शनाः जनाऊचुः धर्मपालाद्यतेपुत्रोसभार्यःशालकस्तथा समायातोवयंदृष्ट्वाअधुनैवसमाग
ताः यावज्जनावदंस्तत्रतावत्सोपिसमागतः नमस्कारांश्चकारासौपितृभ्यांपितृवल्लभः मातुलोपिनतिंचक्रेभगिनीधर्मपालयोः सुशी-
लाश्वशुरायापिश्वश्रूंनत्वास्थितातदा श्वश्रूरुवाच सुशीलेतद्व्रतंब्रूहियद्व्रतस्यप्रभावतः आयुर्वृद्धिःशिशोर्मेपिजाताकमललो
चने सुशीलोवाच नजानेहंव्रतंश्वश्रूजानेमानवतीहरो श्वशुरंधर्मपालंचश्वश्रूंचभवतींतथा मंगलांदेवतांजानेवरंतुयुवयोःकृतम्
इत्युक्त्वाचसुशीलासाबुभुजेस्वांनहर्षिता कृष्णउवाच तस्माद्व्रतमिदंधर्मस्त्रीभिःकार्यंसदैवतु युधिष्ठिरउवा० फलमस्यस्तुतंकृ
ष्णविधानंब्रूहिकेशव कृष्णउवा० श्रावणेमासिभौमेषुचतुर्षुव्रतमाचरेत् प्रातरुत्थायसुस्नातासंकल्प्यव्रतमुत्तमम् उपचारैःषोड
शभिःपूजयेन्मंगलांतथा नीराजनंततःकुर्याद्दीपैःषोडशसंख्यया मात्रेसुवासिनीभ्यश्चदेयंवायनमुत्तमं भोक्तव्यादीपकाश्चापि
अन्नंलवणवर्जितं विसर्जनंमंगलायादीपमानंततःक्रमात् पंचसंवत्सरेष्वेवंकर्तव्यंपतिमिच्छुभिः इतिश्रीभविष्योत्तरपुराणे
मंगलागौरीव्रतोद्यापनंसंपूर्णम् अथमौनव्रतंलिख्यते नंदिकेश्वरउवा० कथयस्वप्रभावेनव्रतंपरमदुर्लभम् येनासौवरदोदे
वस्तन्मेकथयषण्मुख स्कंदउवाच शृणुनंदिप्रवक्ष्यामिव्रतंपरमदुर्लभम् नकस्यचिन्मयाख्यातंत्वामेवकथयाम्यहम् येनसंतु
ष्टमात्रेणसर्वपापैःप्रमुच्यते शाकल्यनगरेरम्येसोमशर्माद्विजोत्तमः सर्वदादुःखितोदीनोद्रव्यहीनोबुभुक्षितः तस्यकन्याद्वयंजातंसौं
दर्यंशुभलक्षणम् रूपलावण्यसंपन्नागृहार्चनरतासदा ज्येष्ठारूपवतीनामकनिष्ठाचसुपर्णिका वत्सानांपालनार्थायजग्मतुस्ते
सरोवरं हंसकारंडवाकीर्णंचक्रतुस्तेसरोवरं कदलीपारिजातैश्चचंपकैर्बिल्वकैस्तथा तीरेजलगतंमध्येलिंगंतत्रैवतिष्ठति तदर्च

नरनानांच अप्सराणांकदंबकं ददर्शसासमूहंच अटव्यांसुमनोहरं आवाहनंकृतंस्नानंताभ्यांतत्रसरित्तटे महादेवव्रतंदिव्यंक्रियतांममस
न्निधौ एवंसंतुष्टमात्रेणसर्वान्कामानवाप्नुयात् पूज्यतांश्रीमहादेवंसुभद्रेकन्यकेशिवां षोडशग्रंथिसंयुक्तंकरेबध्वासुदोरकं दूर्वांकु
रैःषोडशभिर्देवस्योपरिविन्यसेत् पुष्पाक्षतादिधूपैश्चसर्वंमौनेनकारयेत् एवंविधिसमायुक्तंपूजयस्वमहेश्वरं नैवेद्यंतुकृतंदानंव्रतंता
भ्यांगृहीतवान् दध्योदनंचतन्मध्यान्निक्षिप्त्वाचसरित्तटे फलानिपिष्टलड्डुकंस्वगृहेयातिगृह्यतां ततःप्रभातसमयेनैवेद्यंतुसमर्पितं
तत्सर्वंहेमसंजातंव्रतस्यास्यप्रभावतः तद्दृष्ट्वामहदाश्चर्यंपितातस्यापिकंपितः रूपवत्यातदाप्रोक्तंव्रतस्यास्यप्रभावतः नभेतव्यंत्व-
यानातगृहीतंतुमयावने द्वितीयेन्हिपुनस्ताभ्यांवत्सानीताःसरित्तटे वनेतुकन्यकेभ्रामन्तत्रराजाऽप्यागतः प्रतापसुकुरोराजामृगया
सक्तमानसः श्रांतस्तृषितवान्प्राप्तोयत्रास्तेकन्यकाद्वयम् राजाअपृच्छतांकन्यासुदकंतवसन्निधौ इत्युक्तवतिराजेंद्रेरूपवत्यासुदा
न्वितम् आनीतंशीतलंवारिश्चौदनंदधिसंयुतं ततोभुक्त्वातुराजासौपरिवारेणसंयुतः पुनःप्रष्टुंसमारेभेकस्यकन्यासुलोचने रू
पवत्युवाच सोमशर्मापिताराजान्जानासियदिवानवा तस्यकन्याद्वयंराजन्वनेचागतवत्यहं इत्याकर्ण्यततोराजागतवान्मंदिरं
प्रति दूतान्संप्रेषयामासकन्यार्थीविप्रसंनिधौ अथजग्मुस्ततोदूताःसोमशर्मागृहंप्रति राजाआहूयतेशीघ्रंगच्छविप्रमहीपतिं ततो
गत्वासमंदूतैस्तैराज्ञःसंनिवेदितः राज्ञातुप्रार्थिताज्येष्ठारूपवत्यभिधायिनी पुण्यमाणवकायैवकनिष्ठाचसुपर्णिका पाणिग्रहस्त
दास्तत्रजातःकन्यकयोस्तयोः देवस्याराधनंत्यक्तंरूपवत्यामदेनच व्रतस्यत्यागदोषेणराज्यलक्ष्मीगताभवत् कनिष्ठायागृहेचै
वराज्यंप्राप्तमनुत्तमं तस्यावेश्मनिसंप्राप्ताज्येष्ठाभिक्षुगृहंप्रति तांदृष्ट्वादुःखिताजाताकनिष्ठाप्रत्युवाचह किमिदंतवदारिद्र्यं
राज्यंकुत्रगतंतव साब्रवीत्परसैन्यैश्चसर्वंजित्वादुरात्मभिः हृतंसर्वस्वमस्माकंतन्नास्तिइतिभुज्यते व्रतभंगप्रभावेनदारिद्र्यंस
मुपागतम् इत्याकर्ण्यसुपर्णासाधनकुंभंददौतदा धनकुंभंगृहीत्वासाज्येष्ठागच्छद्गृहंप्रति मार्गेचौरैस्ततोनीतोधनकुंभोमनोह
रः दुःखंतदातुसंप्राप्तंशोकाकुलितमानसा कनिष्ठायागृहंपश्चाज्जगामअतिदुःखिता पुनर्ददर्शतांज्येष्ठांकरुणासक्तमानसा वं

शयष्टिंसमादायतस्यांस्वर्णंनिधायच ददौज्येष्ठांसुपर्णासाविससर्जगृहंप्रति शनैःशनैस्तांगच्छंतींचोरास्तत्रसमागताः वंशयष्टिंगृ
हीत्वातेजग्मुस्तत्रयथागतं ज्येष्ठातुशोकसंपन्नासुपर्णासमुपागमत् दुःखंवक्तुंसमारेभेकुपितःशंकरोमम सुपर्णातद्वचःश्रुत्वादंडव
त्प्रणिपत्यच सुपर्णोवाच धन्याहंकृपयादेवयदालोकितवानसि त्वत्प्रसादान्महादेवमुच्यतेकर्मबंधनात् रक्षरक्षजगन्नाथ-
त्राहिमांभवसागरात् ४० सुपर्णांदेवदेवेशोमाभैर्माभैरभाषत पुनःसुपर्णाइत्याहश्रूयतांजगदीश्वर ज्येष्ठामेभगिनीपापाव्रतंत्यक्तं
तवेश्वर रक्षितव्याजगन्नाथयदितुष्टोसिशंकर ईश्वरउवाच त्वद्भगिन्यात्वजानंत्याव्रतभंगोमहान्कृतः सर्वंतदस्तुसंपूर्णं-
त्वद्भक्त्यामत्प्रसादतः इत्युक्त्वादेवदेवेशोराज्यंदत्वादिवंययौ पुनर्व्रतमभावेनराज्यंप्राप्तंमनोरमं नंदिकेश्वरउवा० देवकेनप्रका
रेणव्रतस्योद्यापनंवद कथ्यतांश्रीमहाभागव्रतसंपूर्णहेतवे स्कंदउवाच वर्षेषोडशसंपूर्णेकुर्यादुद्यापनंबुधः आदौमध्येत
थाचांतेकुर्यादुद्यापनंततः मासेभाद्रपदेशुक्लेपक्षेप्रतिपदातिथौ मंडपंकारयेत्तत्रकदलीस्तंभमंडितम् नानापुष्पैश्चशोभाढ्यं
मस्वरंतत्रकारयेत् तन्मध्येलिंगतोभद्रंपंचरंगैःसमन्वितं कलशंस्थापयेत्तत्रहेमपात्रसमन्वितम् भवानीसहितंशंभुंस्वर्णेनचका
रयेत् पुष्पैर्धूपैश्चदीपैश्चनानाफलसमन्वितं फलानिपिष्टपक्वानिदद्याद्विप्रायषोडश तांबूलंदक्षिणोपेतंयथाशक्त्यातुदापयेत्
प्रसीददेवदेवेशचराचरजगद्गुरो ईशानायनमस्तुभ्यंव्योमव्यापिन्नमोस्तुते इतिक्षमाप्यदेवेशंभक्त्यातत्परमानसः रात्रौजाग
रणंकुर्याद्गीतवाद्यादिमंगलैः ततःप्रभातेउत्थायस्नानंकृत्वाविधानतः होमस्तत्रप्रकर्तव्योतिलाज्येनसमन्वितः मूलमंत्रेणहोतव्यं
मष्टोत्तरशतंबुधैः आचार्यंपूजयेद्भक्त्यावस्त्रालंकारभूषणैः धेनुंदद्यात्सवत्सांचवस्त्रालंकारसंयुताम् पयस्विनींकांस्यदोहांनाना
लंकारसंयुताम् ततःशैवान्प्रपूज्याथषोडशैस्तांस्तपोधनान् कौपीनाश्चप्रदातव्यास्तथादद्यात्कमंडलून् भक्त्याक्षमाप्यतान्स
र्वान्व्रतसंपूर्णहेतवे भोजनंतत्रदातव्यंलेह्यपेह्यसमन्वितं दक्षिणांचततोदद्याद्वित्तशाठ्यंनकारयेत् एवंविधिसमायुक्तःकरो
तिव्रतमुत्तमम् राज्यंचलभतेलोकेपुत्रपौत्रैःसमन्वितः सर्वपापविनिर्मुक्तःसर्वदोषविवर्जितः भुक्त्वाभोगान्यथाकाममंतेगच्छेत्स

रंपदं लभतेपरमांमुक्तिंशिवलोकेमहीयते ६२ इतिश्रीभविष्येमौनव्रतोद्यापनंसंपूर्णम् अथपंचधान्यलक्षपूजालिख्यते
देव्युवाच देवदेवजगन्नाथभवसागरतारक सर्वकारणदेवेशसर्वसिद्धिप्रदायक अहमेकंमहागुह्यंप्रष्टुमिच्छामिशंकर प्राप्ताहं
केनपुण्येनत्वामाशुकथयस्वमे ईश्वरउवाच शृणुदेविप्रवक्ष्यामिपृष्टंयत्तुत्वयाप्रिये पुण्यात्पुण्यतरंश्रेष्ठमिहमोक्षप्रदायकं त्व
यायल्लक्षपूजाख्यंकृतंतत्पूर्वजन्मनि तेनप्राप्तासिमांदेवीसर्वैश्वर्यानुभाविनि पार्वत्युवाच महाश्चर्यकरंगुह्यंदेवदेवजगत्पते
विस्तरेणचतत्सर्वंमाशुमेकथयप्रभो ईश्वरउवाच धान्यानांवैलक्षपूजाविधिंवक्ष्येचपार्वति लोकानामुपकारार्थंसर्वसंपत्करंशुभं
श्रावणेकार्तिकेवापिमाघेवामाधवेपिवा शुभेवाप्यथवान्यस्मिन्यदाभक्तिःशिवेनृणां चित्तंवित्तंभवेद्यस्मिन्कालेचैवार्चयेच्छिवम् नित्य
कर्मसमाप्यादौशुचिर्भूत्वासमाहितः समभ्यर्च्यविधानेनलक्षपूजांसमाचरेत् पंचाक्षरेणमंत्रेणत्र्यंबकेणतथैवच शिवनाम्नाथवा
कुर्यात्पूजनंपार्वतीपतेः तंडुलानांमुष्टिमात्रंमृगीमुद्गातिलस्यच मासार्धमात्रम न्नानांयवमष्टोत्तरंशतं तथासंख्याकृतंधान्यंस
मूहंतंडुलादिकं यवगोधूममुद्गाश्चतंडुलावैतिलाःक्रमात् पंचधान्यमितिप्रोक्तंशांतिकेदेवपूजने तंडुलैश्चप्रकुर्वीतलक्षपूजावि
धिंनराः तेषांस्वर्गंचमोक्षंचप्रददातीहशंकरः एवंतिलैःप्रकुर्वीतलक्षपूजाविधिंनराः तेजस्विनोमहाभागाःकुलेनचशतेनवै स्त्री
कामेनप्रकर्तव्यंगोधूमैःपूजनंमहत् उत्तमांस्त्रियमाप्नोतिप्रसादाच्छंकरस्यच पुत्रकामेनकर्तव्यंयवैःपूजनमुत्तमं अंतेसायुज्यमाप्नोति नात्र
कार्याविचारणा वशीकामेनकर्तव्यंमुद्गैःपूजनमुत्तमं देवदानवगंधर्ववशीभवतिनान्यथा पूजांकुर्यात्प्रयत्नेनयद्यशक्तोभवेत्तदा कारयेद्ब्रा
ह्मणद्वाराविधिनासर्वमानवैः पूजेयंपंचधान्यानांसर्वकामार्थसिद्धिदा पूजयेत्पार्वतीनाथंभक्तियुक्तेनचेतसा यंयंचिंतयतेकामंतंतंप्राप्नोति
मानवः समाप्तेधान्यपूजायाउद्यापनविधिंचरेत् आचार्यंवरयेत्तत्रवेदवेदांगपारगं ॥ पुष्पमंडपिकांकृत्वापूजास्थानेसमाहितः सुवर्णप्रति
मांकृत्वापार्वत्याशंकरस्यच यथाशक्त्या नंदिनंचरौप्यकेनसमन्वितं अभिषिंचमहादेवमुमयासहितंशिवम् नवांबरेसितेशुभ्रेस्थापये
त्पार्वतीपतिम् समभ्यर्च्यद्विजैःसार्धम् महापूजांसमाचरेत् यवगोधूममुद्गैश्चतिलैः हीरकनिर्मितैः रौप्येणतंडुलंकृत्वाभक्तिभावपु

रःसरः सुवर्णरौप्यधान्यानिकृत्वाशंभोःसम र्पयेत् पंचधान्यार्पणंकुर्यात् तथैवंपूजनंस्मृतं लक्षसंख्याकृतंध्यानंसमूहंतंडुलादिकं सुव
र्णरौप्यसहितंब्राम्हणायनिवेदयेत् अर्जनस्यदशांशेनब्राम्हणान्भोजयेत्ततः तद्दशांशेनवैहोमंकुर्याच्चरुतिलाज्यकैः आचार्यंचसपत्नी
कंतोषयेद्दक्षिणादिभिः अशक्तश्चेन्नरोयस्तुपंचाशत्पंचविंशतिः शक्तौसत्यांनकुर्याच्चेत्पूजनंनिष्फलंभवेत् येकुर्वंतिनराभक्त्याशिवपू
जांविधानतः भुक्त्वेहसकलान्भोगानंतेसायुज्यमेवच एतत्तेकथितंगुह्यंममसांनिध्यकारकम् पुत्रपौत्रधनायुष्यसंपत्तीसुखमेवच कांताचसु
भगातस्यभवेद्धर्मेमतिःसदा ब्रम्हहामद्यपस्तेयीतथैवगुरुतल्पगः सद्यःपूतोभवेल्लक्षपूजनात्पार्वतीपतेः इतिश्रीभविष्योत्तरपुराणे
पंचधान्यलक्षपूजोद्यापनंसंपूर्णं अथशिवामुष्टिव्रतंबाल्यावस्थायांस्त्रीणांउक्तंभविष्ये देव्युवाच देवदेवजगन्नाथजगदानंद
कारक कौतुकेनस्मितंकिंचिद्धर्मप्रश्नंकरोम्यहं श्रुतानिदेवदेवेशव्रतानिनियमास्तथा तीर्थानिचमहंतीनियज्ञदानान्यनेकशः नास्ति
मेनिश्चयोदेवभ्रामिताहंत्वयापुनः कथयस्वमहादेवयद्गोप्यंव्रतमुत्तमम् केनत्वंहिमयाप्राप्तस्तपोदानव्रतादिना अनादिमध्यनिधनोभ
र्नचैवजगत्प्रभुः शिवउवाच शृणुदेविप्रयत्नेनव्रतानामुत्तमंव्रतम् शिवामुष्ट्यभिधानंचसर्वोपद्रवनाशनं सुखसंपत्करंचैवपुत्रराज्य
समृद्धिदम् शंकरप्रीतिजनकंशिवस्थानप्रदायकं स्वभर्त्रासहनारीणांमहास्नेहकरंपरं तेनव्रतप्रभावेनप्राप्तमर्धासनंप्रिये इतिहासंपुरावृ
त्तंशृणुवैत्वंसमाहिता पुरासरस्वतीतीरेविमलाख्यामहापुरी तत्रचंद्रप्रभुर्नामराजाभूद्धनदोपमः तस्यस्त्रीरूपलावण्यासौंदर्येस्मरविभ्रमा
महिषीचंद्रप्रभूराजाकौतुकेनसमन्वितः महात्म्यंशिवपूजायाःपत्नींप्रत्यवदत्तदा महादेवीविशालाक्षीभार्येबालमृगेक्षणे राज्ञस्यकस्यचित्स
प्तपुत्राजाताविशारदाः तेषांमध्येकश्चिदेकस्तस्यभार्यापतिव्रता तस्याःकालेहिसंजातौद्वौपुत्रौलक्षणान्वितौ एककन्याप्रसूतासासर्वल
क्षणसंयुता अप्रियास्वामिनेजातासाराज्ञीवनमागता साकदाचिद्वनंगत्वाचारयंतिगवांगणं तत्रशार्दूलवाराहवनमाहिषकुंजरात् ह
त्वाभयेनव्यथितामूर्छितानिपपातह उत्थायचैवबभ्रामतृषार्ताविपिनंमहत् चकोरचक्रकारंडचंचरीकशताकुलं उत्फुल्लपद्मकल्हारकु
मुदोत्पलमंडितम् राजपत्नीतदापूर्वंददर्शाप्सरसांगणं समासाद्यसरस्तीरेपीत्वाजलमनुत्तमं शिवंचोमामर्चयंतंदर्शाप्सरसांगणं

किमेतदितिपप्रच्छतास्तुर्योषितंप्रति शिवामुष्टिव्रतमिदंक्रियतेस्माभिरुत्तमं सर्वसंपत्करंस्त्रीणांतत्कुरुष्वपतिव्रते राजपत्न्युवाच
विधानंकीदृशंब्रूतकिंफलंचास्यतन्मम तास्तुर्योषितःसर्वाः श्रावणेचेंदुवासरे प्रारब्धव्यंव्रतमिदंशिवोर्च्यःपंचवत्सरान् तच्छ्रुत्वासापिज-
ग्राहव्रतंनियममानसा चतुर्ष्विंदुवारेषुफलैरन्यैःप्रपूजयेत् प्रथमेइंदुवारान्हीपूजयेच्चशिवापतिं तंडुलैर्गोधूमतिलैर्मुद्गैरन्यैःप्रपूजयेत्
धान्यानांसार्धमुष्टिंचफलैःसहप्रपूजयेत् नारीकेरंमातुलिंगरंभाकर्कटिसंभवं उमामहेश्वरीमूर्त्तिस्थावरींचप्रपूजयेत् ततस्तद्भुतमा
हात्म्यात्प्रीतिःप्रियतराभवेत् ततःप्राप्यव्रतंभक्त्याशिवमभ्यर्च्चयेत्सदा पूजयेत्बहुपुष्पैश्चगंधधूपैश्चदीपकैः नानाप्रकारैर्नैवेद्यैःपूज
येच्चउमापतिं रौप्येणतंडुलंकुर्यान्नारीकेरेणसंयुतं गोधूमतिलमुद्गाश्चहाटकेनविनिर्मिताः मातुलिंगंचकेरंचकर्कटीसहपूजयेत् एवं
विधैर्धान्यफलैः मंत्रेणानेनपूजयेत् ॐनमःशिवायशांतायपंचवक्त्रायशूलिने नंदिभृंगिमहाकालगणयुक्तायशंभवे ब्राम्हणान्भो
जयेत्तत्रयथाशक्त्याचभूरिशः भर्त्रासहकथांश्रुत्वाभक्तियुक्तेनचेतसा यंयंचिंतयतेकामंतंतंप्राप्नोतिभामिनी देव्युवाच उद्या
पनविधिंब्रूहिशिवमुष्ट्याःसुरेश्वर भक्तितःश्रोतुमिच्छामिव्रतसंपूर्णहेतवे माहादेवउवाच उद्यापनविधिंवक्ष्येव्रतराजस्यशो
भने यस्यानुष्ठानमात्रेणसंपूर्णंहिव्रतंभवेत् तस्माद्भुतमिदंदेविस्त्रीभिःकर्तव्यमद्भुतम् श्रावणेमासिसोमेषुचतुर्षुव्रतमाचरेत्
प्रातरुत्थायसुस्नातासंकल्प्यव्रतमुत्तमं पंचमेवत्सरेप्राप्तेकुर्यादुद्यापनंव्रतीचतुःस्तंभंचतुर्द्वारंकदलीस्तंभमंडितम् घंटिकाचामर
युतंकदलीरूपशोभितं चंदनागरुकर्पूरैर्लेपितंमंडपंशुभं मध्येवितानंबध्नीयात्पंचवर्णैरलंकृतं तन्मध्येस्थापयेल्लिंगंपूजयेच्चउ-
मापतिं सुवर्णरूप्यधान्यैश्चफलैरकैश्चपूजयेत् ब्राम्हणान्भोजयेत्पश्चाद्वस्त्रालंकारभूषणैः अन्येभ्योविप्रवर्येभ्योदक्षि
णांचप्रयत्नतः भूयसींपरयाभक्त्याप्रदद्याच्छिवतुष्टये उद्दिश्यपार्वतीशंचसर्वंकुर्यादतंद्रितः बंधुभिःसहभुंजीतपतिपुत्रजनैःसह एवं
याकुरुतेनारीव्रतराजंमनोहरं सौभाग्यमखिलंतस्याःसप्तजन्मस्यसंशयं एतत्तेकथितंदेवितवाग्रेव्रतमुत्तमं कोटियज्ञकृतंपुण्यंअ
स्यानुष्ठानमात्रतः जायतेनात्रसंदेहोऋषिभिःपरिकीर्तनात् येशृण्वंतित्विमांभक्त्याकथांपापहरांशुभां व्रतजंप्राप्नुवंतीहतेपिपुण्यंन

संशयः इतिश्रीभविष्योत्तरपुराणेगौरीशंकरसंवादेशिवासुष्टिव्रतोद्यापनंसंपूर्णम् अथहस्तगौरीव्रतंलिख्यते कुंत्यां
वनादुपेतायांकरिणापुरुसुत्तमं मानितायांनरेंद्रेणतनयैःपंचभिःसह १ तस्याःकुशलमन्वेष्टुमाजगामसमाधवः अभिवंद्यसुखासीनं
देवदेवंजनार्दने उवाचकुंतीसानंदासम्यक्प्रश्नमिदंवचः कुंत्युवाच धन्यास्मिकृतकृत्यास्मिसनाथास्मिपरंतप अहंसंभावितायस्मा
त्त्वयायदुकुलेश्वर यदिमेसुप्रसन्नोसि तदाचक्ष्वव्रतंप्रभो यद्विधानात्सुखंराज्यंप्राप्नुयांतनयैःसह कृष्णउवाच कुंतितेकथयिष्या
मिव्रतानामुत्तमंव्रतं यत्कृत्वासुखसंतानधनधान्यसमन्विता विधूतदुष्कृतापुण्यासपुत्राराज्यमाप्स्यसि हस्तगौरीव्रतंभद्रेकुरुष्वस्वस्थ
मानसा यत्कृत्वाभक्तिभावेनलभ्यतेवांछितंफलं कुंत्युवाच यदुक्तंतेव्रतंनाथविधानंतस्यकीदृशं केनपूर्वंकृतंवीरतन्मेब्रूहिजना
र्दन श्रीकृष्णउवाच कैलासशिखरेपूर्वंहस्थसंस्थेदिवाकरे दिव्यप्रसुप्तपितागौरीस्वप्नेशंभुंददर्शह अर्धदेहंवृषार्द्धेनअर्धचंद्रकलान्वि
तं प्रबुद्धासातदागौरीशिवसंनिधिमागमत् प्रणम्यदेवदेवेशमिदमाहशुचिस्मिता देवखंडितदेहोयंस्वप्नेदृष्टस्तवप्रभो किमिदंतन्ममाचक्ष्वतथ्य
तेमानसंमम ईश्वरउवाच देवीपूर्वंनिषिद्धोस्मिहस्तरिक्षगतेरवौ स्वापत्सुविहितोतत्रदृष्टंतस्यफलंत्वया शृणुदेवित्वयानेनखंडितो
हंविलोकिता त्वयारब्धव्रतंदेवीममाराधनकाम्यया अपूर्णंचत्वयात्यक्तंममनापिसमर्पितं अपूर्णव्रतभावेनदृष्टोहंतादृशस्त्वया तत्कुरुष्वाधु
नादेवीहस्तगौरिव्रतंशुभे येनपूर्णव्रतानारीसंपूर्णव्रततामियात् लभतेसर्वसंपत्तिंपुत्रपौत्रसुखानिच देव्युवाच आरभ्यतेव्रतंनाथवि
धानेनमहेश्वर आरंभोस्यकदाकार्यःकोविधिःकस्यपूजनम् ईश्वरउवाच यस्मिन्नहनिहस्तर्क्षेउदयंप्राप्यतेरविः तस्मिन्कुर्यात्प्रयत्ने
नसौवर्णंकुंजरोत्तमं कांचनीप्रतिमागौर्याहेरंबस्यहरस्यच तस्योपरिनिधातव्यासर्वालंकारभूषिता अन्वहंकांचनैःपुष्पैःपूजामुक्ताफलैः
शुभैः नैवेद्यैश्चंदनैश्चैवशृणुयात्प्रत्यहंकथां दिनेचतुर्दशेप्राप्तेसुस्नाताशुचिमानसा शुक्लवस्त्रधरादांताभानवेर्घ्यंनिवेद्यच पूजागृहेसुसं
लिप्तेस्थापयेत्प्रतिमांशुभां स्वर्णभाजनयुग्मंचपक्वान्नैःपाचितैःशुभैः सार्द्धत्रयोदशमितैर्नैवेद्यसुपकल्पयेत् फलमूलानिचान्यानिशुभानिस
मुपाहरेत् पूजयेत्स्वर्णकुसुमैःपुष्पैश्चान्यैःसुगंधिभिः देवींचंदनपुष्पैश्चतथापत्राक्षतैःशुभैः ध्यायेच्चहृदयेगौरींहरहेरंबसंयुताम् द

क्षिणांचततोदत्वानत्वादेवींविसर्जयेत् सार्धत्रयोदशशतोदीपिकाःश्रद्धयान्वितः पतिव्रतस्यैस्त्रियैदद्यात्तावतीःस्वयमाहरेत् व्रतंसमाचरेदेवंयावद्वर्षत्रयोदश स्वर्णभाजनयुग्मंच प्रतिवर्षेविसर्जयेत् ततश्चतुर्दशेवर्षेतदुद्यापनमाचरेत् हेरंबशंभुगौरिंचकांचनीगजपृष्ठके पूर्वोक्तविधिनापूजावासराणित्रयोदश चतुर्दशदिनेप्राप्तेसंयुताप्रातरुत्थिता कृतोपवासनियमास्नाताशुद्धस्ववेश्मनि स्थापयित्वाततोदेवींनक्तंकुर्यात्ततोर्चनम् सप्तविंशतिपात्राणिपूर्वोक्तेनविधानतः पूर्वोक्तमेवपक्वान्नंविन्यसेच्चपृथक्पृथक् अन्यानिफलमूलानिपक्वान्नानिचकल्पयेत् धूपदीपाक्षतैःपुष्पैश्चंदनैर्वरवाससा भक्त्यासमर्चयेद्देवींप्रतिमांप्रतिपादयेत् स्वंकथंपूजयामीतिमात्वंचित्ते कथांकुरु अनादिव्रतमेतद्धिनात्रकार्याविचारणा देव्युवाच सौवर्णीप्रतिमांहस्तिपात्रपुष्पाणिकल्पयेत् यस्यानशक्तिःसानारीकथंकुर्याद्व्रतंविभो ईश्वरउवाच अशक्तौमृद्गजःकार्यःप्रतिमाचातिमृन्मयी पात्राणिवैणवान्येचपुष्पाणिऋतुजानिच अक्षतैस्तंडुलैश्चैवश्रद्धयाफलमाप्यते श्रीकृष्णउवाच ततश्चक्रेव्रतंगौरीअलभद्वांछितंफलम् पूर्णव्रताचसाजाताभाग्यसौभाग्यसंयुता त्वमप्येतद्व्रतंकुंतीकुरुश्रद्धयासमन्विता अथहस्तीव्रतंकुंतीसाभिमानाकरोद्व्रतम् गांधारीचापितच्छ्रुत्वाचक्रेतद्व्रतमादरात् तस्याःपुत्रशतेचापिआनीताशुभमृत्तिका कृत्वावारणगांगौरींसपुत्रांसशिवांतथा व्रतंत्वरितमारेभेनिशाम्यच्चविषादिनी तच्छ्रुत्वाशोकसंतापोकुंत्याभून्मानसोज्वरः कुंतींवाक्यमुवाचेदंगांधारीपुण्यकारिणी यस्याःपुत्रशतंशक्तंशासनेवर्ततेसदा ममपंचसुतास्तेपिनशक्ताःक्वापिकर्मणि श्रुत्वातदर्जुनःप्राहमामातर्विमनाभव किंमृदःप्रतिमाकार्यात्वरयासमुपाहरेत् साक्षादिहहरंगौरिंऐरावतमिभाननम् कृत्वातंपूजनंमातःसम्यक्फलमवाप्स्यसि इत्युक्त्वात्वरितंपार्थोगंगातीरसमाहितः तत्रतुष्टावगौरीशंसूक्तैःस्तुतिसमीरितैः तस्यतुष्टोभवच्छंभुःसमायाचेवरंततः अर्जुनउवाच देवदेवगजासीनगौरीहेरंबसंयुतः गृहाणपूजामागत्यममातुर्गृहेभव तथेत्युक्त्वाहरस्तस्यतद्विधोहरआगतः साष्टांगंप्रणतागौरींकुंतीपूजामथाकरोत् पंचोपचारैःसंपूज्यनैवेद्यादिभिरुत्तमैः तुष्टाचभक्तिभावेनसागौरीचततोब्रवीत् कुंतितेपरितुष्टास्मिवरंवरयसुव्रते कुंत्युवाच देहिमेसर्वसंपत्तिंसर्वसौख्यंसदोत्सवं प्रयच्छममपुत्राणांसदाराज्यमनामयम् ममास्त्वव्याहताभक्तिस्त्वयिजन्मनिज

न्मनि व्रतमेतत्तुयःकुर्यात्तिवलोकमवाप्स्यति नदारिद्र्यंनवैधव्यंनशोकोनापिदुष्कृतं कृच्छ्रंनापद्गतमिदंकदाचित्संभविष्यति तथेत्युक्त्वाकान
तोगौरीसगजांतरधीयत एतद्व्रतंसकलदुःखविनाशदुःखंसौभाग्यराज्यफलसाधनमाचरंत्यः यायोषितःसुखमनंतमिहोपभुज्यगौ
रीसमीपमुपयांतिहिदेहनाशे ५३ इतिश्रीभविष्योत्तरपुराणेहस्तगौरीव्रतोद्यापनंसंपूर्ण अथहस्तगौरीपूजा देशकालौसंकीर्त्य
ममइहजन्मनिजन्मांतरेचाखंडसौभाग्यप्राप्तयेपुत्रपौत्रराजकामनयाहस्तगौरीव्रतांगत्वेन गौरीमहेश्वरप्रीत्यर्थंहेरंबशंभुगौरीपूज
नंकरिष्ये तदंगत्वेनगणपतिपूजनंस्वस्तिवाचनंआचार्यादिवरणंचकरिष्ये हस्तगौरींसदावंदेहृदयेभक्तवत्सलां शिवांगार्धस्थितांमे
कदंतपुत्रेणशोभितां ध्यायामि आगच्छभोहस्तगौरीऐरावतगजोपरि शंभुनात्रगणेशेनपार्षदैःस्वसखीगणैः आवाहयामि आ
सनेस्वर्णरत्नाढ्येसर्वशोभासमन्विते उपविश्यजगन्मातःप्रसादाभिमुखीभव आसनं० इदंगंगाजलंसम्यक्सुवर्णकलशेस्थितं पा
द्यार्थंतेप्रयच्छामिक्षालयामिपदांबुजे पाद्यं गंधपुष्पाक्षतारक्तपुष्पैस्तोयंसमन्वितं सुवर्णपात्रेसर्वांगीगृहाणार्घ्यंनमोस्तुते अर्घ्यं
कर्पूरैलामृगमदैःसुवासैरुपशोभितं आचम्यतांमहादेवीशिशिरंविमलंजलं आचमनं· नदीनदसमुद्भूतंपवित्रंनिर्मलंजलं स्नाना
र्थंतेप्रयच्छामिप्रसीदजगदंबिके स्नानं पंचामृतेनस्नपनंकरिष्येभक्तवत्सले पयोदधिघृतंचैवमाक्षिकंशर्करायुतं पंचामृतस्ना
नं मंदाकिन्याःसमानीतंहेमांभोरुहवासितं स्नानार्थंतेमयानीतंगृहाणजगदंबिके शुद्धोदकस्नानं· कौशेयंवसनंदिव्यंकंचुक्यान्वस
मान्वितं उपवस्त्रेणसंयुक्तंगृहाणपरमेश्वरी वस्त्रं० यज्ञोपवीतं० इदंगंधंमहद्दिव्यंकुंकुमेनसमन्वितं विलेपनंमयादत्तंगृहाणवरदाभव
गंधं· कज्जलंचैवसिंदूरंहरिद्राकुंकुमानिच भक्त्यार्पितंमयागौरीसौभाग्यंचगृहाणभो सौभाग्यद्रव्याणि नानाविधानिमाल्यानि
सुगंधीनिहरिप्रिये गृहाणसुमनानीशेप्रसादाभिमुखीभव पुष्पाणि धूपंमनोहरंदिव्यंसुगंधंसुमनोहरं दशांगसहितंदेवीधूपं
मेप्रतिगृह्यतां धूपं दीपंतमोहरंजोत्स्नंज्ञानसंबोधकंसदा दीपंगृहाणमातस्त्वमपराधशतापहे दीपं नानाविधानिभक्ष्याणिव्यंजना
निहरिप्रिये गृहाणदेविनैवेद्यंसुखदंसर्वदेहिनां नैवेद्यं गंगोदकंसमानीतंमयाचमनहेतवे तेनाचम्यमहादेवीवरदाभवचंडिके आ

चमनं करोद्वर्तनं रंभाफलंदाडिमंचमातुलिंगंचखर्जुरं नारीकेरंचजंबीरंफलान्येतानिगृह्यतां फलानि पूगीफलमितितांबूलं हिरण्यगर्भेतिदक्षिणां॰ नीराजयामिदेवेशि कर्पूराद्यैश्चदीपकैः गृहाणमंगलान्दीपान् वरदाभवशोभने नीराजनं॰ यानिकानिच पापानीतिप्रदक्षिणाः नानाविधानिदिव्यानिबिल्वपत्रयुतानिच दूर्वांकुरैःसंयुतानिह्यंजलिस्थानिगृह्यतां मंत्रपुष्पं॰ अपराधसहस्राणि॰ नमस्कारं॰ यस्यस्मृत्येतिप्रार्थना. उपायनमितिवायनं इतिभविष्येहस्तगौरीपूजाविधिःसमाप्तः अथकूष्मांडीव्रतंलिख्यते युधिष्ठिरउवाच कृष्णकृष्णमहाभागब्रह्मरुद्रादिवंदित व्रतधर्मास्त्वयाप्रोक्ताःश्रुतास्तेसकलामया इदानींश्रोतुमिच्छामिव्रतमेकंकृपानिधे यत्कृत्वासर्वपापानिविलयंयांतितत्क्षणात् संततिर्वर्धतेनित्यंसौभाग्यंचधनादिकं अल्पायासंमहापुण्यंसर्वकामसमृद्धिदं कथयस्वेंदिराकांत कृपायदिममोपरि श्रीकृष्णउवाच साधुपृष्टंमहाराजत्वयाकुरुकुलोद्भव वच्मि सर्वंविधानेनतच्छृणुष्वजगद्धितं व्रतस्यानांमहापुण्यंकूष्मांड्याख्यानमुत्तमम् तच्छृणुष्वमहाभागस्त्रीणांचापिसुखोदयं सर्वसंपत्करंराजन्पुत्रपौत्रप्रवर्द्धनं नारदेनसमाख्यातंचंद्रसेनायभूपते आर्यावर्त्तेपुराकश्चिच्चंद्रसेनोमहीपतिः नारदंपरिपप्रच्छपुत्रपौत्रप्रदव्रतं चंद्रसेनउवाच देवर्षेसर्वधर्मज्ञसर्वलोकनमस्कृतम् त्वत्समोनास्तिलोकेषुहितवक्ताफरोनृणां अद्यमद्भाग्ययोगेनसंजातंदर्शनंतव पृच्छाम्येकमिदानींत्वामात्मश्रेयस्करंपरम् दानंधर्मंव्रतंवापिवदसत्पुत्रदायकं इदंराज्यंधनंवापिविनापुत्रेण मेप्रभो निष्फलंमुनिशार्दूलकृपयावदमेविभो कृष्णउवाच इतितद्वचनंश्रुत्वानारदोमुनिसत्तमः चंद्रसेनमुवाचेदंव्रतंगोप्यंसुरैरपि नारदउवाच चंद्रसेनमहाभागसुरुच्याप्रिययासह व्रतंकुरुमयाप्रोक्तंकूष्मांड्याःसर्वसिद्धिदम् यत्कृत्वासर्वराजेंद्र भविष्यंतिमहाबलाः सत्पुत्राःपरधर्मज्ञावीर्यवंतोबहुश्रुताः आयुष्मंतोनितिकुशलाराज्यपालनतत्पराः श्रीकृष्णउवा॰ तच्छ्रुत्वा नारदेनोक्तंचंद्रसेनोतिधार्मिकः व्रतंचकारकूष्मांड्याःपुत्राणांप्राप्तये किल अष्टौजाताःसुतास्तस्यदिक्पालसमतेजसः सुरूपःसुसुखःशांतःसुप्रसादोथसोमकः चंद्रकेतुःसदानंदोसुतंतुश्चयथाक्रमात् पुत्रैस्तैःसहधर्मात्मासुरुच्याभार्ययासह संतोषंपरमं

प्रापदेवब्राह्मणपूजकः कूष्मांडीव्रतमाहात्म्याद्यद्युरामनसीप्सितम् तत्सर्वंप्राप्यराजेंद्रः कृतकृत्योबभूवह श्रीकृष्णउवाच त्व
मपीतंव्रतंराजन्समाचरयथाविधि द्रौपद्यासहधर्मज्ञसर्वान्कामानवाप्स्यसि युधिष्ठिरउवाच कर्तव्यंतुकदाकृष्णविधिंतस्यवद
स्वमे कस्मिन्मासेतिथौकस्यांरोपणीयाथवाभवेत् श्रीकृष्णउवाच वैशाखस्यासितेपक्षेचतुर्दश्यांनराधिप शुचौदेशेस्थलं
शोध्यकूष्मांडींरोपयेदथ षण्मासंपूजयेन्नित्यंषण्मंत्रैर्नामभिः सह ब्रह्मणानिर्मितासित्वंसावित्र्याप्रतिपालिता ईप्सितंममदेवित्वंदे
हिसौभाग्यमेवनः सौभाग्यायै॰ आषाढेपूजयिष्येत्वांमातःसर्वसुखायहि आशांकुरुष्वसफलांसर्वकामप्रदेनमः सर्वकामदायै॰
न॰ श्रावणेपूजयिष्यामिभक्तविघ्नविनाशिनि कूष्मांडींबहुबीजाढ्यांपुत्रदेत्वांनमोस्तुते पुत्रदायै॰ भद्रेभाद्रपदेशुभ्रेभद्रपीठे
परिस्थिते पूजयिष्यामातस्त्वांधनदायैनमोनमः धनदायैन॰ आश्विनेपूज यिष्यामिबहुबीजप्रपूरिते कूष्मांडीनामसंयुक्तेफल
देत्वांनमोनमः कूष्मांड्यै॰ कार्तिकेपूजयिष्यामिसफलांसकलांशुभां सफलायै॰ सुखदेशुभदेमातर्मोक्षदेत्वांनमोनमः ष-
ण्मासंपूजयेदेवंकूष्मांडींधर्मनंदन मोक्षदायै॰ ततःस्वर्णमयींकृत्वाकूष्मांडींसफलांशुभां परितःपूजयेद्देवान्लोकपालांश्च
मंडले मंडलेपूजयेत्तत्रसर्वतोभद्रदेवताः कूष्मांडींपूजयेत्कुंभेवस्त्रालंकारभूषितां सौभाग्यद्रव्यसंयुक्तांपुष्पमालाभिरावृतां त
न्मूलेसंप्रतिष्ठाप्यचतुर्दश्यांप्रपूजयेत् मंडपंकारयेत्तत्रतोरणैरुपशोभितं चतुर्द्वारसमायुक्तंपताकाभिरलंकृतं तन्मूलेवेदिकांचैवच
तुरस्रां तुकारयेत् एवंकृत्वामहाराजआचार्यंवरयेत्ततः सपत्नीकंसुशीलंचवेदवेदांगपारगं वरणात्पूर्वमेवेहकारयेत्स्वस्तिवाच
नं सर्वत्रमंडपंकुर्याद्रंगवल्यामनोहरं तदग्रेसर्वतोभद्रंनानारंगैस्तुकारयेत् अव्रणंकलशंस्थाप्यवस्त्रयुग्मेनवेष्टयेत् महाफले
नसंयुक्तंपंचरत्नसमन्वितं जलप्रपूरितंकृत्वापुष्पपल्लवसंयुतं ब्रह्माणंचैवसावित्रींपूजयेद्विधिवद्व्रती पंचामृतेनसंस्नाप्यततःकु
र्याच्चपूजनं षोडशैरुपचारैश्चपूजयेत्परमेश्वरीं पूजयेत्पुरुषसूक्तेनमूलमंत्रेणवाव्रती कूष्मांड्यैकामदायिन्यैब्रह्माण्यैव्रतहेतवे
नमोस्तुशिवरूपिण्यैसफलंकुरुमेव्रतम् एवंकृत्वामहाराजपूजनंसर्वकामदं रात्रौजागरणंकृत्वागीतवाद्यादिमंगलैः कथांश्रुत्वावि

धानेनयथोक्तांराजसत्तम ततःप्रभातेपूर्णायांहोमंकुर्याद्यथाविधि मणोदेवीतिमंत्रेणजुहुयात्तिलसर्पिषा अष्टोत्तरशतंहोमंकुर्यात्तस्य यथाविधि होमशेषंसमाप्याथआचार्यंपूजयेन्नृप वस्त्रादिभिरलंकारैस्तोषयेत्तंसपत्निकं षड्भिमाश्चाथसंपूज्याद्दक्षिणावस्त्रभूषणैः ततोदानंचकुर्वीतकूष्मांड्याःपीठसंयुतं दानमंत्रः कूष्मांडींबहुबीजाढ्यांवस्त्रालंकारभूषितां हेमबीजसमायुक्तांगृहाणद्विजसत्तम कूष्मांडीव्रतसिद्ध्यर्थंकुर्याद्गोदानमुत्तमं व्रतसंपूर्तिसिद्ध्यर्थंआचार्यायनिवेदयेत् ततश्चशक्त्याविप्रेंद्रान्भोजयेद्भक्तिसंयुतः दक्षिणांचततोदद्याद्व्रतसंपूर्णहेतवे एवंकृतेमहाराजव्रतेसर्वफलप्रदे ईप्सितांल्लभतेकामान्नात्रकार्याविचारणा इतिश्रीपद्मपुराणेकूष्मांडीव्रतोद्यापनंसंपूर्णम् अथकर्कटीव्रतंलिख्यते ऋषयऊचुः कथितानित्वयासाधोश्रेयांसिसुबहून्यपि आख्यातानिविचित्राणिचतुर्वर्गफलान्यपि पुण्यानिचव्रतान्यादौतत्फलान्यपिभागशः स्वर्गसाधनभूतानिनिःश्रेयसकराण्यपि तत्रयद्व्रताप्रोक्तंयोषिद्वैधव्यनाशनं पुत्रपौत्रादिजनकंभर्त्तुरारोग्यदायकं कामभोगप्रदंचान्यद्व्रतमस्तीतिचोक्तवान् तद्भवान्व्रतकंपुण्यंवक्तुमर्हस्यशेषतः येनचीर्णेनसर्वज्ञनवैधव्यमवाप्नुयात् ईप्सितान्लभतेकामान्भर्त्तुरायुश्चशाश्वतं एवंनिशम्यमुनिवर्यवचोभिशेषम्श्रमत्हृष्टवदनःसुतसूतसूनुः आनंदयन्मुनिसदःस्ववचोमृतौदैःप्रोवाचशौनकमिदंबहुदीक्षिताग्र्यम् सूतउवाच साधुप्रश्नोमहाभागाभवद्भिर्यदुदाहृतः तद्वक्ष्येचयथाज्ञानंश्रुतंवोजनकाङ्क्षवम् योषिन्मूलोहिसंसारोपुंसःश्रेयोविधानकः योषितोपिमहाभागास्तारयंतिनिजंपतिं आपद्भ्योनरकेभ्यश्चपातिव्रत्यपरायणाः सीमंतिन्योधारयंतित्रिभुवनत्रयमंडपं पातिव्रत्येनधर्मेणदमेननियमेनच भानुर्बिभेतिसततंकरैःस्प्रष्टुंपतिव्रतां साचेद्भर्तृयुतासाध्वीतारयेद्भुवनत्रयम् दैवादपिवियुक्तास्यादशक्तचिरक्तसदैवहि अमंगलेभ्यःसर्वेभ्यःप्रासावैधव्यमंगना जलहीनायथागंगाप्राणहीनायथातनुः दर्भहीनायथासंध्याधर्महीनायथाक्रिया सत्यहीनायथावाणीनृपहीनायथापुरी भर्त्तृहीनातथानारीभातिलोकेनकुत्रचित् तस्माद्वैधव्यशांत्यर्थंयत्नःकार्योहियोषिता नप्रयत्नैर्बहुविधैर्वैधव्यंयांतियोषितः विनापुण्यैर्व्रतैर्वापिभूरिदानैरहर्निशम् तस्मादेकंव्रतंविप्रायोषिद्वैधव्यनाशनं कथयामीष्टफलदंसंवादंशिवयोःशुभम्

पुरावंतीपुरेह्यासीद्धरिदीक्षितसंज्ञकः वेदवेदांगसंपन्नःकौशिकोद्विजसत्तमः यज्वाविदिततत्वार्थोज्ञानदीपोभवार्णवे तस्यभार्यागुणवतीसतीसर्वगुणान्विता पतिशुश्रूषणरतातत्पदांबुनिषेविनी भर्तुःसकाशात्साप्तासाकन्यारत्नानिसप्तवै वत्सरेवत्सरेसावैवरिष्ठासर्वयोषिताम् ताःकन्यारूपसंपन्नाववृधुःपितृवेश्मनि इलामृताशुचिःशांतागुणज्ञामलिनीध्रुवा रूपलावण्यसंपन्नाकन्यास्ताश्चारुहासिनीः दृष्ट्वाननंदतुस्तौहिदंपतीपरयामुदा ददौपितासुनीडायइलांसत्यायधीमते विवाहमकरोद्यत्नात्प्रीत्यापरमयासुतः जातेपरिणयेसोथसत्यःपितृगृहेवसन् कालधर्ममुपेयायशीतज्वरप्रपीडितः दिनानिपंचषट्चैवंभुक्त्वाविप्रयजंसुखम् मृतेथजामातरिसोपिदीक्षितोवत्सेतिचुक्रोशसुदुःखपीडितः हाहेतिकिंतेभगवन्विचेष्टितंदिनेशदुःखंमयिपातितंत्वया विलपन्नितिविप्राग्र्योजामातुःसमकारयत् और्ध्वदेहिकसंस्कारंददौचापितिलांजलिं इलावैधव्यसंपन्नापन्नगीवश्वसन्मुहुः समूर्च्छलक्षणंबालाबालवैधव्यपीडिता षडेवंचापिताःसर्वावैधव्यंप्रतिपेदिरे मातुःशोककराश्चैववैधव्येनप्रपीडितः पाणिपीडनवेलायांचरमायांद्विजोत्तमः चिंतादुःखार्णवेमग्नःकर्तव्यंनाभ्यपद्यत यस्ययस्याथनिलयेआगमद्धरिदीक्षितः ध्रुवांदातुंनशक्तोभूत्सत्यंसत्यंभयात्सुमान् वयोवृद्धिंध्रुवायाश्चवीक्ष्यचिंतामवापसः इत्थंमनसिसंचिंत्यह्यगमत्कामिनंद्विजः ध्रुवमादायसुश्रोणींगतोरण्यंमहद्ध्रुवम् रुतानिपक्षिणांयस्मिन्नसंतिनचमानवाः तद्वनंनार्ककिरणायस्मिन्शक्ताःप्रकाशितुम् अनेकमृगसंकीर्णंशार्दूलमृगसेवितं अन्यैश्चविविधैःसत्वैःसेव्यमानमहर्निशं तत्रोपलंमहानीलंअपश्यच्चद्विजाग्रणीः चिंतयित्वामनस्येवमश्मनेप्रददौसुताम् वेदोक्तेनैवविधिनापाणिग्राहमकारयत् त्वंधर्मचारिणीचास्यसुतेभवभयंत्यज भर्तृबुध्याभजस्वैनामुपलंफलमाप्स्यसि इतिदत्वासुतांतस्मैसद्विजोगात्स्वमंदिरं कंदमूलफलानांचमिषेणैवजगामसः गतेपितरिसाबालादुःखशोकाकुलाभवत् कांतारेकुररीयद्वच्चुक्रोशभृशदुःखिता चिंतयित्वामनस्येवंभर्तृबुध्यामहोपले दधारदृढभावज्ञानन्वसौमेपतिर्ध्रुवम् ननुदेवाःप्रयच्छंतिशिलाप्रतिमसंस्थिताः वांछितार्थान्मनुष्याणांभावोहिफलदायकः एतस्मिन्नंतरेकालेजगादोच्चैःपुरंदरः पपातचाशनिस्तस्मिन्महत्युपलमस्तके सभिन्नोवज्रघातेनचूर्णीभूतो

ततःक्षणात् दृष्ट्वाश्रवापितत्सर्वंपुनर्निंदांचकारसा एतस्मिन्नेवकालेतुपार्वत्यात्रिपुरांतकः युक्तोयदृच्छयागच्छन्व्योमयानेनमंदिरं
पार्वत्युवाच भगवन्कथमद्यस्त्रीरुदतीवैकृपानिधे दीनादीनतरानित्यंतत्सर्वंमेवदप्रभो इतिदेव्यावचःश्रुत्वाप्रोवाचगिरिशःशिवां
महादेवउवाच देविकौशिकदायादोहरिदीक्षितसंज्ञकः तस्येयमात्मजासाध्वीवैधव्यमगमद्ध्रुवम् प्राप्तोमरणधर्मोयंपाषाणोप
तिजानिहि एवमन्याःसोदरास्याःषडतीवमनोहराः वैधव्यमापुःसर्वास्ताःपाणिग्रहणमात्रतः पित्रादत्तामुनींद्राणांपुत्रेभ्योविपदं
गताः आसांललाटगारेखादैवाद्वैधव्यदायिनी तांनिराकर्तृकामोयंप्रस्तरायसमर्पयत् सोपिपंचत्वमापन्नोदेवीरेखाबलीयसी स
र्वज्ञस्यवचःश्रुत्वाकृपाक्रांताब्रवीदुमा पार्वत्युवाच कर्मणाकेनभगवन्वैधव्यंप्रापिताःसुताः मुनेरत्नुत्तमंब्रूहितत्पापंपूर्वजन्म-
जं कथंवाशुभजन्मासांभवेद्भवदनुग्रहात् गिरिजावचनंश्रुत्वाप्राहशंभुर्यथोदितम् पूर्वमेवंमुनेःपुत्र्यःसप्तासन्गुणशालिने पि
त्रादत्तामुनींद्रायमुनयेविधिपूर्वकं मुनींद्रंप्राप्यभर्तारंसप्तासन्दुष्टचेतसा सापत्न्यभावादुष्टास्तानित्यंकलहतत्पराः परस्परेर्ष्ययानि
त्यंभर्तुःसेवांनचक्रिरे स्वयंमिष्टान्नभोजिन्योभर्तृद्वेषणतत्पराः तेनतापेनसंतप्तोगतोवैस्वर्गमुत्तमम् सप्तापिचसपत्न्यस्ताःप्रत्य
यातायमालयं यामिनीयातनांभुक्त्वादुःखिताःपुनरागताः इहजन्मनिकस्यापिकौशिकस्यसुताभवन् रूपलावण्यसंपन्नावैधव्यं
प्रतिपेदिरे प्रलंभितःपतिःपूर्वंतेनदोषेणवंचिताः पतयोवंचयांचक्रुःकृत्वावैपाणिपीडनं इतिशंभोर्वचःश्रुत्वाहिमाद्रितनया
ब्रवीत् पार्वत्युवाच भवंत्येवंविधाःसर्वाभर्तृद्वेषणतत्पराः अस्मदृग्गोचरीचेयंनोपेक्ष्याकरुणानिधे एवमाकर्ण्यपार्वत्यावच
नंत्रिपुरांतकः वैधव्यभंजनंलोकेकथयामासतद्व्रतम् येनचीर्णेनपौरंध्र्योवैधव्यंनाप्नुवंतिहि उमेशृणुष्वव्रतकंयोषिद्वैधव्यनाशनं
तारणंसर्वपापानांयोषितांचविशेषतः कर्कटीद्युमणौकल्पेवल्लीशीघ्रंदधत्फलं कर्कटीसफलाह्येषांवांछितार्थप्रदायिनी तद्व्रतंतेवि
धास्यामिशृणुसुश्रोणिसादरं कर्कटीव्रतपुण्येनसर्वान्कामानवाप्नुयात् योषिद्वापुरुषोवापिनात्रकार्याविचारणा त्वमप्येतद्व्रतंसुभ्रु
कुरुष्वममसर्वदा कर्कटस्थेरवौनारीश्रावणेमासिभामिनी चंद्रवारेविशेषेणस्त्रीभिःकार्यमिदंशुभम् प्रातःशुक्लतिलैःस्नात्वादंत

शुद्धिंविधायच त्यक्त्वाचशतगंडूषान्मुखदुर्गंधिनाशने पंचगव्यंगृहीत्वाथव्रतसंकल्पमाचरेत् आचार्यंवरयेत्प्राज्ञंशांतंदांतंकुटुंबिनम् सर्वलक्षणसंपूर्णंवस्त्रैराभरणैस्तथा मंडपंकारयेत्पश्चाच्चतुर्द्वारंसतोरणं तन्मध्येभद्रपीठस्थांपूजयेदुमयासह सौवर्णींप्रतिमांकृत्वावृषभंरजतस्यच कर्कटींपूजयेद्यत्नात्सफलांकांचनींशुभां वस्त्रयुग्मेनसंवेष्ट्यकुंभोपरिनिधायच कल्पवल्लिमहाभागेसदासौभाग्यदायिनि प्रार्थयिष्ये व्रतादौत्वांभर्तृश्रेयोभिवृद्धये इतिसंपूज्यतांतत्रकर्कटींचशिवंतथा उपचारैःषोडशभिर्भक्तिभावसमन्वितः नैवेद्यंसफलंदत्वामाल्यांसंतोष्यशोभने एकादशफलानांवैवायनकंचप्रदापयेत् वेणुपात्रेणसहितंसतांबूलंसदक्षिणम् कर्कटीनामयावल्लीविधात्रानिर्मितापुरा ममतस्याःप्रदानेनसफलाश्चमनोरथाः गीतैर्वाद्यैश्चनृत्यैश्चपुराणपठनादिभिः रात्रौजागरणंकृत्वासपत्नीकोद्विजैःसह प्रभातेविमलेस्नात्वाप्रातःसंध्यांविधायच स्वशाखोक्तविधानेनहोतव्यंकर्मसिद्धये प्रधानंपायसंसर्पिःसतिलंजुहुयाद्धुती अष्टोत्तरसहस्रंतुशतमष्टोत्तरंतुवा कद्रुद्रायेतिमंत्रेणजुहुयाद्रुद्रतुष्टये गौरीर्मिमायेतितथापार्वत्याःप्रीतयेहुनेत् होमकर्मसमाप्याथहुनेत्पूर्णाहुतिंतथा आचार्यंपूजयेत्पश्चाद्वस्त्रालंकारभूषणैः गौर्देयातुसवत्साचवस्त्रालंकारभूषिता आचार्यायप्रदातव्याव्रतसंपूर्णहेतवे दशदानानिकुर्वीतशक्त्यावित्तानुसारतः सवस्त्रप्रतिमांकुंभमाचार्यायनिवेदयेत् यथाशक्त्याप्रकुर्वीतवित्तशाठ्यविवर्जितः

दानमंत्रः गृहाणेमांकर्कटींत्वंद्विजःस्वर्णेननिर्मिताम् संपूर्णंमेव्रतंचास्तुदानेनानेनशंकर इमंमंत्रंसमुच्चार्यदद्यात्कर्कटिकांद्विजे ब्राह्मणान्भोजयेत्पश्चाद्रुद्रसंख्यामितांस्तथा आशिषोप्रतिगृण्हीयाद्द्विजानांसफलाप्तये व्रतमेतद्वरंकांतेभोगस्वर्गापवर्गदम् ध्रुवांकथयसाधित्वंव्रतंवैधव्यभंजनं इतितस्यवचःश्रुत्वाविमानादवरुह्यच ध्रुवांसाकथयामासकृपांकृत्वाव्रतंशुभं स्वर्गंगतामहेशानीअनुकंप्यद्विजात्मजां ध्रुवापिचव्रतंचक्रेकांतारेऋषिमंडले तदैवदिव्यपुरुषःपाषाणादाशुस्कश्चवाः सोपिद्विजःपूर्वपतिस्तस्याएवमृगीदृशः वरयामासतांबालांतदद्भुतमिवाभवत् शापेनकस्यचित्सोपिपाषाणत्वमुपागतः तौदंपतीबहून्वर्षान्भुक्त्वाभोगान्यथेप्सितान् पुत्रपौत्रसमृद्धिंचप्राप्यांतेपिपरंपदं एवंरहस्यंपरमंकथितंवोमुनींद्रकाः कथाश्रवणमात्रेणनारीसौभाग्यमाप्नुयात् कर्तव्यंतुप्रयत्ने

नचतुर्वर्णाभिरुत्तमम् ९४ इतिश्रीस्कंदपुराणेकर्कटीव्रतोद्यापनंसंपूर्णम् अथकर्कटीपूजनं तिथ्यादिसंकीर्त्यममअखंडसौभाग्यप्राप्त्यर्थंपुत्रपौत्रादिसंतत्यैकर्कटीव्रतांगत्वेनकर्कटीपूजनंकरिष्ये पंचवक्त्रंत्रिनयनमुमयासहितंशिवं शुद्धस्फटिकसंकाशंचिंतयेद्भक्तवत्सलं ध्यानं· आवाहयामिदेवत्वांअस्मिन्स्थानेस्थिरोभव कर्कटीव्रतहेतोर्हिपार्वतीसहितप्रभो आवाहनं· आसनंमणिसंयुक्तंचतुरस्रंसमंततः भक्त्यानिवेदितंतुभ्यंगृहाणसुरसत्तम आसनं· देवदेवनमस्तेस्तुभक्तानामभयप्रद पाद्यंगृहाणदेवेशपार्वतीसहितप्रभो पाद्यं· गौरीवल्लभदेवेशत्रिपुरांतकशंकर भालनेत्रनमस्तेस्तुगृहाणार्घ्यंममप्रभो अर्घ्यं· कांचनेकलशेसुस्थंसुगंधंचसुशीतलं आचम्यतांमहादेवपार्वत्यासहितःप्रभो आचनं· पयोदधिघृतंचैवमधुशर्करयायुतं पंचामृतेनस्नपनंकरिष्येभक्तवत्सल पंचामृतस्नानं· गंगागोदावरीरेवासमुद्भूतंसुशीतलं स्नानार्थंतेमयानीतंगृहाणजगदीश्वर स्नानं· आचमनं· चंद्ररश्मिसमंशुभ्रंकार्पासेनविनिर्मितं देहसंरक्षणार्थायवस्त्रंशंकरगृह्यतां वस्त्रं· त्रिवृत्त्यात्रिवृतंशुभ्रंविधात्रानिर्मितं पुरा ब्रह्मण्यरक्षणंसूत्रंउपवीतंगृहाणभो उपवीतं· श्रीखंडंचंदनंदि॰ गंधं· अक्षतांश्चसुरश्रे॰ अक्षताः· नानाविधानिपुष्पाणिबिल्वपत्रयुतानिच पूजार्थंतेमयच्छामिगृहाणपरमेश्वर पुष्पाणि वनस्पतिरसोद्भूतो॰ धूपं॰ साज्यंचेतिदीपं॰ अन्नंचतुर्विधंस्वादुरसैःषड्भिःसमन्वितं गृहाणपार्वतीकांत कर्कटीसहितप्रभो नैवेद्यं· उत्तरापोशनं· करोद्वर्तनं· इदंफलंमहादेवकर्कटीसंभवंशुभं गृहाणवरदोभूत्वापूजांमेसफलांकुरु फलं· पूगीफलं· तांबूलं· हिरण्यगर्भेतिदक्षिणां· चक्षुर्दंसर्वलोकानांतिमिरस्यनिवारणं सर्वसौख्यकरंदेवि आर्तिक्यंप्रतिगृह्यतां नीराजनं· नमोस्तुकर्कटीदेविसर्वसौभाग्यदायिनी मंत्रपुष्पंगृहाणेदमुमयासहितप्रभो मंत्रपुष्पं· यानिकानिचपापानीतिप्रदक्षिणा॰ नमस्तेदेवदेवेशनमस्तेसुरवल्लभ धनसंपूर्तिकामश्चनमस्कारंकरोम्यहं नमस्कारः अपराधसहस्राणि॰ प्रार्थना· कर्कटीव्रतांगविहितंब्राह्मणायवायनप्रदानमहंकरिष्ये ब्राह्मणंसंपूज्य एकादशफलान्यद्यकर्कटीसंभवानिप्रभो तांबूलदक्षिणाभ्यांचगृहाणद्विजसत्तम वायनं· विसर्जयामिशंभोत्वांकर्कट्याउमयासह पूजांचप्रतिगृह्याथगम्यतांनिज

मंदिरं विसर्जनम् आचार्यायचपीठंतन्निवेद्यसकलंततः ब्राह्मणाभोजनीयाश्चरुद्रसंख्यामिताःशुभाः इतिकर्कटीपूजासमा
प्ता अथविष्णुपंचकव्रतंलिख्यते सूतउवाच द्वापरांतेमहाराजःकुंतीपुत्रोयुधिष्ठिरः भ्रातृभिःसहधर्मात्माद्रोणंभीष्मंतथा
कुरून् पुत्रान्पौत्रांस्तथाभ्रातॄन्अन्यानपिमहीपतीन् राज्यस्यहेतवेतत्रकुलक्षयमथाकरोत् हत्वावंश्यान्कुरून्राजापश्चात्ता
पेनतापितः राजाकुरुमहीपालस्तत्तापक्षयकारणात् चतुरंगबलोपेतोभ्रातृभिःपरिवारितः यत्रसंस्थापितःकृष्णोद्वारवत्यांजग
त्प्रभुः सजगामतदातत्रप्रणम्यजगदीश्वरं कृष्णंसंस्तूयवचसातेनापिपदिवंदितः पप्रच्छकिलवंश्यानांवधदोषप्रशांतये व्रतमे-
कंसमाचक्ष्वयेनायंप्रनिशाम्यति कुलक्षयकृतंदोषंक्षयंकर्तुंत्वमर्हसि इतिविज्ञापनंकृत्वापश्चात्तापोभवेत्पुनः युधिष्ठिरउवाच
यत्कृत्वामुच्यतेजंतुर्महापातकपंचकात् तद्व्रतंब्रूहिगोविंदयदितुष्टोसिकेशव श्रीकृष्णउवा॰ साधुसाधुमहाभागशृणुष्वैकाग्रमा
नसः येनसंचीर्यमाणेनमुच्यतेपंचपातकात् तथाव्रतमिदंवक्ष्येममप्राणस्त्वमेवहि निमित्तमात्रंभवताकुलक्षयःकृतोभुवि प्रोष्ठ
पद्यांसितेपक्षेद्वादश्यांश्रवणेथवा तदारभ्यव्रतंकार्यंमार्गशीर्षेतथानृप एकादश्यामुपवसेत्प्रतिपक्षेचपर्वणि श्रवणेचतथोपोष्य
पूजयेद्गरुडध्वजं एवंवर्षंभवेद्यावत्तावत्संपूज्यकेशवम् वत्सरांतेप्रकुर्वीतपंचमूर्तिंजनार्दनं सश्रीकंचसकामंचसचक्रंसगदंविष्णुं
होमंतत्रप्रकुर्वीतएभिर्नामपदैःशुभैः श्रावणेदेवतानांचअपूपैर्जुहुयाद्घृतं पुरुषोत्तमःशार्ङ्गधन्वातथैवगरुडध्वजः गोवर्धनोद्धनं
तश्चपुंडरीकाक्षएवच तथानित्योवेदगर्भोयज्ञःपुरुषएवच कृब्रह्मण्योजयःशौरिरेताःश्रवणदेवताः शुक्लद्वादशिदेवेभ्योजुहुयाद्दु
ग्धपायसं नामभिःकेशवाद्यैश्चद्वादशैर्जुहुयात्सुधीः एताःसंपूजयेच्छुक्लद्वादश्यामधिदेवताः पौर्णमास्याश्चदेवेभ्योजुहुयाद्घृतपा
यसं विधुःशशीशशांकश्चचंद्रःसोमस्तथोडुपः मनोहरोमृतांशुश्चहिमांशुःपावनस्तथा निशाकरश्चंद्रमाश्चपूर्णिमादेवताःक्रमा
त् कृष्णद्वादशिदेवेभ्योहुनेत्पंचामृतोदनम् संकर्षणादिनामानःकृष्णद्वादशिदेवताः मुद्गोदनतिलाज्यंचअमावास्यांतुदेवताः मही
धरोजगन्नाथोदेवेंद्रोदेवकीसुतः चतुर्भुजोगदापाणिःसुरमीढःसुलोचनः चार्वंगश्चक्रपाणिश्चसुरमित्रोसुरांतकः दर्शस्यपक्षमा

सेषुदेवताःषष्ठिकीर्तिताः स्वाहाकारान्वितैरेतैश्चतुर्थ्यंतैश्चहोमयेत् एवंविधिविधानंचहोतव्यंचपृथक्पृथक् होमांतेपूजयेद्वस्त्रै
राचार्यंभूषणैःशुभैः भूमिंसस्यवतींश्रेष्ठांसवत्सांगांपयस्विनीं गोमेदंपुष्करागंचवैडूर्यंचेंद्रनीलकं माणिक्यंचप्रदातव्यंपंचपा
तकनाशनं पंचरत्नानिदेयानिपंचपातकनाशने पंचमूर्तिंसुवर्णेनजातरूपंजनार्दनं सवस्त्रंसकलशंचैवआचार्यायनिवेदयेत् इरा
वतीतिमंत्रेणगांदद्यात्सपयस्विनीम् घृतवतीतिसूक्तेनभूदानंकारयेत्ततः तद्विष्णोरितिमंत्रेणजातमूर्तिंप्रदापयेत् हिरण्यगर्भमं
त्रेणदातव्यंचहिरण्यकं पंचमहापातकानिक्षयंयांतिनसंशयः ब्रह्माणंचगणेशंचवस्त्रालंकारभूषणैः वस्त्रांतेपूजयेद्भक्त्यागो-
भूरत्नहिरण्मयं दत्वाप्रदक्षिणांकृत्वायथानुज्ञांविसर्जयेत् ब्राह्मणान्भोजयेद्राजन्वैष्णवान्षष्टिसंज्ञकान् ब्रह्महत्यासुरापानं
स्वर्णस्तेयमेवच गुरुस्त्रीगमनंचैवतत्संसर्गीचपंचकं गोघ्नश्चैवकृतघ्नश्चभ्रूणहावृषलीपतिः अन्येभ्योविविधेभ्यश्चपापेभ्योमु
च्यतेनरः वसतेचैववैकुंठेयावद्विष्णुःसनातनः इहलोकेसुखवासीनःपुत्रपौत्रादिसंपदः अविच्छिन्नप्रियंभुक्त्वाअंतेयातिपरांगतिं
तस्मात्त्वंकुरुराजेंद्रव्रतंपातकनाशनं अयोध्यानगरेरम्येत्रेतायांचनराधिपः राजादशरथोनामशशासपृथिवीमिमां सराजामृग
यासक्तोजगामगहनंवनं शयूरनामनद्याःसतीरेगत्वामहावने धनुर्बाणयुतोरात्रौस्थितोसौमृगसाधने अर्धरात्रौव्यतीतायांतस्य
स्तीरेमुनीश्वरः पितृभक्तिसदाचारःपितरौतेननीयते तस्यतौपितरौतत्रतृषयाप्रपीडितौतदा जलमानीयतांपुत्रताभ्यांसंप्रेषितःसुतः
सकुंभोमुनिपुत्रेणजलपूर्णप्रकारितः निशम्यराजातच्छब्दंमुमोचशरमुत्तमं मृगमन्वेषयन्राजामृगबुध्व्याजिघांसतः विलोकयत्तत्र
राजाब्रह्माणंशंसितव्रतं आत्मानंब्रह्महंतारंज्ञात्वाराजासुदुःखितः तत्पापपरिहारार्थंनैमिषारण्यमागतः यत्रज्ञात्वाज्ञानदृष्टान्प्र-
णिपत्ययथाक्रमं शृण्वंतुमुनयःसर्वेब्रह्महत्यामयाकृता कथंपापाद्विमुच्येहंवक्तव्यंतुमहर्षयः ऋषयऊः क्षणंध्यात्वामहाभागा
राजानमिदमब्रवन् राजन्रघुकुलश्रेष्ठकुरुष्वव्रतमुत्तमं विष्णुपंचकसंज्ञंचपंचपातकनाशनं मासेभाद्रपदेशुक्लेद्वादश्यांश्रवणंयदि
तदारभ्यव्रतंकार्यंमार्गशीर्षेथवानृप एकादशीद्वयंचैवश्रवणंपौर्णमासिका दर्शंचोपोषयेद्भक्त्यावर्षमेकंसमाचरेत् एकादशीद्वये

मासेश्रवणंविष्णुदेवतं पौर्णमास्यांशशांश्चैवदर्शेविष्णुःसनातनः द्वादशैवतुनामानिप्रत्येकंपूजयेद्व्रती माघेमासेपंचकंचपूजये-
च्चजगत्प्रभुं नामभिर्द्वादशेमासेपंचधादशसंख्यया उद्यापनंततःकुर्यादादौमध्येप्रयत्नतः अंतेवापिप्रकर्तव्यंव्रतसाद्गुण्यहेतवे
घृतप्लुतंचश्रवणेशुक्लेतुगुडपायसं पायसाज्यंपौर्णमास्यांकृष्णेपंचामृतोदनं तिलैश्चदर्शेमुद्गान्नंहोतव्यंघृतसर्पिषा अनेनविधि-
नाराजन्कुरुष्वव्रतमुत्तमं पापेभ्योमुच्यतेराजन्पुत्रपौत्रांश्चप्राप्स्यसि तेषांतद्वचनंश्रुत्वाचकारव्रतमुत्तमं राजादशरथःसद्यो-
मुक्तोवैपातकात्ततः तस्माद्वृत्रवधान्मुक्तोअहल्यादोषतःप्रभुः सुराचार्योमहाराजसुरापानाद्बृहस्पतिः गुरुस्त्रीगमनाच्चंद्रःस्वर्ण-
हरणाद्बलिः अन्यैरपिमहीपालैर्दिलीपसगरादिभिः महापातकजैर्दोषैर्विमुक्त्यर्थंकृतंतदा तस्मात्त्वमपिराजेंद्रकुरुष्वव्रतमुत्तमं
कुलक्षयकृतेभ्यश्चदोषेभ्योमुच्यसेव्रतात् यदीच्छसिमहाराजसद्गतिंगतिमात्मनः माकुरुष्वात्रसंदेहोव्रतंकुरुयथोचितं उपाख्या-
नंचश्रोतव्यंयद्वृतंविष्णुपंचकं येचशृण्वंतिसततंयेपठंतिद्विजोत्तम सर्वेतेमुक्तिमायांतिमहापातकजाद्भयात् कथानुवादकंभक्त्या
पूजयेच्चसदानरैः तेनसंतुष्यतेविष्णुर्जगत्कर्ताजनार्दनः इतिभ॰विष्णुपं॰संपूर्णम् अथोद्यापनं ममइहजन्मनिज-
न्मांतरेचब्रह्महननमद्यपानसुवर्णस्तेयगुरुतल्पगमनागम्यागमनतत्संसर्गजनितोपपातकानांबुद्धिपूर्वाणांअबुद्धिपूर्वाणांमहा-
पातकानांलघुपातकानांप्रायश्चित्तार्थंविष्णुपंचकव्रतंकरिष्ये विष्णुपंचकस्यव्रतस्यसंपूर्णतासिद्ध्यर्थंउद्यापनंकरिष्ये पुण्या-
हंवाचयित्वासर्वतोभद्रेब्रह्मादिदेवताआवाह्य कलशेविष्णोःसुवर्णप्रतिमांस्थाप्यरात्रौजागरणंकुर्यात् प्रभातेस्नात्वाशुद्धदे-
शेस्थंडिलंकृत्वाअग्निंप्रतिष्ठाप्यअन्वाधानंकुर्यात् चक्षुषीत्यंतमुक्त्वाअत्रप्रधानं पुरुषोत्तमं·शार्ङ्गधन्वानं॰गरुडध्वजं॰अनंतं॰पुं-
डरीकाक्षं॰नित्यं॰वेदगर्भं॰यज्ञपुरुषं॰सुब्रह्मण्यंजयंशौरिं॰एताःश्रवणदेवताःअपूपद्रव्येण केशवादिद्वादशनामदेवताःएताःशुक्ल-
द्वादशीदेवताः गुडपायसेन विधुं शशिनं॰ शशांकं॰ चंद्रं॰ सोमं॰ उडुपं॰ मनोहरं॰ अमृतांशुं॰हिमांशुं॰पावमानं॰ निशाकरं॰ चंद्रम-
सं॰ एताः पूर्णिमादेवताःघृतपायसेन॰संकर्षणादिकृष्णांताः एताःकृष्णद्वादशीदेवताःपंचामृतोदनेन॰ महीधरंजन्नाथं॰देवेंद्रंदेवकी

सुतं॰ चतुर्भुजंगदापाणिं॰ सुरमीढं॰ सुलोचनं॰ चार्वंगं॰ चक्रपाणिं॰ सुमित्रं॰ असुरांतकं॰ एताः दर्शदेवताः तिलसुद्गौदनेन शेषेणस्विष्टकृतमित्युक्त्वा होमशेषंसमाप्य आचार्यंपूजयेत् पीठदानंकुर्यात् तथायथाशक्त्याब्राह्मणान्भोजयेत् तेभ्योवस्त्रालंकारान्दद्यात्स्वयंवाग्यतोभूत्वाबंधुभिःसहभुंजीत॥ ॥इतिविष्णुपंचकव्रतोद्यापनंसंपूर्णम्॥

अथकोटिदीपदानविधिः स्कंदउवाच रुद्रसंख्याशिवायाथअर्पयेद्दीपमुत्तमम् वर्षमेकंतदर्धंवावर्षद्वयमथापिवा कोटिसंख्यार्धसंख्यावातदर्धंवास्वशक्तितः तस्यदीपस्यसंपूर्त्यैकुर्यादुद्यापनंबुधः उपवासंप्रकुर्वीतपूर्वस्मिन्दिवसेतदा कर्षमात्रसुवर्णेनतदर्धार्धेनवापुनः प्रतिमांशंकरस्याथउमयासहितस्यच कलशंस्थापयेद्रात्रौस्वस्तिवाचनपूर्वकम् आचार्यंवरयेत्तत्रअभिज्ञंवेदपारगम् उमामहेश्वरंचात्रस्थापयेत्कलशोपरि उपचारैःषोडशभिःपूजयित्वापृथक्पृथक् रात्रौजागरणंकुर्यात्पुराणश्रवणादिभिः प्रातःस्नानंविधायाथहोमशेषंसमारभेत् तिलैर्यवैश्चचरुणासर्पिषाबिल्वपत्रकैः आज्यप्लुतैश्चप्रत्येकंसद्योजातादिमंत्रतः शतमष्टोत्तरंहुत्वाहोमशेषंसमापयेत् उमामहेश्वरंदेवंपूजयेच्चपुनर्व्रती प्रतिमांवस्त्रसहितामाचार्यायनिवेदयेत् सहिरण्यांसवत्सांचधेनुंदद्यात्प्रयत्नतः अनेनविधिनायस्तुव्रतमेतत्समाचरेत् सभुक्त्वाविपुलान्भोगान्शिवसायुज्यमाप्नुयात् ब्राह्मणान्भोजयेत्पश्चाद्वस्त्रालंकारभूषणैः गुरोराज्ञांगृहीत्वातुसेष्टोभुंजीतमानवः एवंयःकुरुतेमर्त्योकोटिदीपप्रदीपनं नरोवाप्यथवानारीसोश्नुतेपदमव्ययं ज्ञानमुत्पद्यतेतस्यसंसारभयनाशनं सर्वपापक्षयकरंजन्मजन्मार्जितंबहु वाल्येवयसियत्पापंयौवनेवापियत्कृतम् वार्धकेपिकृतंपापंतत्सर्वंनश्यतिध्रुवं सर्वपापविनिर्मुक्तोभुक्त्वाभोगाननेकशः सर्वान्कामानवाप्याथसोश्नुतेपदमव्ययम् परममितिहासंपावनंतीर्थभूतंवृजिनविलयहेतुंयःशृणोतीहभक्त्या सभवतिखलुपूर्णैःसर्वकामैरभीष्टैर्जयतिचसुरलोकंदुर्लभंयज्ञसंघैः इतिश्रीस्कंदपुराणेकोटिदीपोद्यापनंसपूर्णम्

अथपार्थिवलिंगोद्यापनं नारदउवाच कथंपार्थिवपूजायाविधिर्ज्ञेयःसुरेश्वर किंफलंचास्यविज्ञेयंकथमुद्यापनंभवेत् कियत्कालंचकर्त

व्यंप्रारंभश्चकदाभवेत् कथयाशुमहादेवलोकानामुपकारकम् ईश्वरउवाच धर्मार्थकाममोक्षार्थंपार्थिवंपूजयेत्सदा मृदमानीयशुद्धांवैशर्करावर्जितांशुभां सिंच्योदकेनशुद्धेनमर्दयित्वातुवंदयेत् प्रारंभोस्यप्रकर्तव्योमाघमासेसितेतरे चतुर्दश्यांविशेषेणसर्वकार्यार्थसिद्धये अथवाश्रावणेमासिइंदुवारेशुभेग्रहे स्नात्वासंपूज्यगणपंस्वस्तिवाचनपूर्वकम् आजन्मपूजयेच्छंभुंसंवत्सरमथापिवा संपाद्यसर्वसंभारान्पूजयेन्मृन्मयंशुभम् शिवेतिमृदमादायमहेशोघट्टनेस्मृतः शंभुःप्रोक्तोप्रविष्टायांपिनाकीप्राणनेमतः शशिशेखरपूजायांवामदेवोपिधूमके विरूपाक्षोपिविज्ञेयोदीपदानेविशेषतः उपहारेकपर्दीस्यात्तांबूलेशितिकंठकः दक्षिणायामुमाकांतोनीललोहिर्विसर्जने एवंपूजाप्रकर्तव्यातंडुलैर्बिल्वपत्रकैः संवत्सरेतुसंपूर्णेउद्यापनविधिंचरेत् आचार्यंवरयेत्पूर्वंद्वादशान्नृत्विजस्ततः विरच्यलिंगतोभद्रंपंचवर्णैःशुभंस्मृतम् ब्रह्मादिस्थापनंकृत्वाकलशंस्थापयेत्ततः शिवप्रतिमासौवर्णीरजतस्यवृषस्ततः वस्त्रद्वयेनसंवेष्ट्यउपचारैस्तुशोडशैः पूजयित्वाविधानेनअधिवासनपूर्वकम् गीतवादित्रनिर्घोषैर्जागरंतत्रकारयेत् स्तोत्रैश्चविविधैःसूक्तैःपूजयेत्परमेश्वरम् चतुर्दशीदर्शयुक्तापारणेप्याधिकामता मृत्युंजयेतिमंत्रेणअग्नौहुत्वाचपायसं लिंगसंख्यादशांशेनहोमःकार्योविधानतः अथवानाममंत्रेणपायसंजुहुयाद्व्रती तर्पणंचप्रकर्तव्यंतद्दशांशेनसर्वदा मार्जनंतद्दशांशेनतद्दशांशेनभोजयेत् आचार्यंपूजयेद्भक्त्यावस्त्रालंकारभूषणैः धेनुंदद्यात्सवत्सांचशिवसंतोषहेतवे शिवरूपाश्चतेविप्रादक्षिणावस्त्रसंयुताः पूजयित्वाविधानेननमस्कुर्यात्पुनःपुनः शिवपीठंचतत्सर्वमाचार्यायनिवेदयेत् शिवभक्त्यात्मकंयस्माज्जगदेतच्चराचरं तस्मादेतेनमेसर्वंकरोतुभगवान्शिवः कैलासवासीगिरिशोभगवान्भक्तवत्सलः चराचरात्मकोलिंगरूपीदिशतुवांछितं इतिप्रार्थ्यततोविप्रान्नमस्कृत्वाविसर्जयेत् स्वयंभुंजीतवैभक्त्याबंधुवर्गैःसमन्वितः इतितेकथितंविप्रसर्वकामार्थसिद्धिदं शिवलोकंसमासाद्यतत्रैववसतेचिरं इतिभ०पार्थिवलिं०द्यापनंसंपूर्णम् व्रतार्केचिंतितानर्थान्शुभार्थंचविपश्चितान् बहून्प्रपंचितानर्थान्दर्शयामियथाक्रमं व्रतस्यलक्षणंचादौकालदेशौततःपरं व्रताधिकारिणःपश्चाद्व्रतध

मोस्ततःपरं उपवासश्चधर्मश्चहविष्याणिव्रतस्यच पंचरत्नस्वरूपंचपल्लवानांततःपरम् पंचगव्यस्वरूपंचमंत्रास्तत्रयथाक्रमं
पंचामृतस्वरूपंचषड्रसानांतथैवच गंधस्यभागमानंचदेवतानांयथाक्रमं सर्वगंधमितिप्रोक्तंयक्षकर्दमसंज्ञकं सर्वौषधीततःप्रो
क्तामंडलेपंचवर्णकं मृदःसप्तविधाःप्रोक्ताधातवश्चतथास्मृताः सप्तधान्यंततःप्रोक्तंयथाष्टादशसंख्यकं कुंभस्यलक्षणंपश्चात्प्रति
माद्रव्यतन्निधिः धान्यमानंततःप्रोक्तंकलशस्थापनेशुभं पूजाद्रव्याणिसर्वाणियथादैवतमादिशेत् धूपाश्चापितथाप्रोक्तादेवताभे
दतःपरं अनादेशेचसंख्यायाअष्टोत्तरशताधिका होमद्रव्यप्रतिनिधिर्मंत्रदेवतयोस्तथा कथनंचाप्यनादेशेद्रव्यप्रतिनिधेस्तथा
पवित्रलक्षणंपश्चात्तात्रसंख्याततःपरं धूपाश्चापितथाप्रोक्ताहोमयोग्याग्नयोपिच हेमरौप्यादिधातूनांधान्यानांमानमीरितं होम
द्रव्यस्यमानंचऋत्विजांवरणंतथा आचार्यकर्मकरणंअग्न्यावाहनमेवच सर्वतोभद्रसंज्ञंचलिंगतोभद्रमेवच अथमंडलदेवानांसु
द्राणांलक्षणानिच षोडशाद्युपचाराणांकथनंचपृथक्पृथक् विधिश्चोद्यापनेप्रोक्तोव्रतभंगेतथैवच उपर्युक्तपदार्थानामित्येवंपरिभा
षणं अथव्रतानिकथ्यंतेप्रतिपत्प्रभृतिक्रमात् चैत्रशुक्लप्रतिपदिसंवत्सरविधिःस्मृतः आरोग्यप्रतिपत्पश्चाद्विद्याप्रतिपदस्तथा तिल
कव्रतकंप्रोक्तंबिल्वरोटाख्यकंतथा दौहित्रप्रतिपत्प्रोक्तातत्रैवनवरात्रकं द्यूतप्रदिपदाप्रोक्ताततःस्कंदव्रतेस्मृता चंपाषष्ठीविधिस्तत्र
बलिराज्यमतःपरं पूजागोवर्धनस्याथप्रतिपद्यांयथाविधि ततोयमद्वितीयावैभ्रातृसंज्ञाततःपरं तृतीयायांततःप्रोक्तंसौभाग्यशयन
व्रतं गौर्यादोलोत्सवःप्रोक्तअक्षय्याख्याततःस्मृता स्वर्णगौरीततःप्रोक्ताहरितालिततःस्मृता बृहद्गौरीततःप्रोक्तासौभाग्याख्यात
तःपरं चतुर्थ्यामथसंप्रोक्तंश्रावणेकृष्णपंचके संकष्टाख्यव्रतंप्रोक्तंगणेशस्यशुभप्रदं श्रावणेशुक्लपक्षेतुदूर्वागणपतिर्द्विधा ततःसि
द्धिविनायख्यास्यमंताख्यानमेवच कपर्दीगणपतिःप्रोक्तोकरकाख्याततःस्मृता शुभाज्ञेयादशरथीततोगौरीतिसंज्ञिता वरदाख्या
ततोज्ञेयाशुक्लावैगणनायके संकष्टामाघकृष्णेतुचतुर्थ्यंगारकीतथा व्रतंचनागपंचम्यानागदष्टव्रतंतथा ऋषिपंचमिसंज्ञाख्यसु
पांगललितास्मृता वसंतपंचमीप्रोक्तामाघशुक्लेहरिप्रिया आद्यातुललिताषष्ठीकपिलाव्रतकंतथा स्कंदषष्ठीततःप्रोक्ताचंपाषष्ठीत

ततःस्मृता गंगाख्यासप्तमीप्रोक्ताशीतलासप्तमीततः मुक्ताभरणसंज्ञाख्यासरस्वत्याश्चपूजनं रथसप्तमीविज्ञेयाअचलासप्तमी
तथा पुत्रसंज्ञाचतत्रैवसप्तमीव्रतमुत्तमम् बुधाष्टमीततःप्रोक्तासैवगोकुलसंज्ञका ज्येष्ठाष्टमीततोज्ञेयादूर्वाष्टमीशुभप्रदा महाल
क्ष्मीस्ततःप्रोक्ताव्रतंषोडशवासरं महाष्टमीततःप्रोक्ताअशोकाष्टमिसंज्ञिका कालाष्टमीततोज्ञेयाभैरवाख्याशिवप्रिया नवमीरामवि
ख्यातासर्वपापहराशुभा ततोवैरामनामस्यलेखनंपूजनंशुभं नवमीशारदाप्रोक्तादुर्गासंख्याशुभप्रदा अक्षय्यनवमीसंज्ञाकार्त्ति
केशुक्लपक्षके ततोविवाहोधात्र्याश्चतुलस्याश्चशुभप्रदः ततोदशहरास्तोत्रंव्रतंदशहरंशुभं आशादशम्यथख्याताव्रतंदशवतारकं
दशमीविजयानामशम्यापात्राभिमानतः एकादशीततःप्रोक्तासनिर्णयशुभप्रदा निर्णयोद्वादशीनांचअष्टानांपरिकीर्त्तितः उद्यापनम
थोच्यंतेएकादश्याःशुभप्रदं शुक्लकृष्णाद्विधाप्रोक्तासामान्याद्वादशीतथा मार्गशीर्षादिमारभ्यकथनंह्यघनाशनं चतुर्विंशतिसंख्या
कमेकादशीव्रतंशुभं चतुर्विंशतिनामानिमहिमाचपृथक्पृथक् शयन्येकादशीप्रोक्ताचातुर्मास्यव्रतेशुभा व्रतानितत्रकथ्यंतेवार्षि-
कानिबहूनिच सोद्यापनानिसर्वाणिमानवानांशुभानिच भीष्मपंचकसंज्ञंचगोपद्माख्यव्रतंशुभं प्रबोधोवैतुलस्याश्चकर्त्तव्योवंश
वृद्धये द्वादश्योद्यथकथ्यंतेदमनाख्याशुभप्रदा वैशाखीयोगयुक्ताचेद्व्यतीपाताभिधामता आषाढीपारणेज्ञेयापवित्रारोपणंततः वा-
मनाख्याविशेषेणश्रवणेनसमन्विता ततोज्ञेयासुरूपावैद्वादशीपरिकीर्त्तिता त्रयोदशीजयाप्रोक्तापार्वतीपूजनेशुभा गोत्रिरात्रव्रतंप्रो
क्तंदशभेदाद्द्विधास्मृता अशोकाख्यंततःप्रोक्तंमहावारुणिकंततः शनिप्रदोषसंज्ञंचपक्षसंज्ञप्रदोषकं अनंगाख्याभिधाज्ञेयात्रयोदशी
शुभास्मृता चतुर्दशीमधौप्रोक्तास्नानेवैशिवसन्निधौ नृसिंहाख्याततःप्रोक्ताततोनंतचतुर्दशी रंभाव्रतेततःप्रोक्तानरकाख्याततः
परं वैकुंठाख्याततःप्रोक्ताचतुर्दशीशिवप्रिया शिवरात्रिस्ततोज्ञेयाशिवव्रतविधास्मृता पौर्णिमावटसावित्रीगोपद्माख्याततःपरं को
किलाव्रतमाहात्म्यंततोरक्षाभिधाःस्मृता उमामहेशाभिज्ञाचपौर्णमासीशुभप्रदा कोजागरंततःप्रोक्तंत्रिपुरोत्सवमग्रतः बत्तिशीपौर्णि
माज्ञेयाद्रोहिनाख्याततःपरं अमापिठोरिसंज्ञाख्यालक्ष्मीसंज्ञाततःपरं गौरीतपोव्रतंप्रोक्तममासोमेनसंयुता अर्धोदयस्ततःप्रोक्तः

अमावास्यांविशेषतः अतःपरंप्रवक्ष्यामिमलमासादिकंव्रतं स्वस्तिकाख्यंव्रतंपश्चात्संचवर्णैःसुशोभितं रविवारव्रतंपश्चाद्दाशादित्यव्रतंतथा ततोदानफलंप्रोक्तंभानुवारेमहत्फलं सोमवारव्रतंपश्चात्काम्यमोक्षंद्विधातथा विशेषेणेंदुवारेवैएकभुक्तिव्रतंततः भौमवासरसंज्ञंचततोवैभृगुवासरं शनैश्चरव्रतंपश्चात्व्यतीपातंततःपरं मासोपवासकंपश्चाद्धारणापारणाततः धान्यसंक्रमणंपश्चाल्लवणाख्यं ततःपरं भोगसंक्रमणंपश्चाद्रूपसंक्रमणंतथा तेजसंक्रमणंज्ञेयंसौभाग्याख्यंततःपरं प्रोक्तातांबूलसंक्रांतिर्मनोरथविधाततः अशोकाख्याततःप्रोक्ताआयुर्वृद्धिकरीततः धनसंक्रमणंप्रोक्तंकृसरान्नेनभोजनं ततोमकरमासेवैघृतस्नानंरवेःस्मृतं घृतकंबलदानंचदधिमंथनमेवच तांबूलस्यततोदानंसोद्यापनमुदाहृतं मौनव्रतंततोज्ञेयंप्रपादानंततःपरं लक्षपद्मंततःप्रोक्तंलक्षदीपास्ततःपरं लक्षदूर्वास्ततःप्रोक्ताःशिवलक्षपरिक्रमं प्रदक्षिणाविधिःप्रोक्तोह्यश्वत्थस्यबुधैस्ततः विष्णुप्रदक्षिणाःप्रोक्तास्तुलस्याश्चततःपरं विप्राग्निगोहनुमतःप्रदक्षिणमतःपरं लक्षबिल्वदलैःप्रोक्तंनानापुष्पैस्तुपूजनं तुलसीलक्षसंख्याकाविष्णुपूजाततःपरं बिल्ववर्तीततोज्ञेयारुद्रवर्तीततःपरं माणिक्यवर्तिसंज्ञंचविष्णुवर्तीततःपरं देहवर्तीततःप्रोक्तासर्ववर्तीततःस्मृता विष्णुसूर्यनमस्कारालक्षसंख्यास्ततःपरं मंगलाख्याततोगौरीमौनव्रतमतःपरं पंचधान्याख्यपूजावैशिवामुष्टिस्ततःपरं हस्तगौरीततोज्ञेयाकूष्मांडीचततःपरं कर्कटिकाततोज्ञेयाविष्णुपंचकसंज्ञकं कोटिदीपास्ततोज्ञेयाःपार्थिवोद्यापनंततः शिवमस्तुसर्वजगतःपरहितनिरताभवंतुभूतगणाः दोषाःप्रयांतुनाशंसर्वत्रजनःसुखीभवतु इतिश्रीविश्वनाथविरचितेव्रतराजार्केऽनुक्रमणिकासमाप्ता

अथसप्तधान्यलक्षपूजाविधिर्लिख्यते तिलसार्धलक्षसप्तकर्षैर्लक्षसंख्याभवति तिललक्षपूजनाद्वर्षषष्टिसहस्रंस्वर्गवासः १ तंडुलमणार्धेनलक्षःतस्यपूजनाद्वर्षचत्वारिंशच्चंद्रलोकवासः २ मुद्गमणार्द्धेनलक्षः तस्यपूजनाद्वर्षलक्षषष्टिस्वर्गवासः ३ माषमणार्द्धेनलक्षः तस्यपूजनाद्वर्षसहस्रंस्वर्गवासः ४ गोधूमकर्षविंशत्यालक्षः तस्यपूजनाद्वर्षाशीतिस्वर्गवासः ५ यवमणेनलक्षः तस्यपूजनाद्वर्षसहस्रपंचकंस्वर्गवासः ६ कर्पूरलक्षपूजनाच्छिवलोकंप्राप्यकल्पांतपर्यंतं पश्चाच्चक्रवर्ती ७ अथफलानांलक्षपूजा कदलीफल

लक्षपूजनाद्वर्षसहस्रंस्वर्गवासः पश्चाद्राजाभवेत् १ पूगीफललक्षपूजनाद्वर्षमेकंस्वर्गेवासः नारिंगीफललक्षपूजनाद्वर्षलक्षाष्टकंस्वर्गेवासः २ कर्कटीफललक्षपूजनाद्वर्षलक्षद्वयंस्वर्गेवासः पश्चान्महाराजोभवेत् ३ जांबीरलक्षपूजनेनवर्षशतत्रयंशिवपुरेवासः अनंतापतित्वंन्नभवति ४ बीजपूरलक्षपूजनाद्वर्षलक्षचतुष्टयंशिवपुरेवासः ५ लवंगपूजनाद्वर्षलक्षषट्कंशिवपुरेवासः ६ आखोटपूजनाद्वर्षसप्तलक्षकंशिवपुरेवासः पश्चाद्धनपुत्रादिप्राप्तिर्भवति ७ पनसलक्षपूजनाद्वर्षसहस्राष्टकंस्वर्गेवासः ८ रायफलपूजनाद्वर्षलक्षदशकंस्वर्गेवासः पश्चात्पृथिवीशोभवति ९ सहकारलक्षपूजनात्कोटिवर्षंस्वर्गेवासः १० जंबूफललक्षपूजनेनवर्षकोटिस्वर्गेवासः ११ एलाफललक्षपूजनेनद्वादशसहस्रंस्वर्गेवासः पश्चाच्चक्रवर्तीभवति १२ अखंडबिल्वपत्रलक्षपूजनात्कल्पांतंशिवपुरेवासः १३ जीरलक्षपूजनात्सप्तजन्मपर्यंतंसौभाग्यंपश्चाद्राज्यप्राप्तिः १४ इतिधान्यफललक्षपूजाविधिः अथ लक्षपूजोद्यापनं यथाशक्तिब्राह्मणभोजनंनारीकेलार्घ्यदानं गजध्वजपताकाशिवस्योपरिकार्याश्वेतवस्त्राच्छादनम् तत्राचार्यलक्षणं ह्रस्वंचवृषलंचैवमतिदीर्घंजडंतथा चेतसांचाभिषेक्तारंबधिरंहीनलिंगकं वेदहीनंदुराचारंमलिनंबहुभाषिणं निंदकंपिशुनंदक्षंअंधकंचविवर्जयेत् सपत्नीकंसपुत्रंचअनाचारमनिंदकं कर्मज्ञंदोषरहितंसंतुष्टंतुपरीक्षयेत् पूजांतेचततोहोमंतिलद्रव्येणकारयेत् ततस्त्वनंतरंपूजामाचार्येणैवकारयेत् यद्द्वारेमत्तमातंगावायुवेगास्तुरंगमाः पूर्णेंदुवदनानार्योलक्षपूजाविधेःफलं नमःशिवायशांतायसगणायससूनवे निवेदयामिचात्मानंत्वंगतिःपरमेश्वर भूमौस्खलितपादानांभूमिरेवावलंबनं त्वयिजातापराधानांत्वमेवशरणंमम ॥ इतिश्रीब्रह्मपुराणेलक्षपूजोद्यापनंसंपूर्णम् ॥ ॥ छ ॥ ॥ छ ॥ ॥

शके १७८५ रुधिरोद्गारीनामसंवत्सरे पौषेमासे कृष्णपक्षे त्रयोदश्यायांतिथौ भृगुवासरे तद्दिने इदंपुस्तकंसमाप्तं ॥ छ ॥ ॥
हाव्रतराजग्रंथरामवाडीचेनाक्यावर ज्ञानसागरछापखान्यांतछापूनप्रसिद्ध केलाअसे ॥ मुक्काम मुंबई ॥ ॥ छ ॥

॥ इतिव्रतराजःसमाप्तः ॥

```
[OrderDescription]
,CREATED=15.01.20 11:20
,TRANSFERRED=2020/01/15 at 12:24:11
,PAGES=600
,TYPE=STD
,NAME=S0002536
,Book Name=M-386-VRATRAJ
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
```

```
FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
```

```
FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
```

```
FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
```

```
FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF
,FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
```

```
FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
```

```
FILE130=00000130.TIF
,FILE131=00000131.TIF
,FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF
,FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF
,FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF
,FILE142=00000142.TIF
,FILE143=00000143.TIF
,FILE144=00000144.TIF
,FILE145=00000145.TIF
,FILE146=00000146.TIF
,FILE147=00000147.TIF
,FILE148=00000148.TIF
,FILE149=00000149.TIF
,FILE150=00000150.TIF
,FILE151=00000151.TIF
,FILE152=00000152.TIF
```

```
FILE153=00000153.TIF
,FILE154=00000154.TIF
,FILE155=00000155.TIF
,FILE156=00000156.TIF
,FILE157=00000157.TIF
,FILE158=00000158.TIF
,FILE159=00000159.TIF
,FILE160=00000160.TIF
,FILE161=00000161.TIF
,FILE162=00000162.TIF
,FILE163=00000163.TIF
,FILE164=00000164.TIF
,FILE165=00000165.TIF
,FILE166=00000166.TIF
,FILE167=00000167.TIF
,FILE168=00000168.TIF
,FILE169=00000169.TIF
,FILE170=00000170.TIF
,FILE171=00000171.TIF
,FILE172=00000172.TIF
,FILE173=00000173.TIF
,FILE174=00000174.TIF
,FILE175=00000175.TIF
```

```
FILE176=00000176.TIF
,FILE177=00000177.TIF
,FILE178=00000178.TIF
,FILE179=00000179.TIF
,FILE180=00000180.TIF
,FILE181=00000181.TIF
,FILE182=00000182.TIF
,FILE183=00000183.TIF
,FILE184=00000184.TIF
,FILE185=00000185.TIF
,FILE186=00000186.TIF
,FILE187=00000187.TIF
,FILE188=00000188.TIF
,FILE189=00000189.TIF
,FILE190=00000190.TIF
,FILE191=00000191.TIF
,FILE192=00000192.TIF
,FILE193=00000193.TIF
,FILE194=00000194.TIF
,FILE195=00000195.TIF
,FILE196=00000196.TIF
,FILE197=00000197.TIF
,FILE198=00000198.TIF
```

```
FILE199=00000199.TIF
,FILE200=00000200.TIF
,FILE201=00000201.TIF
,FILE202=00000202.TIF
,FILE203=00000203.TIF
,FILE204=00000204.TIF
,FILE205=00000205.TIF
,FILE206=00000206.TIF
,FILE207=00000207.TIF
,FILE208=00000208.TIF
,FILE209=00000209.TIF
,FILE210=00000210.TIF
,FILE211=00000211.TIF
,FILE212=00000212.TIF
,FILE213=00000213.TIF
,FILE214=00000214.TIF
,FILE215=00000215.TIF
,FILE216=00000216.TIF
,FILE217=00000217.TIF
,FILE218=00000218.TIF
,FILE219=00000219.TIF
,FILE220=00000220.TIF
,FILE221=00000221.TIF
```

```
FILE222=00000222.TIF
,FILE223=00000223.TIF
,FILE224=00000224.TIF
,FILE225=00000225.TIF
,FILE226=00000226.TIF
,FILE227=00000227.TIF
,FILE228=00000228.TIF
,FILE229=00000229.TIF
,FILE230=00000230.TIF
,FILE231=00000231.TIF
,FILE232=00000232.TIF
,FILE233=00000233.TIF
,FILE234=00000234.TIF
,FILE235=00000235.TIF
,FILE236=00000236.TIF
,FILE237=00000237.TIF
,FILE238=00000238.TIF
,FILE239=00000239.TIF
,FILE240=00000240.TIF
,FILE241=00000241.TIF
,FILE242=00000242.TIF
,FILE243=00000243.TIF
,FILE244=00000244.TIF
```

```
FILE245=00000245.TIF
,FILE246=00000246.TIF
,FILE247=00000247.TIF
,FILE248=00000248.TIF
,FILE249=00000249.TIF
,FILE250=00000250.TIF
,FILE251=00000251.TIF
,FILE252=00000252.TIF
,FILE253=00000253.TIF
,FILE254=00000254.TIF
,FILE255=00000255.TIF
,FILE256=00000256.TIF
,FILE257=00000257.TIF
,FILE258=00000258.TIF
,FILE259=00000259.TIF
,FILE260=00000260.TIF
,FILE261=00000261.TIF
,FILE262=00000262.TIF
,FILE263=00000263.TIF
,FILE264=00000264.TIF
,FILE265=00000265.TIF
,FILE266=00000266.TIF
,FILE267=00000267.TIF
```

```
FILE268=00000268.TIF
,FILE269=00000269.TIF
,FILE270=00000270.TIF
,FILE271=00000271.TIF
,FILE272=00000272.TIF
,FILE273=00000273.TIF
,FILE274=00000274.TIF
,FILE275=00000275.TIF
,FILE276=00000276.TIF
,FILE277=00000277.TIF
,FILE278=00000278.TIF
,FILE279=00000279.TIF
,FILE280=00000280.TIF
,FILE281=00000281.TIF
,FILE282=00000282.TIF
,FILE283=00000283.TIF
,FILE284=00000284.TIF
,FILE285=00000285.TIF
,FILE286=00000286.TIF
,FILE287=00000287.TIF
,FILE288=00000288.TIF
,FILE289=00000289.TIF
,FILE290=00000290.TIF
```

```
FILE291=00000291.TIF
,FILE292=00000292.TIF
,FILE293=00000293.TIF
,FILE294=00000294.TIF
,FILE295=00000295.TIF
,FILE296=00000296.TIF
,FILE297=00000297.TIF
,FILE298=00000298.TIF
,FILE299=00000299.TIF
,FILE300=00000300.TIF
,FILE301=00000301.TIF
,FILE302=00000302.TIF
,FILE303=00000303.TIF
,FILE304=00000304.TIF
,FILE305=00000305.TIF
,FILE306=00000306.TIF
,FILE307=00000307.TIF
,FILE308=00000308.TIF
,FILE309=00000309.TIF
,FILE310=00000310.TIF
,FILE311=00000311.TIF
,FILE312=00000312.TIF
,FILE313=00000313.TIF
```

```
FILE314=00000314.TIF
,FILE315=00000315.TIF
,FILE316=00000316.TIF
,FILE317=00000317.TIF
,FILE318=00000318.TIF
,FILE319=00000319.TIF
,FILE320=00000320.TIF
,FILE321=00000321.TIF
,FILE322=00000322.TIF
,FILE323=00000323.TIF
,FILE324=00000324.TIF
,FILE325=00000325.TIF
,FILE326=00000326.TIF
,FILE327=00000327.TIF
,FILE328=00000328.TIF
,FILE329=00000329.TIF
,FILE330=00000330.TIF
,FILE331=00000331.TIF
,FILE332=00000332.TIF
,FILE333=00000333.TIF
,FILE334=00000334.TIF
,FILE335=00000335.TIF
,FILE336=00000336.TIF
```

```
FILE337=00000337.TIF
,FILE338=00000338.TIF
,FILE339=00000339.TIF
,FILE340=00000340.TIF
,FILE341=00000341.TIF
,FILE342=00000342.TIF
,FILE343=00000343.TIF
,FILE344=00000344.TIF
,FILE345=00000345.TIF
,FILE346=00000346.TIF
,FILE347=00000347.TIF
,FILE348=00000348.TIF
,FILE349=00000349.TIF
,FILE350=00000350.TIF
,FILE351=00000351.TIF
,FILE352=00000352.TIF
,FILE353=00000353.TIF
,FILE354=00000354.TIF
,FILE355=00000355.TIF
,FILE356=00000356.TIF
,FILE357=00000357.TIF
,FILE358=00000358.TIF
,FILE359=00000359.TIF
```

```
FILE360=00000360.TIF
,FILE361=00000361.TIF
,FILE362=00000362.TIF
,FILE363=00000363.TIF
,FILE364=00000364.TIF
,FILE365=00000365.TIF
,FILE366=00000366.TIF
,FILE367=00000367.TIF
,FILE368=00000368.TIF
,FILE369=00000369.TIF
,FILE370=00000370.TIF
,FILE371=00000371.TIF
,FILE372=00000372.TIF
,FILE373=00000373.TIF
,FILE374=00000374.TIF
,FILE375=00000375.TIF
,FILE376=00000376.TIF
,FILE377=00000377.TIF
,FILE378=00000378.TIF
,FILE379=00000379.TIF
,FILE380=00000380.TIF
,FILE381=00000381.TIF
,FILE382=00000382.TIF
```

```
FILE383=00000383.TIF
,FILE384=00000384.TIF
,FILE385=00000385.TIF
,FILE386=00000386.TIF
,FILE387=00000387.TIF
,FILE388=00000388.TIF
,FILE389=00000389.TIF
,FILE390=00000390.TIF
,FILE391=00000391.TIF
,FILE392=00000392.TIF
,FILE393=00000393.TIF
,FILE394=00000394.TIF
,FILE395=00000395.TIF
,FILE396=00000396.TIF
,FILE397=00000397.TIF
,FILE398=00000398.TIF
,FILE399=00000399.TIF
,FILE400=00000400.TIF
,FILE401=00000401.TIF
,FILE402=00000402.TIF
,FILE403=00000403.TIF
,FILE404=00000404.TIF
,FILE405=00000405.TIF
```

```
FILE406=00000406.TIF
,FILE407=00000407.TIF
,FILE408=00000408.TIF
,FILE409=00000409.TIF
,FILE410=00000410.TIF
,FILE411=00000411.TIF
,FILE412=00000412.TIF
,FILE413=00000413.TIF
,FILE414=00000414.TIF
,FILE415=00000415.TIF
,FILE416=00000416.TIF
,FILE417=00000417.TIF
,FILE418=00000418.TIF
,FILE419=00000419.TIF
,FILE420=00000420.TIF
,FILE421=00000421.TIF
,FILE422=00000422.TIF
,FILE423=00000423.TIF
,FILE424=00000424.TIF
,FILE425=00000425.TIF
,FILE426=00000426.TIF
,FILE427=00000427.TIF
,FILE428=00000428.TIF
```

```
FILE429=00000429.TIF
,FILE430=00000430.TIF
,FILE431=00000431.TIF
,FILE432=00000432.TIF
,FILE433=00000433.TIF
,FILE434=00000434.TIF
,FILE435=00000435.TIF
,FILE436=00000436.TIF
,FILE437=00000437.TIF
,FILE438=00000438.TIF
,FILE439=00000439.TIF
,FILE440=00000440.TIF
,FILE441=00000441.TIF
,FILE442=00000442.TIF
,FILE443=00000443.TIF
,FILE444=00000444.TIF
,FILE445=00000445.TIF
,FILE446=00000446.TIF
,FILE447=00000447.TIF
,FILE448=00000448.TIF
,FILE449=00000449.TIF
,FILE450=00000450.TIF
,FILE451=00000451.TIF
```

```
FILE452=00000452.TIF
,FILE453=00000453.TIF
,FILE454=00000454.TIF
,FILE455=00000455.TIF
,FILE456=00000456.TIF
,FILE457=00000457.TIF
,FILE458=00000458.TIF
,FILE459=00000459.TIF
,FILE460=00000460.TIF
,FILE461=00000461.TIF
,FILE462=00000462.TIF
,FILE463=00000463.TIF
,FILE464=00000464.TIF
,FILE465=00000465.TIF
,FILE466=00000466.TIF
,FILE467=00000467.TIF
,FILE468=00000468.TIF
,FILE469=00000469.TIF
,FILE470=00000470.TIF
,FILE471=00000471.TIF
,FILE472=00000472.TIF
,FILE473=00000473.TIF
,FILE474=00000474.TIF
```

```
FILE475=00000475.TIF
,FILE476=00000476.TIF
,FILE477=00000477.TIF
,FILE478=00000478.TIF
,FILE479=00000479.TIF
,FILE480=00000480.TIF
,FILE481=00000481.TIF
,FILE482=00000482.TIF
,FILE483=00000483.TIF
,FILE484=00000484.TIF
,FILE485=00000485.TIF
,FILE486=00000486.TIF
,FILE487=00000487.TIF
,FILE488=00000488.TIF
,FILE489=00000489.TIF
,FILE490=00000490.TIF
,FILE491=00000491.TIF
,FILE492=00000492.TIF
,FILE493=00000493.TIF
,FILE494=00000494.TIF
,FILE495=00000495.TIF
,FILE496=00000496.TIF
,FILE497=00000497.TIF
```

```
FILE498=00000498.TIF
,FILE499=00000499.TIF
,FILE500=00000500.TIF
,FILE501=00000501.TIF
,FILE502=00000502.TIF
,FILE503=00000503.TIF
,FILE504=00000504.TIF
,FILE505=00000505.TIF
,FILE506=00000506.TIF
,FILE507=00000507.TIF
,FILE508=00000508.TIF
,FILE509=00000509.TIF
,FILE510=00000510.TIF
,FILE511=00000511.TIF
,FILE512=00000512.TIF
,FILE513=00000513.TIF
,FILE514=00000514.TIF
,FILE515=00000515.TIF
,FILE516=00000516.TIF
,FILE517=00000517.TIF
,FILE518=00000518.TIF
,FILE519=00000519.TIF
,FILE520=00000520.TIF
```

```
FILE521=00000521.TIF
,FILE522=00000522.TIF
,FILE523=00000523.TIF
,FILE524=00000524.TIF
,FILE525=00000525.TIF
,FILE526=00000526.TIF
,FILE527=00000527.TIF
,FILE528=00000528.TIF
,FILE529=00000529.TIF
,FILE530=00000530.TIF
,FILE531=00000531.TIF
,FILE532=00000532.TIF
,FILE533=00000533.TIF
,FILE534=00000534.TIF
,FILE535=00000535.TIF
,FILE536=00000536.TIF
,FILE537=00000537.TIF
,FILE538=00000538.TIF
,FILE539=00000539.TIF
,FILE540=00000540.TIF
,FILE541=00000541.TIF
,FILE542=00000542.TIF
,FILE543=00000543.TIF
```

```
FILE544=00000544.TIF
,FILE545=00000545.TIF
,FILE546=00000546.TIF
,FILE547=00000547.TIF
,FILE548=00000548.TIF
,FILE549=00000549.TIF
,FILE550=00000550.TIF
,FILE551=00000551.TIF
,FILE552=00000552.TIF
,FILE553=00000553.TIF
,FILE554=00000554.TIF
,FILE555=00000555.TIF
,FILE556=00000556.TIF
,FILE557=00000557.TIF
,FILE558=00000558.TIF
,FILE559=00000559.TIF
,FILE560=00000560.TIF
,FILE561=00000561.TIF
,FILE562=00000562.TIF
,FILE563=00000563.TIF
,FILE564=00000564.TIF
,FILE565=00000565.TIF
,FILE566=00000566.TIF
```

```
FILE567=00000567.TIF
,FILE568=00000568.TIF
,FILE569=00000569.TIF
,FILE570=00000570.TIF
,FILE571=00000571.TIF
,FILE572=00000572.TIF
,FILE573=00000573.TIF
,FILE574=00000574.TIF
,FILE575=00000575.TIF
,FILE576=00000576.TIF
,FILE577=00000577.TIF
,FILE578=00000578.TIF
,FILE579=00000579.TIF
,FILE580=00000580.TIF
,FILE581=00000581.TIF
,FILE582=00000582.TIF
,FILE583=00000583.TIF
,FILE584=00000584.TIF
,FILE585=00000585.TIF
,FILE586=00000586.TIF
,FILE587=00000587.TIF
,FILE588=00000588.TIF
,FILE589=00000589.TIF
```

```
FILE590=00000590.TIF
,FILE591=00000591.TIF
,FILE592=00000592.TIF
,FILE593=00000593.TIF
,FILE594=00000594.TIF
,FILE595=00000595.TIF
,FILE596=00000596.TIF
,FILE597=00000597.TIF
,FILE598=00000598.TIF
,FILE599=00000599.TIF
,FILE600=00000600.TIF
,
```